M.M. ŚIVAKUMĀRAŚĀSTRI-GRANTHAMĀLĀ

[Vol. 5]

NYĀYAMAÑJARĪ

of

JAYANTA BHAṬṬA

[PART ONE]

WITH THE COMMENTARY OF 'GRANTHIBHAṄGA'

by

CAKRADHARA

EDITED BY

GAURINATH SASTRI

VARANASI

1982

Published by—
DR. BHĀGĪRATHA PRASADA TRIPAṬHĪ 'VĀGĪŚA ŚASTRĪ'
Research Publication Supervisor,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi.

Available at—
Sales Department,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi-221002 (India).

First Edition : 1100 Copies.
Price Rs. 64.00

Printed by—
Ghan Shyam Upadhyaya
Manager,
Sampurnanand Sanskrit Vishvavidyalaya Press,
Varanasi.

म० म० शिवकुमारशास्त्रि-ग्रन्थमाला

[पञ्चमं पुष्पम्]

जयन्तभट्टप्रणीता

न्यायमञ्जरी

[प्रथमो भागः]

चक्रधरविरचितया

ग्रन्थिभङ्गव्याख्यया

संवलिता

सम्पादकः

श्रीगौरीनाथशास्त्री

वाराणस्याम्

२०३९ तमे वैक्रमाब्दे १९०४ तमे शकाब्दे १९८२ तमे ख्रैस्ताब्दे

प्रकाशकः—
डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
अनुसन्धानप्रकाशनपर्यवेक्षकः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी।

प्राप्तिस्थानम्—
विक्रयविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य,
वाराणसी–२२१००२.

प्रथमं संस्करणम्, ११०० प्रतिरूपाणि
मूल्यम्—६४.०० रूप्यकाणि

मुद्रकः—
घनश्याम उपाध्यायः,
व्यवस्थापकः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयीयमुद्रणालयस्य

PREFACE

I

The Nyāyamañjarī of Jayantabhaṭṭa is an epoch-making work on Indian logic. The book was first published in the Vizianagram Sanskrit Series, Varanasi in 1895 under the editorship of MM Gangadhara Shastri of hallowed memory. The introduction contains many useful points which throw much light on the author and the work. Decades after the book was re-edited by Pandit Surya Narayana Shukla in the Chowkhamba Sanskrit Series, Varanasi. It was also reprinted in the same series in 1971. It is, however, unfortunate that all these editions suffered from misprints which at times create difficulties for readers in determining the correctness of the abstruse text.

It has been, however, a matter of great satisfaction that the only available commentary, 'Granthibhaṅga', by Cakradhara edited by Nagin J. Shah has been published by L. D. Institute of Indology, Ahmedabad in 1972. The importance of this commentary lies in this that the commentator has taken special care in not only explaining the knotty points but also in identifying the writers not mentioned by name in the original text, besides giving a few important historical data. It is, therefore, in the fitness of things that we have proposed to bring out this edition of Nyāyamañjarī with the commentary 'Granthibhaṅga' which will enable our readers to study the work more thoroughly and conveniently than before as both the text and the commentary are being made available to them in this edition.

The plan of this edition is as follows : This is the first volume of the text containing the first four Āhnikas. The

rest, i. e., Āhnikas V–XII, will be published in two more volumes. In the beginning, we have given, in a separate sectiom, a summary in Sanskrit of all the important issues discussed in the body of the text. We have added three sections in the end dealing with (i) an index of proper names, (ii) an index showing the identifications of the quotations and (iii) an index containing the different literary expressions bearing eloquent testimony to the humorous style in which the author revels in referring to rival philosophers.

II

The Sūtras of Gotama together with the Bhāṣya of Vātsyāyana, the Vārttika of Uddyotakara, the Tātparyaṭīkā of Vācaspati Miśra and the Tātparyapariśuddhi of Udayanācārya form the cardinal texts of the older school of Indian logic (prācīna nyāya). Though the Nyāyamañjarī of Jayantabhaṭṭa has found its place of honour in the curriculum of Nyāya-study in our country during the past few decades, it may be mentioned that in the earlier decades of the present century eminent traditional scholars were not familiar with the text the value and importance of which is comparable to the Ślokavārttika of Kumārila and the Pramāṇa-vārttika of Dharmakīrti.

Jayantabhaṭṭa is a most redoubtable champion of the Nyāya system of Indian philosophy. But, his is a versatile personality beaming with a catholicity of out-look so very rare in scholars of any age and clime. It is remarkable that as he surveys, analyzes and elucidates the views of his opponents, he does it with matchless precision and integrity leaving no chance for a complaint that the presentation is not upto the mark or misleading. It is more often than not that he restates the views of his opposite schools with such clarity of exposition as may not be available in their own texts. But, he

moves like one firmly rooted in his own conviction and whoever may be the opponent and whatever may be the lines of his arguments, aggressive or defensive, he possesses enough self-confidence to counteract them squarely with consummate skill and trenchant dialectics. And, this self-confidence is born of a first-hand acquaintance with the literature of every branch of Sanskrit, both orthodox and heterodox. In this context particular mention may be made of the Vedic traditions he inherited from his fore-fathers, both theoretical and ritualistic. Besides, an enviable mastery over the system of Mīmāṁsā on the one hand and the Buddhist and Jaina systems on the other, contributed so much to the building up of a radiant stature of his own. What was still unique in that is that it was all graceful as it was imbued with humility springing from within and not inspired by convention. His humorous expressions which are so frequent and spontaneous are indicative of the genial personality that he was which could draw the readers to his side to witness and appreciate the onslaughts of his powerful dialectics against the views of his adversaries.

Jayanta is an astute logician but his is a most astounding scholarship as well. His style of writing convinces the reader spontaneously of his mastery in grammar and literary art. He writes with ease and displays the rare quality of presenting the most abstruse points of logic in a literary style that provides maximum relief to the reader for the understanding of the text. Unlike most of the dialecticians he is never brief but elaborates the views of his opponents with unbelievable integrity before he sets out to offer his own criticism and finally declares what he considers to be the most satisfactory solution of the problem. It needs to be observed in this context that wherever he sees the cogency in the arguments advanced by any of his opponents he possesses the catholicity in him to admire the same; and, even when he chooses to reject

his expressions are full of humour and do not smack of bad taste and discourtesy on any account.

Brought up in Vedic traditions Jayanta evinces deep scholarship in and love for the Vedic lore. When he seeks to establish the authority of the Vedas he feels that he can do so more convincingly than any Mīmāṁsaka by placing his claims on a more secure foundation acceptable to his critics and opponents. Particular mention must be made of how he advances his arguments in recognition of the authority of Atharvaveda which has led scholars to presume that he inherits its traditions and owes his personal allegiance to the same. Jayanta's mastery over the Pūrvamīmāṁsā system is unique His solid self-confidence enables him to criticise Kumārila with courage and conviction and refute his view in a manner that exhibits the sharp power of analytical judgement. Besides, his acquaintance with the school of Diṅnāga and Dharmakīrti is so thorough-going and his presentation of the views of the Buddhists is so precise, methodical and intimate that it leaves the impression that his intellectual honesty and fairness is above all suspicion.

As a writer on Nyāya he has three works to his credit. Besides Nyāyamañjarī, his other two works are Nyāyakalikā[1] and Nyāyapallava. The former was published in Saraswati Bhavana Texts Series (17) on the basis of a manuscript in Saraswati Bhavana Library. Obviously, this is a work intended for the beginner. There are quotations of seven verses of Nyāyapallava. Jayanta's Āgamaḍambara is a play in four acts, which reveals his poetic gifts. There is an elegance in his prose style and the employment of the different figures

---

1. The work is an abstract summary of Nyāya-views on the sixteen categories and gives a bare outline of the author's own interpretation, appearing at greater length in the Mañjarī on Gotama's Sūtras dealing with these categories.

of speech and metres reveals his skill in the art of poetry. The Vṛtti on Aṣṭādhyāyī is mentioned by Abhinanda in his Kādambarī-kathā-sāra. But, Jayanta's reputation as the author of Vṛtti on Pāṇini is yet to be found out.

III

Scholars are familiar with the Nyāyamañjarī of Jayantabhaṭṭa whom Udayanācārya describes as a Jaran-naiyāyika. While writing his gloss on Vācaspati's commentary on Nyāyasūtra I. i. 6. Udayana states that the commentator has explained the text in the light of the view of Jayantabhaṭṭa, author of Nyāyamañjarī. As there is hardly any document at our disposal to challenge the propriety of this statement of Udayana identifying Jayanta as the author of Nyāyamañjarī as also of Vācaspati explaining the text after Jayantabhaṭṭa, it may be asserted that Vācaspati was posterior to Jayantabhaṭṭa who is an age-old logician.

It may be pointed out in this context that there was yet another Nyāyamañjarī from the pen of Trilocana, preceptor of Vācaspati, which has been twice mentioned by Jñāna-Śrī-Mitra, once in the tract "Īśvaravāda" and a second time in the tract "Īśvaravādādhikārasaṁkṣepa-dūṣaṇa". In the first instance Jñāna-Śrī mentions Trilocana as the author of Nyāyamañjarī; in the second instance he points out that the counter-attack in Mañjarī is out of context. On this second occasion he does not think it necessary to repeat that the writer of Mañjarī is Trilocana, as he has already mentioned it. Jñāna-Śrī is also aware of Vācaspati as the writer of the commentary, Tātparyaṭīkā on Nyāyadarśana. But, it is worthy of notice that he does neither take the name of Jayantabhaṭṭa nor of his work, Nyāyamañjarī. This silence on his part may be explained in different ways. Firstly, Jñāna-Śrī was familiar with the traditions of Trilocana and Vācaspati and focussed his attention on them

while criticising the opponents' views. He did not think it necessary to review the positions of others but remained satisfied with what he considered adequate for his purpose. Even if Jayanta were earlier than him he might have not taken notice of his views in particular to examine them critically and state his reactions to the same. Secondly, Jayantabhaṭṭa might have been his contemporary, senior or junior, and, as such, his work might not have attracted his attention. Thirdly, Jayantabhaṭṭa was posterior to him. In either of the last two cases, Udayana's reference as quoted earlier will have to be taken with a grain of salt. Udayana could not have worked under a delusion when he mentioned Jayanta as the author of Nyāyamañjarī whose view was endorsed by Vācaspati while explaining a text of the Nyāyasūtra. If in any case Vācaspati were anterior to Jayantabhaṭṭa, we are to change Udayana's statement and read the Nyāyamañjarī of Trilocana for the Nyāyamañjarī of Jayantabhaṭṭa. It may, however, be mentioned here that instances are not rare when even master writers are found to be unmindful of the correctness of the references that they choose to cite.

Aniruddha in his Vivaraṇa-pañjikā on the Vātsyāyana-Bhāṣya, Uddyotakara-Vārttika and the Tātparyaṭīkā of Vāscaspati describes Jayanta as the author of Nyāyamañjarī on numberless occasions. But, he has not written any commentary on Udayana's Tātparya-pariśuddhi. It is quite likely that Udayana is posterior to him. Had Udayana been earlier than him we could have expected a gloss on that work from his pen. It is on the authority of Aniruddha who in all likelihood appears to be earlier than Udayana that one may be inclined to put Jayantabhaṭṭa before Vāscaspati.

Jayanta has pointed out the defects in the definition of perception as recorded in Sāṅkhyakārikā. Later on he discusses the propriety or otherwise of the explanation of a text by

one whom he calls Rājā. According to Cakradhara, the commentator of Nyāyamañjarī, Rājā means Rāja-vārttika-kāra. We find the text in Yuktidīpikā, the well-known commentary on Sāṅkhyakārikā which is more or less a work of the type of a Vārttika. It may not, therefore, be unwise to identify this work with what Cakradhara describes as Rāja-Vārttika. It is worthy of note that Jayanta has neither mentioned the name of any particular person as the writer of the work nor the author of the Yuktidīpikā is known to us. It is suggested that the expression Rājā may refer to one King Mihirabhoja who lived towards the close of the ninth century and who was known for his scholarship in the Śāstras.

Jayantabhaṭṭa was a devout Śaiva (Candrakalāvacūla-caraṇādhyāyī)[1]. He describes himself as the son of Candra who had the loveliness of the moon and whose fame extended upto the extremities of the quarters[2] and was a devotee of the moon-crested Lord Śiva. Candra's father was Kalyāṇasvāmin[3] who was born to Śaktisvāmin,[4] son of Mitra. Mitra's father was Śakti who is reported to have migrated to Kashmir from Gauḍa-deśa.[5] Jayanta's son is Abhinanda, author of Kādambarī-kathā-sāra.

---

1. It is to be noted that he was a redoubtable realist and not a monist. He had every respect for the Āgamas but he did not belong to the Pratyabhijñā school.
2. Vide, penultimate stanza of the work.
3. An adept in Vedic lore and an eminent ritualist.
4. A man of great learning and Minister of King Muktāpīḍa of the Karkoṭa dynasty.
5. In the introduction to Nyāyakalikā MM Ganganath Jha writes: The fact becomes all the more interesting when it is remembered that his ancestors hailed from Bengal which was the stronghold of Mahāyānic Buddhist culture in those days.

Jayanta describes himself as the minister of King Śaṅkaravarman (885-902 A. D.) of Kashmir.[1] He is full of respect for the king and calls him 'dharmatattvajña'[2] as he could drive out the sect of Nīlāmbaras who were addicted to bad practices.[3] It is not understood why Kalhaṇa does not mention the name of Jayanta as the minister or adviser of King Śaṅkaravarman. Jayanta records his appreciation of the poetry of Kālidāsa[4] and mentions Kumārasambhava[5]. He mentions Bāṇa[6] in highest terms. He names Māgha, the poet of Śiśupālavadha and quotes from the poem.[7] Jayanta seems to be acquainted with the Dhvani-theory; but, he does not mention the name of Ānandavardhana.[8] He mentions Kuṭṭinīmata which is the work of Dāmodaragupta.[9] Cakradhara, the commentator identifies Suśikṣitacārvāka with Udbhaṭa who was a Sabhāpati of King Jayāpiḍa.[10] And Jayanta's reference to one Cārvākadhūrta is identified by him with Udbhaṭa.[11]

---

1 p. 388. l. 26

2. p 388. l. 25

3. p. 388. ll. 23-4

4. p. 332. ll. 11-12

5. p. 331. l. 1

6. p. 332. l. 13

7. p. 130. ll. 6-8

8. Yam anyaḥ paṇḍitammanyaḥ prapede kañcana dhvaniṁ. Obviously the fling is at Ānandavardhana. p. 76 l. 3 Athavā ne'dṛśī carcā kavibhis saha śobhate. p. 78 l. 3

9. p. 338. l. 22. Dāmodara was a minister of King Jayāpīḍa.

10. p. 52 l. 26

11. p. 100 l. 19

IV

Before we close, we propose to refer to one text of the Nyāyamañjarī which to our mind does not appear to have been properly interpreted in the past and calls for further investigation.

Rājñā tu gahvare' smin niśśabdake bandhane vinihito'ham
Grantharacanāvinodād iha hi mayā vāsarā gamitāḥ.

'I have been placed in confinement by the King in this cave where sound cannot enter. (But) I have passed (my) days here by the diversion of writing books'.

The plain meaning of the text is as follows : The King referred to is King Śaṅkaravarman of Kashmir, patron of Jayantabhaṭṭa, author of the Nyāyamañjarī which book he wrote while he was serving out a term of imprisonment in a cell where no sound could ever enter.

According to the description recorded in Kalhaṇa's Rājataraṅgiṇī, King Śaṅkaravarman started his career very well. He had a burning desire to win fresh laurels in victory and extend the bounds of his kingdom. His lust for fame and wealth, however. brought about a change in his character. He grew unpopular because of exacting fiscal impositions on his subjects. Even his son, Gopālavarman, once told him that he was not living a commendable life. It is, however, most striking that Jayantabhaṭṭa has all praise for him, his patron. He did not mention any of his vices; to the contrary, he described him as 'dharmatattvajña', for he could drive away those people who were called Nīlāmbaravratins. It is

worthy of note that Jayanta did not even once show any disrespect to his patron. It is said that Jayanta was an exceptionally good person ; so much so that he refrained from referring to the vices of his patron and remained indifferent. But, even then it is not understood why and how he incurred the displeasure of the King to such an extent that the latter could throw him in confinement to pass his days in utter seclusion. Furthermore, it is to be investigated how far the modern amenities accorded to prisoners in jail could have been made available to them in medieval days when the conditions of life in imprisonment were so very different from what they are now. One of our much esteemed and beloved professors reminds us in this context of Lokamānya Bālagaṅgādhara Tilak who wrote his masterly work, Gītārahasya, while serving out a term of imprisonment. He writes further to mention that it was most unfortunate that Jayantabhaṭṭa was the victim of the cruel tyrrany of a royal despot but he does not appear to offer any satisfactory explanation of how this could at all happen particularly when Jayanta was full of admiration for his master and seemed to have enjoyed his confidence too.[1]

Under the circumstances, we propose to review the situation and see whether some new light could be thrown on the interpretation of the verse in question. Stein in one of his notes on the Rājataraṅgiṇī writes as follows : It is certain that the passes leading into Kashmir were under the charge of high officers designated as 'dvārādhipa,' 'dvārapati',

1. Calcutta Review, Vol. XL, No. 2, Agu. 1931

'dvāreśa', etc., etc. High importance was attached to the guarding of the passes ensuring peace and prosperity of the State. The mountain barriers which enclose Kashmir like great walls leave but a small number of approaches for a foreign invasion. The history of Kashmir down to the present century shows clearly that it was on the defence of these approaches that the safety of the valley has always depended. It is, therefore, understood why the protection of these passes and the general command over the watch-stations established on them should have been entrusted to special high officers. It is not at all unlikely that King Śaṅkaravarman sometime felt it necessary to appoint even Jayantabhaṭṭa his minister and adviser, to guard against the Khasas who, as Stein says, were most troublesome neighbours. It is worthy of notice that the commentator states it clearly that Jayanta had to spend his time in the country of the Khasas under orders from the King. The place where he had to stay was a dense forest. Jayantabhaṭṭa describes the place as extremely lonely where no sound can enter from outside. The loneliness of the place inside a gorge or ravine inspired him so much that he thought it proper to utilize the time by writing this important work. The calm and serene atmosphere was best suited to the purpose.

× × × ×

On this occasion of the publication of this important treatise the Editor feels it imperative to express his grati-

tude to Paṇḍita Vibhūtibhūṣaṇa Nyāyācārya who has rendered invaluable service in seeing the work through the press. Thanks are due to Paṇḍitarāja S. Subrahmaṇya Śāstrin for offering valuable suggestions for improvement of readings of the abstruse text.

Gaurinath

उपोद्घातः

न्यायदर्शनप्रकाशकेषु ग्रन्थेषु प्रधानं स्थानं भजते न्यायमञ्जरी । 'रुचिरां न्यायमञ्जरीं प्रसवित्रे गुरवे नमः' इति श्रीवाचस्पतिमिश्रैः स्वकृतन्यायकणिकायामादौ मङ्गलश्लोकेषु पठनात् तेषामेव गुरव एतत्कर्तारः श्रीजयन्तभट्टा इति प्रतिभाति । परन्त्वयं पक्षो न सर्वसम्मतस्तदास्तां तावत् । इदानीं तैस्स्वबुद्ध्या प्रकटिता अपूर्व-विषयाः के इति विचारयामः ।

(१)

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाश्शास्त्राणि विद्यानां धर्मस्य च चतुर्दश ॥ इति

पुराणप्रामाण्यात् पुराणन्यायमीमांसाधर्मशास्त्राणि वेदानामुपाङ्गत्वेन गण्यन्ते । एवमेवोक्तं श्रीमधुसूदनसरस्वतीभिः प्रस्थानभेदाख्यसंक्षिप्तग्रन्थे । इमे जयन्तभट्टास्तु न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानां[१] परं विद्यास्थानमिति न्यायशास्त्रस्य विद्यास्थानेषु महत्त्वं प्रतिपादयन्ति । वैशेषिकशास्त्रस्यापि न केवलमुपाङ्गत्वं तथात्वेऽ-प्राधान्यापत्तेः ।

अत्रेयमाशङ्का, मीमांसकाः 'वेदांश्चैके सन्निकर्षः पुरुषाख्या' इति प्रथमपादाधि-करणे वेदापौरुषेयत्वं व्यवस्थाप्य स्वतःप्रामाण्यञ्च वेदस्य व्यवस्थापयामासुः । तत् किमिति तर्कशास्त्रेणैव वेदप्रामाण्यं व्यवस्थापनीयमित्युच्यत इति—अत्र जयन्त

---

१. वेदप्रामाण्यहेतुत्वात् । वेदेषु हि तार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलितास्थाः कथमिव बहुवित्तव्ययायाससाध्यं वेदार्थानुष्ठानमाद्रियेरन् साधवः । किं वा तदानीं स्वामिनि परिम्लाने तदनुयायिना मीमांसादिविद्यास्थानपरिजनेन कृत्यमिति । तस्माद-शेषदुष्टतार्किकोपमर्दद्वारकदृढतरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेशक्षमम् अक्षपादोपदिष्ट न्यायविस्तराख्यं शास्त्रं प्रतिष्ठाननिबन्धनमिति परं विद्यास्थानमिति ।

भट्टस्य समाधिः—न्यायशास्त्रे अनुमानादीश्वरं प्रसाध्य ईश्वरोच्चरितत्वेन वेदप्रामाण्यमिष्यते, स्वतः प्रामाण्यञ्च नाङ्गीक्रियते। न हि विदितवेदार्थं प्रति मीमांसा। तदुक्तम्—'नान्यतो वेदविद्भ्यश्च सूत्रवृत्तिक्रियेष्यते'। भवति च चतुष्प्रकारः पुरुषोऽज्ञस्सन्दिग्धो विपर्यस्तो निश्चितमतिश्चेति। तत्र निश्चितमतिरेव मुनिरमुना शास्त्रेणाज्ञस्य शास्त्रमुपदिशति, संशयानस्य संशयमुपहन्ति, विपर्यस्यतो विपर्यासं निरस्यतीति तान् प्रति शास्त्रारम्भो युक्त इति (पृ० १८)। अनेनेदमुच्यते स्वतःप्रामाण्यं ज्ञानानां न स्वीकारार्हम्, अज्ञातकर्तृकस्य 'इह वटे यक्षस्तिष्ठतीत्यादेरपि प्रामाण्यापत्तेः। तस्माद् आप्तवाक्यं प्रमाणं वेदकर्ता च परमाप्त ईश्वरः। तत्सद्भावो यदि वेदात्तदाऽन्योन्याश्रयापत्तिः। अतस्सदनुमानादीश्वरं प्रसाध्य तदुक्तत्वेनैव वेदप्रामाण्यमङ्गीकार्यमिति।

(२)

ननु गौतमोत्पत्तेः पूर्वं कथं शास्त्रार्थावगमः? इदानीमपि शास्त्रान्तरात् तर्कशास्त्रार्थोऽवगम्येत इति चेत्, न,। गौतमात्पूर्वमपि तर्कशास्त्रमासीदेव इदानीन्तु न दृश्यते, सम्प्रदायस्यानादित्वात्। अत एव मनुना—

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥

इत्युक्तम्। वेदेऽपि 'सैषानन्दस्य मीमांसा भवति', 'ब्रह्मवादिनो मीमांसन्ते'। उद्दालकादयस्समेत्य मीमांसाञ्चक्रुः, को न आत्मा? किं ब्रह्मेति? इत्यादौ वेदे एव मीमांतर्कस्य पूर्वैश्शास्त्रार्थनिर्णयायावलम्बितत्वोपन्यासात्।

(३)

न्यायशास्त्राध्ययनस्य किं प्रयोजनम्? प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति न्यायात् प्रयोजनज्ञानं प्रवृत्तावपेक्ष्यते। यदि शास्त्राध्ययनात् प्रयोजनज्ञानं तदाऽन्योन्याश्रयः। प्रयोजनज्ञानात् शास्त्राध्ययने प्रवृत्तिः, प्रवृत्तेश्च प्रयोजनमिति। तत्र समाधानमाह भट्टजयन्तः—

आदिवाक्यादेव श्रोतुश्शास्त्रप्रयोजनपरिज्ञानम्। सर्वशास्त्राध्ययनप्रवृत्तिसाधारणमिदम्। आप्तवचनादेव प्रथमं प्रवृत्तिरिति। अत्रादिवाक्यादिति पूर्वतनस्याध्येतुर्वाक्यमिति तदर्थः। तच्चाप्तवाक्यमेव।

(४)

सापेक्षमसमर्थं भवतीति शासनात् 'समर्थः पदविधिः' इति सूत्रप्रतिपादितात् समासघटकपूर्वपदार्थस्य सापेक्षत्वे न समासः। यथा ऋद्धस्य राजमातङ्गा इति। अत्र च पूर्वपदार्थस्य नित्यसापेक्षत्वे भवत्येव समासः। यथा चैत्रस्य गुरुकुलमिति। अत्र चैत्रपदार्थस्य गुरुत्वेऽन्वयो न तु गुरौ, स्वपुत्रस्यान्यनिरूपितगुरुत्वेऽपि चैत्रस्य गुरुरिति प्रयोगापत्तेः। गुरुत्वन्तु ससम्बन्धिकं नित्यसापेक्षमतस्तत्रान्वयो नान्यत्रेति तदभिप्रायः। परन्तु नायं निर्बन्ध इति। 'अथ शब्दानुशासनं केषां शब्दानामि'ति भाष्यप्रयोगे केषामित्यस्य शब्देऽन्वयः। कथम् ? शब्दशब्दस्य ससम्बन्धिकार्थत्वाभावात्। अतोनित्यसापेक्षत्वाभावेऽपि समासोऽस्तीति शब्देन्दुशेखरटीकायां स्थितम्। तत्र हि नित्यसापेक्षत्वाभावेऽपि गमकत्वात्समासः, भाष्ये 'सक्त्वाढकमापणीयानां किमोदनः शालीनामि'ति प्रयोगात्। गमकत्वञ्च 'विग्रहवाक्यजन्यशाब्दबोधसमानप्रकारकशाब्दबोधजनकत्वम्'—इति कथितम्। एवं सति ऋद्धस्य राजपुरुष इत्यत्र तु विग्रहवाक्यसमानार्थत्वाभावान्न समास इति टीकायामुक्तम्।

(५)

मीमांसका उपमानस्वरूपमन्यथैव निरूपयन्ति। आरण्यकवाक्याद् गोसदृशो गवय इति वाक्यं श्रुत्वाऽरण्यं गतो गोसदृशं पिण्डं पश्यति। तदा तस्य 'अयं गवयो गोसदृशः' इति वाक्यस्मरणपूर्वकं प्रत्यक्षम्, तत एतत्सदृशी मदीया गौरिति उपमितिर्भवति। इदञ्चोपमानं कर्मसु प्रकृतिविशेषनिर्धारणायोपयुज्यते। सौर्यवाक्यं दृष्ट्वैतत्प्रतिपाद्ययाग आग्नेयसदृश एकदेवताकत्वात् औषध द्रव्यकत्वसाम्यादिति। तत एतत्सदृशमाग्नेयमित्युपमितिः। तेनाग्नेयः प्रकृतिरिति निश्चयात् तन्निष्ठाः पदार्था उपकारद्वारा सौर्येऽतिदिश्यन्ते सौर्ययाग आग्नेयवत् कर्तव्य इति।

तार्किकाभिमतोपमाने तु गोसदृशो गवय इत्यतिदेशवाक्यार्थस्मरणाद् अयं गवय पदवाच्य इत्युपमितिर्भवति। तेनाश्वस्तूपरो गोमृग इत्यश्वमेधान्तर्गतपशुयागे गोमृगो गवयस्तस्य ज्ञानं भवतीति विशेषः (पृ० १६)।

(६)

दृष्टान्तसिद्धान्तयोः पदार्थेषु पृथग्ग्रहणमनुचितमवयवान्तर्गतदृष्टान्तसिद्धान्ताभ्यां तयोः सिद्धेरिति पूर्वपक्षे न्यायमञ्जरीकार आह अवयवाः पञ्च तेष्व-

वयवत्वेन दृष्टान्तसिद्धान्तयोरन्तर्भावेऽपि तेष्ववयवत्वेन प्रवेशः, पदार्थेषु तु पदार्थत्वेन प्रवेश इति रूपभेदात् पृथग्ग्रहणमित्यभिप्रैति । अन्यथा हेतुवाक्येनानुमानस्यापि गतार्थत्वापत्तेः ।

षोडशपदार्थानां तत्वज्ञानादिति स्थिते निर्णयस्य पदार्थान्तर्भावः किमर्थ इति चेदत्र ग्रन्थकारः—षोडशपदार्थतत्त्वज्ञानं तत्तत्साधकैः प्रमाणैसिध्यति। निर्णयस्तु न्यायाख्यपञ्चावयवप्रयोज्य एवात्र गृह्यत इति भेद इत्याह (पृ० १६) ।

(७)

अस्य शास्त्रस्य महर्षिणा कृतस्य प्रयोजनं भाष्यकार आह 'प्रदीपस्सर्वविद्यानामि'त्यादिना । अत्र च न केवलं वेदप्रामाण्यनिरूपणेऽस्य शास्त्रस्योपयोगोऽपि तु वेदार्थनिर्णयेऽपि । कथमिति चेदुच्यते—इयमान्वीक्षिकी सर्वविद्यानां मध्ये प्रदीप इव प्रकाशते यतोऽनुमानप्रामाण्यम्, हेत्वाभासाः, छलजात्यादयः सर्वे कस्यचिदर्थस्य स्थापने वा दूषणे वापेक्ष्यन्ते । अत आस्तिकानां वेदार्थव्यवस्थापने उपयुज्यन्ते, यथा यागस्य स्वर्गसाधनत्वबोधिवेदवाक्यम् । अपूर्वस्य मध्ये यागेन जननमनुमानेनैव निर्णेयम् । एवं नास्तिकैर्वेदार्थे कृता आक्षेपा हेत्वाभासच्छलादिप्रदर्शनेन निग्रहस्थानैरेव प्रतिक्षेप्याः । अतो न केवलं वेदार्थविचाररूपमीमांसायामपि तु सर्वत्र वेदान्तेष्वपि वेदार्थस्य ब्रह्मात्मत्वस्य व्यवस्थापने उपयुज्यते । अत एवाद्वैतसिद्धिलघुचन्द्रिकादिग्रन्थकारा विजयिनो दृश्यन्ते । अतएव च ब्रह्मसूत्रभाष्यादौ श्रीशङ्कराचार्या वेदार्थमीमांसा तदविरोधितर्कोपकरणा प्रस्तूयत इति जगदुः । अत एव च तद्भाष्यमर्धमनुमानात्मकमर्धांशेनैव श्रुत्यर्थात्मकमिति पद्मपादाः ।

मीमांसका अपि लिङ्गेन मन्त्रविनियोगो 'मन्त्रलिङ्गादि'ति वदन्तोऽनुमानमुपजीवन्ति। उपायस्सर्वकर्मणामित्यनेन सुखावाप्तिदुःखपरिहारार्थेषु कर्मसु प्रवृत्तिरनुमानात् तत्साधनत्वनिश्चयादेव भवति, भाविसुखादौ प्रत्यक्षासम्भवात् । अतस्सर्वकर्मणामुपाय इति युक्तमुक्तम् ।

धर्मस्वरूपमागमैकसमधिगम्यमागमश्च न्यायापेक्षस्सन् याथार्थ्येन धर्मविबोधकः । तदुक्तं मनुना—

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ (पृ० १९) ।

(८)

प्रमाणपदार्थविचारे सामग्रयाः कारणसमूहरूपाया एव प्रमाकरणत्वरूपं प्रमाणत्वमिष्यते। यदव्यवहितोत्तरं कार्यं भवति तदेव साधकतमम्। कर्तृकर्मकरणानि तु साधकानि भवन्ति। अतिशयेन साधकत्वरूपस्तमबर्थो न कस्यापि। स्वाव्यवहितपूर्व-वृत्तित्वसम्बन्धेन कार्यविशिष्टत्वमतिशयः। स च सामग्रया एवेति जयन्तभट्टनिर्णयः। नवीनतार्किकास्तु साधकतम करणम्। तत्रातिशयो व्यापारविशिष्टत्वम्, दण्डादे-र्भ्रमणादिव्यापारवत्त्वात् करणत्वमित्याहुः।

(९)

अव्यभिचारिण्यसन्दिग्धार्थबोधजनिका बोधाबोधस्वभावा सामग्री प्रमाणम्। अत्राबोधस्वभावचक्षुरादीन्द्रियं दीपादिकञ्च गृह्येते, बोधस्वभावज्ञानस्यापि क्वचित्करणत्वात्, तथाहि विशिष्टबुद्धौ विशेषणज्ञानं करणं लिङ्गादिज्ञानमनुमित्यादौ करणमतो बोधात्मकत्वोक्तिः। अत्र ज्ञानस्यैव प्रमाणत्वे चक्षुरादीनामप्रमाणत्वप्रसङ्गः। जडस्यैव प्रमाणत्वे विशेषणज्ञान-लिङ्गज्ञान-सादृश्यज्ञान-शब्दज्ञानानामप्रामाण्यापत्तिः, अतो बोधाबोधेत्युक्तम् (पृ० २०)।

(१०)

सन्निपत्योपकारकं-मीमांसकाः कर्माङ्गद्रव्यदेवताद्युद्देशेन विधीयमानमव-घातप्रोक्षणादि सन्निपत्योपकारकम्। साक्षादेव कर्मण्यङ्गत्वेन विहितमारादुपकारकं यथा प्रयाजादिकं दर्शपूर्णमासयोराराद् दूरे कर्मजन्ये परमापूर्व उपयुज्यत इत्यर्थः इत्याहुः। न्यायमते सन्निपत्योपकारकलक्षणमाह व्याख्याता (पृ० २१) अन्यकारकेति। दण्डो घटे भ्रमिद्वारोपकरोतीति तस्य करणत्वम्। प्रयाजादिकन्तु यागजन्यपरमापूर्वे उपकरोतीत्यन्यकारकस्य यागस्य योऽपूर्वाख्यो व्यापारस्तद्द्वारेण प्रयाजः फलं प्रति साधकोऽत आरादुपकारक इति (पृ० २५)।

(११)

शाबरा ज्ञानमनुमेयं ज्ञानजन्येन ज्ञातताख्येन फलेनेति वदन्ति। तन्मतं निराकरोति–शाबरास्त्विति। अयमभिप्रायः—ज्ञानं नाम क्रिया, क्रिया च फलानुमेया, ज्ञातृव्यापारमन्तरेण फलानिष्पत्तेः। यथा च कारकाणि तण्डुलसलिलानलस्थाल्यादीनि

सिद्धस्वभावानि साध्यं पाकं सम्पादयितुं संसृज्यन्ते तथात्मेन्द्रियमनोऽर्थसन्निकर्षे सति ज्ञानाख्यो व्यापार उत्पद्यते। तेन च ज्ञानानुमितिरिति सङ्गिरन्ते। तन्न। यत्तु क्रियास्वभावत्वाद् ज्ञानमप्रत्यक्षमिति तन्न, ज्ञानस्य फलस्वभावत्वात्। अपि च क्रियापि प्रत्यक्षस्समवायः प्रत्यक्ष एव आत्मा च प्रत्यक्षस्तद्गतं ज्ञानञ्च प्रत्यक्षमेव। कारकाणि च निर्व्यापाराण्येव ज्ञानक्रियां निष्पादयन्ति। अतस्तेषामपि क्रियान्तरापेक्षणेऽनवस्था निराकृता भवति। भट्टाभिमतो भावनाख्यो व्यापारोऽपि न विचारसहो न हि विशिष्टगुणसमवायापेक्षया पुरुषस्य व्यापारान्तरं दृश्यते। तस्माद् भावनाख्यो व्यापारो वाक्यार्थ इत्येतदयुक्तम्। ज्ञानञ्च यद्यपि धात्वर्थस्तथापि न ज्ञानंक्रिया, धातूनां क्रियैवार्थ इति गडिवदनैक देशे इत्यादावव्याप्तम्। अपि च ज्ञानस्य नित्यपरोक्षत्वे तेन साकं व्याप्तिग्रहस्याशक्यत्वाद् ज्ञानानुमितिरपि दुस्साध्या।

अपि च, अर्थे दृष्टता नाम किं दर्शनकर्मता उत प्रकाशस्वभावता। नाद्यः, दर्शनस्य परोक्षत्वात् दर्शनकर्मतापि दुर्ग्रहा। अर्थप्रकाशता तु यदि प्रत्यक्षा, तदार्थद्रष्टारस्सर्वज्ञास्स्युः। एतेन ज्ञानजन्येन संवेदनेन ज्ञानानुमानमपि प्रत्युक्तम्। तस्यापि स्वप्रकाशत्वाभावेनानुमेयत्वात्, तत्र च लिङ्गाभावादनवस्था च। ज्ञानस्वप्रकाशत्वन्तु पश्चान्निषेत्स्यते (पृ० २७)।

(१२)

वेदान्तिभिः मीमांसकैश्चानुमतमनधिगतार्थबोधत्वं प्रामाण्यमिति लक्षणं न युक्तम्, गृहीतविषयज्ञानस्यापि प्रमात्वात्। पुनः पुनरनुभवे प्रीत्यतिशयोत्पादात्, धारावाहिकबुद्धिवत्। वेदान्तिनस्तु तत्र पूर्वपूर्वज्ञानाविषयक्षणविशेषविशिष्टविषयत्वेनोत्तरस्य प्रामाण्यमित्याहुः।

अपि च प्रत्यभिज्ञाप्रामाण्यमस्तमियाद् गृहीतग्राहित्वात्। न चैवं स्मृतेरपि प्रामाण्यापत्तिः, गृहीतग्राहित्वेऽपि प्रामाण्याभ्युपगमात्। न तस्य प्रामाण्यमर्थजत्वाभावात्। न गृहीतग्राहित्वात्। नदीप्रवाहेण भूतवृष्टिविषयानुमितिरपि पक्षविषयेऽर्थजन्यैव। अपि चेदं मतं न जैमिनिसम्मतम्। स ह्यर्थेऽनुपलब्धे प्रमाणमिति शब्द एवागृहीतग्राहित्वमुवाच, न सर्वस्यापि प्रमाणस्य।

(१३)

ज्ञानस्य सुखदुःखसाधनसमर्थप्राप्तिपरिहारभूतायाः प्रवृत्तेर्निमित्तप्रदर्शकत्वं प्रामाण्यमाहुः। प्रापकत्वं प्रत्यक्षानुमानयोरेव। प्रत्यक्षस्य क्षणिकत्वेन साक्षादर्थप्राप-

कत्वेऽपि परम्परया प्रापकत्वमस्त्येव। प्रत्यक्षपरम्परायां प्रविष्टस्य कस्यचिज्ज्ञानस्य प्रापकत्वात्। ततश्च सन्तानाध्यवसायजनकत्वमेव प्रापकत्वम् इति बौद्धाः।

तदिदं न शोभनम्। किं प्रदर्शितप्रापकं प्रमाणमुताध्यवसितप्रापकम्? नाद्योऽनुमाने प्रदर्शनाभावात्, न द्वितीयो ज्ञानस्य क्षणिकत्वेनातिक्रान्तत्वात्।

अध्यवसायश्च वस्तुविषयत्वाभावाद् वस्तुनश्च प्राप्तुमशक्यत्वात् क्षणिकत्वोक्तेः अपि चास्य लक्षणस्योपेक्षणीयविषयेऽव्याप्तिः, प्रापकत्वाभावात्। कोऽयमुपेक्षणीयो नाम विषयः? उपादेये दर्शनमात्रेण प्रीतिर्भवति, तथा हेये दृष्टे विषादो भवति। तदुभयं यस्मिन् सति न भवेत् सः। यथा मार्गेण गच्छतः पथि पतितं तृणपर्णादिकमिति।

(१४)

नन्वेषु न्यायग्रन्थेषु स्मृतेर्यथार्थत्वेऽपि न प्रमात्वमुपेयते। अत एव यथार्थानुभवः प्रमेति प्रमालक्षणम्। स्मृतिसाधारणं प्रमात्वमित्यङ्गीकारे तत्करणस्य पूर्वानुभवस्य प्रमाणत्वं वक्तव्यमिति चत्वार्येव प्रमाणानीति सूत्रविरोध इत्याहुः। जयन्तभट्टस्त्वर्थजन्यत्वं प्रमात्वे कारणम्।

स्मृतिस्तु नार्थजन्या स्मृत्यारूढस्य वस्तुनः प्रायेण स्मृतिकालेऽसत्वात्। नदीप्रवाहेन भूतवृष्ट्यनुमितौ वृष्टिधर्मिणः पर्वतादेस्तदा सत्वादनुमितेरर्थजत्वसम्भवात्। प्रातिभज्ञानमपि वस्तुत आगामिन एव भ्रात्रादेर्विषयीकरणादर्थजमित्याह।

(१५)

सांख्यमते बुद्धिवृत्तिः प्रमा, पुरुषस्तु बुद्ध्या साकं भेदाग्रहात् प्रमिणोतीव इत्याहुः, तदयुक्तम्, एवं सति यस्यार्थदर्शनं पुरुषस्य यो न जानाति, या तु जानाति बुद्धिः सा न तत्फलमर्थदर्शनमनुभवतीति वैयधिकरण्यम् इति।

(१६)

बौद्धा हि प्रत्यक्षमनुमानञ्चेति द्वे एव प्रमाणे। तत्र प्रत्यक्षं स्वलक्षणं क्षणिकं वस्तु गृह्णाति। अनुमानञ्च सामान्यमात्रं गृह्णाति। न चानुमानं सम्बन्धग्रहणमपेक्षते। सम्बन्धग्रहे च साध्यसाधने विषये तदेव साध्यमनुमिताविव्येकस्य विषयस्य प्रत्यक्षानुमितिविषयत्वापत्तिरिति। यद्यनुमानान्तराधीनस्सम्बन्धग्रहः, तदाऽनवस्थेति वाच्यम्, यतश्शब्दानुमानयोर्विकल्पविषये वृत्तिमभ्युप-

गच्छामः । तेन विकल्पेन सम्बन्धग्रहो दर्शनसमनन्तरं दर्शनच्छायापत्तौ विकल्पा जायन्ते काल्पनिकतदितरपरावृत्तिस्वभावसामान्याकारमनुमानम् । अतो न प्रमाणद्वयवेद्यमेकं वस्त्विति । तन्न । न हि प्रतिबन्धो विकल्पविषयः सन् वस्तुधर्मो भवति । अवस्तुधर्मो न वस्तुसाधयितुमलम् । अतः प्रमाणसंप्लवः । अप्रमाणपरिच्छिन्नस्य प्रतिबन्धस्य वस्त्वनुमापकत्वाभावात् प्रमाणपरिच्छिन्न एवायमनुमानाङ्गमिति । वस्तुतस्तु प्रत्यक्षगृहीतं कालान्तरे देशान्तरे वानुमीयते, अतोऽसदेवेदमिति ।

(१७)

अर्थापत्तिः शक्त्याख्यपदार्थान्तरसिद्धये मीमांसकैरङ्गीकृता प्रत्यक्षावगतदहनसंसर्गावगतदाहानुमेयाग्नेर्दाहशक्तिः । अतीन्द्रियशक्तेर्दाहेन सम्बन्धग्रहो न प्रत्यक्षेण शक्तेरतीन्द्रियत्वात्, नानुमानेनान्वयव्यतिरेकाभ्यां हि पदार्थेषु सा ग्राह्या । यतः तस्याः सूक्ष्मत्वाद् न ताभ्यां ग्रहणमित्याहुः । नव्यतार्किकास्तु वह्निर्दाहानुकूल-अद्रिष्ठातीन्द्रियधर्मसमवायी दाहजनकत्वात्, अदृष्टात्मवद् इति शक्तिसाधकं सामान्यानुमानमुद्भाव्य हेतोरनुकूलतर्काभावेनाप्रयोजकत्वमाहुः ।

(१८)

मीमांसकास्सर्वत्र कारणेषु कार्यानुकूलां शक्तिं कल्पयन्ति । मणिमन्त्रादियुक्तेऽग्नौ शक्तिनाशान्न दाहरूपं कार्यम् । पुनरुत्तेजकमण्यादिसमवधाने शक्तिरुत्पद्यतेतः कार्यञ्च जायत इत्याहुः । न्याये तु प्रतिबन्धकाभ वमात्रेण सर्वोपपत्तावतीन्द्रियशक्तेरनावश्यकतेत्याहुः ।

अत्र च शक्तिनिरासे पराक्रान्तं श्रीजयन्तभट्टेन । तथाहि—कार्योत्पत्तौ लोकसिद्धकारणान्यपेक्ष्यन्ते । सहकारिवर्गे च धर्माधर्मावन्तर्भवतः । तयोश्च वैचित्र्यं कार्यफलेन कल्पनीयम् । तयोश्च स्वरूपत एवातीन्द्रियत्वं न तु शक्तिमत्वात् । मन्त्रबलादग्निनिष्ठशक्तिनाशान्न दाह इति चेत्, न, सामग्र्यभावादिति ब्रूमः । सामग्री च प्रतिबन्धकमन्त्राभावघटिता, सर्वत्र प्रतिबन्धकाभावस्य कारणत्वात् । अपि च मन्त्रेणाग्नेः किं कृतम् ? शक्तिनाश इति चेत्, न, मन्त्रापगमे दाहदर्शनात् प्रतिबन्धश्च स्वरूपस्यैवास्तु, स्वरूपं दृश्यते इति चेत् शक्तिरपि तथा मन्त्रापगमे दर्शनात् । शक्तिश्च नित्याभ्युपगम्यतेऽनित्या वा । नाद्यः, सर्वदा कार्यप्रसङ्गात् । कार्यत्वे स्वरूपमात्रकार्यत्वञ्चेत् पुनरपि सर्वदा

कार्यापत्तिः। सामग्रीकार्यत्वे किमन्तरालवर्त्तिन्या शक्त्या ? अशक्तात् कारकात् कार्योत्पत्तिरिति चेत्, कार्या शक्तिरपि शक्त्यन्तरमपेक्षेतेत्यनवस्था। शेषं मूले (पृ० ६२)।

(१९)

अस्मिन् मतेऽभाव एक एव। स चोत्पत्तेः प्राक् प्रागभाव इत्युच्यते। उत्पन्नस्यात्महानेर्ध्वंसः। वस्त्वन्तरोपाधिकः स एवान्योन्याभावः। निरुपाधिकः स एवात्यन्ताभाव इति। अपेक्षाभावो देशोपाधिकस्स एव। सामर्थ्याभावस्तु पूर्वसिद्धस्य सामर्थ्यस्य ध्वंसे भवति। स च ध्वंसान्तर्गत इति। वेदान्तिनस्तु घटान्योन्याभावः पटादिरेव, एवं ध्वंसप्रागभावौ तत्कालविद्यमानकपालचूर्णादिविषयौ। घटात्यन्ताभावस्तु यस्मिन्नधिकरणे प्रतीयते तदेवातो नाभावः पदार्थान्तरमित्याहुः (बृ० भा०)।

(२०)

चार्वाकमते 'अथातस्तत्त्वं व्याख्यास्यामः। पृथिव्यापस्तेजोवायुरिति तत्त्वानि' इति सूत्रद्वयमाहतद्व्याख्याता उद्भटः। तेन प्रथमसूत्रे प्रमाणप्रमेयसंख्यालक्षणनियमाशक्यकरणीयत्वमाह। द्वितीये प्रमेयानियममाहेति।

(२१)

आदौ धूमदर्शनम्, ततो व्याप्तिस्मरणम्, ततस्तृतीयलिङ्गपरामर्शो नाभ्युपेय इति मीमांसकमतम्।

वेदान्तिनः पद्मपादा ब्रह्मानन्दाश्च प्रथमं धूमदर्शनं तेन व्याप्तिसंस्कारोद्बोधस्तेनैवानुमितिर्न तु व्याप्तिस्मृतेरपेक्षेत्याहुः (पृ० १०७)।

(२२)

प्रत्यक्षलक्षणेऽव्यभिचारिपदस्य फलं विवृणोति सुखं परस्त्रीगमनादिना यद् भवति तन्मिथ्यासुखम्, यथार्थविषयानुभवजन्यं सुखं न मिथ्या। यद्यपि भ्रमजन्यमपि सुखं दृष्टम्, तथापि तत्सुखं भ्रमजन्यत्वाद् मिथ्येत्याह। तद्वारणायाव्यभिचारिपदम्। अत्र न्यायमञ्जरीकारः—ननु न सुखं मिथ्या, तदप्यानन्दस्वरूपमेव। यद्येवं शुक्तिरजतज्ञानमपि न मिथ्या विषयानुभवस्वरूपत्वात्। यथा विषयानुभवस्वभावं ज्ञानं विषयद्वयमिच्छति एवं आनन्दस्वभावमपि सुखं शास्त्रविरुद्धचेष्टया

जनितत्वान्मिथ्येति। यथा शुक्तिरूपो विषयः कलुषस्य ज्ञानस्य हेतुस्तथा भ्रमोऽपि कटुविपाकस्य भ्रमस्य हेतुरिति तथाविधं सुखमपि व्यभिचारि (पृ० ११९)।

(२३)

अत्र वृद्धनैयायिकमतम्—रूपज्ञानं रसज्ञानं इति नामधेयव्यपदेश्यज्ञानव्यावृत्तये-अव्यपदेशपदमिति। तन्नामधेयपदव्यपदेश्यत्वं प्रामाण्यनिराकरणकारणं न भवतीति युक्त्या निरस्य वृद्धवाक्याज्जातमयं पनस उच्यत इति ज्ञानमिन्द्रियशब्दोभयजन्यं व्यावर्त्यमाहुराचार्या इति। अस्य शब्देन्द्रियोभयजन्यत्वाद् व्यावृत्तिरिति।

इदमपि न युक्तम्। शब्देन्द्रियोभयजन्यज्ञानाभावात्। इन्द्रियान्वयव्यतिरेकानुविधायित्वादिन्द्रियजन्यमेवेदमिति।

अपरे त्वसम्भवाख्यदोषव्यवच्छेदार्थमव्यपदेश्यपदम्। गौरित्यादिना शब्दावच्छिन्नार्थविषयकत्वेन शाब्दमेवेदं ज्ञानं नेन्द्रियजम्, शब्दे चक्षुषोऽसामर्थ्याद् घटादौ च श्रोत्रस्यासामर्थ्यात्। नापि मानसम्, तथा सति मन एकमेवेन्द्रियमित्यापातात्। वाचकावच्छिन्नवाच्यविषयत्वाच्च शाब्दमिदं ज्ञानं केवलमनः करणकमिति (पृ०१२३)। स्मृतिविषयीकृतशब्दजनितोऽयं प्रत्यय आत्मानमर्थञ्च प्रकाशयतीत्याहुः। तदुक्तम्—न, सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते' इति' भर्तृहरिणा।

सिद्धान्तस्तु गौरिति ज्ञानञ्च शब्दस्मरणसापेक्षचक्षुरिन्द्रियजन्यं प्रत्यक्षमेव चक्षुरन्वयव्यतिरेकात्। अयं गौरितिज्ञानस्य शाब्दतामाशङ्क्य तस्यैवाशाब्दतां दर्शयत्यव्यपदेश्यपदेन। तथा च शब्दस्मरणसहकृतेन्द्रियजन्यसविकल्पकप्रत्यक्षम्। तत्र शब्दभानं स्मृतिरूपज्ञानलक्षणप्रत्यासत्त्या (पृ० १२१)।

(२४)

श्लोकवार्तिके धर्मस्य योगिप्रत्यक्षविषयत्वं निरस्यते। कुत इति चेत्, बौद्धास्स्वगुरोर्धर्मः प्रत्यक्षो योगित्वात् तस्येति ब्रुवन्ति। तत्खण्डनार्थं कस्यापि योगिनो धर्मो न प्रत्यक्षो योगिनामेवाप्रसिद्धेः। प्रसिद्धावपि धर्मस्यातीन्द्रियत्वात् तत्र तदप्रसर एव। यद्युच्यते तेषां धर्मातिशयवशात् प्रत्यक्षस्यातिशयः कल्प्यते तथापि चक्षुरादिविषयत्वेन प्रसिद्धे रूपादौ तेषां प्रत्यक्षं स्वविषये कञ्चिदतिशयं गृह्णीयात्, यथा दूरसूक्ष्मादि; न त्वतीन्द्रियं गृह्णीयात्। तथा सति श्रोत्रं योगिनां कुतो रूपं न गृह्णीयाद् इति दूषितम्। तत्खण्डयित्वा योगिप्रत्यक्षं तस्य धर्माधर्मादिविषयत्वञ्च व्यवस्थापयति श्रीजयन्तभट्टः।

बौद्धमुखपिधानन्त्वेवम्, योगजधर्मो वैदिकसाधनादेव भवेच्चोदनालक्षणत्वात्तस्य। वैदिककर्म उपजीव्य बौद्धेन योगजं चक्षुस्सम्पादनीयम्। तथा सति स्वोपजीव्यवेदविरुद्धं कथं ब्रूयादिति।

साधनन्त्वेवम्—यथास्मदादिलोचनवैलक्षण्येन विडालस्य लोचनं दूरसूक्ष्मादिकं गृह्णाति, यथा वा सम्पातिश्चक्षुषा शतयोजनान्तरितां सीतां पश्यति, तथा योगिचक्षुरतीन्द्रियं पश्येत्। अपि च योगीन्द्रियस्याप्रत्यक्षत्वादस्माकंतदिन्द्रियं धर्मादिग्राहकं न वेति विचारयितुं शक्तिर्नास्ति। अथवा मनःकरणकं ज्ञानम्, मनश्च दूरसूक्ष्मादिकमपि पश्येदिति। एतच्च योगिप्रत्यक्षस्यातीन्द्रियार्थविषयत्वं श्रीशङ्कराचार्यैर्देवताधिकरणे महताऽऽग्रहेण विचार्य निर्णीयते। तदुक्तं—भवति ह्यस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम्। तथा च व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरन्तीति स्मर्यते। योगोऽप्यणिमाद्यैश्वर्यफलस्स्मर्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुम्। श्रुतिश्च योगमाहात्म्यं प्रख्यापयति 'पृथिव्यप्तेजोऽनिलखे समुत्थिते' इत्यादि।

कालिदासोऽपि रघुवंशे भगवान् वसिष्ठो दिलीपस्य प्राग्जन्मकृतं सुरभेरपचारं ध्यानेन ज्ञात्वा गोपरिचर्यां तच्छमनायादिदेशेति धर्माधर्मयोर्योगिप्रत्यक्षगम्यतां सूचयति।

अतः—

मनःकरणकं ज्ञानं भावनाभ्याससम्भवम्।
भवति ध्यायतां धर्मे कान्तादाविव कामिनाम्॥

भट्टकुमारिलैर्योगिखण्डनन्तु देवताविग्रहादिखण्डनवत् केवलं बौद्धनिराकरणाय न तु परमार्थतः।

(२५)

प्रतिभम्। कन्या काचिद् ब्रवीति श्वो मे भ्राता आगन्तेति, तथैव परदिने भ्राताऽऽगच्छति। तदिदं ज्ञानं प्रातिभं समाचक्षते। तच्च प्रमाणमेव यथार्थत्वात्। तत्र करणं न चक्षुरादि, अपि तु मन एव। कुतश्चित् कारणात् श्व आगमिष्यन् भ्राता सोदर्यः स्मरणपदवीमारूढः श्वस्तनागमनविशिष्टत्वेन प्रतिभातीति प्रातिभस्य स एव जनक इति। ननु नेदं प्रत्यक्षम्, तस्य वर्तमानमात्रग्राहित्वनियमादिति चेत्, न अनागतग्राहिणः

प्रत्यक्षस्यापि भट्टैरुक्तत्वात् 'रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते' इति। चिरस्थायित्वं भाविकालसत्त्वम्।

यद् भट्टैश्श्लोकवार्तिके योगिनां सर्वज्ञत्वं निराकारि तस्य प्रतिप्रसवोऽयम्।

(२६)

सर्वज्ञविषये पूर्वपक्षः, सर्वज्ञता तेषामेकज्ञानेनोत बहुभिर्ज्ञानैः, नाद्यः, परस्परविरोधिनामर्थानां शीतोष्णवदेकज्ञानविषयत्वाभावात्। नापि बहुभिर्ज्ञानैर्ज्ञानानां यौगपद्यनिषेधात्। क्रमेण तु निखिलपदार्थसाक्षात्कारो मन्वन्तरकोटिभिरपि दुर्घट इति।

नेदं युक्तम्। विरुद्धत्वस्याप्रयोजकत्वाद् एकस्मिंश्चित्रे विरुद्धनीलपीतादिवर्णभानवदेकस्मिन् ज्ञाने भानोपपत्तेः, घर्मकाले गङ्गायां निमग्नार्धकायस्य युगपच्छीतोष्णोपलम्भात्।

योगिनामीश्वरस्य च सर्वज्ञत्वेनाविशेषेऽपि जीवस्य सर्वज्ञत्वमनित्यमीश्वरस्य तु स्वाभाविकं नित्यमिति विशेषः।

धर्मः प्रत्यक्षः प्रमेयत्वाद् घटवदिति न्यायप्रयोगश्च द्रष्टव्यः।

(२७)

पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-अबाधितत्व-असत्प्रतिपक्षितत्वानि पञ्चलक्षणानि यस्य तल्लिङ्गम्। तदेव प्रतिबन्धस्मरणसहितं प्रमाणम्। अत्राबाधितत्वासत्प्रतिपक्षितत्वे नापेक्षिते त्रिलक्षणकाल्लिङ्गादेवानुमितिसम्भवादिति पूर्वपक्षे न्यायमञ्जरीकार आह, अबाधितत्वज्ञानमावश्यकमेवेति।

यदुच्यते पूर्वपक्षिणा सर्ववह्निधूमसहचारग्रहणादेव व्याप्तिग्रहणात् तत्काले बाधसंशय एव नोत्पत्तुमर्हतीति तत्, न, यद्यपि यत्र यत्र धूमस्तत्राग्निरिति सामान्यतो व्याप्तिग्रहस्तथापि विशिष्य वह्निधूमवतीनां व्यक्तीनामग्रहात् सपक्षसत्त्व-विपक्षासत्त्वनिश्चयौ न दृढं जायेते; तत्र बाधसंशयसम्भवादबाधितत्वमत एव प्रतिपक्षविधुरत्वरूपासत्प्रतिपक्षितत्वञ्चावश्यकमिति।

(२८)

श्रीजयन्तभट्टश्चार्वाकमतं विस्तरेण प्रस्तौति खण्डयितुम्। 'विशेषेऽनुगमाभावस्सामान्ये सिध्यसाध्यता' अग्निधूमविशेषयोर्व्याप्तिग्रहे न प्रयोजनमननुगमात्।

पर्वतीयधूमदर्शनेनाग्न्यनुमानासम्भवात्। व्याप्तिग्रहसमये धूममात्रस्याग्निमात्रेण व्याप्ते-र्गृहीतत्वात् तत्स्मरणमात्रेण प्रकृते न किमपि प्रयोजनम्।

साहचर्यं व्याप्तिरित्युक्तौ शतकृत्वोऽपि साहचर्यदर्शने सति व्यभिचारदृष्टेः पार्थिव-त्वलोहलेख्यत्वादौ वज्रमणौ।

अविनाभावो भवन्नपि न ज्ञातुं शक्यो जगतीतलवृत्तिसर्वपदार्थज्ञानाभावात्, सर्वभूतभाविधूमाग्नीनामप्रत्यक्षत्वात्, धूमत्ववह्नित्वादिसामान्यं नेष्यते सामान्यस्या-वस्तुत्वात्। बौद्धमते भूयस्सहचारदर्शनेऽप्यनग्नौ धूमो नास्तीति निश्चयाभावादनग्नौ धूमाभावश्चायोगिनां दुर्निश्चेयः। बलीयसा दुर्बलस्य बाधेऽनुमानविरोधः, उभयो-स्समकक्षत्वे विरुद्धाव्यभिचारिताख्यसत्प्रतिपक्षः। अत एवोक्तम्—

हस्तस्पर्शादिनान्धेन विषमे पथि धावता।
अनुमानप्रधानेन विनिपातो न दुर्लभः॥
यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥ (पृ० १७७)।

(२९)

न तावदनुमानस्वरूपस्यैव निह्नवश्शक्यते कर्तुम्।

अबलाबालगोपालहालिकप्रमुखा अपि।
बुध्यन्ते नियतादर्थादर्थान्तरमसंशयम्॥

अनुमानापलापे तु प्रत्यक्षादपि दुर्लभा लोकयात्रेति।

यद्दर्शनाद्यत्र प्रतीतिरुत्पद्यते तयोरर्थयोः कश्चित्सम्बन्धोऽवश्यं स्वीकार्योऽय-मेवाविनाभावनियमो न तु तादात्म्यतदुत्पत्ती शाक्यसम्मते युक्ते। व्याप्तिग्रहणन्तु मनस्येव भवेदिति केचिदग्नित्वधूमत्वसामान्यलक्षणया सकलाग्निधूमग्रहणाद् व्याप्ति-निश्चय इति।

अपरे तु योगिप्रत्यक्षकल्पं सम्बन्धग्राहि प्रत्यक्षमाहुः। अन्ये तु भूयोदर्शनेनैव व्याप्तिर्गृह्यते व्यभिचारग्रहणे तु माऽस्तु व्याप्तिग्रह इत्यूचुः।

मीमांसकास्तु विपक्षे धूमदर्शनमद्ययावन्नास्ति, अनुत्पन्ने बाधके तदाशङ्कनम-युक्तमिति व्यतिरेकग्रहणमनावश्यकमाहुः। ग्रन्थकारस्तु तन्नेति खण्डयति व्यतिरेक-दर्शनमन्तरेण व्याप्तेरग्रहादिति।

(३०)

अयं वृक्षश्शिशपात्वादिति तादात्म्यादनुमानं धूमाद्वह्नेस्तदुत्पत्त्या इति बौद्धाः, नेदं युक्तं वृक्षशिंशपयोरभेदे शिंशपाबुद्धौ वृक्षप्रतिभासप्रसङ्गात् । अप्रतिभासे तादात्म्याभावापत्तेः, प्रतिभासे किमनुमानेन, प्रत्यक्षत एव वृक्षत्वग्रहात् । वृक्षत्वग्रहणे सति विशेषानवभासात्, कदाचिदशिंशपात्वानुमानापाताच्च ।

अपि च वृक्षत्वशिंशपात्वयोरभेदाद् वृक्षत्वहेतुना शिंशपात्वानुमानापत्तेः । यदि शिंशपात्वे वृक्षत्वं प्रतिबद्धं न वृक्षत्वे शिंशपात्वमित्यतोनोक्तापत्तिरित्युच्यते तदा नियम एवाङ्गीकृतो न तादात्म्यम् । अतश्शाक्यमतं न युक्तम् ।

यदुक्तं सामान्ये सिद्धसाध्यतेति तन्न, पर्वते वह्निमत्त्वस्यापूर्वस्य साध्यत्वात् । यदुक्तं सर्वत्र सत्प्रतिपक्षसौलभ्यमिति तन्न, तेषामप्रयोजकत्वेन दुष्टत्वात् (पृ० १६९) ।

(३१)

द्विविधमनुमानं किञ्चिदुत्पन्नप्रतीति, किञ्चिदुत्पाद्यप्रतीति । उत्पन्नप्रतीतिधूमेन वह्न्यनुमानादि उत्पाद्यप्रतीतिरात्मेश्वरसर्वज्ञपरलोकादिगोचरम् । तदिदं न प्रमाणं केवलं श्रुतिसिद्धत्वात्तेषाम् (पृ० १८९) ।

(३२)

न्यायभाष्ये तावदन्यत्र दृष्टस्यान्यत्र दर्शनं व्रज्यापूर्वकं दृष्टं (यथा देवदत्तस्य) तथादित्यस्य । एवं यथा प्रत्यक्षे लिङ्गलिङ्गिनोस्सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यत इति द्विधोदाहरणं न्यगादि । नव्यन्यायग्रन्थेषु सामान्यमुखव्याप्तिरिति सिद्धान्तलक्षणे यो यदीययावद्विशेषाभाववान् सस्तत्सामान्याभाववान् यथा घटविशेषाभावकूटवद्भूतलं घटसामान्याभाववत्तथा संयोगीययावद्विशेषाभाववान् वृक्षस्संयोगसामान्याभाववानिति सोदाहरणं सामान्यतो दृष्टमुक्तम् । अत्र च विशिष्टपरामर्शो न कारणमपि तु प्रकृतहेतुतुल्यहेतौ साध्यतुल्यसाध्यव्याप्तिज्ञानं कारणं प्रकृतहेतौ पक्षधर्मताज्ञानमात्रं कारणमित्युक्तम्, आदित्यगतिश्च न दृश्यते । प्रातः पूर्वस्यां दिशि दृष्ट आदित्यस्सायं पश्चिमे दृश्यतेऽतोऽप्रत्यक्षापि गतिरेष्टव्येति भाष्यमप्युक्तसामान्यमुखव्याप्तौ सङ्गच्छते, चैत्रे व्याप्तिग्रहणात् सूर्ये गत्यनुमानात् ।

तथापि न्यायमञ्जरीकारेण रसेन रूपानुमानादिकमेव दृष्टान्ततया लिखितमावश्यकञ्चेदमन्यथा कार्यकारणभावविरहिणां नित्यसहचारवतामेकेनापरानुमानस्य विलयापत्तेः । दीधितिकारैर्यत्तदोरननुगमादिना सामान्यमुखव्याप्तेर्निरासाच्च । विशिष्टपरामर्शहेतुत्ववादिनां तदसम्भवाच्च । मीमांसकवेदान्तिमतयोस्तु सामान्यमुखव्याप्तिरिष्यत एव बहुलं प्रयुज्यते च । यथा 'न विलक्षणत्त्वादस्य तथात्वञ्च शब्दादि-त्यत्र पूर्वपक्षो जगन्न ब्रह्मप्रकृतिकं तद्विलक्षणत्वाद् यद्यद्विलक्षणंतन्नतत्प्रकृतिकं यथा पटो न मृत्प्रकृतिक इत्यादि । तथा उपसंहारदर्शनादित्यधिकरणे ब्रह्म न जगत्कारणमसहायत्वाद्यदसहायं न तत्कारणं यथा केवलदण्डो घटे इति (पृ० १९२) ।

(३३)

पूर्ववत्-पूर्वसदृशं पूर्वं प्रत्यक्षं तत्सदृशं महानसीयवह्निधूमसाहचर्यात् सिद्धिः पर्वतीयधूमात् पर्वतीयाग्नेः ।

शेषवदिति परिशेषानुमानम् । तदितरविशेषाभावकूटवत्त्वे सति सामान्यवत्त्वहेतुना तन्मात्रानुमानम् । अथवा प्रसक्तप्रतिषेधे अन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययश्शेषः । यथा धूमेनाग्निमात्रानुमाने किमिन्धनकोऽयमग्निरिति सन्देहे तृणपर्णकाष्ठादीनां प्रतिषेधे मृत्पाषाणादेरप्रसक्तत्वादयं गोमयेन्धनक इति । यथा शब्दोपलब्धौ श्रोत्राख्यं नित्यपरोक्षं करणम् । सामान्यतो दृष्टस्य परिशेषानुमानस्य चायं विशेषस्सामान्यतो दृष्टे इच्छादिकं शरीरादिव्यतिरिक्ताश्रितं शरीराद्यनाश्रितत्वे सति आश्रितत्वादिति । परिशेषे त्विच्छादेराश्रयत्वेन प्रसक्तानि शरीरेन्द्रियमनांसि निषिध्यन्ते दिक्कालयोर्न प्रसक्तिर्विशेषगुणत्वात् । तस्मादतिरिक्तात्मसिद्धिरिति । अपि च सामान्यतो दृष्टेऽतीन्द्रियं विषयोऽत्र तु प्रत्यक्षमेवेति (पृ० १९२) ।

(३४)

संयोगविभागातिरिक्तं कर्म नास्तीति भूषणकारमतम् । प्राभाकरा आहुश्चलतीति प्रत्ययेन देवदत्तस्वरूपातिरिक्ताप्रतिभासः । यदाह य एव देवदत्तात्मा तिष्ठन् प्रत्ययगोचरः चलतीत्यपि संवित्तौ, स एव प्रतिभासत इत्यविरलोत्पत्तिकसंयोगविभागप्रबन्धविषयत्वाच्चलतीति प्रत्ययस्य न सर्वदा समुत्पादः ।

तदनुमानञ्चेत्थम्—कार्यस्य कादाचित्कत्त्वेन कारणपूर्वकत्वाद् द्रव्यमात्रस्य कारणत्वेसर्वदा तदुत्पादप्रसङ्गाच्चलतीति प्रत्ययोत्पादकं किञ्चिद्वक्तव्यम् । तदेव कर्मेति ।

तदयुक्तम्—परिस्पन्दरूपस्य कर्मणश्चलत्यादिप्रतीतौ प्रत्यक्षत्वान्न नित्यानु-

मेयता । संयोगविभागालम्बनत्वे संयुज्यत इति प्रतीत्यापातः, तिष्ठत्यपि पुरुषे चलतीति धीः स्याद्वायुसंयोगादिसम्भवात्–इत्यादिना (पृ० ११४) ।

(३५)

कालः प्रत्यक्ष इति मीमांसका वेदान्तिनश्चेति प्रथा। वस्तुतस्तु तार्किकमतेऽपि कालः प्रत्यक्षः। जयन्तभट्टस्तु त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वादीति प्रशस्तपादवचनमयुक्तम्, नेदं वैदिकवचनं यदनतिक्रमणीयम्। न च प्रत्यक्षत्वमप्रत्यक्षत्वं वा वचनेन निर्धारणीयम्। अपि तु यस्यैन्द्रियकप्रत्यक्षगोचरता तत्प्रत्यक्षं यस्य न तन्न प्रत्यक्षमित्येव नियमः।

क्षिप्रादिप्रत्ययो ह्युद्घाटिताक्षस्य भवति तस्य तत् प्रत्यक्षमेव। स च द्रव्यविशेषणतयैव भासत इदानीं घट इत्यादौ, न स्वातन्त्र्येण। एवं गुरुत्वमपि चाक्षुषम्। नेत्रपरिस्पन्दनादिक्रियाभेदः काल इति तु न युक्तम्, परिस्पन्देऽपि शीघ्रं गच्छति शीघ्रं धावति इति प्रतीतेः। चन्द्रसूर्यादिपरिस्पन्देऽपि चिरेणास्तंगतो भानुरिति शीतांशुश्शीघ्रमुद्गत इत्यादि प्रयोगदर्शनात्।

(३६)

अन्ये तु कालस्य घटाद्यतिरेकेणाग्रहणात् प्रत्ययातिशयस्य कालपरोक्षत्वेऽपि सम्भवात् कालो न प्रत्यक्षः। अप्रतिभासमानोऽपि काल इन्द्रियसहकारेण संस्कारः प्रत्यभिज्ञामिव क्षिप्रादिप्रतीतिं जनयेदिति। युवस्थविरयोः परापरत्वस्य दिक्कृतपरापरत्वविलक्षणस्य काल एव हेतुः। काललिङ्गस्य युगपत् परोऽपर इत्यादिव्यवहारस्य सार्वत्रिकत्वात् कालो विभुरेकश्च। तस्य वर्तमानादिविभाग औपाधिकः। तत्र स्थाल्यधिश्रयणमारभ्य तदवतरणपर्यन्तः कालः पाकस्य वर्तमानकालः। अभिनिर्वृत्तफलावच्छिन्नोऽतीतः। अनारब्धफलावच्छिन्नो भविष्यत्कालः। एवमेव वसन्ताद्यृतूनां तिथीनाञ्चोपाध्यवच्छेदात् तत्तद्व्यवहारः।

(३७)

मीमांसकोक्तोपमानस्यानुमानेऽन्तर्भावस्समर्थ्यते। गोसदृशो गवय इति वाक्यं श्रुत्वाऽरण्यं गतस्य गोसदृशं पिण्डं दृष्टवतो गोसदृशोऽयं गवय इति प्रथमं प्रतीतिः, पश्चादेतत्सदृशी मदीया गौरिति ज्ञानं सादृश्यदर्शननिबन्धनं स्मरणमेवेति ग्रन्थकाराभिप्रायः।

(३८)

शब्दस्यानुमानेऽन्तर्भावं वदतो वैशेषिकस्य सुगतस्य च समाधानमुच्यते ।

द्विविधश्शब्दः पदात्मा वाक्यात्मा चेति । तत्र पदस्य पदार्थसम्बन्धग्रहणापेक्षया पदार्थस्मारकत्वेऽपि वाक्यस्य वाक्यार्थज्ञानजनकत्वन्न सम्बन्धापेक्षम्, पदार्थज्ञानवतो झटिति वाक्याद्वाक्यार्थज्ञानसम्भवात् । पदेन पदार्थस्मरणे सम्बन्धापेक्षत्वेऽपि विषयभेदात् सामग्रीभेदाच्च भेद एव, पक्षधर्मव्याप्त्यादिसापेक्षमनुमानम् । शब्दस्तु निरपेक्ष इति भेदाः । शब्दे वाच्यवाचकभावसम्बन्धापेक्षा, अनुमाने लिङ्गिलिङ्गसम्बन्धापेक्षेति वैषम्यम् (पृ० २२१) ।

(३९)

स्वतःप्रामाण्यवादिनं परतःप्रामाण्यावादी एवं दूषयति । दूरे जलं दृष्ट्वा इदं जलमिति ज्ञाने जाते पश्चात् पूर्वोत्पन्नं जलज्ञानं प्रमा न वेति संशयो जायते, यदि स्वत एव प्रामाण्यज्ञानं तदा संशयानुपपत्तिरतः परतोऽनुमानात् प्रामाण्यज्ञानं सम्पादनीयम्, तत्र हेतुस्समर्थप्रवृत्तिजनकत्वादिति, एवञ्चानुमानादेव प्रामाण्यग्रह इति । तच्च स्वतःप्रामाण्यवादी खण्डयति ! यदि परतःप्रामाण्यं ज्ञायेत, तदा सफलप्रवृत्तिजनकत्वज्ञानस्य प्रामाण्यं तदुत्तरोत्पन्नप्रामाण्यानुमित्येति वक्तव्यम् । एवं तज्ज्ञानप्रामाण्यं हेत्वन्तरेण ग्राह्यमित्यनवस्थेति । अत्र परतःप्रामाण्यवादी जयन्तभट्टः समाधानमाह—

अपरीक्षणीयप्रामाण्यत्वादर्थक्रियाज्ञानस्य । प्रवर्तकं सर्वज्ञानं न परीक्षणीयप्रामाण्यं वर्तते फलज्ञाने तु सिद्धप्रयोजनत्वात् प्रामाण्यपरीक्षापेक्षैव नास्तीति कुतोऽनवस्था । प्रवर्तकं हि प्रथममुदकज्ञानमविद्यमानेऽपि नीरे मिहिरमरीचिषु दृष्टमिति तत्र संशेरते जनाः । अर्थक्रियाज्ञानन्तु सलिलमध्यवर्त्तिनाम्भवत्तदविनाभूतमेव भवतीति न तत्र संशयस्तदभावान्न तत्र प्रामाण्यविचार इत्यादि ।

श्रीवाचस्पतिमिश्रास्तु दृष्टार्थमन्त्रायुर्वेदप्रामाण्यं प्रवृत्तिसामर्थ्येनावधार्य तज्जातीयस्यादृष्टार्थस्य वेदस्य विनापि प्रवृत्तिसामर्थ्यं प्रामाण्यावधारणमाप्तोक्तत्वेनेति वेदस्येश्वरोक्तत्वेन प्रामाण्यं समर्थयन्तोऽपि अनुमानस्य प्रवृत्तिसामर्थ्यलिङ्गजन्मनो निरस्तसमस्तव्यभिचारशङ्कस्य स्वत एव प्रामाण्यमव्यभिचारिलिङ्गादिति वदन्तः केषाञ्चिज्जनानां स्वतःप्रामाण्याभ्युपगमेन सर्वत्र स्वतःप्रामाण्यवादस्य मार्गं प्रदर्शयन्ति ।

(४०)

ख्यातिविवेचनप्रसङ्गे मीमांसकैकदेशिमतखण्डनार्थमुपवर्णयति श्रीजयन्तभट्टः ।

इदं रजतमिति भ्रमे सत्यरजतप्रतीतिवदवभास्यरजतसद्भावाल्लौकिकालौकिकत्वे तु विशेषः । रजतज्ञानावभास्यं हि रजतमुच्यते तच्च किञ्चिद् व्यवहारप्रवर्तकं किञ्चिन्नेति । तत्र व्यवहारप्रवर्तकं लौकिकमुच्यते ततोऽन्यदलौकिकमिति । यच्च शुक्तिकाशकलमिदमुच्यते तदलौकिकं रजतं रजतज्ञानावभास्यत्वाद्रजतं तद्व्यवहाराप्रवृत्तेरलौकिकमिति ।

इदं मतं वेदान्त्यभिमतप्रातिभासिकरजताभ्युपगममनुसरति; परन्तु नेदं वेदान्तिमतम् (पृ० २६३) ।

(४१)

यद्यपीश्वरेऽनुमानमेव प्रमाणम् तथापि तदीयसर्वज्ञत्वादौ निखिलप्रपञ्चस्रष्टृत्वान्यथानुपपत्तिः प्रमाणम् । वेदानामीश्वरोच्चरितत्वे तु 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इत्यादि वेदवाक्यमेव प्रमाणम् । ईश्वरज्ञानं प्रत्यक्षमजन्यमेव तस्य शरीराद्यभावादिन्द्रियार्थसन्निकर्षाद्यभावान्न जन्यं प्रत्यक्षं 'अजनकानामेवार्थानां सवितृप्रकाशेनेव ग्रहणात् । ईश्वरस्य भावनाख्यसंस्कारेण न प्रयोजनं सर्वदा सर्वार्थदर्शित्वेन स्मृत्यभावात् । एवं सत्यतीतादिकं यन्न्यायरीत्या सूक्ष्मरूपेणापि न वर्तते तज्ज्ञानं तस्येदानीमुपपादयितुमशक्यम् । ततश्चातीतधर्मादेस्तस्य स्मरणानभ्युपगमात् तस्य वर्तमानकाले ज्ञानं दुर्लभम् । ततश्च तत्फलं कथं दास्यतीति प्रश्नो वर्तते । जयन्तभट्टस्तु, प्रजापतेर्जन्येच्छा प्रजायते इत्यभ्युपगच्छन् तस्यैव कर्मफलदातृत्वं सूचयति । अत्रेश्वरस्य भूतानुग्रहाद्धर्मो नित्यः । आनन्दश्चेत्याभ्युपगच्छति । तव्यन्यायग्रन्थेषु ज्ञानेच्छाप्रयत्ना एवेश्वरस्य विशेषगुणा इति लिख्यते । तत्तत्कर्मानुसारेण फलं प्रयच्छत ईश्वरस्य धर्मेण प्रयोजनं न दृश्यते । धर्मस्य सुखजनकत्वन्तु नेष्यत ईशस्य नित्यसुखाभ्युपगमात् । अपि च धर्मस्य फलदात्रन्तराभावात् किमर्थो धर्म इति प्रश्नो वर्तते (पृ० २८२) ।

(४२)

एकं सर्वाभ्युपगतं स्मर्यमाणानुभूयमानसामानाधिकरण्यग्राहिणी प्रत्यभिज्ञा संस्कारसहितेन्द्रियजन्येति, अपरं प्रत्यभिज्ञायास्स्मर्यमाणपूर्वज्ञानविशेषितार्थ-

ग्राहित्वात् प्रत्यभिज्ञायास्तद्विशेषणस्य चार्थस्य बाह्येन्द्रियग्राह्यत्वानुपपत्तेः । स्तम्भादावपि मानसी प्रत्यभिज्ञेति । वेदान्तिमते तु सोऽयं देवदत्त इत्यादि प्रत्यभिज्ञायां वृत्तिद्वयम्, 'स' इत्यंशे स्मृतिः 'अयम्' इत्यंशे प्रत्यक्षमंशद्वयावच्छिन्नञ्चैतन्यात्मकं ज्ञानन्त्वेकमिति व्यवहारः (पृ० ३१८) ।

(४३)

पदस्य वाक्यस्य चानित्यत्वं तार्किकाणां मीमांसकानाञ्च सम्मतमेव । वर्णानान्तु मीमांसका नित्यत्वं वदन्ति । आनुपूर्वीविशिष्टवर्णसमुदायः पदं तस्याश्चानुपूर्व्याः क्षणघटितत्वेनानुपूर्वीविशिष्टवर्णानामनित्यत्वमाहुस्तदुक्तं भट्टैः—'यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता' इति । वेदनित्यत्वं न स्थापनीयमपि तु वेदे पौरषेयत्वनिरासपूर्वकमपौरुषेयत्वमेव स्थापनीयमिति । तार्किकमते तु वर्णानामप्यनित्यत्वमेव तदिदं लाघवगौरवविचारेण वर्णानामनित्यत्वाङ्गीकारे लाघवमिति ग्रन्थे निर्धार्यते । वेदे उभयसिद्धप्रमाणग्रन्थे वाऽस्य विषयस्याविचारणादित्याह ।

वस्तुतस्तु, जैमिनिः 'नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्' इति सूत्रे शब्दस्य नित्यत्वमाह तेन वर्णनित्यत्वं सिद्धयति । बादरायणोऽपि ब्रह्मसूत्रेषु 'अत एव च नित्यत्वमि'ति वेदनित्यत्वं सूत्रयाम्बभूव । शब्दानित्यत्वपक्ष एव च गौरवं बहूनां शब्दानां क्षणिकानामुत्पत्तिः प्रागभावा ध्वंसाश्चानन्ताः कल्पनीयअस्मिन् मते इति विभावनीयम् (पृ० ३१०) ।

(४४)

कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमिति तार्किकाः । भट्टस्तु 'दिशः श्रोत्रमि'ति श्रुत्या मृतस्य श्रोत्रं दिशि प्रलीयत इत्युक्तेश्श्रोत्रस्याधिष्ठानमेवोपादानं तच्च दिगिति वदति । जयन्तभट्टस्तु 'दिशां कार्यान्तराक्षेपादागमान्यपरत्वतः आहोपुरुषिकामात्रं दिग्द्रव्यश्रोत्रकल्पनमि'ति ब्रवीति । तार्किकोक्तमभ्युपेत्य श्रोत्रस्य दिशि लय व्यवहारोऽन्यथा नेतव्यः ।

ऐतरेयेऽपि 'श्रोत्राद्दिशः समभवन्' इत्यपि वर्ततेऽतो जयन्तोक्तं स्वमतपक्षपातेनेति मन्तव्यम् ।

वस्तुतस्तु दीधितिकारोक्तरीत्या आकाशकालदिशामीश्वरेऽन्तर्भावाद्दिङ्नाम द्रव्यान्तरं नास्त्येवेति मन्तव्यम् । वेदान्तिनस्तु अविद्यैवाथवाऽविद्याचित्सम्बन्ध एव कालो दिगप्यविद्याचित्संबन्ध एवेति न पृथग् द्रव्यान्तराभ्युपगमः ।

दिशः श्रोत्रमित्यत्र श्रुतिवाक्यमन्यपरमिति मूलं तस्य तत्तदभिमानिदेवतापरमिति बृहदारण्यकभाष्ये श्रीशङ्कराचार्याः। तत्तदभिमानिदेवतास्तत्तदिन्द्रियाण्यधिष्ठाय जीवस्योपकुर्वन्ति जीवदवस्थायाम्। मरणकाले चोपकारो निवर्तत इत्यर्थः।

(४५)

योगिप्रत्यक्षस्य भट्टेन निरस्तस्य भट्टजयन्तेन व्यवस्थापनं वेदान्तिमतस्योपोद्बलकम्। देवताधिकरणभाष्ये 'धर्मोत्कर्षवशाद् व्यासादयो देवादिभिः प्रत्यक्षं व्यवजह्रुरिति शिलष्यते' इत्युक्तेः प्रत्यक्षधर्माण इति महाभाष्यञ्च। तत्र देवादिभिरित्यनेन धर्मादेरपि ग्रहणादिन्द्रियागोचरत्वस्य समानत्वात्। भट्टैस्तु बौद्धनिराकरणाय शब्ददेवतावादोऽङ्गीकृतोऽतो योगिनिराकरणं शरीरादिविशिष्टदेवताया अभाववत् तत्प्रत्यक्षनिराकरणञ्च सङ्गच्छते (पृ० १६३)।

चतुर्णामपि वेदानां तथा वेदान्तर्गतविधिमन्त्रार्थवादनामधेयानां च प्रामाण्यं मीमांसकरीत्यैवोपपाद्य शैववैष्णवाद्यागमानामपि प्रामाण्यमुपपादयति श्रीजयन्तभट्टः। तथाहि—जैमिनिना स्मृतीनां पुराणानां च वेदमूलकतया प्रामाण्यमभ्यधायि स्मृतिपादे धर्मस्य शब्दमूलत्वादित्यादिना। वेदः ईश्वरोच्चरितः अस्मिन् न्यायमते। अपौरुषेय इति तु जैमिनिमते इति भेदे सत्यपि स्मृतिप्रामाण्योपपादनप्रकारः श्रीजयन्तभट्टेन विशेषप्रशंसामर्हति। अयं हि महाजनपरिग्रहात् स्मृतीनां मनुयाज्ञवल्क्यादिप्रणीतानां प्रामाण्यमिच्छति। के महाजनाः? ये वेदोक्तं चातुर्वर्ण्यं चातुराश्रम्यं चाङ्गीकुर्वन्ति, ते सर्वे महाजनाः। शैवाः वैष्णवाः शाक्ताः सांख्या योगाः इत्यादयोपि महाजना एव वेदपरिग्रहाद् वर्णाश्रमादिप्रामाण्याभ्युपगमाच्च। तेषु परस्परविरोधः कथमुपपद्यते इति चेत्, उच्यते, वेदेऽपि परस्परविरोधो दृश्यते उदितानुदितहोमादौ अधिकारिभेदाच्च परिह्रियते। एवं शैवाद्यागमानामपि व्यवस्थिताधिकारिभेदाद् न विरोधः। अत एव व्याससूत्रेष्वपि विज्ञानादिभावे वा तदप्रतिषेध इति व्याचख्यौ पुण्डरीकाक्षाचार्यः इत्याह।

श्रीशङ्कराचार्याणामप्ययमेवाभिप्रायो दृश्यते 'येन त्वंशेन वेदैः न विरुध्यते तदंशे तेषां प्रमाण्याभ्युपगमात्' इति तैरभ्युपगमात्।

अत एव 'एतेनयोगः प्रयुक्तः इति बादरायणसूत्रस्थं येन त्वंशेन न विरुध्यते तेनेष्टमेव सांख्ययोगस्मृत्योः प्रामाण्यं इति भाष्यं व्याकुर्वता भामतीकारेण 'न च

तदप्रमाणं प्रधानादौ प्रमाणं च यमादौ इति वाच्यं तत्राप्रामाण्ये अन्यत्राप्यप्रामाण्यात् तदुक्तं—'प्रसरं न लभन्ते हि यावत्क्वचन मर्कटाः। नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे' इति न्यायेनान्यत्राप्यप्रामाण्यापातात्। अतः यत्र वेदविरोधस्तत्र तेषां तात्पर्यं नेत्येव वक्तव्यमित्युक्त्वा सांख्ययोगादीनां प्रामाण्यं समर्थितम्। तन्न्यायेनैव शैवाद्यागमानामपि प्रामाण्यं रक्षणीयम्। तथाहि शैवैः पाञ्चरात्रस्य गौतमादिशाप-ग्रस्तैरेव परिग्रहात् वेदविरुद्धत्वाद् वेदनिन्दापरत्वाच्च अप्रामाण्यमुच्यते। वैष्णव-पाञ्चरात्रिकैः तामसेन शिवेनोक्तत्वात् तदप्रामाण्यमुच्यते। परं तूभयोः वेदप्रामाण्यवादिशिष्टैरभ्युपेतत्वाद् उभयोः प्रामाण्यमङ्गीकार्यमेव अवान्तरविशेषस्तु न तात्पर्यविषयः तदंशे न प्रामाण्यमुच्यते। एवमांशिकप्रामाण्यवादिपक्षं समर्थयन् सर्वांशेऽपि प्रामाण्यमस्त्येव यत्र विरुध्यते वेदेन तत्र तात्पर्यं तद्ग्रन्थस्य नास्तीत्यत्र तात्पर्यमिति समर्थयामास। अनयैव रीत्या जयन्तभट्टः पाञ्चरात्रशैवाद्यागमानामपि प्रामाण्यं समर्थयते महाजनपरिग्रहादेव प्रामाण्यमभ्युपगच्छन् इति।

वाराणस्याम् **अक्षयतृतीयायाम्,** वि॰ सं॰ २०३९	विदुषां वशंवदः **सम्पादकः**

न्यायमञ्जरी

विषयसूचिका

विषयः	पृष्ठाङ्कः
प्रथममाह्निकम्	१-१०२
मङ्गलाचरणम्	३
शास्त्रस्य स्वर्गापवर्गप्रतिपादकत्वम्	६
शास्त्रविभागः	७
इतिहासादीनां विद्यास्थानत्वविचारः	७
वेदाङ्गानां विद्यास्थानत्वम्	८
मीमांसायाः पृथग् विद्यात्वम्	८
न्यायविस्तरस्य विद्यामूलत्वम्	८
विद्यास्थानस्वरूपविचारः	८
न्यायविस्तरपदार्थः	९
वैशेषिकस्य न्यायविस्तरानुयायित्वम्	६
न्यायविस्तर एवान्वीक्षिकी	९
विद्यास्थानानां चतुर्दशत्वम्	६
मीमासान्यायविस्तरयोः प्रस्थानभेदः	१०
मीमांसाया वेदप्रामाण्यरक्षणाक्षमत्वम्	१०
न्यायविस्तरादिविद्यानामादिसर्गतः प्रवृत्तिः	१०
शास्त्रारम्भहेतुः	१०
उपदेष्टव्यनिर्णयः	१०
शास्त्रप्रणेतुस्तत्त्वज्ञत्वम्	११
प्रथमसूत्रस्य प्रयोजनम्	११
अभिधेयादिवर्णनप्रयोजनम्	११
प्रयोजनज्ञानात् शास्त्रे प्रवृत्तिः	१२
अनुबन्धचतुष्टयम्	१३
तत्राभिधेयस्वरूपम्	१३

विषयः	पृष्ठाङ्कः
प्रथमसूत्रार्थविचारः	१४
शास्त्रप्रतिपाद्यविचारः	१५
शास्त्रप्रवृत्तिप्रकारः	१९
प्रकृते निरूपणीयं वस्तु	२०
प्रमाणपदार्थविचारः	२०
प्रमाणपदनिरुक्तिविचारः	२०
करणस्वरूपविचारः	२१
सामग्रीविचारः	२२
ज्ञानस्यैव प्रमाणत्वं न वेति विचारः	२४
निराकारज्ञानवादिवैभाषिकमतम्	२४
साकारज्ञानवादिसौत्रान्तिकमतम्	२५
विज्ञानवादिमतम्	२६
भाट्टमतम्	२७
तन्मतखण्डनम्	२८
कारकपदार्थविचारः	२९
धात्वर्थविचारः	२९
ज्ञानस्य क्रियात्वविचारः	३१
प्रामाण्यपदार्थविचारः	३३
स्मृतेरप्रामाण्ये हेतुविचारः	३४
प्रामाण्यस्वरूपे मतान्तरं तन्निरासश्च	३५
प्रमाणलक्षणे सांख्यमतनिरासः	४०
स्वमते प्रमाणलक्षणं तद्भेदाश्च	४०
प्रमाणचातुर्विध्ये शङ्का	४३
प्रमाणद्वैविध्यं शाक्यमते	४३
शाक्यमतखण्डनम्	४६
प्रमाणसंप्लवसमर्थनम्	४८
प्रमाणानामाधिक्यपरीक्षणम्	५२

विषयः	पृष्ठाङ्कः
अर्थापत्तेः प्रमाणान्तरत्वम्	५२
अर्थापत्तेः प्रमाणान्तरतानिरासः	६०
अतीन्द्रियशक्तेर्निर्विषयत्वम्	६०
अभावपूर्विकार्थापत्तिखण्डनम्	६३
प्रभाकरमतेऽर्थापत्तिसमर्थनम्	६४
प्रभाकरमतखण्डनम्	६४
अर्थापत्तेः स्वरूपान्तरखण्डनम्	६५
श्रुतार्थापत्तिखण्डनम्	६७
ध्वनिकारमतनिरासः	७६
अभावस्य प्रमाणान्तरत्वम्	७९
अभावस्य प्रमाणान्तरतानिरासः	८१
बौद्धमतेऽभावस्यावस्तुत्वम्	८५
विशेषणविशेष्यभावसम्बन्धस्वरूपविचारः	८६
एकादशानुपलब्धिनिरूपणम्	८८
अभावस्य वस्तुत्वम्	९०
अभावानभ्युपगन्तृप्रभाकरमतखण्डनम्	९६
अभावभेदाः	९९
सम्भवैतिह्ययोः प्रमाणान्तरत्वखण्डनम्	९९
प्रमाणसंख्यायां चार्वाकमतसमालोचनम्	१००
द्वितीयमाह्निकम्	**१०३–२१६**
प्रत्यक्षलक्षणम्	१०३
प्रत्यक्षलक्षणे पूर्वपक्षः	१०३
तत्र सिद्धान्तः	१०४
करणं फलं वा प्रत्यक्षपदार्थ इति विचारः	१०४
आलोचनज्ञानस्य हानादिफलत्वे शङ्का	१०५
रुचिकारप्रभृतीनां मतम्	१०५
भाष्यविवरणकाराणां प्रवरादीनां मतम्	१०६

विषयः	पृष्ठाङ्कः
प्रसङ्गात् परामर्शस्याप्रत्याख्येयत्वम्	१०६
तत्र सिद्धान्तः	१०७
शक्तेः प्रत्यक्षग्राह्यता	१०६
सम्बन्धस्य प्रत्यक्षगम्यत्वविचारः	११०
प्रमाणतत्फलयोर्नाभेदः	११०
प्रत्यक्षलक्षणेऽतिव्याप्तिवारणम्	११३
प्रत्यक्षलक्षणघटकपदार्थनिर्वचनम्	११४
सन्निकर्षस्यावश्यकत्वम्	११४
प्रत्यक्षलक्षणेऽव्याप्तिनिरासः	११५
प्रत्यक्षप्रवृत्तिप्रकारः	११५
प्रत्यक्षलक्षणे ज्ञानपदसार्थक्यम्	११६
शाक्यमते सुखादेरपि ज्ञानरूपत्वम्	११६
सुखादेर्ज्ञानातिरिक्तत्वप्रदर्शनम्	११६
सुखोत्पत्तेः पूर्वं निराश्रयं सुखत्वं न कारकम्	११८
प्रत्यक्षलक्षणेऽव्यभिचारिपदेन ज्ञानव्यवच्छेदो न वेति विचारः	११९
व्यवसायपदेन ज्ञानलाभसम्भवे प्रत्यक्षलक्षणे ज्ञानपदनिवेशे हेतुप्रदर्शनम्	१२०
अव्यपदेश्यपदसार्थक्यम्	१२०
तत्र वृद्धनैयायिकमतनिरासेन रुचिकारादिमतम्	१२१
तत्र प्रवरादीनामरुचिप्रदर्शनम्	१२२
संज्ञोल्लेखिप्रत्यक्षस्य शाब्दत्वम्	१२२
शाब्दिकमते प्रत्ययमात्रस्यैव शाब्दत्वम्	१२३
निर्विकल्पकस्याव्यपदेश्यत्वम्	१२४
प्रत्यक्षस्याशाब्दत्वे रुचिकारादिसम्मतिः	१२५
प्रत्यक्षे शब्दस्य न करणत्वम्	१२५
सविकल्पकस्य शाब्दत्वखण्डनम्	१२७
विषयभेदेन ज्ञानभेदे प्रवरसम्मतिः	१२९

विषयः	पृष्ठाङ्कः
उपायभेदाद् ज्ञानभेदे रुचिकारसम्मतिः	१३०
रुचिकारमतेऽव्यपदेश्यपदसार्थक्यबीजम्	१३२
तत्र केषाञ्चित् पूर्वपक्षः	१३२
केषाश्चिन्मतेऽव्यपदेश्यपदसार्थक्यम्	१३४
अव्यभिचारिपदसार्थक्यम्	१३५
आलम्बनपदार्थविचारः	१३६
विभ्रमवारणार्थमव्यभिचारिपदमिति शङ्कानिरासः	१३६
व्यवसायपदसार्थक्यम्	१३८
अव्यभिचारिपदेन संशयविपर्ययनिरासः	१३८
तत्र प्रवरपक्षीयानामाशङ्कानिरासः	१३८
संशयविपर्यययोरव्यपदेश्यत्वम्	१३९
प्रत्यक्षपदस्य यौगिकत्वादिविचारः	१४०
धर्मकीर्तिसंस्कृतं दिङ्नागीयं प्रत्यक्षलक्षणम्	१४१
बौद्धमते कल्पनापञ्चकं सोदाहरणम्	१४३
कल्पनाज्ञानस्याप्रमाणत्वाविपर्ययत्वाबाधितत्वञ्च	१४४
कल्पनाया अप्रमाणत्वनिरासः	१४४
सामान्यतः कल्पनाया बाधितत्वनिरासः	१४७
सविकल्पकस्य प्रामाण्यम्	१४८
निर्विकल्पकस्य ग्राह्यविषये मतान्तराणि	१४८
स्वमते निर्विकल्पकग्राह्यविषये शङ्का तत्समाधानञ्च	१४९
दिङ्नागधर्मकीर्त्योः प्रत्यक्षलक्षणखण्डनम्	१५१
जैमिनीयस्य 'सत्संप्रयोगे' इत्यादेः प्रत्यक्षलक्षणत्वखण्डनम्	१५३
लौकिकालौकिकप्रत्यक्षयोर्धर्माग्राहित्वसाधने दोषः	१५५
योगिप्रत्यक्षसाधनम्	१५६
प्रातिभज्ञानस्वरूपविचारः	१६०
योगिनः सर्वज्ञत्वविचारः	१६२
सांख्यकारिकोक्तप्रत्यक्षलक्षणखण्डनम्	१६३

विषयः	पृष्ठाङ्कः
अनुमानलक्षणपरीक्षा	१६४
व्याप्तिग्रहोपाये शाक्यमतम्	१६९
तत्खण्डनम्	१६९
साहचर्यस्यानुमितिहेतुत्वम्	१७३
नियमस्वरूपनिर्देशः स्मृतिस्वरूपविचारश्च	१७४
अनुमानप्रामाण्ये पूर्वपक्षः	१७५
अनुमानलक्षणे आक्षेपनिरासः	१७९
अनुमितिहेतुस्वरूपविचारः	१८०
अनुमानलक्षणे आक्षेपसमाधानम्	१८२
लोकायतैकदेशिमतेऽ मानविशेषाणामेवाप्रामाण्यम्;	
तन्मतखण्डनञ्च	१८४
अनुमानसूत्रे तत्पूर्वकपदार्थविचारः	१८५
सूत्रस्थत्रिविधपदसार्थक्यम्	१८७
पूर्ववदादिपदार्थविचारः	१८७
पूर्ववदनुमानविचारः	१८८
शेषवदनुमानस्वरूपविचारः	१९०
सामान्यतोदृष्टानुमानस्वरूपम्	१९१
प्रकारान्तरेणानुमानत्रैविध्यम्	१९२
तत्र शङ्का तत्समाधानञ्च	१९३
सामान्यतोदृष्टशेषवदनुमानयोरविशेष इति शङ्कायाः समाधानम्	१९४
क्रियानुमानवादः	१९४
क्रियानुमानवादखण्डनम्	१९५
शक्त्यनुमानवादप्रतिषेधः	१९७
अनुमानं त्रैकालिकविषयग्राहकम्	१९८
कालासत्त्ववादः	१९८
तत्खण्डने कालप्रत्यक्षतावादिमतम्	१९९
तत्रैव कालानुमेयतावादिमतम्	२००

विषयः	पृष्ठाङ्कः
उपाधिकृतं कालत्रैविध्यम्	२०२
कालवदेव दिशः सिद्धिः	२०४
उपमानस्वरूपे वृद्धनैयायिकमतम्	२०५
तत्र नव्यमतम्	२०६
उपमानस्य प्रमाणान्तरत्वे शङ्का	२०६
उपमानस्य प्रमाणान्तरत्वस्थापनम्	२०७
उपमानस्योपयोगे शङ्कासमाधाने	२०९
मीमांसकमते उपमानस्वरूपम्	२१०
तत्रानुपपत्तिः	२११
मीमांसकाभिमतोपमानस्य स्वातन्त्र्येनोपयोगाभावप्रदर्शनम्	२१३
तृतीयमाह्निकम्	**२१७-३२६**
शब्दस्यानुमानेऽन्तर्भावपक्षः	२२०
शब्दस्य पृथक् प्रामाण्यस्थापनम्	२२१
शब्दप्रामाण्ये शङ्का	२२६
तत्र शङ्कापरिहारः	२२८
प्रामाण्यस्य स्वतस्त्वपरतस्त्वविचारोपक्रमः	२३१
प्रामाण्यं स्वत इति मीमांसकाः	२३१
अपौरुषेयत्वाद् वेदानां स्वतः प्रामाण्यम्	२३९
प्रामाण्यस्य स्वतस्त्वपरिहारः	२४०
प्रामाण्यस्य स्वत उत्पत्तिनिराकरणम्	२४४
प्रभाकरमतेन परतः प्रामाण्यखण्डनम्	२४९
तन्मते ज्ञानानामबाध्यत्वात् प्रामाण्यं स्वतः	२४९
विपरीतख्यातौ शङ्कान्तरम्	२५०
तत्रैव शङ्कान्तरम्	२५१
असत्ख्यातिस्तन्निरासश्च	२५३
आत्मख्यातिस्तन्निरासश्च	२५३
अख्यातिस्वरूपम्	२५४

॥ श्रीः ॥

न्यायमञ्जरी

प्रमाणप्रकरणम्

[प्रथमाह्निकम्]

नमः शाश्वतिकानन्दज्ञानैश्वर्यमयात्मने ।
सङ्कल्पसफलब्रह्मस्तम्बारम्भाय शम्भवे ॥ १ ॥

नमामि यामिनीनाथलेखालङ्कृतकुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥ २ ॥

न्यायमञ्जरीग्रन्थिभङ्गः

नमोऽनवसितासक्तचित्क्रियाशक्तिसम्पदे ।
विष्णवे त्रिजगद्व्यापिपरमाश्चर्यमूर्तये ॥ १ ॥

सङ्कल्पितफलावाप्तिकल्पपादपमञ्जरीम् ।
स्वान्तस्तापतमःशान्त्यै मातृकां नौमि चण्डिकाम् ॥ २ ॥

मधुरासु प्रसन्नासु ग्रन्थयोऽतिरसास्वपि ।
जयन्तोक्तिषु दृश्यन्ते क्वचिदिक्षुलतास्विव ॥ ३ ॥

सुकुमाराशयाः केचित् सन्ति तद्भङ्गविक्लवाः ।
अतस्तेभ्यो व्यधत्तेमं भङ्गं **श्रीशङ्करात्मजः** ॥ ४ ॥

प्राप्य **चक्रधरश्च**क्रमिव सर्वविदः श्रुतम् ।
शशाङ्कधरतोऽभेद्य**ग्रन्थिभेदा**हितोद्यमः ॥ ५ ॥

नमः शाश्वतिकानन्देति । आनन्दः सुखम् । ज्ञानम् अखिलार्थदृक् संवित् । ऐश्वर्यम् अणिमाद्यष्टगुणयोगः । शाश्वतिकानि नित्यानि च तान्यानन्दज्ञानैश्वर्याणि

सुरासुरशिरोरत्नमरीचिखचिताङ्घ्रये ।
विघ्नान्धकारसूर्याय गणाधिपतये नमः ॥ ३ ॥

जयन्ति पुरजिद्दत्तसाधुवादपवित्रिताः ।
निदानं न्यायरत्नानामक्षपादमुनेर्गिरः ॥ ४ ॥

अक्षपादमताम्भोधिपरिमर्षरसोत्सुकाम् ।
विगाहन्तामिमां सन्तः प्रसरन्तीं सरस्वतीम् ॥ ५ ॥

नानागुणरसास्वादखिन्नाऽपि विदुषां मतिः ।
आलोकमात्रकेणेममनुगृह्णातु नः श्रमम् ॥ ६ ॥

शाश्वतिकानन्दज्ञानैश्वर्याणि, तानि प्रकृतानि प्राचुर्येण प्रस्तुतानि यस्य स शाश्वतिकानन्दज्ञानैश्वर्यमयः, तादृगात्मा यस्य । प्राचुर्यं द्विविधम्—सततावियोगो बाहुल्यञ्च । तदत्र सततावियोगापेक्षया मयट् । नित्यत्वं चैषामीश्वरसिद्धौ[१] वक्ष्यति । ब्रह्मण आरभ्य स्तम्बपर्यन्तश्चतुर्दशविधो भूतग्रामो ब्रह्मस्तम्बः । सङ्कल्पेन सफलः । सह फलेन स्वसंवेदनलक्षणेन वर्तत इति सफलः । सफलो यो ब्रह्मस्तम्बस्तस्य य आरम्भस्तन्निष्पत्त्यर्थश्चेष्टाविशेषः । स सफलब्रह्मस्तम्बारम्भः । सङ्कल्प एवेच्छाविशेष एव सफलब्रह्मस्तम्बारम्भो यस्य । न पुनरिच्छाजनितप्रयत्नपूर्वकोऽस्मदादीनामिव कार्यविशेषारम्भो भगवत इति स्तुतिर्गुणातिशयाभिधानरूपा । विचित्रसुखदुःखसंवेदनस्य यद्यपि कर्मकृतत्वं प्राणिनाम्, तथापीश्वरेच्छानिरपेक्षाणां तेषां न तत्र सामर्थ्यमिति वक्ष्यति । तथा चागमोऽपि—"अज्ञो जन्तुरनीशोऽयम्" इति ।

आरभ्यते वा येनारम्भः प्रयत्नः, सफलब्रह्मस्तम्बविषयारम्भः प्रयत्नः सङ्कल्प एव यस्येति । न तु सङ्कल्पादन्यः प्रयत्नस्तस्यास्ति, यद् वक्ष्यति ईश्वरसिद्धौ 'प्रयत्नश्चास्य सङ्कल्पविशेष एव' इति । यत् प्रयत्नेन सिद्ध्यति, तस्य सत्यसङ्कल्पत्वाद् भगवतः सङ्कल्पेनैव सिद्धिरिति ततोऽन्यस्य प्रयत्नस्य कल्पना निष्प्रमाणिकेति वक्ष्यमाणस्य तात्पर्यम् ।

अन्ये व्याचक्षते सङ्कल्पलक्षणेन फलेन सफलः सप्रयोजनो ब्रह्मस्तम्बारम्भो यस्य । स्वभावप्रवृत्तं सङ्कल्पमात्रमेव फलं प्रयोजनं प्रवर्तकं जगत्सर्गे भगवतः, पूर्णकामत्वेनान्यस्यापेक्षणीयस्याभावात् ।

न्यायौषधिवनेभ्योऽयमाहृतः परमो रसः ।
इदमान्वीक्षिकीक्षीरान्नवनीतमिवोद्धृतम् ॥ ७ ॥
कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः ।
वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम् ॥ ८ ॥
तैरेव कुसुमैः पूर्वमसकृत्कृतशेखराः ।
अपूर्वरचने दाम्नि दधत्येव कुतूहलम् ॥ ९ ॥
यद्वा निर्गुणमप्यर्थमभिनन्दन्ति साधवः ।
प्रणयिप्रार्थनाभङ्गसंविधानामशिक्षिताः ॥१०॥
तदियं वाङ्मयोद्यानलीलाविहरणोद्यतैः ।
विदग्धैः क्रियतां कर्णे चिराय न्यायमञ्जरी ॥११॥
अक्षपादप्रणीतो हि विततो न्यायपादपः ।
सान्द्रामृतरसस्यन्दफलसन्दर्भनिर्भरः ॥१२॥

तथा चाह भगवान् **व्यासः**—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं प्रवर्ते चाथ कर्मणि ॥

फलस्य च प्रवर्तकत्वमग्रे प्रतिपादयिष्यते । यदि वा सङ्कल्पेन सम्पद्यतामिदम् इत्येवंरूपेण सत्यसङ्कल्पत्वाद् भगवतः सफलो निष्पत्तिलक्षणेन फलेन फलवान् ब्रह्मस्तम्बारम्भो यस्य । फलान्तराभिसन्धिनापि हि प्रवर्तमानानां कर्मस्वारम्भसमये समारभ्य निष्पत्तेरेवेष्यमाणत्वात् फलत्वं दृष्टम्, इष्टलक्षणत्वात् फलस्य । तथा हि कीर्त्यादिफलकामा ग्रन्थादि चिकीर्षन्तो ग्रन्थनिष्पत्तिरूपावान्तरफलनिष्पत्तये नमस्कारादि कुर्वन्तो दृश्यन्ते । स्तम्बः स्थावरस्तृणगुल्मादिकः, तत्पर्यन्तं हि प्राणिनः कर्मवशात् संसरन्ति । तथा च स्थावरानधिकृत्याह **मनुः**—

एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः ।
घोरेऽस्मिन् भूतसंसारे नित्यं सततयायिनि ॥ इति ।

यद्यपि चास्मिन् दर्शने स्थावराणामचैतन्यम्, तथापि चेतनावत् सहचरितत्वात् सृष्टौ चेतनावदुपचारस्तेषाम्, 'दण्डिनो गच्छन्ति' इतिवत् । यथा दण्डरहिता अपि दण्डिसाहचर्याद् दण्डिन इत्युपचर्यन्त इति ।

संविधानामशिक्षिता इति । ण्यन्ताच्छिक्षतेः स्वकर्मणि क्तः ।

वयं मृदुपरिस्पन्दास्तदारोहणपङ्गवः ।
न तद्विभूतिप्राग्भारमालोकयितुमप्यलम् ॥१३॥
तदेकदेशलेशे तु कृतोऽयं विवृतिश्रमः ।
तमेव चानुगृह्णन्तु सन्तः प्रणयवत्सलाः ॥१४॥
असङ्कुचैरपि नात्मीयैरल्पैरपि परस्थितैः ।
गुणैः सन्तः प्रहृष्यन्ति चित्रमेषां विचेष्टितम् ॥१५॥
परमार्थभावनाक्रमसमुन्मिषत्पुलकलाञ्छितकपोलम् ।
स्वकृतीः प्रकाशयन्तः पश्यन्ति सतां मुखं धन्याः ॥१६॥

शास्त्रमेव स्वर्गापवर्गप्रतिपादकम्

इह प्रेक्षापूर्वकारिणः पुरुषार्थसम्पदमभिवाञ्छन्तस्तत्साधनाधिगमोपायमन्तरेण तदवाप्तिममन्यमानास्तदुपायावगमनिमित्तमेव प्रथममन्वेषन्ते । दृष्टादृष्टभेदेन च तद्द्विविधः पुरुषार्थस्य पन्थाः । तस्य दृष्टे विषये रुचिः प्ररूढवृद्धव्यवहारसिद्धान्वयव्यतिरेकाधिगतसाधनभावे भोजनादावनपेक्षितशास्त्रस्यैव भवति प्रवृत्तिः 'न हि मलिनः स्नायात्', 'बुभुक्षितो वाऽश्नीयात्' इति शास्त्रमुपयुज्यते । अदृष्टे तु स्वर्गापवर्गमात्रे नैसर्गिकमोहान्धतमसविलुप्तालोकस्य लोकस्य शास्त्रमेव प्रकाशः । तदेव सकलसदुपायदर्शने दिव्यं चक्षुरस्मदादेर्न योगिनामिव योगसमाधिजज्ञानाद्युपायान्तरमपीति । तस्मादस्मदादेः शास्त्रमेवाधिगन्तव्यम् ।

योगसमाधिजेति । योगो द्विविधः—सम्प्रज्ञातोऽसम्प्रज्ञातश्च । योग एव क्रमेण समाध्यवस्थामसम्प्रज्ञातत्वलक्षणां सम्प्राप्तो योगसमाधिः । केवलयोगग्रहणे क्रियमाणे सम्प्रज्ञातेऽपि स प्रत्ययः स्यादिति समाधिग्रहणम् । समाधिशब्दे तु योगशब्दं विनोक्ते यमनियमादियोगाङ्गाष्टकमध्यवर्तिनि योगाङ्गे समाधौ प्रसङ्गो न निवर्तत इत्युभयग्रहणेनाभीष्टार्थप्रतिपादनान् नास्ति पौनरुक्त्यम् । योगसमाधिशब्दयोर्हि पर्यायतया पौनरुक्त्यमाशङ्कते, तदेव नास्ति । यदा आत्मादेर्यथाभूतेन स्वरूपेण सम्यक् प्रकर्षेण ज्ञानम्, तदा सम्प्रज्ञातो योगः सबीजः समाधिर्भण्यते । यदा तु विपर्ययोऽभ्यासक्रमेण स्वरूपेणाप्यात्मनः सम्प्रज्ञाताभावः, तदाऽसम्प्रज्ञातो योगो निर्बीजः समाधिः । योगाङ्गस्य पुनः समाधेर्लक्षणम् "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" इति । तच्छब्देनात्र सूत्रे "तत्र प्रत्ययैकतानता ध्यानम्" इति प्राक्सूत्रनिर्दिष्टं ध्यानं परामृष्टम् ।

शास्त्रविभागः

तच्च चतुर्दशविधम्, यानि विद्वांसश्चतुर्दशविद्यास्थानान्याचक्षते । तत्र वेदाश्चत्वारः । प्रथमोऽथर्ववेदः, द्वितीय ऋग्वेदः, तृतीयो यजुर्वेदः, चतुर्थः सामवेदः । एते चत्वारो वेदाः साक्षादेव पुरुषार्थसाधनोपदेशस्वभावाः, 'अग्निहोत्रं जुहुयात् स्वर्गकामः', 'आत्मा ज्ञातव्यः' इत्यादिश्रुतेः । स्मृतिशास्त्रमपि मन्वाद्युपनिबद्धमष्टकाशिखाकर्मप्रपाप्रवर्तनादिपुरुषार्थसाधनोपदेश्येव दृश्यते । अश्रूयमाणफलानामपि कर्मणां फलवत्ता विधिवृत्तपरीक्षायां वक्ष्यते, सर्वो हि शास्त्रार्थः पुरुषार्थपर्यवसायी, न स्वरूपनिष्ठ इति ।

इतिहासादीनां विद्यास्थानत्वविचारः

इतिहासपुराणाभ्यामपि **उपाख्यानादिवर्णनेन वैदिक एवार्थः प्रायेण प्रतन्यते । यथोक्तम्—**

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ।। इति ।

सर्वो हि शास्त्रार्थ इति । सर्वः काम्यनित्यादिः शास्त्रार्थः पुरुषार्थे स्वर्गप्रत्यवायपरिहारादौ पर्यवस्यति । न स्वरूपनिष्ठः, यथा **प्राभाकरा** नित्यान् कर्तव्यत्वादेव कर्तव्यानाहुः, न पुरुषार्थहेतुत्वेन, काम्यैरविशेषप्रसङ्गः स्यादिति वदन्तः ।

इतिहासपुराणाभ्यामपीति । तयोर्हि **वेद**विहितमेव क्वचित् तत्प्रतिषिद्धम्, क्वचिद् विशिष्टपुरुषाचरणद्वारेण विशिष्टफलप्रदत्वेन प्रदर्शितम् 'इदं कर्मामुना समाचरितम्, सोऽप्येवंरूपेणानिष्टेन फलेन योगं प्राप' इति वैदिक एवार्थो विशिष्टपुरुषानुष्ठानतत्फलकीर्तनेन प्रतन्यते । यथा दशरथादेर्वेदोदितां पुत्रेष्ट्यादिक्रियामनुष्ठितवतो रामभरतादिपुत्रजन्मप्रवर्तनम्; नहुषादेश्च ब्राह्मणावगूरणादिनिषिद्धाचरणेनाजगरत्वाप्त्याद्यनिष्टफलकीर्तनम् । तथा च लोके व्याधिता न तथा वैद्योपदिष्टौषधादिसेवने प्रवर्तते, यथा पार्श्वस्थोक्ताः 'इदमौषधं सेव्यताम्, अस्मिन् हि सेविते ममान्यस्य चैष व्याधिराश्वेव विनष्ट इति ।

वेदं समुपबृंहयेत् इति । वैदिकानि विधिवाक्यानि पौराणिकैरैतिहासिकैश्च तत्फलपरैरुपाख्यानैर्विमिश्रयेदित्यर्थः । न च सम्यग् मदभिधेयानुष्ठेयसारूप्याद् मया

तदेवं वेदपुराणधर्मशास्त्राणां स्वत एव पुरुषार्थसाधनोपदेशस्वभावत्वाद् विद्यास्थानत्वम् ।

वेदाङ्गानां विद्यास्थानत्वम्

अङ्गानि व्याकरणज्योतिःशिक्षाच्छन्दोनिरुक्तानि वेदार्थोपयोगिपदादिव्युत्पादनद्वारेण विद्यास्थानत्वं प्रतिपद्यन्ते । तेषामङ्गसमाख्यैव तदनुगामितां प्रकटयति ।

मीमांसायाः पृथग् विद्यात्वम्

विचारमन्तरेणाव्यवस्थितवेदवाक्यार्थानवधारणान्मीमांसा वेदवाक्यार्थविचारात्मिका वेदाकरस्येतिकर्तव्यतारूपमनुबिभ्रतीति विद्यास्थानतां प्रतिपद्यते । तथा च भट्टः—

धर्मे प्रमीयमाणे तु वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥

अत एव सप्तममङ्गमिति न गण्यते मीमांसा, प्रत्यासन्नत्वेन वेदैकदेशभूतत्वात् । विचारसहायो हि शब्दः स्वार्थं निराकाङ्क्षं प्रबोधयितुं क्षमः ।

न्यायविस्तरस्य विद्यामूलत्वम्

न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानाम्, वेदप्रामाण्यहेतुत्वात् । वेदेषु हि तार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलितास्थाः कथमिव बहुवित्तव्ययायासादिसाध्यं वेदार्थानुष्ठानमाद्रियेरन् साधवः ? किं वा तदानीं स्वामिनि परिम्लाने तदनुयायिना मीमांसादिविद्यास्थानपरिजनेन कृत्यमिति ? तस्मादशेषदुष्टतार्किकोपमर्दद्वारकदृढतरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेशक्षमम् अक्षपादोपदिष्टमिदं न्यायविस्तराख्यं शास्त्रं प्रतिष्ठाननिबन्धनमिति परं विद्यास्थानम् ।

विद्यास्थानस्वरूपविचारः

विद्यास्थानत्वं नाम चतुर्दशानां शास्त्राणां पुरुषार्थसाधनज्ञानोपायत्वमेवोच्यते । वेदनं विद्या । तच्च न घटादिवेदनमपि तु पुरुषार्थसाधनवेदनम् । विद्यायाः

वेदेन करणभूतेनानुष्ठेयत्वेन प्रतिपादित इति बुद्ध्या गृहीत्वा प्रतरिष्यति प्रतरणेनानुष्ठाने
× × × × × × (अग्रेतनग्रन्थस्त्रुटितः)

स्थानमाश्रय उपाय इत्यर्थः। तच्च पुरुषार्थसाधनपरिज्ञानोपायत्वं कस्यचित् साक्षात्कारेण, कस्यचिदुपायद्वारेणेति तानीमानि चतुर्दशविद्यास्थानानीत्याचक्षते। यथोक्तम्—

पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ इति।

अन्यत्राप्युक्तम्—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥ इति।

वेदप्रामाण्यसाधकानामेव न्यायविस्तरपदवाच्यत्वम्

पूर्वत्र तर्कशब्देनोपात्तमुत्तरत्र च न्यायविस्तरशब्देनैतदेव शास्त्रमुच्यते। न्यायस्तर्कोऽनुमानं सोऽस्मिन्नेव व्युत्पाद्यते। यतः सांख्यार्हतानां तावत् क्षपणकानां कीदृशमनुमानोपदेशकौशलम्, कियदेव तत्तर्केण वेदप्रामाण्यं रक्ष्यत इति नासाविह गणनार्हः। बौद्धास्तु यद्यपि अनुमानमार्गावगाहननैपुण्याभिमानोद्धुरां कन्धरामुद्वहन्ति, तथाऽपि वेदविरुद्धत्वात् तत्तर्कस्य कथं वेदादिविद्यास्थानस्य मध्ये पाठः? अनुमानकौशलमपि कीदृशं शाक्यानामिति पदे पदे दर्शयिष्यामः। चार्वाकास्तु वराकाः प्रतिक्षेप्तव्या एवेति कः क्षुद्रतर्कस्य तदीयस्येह गणनावसरः।

वैशेषिकास्तु न्यायविस्तरानुयायिनः

वैशेषिकाः पुनरस्मदनुयायिन एवेत्येवमस्यां जनतासु प्रसिद्धायामपि षट्तर्क्यामिदमेव तर्कन्यायविस्तरशब्दाभ्यां शास्त्रमुक्तम्।

न्यायविस्तरस्यैवान्वीक्षिकीपदवाच्यत्वम्

इयमेवान्वीक्षिकी चतसृणां विद्यानां मध्ये न्यायविद्या गण्यते। "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती" इति। प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा अनुमानमित्यर्थः। तद्व्युत्पादकं शास्त्रमान्वीक्षिकम्।

विद्यास्थानानां चतुर्दशत्वनिर्णयः

ननु चतस्रश्चेद् विद्याः, कथं चतुर्दश दर्शिताः? नैष विरोधः, वार्तादण्डनीत्योर्दृष्टैकप्रयोजनत्वेन सर्वपुरुषार्थोपदेशविद्यावर्गे गणनानर्हत्वात्। त्रय्यान्वीक्षिक्योश्च तत्र निर्देशाच्चतुर्दशैव विद्याः।

मीमांसान्यायविस्तरयोः प्रस्थानभेदः

ननु वेदप्रामाण्यनिर्णयप्रयोजनश्चेन्न्यायविस्तरः कृतमनेन, मीमांसात एव तत्सिद्धेः। तत्र ह्यर्थविचारवत् प्रामाण्यविचारोऽपि कृत एव। सत्यम्, स त्वानुषङ्गिकः। तत्र मुख्यस्त्वर्थविचार एव। पृथक्प्रस्थाना ह्रीमा विद्याः।

प्रस्थानभेदवशान्मीमांसाया वेदप्रामाण्यरक्षणाक्षमत्वम्

सा च वाक्यार्थविद्या, न प्रमाणविद्येति।

न च मीमांसकाः सम्यग् वेदप्रामाण्यरक्षणक्षमां सरणिमवलोकयितुं कुशलाः। कुतर्ककण्टकनिकरनिरुद्धसञ्चरमार्गाभासपरिभ्रान्ताः खलु त इति वक्ष्यामः। न हि प्रमाणान्तरसंवाददार्ढ्यमन्तरेण प्रत्यक्षादीन्यपि प्रमाणभावं भजन्ते, किमुत तदधीनवृत्तिरेष शब्दः। शब्दस्य हि समयोपकृतस्य बोधकत्वमात्रम्। स्वाधीनमर्थतथात्वेतरत्वपरिनिश्चये तु पुरुषमुखप्रेक्षित्वमस्यापरिहार्यम्। तस्मादाप्तोक्तत्वादेव शब्दः प्रमाणीभवति, नान्यथेत्येतच्चास्मिन्नेव शास्त्रे व्युत्पादयिष्यते।

न्यायविस्तरादिविद्यानामादिसर्गतः प्रवृत्तिः

नन्वक्षपादात् पूर्वं कुतो वेदप्रामाण्यनिश्चय आसीत्? अत्यल्पमिदमुच्यते। जैमिनेः पूर्वं केन वेदार्थो व्याख्यातः? पाणिनेः पूर्वं केन पदानि व्युत्पादितानि? पिङ्गलात् पूर्वं केन च्छन्दांसि रचितानि? आदिसर्गात् प्रभृति वेदवदिमा विद्याः प्रवृत्ताः, संक्षेपविस्तरविवक्षया तु तांस्तांस्तत्र कर्तॄनाचक्षते।

शास्त्रारम्भहेतुः

ननु वेदप्रामाण्यं निर्विचारसिद्धमेव साधवो मन्यन्त इति किमत्र विचारयत्नेन? न संशयविपर्यासनिरासार्थत्वात्। यस्य हि वेदप्रामाण्ये संशयाना विपर्यस्ता वा मतिस्तं प्रति शास्त्रारम्भः। न हि विदितवेदार्थं प्रति मीमांसा प्रस्तूयते। तदुक्तम् "नान्यतो वेदविद्भ्यश्च सूत्रवृत्तिक्रियेष्यते" इति।

उपदेष्टव्यनिर्णयः

भवति च चतुष्प्रकारः पुरुषः–अज्ञः, सन्दिग्धः, विपर्यस्तो, निश्चितमतिश्चेति। तत्र निश्चितमतिरेष मुनिरमुना शास्त्रेणाज्ञस्य ज्ञानमुपजनयति, संशयानस्य संशयमुपहन्ति, विपर्यस्यतो विपर्यासं व्युदस्यतीति तान् प्रति युक्तः शास्त्रारम्भः।

शास्त्रप्रणेतुस्तत्त्वज्ञत्वम्

कुतः पुनरस्यर्षेरपि निश्चितमतित्वं जातम् ? उच्यते—भवति तावदेष निश्चितमतिः । स तु तपःप्रभावाद् वा देवताराधनाद् वा शास्त्रान्तराभ्यासाद् वा भवतु, किमनेन ? तत्रैतत् स्यात् तत एव शास्त्रान्तरादस्मदादेरपि तत्त्वाधिगमो भविष्यतीति किमक्षपादप्रणीतेन शास्त्रेण ? परिहृतमेतत्, संक्षेपविस्तरविवक्षया शास्त्रप्रणयनस्य साफल्यात् । विचित्रचेतसश्च भवन्ति पुरुषा इत्युक्तम् । येषामित एवाज्ञानसंशयविपर्यया विनिवर्तन्ते तान् प्रत्येतत्प्रणयनं सफलमितीदं प्रणीतवानाचार्यः । तत्रेदमादिसूत्रम्—

"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ।"

प्रथमसूत्रं प्रयोजनीयं न वा ?

ननु किमर्थोऽयमादिवाक्यारम्भः ? कोऽयं प्रश्नः ? शास्त्रं चेदारम्भणीयं क्रमवृत्तित्वाद् वाचः प्रथममवश्यं किमपि वाक्यं प्रयोक्तव्यम् । न ह्यादिवाक्यमकृत्वा द्वितीयादिवाक्यप्रणयनमुपपद्यत इति ग्रन्थकरणमेवाघटमानं स्यात् ।

शास्त्रादावभिधेयादिवर्णनप्रयोजनम्

आह - न खल्वेवं न जाने, किन्तु यदेव शास्त्रे व्युत्पाद्यत्वेन स्थितं तदेव व्युत्पाद्यताम्, किमादौ तदभिधेयप्रयोजनकीर्तनेन ? उच्यते ।

आदिवाक्यं प्रयोक्तव्यमभिधेयप्रयोजने ।
प्रतिपादयितुं श्रोतृप्रवाहोत्साहसिद्धये ॥
अभिधेयफलज्ञानविरहास्तमितोद्यमाः ।
श्रोतुमल्पमपि ग्रन्थमाद्रियन्ते न सूरयः ॥

को हि नाम विद्वानविदितविषये निष्प्रयोजने च कर्मणि प्रवर्तते ? आह च भट्टः—

सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत् तत्केन गृह्यते ॥ इति ।

प्रयोजनज्ञानादेव शास्त्रे प्रवृत्तिः

ननु प्रयोजनपरिज्ञानमादौ श्रोतॄणां कुतस्त्यमिति चिन्त्यताम् । किमस्मादेव वाक्यात्, उत युक्तितः ? वाक्यं तावदनिश्चितप्रामाण्यं कथं प्रयोजननिश्चयाय प्रभवति ? संशयाद्वा प्रवृत्तो वेदार्थेऽपि तथैव स्यादिति शास्त्रमनारब्धव्यं स्यात् । युक्तितः प्रयोजनावगमः शास्त्रे सर्वस्मिन्नधीते सति सम्भवति, नेतरथेति तदवगमपूर्विकायां प्रवृत्तावितरेतराश्रयः । शास्त्राधिगमनात् प्रयोजनपरिज्ञानम्, प्रयोजनपरिज्ञानाच्च शास्त्रश्रवणे प्रवृत्तिः । उच्यते । आदिवाक्यादेव श्रोतुः शास्त्रप्रयोजनपरिज्ञानम्, अर्थसंशयाच्च श्रवणे प्रवृत्तिः ।

वेदे ह्यसिद्धप्रामाण्ये महाक्लेशेषु कर्मसु ।
नानार्थशङ्कया युक्तमनुष्ठानप्रवर्तनम् ॥
बहुवित्तव्ययायासवियोगसुगमेऽध्वनि ।
प्रवृत्तिरुचितोदारफले लघुपरिश्रमे ॥
शृण्वन्त एव जानन्ति सन्तः कतिपयैर्दिनैः ।
किमेतत्सफलं शास्त्रमुत मन्दप्रयोजनम् ॥
सूक्ष्मेक्षिका तु यद्यत्र क्रियते प्रथमोद्यमे ।
असौ सकलकर्तव्यविप्रलोपाय कल्पते ॥
आर्तो हि भिषजं पृष्ट्वा तदुक्तमनुतिष्ठति ।
तस्मिन् सविचिकित्सस्तु व्याधेराधिक्यमाप्नुयात् ॥
तेनादिवाक्याद् विज्ञाय साभिधेयं प्रयोजनम् ।
तत्सम्भावनया कार्यस्तच्छास्त्रश्रवणादरः ॥

यैरप्यादिवाक्यमित्थं व्याख्यायते किलानन्वितपदार्थकं वाक्यमनुपादेयम्, दशदाडिमादिवाक्यवत्; अन्वितपदार्थकमपि निष्प्रयोजनमनुपादेयमेव सदसद्वायसदशनविमर्शवाक्यमिव; तदिहोपादेयताव्यापकप्रयोजनाद्यनुपलम्भादनादरणीयत्वमिति व्यापकानुपलब्ध्या प्रत्यवतिष्ठमानः प्रयोजनाद्यभिधायिनाऽऽदिवाक्येन निवृत्ताशङ्कः क्रियत इति; तैरपि प्रयोजनप्रतिपादनमेवादिवाक्यस्यार्थ इत्युक्तं भवति । तत्प्रतिपादनेनैव व्यापकानुपलब्धिपरिहारादाशङ्का निवारिता भवतीति ।

यदपि प्रवृत्तिहेतोरर्थसंशयस्य तर्कापरनाम्न औचित्यस्य वा समुत्पादनमादिवाक्येन क्रियत इति केचिदाचक्षते, तदपि प्रयोजनाभिधानद्वारकमेव। प्रयोजनविषयो हि संशयो वा, सम्भावनाप्रत्ययो वा, प्रवृत्त्यङ्गभूतस्तेनोत्पादनीय इति तदुत्पत्तौ प्रयोजनाभिधानमेवादिवाक्यस्य व्यापारः। संशयस्तु वस्तुवृत्तोपनत एव, पुरुषवचसां द्वैविध्यदर्शनात्। शौचसमाचारसाधुतादिना तु तस्मिन् सम्भावनाप्रत्ययोऽपि लोकस्य भवतीति। तस्मात् प्रयोजनप्रतिपादनार्थमेवादिवाक्यमिति सूक्तम्।

यच्च श्रोतृप्रवृत्त्यङ्गं तद्वक्तुं युक्तमादितः।
न च प्रयोजनज्ञानादन्यदस्ति प्रवर्तकम्॥

अभिधेयकथनमपि तत्साध्यप्रयोजनोपपादनाय, श्रोतृबुद्धिसमाधानाय च कर्तव्यमेव।

अर्थाक्षिप्तस्तु सम्बन्धः फलशास्त्राभिधेयगः।
तन्निर्देशेन सिद्धत्वान्न स्वकण्ठेन कथ्यते॥

अनुबन्धचतुष्टयवर्णनम्

अभिधेयस्य शास्त्रस्य वाच्यवाचकभावलक्षणः सम्बन्धः, शास्त्रार्थस्य निःश्रेयसस्य च साध्यसाधनभावः सम्बन्धः, तदाश्रयनिर्देशादेव सिद्धः।

अभिधेयस्वरूपवर्णनम्

अभिधेयास्तु प्रमाणादयो निग्रहस्थानपर्यन्ताः षोडश पदार्थाः प्रथमसूत्रे निर्दिष्टाः। तेषां स्वरूपमुपरिष्टाद् वक्ष्यते। अर्थपरिच्छित्तिसाधनानि प्रत्यक्षादीनि प्रमाणानि। तत्परिच्छेद्यमात्मादि। नानार्थावमर्शः संशयः। हिताहितप्राप्तिपरिहारौ तत्साधनञ्च प्रयोजनम्। हेतोः प्रतिबन्धावधारणं दृष्टान्तः। प्रमाणतोऽभ्युपगम्यमानः सामान्यविशेषवानर्थः सिद्धान्तः। परार्थानुमानवाक्यैकदेशभूताः प्रतिज्ञादयोऽवयवाः। सन्दिग्धेऽर्थेऽन्यतरपक्षानुकूलकारणदर्शनात् तस्मिन् सम्भावनाप्रत्ययस्तर्कः। साधनोपालम्भजन्मा तत्त्वावबोधो निर्णयः। वीतरागवस्तुनिर्णयफलो वादः। विजिगीषुकथा पुरुषशक्तिपरीक्षणफला जल्पः। तद्विशेषो वितण्डा। अहेतवो हेतुवदवभासमाना हेत्वाभासाः। अर्थविकल्पैर्वचनविघातश्छलम्। हेतुप्रतिबिम्बनप्रायं

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः। अहेतुसमादीनां प्रत्यवस्थानानां हेतुप्रतिबिम्बनरूपत्वाभिप्रायं प्रायोग्रहणम्।

प्रत्यवस्थानं जातिः । सत्यवस्त्वप्रतिभासो विपरीतप्रतिभासश्च निग्रहस्थानम् । तत्र वक्ष्यमाणलक्षणसूत्रनिर्देशानुसारेण कानिचिदेकवचनान्तानि पदानि विग्रहे ग्रहीतव्यानि । प्रमाणावयवहेत्वाभासानां बहुवचनेन विग्रहो दर्शयितव्यः, शेषाणामेकवचनेन लक्षणसूत्रेषु तथा निर्देशात् । एवञ्चोद्देशलक्षणयोरेकविषयता नितरां दर्शिता भवति । इतरेतरयोगे द्वन्द्वः समासः ।

प्रथमसूत्रार्थविचारः

प्रमाणादीनां तत्त्वमिति सम्बन्धमात्रे षष्ठी । तत्त्वस्य ज्ञानं निःश्रेयसस्याधिगम इति कर्मणि षष्ठ्यौ, तत्त्वस्य ज्ञायमानत्वेन निःश्रेयसस्य चाधिगम्यमानत्वेन कर्मत्वात् ।

नन्वेवं व्याख्यायमाने तत्त्वप्रमाणादिपदसापेक्षत्वेनासमर्थत्वादसमासः प्राप्नोति, सापेक्षमसमर्थं भवतीत्याहुः । न चेदं प्रधानं सापेक्षम्, येन भवति वै प्रधानस्य सापेक्षस्यापि समास इति । 'राजपुरुषः शोभनः' इतिवत् समस्येत । उत्तरपदार्थप्रधानत्वात् षष्ठीतत्पुरुषस्य ज्ञानमेवात्र प्रधानं तत्त्वमुपसर्जनम् । अतश्च 'ऋद्धस्य राज्ञः पुरुष' इतिवदसमास एव युक्तः ।

ननु ज्ञानमपि प्रमाणादिसापेक्षं भवत्येव, तद्विषयं हि तदिति । न, तत्त्वपदेनास्य निराकाङ्क्षीकृतत्वात् । तत्त्वस्य ज्ञानमिति, तदिदानीं तत्त्वमेव सापेक्षं वर्तते, कस्य तत्त्वमिति । तस्मात् तत्त्वस्योपसर्जनस्य सतः सापेक्षत्वादसमास एवेत्येवमभिशङ्कमानाः केचन 'तत्त्वं च तज्ज्ञानं च' इति कर्मधारयं व्याचचक्षिरे । तत् पुनरयुक्तम्, ज्ञानस्य स्वतस्तत्त्वातत्त्वविभागाभावात् । विषयकृतो हि ज्ञानानां तथाभावः, अतथाभावो वा? तदेतत् तत्त्वविषयज्ञानं भवति, न स्वतस्तत्त्वस्वभावम् । किं पुनरिदं तत्त्वं नाम ? सतोऽसतो वा वस्तुनः प्रमाणपरिनिश्चितस्वरूपम्, शब्दप्रवृत्तिनिमित्तं तदित्युच्यते । तस्य भावस्तत्त्वमिति । तच्च ज्ञानेन निश्चीयते । तत्परिच्छिन्दज्ज्ञानं तत्त्वज्ञानमित्युच्यते । ज्ञानस्यापि तद्रूपं ज्ञानान्तरपरिच्छेद्यमेव भवति । निर्णयतत्त्वाच्च प्रमाणादय इति व्यतिरेकनिर्देश एव युक्तः । न चासमासप्रसङ्गमात्रादन्यथावर्णनमुचितम्, ईदृशानां समासानां सामर्थ्यानपायेन बहुशो

निर्णयतत्त्वाच्चेति । प्रमाणादीनां तत्त्वस्यैवात्र निर्णीयमानत्वात् तत्त्वस्य ज्ञानमिति व्यतिरेकनिर्देश एव युक्त इत्यर्थः ।

दृष्टत्वात्, देवदत्तस्य गुरुकुलमिति । उपसर्जनं नोपसर्जनमिति । न कारणमेतत्, समासे विग्रहवाक्यसमानार्थतया समासो भवति, सा चेह विद्यत एव । वैयाकरणा अपि ईदृंशि पदानि समस्यन्त्येव, "अथ शब्दानुशासनम् । केषां शब्दानाम् ? लौकिकानां वैदिकानाञ्चेति" । तस्माद् यथाभाष्यमेव षष्ठीत्रयव्याख्यानमनवद्यम् ।

शास्त्रप्रतिपाद्यविचारः

ननु षोडशपदार्थतत्त्वज्ञानस्य कथं निःश्रेयसाधिगमहेतुत्वमिति वक्तव्यम् । वेदप्रामाण्यसिद्ध्यर्थञ्चेदं शास्त्रमिति तावन्मात्रमेव व्युत्पाद्यताम्, किं षोडशपदार्थकन्थाग्रन्थनेन ? उच्यते । आत्मापवर्गपर्यन्तद्वादशविधप्रमेयज्ञानं तावदन्यज्ञानानौपयिकमेव साक्षादपवर्गसाधनमिति वक्ष्यामः । तत्त्वज्ञानान्मिथ्याज्ञाननिरासे सति तन्मूलः संसारो निवर्तत इति, प्रमेयं तावदवश्योपदेश्यम् । तस्य तु प्रमेयस्यात्मादेरपवर्गसाधनत्वाधिगम आगमैकनिबन्धनः ।

तस्य प्रामाण्यनिर्णीतिरनुमाननिबन्धना ।
आप्तोक्तत्वञ्च तल्लिङ्गमविनाभावि वक्ष्यते ॥

उपसर्जनं नोपसर्जनमिति । 'इदमुपसर्जनमतः पदान्तरसापेक्षं न समस्यते, इदन्तु नोपसर्जनं प्रधानम्, अतः पदान्तरसापेक्षमपि समस्यते' इति न कारणम् । विग्रहवाक्यसमानार्थतेति वोच्यते । तर्हि विशेषतो गृह्यते निश्चीयते समासार्थः । तथा हि--'राजपुरुषः' इत्यादौ किं 'राज्ञः पुरुषः' आहोस्वित् 'राजा पुरुषो यस्य' अथ 'राजा चासौ पुरुषश्च' इत्याद्याः शङ्काः 'राज्ञः पुरुषः' इत्यनेन निवर्तन्ते । तेन विग्रहवाक्येन तुल्यार्थता यत्र तत्र समासः । 'राजपुरुषः शोभनः' इत्यत्र 'राज्ञः पुरुषः शोभनः' इति विग्रहवाक्यासमानार्थतया समासो न, प्रधानस्य सापेक्षत्वात् । 'ऋद्धस्य राज्ञः पुरुषः' इत्येतद्विग्रहवाक्यसमानार्थत्वाभावाद् 'ऋद्धस्य राजपुरुषः' इत्यसमासः, नोपसर्जनस्य सापेक्षत्वात् । **शब्दानुशासन**मित्यत्र शब्दानामनुशासनमिति समासः, केषां शब्दानामित्येतत्सापेक्षस्यापि 'शब्द'शब्दस्य, अन्यथा समासे गुणीभूतस्य केषामिति प्रत्यवमर्शो न स्यात् ।

अन्यज्ञानानौपयिकमिति । अन्यज्ञानमनौपयिकमद्वारमनुपायो यस्य । उपाय एवौपयिकमिति स्वार्थे विनयादिपाठात् ठक् ह्रस्वश्च । अन्यज्ञानस्य वाऽनुपायः सदपवर्गसाधनं न पुनः प्रमाणादिज्ञानमिव प्रमेयज्ञानोपायतयेत्यर्थः ।

प्रतिबन्धग्रहे तस्य प्रत्यक्षमुपयुज्यते ।
कोऽन्यस्सन्तरणे हेतुरनवस्थामहोदधेः ॥
आयुर्वेदादिवाक्येषु दृष्ट्वा प्रत्यक्षतः फलम् ।
वचःप्रमाणमाप्तोक्तमिति निर्णीयतां यतः ॥

उपमानन्तु क्वचित् कर्मणि सोपयोगमित्येवं चतुष्प्रकारमपि प्रमाणं प्रमेयवद् उपदेष्टव्यम् । संशयादयस्तु पदार्था यथासम्भवं प्रमाणेषु प्रमेये चान्तर्भवन्तोऽपि न्यायप्रवृत्तिहेतुत्वात् पृथगुपदिश्यन्ते । न्यायश्च वेदप्रामाण्यप्रतिष्ठापनपूर्वकत्वेन पुरुषार्थोपयोगित्वमुपयातीति दर्शितम्—

तत्र नानुपलब्धेऽर्थे न निर्णीते प्रवर्तते ।
किं तु संशयिते न्यायस्तदङ्गं तेन संशयः ॥
प्रयोजनमनुद्दिश्य न च न्यायं प्रयुञ्जते ।
दृष्टान्तः पुनरेतस्य सम्बन्धग्रहणास्पदम् ॥

सिद्धान्तोऽपि धर्मप्रापणेनाश्रयासिद्धतामपोद्धरन्न्यायं प्रवर्तयति ।

ननु संशयपदेन न्यायविषयं सन्दिग्धं धर्मिणमभिदधताऽऽश्रयासिद्धिरपोद्धृतैव । सत्यम् । क्वचित् तु विषये संशयमन्तरेण न्यायप्रवृत्तिर्दर्शयिष्यत इति संशयितैकविषयन्यायनियमाभावात् सिद्धान्तोऽपि वक्तव्यः ।

न्यायाभिधानेऽवयवाः परं प्रत्युपयोगिनः ।
परार्थमनुमानञ्च तदाहुर्न्यायवादिनः ॥

ननु प्रतिज्ञोदाहरणाभ्यां तदभिधेयौ सिद्धान्तदृष्टान्तौ गम्येत एव, किं पृथगुपादानेन ? यद्येवं हेत्वाख्येनावयवेन तदभिधेयसिद्धेरनुमानमपि पृथङ् न वक्तव्यं स्यात् । एवं भवतु किं नश्छिन्नम् ? नैवम्, अभिधेये न्याये निरूपणीये तदभिधायिनामवयवानामवसर इति तदर्थः प्रथमं व्युत्पादनार्हो भवति, इतरथा अवयवमात्रोपदेश एव शास्त्रं समाप्येत ।

उपमानं तु क्वचित् कर्मणि सोपयोगं 'गवयमालभेत' इत्यादौ ।

संशयमन्तरेण न्यायप्रवृत्तिरिति । यदा कार्यान्तरप्रयुक्तो देशान्तरं गच्छन् सहसैव धूमावलोकनादग्निमनुमिमीते, तदा संशयं विनापि न्यायप्रवृत्तेरुपलम्भः ।

तर्कः संशयविज्ञानविषयीकृततुल्यकल्पपक्षद्वयान्यतरपक्षशैथिल्यसमुत्पादनेन तदितरपक्षविषयं प्रमाणमक्लेशसम्पद्यमानप्रतिपक्षव्युदासमनुगृह्णाति मार्गशुद्धिमादधान इति पृथगुपदिश्यते। स चाशयशुद्धिमुपदर्शयितुं वादे प्रयोक्ष्यत इत्यन्यतराधिकरणनिर्णयमन्तरेण न पर्यवस्यति। न्यायोपरमकारणत्वेन तस्य प्रवर्तको निर्णयः, इतरथा निरवसानमनासादितफलं को नाम न्यायमारभेत।

ननु तत्त्वज्ञानपदेन गतार्थत्वान्न पृथग् वक्तव्यो निर्णयः, निर्णयो हि तत्त्वज्ञानमेव। अस्त्येतत्, किं तु षोडशपदार्थतत्त्वज्ञानं प्रमाणान्तरकरणकमपि भवति। न तस्य न्यायोपरमहेतुत्वम्, एष तु साधनदूषणसरणिक्षोदजन्मा निर्णयस्तदुपरमहेतुः पृथगुपादानमन्तरेण न लभ्यते।

नन्वनुमानपदादेव, तर्हि यथाभिलषितो लप्स्यते निर्णयः? तदयुक्तम्। अनुमानफलं निर्णयः, नानुमानम्। करणस्य प्रमाणत्वान्निर्णयोपादानमन्तरेण तदनुमानमफलमपर्यवसितं स्यात्। उभाभ्यां तर्हि तत्त्वज्ञानानुमानपदाभ्यामयमाक्षेप्स्यते निर्णयः, अनुमानस्य तत्त्वज्ञानान्तत्वात्? न निर्णयोपादानाद् विना तदन्तत्वासिद्धेः, लिङ्गाभाससमुत्थतत्त्वज्ञानाभाससम्भवात्।

ननु संशयपूर्वकत्वादनुमानस्य सामर्थ्यान्निर्णयान्ततैव भविष्यतीति संशयानुमानतत्त्वज्ञानैर्गतार्थो निर्णयः? मैवम्; संशयपूर्वकत्वेऽप्यनुमानस्य तदाभासोपजनितनिर्णयाभाससम्भवात्। न चैष नियमः संशयपूर्वकमनुमानमिति। तस्मादनुमानस्य विशिष्टनिर्णयावसानत्वलाभाय निर्णयपदमुपादेयमित्यलं प्रसङ्गेन।

वादे तु विचार्यमाणे न्यायः संशयच्छेदनेनाध्यवसितावबोधम्, अध्यवसिताभ्यनुज्ञातञ्च विदधत् तत्त्वपरिशुद्धिमादधातीति वीतरागैः शिष्यसब्रह्मचारिभिः सह वादः प्रयोक्तव्यः।

स चाशयशुद्धिमुपदर्शयितुमिति। तर्कस्य प्राङ्नीत्या यद्यपि स्वतः साधनभावो नास्ति, तथाप्याशयशुद्धिं वीतरागत्वं प्रकटयितुम्। तर्कक्रमेण स्वार्थानुमानकाले यथाप्रतिपन्नः स्वयमसावर्थस्तथैव परस्य प्रतिपाद्यते, वीतरागकथात्वाद् वादस्येति।

संशयानुमानतत्त्वज्ञानैरिति। संशये सति यदनुमानं तत उत्पद्यते यत् तत्त्वज्ञानम्, तन्निर्णयस्वभावमेवेति।

जल्पवितण्डे तु दुष्टतार्किकोपरचितकपटदूषणाडम्बरसन्त्रास्यमानसरलमतिसमाश्वासनेन तद्धृदयस्थतत्त्वज्ञानसंरक्षणाय क्वचिदवसरे वीतरागस्याप्युपयुज्येत इति वक्ष्यामः।

हेत्वाभासाः सम्यङ्न्यायप्रविवेकोपकारद्वारेण तदुपयोगिनः। हेत्वाभासस्वरूपावधारणे हि सति तद्विलक्षणतया हेतवः सुखमवगम्यन्ते।

नन्वत्र विपर्ययो दृश्यते, हेत्ववगमे सति तदितरहेत्वाभासव्यवस्थापनात्। सत्यमेवम्, तथाऽपि प्रयोक्तुश्च द्वयमपि ज्ञेयम्, हेतवः प्रयुज्यन्ते हेत्वाभासाश्च परिह्रियन्त इति। यच्च निग्रहस्थानपरिगणिता अपि हेत्वाभासाः पुनरुपदिश्यन्ते तद्वादे चोदनीया भविष्यन्तीत्याशयेन।

छलजातिनिग्रहस्थानानि जल्पवितण्डोपकरणानि। तेषामवधृतस्वरूपाणां स्ववाक्ये परिवर्जनम्, क्वचिदवसरे प्रयोगः, परप्रयुक्तानाञ्च प्रतिसमाधानमित्यादि शक्यक्रियम्, अतस्तान्यपि जल्पवितण्डाङ्गत्वाद् ज्ञातव्यानीति पृथगुपदिश्यन्ते।

दुःशिक्षितकुतर्कांशलेशवाचालिताननाः।
शक्याः किमन्यथा जेतुं वितण्डाटोपपण्डिताः॥
गतानुगतिको लोकः कुमार्गं तत्प्रतारितः।
मा गादिति च्छलादीनि प्राह कारुणिको मुनिः॥
तदेवमुपदेष्टव्याः पदार्थाः संशयादयः।
तन्मूलन्यायनिर्णयवेदप्रामाण्यसंविदे॥
तेनागमप्रमाणत्वद्वाराखिलफलप्रदा।
इयमान्वीक्षिकी विद्या विद्यास्थानेषु गण्यते॥

आह च भाष्यकारः—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे परीक्षितेति॥

आह च भाष्यकार इति। **भाष्यकारो** हि—सेयमान्वीक्षिकी प्रमाणादिपदार्थैः प्रविभज्यमानेत्येतत्सापेक्षत्वं श्लोकमिमं पपाठ—**प्रदीपः सर्वविद्यानामिति**। सेयमान्वीक्षिकी **विद्योद्देशा**ख्ये **नीतिशास्त्र**प्रकरणे परीक्षिता। या सर्वविद्यानां मध्ये प्रदीप

इत्येष षोडशपदार्थनिबन्धनेन निःश्रेयसस्य मुनिना निरदेशि पन्थाः ।
अन्यस्तु सन्नपि पदार्थगणोऽपवर्गमार्गोपयोगविरहादिह नोपदिष्टः ॥

शास्त्रप्रवृत्तिप्रकारः

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षेति । नामधेयेन पदार्थाभिधानमुद्देशः । उद्दिष्टस्य तत्त्वव्यवस्थापको धर्मो लक्षणम् । लक्षितस्य तल्लक्षणमुपपद्यते न वेति विचारः परीक्षा ।

ननु च विभागलक्षणा चतुर्थ्यपि प्रवृत्तिरस्त्येव, भेदवत्सु प्रमाणसिद्धान्तच्छलादिषु तथाव्यवहारात् । सत्यम् । प्रथमसूत्रोपदिष्टे भेदवति पदार्थे भवत्येव विभागः, उद्देशरूपानपायात्तु उद्देश एवासौ । सामान्यसञ्ज्ञया कीर्तनमुद्देशः, प्रकारभेदसञ्ज्ञया कीर्तनं विभाग इति । तथा चोद्देशतयैव तत्र तत्र भाष्यकारो व्यवहरति 'अयथार्थः प्रमाणोद्देशः' इत्याक्षेपे, तस्माद् 'यथार्थ एव प्रमाणोद्देशः' इति च समाधानमभिदधानः । तस्मात्त्रिविधैव प्रवृत्तिः । तत्रोद्देशः प्रथममवश्यं कर्तव्योऽनुद्दिष्टस्य लक्षणपरीक्षानुपपत्तेः । सामान्यविशेषलक्षणयोरपि पौर्वापर्यनियमोऽस्त्येव, अलक्षिते सामान्ये विशेषलक्षणावसराभावात् । परीक्षा तु लक्षणोत्तरकालभाविनीति तत्स्वरूपनिरूपणादेव गम्यते । विभागसामान्यलक्षणयोस्तु नास्ति पौर्वापर्यनियमः, पूर्वं वा सामान्यलक्षणं ततो विभागः पूर्वं वा विभागस्ततः सामान्यलक्षणमुच्यत इति । तदिहोद्देशस्तावद्व्याख्यातः ।

इव प्रदीपो वेदप्रामाण्यकारणस्य तदर्थाधिगमोपायस्य च न्यायस्य प्रकाशनात् । उपायः सर्वकर्मणाम् । सुखावाप्तिदुःखपरिहारार्थेषु कर्मसु प्रवृत्तिरनुमानात् तत्साधनत्वनिश्चये सति यतो भवति, अतोऽनुमानव्युत्पादकत्वादियं सर्वकर्मणां प्रवृत्तावुपायः । आश्रयः सर्वधर्माणाम् । धर्मस्वरूपमागमैकसमधिगम्यम् । आगमो न्यायापेक्षः सम्यग्धर्मावबोधको भवति, नान्यथा । यदाह—

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥

इत्यतस्तदधीनत्वाद् धर्मावबोधस्याश्रयः सर्वधर्माणामित्युक्तम् ।

अयथार्थः प्रमाणोद्देश इति । 'न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्'

प्रकृतग्रन्थे निरूपणीयं वस्तु

अस्माभिस्तु लक्षणसूत्राण्येव व्याख्यास्यन्ते। परीक्षासूत्रसूचितं तु वस्तु सोपयोगलक्षणवर्णनावसरे एव यथाबुद्धि दर्शयिष्यते, न पृथक् परीक्षासूत्रविवरणश्रमः करिष्यते।

प्रथमसूत्रानन्तरं 'दुःखजन्मे'त्यादि द्वितीयं सूत्रं लक्षणानौपयिकत्वान्नेह विवृतम्, अपवर्गपरीक्षाशेषभूतत्वात्तु तदवसर एव निर्णेष्यते, प्रमाणसामान्यलक्षणम्, विभागसूत्रे त्ववसरप्राप्तत्वादिदानीमेव विव्रियते—

"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" ॥ इति

प्रमाणपदार्थविचारः

अत्रेदं तावद्विचार्यते, किं प्रमाणं नाम ? किमस्य स्वरूपम् ? किं वा लक्षणमिति ? ततस्तत्र सूत्रं योजयिष्यते। तदुच्यते। अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम्। बोधाबोधस्वभावा हि तस्य स्वरूपम्। अव्यभिचारादिविशेषणार्थोपलब्धिसाधनत्वं लक्षणम्।

प्रमाणपदनिरुक्तिविचारः

ननु च प्रमीयते येन तत्प्रमाणमिति करणसाधनोऽयं प्रमाणशब्दः। करणञ्च साधकतमम्, तमवर्थश्चातिशयः, स चापेक्षिकः, साधकान्तरसम्भवे हि तदपेक्षयातिशययोगात् किञ्चित्साधकतममुच्यते। सामग्र्याश्चैकत्वात्तदतिरिक्तसाधकान्तरानुपलम्भात् किमपेक्षमस्या अतिशयं ब्रूमः ? अपि च कस्मिन्विषये सामग्र्याः प्रमाणत्वम्। प्रमीयमाणो हि कर्मभूतो विषयः, सामग्र्यन्तरीभूतत्वात्सामग्र्येवेति करणतामेव यायात्। निरालम्बनाश्चेदानीं सर्वप्रमितयो भवेयुरालम्बनकारकस्य चक्षुरादिवत्प्रमाणान्तःपातित्वात्। कश्च सामग्र्या प्रमेयं प्रमिमीते ?

इत्यस्य विभागाक्षेपसूत्रस्यावतरणिकायाम् 'अयथार्थः प्रमाणोद्देशः' इति **भाष्यकृद्** विभागमुद्देशशब्देन व्याजहार।

बोधाबोधस्वभावेति। विशेषणज्ञानादेर्बोधस्वभावस्य तत्रानुप्रवेशाद् बोधाबोधस्वभावेत्युक्तम्।

प्रमातापि तस्यामेव लीनः। एवञ्च यदुच्यते 'प्रमाता प्रमाणं प्रमेयं प्रमितिरिति। चतसृषु विधासु तत्त्वं परिसमाप्यते' इति तद् व्याहन्यते। न च लोकोऽपि सामग्र्याः करणभावमनुमन्यते तस्यां करणविभक्तिमप्रयुञ्जानः। न ह्येवं वक्तारो भवन्ति लौकिकाः 'सामग्र्या पश्याम' इति, किन्तु 'दीपेन पश्यामः' चक्षुषा निरीक्षामहे इत्याचक्षते। तस्मान्न सामग्री करणम्, अकरणत्वाच्च न प्रमाणमिति नेदं साधु प्रमाणस्वरूपम्।

करणस्वरूपविचारः

अत्रोच्यते—यत एव साधकतमं करणं करणसाधनश्च प्रमाणशब्दः, तत एव सामग्र्याः प्रमाणत्वं युक्तम्। तद्व्यतिरेकेण कारकान्तरे क्वचिदपि तमबर्थसंस्पर्शानुपपत्तेः। अनेककारकसन्निधाने कार्यं घटमानमन्यतरव्यपगमे च विघटमानं कस्मा अतिशयं प्रयच्छेत्? न चातिशयः कार्यजन्मनि कस्यचिदवधार्यते, सर्वेषां तत्र व्याप्रियमाणत्वात्। सन्निपत्यजनकत्वमतिशय इति चेन्न। आरादुपकारकाणामपि कारकत्वानपायात्। ज्ञाने च जन्ये किमसन्निपत्य जनकम्? सर्वेषामिन्द्रियमनोऽर्थादीनामितरेतरसंसर्गे सति ज्ञाननिष्पत्तेः। अथ सहसैव कार्यजननमतिशयः, सोऽपि कस्याञ्चिदवस्थायां करणस्येव कर्मणोऽपि शक्यते वक्तुम्। अविरलजलधरधाराप्रबन्धबद्धान्धकारनिवहे बहुलनिशीथे सहसैव स्फुरता विद्युल्लतालोकेन कामिनीज्ञानमादधानेन तज्जन्मनि सातिशयत्वमवाप्यते। एवमितरकारककदम्बसन्निधाने सत्यपि सीमन्तिनीमन्तरेण तद्दर्शनं न सम्पद्यते। आगतमात्रायामेव तस्यां भवतीति तदपि कर्मकारकमतिशययोगित्वात्करणं स्यात् तस्मात्फलोत्पादाविनाभाविस्वभावत्वमवश्यतया कार्यजनकत्वमतिशयः। स च सामग्र्यन्तर्गतस्य न कस्यचिदेकस्य कारकस्य कथयितुं पार्यते, सामग्र्यास्तु सोऽतिशयः सुवचः। सन्निहिता चेत्सामग्री, सम्पन्नमेव फलमिति सैवातिशयवती।

चतसृषु विधास्विति। तत्त्वं परिसमाप्यते, अर्थः परिसमाप्तो भवति; नाधिकापेक्षोपयुज्यत इत्यर्थः।

सन्निपत्य जनकत्वमिति। अन्यकारकव्यापाराव्यवधीयमानव्यापारत्वं सन्निपत्य जनकत्वम्। फलोत्पादाविनाभाविस्वभावो यावन्न भवति, तावत् कथमवश्यतया कार्यजनको भवेत्, ताद्रूप्यं च सामग्रीतो नान्यस्येति।

ननु मुख्ययोः प्रमातृप्रमेययोरपि तदविनाभावित्वमतिशयोऽस्त्येव, प्रमितिसम्बन्धमन्तरेण तयोस्तथात्वाभावात् । प्रमिणोतीति प्रमाता भवति, प्रमीयते इति च प्रमेयम् । सत्यमेतत् । किन्तु साकल्यप्रसादलब्धप्रमितिसम्बन्धनिबन्धनः प्रमातृप्रमेययोर्मुख्यस्वरूपलाभः, साकल्यापचये प्रमित्यभावाद् गौणे प्रमातृप्रमेये सम्पद्येते, एवञ्च साकल्यमन्तरेण प्रमितितमबर्थयोगात्तदेव करणम् ।

सामग्रीविचारः

यत्तु किमपेक्षं सामग्र्याः करणत्वमिति ? तदन्तर्गतकारकापेक्षमिति ब्रूमः । कारकाणां धर्मः सामग्री न स्वरूपहानाय तेषां कल्पते, साकल्यदशायामपि तत्त्वरूपप्रत्यभिज्ञानात् ।

ननु समग्रेभ्यः सामग्री भिन्ना चेत्कथं पृथङ् नोपलभ्यते ? अभेदे तु सर्वकारकाणि करणीभूतान्येवेति कर्तृकर्मव्यवहारोच्छेदप्रसङ्गः । मैवम् । समग्रसन्निधानाख्यधर्मस्य प्रत्यक्षमुपलम्भात् । पृथगवस्थितेषु हि स्थालीजलज्वलनतण्डुलादिषु न समग्रताप्रत्ययः । समुदितेषु तु भवतीत्यतस्तन्तुपटलपरिघटितपटाद्यवयविवत्कारककलापनिष्पाद्यद्रव्यान्तराभावेऽपि समुदायात्मिका सामग्री विद्यत एवेति समुदाय्यपेक्षया करणतां प्रतिपद्यते । तस्मान्न परिचोदनीयमिदं कस्मिन्कर्मणि सामग्री करणमिति । समुदायिनां सामग्र्यवस्थायामपि स्वरूपानपायात् समुदायिविशेषे कर्मणि सामग्री करणम् । अत एव न प्रमितेर्निरालम्बनत्वम् । एतेन प्रमाता पृथगुपदर्शित इति विधाचतुष्टयमपि समाहितम् ।

यत्त्वभ्यधायि सामग्र्याः करणविभक्तिनिर्देशो न दृश्यत इति, तत्रोच्यते । सामग्री हि संहतिः, सा हि संहन्यमानव्यतिरेकेण न व्यवहारपदवीमवतरति । तेन सामग्रीं पश्यामीति न व्यपदेशः । यस्तु दीपेन्द्रियाणां तृतीयानिर्देशः स फलो-

---

ननु मुख्ययोः प्रमातृप्रमेययोरिति । तत्कालं प्रमामकुर्वन्नपि योग्यतया यः प्रमातेति भण्यते स गौणः, यस्तु तत्कालमेव प्रमाजन्मनि व्याप्रियते स मुख्यः । एवं प्रमेयमपि ।

कारककलापनिष्पाद्यद्रव्यान्तराभावेऽपीति । विजातीयानां द्रव्यारम्भकत्वादर्शनादिति भावः ।

पजननाविनाभाविस्वभावत्वाख्यसामग्रीसरूपसमारोपणनिबन्धनः । अन्यत्रापि च तद्रूपसमारोपणे स्थाल्या पचतीति व्यपदेशा दृश्यत एव । तस्मादन्तर्गतकारकापेक्षया लब्धकरणभावा सामग्री प्रमाणम् ।

अपरे पुनराचक्षते, सामग्री नाम समुदितानि कारकाणि, तेषां द्वैरूप्यमहृदयङ्गमम्, अथ च तानि पृथगवस्थितानि कर्मादिभावं भजन्ते, अथ च तान्येव समुदितानि करणीभवन्तीति कोऽयं नयः ? तस्मात्कर्तृकर्मव्यतिरिक्तमव्यभिचारादिविशेषणकार्थप्रमाजनकं कारकं करणमुच्यते ? तदेव च तृतीयया व्यपदिशन्ति । दीपेन पश्यामि, चक्षुषा निरीक्षे, लिङ्गेन बुध्ये, शब्देन जानामि, मनसा निश्चिनोमीति ।

ननु त्रीण्येव कारकाण्यस्मिन् पक्षे भवेयुः, ज्ञानक्रियायां तावदेवमेवैतद्यथा भवानाह । पाकादिक्रियासु क्रियाश्रयसाधारणाद्युपकारभेदपर्यालोचनया भवत्वधिकरणादिकारकान्तरव्यवहारः । प्रमितौ तु मनोदीपचक्षुरादेर्न लक्ष्यते विशेष इति तत्सर्वं कारणत्वेन सम्मतम् । कस्तेषु तमबर्थ इति चेत्, अस्ति कश्चिद् यदयं लोकोऽहं मया जानामि' 'घटेन घटं जानामि' इति न कर्तृकर्मणी विस्मृत्यापि करणत्वेन व्यपदिशति । नयनमनोदीपशब्दलिङ्गादीनि तु तथा व्यपदिशति । सोऽयमेषां पश्यति कर्तृकर्मवैलक्षण्यं चक्षुरादीनाम् । तद्वैलक्षण्यमेव च तेषामतिशय इति तदयमिह प्रमाणं प्रमाता प्रमेयं प्रमितिरिति चतुर्वर्गेणैव व्यवहारः परिसमाप्यते । तस्मात्कर्तृकर्मविलक्षणा संशयविपर्ययरहितार्थावबोधविधायिनी बोधाबोधस्वभावा सामग्री प्रमाणमिति युक्तम् ।

तस्मात् कर्तृकर्मविलक्षणा संशयविपर्ययरहितार्थावबोधविधायिनी बोधाबोधस्वभावा सामग्री प्रमाणमिति युक्तमित्यत्र सामग्रीशब्दः समग्रप्रधानो द्रष्टव्यः । कर्तृकर्मव्यतिरिक्तं जनकं यत् तत् प्रमाणमित्यर्थः । अन्यथा ह्युपक्रमे कर्तृकर्मव्यतिरिक्तस्य कारकमात्रस्योदाहरणप्रदर्शनेन प्रमाणत्वं प्रतिज्ञायोपसंहारे सामग्र्यास्तत्प्रतिपादनेनोपक्रमोपसंहारयोर्विरोधः स्यात् । एतच्च यथोपलब्धपाठानुसरणेन व्याख्यातम् । स्पष्टगमनिकाप्रायं चेत् पाठान्तरं क्वचिद् भवेत्, तत् सैव गमनिकाऽस्तु । एवमन्यत्रापि पाठानिश्चये द्रष्टव्यम् ।

ज्ञानस्यैव प्रमाणत्वं न वेति विचारः

ये तु बोधस्यैव प्रमाणत्वमाचक्षते न सूक्ष्मदर्शनास्ते। बोधः खलु प्रमाणस्य फलं न साक्षात्प्रमाणम्। करणार्थाभिधानो हि प्रमाणशब्दः प्रमीयतेऽनेनेति प्रमाणम्। प्रमीयते इति कोऽर्थः? प्रमा जन्यते इति, प्रमाणादवगच्छाम इति च वदन्तो लौकिकाः करणस्यैव प्रामाण्यमनुमन्यन्ते। यस्तु प्रमा प्रमाणमिति प्रमाणशब्दः स प्रमाणफले द्रष्टव्यः। तथा च संशयविपर्ययात्मकं प्रमाणाद्धि भिन्नं फलमिति ज्ञानमात्ममनोऽनुमाने, तद्विशेषणार्थपरिच्छेदे वा, विशिष्टप्रमाणजननात्प्रमाणतां प्रतिपद्यते। अव्यभिचारादिविशेषणोपपन्नमपि ज्ञानमफलजनकमप्रमाणमेव प्रमाणमुच्यते।

तदयुक्तम्। सकलजगद्विदितबोधेतरस्वभावशब्दलिङ्गदीपेन्द्रियादिपरिहारप्रसङ्गात्। तस्मात्सामग्र्यनुप्रविष्टबोधो विशेषणज्ञानमिव क्वचित्प्रत्यक्षे, लिङ्गज्ञानमिव लिङ्गिप्रमितौ, सारूप्यदर्शनमिवोपमाने, शब्दश्रवणमिव तदर्थज्ञाने, प्रमाणतां प्रतिपद्यते। अत एव बोधाबोधस्वभावा सामग्री प्रमाणमित्युक्तम्।

निराकारज्ञानवादिवैभाषिकमतम्

अन्ये तुल्यसामग्र्यधीनयोर्ज्ञानार्थयोर्ग्राह्यग्राहकभावं वदन्तो बोधं प्रमाणमभ्युपागमन्, क्षणभङ्गिषु पदार्थेषु सहकार्युपादानकारणापेक्षक्षणान्तरसन्तति-

---

तथा च संशयविपर्ययात्मकमिति। यदा करणसाधनेन प्रमाणशब्देन लोके व्यवहारः एवं सति फलस्य प्रमारूपस्याप्रामाण्यं सिध्यति। फलप्रमाणपक्षे पुनः संशयज्ञानस्य, प्रमाणलक्षणविरहाद् यत् क्वचित् सिद्धं प्रामाण्यं 'संशयितोऽयमर्थः' इत्यादौ विशेषणत्वेन तद्धीयते। फलान्तराजनकत्वेन च यदप्रामाण्यमकारकस्य फलस्य, तदपि न परिगृहीतं भवतीति तात्पर्यम्।

ननु फलात्मकत्वेन तस्यार्थाधिगमे व्यापृतत्वात् प्रमाणत्वं भविष्यति, तन्नेत्याह—"**प्रमाणाद्धि भिन्नं फलम्**" इति।

अन्ये तुल्यसामग्र्यधीनयोरिति। अजनकोऽप्यर्थः सहभाविज्ञानेन गृह्यत इति **निराकारज्ञानवादिनां वैभाषिकाणां** दर्शनम्। अजनकस्य च ग्राहकत्वेऽन्यस्यापि तत्कालभाविनोऽर्थक्षणस्य तज्ज्ञानं किमिति न ग्राहकमित्यतिप्रसङ्गनिवारणाय तुल्य

जननेन च लोकयात्रामुद्वहत्सु ज्ञानजन्मनि ज्ञानमुपादानकारणम्, अर्थः सहकारिकारणम्, अर्थजन्मनि चार्थ उपादानकारणम्, ज्ञानं सहकारिकारणमिति, ज्ञानञ्च ज्ञानार्थजन्यमर्थश्चार्थज्ञानजन्यो भवतीत्येवमेकसामग्र्यधीनतया तमर्थमव्यभिचरतो ज्ञानस्य तत्र प्रामाण्यमिति ।

साकारज्ञानवादिनां सौत्रान्तिकानां मतम्

तदिदमनुपपन्नम्, अफलजनकस्य प्रमाणत्वापत्तेरित्युक्तत्वात् । अपि च कर्मणि ज्ञानं प्रमाणमिष्यते । यथोक्तम्,

'सव्यापारमिवाभाति व्यापारेण स्वकर्मणेति' ।

स चायमर्थक्षणो ज्ञानसमकालस्ततः पूर्वाभ्यां ज्ञानार्थक्षणाभ्यामुपजनित इति तत्कर्मतां प्रतिपद्यतां न पुनःस्वसमानकालप्रसूतज्ञानक्षणकर्मतामिति ।

ननु च तुल्यसामग्र्यधीनतया समानकालतया च तदव्यभिचारसिद्धौ क्व कर्मत्वमुपयुज्यते ? हन्त तर्हि सहोत्पन्नयोः समानसामग्रीकयोर्ग्राह्यग्राहकनियमः

सामग्र्यधीनयोरित्युक्तम् । एकसामग्र्युत्पन्नत्वेन तस्यैव तद् ग्राहकम्, नान्यस्य; यथैतद्ग्रहणे तुल्यसामग्र्यधीनत्वं तस्य नियामकमस्ति तथाऽन्यग्रहणे न किञ्चिदस्तीत्यर्थः । पूर्वभावी स्वसन्तानगतसदृशक्षण उपादानकारणम् । यदुक्तम्—

"सभागहेतुः सदृशाः स्वसन्तानभुवो क्षणाः ।" इति ।

तदन्यः सहकारिकारणम् । तथा चाहुः—

"ततोऽन्ये कारणं हेतुः सहभूर्ये मिथः फलाः ।" इति ।

यत्पुनर्द्वितीयमुपादानकारणलक्षणं कृतम्—'यदुत्पत्तौ यत्सन्ताननिवृत्तिस्तत्तस्योपादानकारणम्' इति तद् विसदृशोत्पादाभिप्रायम् । तथाहि—घटोत्पत्तौ मृत्पिण्डसन्ताननिवृत्तिः; अनुत्पन्ने हि घटे मृत्पिण्डक्षणा एव सन्तानेनोत्पद्यन्ते घटे तूत्पन्ने घटक्षणा इति ।

अपि च कर्मणि ज्ञानं प्रमाणमिष्यत इति । कर्म हि विषयो भण्यते, विषयश्च स भवति यमालम्ब्य भूतमभूतं ज्ञानं सत्तां प्रतिलभते । न चायं न्यायः सहोत्पद्यमानयोरस्ति । अत्रैव सामान्येन **बौद्धदर्शन**मात्राश्रयणेन ज्ञापकमाह—**यथोक्तम्, सव्यापारमिवाभातीति** । ननु च **साकारज्ञानवादि**नामिदं वचनम् । तथा च पूर्वमर्धम्—

किं कृत इति ? कर्त्तव्यं ज्ञानं प्रकाशस्वभावमिति ग्राहकम् । अर्थो जडात्मेति ग्राह्यमिति चेदयमपि विशेषस्तुल्यकारणयोः कुतस्त्यः ? उपादानसहकारिकारणभेदादिति चेन्न । तस्य क्षणभङ्गभङ्गे निराकारयिष्यमाणत्वात् ।

तत्र विज्ञानवादिमतम्

ये हि निराकारस्य बोधरूपस्य नीलपीताद्यनेकविषयसाधारणत्वाज् जनकत्वस्य च चक्षुरादावपि भावेनातिप्रसङ्गात्तदाकारकृतमेव ज्ञानकर्मनियममवगच्छन्तः साकारविज्ञानं प्रमाणमिति प्रतिपेदिरे, तेऽपि विज्ञानाद्वैतसिषाधयिषयैवमभिदधानास्तन्निरासप्रसङ्ग एव निरसिष्यन्ते । न ह्येकमेव साकारं ज्ञानं ग्राह्यं ग्राहकञ्च भवितुमर्हतीति वक्ष्यते । अर्थस्तु साकारज्ञानवादिनो न समस्त्येव । स ह्यनुमेयो वा स्यात्प्रत्यक्षो वा ? नानुमेयः सम्बन्धग्रहणाभावात् ।

अर्थे हि सति साकारं निराकारं तदत्यये ।
नित्यानुमेयबाह्यार्थवादी ज्ञानं क्व दृष्टवान् ॥

नापि प्रत्यक्षोऽर्थः, आकारद्वयप्रतीत्यभावात्, अभ्युपगमे चानवस्थाप्रसङ्गात् । अर्थाकारो हि निराकारज्ञानगम्यो न भवतीति ज्ञानेनाकारवत्ता गृह्यते । सोऽयमिदानीं ज्ञानाकारोऽपि ग्राह्यत्वादन्येनाकारवता गृह्यते सोऽप्यन्येनेति । अथ वा अर्थो निराकारज्ञानगम्यो न भवतीति स्वग्राहके ज्ञानात्मनि समर्पितात्मा

'दधानं तच्च तामात्मन्यर्थाधिगमनात्मना' इति । अस्यार्थः—तज्ज्ञानं तामर्थरूपतां दधानं सद् यदा स्वकर्मणि स्वस्मिन् विषये ग्राह्ये नियतार्थग्रहणलक्षणेन व्यापारेण सव्यापारं नियतार्थग्रहणलक्षणव्यापारयोगीवाभाति । तस्मात् सैवार्थाकारता प्रमाणम्, तद्वशान् नीलस्येदं पीतस्येदमिति नियतनीलाद्यर्थग्रहणवदिव ज्ञानं लक्ष्यत इति तात्पर्यम् । **बौद्धमते** निर्व्यापारत्वात् सर्वधर्माणाम् 'इव'शब्दोपादानम् । एवं च **वैभाषिकमते** इदं दूषणं कथं सङ्गच्छते ? सत्यम् । किन्तु स्वस्मिन् विषये ज्ञानस्य प्रामाण्यं तैरपीष्यते । अत एव तन्मतसंवादिन एव श्लोकाकारस्योपन्यासः कृतः । अथवा **वैभाषिकै**रनिष्यमाणमपि बलादेतदङ्गीकार्यम्, अन्यथा निर्विषयत्वे ज्ञानस्य **योगाचारदर्शना**पत्तिप्रसङ्गात् ।

अथ वा अर्थो निराकारज्ञानगम्यो न भवतीत्यादिना अनुमानादर्थव्यवस्थापनेऽप्यनवस्थामाह—**पुनरन्योऽर्थः कल्पनीय** इति । साकारस्य ज्ञानस्याकारजनकोऽर्थो

भवतीति साकारं ज्ञानमेवेदं सम्पन्नमिति पुनरन्योऽर्थः कल्पनीयः। सोऽपि ग्राह्यत्वात्स्वग्राहकस्य साकारत्वसिद्धये तत्रैव लीयत इति साकारं ज्ञानमेवावशिष्यत इति पुनरन्योऽर्थ इतीत्थमनवस्था प्रतिकर्मव्यवस्था तु जनकत्वनिबन्धना भविष्यति, वस्तुस्वभावस्यापर्यनुयोज्यत्वात्। साकारपक्षेऽपि पर्यनुयोगसाम्यमित्यादि सर्वमुपपरिष्टात् सविस्तरमभिधास्यते। साकारपक्षेऽपि च न प्रमाणाद्व्यतिरिक्तं फलमुपदर्शितमित्यसत्पक्ष एवायम्।

तत्रैव भाट्टमतम्

शाबरास्तु ब्रुवते य एते बोधप्रामाण्यवादिनो विज्ञानादभिन्नमेव फलमभिदधति ते बाढं निरसनीया भवन्त्येव। वयं तु विज्ञानाद्भिन्नमेव फलमर्थदृष्टताख्यमभ्युपगच्छामः। तेनैव तदनुमीयते। ज्ञानं हि नाम क्रियात्मकम्। क्रिया च फलानुमेया। ज्ञातृव्यापारमन्तरेण फलानिष्पत्तेः संसर्गोऽपि कारकाणां क्रियागर्भ एव भवति। तदनभ्युपगमे किमधिकृत्य कारकाणि संसृज्येरन्। न चासंसृष्टानि तानि फलवन्ति। क्रियावेशवशाच्च कारकं कारकं भवति। अपरथा हि तद्वस्तुस्वरूपमात्रमेव स्याद् न कारकम्। ततश्च न फलार्थिभिरुपादीयेतेति व्यवहारविप्रलोपः। तस्माद्यथा हि कारकाणि तण्डुलसलिलानलस्थाल्यादीनि सिद्धस्वभावानि साध्यं धात्वर्थमेकं पाकलक्षणमुररीकृत्य संसृज्यन्ते, संसृष्टानि च क्रियामुत्पादयन्ति, तथात्मेन्द्रियमनोऽर्थसन्निकर्षे सति ज्ञानाख्यो व्यापार उपजायते। स च न प्रत्यक्षः, अर्थस्यैव बहिर्देशसम्बद्धस्य ग्रहणादाकारद्वयप्रतिभासाभावादगृहीतस्यापि

ऽप्रतीयमानोऽप्यनुमानेन कार्यलिङ्गरूपेण कल्प्यते। तस्य कल्प्यमानस्य यद् ग्राहकं कार्यलिङ्गजमनुमेयज्ञानं तन्निराकारं कथं ग्राहकं स्यात्? अतस्तत्र तेनाकारोऽर्पणीय इति पुनरपि ज्ञानाकार एव संवृत्तः। पुनश्च तेन कार्येणान्योऽर्थः कल्पनीय इत्यनवस्था।

वस्तुस्वभावस्यापर्यनुयोज्यत्वादिति। यदि ब्रूयात् तुल्ये कारकत्वे कथमर्थस्यैव प्रतिभास्यत्वं न चक्षुरादेरिति, तत्रोत्तरम्–'वस्तुस्वभावोऽयम्' इति। तथा च भवद्भिरपि पर्यनुयुक्तैः 'तुल्ये जनकत्वे कथमर्थस्यैवाकारग्राहि ज्ञानम्, नाक्षाणाम्' इति वस्तुस्वभावोऽयम्, इत्येवोत्तरं देयम्।

शाबरा इत्यादिना **भाट्टं** पक्षमुपक्रमते। **ज्ञातृव्यापारमन्तरेणे**ति। निःसंरम्भा-

तस्य चक्षुरादिवदुपायत्वात्परोक्षोऽपि चासौ विषयप्रकाशतालक्षणेन फलेन कल्प्यते । तदाह भाष्यकारः 'न ह्यज्ञातेऽर्थे कश्चिद्बुद्धिमुपलभते, ज्ञाते त्वनुमानादवगच्छती'ति । वार्त्तिककृताऽप्युक्तम् ।

नान्यथा ह्यर्थसद्भावो दृष्टः सन्नुपपद्यते ।
ज्ञानञ्चेन्नेत्यतः पश्चात्प्रमाणमुपकल्प्यते ॥ इति ।

तदेष फलानुमेयो ज्ञानव्यापारो ज्ञानादिशब्दवाच्यः प्रमाणम् । इन्द्रियादीनां तदुत्पादकतया ज्ञानमुपचरति न साक्षादिति ।

तन्मतखण्डनम्

अत्र प्रतिविधीयते । अहो बत इमे केभ्यो विभ्यतः श्रोत्रियाः परं किमपि वैक्लव्यमुपागताः । न खल्वनित्यं परोक्षं ज्ञानं भवितुमर्हति, ज्ञातोऽर्थ इति क्वचित्तद्विशिष्टार्थप्रत्यवमर्शदर्शनाद्, विशेषणाग्रहणे शुक्लः पट इतिवद्विशिष्टप्रतीतेरनुत्पादात् । कश्चायमियान्सन्त्रासः, विषयग्रहणकाले विज्ञानाग्रहणमात्रकेण बाह्यार्थनिह्नववादिनः शाक्याः शक्याः शमयितुम् । यत्तु क्रियास्वभावत्वात्तस्य परोक्षत्वम्, तदयुक्तम् । न हि क्रियास्वभावं ज्ञानमपि तु फलस्वभावमेव । अपि च क्रियाऽपि प्रत्यक्षद्रव्यवर्त्तिनो प्रत्यक्षैव । भट्टानां प्रत्यक्षश्चात्मा । तत्किमनेनापराद्धं यदेतदीयक्रियाया अप्रत्यक्षत्वमुच्यते । न चोत्क्षेपणादिभेदभिन्नपरिस्पन्दात्मकव्यापारव्यतिरेकेण बाह्यकारकेष्वपि सूक्ष्मा नाम काचिदस्ति क्रिया । सा हि, यदि नित्या जातिवद्, अथानित्या रूपवद्वस्तुधर्म इष्येत । तत्र यदि नित्या तर्हि सर्वदा वस्तुनः क्रियायोगात्सर्वदा फलनिष्पत्तिप्रसङ्गः । अथ कारकनिर्वर्त्या क्रिया, सापीदानीं कार्यत्वात् सव्यापारकारककार्या भवेदित्यनवस्था । निष्क्रियकारककार्यत्वे तु क्रियामिव फलमपि निष्क्रियाण्येव कारकाणि कुर्युरिति किं क्रियया ?

वस्थापरिहारेण विषयौन्मुख्यलक्षणा ससंरम्भावस्थाऽत्र ज्ञातृव्यापारः । **नान्यथा ह्यर्थसद्भाव** इति । दृष्टत्वविशिष्टार्थसद्भावोऽन्यथानुपपद्यमानो ज्ञानं पश्चात् कल्पयतीत्यर्थदर्शनकाले ज्ञानावेदकप्रमाणाभावान्नाकारद्वयोपलम्भचोद्यप्रसङ्गावकाशः । **पश्चात् प्रमाणमुपकल्प्यते** । ज्ञानग्राहकं प्रमाण····(अग्रे ग्रन्थस्त्रुटितः)

प्रसङ्गात् कारकपदार्थविचारः

ननु करोतीति कारकं क्रियावेशमन्तरेण कारकत्वानुपपत्तेः । सत्यम्, करोतीति कारकं तत्तु फलमेव करोति न क्रियाम् ।

ननु करोतीति यद् ब्रूषे सेयमुक्तैव क्रिया भवति, चैत्रः कटं करोतीति चैत्रस्येव कटस्येव करोत्यर्थस्याप्रत्याख्येयत्वात् तत्कृतमेव चैत्रादीनां कारकत्वम् । उच्यते नातीन्द्रियक्रियायोगनिबन्धनः कारकभावः, क्रियाया अतीन्द्रियत्वेन तद्योगकृतकारकत्वानधिगमे व्यवहारविप्रलोपप्रसङ्गात् । क्रियावेशकृतं हि तत्कारकत्वमनवगच्छन्तः कथं फलार्थिनस्तदुपाददीरन् ।

मत्पक्षे कारकत्वं हि नास्ति किञ्चिदतीन्द्रियम् ।
कारकत्वस्वरूपस्य सहकार्यादिसन्निधिः ॥
तावदेव विनिश्चित्य तदुपादीयतेऽर्थिभिः ।
तदेवोपाददानैश्च फलमप्यधिगम्यते ॥
निर्व्यापारस्य सत्त्वस्य को गुणः सहकारिभिः ।
सव्यापारस्य सत्त्वस्य को गुणः सहकारिभिः ॥
अथ व्यापार एवैष सर्वैः सम्भूय साध्यते ।
किं फलेनापराद्धं वस्तद्धि सम्भूय साध्यताम् ॥

तत्रैव धात्वर्थविचारः

यत्तु करोत्यर्थस्याप्रत्याख्येयत्वादित्युक्तं तत्रोच्यते परिस्पन्द एव भौतिको व्यापारः करोत्यर्थः । न हि वयं परिस्पन्दात्मकं परिदृश्यमानं व्यापारमपह्नुमहे प्रतिकारकं विचित्रस्य ज्वलनादेर्व्यापारस्य प्रत्यक्षमुपलम्भात् । अतीन्द्रियस्तु व्यापारो नास्तीति ब्रूमहे ।

ननु पाको नाम धात्वर्थः परिदृश्यमानज्वलनादिव्यापारव्यतिरिक्त एषितव्य एव, तमन्तरेण फलनिष्पत्तेरभावात् । असति च तस्मिन् किमधिकृत्य कारकाणि संसृज्येरन् इत्युक्तम्, तदयुक्तम् । यं तमेकं धात्वर्थं साध्यं बुध्यसे स किं समुदितसकलकारकसम्पाद्यः, एकैककारकनिर्वर्त्यो वा ।

तत्राद्यपक्ष एकैकं भवेत्कारकमक्रियम् ।
एकैकनिष्क्रियत्वे च साकल्येऽपि कुतः क्रिया ॥

उत्तरस्मिन्पक्षे प्रत्येकमपि पाकक्रियायोगात्सकारकान्तरनिरपेक्षादेकस्मात्कारकात्फलनिष्पत्तिप्रसङ्गः । न च तथाविधधात्वर्थपुरःसरः कारकाणां संसर्गः ।

क्रियानिमित्तसंसर्गवादिनो हि द्वयी गतिः ।
सत्यां क्रियायां सम्बन्धः सम्बन्धे सति वा क्रिया ॥
मिलनात् पूर्वसिद्धायां क्रियायां मिलनेन किम् ।
तथा च जन्येत फलं विभक्तैरपि कारकैः ॥
मिलनात्तु क्रियासिद्धौ पुनरेकैकमक्रियम् ।
तथा सति न काष्ठानि ज्वलेयुः पिठराद्विना ॥

काष्ठानि ज्वलन्ति, न तु पचन्ति । मैवम् । सत्यपि पिठरे ज्वलन्त्येव काष्ठानि नान्यत्कुर्वन्ति दृश्यन्ते । तस्मात्क्रियान्तराभावात्फलमेवोररीकृत्य कारकाणि संसृज्यन्ते ।

ननु फलमपि सिद्धं चेत् कः सर्वेषां सिद्धस्वभावानां सम्बन्धः ? फलं सिद्धं कारकाणि च सिद्धानीति सम्बन्धाभावः । साध्यश्चेत्फलम् सैव क्रिया परिस्पन्दव्यतिरिक्तेति । मैवंवोचः फलस्य क्रियात्वानुपपत्तेः । ओदनं हि फलं न क्रिया । क्रियानाम्नि तु क्रियमाणे न विवदामहे ।

ननु पाक इदानीं कः ? न च 'पचे' र्वाच्यशून्यतैव युक्ता । उच्यते । समुदितदेवदत्तादिसकलकारकनिकरपरिस्पन्द एव विशिष्टफलावच्छिन्नः पाक इत्युच्यते । स एव हि पचेरर्थः । ता एव काष्ठपिठरादिक्रिया ज्वलनभरणादिस्वभावाः पृथक्तया व्यवस्थितास्तथात्वेनैवावभासन्ते । समुदितास्तु सत्यः फलान्तरावच्छेदाद्रूपान्तरेण पाकादिना परिस्फुरन्ति व्यपदिश्यन्ते च । तथा च देवदत्तः पचतीतिवत्काष्ठानि पचन्ति, स्थाली पचतीति, व्यपदेशो दृश्यते । देवदत्तस्यापि दर्वीविघट्टनादिरेव परिदृश्यमानस्तत्र व्यापार आत्मव्यापारपूर्वको भवितुमर्हति । नैतदेवम्, न ह्यात्मनो व्यापारः कश्चिदस्ति इच्छाद्वेषपूर्वकप्रयत्नवशादेव स भौतिकव्यापारकरणतां प्रतिपद्यते ।

तस्मात्कारकचक्रेण चलता जन्यते फलम् ।
न पुनश्चलनादन्यो व्यापार उपलभ्यते ॥

चलन्तो देवदत्ताद्यास्तदनन्तरमोदनः ।
एतावद् दृश्यते त्वत्र न त्वन्या काचन क्रिया ॥

एतेन भावनाख्यः करोत्यर्थः, पुरुषव्यापारो वाक्यार्थ इति योऽभ्युपगतः सोऽपि प्रत्युक्तो वेदितव्यः । न हि पुरुषव्यापारः कश्चिदुपलभ्यते विशिष्टगुणसमवाय एवास्य कर्तृत्वम् । न च ज्ञानादयो गुणा एव व्यापारसंज्ञा वाच्याः, सिद्धस्वभावत्वात् ।

ज्ञानस्य क्रियात्वविचारः

ननु क्रियावचनो धातुरिति जानातेरपि क्रियैव वाच्या स्यात् सा च क्रिया ज्ञानात्मा पुरुषव्यापारः । नायं नियमः क्रियावचनो धातुरिति, 'गडि वदनैकदेशे' इत्यपि दर्शनात् । अपि च घटमहं जानामीत्यत्र भवतः किं प्रत्यवभासते ? घटमिति तावद्विषयः, अहमित्यात्मा, जानामीति तु चिन्त्यम्, किमत्र प्रकाशत इति, न व्यापारः, परोक्षत्वात् । फलं तु यद्यत्र प्रकाशते तदेव तर्हि धातुवाच्यमभ्युपगतं भवति । तस्मान्न क्रियात्मकं ज्ञानम् । यदि च क्रियात्मकं ज्ञानमभविष्यन्न भाष्यकारः क्रियातः पृथगेनं निरदेक्ष्यत । निर्दिशति च 'बुद्धिकर्मणी अपि हि प्रत्यभिज्ञायेते, ते अपि नित्ये प्राप्नुत' इति । तस्मादन्यज् ज्ञानमन्या च क्रियेति । न क्रियास्वभावत्वान्नित्यपरोक्षं ज्ञानम् । यदि च नित्यपरोक्षो ज्ञानव्यापारः स तर्हि प्रतिबन्धाग्रहणादनुमातुमपि न शक्यः, क्रियाविशिष्टबाह्यकारकदृष्टान्तस्य निरस्तत्वात् । आत्माद्यनुमाने का वार्त्तेति चेन्न । तत्र सामान्यतो व्याप्तिग्रहणस्य सम्भवादिति वक्ष्यामः । इह तु बाह्यकारकेष्वपि न तत्पूर्वकं फलं दृष्टमित्युक्तम् । न चार्थापत्तिरपि ज्ञातृव्यापारकल्पनायैव प्रभवति इन्द्रियार्थसन्निकर्षवशादेवार्थदृष्टताया घटमानत्वात् । का चेयमर्थदृष्टता नाम ? किं दर्शनकर्मता ? किं वा प्रकाशस्वभावतेति ? तत्र दर्शनस्य परोक्षत्वात्कथं तत्कर्मताऽर्थस्य दृष्टत्वाद् गृह्येत, विशेषणाग्रहणे विशिष्टप्रतीतेरनुत्पादात् । अर्थप्रकाशतायास्तु सर्वान् प्रत्यविशेषात्सर्वे सर्वज्ञाः स्युः । न स्युः, सम्बन्धितयोत्पादादिति चेत् । अकारणमेतत् । अर्थस्यैव हि प्रकाशत्वमतिशयो दीपादेरिव, न पुरुषनियमेन व्यवतिष्ठते ।

न च द्वित्वादिना साम्यं तस्मिन् नियमदर्शनात् ।
प्रकाशे तु न दीपादौ सम्बन्धनियमः क्वचित् ॥

यदपेक्षाधियो जातं द्वित्वमस्यैव तद्ग्रहः ।
संवेदनमपि प्राज्ञैः कस्यातिशय उच्यते ॥
ज्ञातुश्चेदन्तरान्येन व्यापारेणास्य को गुणः ।
ननु नैव क्रियाशून्यं कारकं फलसिद्धये ॥
उक्तमत्र क्रिया ह्येषा यथादर्शनमिष्यताम् ।
ज्ञानं संवेदनं वेत्ति विद्मः पर्यायशब्दताम् ॥
संवेदनं तु ज्ञानस्य फलत्वेन न मन्महे ।
अर्थातिशयपक्षे तु सर्वसर्वज्ञता पुनः ॥
भट्टपक्षाद्विशेषश्च न कश्चित्कथितो भवेत् ।
नोभयातिशयोऽप्येष दोषद्वितयसम्भवात् ॥
संवेदनञ्च तत्केन ग्राह्यं ज्ञानानुमापकम् ।
अनवस्था भवेदस्य ज्ञाने संवेदनान्तरात् ॥
स्वसंवेद्या च संवित्तिरुपरिष्टान्निषेत्स्यते ।
स्मृतिप्रमोषवादे च रजतस्मरणात्मिका ॥
कथं ते फलसंवित्तिः स्वप्रकाशा भविष्यति ।
नाभाति स्मृतिरूपेण न चाप्यनुभवात्मना ॥
न तृतीयः प्रकारोऽस्ति तत्कथं सा प्रकाशताम् ।
न च क्वचिदनाकारा संवित्तिरनुभूयते ॥
इयं संविदयञ्चार्थ इति नास्ति ह्यभेदधीः ।
अर्थाकारानुरक्ता तु यदि संवित्प्रकाशते ॥
बाह्यार्थनिह्नवस्तर्हि त्वया सौगतवत्कृतः ।
स्वप्रकाशमते युक्तं न फलं संविदात्मकम् ॥
तस्मात्फलानुमेयस्य न व्यापारस्य मानता ।

नाभाति स्मृतिरूपेण, प्रमोषाभावप्रसङ्गात् । **न चाप्यनुभवात्मना** । स्मृतेरनुभवात्मना प्रकाशे **विपरीतख्यातवादापत्तेः** ।

प्रामाण्यपदार्थविचारः

यदपि प्रमाणविशेषणमनधिगतार्थग्राहित्वमभिधीयते परैस्तदपि न साम्प्रतम्, प्रमाणस्य गृहीततदितरविषयप्रवृत्तस्य प्रामाण्ये विशेषाभावात् ।

ननु गृहीतविषये प्रवृत्तं प्रमाणं किं कुर्यात् ? प्रमामिति चेद् गृह्यतापि तामेव विधातुम् । कृतायाः करणायोगादिति चेन्न । प्रमान्तरकरणात् । प्रमान्तरकरणे किं फलमिति चेत्प्रमान्तरकरणमेव फलम् । न च फलस्य फलं मृग्यम् । न च प्रयोजनानुवर्ति प्रमाणं भवति, कस्य चैष पर्यनुयोगः, न प्रमाणस्याचेतनत्वात् । पुंसस्तु सन्निहिते विषये करणे च सम्भवन्ति ज्ञानानीति सोऽपि किमनुयोज्यताम् । किमक्षिणी निमील्य नास्से कस्माद् दृष्टं विषयं पश्यसीति । प्रमाणस्य तु न किञ्चित् बाध्यं पश्यामो येन तदप्रमाणमिति व्यवस्थापयामः । न च सर्वात्मना वैफल्यम्, हेये हि कण्टकवृकमकरविषधरादौ विषये पुनः पुनरुपलभ्यमाने मनःसन्तापात्सत्वरं तदपहानाय प्रवृत्तिः । उपादेयेऽपि चन्दनघनसारहारमहिलादौ परिदृश्यमाने प्रीत्यतिशयः स्वसंवेद्य एव भवति । यच्चेदमुच्यते ।

यत्रापि स्यात्परिच्छेदः प्रमाणैरुत्तरैः पुनः ।
नूनं तत्रापि पूर्वेण सोऽर्थो नावधृतस्तथा ॥ इति ।

तदपि न हृदयङ्गमम्, यतः

नैवाधिकपरिच्छेदः प्रमाणैरुत्तरैर्ध्रुवम् ।
धारावाहिषु बोधेषु कोऽधिकोऽर्थः प्रकाशते ॥

न हि स्वहस्ते शतकृत्वोऽपि दृश्यमाने केचन विशेषाः परिस्फुरन्ति ।

ननु गृहीतेऽपि विषये प्रवर्त्तमानं प्रमाणं कदा विरमेन् न तस्य विरतौ कञ्चिदवधिमवगच्छामः, प्रमोत्पादस्त्ववधिरनेन लङ्घित एव । उच्यते । विषयान्तरसम्पर्काद्वा, प्रमादाद्वा, उपायसंक्षयाद्वा, विरामो भविष्यति । अनवस्थाऽपि चेयं न मूलविघातिनी । न ह्युत्तरोत्तरविज्ञानोपजननं विना प्रथमज्ञानोत्पादो विहन्यते ।

मूलक्षतिकरीमाहुरनवस्थां हि दूषणम् ।
मूलसिद्धौ त्वरुच्याऽपि नानवस्था निवार्यते ।

धारावाहिष्विति । धारया अविच्छेदेन वहन्ति यानि तानि धारावाहीनि ।

यदि चानुपलब्धार्थग्राहि मानमुपेयते ॥
तदयं प्रत्यभिज्ञायाः स्पष्ट एव जलाञ्जलिः ।
यश्चेदानीन्तनास्तित्वप्रमेयाधिक्यलिप्सया ।
तस्याः प्रमाणतामाह सोऽपि वञ्चयतीव नः ॥
आ विनाशकसद्भावादस्तित्वं पूर्वया धिया ।
स्पष्टमेव तथा चाह चिरस्थायीति गृह्यते ॥
तस्मादनुपलब्धार्थग्राहित्वे त्यज्यतां ग्रहः ।
नन्वेतस्मिन्परित्यक्ते प्रामाण्यं स्यात् स्मृतेरपि ॥

स्मृतेरप्रामाण्ये हेतुविचारः

न स्मृतेरप्रमाणत्वं गृहीतग्राहिताकृतम् ।
अपि त्वनर्थजन्यत्वं तदप्रामाण्यकारणम् ॥

ननु कथमनर्थजा स्मृतिः ? तदारूढस्य वस्तुनः तदानीमसत्त्वात् । कथं तर्हि भूतवृष्ट्यनुमानं नानर्थजम् ? तत्र धर्मिणोऽनुमेयत्त्वात् तस्य च ज्ञानजनकस्य तत्र भावात् । नद्याख्य एव धर्मी वृष्टिमदुपरितनदेशसंसर्गलक्षणेन धर्मेण तद्वाननुमीयते विशिष्टसलिलपूरयोगित्वात् । स चानुमानग्राह्यो धर्मी विद्यत एवेति नानर्थजमनुमानम् । कथं तर्हि प्रातिभमनागतार्थग्राहि 'श्वो मे भ्राताऽऽगन्ते'ति प्रत्यक्षमर्थजमिष्यते भवद्भिः ? तत्र देशान्तरे विद्यमानस्य भ्रातुः श्वो भाव्यागमनविशेषः तस्यैव तथैव ग्रहणम्, तेन च रूपेण गृह्यमाणस्य सतस्तस्य ज्ञानजनकत्वमित्यर्थजमेव प्रातिभम् । स्मरणं तु निर्दग्धपित्रादिविषयमनपेक्षितार्थमेव जायमानं दृष्टमित्यन्यत्र देशान्तरस्थितार्थस्मरणे तदर्थसत्त्वमकारणमेव ।

तस्मादनर्थजत्वेन स्मृतिप्रामाण्यवारणात् ।
अगृहीतार्थगन्तृत्वं न प्रमाणविशेषणम् ॥

चिरस्थायीति गृह्यत इति । अनिमेषदृष्टेरन्तरान्तरा त्रुट्यत्स्वभावपदार्थानवधारणात् चिरस्थायित्वग्रहः । तथा चाह—

'रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते' इति ।

शब्दस्यानुपलब्धेऽर्थे प्रामाण्यञ्चाह जैमिनिः ।
सर्वप्रमाणविषयं भवद्भिर्वर्ण्यते कथम् ॥

प्रामाण्यस्वरूपे मतान्तरं तन्निरासश्च

अपरे पुनरविसंवादकत्वं प्रमाणसामान्यलक्षणमाचक्षते । तदुक्तम् प्रमाणमविसंवादकत्वञ्च प्रापकत्वमुच्यते । ज्ञानस्य च प्रापकत्वं सुखदुःखसाधनसमर्थपदार्थप्राप्तिपरिहारभूतायाः प्रवृत्तेर्निमित्तं प्रदर्शकत्वमेव । ज्ञानप्रदर्शिते हि विषये प्रवृत्तौ सत्यां प्राप्तिर्भवतीति प्राप्तिं प्रति प्रमाणस्य प्रदर्शकत्वमेव व्यापारः । प्रदर्शयता हि तेन सोऽर्थः प्रापितो भवति यथा हर्तव्यं प्रति राज्ञामाज्ञादानमेव हर्तृत्वम् । तदुक्तम् प्रापणशक्तिः प्रामाण्यमिति । लोकेऽपि च प्रदर्शितं वस्तु प्रापयतः प्रमाणत्वव्यवहारः । तच्च प्रापकत्वं प्रत्यक्षानुमानयोरुभयोरप्यस्तीति प्रमाणसामान्यलक्षणम् । तत्र प्रत्यक्षस्य वस्तुस्वलक्षणविषयत्वात् तस्य च क्षणिकत्वेन प्राप्त्यसम्भवेऽपि तत्सन्तानप्राप्तेस्सन्तानाध्यवसायजननमेव प्रापकत्वम् । अनुमानस्य त्वारोपितार्थविषयत्वेऽपि मूलभूतवस्तुक्षणपारम्पर्यप्रभवत्वान्मणिप्रभामणिबुद्धिवत्त-

---

प्रामाण्यञ्चाह जैमिनिः । 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वाद्' इति ।

प्रापणशक्तिः प्रामाण्यमिति । यद्यपि तस्य ज्ञानस्य साक्षात् प्रापकत्वं नास्ति, प्राप्तेरिच्छादिनिबन्धनत्वात्, तथापि प्राङ्नीत्या प्रदर्शकत्वमेव प्रापणशक्तिः । प्राप्तौ सामर्थ्यं प्रापकत्वम् । तथासति च तदेव प्रामाण्यमित्यर्थः । **सन्तानप्राप्तेः सन्तानाध्यवसायजननमेवेति ।** यो हि प्रापयितुं शक्यः स प्रवृत्तिविषयो भवति, यश्च प्रवृत्तिविषयः सोऽवश्यम् 'इदमिदानीमिह' इत्यध्यवसेयः । तच्चाध्यवसेयत्वं प्राप्यस्य क्षणस्य तदानीमसम्भवात् तत्रासम्भवत्प्राप्यक्षणावयवभूतक्षणपरम्परात्मके सन्तान एव युज्यत इति प्राप्यत्वाकारः सन्तानाध्यवसायोऽवश्यमेषितव्यः ।

नन्वध्यवसायो विकल्पस्तस्य चारोपितार्थग्राहित्वात् कथं बाह्यविषयत्वम् ? उच्यते । प्रत्यक्षपृष्ठभावी हि विकल्पोऽविद्यानुभववासनावशादतद्व्यावृत्त्यात्मनारोपितमाकारं गृह्णन्नुत्पद्यते । यदेव च तस्यारोपिताकारग्रहणं स एव बाह्याध्यवसायः । बाह्यस्यातद्व्यावृत्तेन रूपेणातद्व्यावृत्तिरूपविकल्पाकारसादृश्यात् । तस्मिन् गृहीते बाह्योऽध्यवसित इत्यभिमानात् प्रतिबिम्बे गृहीते मुखमध्यवसितमितिवद् । न पुनर्विकल्पः स्वमाकारं गृहीत्वा ततो बाह्यमध्यवस्यति, क्षणिकत्वहानेः ।

त्प्राप्त्या प्रापकत्वम् । तदिदमध्यवसितप्रापकत्वं प्रामाण्यम्, अध्यवसितस्याऽवस्तुत्वेऽपि तन्मूलवस्तुप्राप्त्या निर्वहति । यथाऽध्यवसितप्रापकञ्च प्रमाणमिति मतम् । अतश्च पीतशङ्खादिग्राहिणां शङ्खादिमात्रप्राप्तौ सत्यामपि न प्रामाण्यम् । यथा अवगतस्याप्राप्तेरवगतो हि पीतः शङ्खः, प्राप्यते च श्वेत इति । तस्माद्यथावगतार्थप्रापकत्वमविसंवादकत्वं प्रामाण्यमिति ।

तदेतदनुपपन्नम्, इदमेव तावद्भवान् व्याचष्टां किं प्रदर्शितप्रापकं प्रमाणमुताध्यवसितप्रापकमिति ? तत्रानुमाने तावत्प्रदर्शनमेव नास्ति का कथा तत्प्राप-

---

'कथमन्यः क्षणो गृह्यतेऽन्यश्च प्राप्यते' इत्यत्र **सौगता** एवं समर्थयन्ते । प्रत्यक्षेण यः क्षणो गृह्यते सोऽवश्यमन्यक्षणजननस्वभावो गृह्यते, यथा भवद्भिरुक्तम् ।

'रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते' इति ।

तदेवं वर्तमानक्षणग्रहणकालेऽनागताः क्षणा अगृहीता अपि तेन क्षणेनाक्षिप्ता इति नास्त्यगृहीतप्राप्तिः ।

अपरे त्वाहुः । सन्तानगतस्य क्षणविवेकस्यार्वाग्दर्शनेन कर्तुमशक्यत्वान्नीलं यदा सन्तानान्तरव्यावृत्तेन रूपेण सामान्येन गृह्यते, तदा सर्व एव क्षणा गृहीता भवन्ति, सर्वेषां सन्तानान्तरव्यावृत्तत्वेनाविशेषात् । अनुमानात्तु विशेषः; अनुमानं विजातीयव्यावृत्तिमात्रविषयम्, इदन्तु सजातीयविजातीयव्यावृत्तविषयमित्यास्तां तावदिदम् । **अनुमानस्य त्वारोपितार्थविषयत्वेऽपीति** । अनुमानग्राह्यस्य सामान्याकारस्य वक्ष्यमाणनीत्या प्रत्यक्षग्राह्यक्षणवद् बहिरसत्त्वादारोपितत्वं वह्निप्रतिबद्धधूमप्रदर्शनद्वारेणोत्पत्तेर्मूलभूतवस्तुक्षणपारम्पर्यप्रभवत्वम्, मणिप्रभामणिबुद्धिवत् । तदुक्तम्—

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥
लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात् तदाभासशून्ययोरप्यवञ्चनम् ॥ इति ।

अध्यवसितस्यावस्तुत्वेऽपीति । प्रत्यक्षेणाध्यवसितो यः सन्तानः सोऽवस्तु यद्यपि तथापि, तदध्यवसायजनकं दर्शनं वस्तुभूतस्वलक्षणप्रभवम्, अनुमेयाकाराध्यवसायश्च वस्त्वात्मकमूलभूताग्निप्रतिबद्धधूमक्षणदर्शनप्रभव इति ।

अनुमाने तावत् प्रदर्शनमेव नास्ति, वस्तुतोऽवस्तुविषयत्वात् तस्येति शेषः ।

णस्य । प्रत्यक्षे तु बाढं प्रदर्शनमस्ति न तु प्रदर्शितं प्राप्यते, क्षणिकत्वेनातिक्रान्तत्वात् । अध्यवसितप्रापणमपि दुर्घटम्, अध्यवसायस्य भवन्मते वस्तुविषयत्वाभावादवस्तुनश्च प्राप्तुमशक्यत्वात् तदुक्तं भवद्भिः "यथाध्यवसायमतत्त्वाद् यथातत्त्वं चानध्यवसायादिति ।" मूलभूतवस्तुप्राप्तिस्तु काकतालीयम्, न तु तदन्यतरेणापि प्रमाणेन स्पृष्टम्, यद्गत्वा प्राप्यते । सन्तानप्राप्त्या तत्प्राप्तिः, इत्यपि न युक्तम् । सन्तानस्य भेदाभेदविकल्पाभ्यामनुपपद्यमानत्वात् । एतच्च सविस्तरं क्षणभङ्गभङ्गे निरूपयिष्यते ।

ननु काल्पनिकेऽपि सन्ताने सति संवृत्या प्रमाणलक्षणमिदं निर्वक्ष्यति यथोक्तं सांव्यवहारिकस्यैतत्प्रमाणस्य लक्षणम्, वस्तुतस्त्वनाद्यविद्यावासनारोपितग्राह्यग्राहकादिभेदप्रपञ्चं ज्ञानमात्रमेवेदमिति । किं प्राप्यते ? को वा प्रापयतीति ? सोऽयं पलायनप्रकार इव प्रस्तूयते । केयं संवृत्तिर्नाम ? साऽपि सत्यसती वेति विकल्प्यमाना नैव व्यवहारहेतुर्भवति । अविद्यावासनाकृतश्च न भेदव्यवहारः, किं तु पारमार्थिक एवेति साधयिष्यते । सांवृत्तसन्तानकल्पनायां वा जात्यवयविप्रभृतयोऽपि सांवृत्ताः किमिति नेष्यन्ते ? वृत्तिविकल्पादिबाधकोपहतत्वादिति चेत् । सन्तानेऽपि समानः पन्था इति कदाशालम्बनमेतत् । तस्मादसंभवि दर्शितप्रापकत्वमित्यलक्षणमेतत् । अव्यापकश्चेदं लक्षणम्, उपेक्षणीयविषयबोधस्याव्यभिचारादिविशेषणयोगेन लब्धप्रमाणभावस्याप्यनेनासंग्रहात् ।

ननु कोऽयमुपेक्षणीयो नाम विषयः ? स ह्युपेक्षणीयत्वादेव नोपादीयते चेत् । स तर्हि हेय एवानुपादेयत्वादिति । नैतद्युक्तम्, उपेक्षणीयविषयस्य स्वसंवेद्यत्वेनाप्रत्याख्येयत्वात् ।

यथाध्यवसायमतत्त्वादिति । यथा अध्यवसायः स्थितस्तथा पदार्थतत्त्वं न स्थितम्, अध्यवसायस्यावस्तुविषयत्वात् । यथा च सजातीयविजातीयव्यावृत्तं तत्त्वं स्थितम् तथा अध्यवसातुमशक्यमित्यर्थः ।

संवृत्या प्रमाणलक्षणमिति । सदृशक्षणसन्ततेरदृष्टान्तरालायाः समुत्पादात् तदेकत्वग्राहिणी बुद्धिस्तत्त्वसंवरणात् संवृतिः । **सांव्यवहारिकस्य** लोकव्यवहारप्रयोजनस्य, तेनैव तत्त्वव्यवस्थायाः कर्तुं शक्यत्वात् ।

हेयोपादेययोरस्ति दुःखप्रीतिनिमित्तता ।
यत्नेन हानोपादाने भवतस्तत्र देहिनाम् ॥
यत्नसाध्यद्वयाभावादुभयस्यापि साधनात् ।
ताभ्यां विसदृशं वस्तु स्वसंविदितमस्ति नः ॥
उपादेये च विषये दृष्टे रागः प्रवर्तते ।
इतरत्र तु विद्वेषस्तत्रोभावपि दुर्लभौ ॥

यत्तु अनुपादेयत्वाद्धेय एवेति । तदप्रयोजकम् । न ह्येवं भवति 'यदेतन्नपुंसकं स पुमान् अस्त्रीत्वात्' 'स्त्री वा नपुंसकमपुंस्त्वादि'ति । स्त्रीपुंसाभ्यामन्यदेव नपुंसकं तथोपलभ्यमानत्वात् । एवमुपेक्षणीयोऽपि विषयो हेयोपादेयाभ्यामर्थान्तरं तथोपलम्भादिति ।

यदेतत्तृणपर्णादि चकास्ति पथि गच्छतः ।
न धीश्छत्रादिवत्तत्र काकोदुम्बरवन्न च ॥

तस्मादुपेक्षणीयज्ञानस्य तमप्रापयतोऽपि प्रामाण्यदर्शनान्न प्रापकत्वं तल्लक्षणम् ।

ननु यावान् प्रामाण्यस्य व्यापारः प्रापणं प्रति, तावानुपेक्षणीयज्ञानस्य तमप्रापयतोऽपि प्रामाण्यविषये तेन साधितः । उक्तं हि राज्ञामादेष्टृत्वमेव हर्तृत्वम्, प्रदर्शकत्वमेव ज्ञानस्य प्रापकत्वमिति, मैवम् ।

एवं प्रदर्शकत्वं स्यात् केवलं तस्य लक्षणम् ।
तच्च प्रचलदर्कांशुजलज्ञानेऽपि दृश्यते ॥

ननु तत्र विपरीताध्यवसायजननादप्रामाण्यम्, दर्शनं हि मरीचिस्वलक्षणविषयमेव सलिलावसायन्तु जनयदप्रमाणीभवति । तथा ह्येकमेव दर्शनमनुकूलतदितरविकल्पोपजननतदनुत्पादभेदात् त्रिधा कथ्यते—प्रमाणम्, अप्रमाणम्, प्रमाणं न

यत्नसाध्यद्वयाभावादिति । यत्नेन हानं यत्नेन चोपादानं यत्नसाध्यद्वयम् । **उभयस्य** तुल्यकालहानोपादानस्य ।

न धीश्छत्रादिवदिति । छत्राख्यः शाकभेदः । **काकोदुम्बरः** कपिकच्छुः । अन्ये तु काकोदरवदिति पठन्तः काकोदरं सर्पं व्याचक्षते ।

ननु यावान् प्रमाणस्य व्यापार इत्युपेक्षणीयमङ्गीकृत्याह ।

भवतीति। नीलज्ञानं हि नीलं प्रति प्रमाणम्, नीलमिदमित्यनुकूलविकल्पोपजननात्। नीलाव्यतिरेकि क्षणिकत्वमपि तेन गृहीतमेव, तत्र तु प्रमाणं न भवतीत्यननुकूलविकल्पानुत्पादात्। स्थैर्ये तु तदप्रमाणं विपरीतावसायकलुषितत्वादिति। यद्येवमस्मिन्प्रक्रमे सुतरामिदं प्रमाणलक्षणं दुःस्थम्। सन्तानाध्यवसायः, प्रापणं प्रति प्रमाणस्य व्यापार इति च वर्णितवानसि। अतश्च यथा मरीचिस्वलक्षणदर्शनमुदकाध्यवसायजननादप्रमाणम्, एवं स्वलक्षणदर्शनमपि तद्विपरीतसन्तानाध्यवसायजननादप्रमाणीभवेदिति। सन्ताने च काल्पनिके व्यवसिते दृश्याभिमुखः किमिति प्रवर्त्तते? दृश्यविकल्प्यावर्थावेकीकृत्य प्रवर्त्तते। यदि वा अविवेकात् प्रवृत्तस्य प्राप्तिः स्यात् प्रमाणमपि दूरतस्तस्याः। तस्मान्न प्रापकं प्रमाणम्,

अपि च प्राप्त्यप्राप्ती पुरुषेच्छामात्रहेतुके भवतः। अर्थप्रतीतिरेव प्रमाणकार्या अवधार्यते मानस्य लक्षणमतः कथयद्भिस्तद्विशेषणं वाच्यम्। न पुनः प्रापणशक्तिः प्रामाण्यं कथयितुं युक्तम्।

अनुकूलतदितरविकल्पोपजननतदनुत्पादभेदादिति। अनुकूलविकल्पजननात् **प्रमाणम्**, तदितरस्य अननुकूलस्य विकल्पस्य जननादप्रमाणम्, अजननात् प्रमाणं न भवति। **अप्रमाणमिति** पर्युदासवृत्त्या प्रमाणविरुद्धं गृह्यते, धर्मप्रतिषेधेनाधर्मवत्। **प्रमाणं न भवतीति** तु प्रसज्यप्रतिषेधसमाश्रयणेन प्रमाणरूपताया एव निषेधः। **स्थैर्ये तु तदप्रमाणं विपरीतावसायकलुषितत्वादिति।** क्षणिकताग्राहिप्रमाणेन क्षणिक इति योऽवसायो जन्यते तदपेक्षयैवमुक्तम्। **दृश्यविकल्प्यावर्थावेकीकृत्येति।** एकीकरणं कैश्चिदभेदग्रहणं व्याख्यातम्। तद्ग्राहकमानाभावात् तद्दूषयित्वा परैर्भेदाग्रहणं दृश्यविकल्प्ययोरेकीकरणमुक्तम्; तदनेन सूचितम्—**यदि वा अविवेकात् प्रवृत्तस्य प्राप्तिरिति।** **दूरतस्तस्या** इति। दर्शनं ततो व्यवसायस्तत इच्छा, अन्यानि च मध्ये ज्ञानानि, ततः प्राप्तिरिति प्राप्तेरतिदूरगत्वं प्रमाणस्य।

अर्थप्रतीतिरेव प्रमाणकार्या अवधार्यते, यतस्ततः सैव तस्य प्रमाणस्य विशेषणं युक्तम् 'अर्थप्रतीतिजनकं प्रमाणम्' इति। प्राप्तेस्तु प्रमाणकार्यत्वाभावात् कथं तद्विशेषणत्वम् 'प्रापकं प्रमाणम्' इत्युक्तमित्यर्थः। अतोऽर्थप्रतीतिजनकं प्रमाणम्, नार्थप्रापकमिति।

प्रमाणलक्षणविषये सांख्यमतनिरासः

सांख्यस्तु बुद्धिवृत्तिः प्रमाणमिति प्रतिपन्नः विषयाकारपरिणतेन्द्रियवृत्त्यनुपातिना बुद्धिवृत्तिरेव पुरुषमुपरञ्जयन्ती प्रमाणम् । तदुपरक्तो हि पुरुषः प्रतिनियतविषयद्रष्टा सम्पद्यते ।

तदेतदहृदयङ्गमम् । यो हि जानाति बुद्धयतेऽध्यवस्यति न तस्य तत्फलमर्थदर्शनमचेतनत्वान्महतः । यस्य चार्थदर्शनं न स जानाति न बुद्धयते नाध्यवस्यतीति भिन्नाधिकरणत्वं प्रमाणफलयोः । ज्ञानादिधर्मयोगः प्रमाणं पुंसि न विद्यते, तत्फलमर्थदर्शनं बुद्धौ नास्तीति ।

अथ स्वच्छतया पुंसो बुद्धिवृत्त्यनुपातिता ।
बुद्धेर्वा चेतनाकारसंस्पर्श इव लक्ष्यते ॥
एवं सति स्ववाचैव मिथ्यात्वं कथितं भवेत् ।
चिद्धर्मो हि मृषा बुद्धौ बुद्धिधर्मश्चितौ मृषा ॥
साकारज्ञानवादाच्च नातीवैष विशिष्यते ।
त्वत्पक्ष इत्यतोऽमुष्य तन्निषेधान्निषेधनम् ॥
निरसिष्यते च सकलः कपिलमुनिप्रक्रियाप्रपञ्चोऽयम् ।
तस्मान्न तन्मतेऽपि प्रमाणमवकल्पते किञ्चित् ॥

स्वमते प्रमाणलक्षणं तद्भेदाश्च

तीर्थान्तराभिहितरूपमतः प्रमाण नैवापवादरहितं प्रतितर्कयामः ।
तेनामलप्रमितिसाधनमिन्द्रियादिसाकल्यमेव निरवद्यमुशन्ति मानम् ॥

विषयाकारपरिणतेन्द्रियेति । विषयाकारपरिणतानामिन्द्रियाणां या वृत्तिर्विषयनिर्भासः प्रतिभासः, स च निर्भासो निर्विकल्पकरूपः, तदनुपातिनी तन्निर्भासा या बुद्धिवृत्तिर्निश्चयात्मिका सा सविकल्पकज्ञानरूपा ।

यो हि जानाति बुद्धयत इति । ज्ञानबोधाध्यवसायानां **साङ्ख्यै**र्बुद्धिवृत्तिरूपतयाभ्युपगमात् । तथाहि धर्मादिगुणाष्टकमध्येऽतीतविप्रकृष्टादिविषयोऽवगम आत्मविषयो वा बुद्धिगतो ज्ञानशब्देन निरुक्तः, अध्यवसायशब्देन चार्थनिश्चयः, बोधशब्देन चाध्यवसायजनको व्यापार इति । **अचेनत्वान्महत** इति । अचेतनत्वञ्च विकारित्वादिसमनुगमात् । **पुंसो बुद्धिवृत्त्यनुपातिता** अवस्थाया धारित्वम् । **साकारज्ञानवादाच्चेति** । अत्रापि बुद्धिवृत्तेर्विषयाकारनिर्भासपरिणामलक्षणाया अभ्युपगमात् ।

तच्चचतुर्विधं प्रमाणं तदाह सूत्रकारः, 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ।'

इह हि भेदवतः प्रथमं सूत्रोद्दिष्टस्य त्रयं वक्तव्यम्, सामान्यलक्षणम्, विभागो, विशेषलक्षणञ्च । तत्र विशेषलक्षणप्रतिपादकानि चत्वारि सूत्राणि भविष्यन्तीन्द्रियार्थसन्निकर्षोत्पन्नम् इत्यादीनि । इह तु विभागसामान्यलक्षणे प्रतिपाद्येते ।

एकेनानेन सूत्रेण द्वयञ्चाह महामुनिः ।
प्रमाणेषु चतुःसङ्ख्यं तथा सामान्यलक्षणम् ॥

प्रत्यक्षानुमानोपमानशब्दसन्निधाने प्रमाणश्रुतिरुच्चरन्ती चत्वार्येव प्रमाणानीति दर्शयति ।

ननु न 'चत्वारि प्रमाणानि' इति संख्यावचनः शब्दः श्रूयते । नापि प्रत्यक्षादीन्येवेत्यवधारणश्रुतिरस्ति । तत्कुतः इयत्तानियमावगमः ? शब्दशक्तिस्वभावादिति ब्रूमः । 'गर्गांस्त्रीन् भोजय' 'यज्ञदत्तदेवदत्तावानये'ति विना संख्याशब्दमेवकारञ्च भवत्येव त्रित्वद्वित्वनियमावगमः । एवमिहापि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्युक्ते सामर्थ्यान्न्यूनाधिकसंख्याव्यवच्छेदोऽवधार्यत इत्येवं तावद्विभागावगमः ।

सामान्यलक्षणन्तु प्रमाणपदादेव समाख्यानिर्वचनसामर्थ्यसहितादवगम्यते 'प्रमीयते येन तत्प्रमाण'मिति करणार्थाभिधायिनः प्रमाणशब्दात् प्रमाकरणं प्रमाणमवगम्यते । तच्च प्रागेव दर्शितम् । 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमि'ति च मध्ये साध्यसाधनग्रहणमुपाददानः सूत्रकारः सर्वप्रमाणसाधारणं रूपमिदं परिभाषते यत्, साध्यसाधनस्य प्रमाकरणस्य प्रमाणत्वमिति । अशुद्धप्रमितिविधायिनस्तु प्रामाण्यं प्रसज्यत इति स्मृतिसंशयविपर्ययजनकव्यवच्छेदाय प्रत्यक्षसूत्रादर्थोत्पन्नमित्यव्यभिचारीति व्यवसायात्मकमिति च पदत्रयमाकृष्यते । तद्धि प्रमाणचतुष्टयसाधारणम् । अर्थोत्पन्नपदेन फलविशेषणेन स्मृतिजनकम्, अव्यभिचारिपदेन विपर्ययाधायि, व्यवसायात्मकपदेन संशयजनकं प्रमाणं

समाख्यानिर्वचनसामर्थ्यसहितादिति । समाख्यायाः समनुगताया आख्यायाः प्रमाणमित्यस्या यन्निर्वचनं 'प्रमीयतेऽनेन' इति व्युत्पत्तिस्तस्य यत् सामर्थ्यं शक्तिविशेषस्तत्सहितात् सापेक्षात् ।

व्युदस्यते। अतश्चैवमुक्तं भवति अर्थविषयमसन्दिग्धमव्यभिचारि च ज्ञानं येन जन्यते तत्प्रमाणमित्येवमेकस्मादेव सूत्रात् सामान्यलक्षणं विभागश्चावगम्यते।

नन्वेकस्य सूत्रस्य विभागसामान्यलक्षणपरत्वेन वाक्यभेदः। अर्थैकत्वाच्चैकं वाक्यं युक्तम्। उच्यते

श्रुत्यर्थद्वारकानेकवस्तुसूचनशालिषु।
सूत्रेष्वनेकार्थविधेर्वाक्यभेदो न दूषणम्॥
प्रमाणान्तरसंस्पर्शशून्ये शब्दैकगोचरे।
प्रमेये वाक्यभेदादिदूषणं किल दूषणम्॥
अर्थद्वयविधानं हि तत्रैकस्य न युज्यते।

'राजा स्वाराज्यकामो वाजपेयेन यजेते'ति गुणविधिपक्षे स्वाराज्यं प्रति यागो विधातव्यः, यागञ्च प्रति वाजपेयगुणो विधातव्यः, इत्येकस्य वाक्यस्य परस्परविरुद्धविध्यनुवादादिरूपापत्तेरर्थद्वयविधानमतिदुर्घटम्। इह पुनः प्रमाणान्तरपरिनिश्चितार्थसूचनचातुर्यमहार्घेषु सूत्रेषु नानार्थविधानं भूषणं भवति न दूषणम्। अनेकार्थसूचनादेव सूत्रमुच्यते। एतदेव सूत्रकाराणां परं कौशलं यदेकेनैव वाक्येन स्वल्पैरेवाक्षरैरनेकवस्तुसमर्पणम्। अध्याहारेण वा तन्त्रेणावृत्त्या वा तमर्थं प्रत्याययिष्यति सूत्रमिदमिति न दोषः। विभागसामान्यलक्षणयोर्विधाने पौर्वापर्यनियमो विशेषणलक्षणवन्नास्तीति। तन्त्रेण युगपदुभयाभिधानमपि न विरुध्यते। विशेषलक्षणेऽनुक्ते सामान्यलक्षणविभागयोस्तु यथारुचि प्रतिपादनमादौ विभागस्ततः सामान्यलक्षणम्, आदौ वा

राजा स्वाराज्यकाम इति। स्वेनात्मना राजते अन्यानभिभूयेति स्वराट्, तस्य तद् विधीयते, द्रव्यदेवतात्मककारकसम्पाद्यत्वाद् यागस्य। **परस्परविरुद्धविध्यनुवादादिरूपापत्ते**···तस्माद्धि स्वाराज्यं प्रति यागस्य विधानाद् विधेयत्वम्, तत्सिद्ध्यर्थमुपादानादुपादेयत्वम्, तदर्थत्वेनावगमाद् गुणत्वम्। यदा तु गुणस्तत्र विधीयते तदा यागस्यानुवादादनूद्यमानत्वम्, गुणस्य विधातुमुद्दिष्टत्वादुद्देश्यत्वम्, तदर्थत्वेन गुणस्यावगमात् प्रधानत्वम्। तदेवं विधेयत्वमुपादेयत्वं गुणत्वमिति त्रिकमनूद्यमानत्वं निर्देश्यत्वं प्रधानत्वमिति त्रिकेण विरुध्यते। **तन्त्रेणावृत्त्या** वेति। यत्र द्वावर्थिनावर्थे युगपदेकं

सामान्यलक्षणं ततो विभागः। सिद्धान्तच्छलवदुभयं वा युगपदेव प्रतिपाद्यत इति तन्त्रेणावृत्त्या वा तदुपपादने न कश्चिद्दोष इति।

प्रमाणचातुर्विध्ये शङ्का

आस्तां तावदिदं सूत्रे तन्त्रावृत्त्यादिचिन्तनम्।
चतुःसङ्ख्या प्रमाणेषु ननु न क्षम्यते परैः॥

न्यूनाधिकसङ्ख्याप्रतिषेधेन हि चत्वारि प्रमाणानि प्रतिष्ठाप्येरन्। स च दुरुपपादः। तथाहि प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकाः। प्रत्यक्षानुमाने द्वे एवेति बौद्धाः। प्रत्यक्षमनुमानमाप्तवचनञ्चेति त्रीणि प्रमाणानीति साङ्ख्याः। आधिक्यमपि प्रमाणानां मीमांसकप्रभृतयः प्रतिपन्नवन्तः। तत्कथं चत्वार्येव प्रमाणानीति विभागनियमः ?

उच्यते। अनुमानप्रामाण्यं वर्णयन्तो बार्हस्पत्यं तावदुपरिष्टात्प्रतिक्षेप्स्यामः। शब्दस्य चानुमानवैलक्षण्यं तल्लक्षणावसर एव वक्ष्यत इति, शाक्यपथोऽपि न युक्तः।

शाक्यमते प्रमाणद्वैविध्यम्

नन्वेतद्भिक्षवो न क्षमन्ते।

ते हि प्रमेयद्वैविध्यात् प्रमाणं द्विविधं जगुः।
नान्यः प्रमाणभेदस्य हेतुर्विषयभेदतः॥

विषयश्च प्रत्यक्षपरोक्षभेदेन स्वलक्षणसामान्यभेदे वा द्विविध एव, परस्परपरिहारव्यवस्थितात्मसु पदार्थेषु तृतीयराश्यनुप्रवेशाभावात्। तृतीयविषयासत्त्वपरिच्छेद एव कुतस्त्य इति चेत् ? प्रत्यक्षमहिम्न एवेति ब्रूमः। नीले प्रवर्तमानं प्रत्यक्षं नीलं नीलतया परिच्छिनत्तीति तावदविवाद एव। तदेव च

शब्दं प्रयोक्तुं प्रभवतस्तत्र तन्त्रव्यवहारः, यथैकं दीपं युगपद् बहवश्चिन्तकाश्छात्राः प्रयुञ्जते, यत्र तु युगपत् प्रयोक्तुमसामर्थ्यं तत्र तन्त्रप्रत्यनीकभूता आवृत्तिः, यथा असहभोजिनामेकं पात्रं युगपद् भुजिक्रियायामधिकरणभावमप्रतिपद्यमानं क्रमेण प्रतिपद्यते। आवृत्तौ हि पूर्वार्थसिद्धिसापेक्षत्वादुत्तरार्थसिद्धेर्युगपत् प्रयोक्तृत्वाभावः।

प्रत्यक्षमनीलमपि व्यवच्छिनत्ति नीलसंविदि तस्याप्रतिभासात् । नीलज्ञानप्रतिभास्यं हि नीलमिति तदितरदनीलमिव भवति । तृतीयमपि राशिम् अद एव तदपाकरोति, सोऽपि हि राशिर्नीलसंविदि भाति वा न वा ।

भाति चेन्नीलमेव स्यान्न प्रकारान्तरन्तु तत् ।
नो चेत्तथाऽप्यनीलं स्यान्न प्रकारान्तरं हि तत् ॥

इदमेव हि नीलानीलयोर्लक्षणं यन्नीलज्ञानावभास्यत्वानवभास्यते नाम । एवञ्च प्रत्यक्षं स्वविषये प्रवृत्तं तं प्रत्यक्षतया व्यवस्थापयति । तत्राप्रतिभासमानं परोक्षतया तृतीयमपि प्रकारं पूर्ववदेव प्रतिक्षिपतीत्येवं स्वलक्षणसामान्यव्यतिरिक्तविषयानिषेधेऽप्येष एव मार्गोऽनुगन्तव्यः । एवं हि प्रत्यक्षेण स्वविषयः परिनिश्चितो भवति तदुक्तम्, 'तत्परिच्छिनत्ति, अन्यद्व्यवच्छिनत्ति, तृतीयप्रकाराभावञ्च सूचयती'त्येकप्रमाणव्यापारः ।

अन्यथा विषयस्यैव स्वरूपापरिनिश्चयात् ।
क्वोपादानपरित्यागौ कुर्युरर्थक्रियार्थिनः ॥

तदुक्तम् 'अनलार्थ्यनलं पश्यन्नपि न तिष्ठेन्न प्रतिष्ठेते'ति । यद्यपि निर्विकल्पकं प्रत्यक्षं पुरोऽवस्थितवस्तुस्वलक्षणम्, प्रदर्शनमात्रनिष्ठितव्यापारमविचारकमेव, तथापि तत्पृष्ठभाविनां विकल्पानामेव च दर्शनविषये कृतपरिच्छेदतदितरविषयव्यवच्छेदतृतीयप्रकाराभावव्यवस्थापनपर्यन्तव्यापारपाटवमवगन्तव्यमितरथा व्यवहाराभावात् । एवञ्च परस्परं परिहारव्यवस्थितस्वरूपपदार्थव्यवच्छेदिप्रत्यक्षप्रभावावगतविरोधात् प्रत्यक्षेतरविषययोस्तृतीयविषयासत्त्वपरिनिश्चयेऽनुमानमपि प्रवर्त्तितुमुत्सहते । विरुद्धयोरेकतरपरिच्छेदसमये द्वितीयनिरसनमवश्यं भाति विरुद्धत्वादेव शीतोष्णवत् । तृतीयविषयोऽपि तद्विरुद्ध एव तद्बुद्धावप्रतिभासमानत्वात् ।

तदुक्तम् **अनलार्थ्यनलमिति** । अनलस्यापि तत्र प्रतिभासान्न तिष्ठेदन्यस्यापि च प्रतिभासान्न प्रतिष्ठेत न गच्छेत्; अनलार्थिनस्तदन्यप्रतिभासे कथं प्रस्थानं स्यादिति । **इतरथा व्यवहाराभावादिति** । यावत् तदितरव्यवच्छेदेन जलेऽजलरूपताया अभावेन जलमेवेति विकल्पेन न निश्चीयते तावत् तदर्थिनां तत्र प्रवृत्तिरूपो व्यवहारः कथ स्यादिति ।

ननु न त्वं द्वितीयमिव तृतीयं कदाचिदपि विषयमग्रहीः, ग्रहणे हि विषयद्वयवत्तस्यापि सत्त्वं स्यात्। अगृहीतस्य च विरोधमविरोधं वा कथं निश्चेतुमर्हसीति। भोः साधो ! नात्र पृथग्ग्रहणमुपयुज्यते, तद्बुद्ध्यनवभासमात्रेणैव तद्विरोधसिद्धेः। विरुद्धं हि तदुच्यते यत्तस्मिन् गृह्यमाणे न गृह्यते। तदिदमग्रहणमेव विरोधावहमिति न पृथग्ग्रहणमन्वेषणीयम्। एवमितरेतरपरिहारव्यवस्थितानामर्थानां न तृतीयो राशिरस्तीति सर्वथासिद्धं विषयद्वैविध्यम्। एवमेव सदसन्नित्यानित्यक्रमयौगपद्यादिषु प्रकारान्तरपराकरणमवगन्तव्यम्। तत्र प्रत्यक्षे स्वलक्षणात्मनि विषये प्रत्यक्षं प्रवर्त्तते। परोक्षे तु सामान्याकारेऽनुमानमिति।

प्रमाणद्वयसिद्धे च विषयद्वयवेदने।
वद कस्यानुरोधेन तृतीयं मानमिष्यताम् ॥

न चास्मिन्नेव परोक्षे सामान्यात्मनि विषयेऽनुमानमिव शब्दाद्यपि प्रमाणान्तरं प्रवर्त्तत इति वक्तुं युक्तम्, एकत्र विषये विरोधविफलत्वाभ्यामनेकप्रमाणप्रवृत्त्यनुपपत्तेः। पूर्वप्रमाणावगतरूपयोगितया तस्मिन्वस्तुनि पुनः परिच्छिद्यमाने प्रमाणमुत्तरमफलम्। एवं ह्याहुः 'अधिगतमर्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यादि'ति। 'अन्यरूपतया तु तद्ग्रहणमुत्तरप्रमाणेन दुःशक्यम्, आदिप्रमाणविरुद्धत्वात्' इति। अत एव न संप्लवमभ्युपगच्छन्ति नीतिविदः। एकस्मिन् विषयेऽनेकप्रमाणप्रवृत्तिः संप्लवः। स च तथाविधविषयनिरासादेव निरस्तः। न च प्रत्यक्षानुमानेऽपि परस्परं संप्लवेते, स्वलक्षणेऽनुमानस्य, सामान्ये च प्रत्यक्षस्य प्रवृत्त्यभावात्।

संबन्धग्रहणापेक्षमनुमानं स्वलक्षणे।
सजातीयविजातीयव्यावृत्ते वर्ततां कथम् ॥

प्रत्यक्षमपि सद्वस्तुसंस्पर्शनियतव्रतम्।
विकल्पारोपिताकारसामान्यग्राहकं कथम् ॥

यच्च शब्दोपमानादिप्रमाणान्तरमिष्यते।
तदेवं सति कुत्रांशे प्रतिष्ठामधिगच्छतु ॥

वस्तु स्वलक्षणं तावत्प्रत्यक्षेणैव मुद्रितम्।
ततोऽन्यदनुमानेन संबन्धापेक्षवृत्तिना ॥

नानाप्रमाणगम्यश्च विषयो नास्ति वास्तवः ।
तद्वानवयवी जातिरिति वार्तैकभद्रिका ॥

यदि च प्रत्यक्षविषये शब्दानुमानयोरपि वृत्तिरिष्यते तर्हि प्रत्यक्षसंवित्सदृशीमेव तेऽपि बुद्धिं विदध्यातां, न चैवमस्ति । तदाहुः

समानविषयत्वे च जायते सदृशी मतिः ।
न चाध्यक्षधिया साम्यमेति शब्दानुमानधीः ॥
तेजोऽन्यदेव नक्षत्रशशाङ्कशकलादिषु ।
उद्घाटितजगत्कोशमन्यदेव रवेर्महः ॥

अपि च

अन्यदेवेन्द्रियग्राह्यमन्यः शब्दस्य गोचरः ।
शब्दात्प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्ष्यते ॥

आह च

अन्यथैवाग्निसम्बन्धाद्दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते ॥

तस्मादुक्तेन वर्त्मना विषयद्वैविध्यनिश्चयान्न तृतीयं प्रमाणमस्ति । न च संप्लव इति ।

शाक्यमतखण्डनम्

अत्राभिधीयते

यत्तावदिदमाख्यायि राश्यन्तरनिराकृतौ ।
प्रत्यक्षस्यैव सामर्थ्यमित्येतन्नोपपद्यते ॥
पूर्वापरानुसन्धानसामर्थ्यरहितात्मना ।
भारः कथमयं वोढुमविकल्पेन पार्यते ॥
विकल्पाः पुनरुत्प्रेक्षामात्रनिष्ठितशक्तयः ।
तेभ्यो वस्तुव्यवस्थायाः का कथा भवतां मते ॥

उत्प्रेक्षामात्रनिष्ठितशक्तय इति । बहिरसन्नप्याकारोऽविद्योपप्लवाद् विकल्पैरुत्प्रेक्ष्यते समुल्लिख्यते । तावत्येव च विकल्पानां व्यापारपरिनिष्ठा दृष्टा, न पुनर्वस्तुदर्शनेऽपि । तथाहि—समस्तेन्द्रियवृत्तिव्यापारनिरोधे विकल्पयन्त उत्प्रेक्षामह

अथ वा, भवतु नाम नीलादावुक्तेन प्रकारेण राश्यन्तरनिराकरणम्। परोक्षनिर्णये तु नैष प्रकारो योजयितुं शक्यते। विषये हि प्रवृत्तं प्रत्यक्षं विषयस्वरूपमेव परिच्छिनत्ति, न पुनस्तस्य प्रत्यक्षतामपि। नीलमिदमिति हि संवेद्यते न पुनः प्रत्यक्षमिदमिति। तथा हि किमिदं विषयस्य प्रत्यक्षत्वं नाम? किमक्षविषयत्वम्? उताक्षजज्ञानविषयत्वमिति? तत्राक्षविषयत्वं तावदन्वयव्यतिरेकसमधिगम्यमेव, न प्रत्यक्षगम्यम्। तथाह भट्टः

न हि श्रावणता नाम प्रत्यक्षेणावगम्यते।
नान्वयव्यतिरेकाभ्यां ज्ञायते बधिरादिषु॥ इति।

अक्षजज्ञानकर्मत्वमपि प्रत्यक्षत्वं तदानीं परिच्छेत्तुमशक्यमेव, विषयप्रतिभासकाले तत्प्रतिभासस्याप्रतिभासात्। तद्ग्रहणमन्तरेण च तत्कर्मताग्रहणासम्भवात् कथं पुनर्विषयग्रहणकाले तज्ज्ञानस्यानवभासः? नैव युगपदाकारद्वितयं प्रतिभासते, इदं ज्ञानमयञ्चार्थ इति भेदानुपग्रहात्। एकश्चायमाकारः प्रतिभासमानो ग्राह्यस्यैव भवितुमर्हति, न ग्राहकस्येति वक्ष्यते।

ननु च नागृहीतं ज्ञानमर्थप्रकाशनकुशलं भवतीत्याहुः 'अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति'। प्रत्यक्षोपलम्भस्य नार्थदृष्टिरुपलम्भ एव प्रत्यक्ष इति द्वितीयाकारानवभासात्कुतोऽर्थदृष्टिः? यदि च गृहीतं ज्ञानमर्थं प्रकाशयेन्न द्वयीं गतिमतिवर्त्तेत। तद्धि ज्ञानं ज्ञानान्तरग्राह्यं वा भवेत्, स्वप्रकाशं वा? ज्ञानान्तरग्राह्यत्वे त्वनवस्था मूलक्षतिकरी चेयमित्यन्धमूकं जगत्स्यादुपलम्भप्रत्यक्षतापूर्वकार्थप्रत्यक्षवादिनः। नापि स्वप्रकाशं ज्ञानम्, ज्ञेयत्वान्नीलपीतादिवत्। विस्तरतस्तु स्वप्रकाशं विज्ञानं विज्ञानवादिनिराकरणे निराकरिष्यामः।

न च ज्ञानस्याप्रत्यक्षतायां तदुत्पादानुत्पादयोरविशेषादज्ञत्वम्, सर्वज्ञत्वं वा परिशङ्कनीयम्, विज्ञानोत्पादमात्रेण ज्ञातुर्ज्ञातृत्वसिद्धेः। विषयप्रकाशस्वभावमेव

इति वक्तारो भवन्ति, न तु पश्याम इति। **ज्ञायते बधिरादिष्विति**। सति श्रवणेन्द्रिये ग्रहणाच्छ्रावणः शब्दः, बधिरादिषु च श्रवणेन्द्रियवैकल्यादसति श्रवणे ग्रहणाभावादिति। **अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति**। अप्रत्यक्ष उपलम्भो यस्यार्थस्य तस्य दृष्टिर्दर्शनं न प्रसिद्ध्यतीत्यर्थः। सापेक्षेणाप्यर्थशब्देन गमकत्वात् समासः।

ज्ञानमुत्पद्यत इति कथमुत्पन्नमनुत्पन्नान् न विशिष्यते ? यथा च नीलादिविषयज्ञानोत्पत्त्या अस्य ज्ञातृत्वम्, तथा सुखादिविषयज्ञानोत्पत्त्या भोक्तृत्वमिति तत्रापि नातिप्रसङ्गः। तस्माद्विषयविज्ञानकाले तद्विज्ञानग्रहणान्न तत्कर्मत्वकृतं विषयप्रत्यक्षत्वमवभासते। तदप्रतिभासे च न परोक्षव्यवच्छेदो न च तृतीयप्रकारासत्त्वसूचनमिति, कथं प्रत्यक्षं विषयद्वित्वसिद्धौ प्रमाणम्।

यच्चानुमानमप्युक्तं विषयद्वयसिद्धये।
तत्प्रत्यक्षपरिच्छिन्नतद्विरोधनिबन्धनम् ॥
विरोधबोधसामर्थ्यं प्रत्यक्षस्य च दूषितम्।
तदग्रहे च तन्मूलमनुमानं न सिध्यति ॥
एवञ्च विषयद्वित्वसाधनानुपपत्तितः।
तत्कृतस्त्यज्यतामेष प्रमाणद्वित्वदोहदः ॥

अथ वा सत्यपि विषयद्वैविध्ये सामग्रीभेदात् फलभेदाच्च प्रमाणभेदो भवन् कथमपाक्रियते ?

अन्य एव हि सामग्रीफले प्रत्यक्षलिङ्गयोः।
अन्य एव च सामग्रीफले शब्दोपमानयोः ॥

इति वक्ष्यामः।

तेन तद्भेदादपि प्रमाणभेदसिद्धेर्न द्वे एव प्रमाणे। एतेन त्रीणि प्रमाणानीति सांख्यव्याख्यातापि तत्संख्या प्रत्याख्याता, सामग्रीफलभेदेनोपमानस्य चतुर्थप्रमाणस्य प्रतिपादयिष्यमाणत्वादिति।

प्रमाणसंप्लवसमर्थनम्

यत्पुनरेकस्मिन् विषयेऽनेकप्रमाणप्रसरं निरस्यता सौगतेन संप्लवपराकरणमकारि तदपि मतिमोहविलसितम्। असति संप्लवेऽनुमानप्रामाण्यप्रतिष्ठापनानुपपत्तेः।

न ह्यविज्ञातसम्बन्धं लिङ्गं गमकमिष्यते।
सम्बन्धधीश्च सम्बन्धिद्वयावगतिपूर्विका ॥
सामान्यात्मकसम्बन्धिग्रहणञ्चानुमानतः।
तस्मादेव यदीष्येत व्यक्तमन्योन्यसंश्रयम् ॥

अनुमानान्तराधीना सम्बन्धिग्रहपूर्विका ।
सम्बन्धाधिगतिर्न स्यान्मन्वन्तरशतैरपि ।
तेन दूरेऽपि सम्बन्धग्राहकं लिङ्गलिङ्गिनोः ।
प्रत्यक्षमुपगन्तव्यं तथा सति च संप्लवः ॥

तत्रैतत्स्यादविदितसौगतकृतान्तानामेतच्चोद्यम् । ते हि—

विकल्पविषये वृत्तिमाहुः शब्दानुमानयोः ।
तेभ्यः सम्बन्धसिद्धौ च नानवस्था न संप्लवः ॥

तथा हि दर्शनसमनन्तरोत्पत्त्यवाप्तदर्शनच्छायाऽनुरज्यमानवपुषो विकल्पाः प्रत्यक्षायन्ते । तदुल्लिखितकाल्पनिकतदितरपरावृत्तिस्वभावसामान्याकारप्रविष्टोऽयमनुमानव्यवहारः । पारम्पर्येण मणिप्रभामणिबुद्धिवत् तन्मूल इति तत्प्राप्तयेऽवकल्पते । न पुनः प्रत्यक्षैकसमधिगम्यं वस्तु स्पृशति इति कुतः संप्लवः ? कुतो वाऽनवस्था ?

प्रमाणसंप्लवसमर्थनम्

तदेतद्वञ्चनामात्रम्, यो हि तादात्म्यतदुत्पत्तिस्वभावः प्रतिबन्ध इष्यते स किं वस्तुधर्मो, विकल्पारोपिताकारधर्मो वा । तत्र नायमारोपितधर्मो भवितुमर्हति । वस्तु वस्तुना जन्यते वस्तु च वस्तुस्वभावं भवेत् । तस्माद्वस्तुधर्मः प्रतिबन्धः । विकल्पैश्च वस्तु न स्पृश्यते । तत्प्रतिबन्धश्च निश्चीयते इति चित्रम् । इदञ्च स्वभाषितं वस्तुनोः प्रतिबन्धस्तादात्म्यादि गम्यगमकत्वञ्च विकल्पा-

---

दर्शनसमनन्तरोत्पत्त्यवाप्तदर्शनच्छायेति । यथाअर्थजत्वाद् दर्शनं देशकालाद्यवच्छिन्नस्य इदन्तयार्थस्य ग्राहकं तथा दर्शनानन्तरमुत्पद्यमानो विकल्पोऽपि तच्छायाधारित्वादर्थप्रतिभासी भवन् प्रत्यक्षायते, यथा लाक्षानुरक्तस्फटिकशकलसमनन्तरवृत्तिस्फटिकशकलान्तरमपि लाक्षानुरक्तमिव प्रतिभासते तथा अर्थनिर्भासार्थजदर्शनाव्यवहितोत्पत्तिर्विकल्पोऽप्यर्थनिर्भास इवेत्यर्थः । **सामान्याकारप्रविष्ट** इति । विकल्पारोपितयोरेव ह्याकारयोः प्रतिबन्धग्रहस्तादृशस्यैव चानुमेयतेति ।

अन्यत्र प्रतिबन्धो वस्तुनोः । **अन्यत्र तद्ग्रहणोपायो**ऽन्वयव्यतिरेकलक्षणः विकल्पारोपितधूमसामान्यस्य तदारोपितेनैव वह्न्याकारेण, तयोर्ग्रहीतुं शक्यत्वात्;

रोपितयोरपोह्योस्तदेवमन्यत्र प्रतिबन्धोऽन्यत्र तद्ग्रहणोपायोऽन्यत्र प्रतीतिरन्यत्र प्रवृत्तिप्राप्ती इति सर्वं कैतवम्। न च दृश्यसंस्पर्शशून्यात्मनां विकल्पानां दर्शनच्छाया काचन सम्भवति, इदन्ताग्राहित्वस्पष्टत्वाद्यपि वस्तुस्पर्शरहितमकिञ्चित्करम्, अप्रमाणत्वानपायात्।

अप्रमाणपरिच्छिन्नः प्रतिबन्धश्च तत्त्वतः।
न परिच्छिन्न एवेति ततो मिथ्याऽनुमेयधीः॥
अथाभिमतमेवेदं बुद्ध्यारूढत्ववर्णनात्।
हन्त तात्त्विकसम्बन्धसाधनव्यसनेन किम्॥

यथा च सामान्यविषये प्रत्यक्षाभ्युपगममन्तरेण संबन्धग्रहणमघटमानमिति विसंष्ठुलमनुमानम्, एवमवगतसम्बन्धस्य द्वितीयलिङ्गदर्शनमपि दुरुपपादमिति ततोऽपि संप्लवापलापिनामनुमानमुत्सीदेत्।

न ह्यसाधारणांशस्य लिङ्गत्वमुपपद्यते।
विना न चानुमानेन सामान्यमवगम्यते॥
सैवानवस्था तत्रापि तदेवान्योन्यसंश्रयम्।
स एव च विकल्पानां सामर्थ्यशमनक्रमः॥
अतः सम्बन्धविज्ञानलिङ्गग्रहणपूर्वकम्।
अनुमानमनिह्नुत्य कथं संप्लवनिह्नवः॥

अपि च विषयद्वैविध्यसिद्धावपि प्रत्यक्षानुमान एव परस्परमपि संप्लवेयाताम्। यतः

प्रत्यक्षत्वं परोक्षोऽपि प्रत्यक्षोऽपि परोक्षताम्।
देशकालादिभेदेन विषयः प्रतिपद्यते॥

न धूमस्वलक्षणस्याग्निस्वलक्षणेन, तयोरन्यत्रावृत्तेः। **अन्यत्र प्रवृत्तिप्राप्ती,** बाह्ये बाह्योन्मुखतया प्रवृत्तेस्तस्यैव च प्राप्तेः। **कतवं** द्यूतकारवृत्तम्, असमीक्ष्याभिधानात्।

बुद्ध्यारूढत्ववर्णनादिति। "सर्व एवायमनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिन्यायेन सिद्धयति" इति वर्णनात्। बुद्धिरत्र विकल्पज्ञानमभिप्रेता।

द्वितीयलिङ्गदर्शनम्। सम्बन्धग्रहणकालापेक्षया पर्वतादौ।

क्षणभङ्गं निषेत्स्यामः सन्तानो यश्च कल्पितः ।
दर्शितप्राप्तिसिद्ध्यादौ संप्लवेऽपि स तादृशः ॥

यदपि जात्यादिविषयनिषेधनमनोरथैः संप्लवपराकरणमध्यवसितं तत्र जात्यादिसमर्थनमेवोत्तरीकरिष्यते ।

तावकैर्दूषणगणैः कालुष्यमपनीयते ।
तद्वानवयवो जातिरिति वार्तैकभद्रिका ॥

यदपि विरोधवैफल्याभ्यां न संप्लव इत्युक्तम्, तत्र वैफल्यमनधिगतार्थगन्तृत्वविशेषणादिवारणेनैव प्रतिसमाहितम् । विरोधोऽपि नास्ति पूर्वज्ञानोपमर्देन नेदं रजतमितिवदुत्तरविज्ञानानुत्पादात् । अनेकधर्मविसरविशेषितवपुषि धर्मिणि कदाचित् केनचित् कश्चिन्निश्चीयते धर्मविशेष इति को विरोधार्थः ?

यदपि प्रत्यक्षस्य शब्दलिङ्गयोश्च समानविषयत्वे सति सदृशप्रतीतिजनकत्वमाशङ्कितम्, तत्र केचिदाचक्षते विषयसाम्येऽप्युपायभेदात् प्रतीतिभेदो भवत्येव, दूराविदूरदेशव्यवस्थितपदार्थप्रतीतिवत् ।

अन्ये तु मन्यन्ते नोपायभेदात् प्रतीतिभेदो भवति अपि तु विषयभेदादेव सन्निकृष्टविप्रकृष्टग्रहणेऽपि विषयौ भिद्येते । दूरात् सामान्यधर्ममात्रविशिष्टस्य धर्मिणो ग्रहणमदूरात्तु सकलविशेषसाक्षात्करणम् । यदिमाः प्रत्यक्षानुमानशब्दप्रमितयः प्रमेयभेदाद्भिद्यन्ते ।

विशेषधर्मसंबद्धं वस्तु स्पृशति नेत्रधीः ।
व्याप्तिबोधानुसारेण तद्वन्मात्रन्तु लैङ्गिकी ॥
शब्दात्तु तदवच्छिन्ना वाच्ये सञ्जायते मतिः ।
शब्दानुवेधशून्या हि न शब्दार्थे मतिर्भवेत् ॥

ननु क्षणिकत्वेन विनष्टत्वात् कथं स एव प्रत्यक्षः परोक्षो भवेदिति । तन्नेत्याह **क्षणभङ्गं निषेत्स्याम** इति । यथा दर्शनविषयीकृतस्य स्वलक्षणस्य प्राप्यस्य चान्यत्वेऽपि सन्तानापेक्षयैकत्वमभ्युपगम्य प्रदर्शितप्रापकत्वं प्रत्यक्षस्य भण्यते, तद्वत् क्षणिकत्वेऽप्येकसन्तानापेक्षयैकविषयत्वं प्रत्यक्षानुमानयोः किमिति नेष्यत इति भावः ।

शब्दात्तु तदवच्छिन्ना वाच्ये सञ्जायते मतिरिति वक्ष्यमाणप्रवरमतेनाह ।

कथं तर्हि तेषां संप्लवः, सर्वत्र विषयभेदस्य दर्शितत्वात् ? सत्यम्, धर्म्यभिप्रायेण संप्लवः कथ्यते । इमौ तु पक्षौ विचारयिष्येते । सर्वथा तावदस्ति प्रमाणानां संप्लव इति सिद्धम् ।

तदुदाहरणन्तु भाष्यकारः प्रदर्शितवान् 'अग्निराप्तोपदेशात् प्रतीयतेऽमुत्रेति प्रत्यासीदता धूमदर्शनेनानुमीयते प्रत्यासन्नतरेण उपलभ्यते' इत्यादि । क्वचित्तु व्यवस्था दृश्यते यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यस्मदादेरागमादेव ज्ञानं न प्रत्यक्षानुमानाभ्याम् । स्तनयित्नुशब्दश्रवणात्तद्धेतुपरिज्ञानमनुमानादेव, न प्रत्यक्षागमाभ्याम् । स्वहस्तौ द्वौ इति तु प्रत्यक्षादेव प्रतीतिर्न शब्दानुमानाभ्यामिति । तस्मात्स्थितमेतत् प्रायेण प्रमाणानि प्रमेयमभिसंप्लवन्ते, क्वचित्तु प्रमेये व्यवतिष्ठन्तेऽपीति ।

इत्युद्धृताखिलपरोदितदोषजात-
सम्पातभीतिरिह संप्लव एष सिद्धः ।
सर्वाश्च सौगतमनःसु चिरप्ररूढा
भग्नाः प्रमाणविषयद्वयसिद्धिवाञ्छाः ॥

एवं तावन्न्यूनत्वं सङ्ख्यायाः परीक्षितम्, आधिक्यमिदानीं परीक्ष्यते ।

प्रमाणानामाधिक्यपरीक्षणम्

तत्रार्थापत्त्या सह प्रत्यक्षादीनि पञ्च प्रमाणानीति प्रभाकरः । अभावेन सह षडिति भाट्टः । सम्भवैतिह्याभ्यामष्टाविति केचित् । अशक्य एव प्रमाणसङ्ख्यानियम इति सुशिक्षितचार्वाकाः ।

अर्थापत्तेः प्रमाणान्तरत्वम्

तत्र भाट्टास्तावदित्थमर्थापत्तिमाचक्षते । दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थान्तरकल्पनार्थापत्तिः । दृष्ट इति प्रत्यक्षादिभिः पञ्चभिः प्रमाणैरुपलब्धः । श्रुत इति कुतश्चन लौकिकाद् वैदिकाद्वा शब्दादवगतोऽर्थः, ततोऽन्यथानुपपद्यमानादर्थान्तरकल्पनार्थापत्तिरित्येवं षट्प्रमाणप्रभवत्वेन षड्विधाऽसौ भवतीति ।

स्तनयित्नुशब्दश्रवणात् तद्धेतोर्वाय्वभ्रसंयोगविभागादेः परिज्ञानम् ।
सुशिक्षितचार्वाका उद्भटादयः ।

दृष्टवचनेनोपलब्धिवाचिना गतार्थत्वेऽपि श्रुतार्थापत्तेः पृथगभिधानम्, प्रमाणैकदेशविषयत्वेन प्रमेयविषयार्थापत्तिपञ्चकविलक्षणत्वात् ।

तत्र प्रत्यक्षपूर्विका तावदर्थापत्तिः, प्रत्यक्षावगतदहनसंसर्गोद्गतदाहाख्यकार्याऽन्यथाऽनुपपत्त्या वह्नेर्दाहशक्तिकल्पना । अनुमानपूर्विका देशान्तरप्राप्तिलिङ्गानुमितमरीचिमालिगत्यन्यथाऽनुपपत्त्या तस्य गमनशक्तिकल्पना । उपमानपूर्विका उपमानज्ञानावगतगवयसारूप्यविशिष्टगोपिण्डादिप्रमेयाऽन्यथाऽनुपपत्त्या तस्य तज्ज्ञानग्राह्यत्वशक्तिकल्पनेति । तदिमास्तावदतीन्द्रियशक्तिविषयत्वादर्थापत्तयः प्रमाणान्तरम्, शक्तेः प्रत्यक्षपरिच्छेद्यत्वानुपपत्तेः, तदधीनप्रतिबन्धाधिगमवैधुर्येणानुमानविषयत्वायोगात् ।

अन्वयव्यतिरेकौ हि द्रव्यरूपानुवर्तिनौ ।
शक्तिस्तु तद्गता सूक्ष्मा न ताभ्यामवगम्यते ॥

शब्दोपमानयोस्त्वत्र सम्भावनैव नास्तीत्यर्थापत्तेरेवैष विषयः । अर्थापत्तिपूर्विका यथा शब्दकरणिकार्थप्रतीत्यन्यथानुपपत्त्या शब्दस्य वाचकशक्तिमवगत्य तदन्यथाऽनुपपत्त्या तस्य नित्यत्वकल्पना । सा चेयं शब्दपरीक्षायां वक्ष्यते । अभावपूर्विका तु भाष्यकारेणोदाहृता जीवतश्चैत्रस्य गृहाभावमवसाय तदन्यथानुपपत्त्या बहिर्भावकल्पनेति ।

ननु दृष्टेन सिद्धसिद्धेरनुमानमेवेदं स्यात् । नानुमानं सामग्र्यभावात् । पक्षधर्मतादिसामग्र्या यज्ज्ञानमुपजन्यते तदनुमानमिति तार्किकस्थितिः । सा चेह नास्ति बहिर्भावविशिष्टे चैत्रे चैत्राभावविशिष्टे बहिर्भावेऽनुमेये कस्य लिङ्गत्वमिति चिन्त्यम् । गृहाभावविशिष्टस्य वा चैत्रस्य, चैत्राभावविशिष्टस्य वा गृहस्य, गृहचैत्राभावस्य वा, चैत्रादर्शनस्य वा । न चैषामन्यतमस्यापि पक्षधर्मत्वमस्ति । न हि गृहं वा, चैत्रो वा, तदभावो वा, तददर्शनं वा चैत्रस्य धर्मः, तद्बहिर्भावस्य वेत्यपक्षधर्मत्वादन्यतमस्यापि न लिङ्गत्वम् ।

तस्य तज्ज्ञानग्राह्यत्वेति । तस्य गोपिण्डस्य तज्ज्ञानग्राह्यत्वमुपमानज्ञानग्राह्यत्वम् ।

तदन्यथानुपपत्त्येति । वाचकशक्तिरेव नित्यत्वं विना नोपपद्यते, सम्बन्धज्ञानकालगृहीतस्य व्यवहारकालेऽसत्त्वात् ।

अपि च प्रमेयानुप्रवेशप्रसङ्गादपि नेदमनुमानम् । तथा ह्यागमावगतजीवनस्य गृहाभावेन चैत्रस्य बहिर्भावः परिकल्प्यते । इतरथा मृतेनानैकान्तिको हेतुः स्यात् । अभावश्च गृहीतः सन् बहिर्भावमवगमयति नागृहीतो धूमवत् । अभावग्रहणञ्च सकलसदुपलम्भकप्रमाणप्रत्यस्तमयपूर्वकम्, इह तु सदुपलम्भकमस्त्येव जीवनग्राहि प्रमाणम् । जीवनं हि क्वचिदस्तित्वमुच्यते । अप्रत्यस्तमिते तु सदुपलम्भके प्रमाणे कथमभावः प्रवर्त्तत इति, प्रवर्तमान एवासौ सदुपलम्भकं प्रमाणं पृथग्विषयमुपस्थापयति, बहिरस्य भावो गृहे त्वभाव इति । तेन जीवतो बहिर्भावव्यवस्थापनपूर्वकगृहाभावग्रहणोपपत्तेः प्रमेयानुप्रवेशः । अनुमाने तु धूमादिलिङ्गग्रहणसमये न मनागपि तल्लिङ्गतदनुमेयदहनलिङ्ग्यनुप्रवेशस्पर्शो विद्यत इति ।

नन्वर्थापत्तावपि किं प्रमेयानुप्रवेशो न दोषः ? न दोष इति ब्रूमः । प्रमाणद्वयसमर्पितैकवस्तुविषयाभावभावसमर्थनार्थमर्थापत्तिः प्रवर्त्तमाना प्रमेयद्वयं परामृशत्येव, अन्यथा तत्संघटनायोगात् । अतश्च येयमागमादनियतदेशतया

प्रमेयानुप्रवेशप्रसङ्गादिति । जीवतो यो गृहाभावः स लब्धात्मभावः पक्षधर्मत्वासादनद्वारेण हेतुतां प्रतिपद्यते, तस्य तु गृहाभावस्य जीवनविशिष्टस्य बहिर्भावं विनात्मलाभ एव नास्ति, तदाक्षेपेणैवात्मलाभात्, इत्यनुमानप्रमेयस्य लिङ्गग्रहणसमय एव—तद्ग्रहणं विना लिङ्गग्रहणाभावाद् गृहीतत्वेन प्रमेयानुप्रवेशिता । इमामेवोत्तरग्रन्थेनाभिव्यनक्ति ।

प्रमाणद्वयसमर्पितेति । प्रमाणद्वयेनागमाभावाख्येनैकदेवदत्तविषयौ यौ भावाभावौ विरुद्धौ समर्पितौ तयोः समर्थनार्थमविरोधेनावस्थानार्थम् । **प्रमेयद्वयं परामृशत्येवेति** । प्रमेयद्वयमागमाभावसम्बन्धि भावाभावात्मकं परामृशत्युपपादकत्वेन, योऽभावः स गृहे, यस्तु भावः स बहिरिति । **अन्यथा तत्संघटनायोगादिति** । एकवस्तुविषययोर्भावाभावयोः संमीलनाया अभावादित्यर्थः । एवमर्थापत्तेर्व्यापारं प्रदर्श्य फलतस्तु तस्य नियमांश एव पर्यवसानमिति दर्शयितुमाह—**अतश्च येयमागमादिति** । पूर्वं ह्यनियतदेशतया प्रतिपत्तिरभूत्, गृहाभावे तु कुतश्चित्प्रमाणादवगते संविन्नेति नियतदेशतयोत्पादात् । एवं च सति यद्यपि जीवतो गृहाभावेनात्मलाभसमय एवाक्षिप्तो बहिर्भावस्तथापि नियमस्य पूर्वमनवगतस्यावगमादस्ति पृथक् प्रमेयलाभः,

क्वचिदस्तीति संवृत्तिरभूत्सैवेयं गृहाभावे गृहीते बहिरस्तीति संविदधुना संवृत्ता। तदतो वैलक्षण्यान्नानुमानमर्थापत्तिः। अतश्चैवं सम्बन्धग्रहणाभावात्।

भावाभावौ हि नैकेन युगपद्वह्निधूमवत्।
प्रतिबन्धतया रोद्धुं शक्यौ गृहबहिःस्थितौ॥
अन्यथानुपपत्त्या च प्रथमं प्रतिबन्धधीः।
पश्चाद्यद्यनुमानत्वमुच्यते काममुच्यताम्॥
नन्वस्त्येव गृहद्वारे वर्त्तिनः सङ्गतिग्रहः।
भावेन भावसिद्धौ तु कथमेष भविष्यति॥

यत्र गृहे चैत्रस्य भावमवगम्य तदन्यथानुपपत्त्या तदन्यदेशेषु नास्तित्वमवगम्यते तत्र देशानामानन्त्याद् दुरधिगमः प्रतिबन्धः। अनग्निव्यतिरेकनिश्चये धूमस्य का वार्तेति चेदुच्यते। तत्र धूमज्वलनयोरन्वयग्रहणसम्भवान्न व्यतिरेकग्रहणमाद्रियेरन् भूयोदर्शनसुलभनियमज्ञानसम्पाद्यमानसाध्याधिगमननिर्वृतमनसां किमनग्निव्यतिरेकनिश्चयेन? इह पुनरन्वयावसायसमय एव गम्यधर्मस्य दुरवगमत्वमुक्तम्, अनन्तदेशवृत्तित्वात्। अनुपलब्ध्या तन्निश्चय इति चेद्। न। मन्दिरव्यतिरिक्तसकलभुवनतलगततदभावनिश्चयस्य नियतदेशयानुपलब्ध्या कर्त्तुमशक्यत्वात्। तेषु तेषु देशान्तरेषु परिभ्रमन्ननुपलब्ध्या तद्भावं निश्चेष्यामीति चेन् मैवम्

गत्वा गत्वापि तान्देशान्नास्य जानामि नास्तिताम्।
कौशाम्ब्यास्त्वयि निष्क्रान्ते तत्प्रवेशादिशङ्कया॥

तस्मादभूमिरियम्, असर्वज्ञानामित्यर्थापत्त्यैव तन्निश्चयः।

नन्वित्थममुमर्थमनुमानान्निश्चेष्यामः, देशान्तराणि चैत्रशून्यानि चैत्राधिष्ठितव्यतिरिक्तत्वात् तत्समीपदेशवदिति। न। प्रत्यनुमानोहतत्वात्। देशान्तराणि चैत्राव्यतिरिक्तानि तत्समीपदेशव्यतिरिक्तत्वाच्चैत्राधिष्ठितदेशवदिति। तस्मान्नि-

---

आक्षिप्तबहिर्भावस्य लब्धात्मलाभस्य गृहतो बहिरस्तीति नियमावगतिपर्यन्तत्वात्। तदतो वैलक्षण्यादिति। न ह्यनुमाने गमकं गम्याक्षेपपूर्वकमात्मानमासाद्य नियमांशे व्याप्रियत इत्यर्थः। तदुक्तम् 'धूमावगमवेलायां नाग्न्यधीनं हि किञ्चन' इति।

यतदेशोपलभ्यमानपरिमितपरिमाणपुरुषशरीरान्यथानुपपत्त्यैव तदितरसकलदेशनास्तित्वावधारणं तस्येति सिद्धम् ।

पीनो दिवा च नात्तीति साकाङ्क्षवचनश्रुतेः ।
तदेकदेशविज्ञानं श्रुतार्थापत्तिरुच्यते ॥

इहैवंविधसाकाङ्क्षवचनश्रवणे सति समुपजायमानं रजनीभोजनविज्ञानं प्रमाणान्तरकरणकं भवितुमर्हति, प्रत्यक्षादेरसन्निधानात् । न प्रत्यक्षं क्षपाभक्षणप्रतीतिक्षमं परोक्षत्वात् । नानुमानमनवगतसम्बन्धस्यापि तत्प्रतीतेः । उपमानादेस्तु शङ्कैव नास्ति । तस्माच्छाब्द एव रात्रिभोजनप्रत्ययः । शब्दश्च न श्रूयमाण इममर्थमभिवदितुमलम्, एकस्य वाक्यस्य विधिनिषेधरूपार्थद्वयसमर्थनशून्यत्वात् । अत्र च रात्र्यादिपदानामश्रवणादपदार्थस्य च वाक्यार्थत्वानुपपत्तेः । न च विभावरीभोजनलक्षणोऽर्थो दिवावाक्यपदार्थानां भेदः संसर्गो वा, येनायमपदार्थोऽपि प्रतीयते ।

तस्मात्कल्प्यागमकृतं नक्तमत्तीति वेदनम् ।
तद्वाक्यकल्पनायान्तु प्रमाणं परिचिन्त्यताम् ॥
नाध्यक्षमनभिव्यक्तशब्दग्रहणशक्तिमत् ।
न लिङ्गमगृहीत्वापि व्याप्तिं तदवधारणात् ॥
क्वचिन्नित्यपरोक्षत्वाद्व्याप्तिबोधोऽपि दुर्घटः ।
विनियोक्त्री श्रुतिर्यत्र कल्प्या प्रकरणादिभिः ॥

न च विभावरीभोजनलक्षणोऽर्थ इति । एकस्मिन् क्रियापदे प्रयुक्ते सर्वकारकाक्षेपसिद्धिः, कारकपदे वा प्रयुक्त एकस्मिन् सर्वक्रियाक्षेपात् कारकपदं क्रियापदश्च कारकान्तरक्रियान्तरव्यावृत्तय उपादीयते । यथा 'गामानय' इति गामित्यनेनैव क्रियामात्राक्षेपाद् आनयेति बधानेत्यादिव्यावृत्त्यर्थं कल्प्यते । तस्माद् भेदो वाक्यार्थ इति **भेदवाक्यार्थवादिमतम्** । न च परस्परासंसृष्टावन्यतो भेत्तुं शक्यौ । अतः संसर्गप्रतीतिस्तत्रास्ति । साकाङ्क्षाणां वा परस्परसम्बन्धात् संसर्गो वाक्यार्थः; अर्थान्तरादभिन्नयोश्च संसर्गो नोपपद्यत इत्ति भेदप्रतीतिस्तत्रास्ति ।

विनियोक्त्री श्रुतिर्यत्र कल्प्या प्रकरणादिभिस्तत्र व्याप्तिबोधोऽपि दुर्घट इति सम्बन्धः । प्रकरणादिभिरिति लिङ्गादिप्रमाणपञ्चकपरिग्रहः । कश्चित्तु 'व्रीहीनवहन्ति'

विनियोक्त्री हि श्रुतिः सर्वत्र प्रकरणादौ वाक्यविद्भिरभ्युपगम्यते । यथोक्तं 'विनियोक्त्री श्रुतिस्तावत्सर्वेष्वेतेषु सम्मतेति' । तस्याश्च नित्यपरोक्षत्वाद् दुरधिगमस्तत्र लिङ्गस्य प्रतिबन्धः । न च निशापदवचनस्य सत्तानुमातुमपि शक्या । तस्यां साध्यायां भावाभावोभयधर्मकस्य हेतोरसिद्धविरुद्धानैकान्तिकत्वेनाहेतुत्वात् । न चात्र धर्मः कश्चिदुपलभ्यते यस्तेन तद्वान् पर्वत इवाग्निमाननुमीयते । न च दिवावाक्यं तदर्थोऽपि निशावचनानुमाने लिङ्गतां प्रतिपत्तुमर्हति ।

अश्रुते हि निशावाक्ये कथं तद्धर्मताग्रहः ।
श्रुते तस्मिंस्तु तद्धर्मग्रहणे किं प्रयोजनम् ॥

दिवावाक्यपदार्थानां तिष्ठतु लिङ्गत्वम्, अनुपपद्यमानतयापि न निशावाक्यप्रत्यायकत्वमवकल्पते । पदार्थानां हि सामान्यात्मकत्वाद्विशेषमन्तरेणानुपपत्तिः स्यात् न वाक्यान्तरमन्तरेण । तस्माच्छ्रूयमाणं वाक्यमेव तदेकदेशमन्तरेण निराकाङ्क्षप्रत्ययोत्पादकस्वव्यापारनिर्वहणं सन्धिमनधिगच्छत्तदेकदेशमाक्षिपतीति । सेयं प्रमाणैकदेशविषया श्रुतार्थापत्तिः ।

इति द्वितीयाश्रुतितोऽपि 'व्रीह्यर्थोऽवघातः' इति श्रुत्यन्तरकल्पनमिच्छति । लिङ्गेन श्रुतिकल्पनं यथा 'बर्हिर्देवसदनं दामि' इति मन्त्रस्याभिधानसामर्थ्यलक्षणेन लिङ्गेन बर्हिर्लवनमनेन मन्त्रेण कर्तव्यमिति श्रुतेः परिकल्पनम् । तथाहि देवाः सीदन्त्यस्मिन्निति देवसदनं बर्हिर्दामि लुनामीत्यभिधानसामर्थ्यम् । वाक्याद् यथा 'अरुणयैकहायन्या सोमं क्रीणाति' इति श्रुत्या क्रयार्थयोररुणैकहायन्योर्वाक्यादेकक्रियासम्बन्धनिबन्धनादेकहायनीद्रव्यारुणगुणयोः परस्परसम्बन्धावगमकश्रुतिपरिकल्पनम् । **प्राभाकरास्तु** वाक्योदाहरणम् 'अरुणया क्रीणाति' इत्येवमाहुः; क्रीणातिपदारुणपदसम्बन्धात्मकाद् वाक्यादस्मादेवारुणायाः क्रयार्थत्वं प्रतीयते, न तृतीयया श्रुत्या । सा हि कारकमात्रे अक्रियाशेषेऽपि दृष्टा । यथा 'गोदोहनेन पशुकामस्य प्रणयेत्' इति फलार्थत्वादप्रणयनार्थस्यापि गोदोहनस्य कारकतयैव प्रणयनेन सम्बन्धः, न प्रणयनशेषतया । यथा च शाल्यर्थं कुल्यानां प्रणीतानां य आचमनपानादिना सम्बन्धो नासावाचमनादिशेषतया अपि तु कारकत्वेन, एवं तृतीयाया अतच्छेषभूतेऽपि प्रयोगदर्शनान्न ततः शेषत्वनिश्चयः, किन्तु पदान्तरसम्बन्धात्मकवाक्यादेव । अतोऽत्र 'अरुणया क्रीणाति' इति न तृतीययैव शेषत्वप्रतिपत्तिः, अपि तु क्रीणातिपदसमभिव्याहारात्मकाद् वाक्या-

नन्वर्थादेव कथमर्थान्तरं न कल्प्यते। पीवरत्वं हि नाम भोजनकार्य-मुपलभ्यमानं स्वकारणं भोजनमनलमिव धूमः समुपस्थापयतु। तच्च वचसा काल-विशेषे निषिद्धं तदितरकालविशेषविषयं भविष्यतीति किं वचनानुमानेन? वचनमपि नादृष्टार्थमपि तु अर्थगत्यर्थमेव। तदस्य साक्षादर्थस्यैव कल्प्यमानस्य को दोषो यद्व्यवधानमाश्रीयते। उच्यते

शब्दप्रमाणमार्गेऽस्मिन्ननभिज्ञोऽसि बालक।
प्रमाणतैव न ह्यस्य साकाङ्क्षज्ञानकारिणः॥
पुरोऽवस्थितवस्त्वंशदर्शनप्राप्तिनिर्वृतिः।
प्रत्यक्षादि यथा मानं न तथा शाब्दमिष्यते॥
वाक्यार्थे हि समग्रांशे परिपूरणसुस्थिते।
अभिधाय धियं नास्य व्यापारः पर्यवस्यति॥
तावन्तं बोधमाधाय प्रामाण्यं लभते वचः।
तदर्थवाचकत्वाच्च तद्वाक्यं वाक्यमिष्यते॥
शब्दैकदेशश्रुत्यातस्तदंशपरिपूरणम्।
कल्प्यं प्रथममर्थस्य कुतस्तेन विना गतिः॥

देवेत्याहुः। प्रकरणात् 'समिधो यजति' इत्यादीनां प्रयाजादीनां दर्शपूर्णमासप्रकरणे श्रवणात् तादर्थ्यप्रतिपादकश्रुतिकल्पनम्। स्थानाद् यथा 'दब्धिर्नामास्य दब्धोऽहं भ्रातृव्यं दभेयम्' इति मन्त्रस्योपांशुयाजस्य स्थाने क्रमे सन्निधावाम्नातस्य प्रकरणात् सकलदर्शपूर्णमासार्थत्वे प्राप्ते स्थानाद् देशसाम्यादुपांशुयाजार्थभावगमकश्रुतिपरिकल्पनम्। अनाम्नातकर्तृकेषु पुरोडाशादिषु पदार्थेष्वाध्वर्यवमित्यादिसमाख्यया अध्वर्य्वादिकर्तृकत्व-प्रतिपादयितृश्रुतिकल्पनं यत् तत् समाख्यायाः।

भावाभावोभयधर्मकस्येति। यदाह

नासिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः।
धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम्॥ इति।

वाक्यार्थे हि समग्रांशे। वाक्यार्थो हि देवदत्तस्य पीनताख्येन धर्मेण कालविशेषा-वच्छिन्नस्वकारणभूतभोजननिषेधसहितेन संसर्गः। स यदि रात्रौ न भुङ्क्ते कदा तर्हि भुङ्क्ते?, भोजनं विना च कथं पीन इति सापेक्षत्वाद् दुःस्थितो न समग्रैरपेक्षितैरंशैः

प्रायः श्रुतार्थापत्त्या च वेदः कार्येषु पूर्यते ।
तत्रार्थः कल्प्यमानस्तु न भवेदेव वैदिकः ॥
या मन्त्रैरष्टकालिङ्गैस्तद्विधः परिकल्प्यते ।
श्रुतिलिङ्गादिभिर्या च कल्प्यते विनियोजिका ॥
विश्वजित्यधिकारश्च यागकर्तव्यताश्रुतेः ।
उत्पत्तिवाक्यं सौर्यादावधिकारविधिश्रुतेः ॥
ऐन्द्राग्न्यादिविकारेषु कार्यमात्रोपदेशतः ।
यश्च प्रकृतिवद्भावो विध्यन्त उपपाद्यते ॥
तदेवमादौ सम्बन्धग्रहणानुपपत्तितः ।
श्रुतार्थापत्तिरेवैषा निःसपत्नं विजृम्भते ॥
तया श्रुत्यैकदेशश्च सर्वत्र परिकल्प्यते ।
अर्थकल्पनपक्षे तु न स्याद्वेदैकगम्यता ॥
इत्यर्थापत्तिरुक्तैषा षट्प्रमाणसमुद्भवा ।

परिपूरितः, यदा सुस्थितो निराकाङ्क्षो भवति तदाऽसौ वाक्येन प्रतिपादितो भवति । भावतस्तु निराकाङ्क्षस्य प्रतिपादकं वाक्यमुच्यते । यदाहुः

साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
क्रियाप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥

समग्रांशपरिपूरणदुःस्थित इति तु पाठे समग्रांशानां परिपूरणाय परिपूरयितुं परिपूरणनिमित्तं दुःस्थित इति व्याख्येयम् । समग्राङ्गपरिपूरणेति तु पाठे स्पष्ट एवार्थः । **या मन्त्रैरष्टकालिङ्गैरिति** ।

यां जना अभिनन्दन्ति रात्रिं धेनुमिवायतीम् ।
संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ॥

'अष्टकायै सुराधसे स्वाहा' इत्यादयो मन्त्रा अष्टकादिकर्मविशेषप्रकाशका दृश्यन्ते, न चाविहितस्य प्रकाशनमस्ति; विहितानां कर्मणां प्रयोगकाले मन्त्रैः प्रकाशनात् । अतो मन्त्रप्रकाशनान्यथानुपपत्तितः 'अष्टकाः कर्तव्या' इति वैदिकविधिपरिकल्पनम् । **श्रुतिलिङ्गादिभिर्या चेति** प्राग् व्याख्यातम्। **विश्वजित्यधिकारश्चेति**। 'विश्वजिता यजेत' इति हि तत्र श्रूयते, यजेत यागः कर्त्तव्य इति । स च निष्फलः, कथं कर्तव्य इति ? तत्कर्तव्यतासिद्धये

अर्थापत्तेः प्रमाणान्तरतानिरासः

एषा विचार्यमाणा तु भिद्यते नानुमानतः ॥
प्रतिबन्धाद्विना वस्तु न वस्त्वन्तरबोधकम् ।
यत्किञ्चिदर्थमालोच्य न च कश्चित्प्रतीयते ॥
प्रतिबन्धोऽपि नाज्ञातः प्रयाति मतिहेतुताम् ।
न सद्योजातबालादेरुद्भवन्ति तथाधियः ॥
न विशेषात्मना यत्र सम्बन्धज्ञानसम्भवः ।
तत्राप्यस्त्येव सामान्यरूपेण तदुपग्रहः ॥

अपि च तेन विना नोपपद्यत इति च व्यतिरेकभणितिरियम् । व्यतिरेकश्च प्रतीतः, तस्मिन् सत्युपपद्यत इत्यन्वयमाक्षिपति । अन्वयव्यतिरेकौ च गमकस्य लिङ्गस्य धर्म इति कथमर्थापत्तिर्नानुमानम् ? केवलव्यतिरेकी हेतुरन्वयमूल एव गमक इति वक्ष्यामः ।

अतीन्द्रियशक्तेर्निर्विषयत्वप्रदर्शनम्

याश्च प्रत्यक्षादिपूर्विकाः शक्तिकल्पनायामर्थापत्तय उदाहृतास्ताश्च शक्तेरतीन्द्रियाया अभावान् निर्विषया एव ।

फलाक्षेपः, तच्चाधिकारनिमित्तत्वादधिकारशब्देनोक्तं फलम् । अथवा 'विश्वजिता यजेत' इति केवला प्रेरणा श्रूयते । सा च प्रेर्यं विना कस्येति तस्या अनुपपत्त्या स्वर्गकाम इति प्रेर्यसमर्पकपदपरिकल्पनम् । यागस्य कर्तव्यता तद्विषयप्रेरणावशाद् भवति । अधिक्रियत इत्यधिकारः स्वर्गकामः प्रेर्यस्तस्य कल्पना । 'सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः' इति अत्र ब्रह्मवर्चसं प्रति सौर्यस्य चरोर्विधानं श्रूयते । न चानवगतस्वरूपस्यात्र विधानं सम्भवति । अतोऽधिकारविध्यन्यथानुपपत्त्या कर्मस्वरूपावगमकस्योत्पत्तिविधिकल्पनम् । दर्शपूर्णमासयोर्हि 'आग्नेयोऽष्टाकपालो भवति' इत्यादिवाक्येभ्योऽवगतस्वरूपयोः स्वर्गं प्रति 'दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः' इति विधानात् । 'ऐन्द्राग्नं चरुं निर्वपेत् प्रजाकामः' इत्यादौ कार्यमात्रं भावनामात्रं करणम्, फलञ्च आग्नेयेन चरुणा भावयेदिति निर्दिष्टम् । कथमंशस्तु नोपदिष्टः । न चानुपकृतं करणं भवतीति करणरूपतान्यथानुपपत्त्या 'प्रकृतिवद् विकृतिः कर्तव्या' इति कल्प्यते । उपदिष्टेतिकर्तव्यताकं कर्म प्रकृतिः, अनुपदिष्टेतिकर्तव्यताकं तु विकृतिः । विध्यन्त इतिकर्तव्यता ।

स्वरूपादुद्भवत्कार्यं सहकार्युपबृंहितात् ।
न हि कल्पयितुं शक्तं शक्तिमन्यामतीन्द्रियाम् ॥

ननु शक्तिमन्तरेण कारकमेव न भवेत् । यथा पादपं छेत्तुमनसा परशुरुद्यम्यते तथा पादुकाद्यपि उद्यम्येत । शक्तेरनभ्युपगमे हि द्रव्यस्वरूपाविशेषात्सर्वस्मात् सर्वदा कार्योदयप्रसङ्गः । तथा हि विषदहनयोर्मारणे दाहे च शक्तावनिष्यमाणायां मन्त्रप्रतिबद्धायां स्वरूपप्रत्यभिज्ञायां सत्यामपि कार्यौदासीन्यं यद् दृश्यते तत्र का युक्तिः ? न हि मन्त्रेण स्वरूपसहकारिसान्निध्यं प्रतिबध्यते, तस्य प्रत्यभिज्ञायमानत्वात् । शक्तिस्तु प्रतिबध्यत इति सत्यपि स्वरूपे सत्स्वपि सहकारिषु कार्यानुत्पादो युक्तः । किञ्च सेवाद्यर्जनादिसाम्येऽपि फलवैचित्र्यदर्शनादतीन्द्रियं किमपि कारणं कल्पितमेव धर्मादिर्भवद्भिः, अतः शक्तिरतीन्द्रिया तथाभ्युपगम्यतामीति ।

तदेतदनुपपन्नम् । यत्तावदुपादाननियमादित्युक्तम्, तत्रोच्यते न हि वयमद्य किञ्चिदभिनवं भावानां कार्यकारणभावमुत्थापयितुं शक्नुमः, किन्तु यथाप्रवृत्तमनुसरन्तो व्यवहरामः । न ह्यस्मदिच्छया आपः शीतं शमयन्ति कृशानुर्वा पिपासाम् । तत्र च्छेदनादावन्वयव्यतिरेकाभ्यां, वृद्धव्यवहाराद्वा, परश्वधादेरेव कारणत्वमध्यवगच्छाम इति तदेव तदर्थिन उपादद्महे न पादुकादीति । न च परश्वधादेःस्वरूपसन्निधाने सत्यपि सर्वदा कार्योदयः स्वरूपवत् सहकारिणामप्यपेक्षणीयत्वात्, सहकार्यादिसन्निधानस्य सर्वदानुपपत्तेः । सहकारिवर्गे च धर्मादिकमपि निपतति, तदपेक्षे च कार्योत्पादे कथं सर्वदा तत्सम्भवः ? धर्माधर्मयोश्च वैचित्र्यं कार्यबलेन कल्पनमपरिहार्यम् । तयोश्च न शक्तित्वादतीन्द्रियत्वम् । अपि तु स्वरूपमहिम्नैव, मनःपरमाण्वादिवत् ।

यद्यपि विषदहनसन्निधाने सत्यपि मन्त्रप्रयोगात्तत्कार्यादर्शनम्, तदपि न शक्तिप्रतिबन्धननिबन्धनमपि तु सामग्र्यन्तरानुप्रवेशहेतुकम् ।

ननु मन्त्रिणा प्रविशता तत्र किं कृतम् ? न किञ्चित्कृतम् । सामग्र्यन्तरन्तु सम्पादितम्, काचिद्धि सामग्री कस्यचित्कार्यस्य हेतुः । स्वरूपं तदवस्थमेवेति चेद् । यद्येवमभक्षितमपि विषं कथं न हन्यात् ? तत्रास्य संयोगाद्यपेक्षणीयमस्तीति चेन्मन्त्राभावोऽप्यपेक्ष्यताम् । दिव्यकरणकाले धर्म इव मन्त्रोऽप्यनुप्रविष्टः कार्यं

प्रतिहन्ति। शक्तिपक्षेऽपि वा मन्त्रस्य को व्यापारः ? मन्त्रेण हि शक्तेर्नाशो वा क्रियते, प्रतिबन्धो वा। न तावन्नाशः, मन्त्रापगमे पुनस्तत्कार्यदर्शनात्। प्रतिबन्धस्तु स्वरूपस्यैव शक्तेरिवास्तु। स्वरूपस्य किं जातम् ? कार्यौदासीन्यमिति चेत् तदितरतोपि समानम्। स्वरूपमस्त्येव दृश्यमानत्वादिति चेच्छक्तिरप्यस्ति पुनः कार्यदर्शनेनानुमीयमानत्वादिति।

किञ्च शक्तिरभ्युपगम्यमाना पदार्थस्वरूपवन्नित्याभ्युपगम्येत, कार्या वा ? नित्यत्वे सर्वदा कार्योदयप्रसङ्गः। सहकार्यपेक्षायान्तु स्वरूपस्यैव तदपेक्षास्तु किं शक्त्या ? कार्यत्वे तु शक्तेः पदार्थस्वरूपमात्रकार्यत्वं वा स्यात् सहकार्यादिसामग्रीकार्यत्वं वा। स्वरूपमात्रकार्यत्वे पुनरपि सर्वदा कार्योत्पादप्रसङ्गः, सर्वदा शक्तेरुत्पादात्। सामग्रीकार्यत्वे तु कार्यमस्तु किमन्तरालवर्तिन्या शक्त्या ? अशक्तात्कारकात्कार्यं न निष्पद्यत इति चेच्छक्तिरपि कार्यं तदुत्पत्तावप्येवं शक्त्यन्तरकल्पनादनवस्था। आह दृष्टसिद्धये ह्यदृष्टं कल्प्यते न तु दृष्टविघाताय। शक्त्यन्तरकल्पनायां शक्तिश्रेणीनिर्माण एव क्षीणत्वात् कारकाणां कार्यविघातः स्यादित्येकैव शक्तिः कल्प्यते। तत्कुतोऽनवस्था ?

अत्रोच्यते यद्यदृष्टमन्तरेण दृष्टं न सिद्ध्यति काममदृष्टं कल्प्यताम्। अन्यथाऽपि तु तदुपपत्तौ किं तदुपकल्पनेन ? दर्शिता चान्यथाप्युपपत्तिः। कल्प्यमानमपि चादृष्टं तत्कल्प्यतां यदनवस्थां नावहेत धर्मादिवत्। अपि च व्यापारोऽप्यतीन्द्रियः शक्तिवदिष्यते भवद्भिः, अन्यतरकल्पनयैव कार्योपपत्तेः किमुभयकल्पनागौरवेण ? शक्तमव्याप्रियमाणं न कारकम्, कारकमिति चेत्तच्छक्तमिति। तथा कथं जानामि, कार्यदर्शनाज्ज्ञास्यामीति चेद्व्यापारादेव कार्यं सेत्स्यति। पादुकादेर्व्याप्रियमाणादपि न पादपच्छेदो दृश्यत इति चेत् प्रत्यक्षस्तर्हि व्यापारो नातीन्द्रियो, यतः कार्यदर्शनात्पूर्वमपि व्याप्रियमाणत्वं ज्ञातमायुष्मता। कार्यानुमेयो हि व्यापारः कार्यं विना न ज्ञायेतैव। कार्यं त्वन्यतरस्मादपि घटमानं नोभयं कल्पयितुं प्रभवतीत्यलं प्रसङ्गेन प्रकृतमनुसरामः।

तस्मादतीन्द्रियायाः शक्तेरभावान्निर्विषया यथोदाहृतास्ता अर्थापत्तयः।

भवन्त्यपि वा शक्तिरतीन्द्रियाऽनुमानस्यैव विषयः, कार्यकारणपूर्वकत्वेन व्याप्तिग्रहणात् स्वरूपमात्रस्य च कारणत्वानिर्वहणादधिकं किमप्यनुमास्यते। सा शक्तिरिति।

शब्दनित्यत्वसिद्धौ तु यार्थापत्तिरुदाहृता ।
तस्याः शब्दपरीक्षायां समाधिरभिधास्यते ॥

अभावपूर्विकार्थापत्तिखण्डनम्

अभावपूर्विकाप्यर्थापत्तिरनुमानमेव । जीवतो गृहाभावेन लिङ्गभूतेन बहिर्भावावगमात् । चैत्रस्य गृहाभावो धर्मी बहिर्भावेन तद्वानिति साध्यो धर्मः जीवन्मनुष्यगृहाभावत्वात् पूर्वोपलब्धैवंविधगृहाभाववत् । यथा धर्मी वह्निमानिति साध्योऽर्थः धूमत्वात् पूर्वोपलब्धधूमवदिति । अतश्च गृहादीनां लिङ्गत्वाशङ्कनम् अपाकरणञ्चाडम्बरमात्रम् ।

यत्पुनः प्रमेयानुप्रवेशदूषणमभ्यधायि, तदपि न साम्प्रतम् । किं प्रमेयमभिमतमत्र भवताम् ? किं सत्तामात्रम्, उत बहिर्देशविशेषितं सत्त्वम् । सत्तामात्रं तावदागमादेवावगतमिति न प्रमाणान्तरप्रमेयतामवलम्बते । बहिर्देशविशेषितं तु सत्त्वं भवति प्रमेयम्, तस्य तु तदानीमनुप्रवेशः कुतस्त्यः ? गृहाभावग्राहकं हि प्रमाणं गृह एव सदुपलम्भकप्रमाणावकाशमपाकरोति, बहिर्न सदसत्त्वचिन्तां प्रस्तौति ।

वृद्धस्य जीवतो दूरे तिष्ठतः प्राङ्गणेऽपि वा ।
गृहाभावपरिच्छेदे न विशेषोऽस्ति कश्चन ॥

जीवनविशिष्टस्त्वसौ गृह्यमाणो लिङ्गतामश्नुते व्यभिचारनिरासात् । न च विशेषणग्रहणमेव प्रमेयग्रहणम् । जीवनमन्यदन्यच्च बहिर्भावाख्यं प्रमेयम् ।

ननु जीवनविशिष्टगृहाभावप्रतीतिरेव बहिर्भावप्रतीतिः ? नैतदेवम् । जीवनविशिष्टगृहाभावप्रतीतेर्बहिर्भावः प्रतीतः । न तत्प्रतीतिरेव बहिर्भावप्रतीतिः न हि दहनाधिकरणधूमप्रतीतिरेव दहनप्रतीतिः । किन्तु धूमादन्य एव दहनः । इहापि गृहाभावजीवनाभ्यामन्य एव बहिर्भावः । पर्वतहुतवहयोः सिद्धत्वान्मत्वर्थमात्रं तत्रापूर्वमनुमेयम् । एवमिहापि बहिर्देशयोगमात्रमपूर्वमनुमेयम् । यदि तु तदधिकं प्रमेयमिह नेष्यते तदा गृहाभावजीवनयोः स्वप्रमाणाभ्यामवधारणादानर्थक्यमर्थापत्तेः । तस्मात्प्रमेयान्तरसद्भावात्तस्य च तदानीमननुप्रवेशान्न प्रमेयानुप्रवेशो दोषः । अर्थापत्तावपि च तुल्य एवायं दोषः । तत्राप्यर्थादर्थान्तरकल्पनाभ्युपगमात् । दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थकल्पनेत्येव ग्रन्थोप-

निबन्धात्, तस्य तस्मात्प्रतीतिरिति तत्र व्यवहारः, तत्रावाच्यतत्प्रतीतौ तदनुप्रवेशो दोष एव, स्वभावहेताविव तद्बुद्धिसिद्ध्या तत्सिद्धेः प्रमाणान्तरवैफल्यादिति ।

प्रभाकरमतेऽर्थापत्तिसमर्थनम्

प्राभाकरास्तु प्रकारान्तरेणानुमानाद्भेदमत्राचक्षते । अनुमाने गमकविशेषणमन्यथानुपपन्नमनलं विना धूमो हि नोपपद्यते । इह तु विपर्ययः, गम्यो गमकेन विना नोपपद्यते । गम्यो बहिर्भावः, स जीवतो गृहाभावं विना नोपपद्यते । "गृहान्निर्गतो जीवन् बहिर्भवतीति" भाष्यमप्येवं योजयन्ति । दृष्टः श्रुतो वार्थोऽर्थकल्पना अर्थान्तरं कल्पयतीत्यर्थः । यतः सा कल्पना प्रमेयद्वारिकाऽन्यथा नोपपद्यते, कल्प्यमानोऽर्थोऽन्यथा नोपपद्यते स च गम्य इति ।

प्रभाकरमतखण्डनम्

एतदपि ग्रन्थवैषम्योपपादनमात्रम्, न तु नूतनविशेषोत्प्रेक्षणम् । गम्ये तावदगृहीते सति तद्गतमनुपपद्यमानत्वं कथमवधार्येत ? गृहीते तु गम्ये किं तद्गतानुपपद्यमानत्वग्रहणेन ? साध्यस्य सिद्धत्वात् । पुरा तद्गतमन्यथाऽनुपपद्यमानत्वं गृहीतमासीदिति चेद् । अहो महाननुमानाद्विशेषः । इदं हि पूर्वं प्रतिबन्धग्रहणमुक्तं स्यात् ।

स्वभावहेताविवेति । वृक्षोऽयं शिंशपात्वादित्यत्र यावदेव शिंशपाख्यो भावो गृहीतस्तावदेव वृक्षत्वमपि, तत्स्वभावो गृहीत एव । तद्ग्रहणे तस्याग्रहणात् तत्स्वभावतैव न स्यादित्यर्थः ।

भाष्यमप्येवं योजयन्तीति । दृष्टः श्रुतो वार्थोऽर्थकल्पना अर्थस्य कल्पकः, कस्यार्थस्येत्यपेक्षायां योऽन्यथा नोपपद्यते तस्येति योजना प्रभाकरपक्षे । ननु समासान्तर्गतेनार्थशब्देन कथमन्यथा नोपपद्यत इत्यस्य सम्बन्धः, तत्र गुणीभूतत्वादर्थशब्दस्य । नैवम्, कल्पनाशब्देनापि सम्बन्धेऽन्यथा नोपपद्यत इत्यस्यायमेवार्थो लभ्यते यतः । इदमेवाह **यतः सा कल्पना प्रमेयद्वारिकेति** । प्रमेयद्वारिका प्रमेयमुखेन अन्यथा नोपपद्यते, प्रमेयस्यान्यथानुपपद्यमानत्वात्, 'साऽन्यथा नोपपद्यते' इत्युच्यते न साक्षादित्यर्थः । तदेवाह 'कल्प्यमानोऽर्थोऽन्यथा नोपपद्यते' इति ।

अपि च बहिर्भावस्य गृहाभावं विनाऽनुपपत्तिरिति उक्ते तस्मिन्सति तस्योपपत्तिर्वक्तव्यः। सा च का ? किमुत्पत्तिर्ज्ञप्तिर्वा ? यदि ज्ञप्तिः, सा चानुमानेऽपि गम्यं गमकं विना नास्ति तस्मिन्सत्यस्तीति समानः पन्थाः।

उत्पत्तिस्तु गृहाभावाद् बहिर्भावस्य दुर्भणा।
प्राक् सिद्धे हि गृहाभावे तदुत्पादः क्षणान्तरे॥
कारणं पूर्वसिद्धं हि कार्योत्पादाय कल्पते।
तेनैकत्र क्षणे जीवन्न गृहे न बहिर्भवेत्॥

तस्माद्यत्किञ्चिदेतत्।

अर्थापत्तेः स्वरूपान्तरखण्डनम्

एवञ्च यदेके ज्ञप्त्युत्पत्तिकृतमिह वैलक्षण्यमुत्प्रेक्षितवन्तो धूमेनाग्निर्गम्यत एव, गृहाभावेन बहिर्भावो जन्यतेऽपीति, तदपि प्रत्युक्तं भवति।

यत्तु सम्बन्धग्रहणाभावादित्युक्तम्, तदपि न सुन्दरम्। (मन्दिराशुद्धम द्वारवर्त्तिनस्तदुत्पत्तेः ?)।

एतच्च स्वयमाशङ्क्य न तैः प्रतिसमाहितम्।
उदाहरणमन्यत्तु व्यत्ययेन प्रदर्शितम्॥

गृहभावेन बहिरभावकल्पनमिति तत्रैव, तदेव। तदेव वक्तव्यम्। इयमभावपूर्विका न भवत्येवार्थापत्तिः। षडर्थापत्तीः प्रतिज्ञायेमामभावपूर्विकामर्थापत्ति-

---

उदाहरणमन्यत् तु व्यत्ययेन प्रदर्शितमिति। तथाह

गृहद्वारि स्थितो यस्तु बहिर्भावं प्रकल्पयेत्।
यदा तस्मिन्नयं देशे न तदान्यत्र विद्यते॥ इति

वार्त्तिकं भाष्योदाहृतार्थापत्तेः प्रत्यक्षेणापि हि बहिर्भावं प्रतिपद्य गृहाभावेन सह सम्बन्धग्रहणादर्थापत्तिपूर्वकत्वाभावादनुमानेऽन्तर्भावमाह। इमञ्चान्तर्भावमनिराकृत्यैवोदाहरणान्तरं चित्ते विधायाह

"तदाप्यविद्यमानत्वं न सर्वत्र प्रतीयते।
न चैकदेशनास्तित्वात् व्याप्तिर्हेतोर्भविष्यति॥" इति

गृहव्यवस्थितं चैत्रमुपलभ्य तस्मिन्नेव काले तदन्यथानुपपत्त्यैव सर्वत्राभावमुपलभ्य तस्य गृहव्यवस्थितदेवदत्तभावेनाविनाभावग्रहणे तत्रार्थापत्तिपूर्वकत्वमेव

मुत्कोपनैयायिककटाक्षपातभीतामिह गहने हरिणीमिव यदुपेक्ष्य गम्यते तदत्यन्तमत्रभवतामनार्यजनोचितं चेष्टितम् ।

त्वदेकशरणां बालामिमामुत्सृज्य गच्छतः ।
कथं ते तर्कयिष्यन्ति मुखमन्या अपि स्त्रियः ।।

भावेनाभावकल्पना तु प्रत्यक्षपूर्विकैवार्थापत्तिः । तस्याऽपि च न दुरवगमः सम्बन्धः । असर्वगतस्य द्रव्यस्य नियतदेशवृत्तेरक्लेशेन तदितरदेशनास्तित्वावधारणात् । अनग्निव्यतिरेकनिश्चये च धूमस्य, भवतां का गतिः ? या तत्र वार्त्ता, सैवेहापि नो भविष्यति । न च भूयोदर्शनावगम्यमानान्वयमात्रैकशरणतया ।

सम्बन्धग्रहणस्य । ननु चैत्राधिष्ठितदेशव्यतिरिक्तसमीपदेशे चैत्रस्याभावेनाभावं प्रतिपद्याभावेनाविनाभावग्रहणात् किमुच्यतेऽर्थापत्तिपूर्वकत्वमित्याशङ्क्याह—'चैकदेशनास्तित्वात्' इति । चैत्राधिष्ठितव्यतिरिक्तानन्तदेशगतो ह्यभावो भावस्य सम्बन्धी, न सन्निकृष्टव्यतिरिक्तदेशगत एव । तस्य च प्रमाणान्तरेणाभावेनाप्यवगमाभावादर्थापत्तिपूर्वकत्वम् । दृश्यस्य ह्यनुपलब्धिरूपेणाभावेनाभावः सिद्धयति । न च विप्रकृष्टदेशे दृश्यतास्तीति एकदेशनास्तित्वमात्रात् केवलान्न हेतोरुत्तरकालमभावानुमापकस्य गृहसद्भावस्य व्याप्तिग्रहोऽस्तीत्यर्थः । इत्थमेतदुम्बेकादिदृष्टया वार्त्तिकव्याख्यानम्, तदनुयायिना ग्रन्थकृतापि तदेवानुसृत्योक्तम् । तत्त्वतस्तु 'तदाप्यविद्यमानत्वम्' इति वार्त्तिकं व्याख्यायमानं प्रकृतोदाहरणसमर्थनेऽपि सङ्गच्छते । तदा ह्ययमर्थः तदापीत्यस्य यदापि द्वारि स्थितस्तदापि दृश्यानुपलम्भादभावो गृहे सिध्यतु, न पुनः सर्वत्र प्रतीयते, दृश्यत्वाभावात्, अतः सर्वत्राभावनिश्चयेऽर्थापत्तेरेव व्यापारः । अयं भावः—गृहे यदा न तदा, बहिरित्येवं व्याप्तौ गृहीतायां गृहेऽदर्शनाद् बहिर्भावः सिद्धयति, न चैवमर्थापत्तिं विना व्याप्तिग्रहः सम्भवति, दूरदेशे अभावस्याप्यवगन्तुमशक्यत्वात्; अतोऽर्थापत्त्या एकदेशभावान्यथानुपपत्तिरूपया देशान्तरेऽप्यभावकल्पनेति । ननु भावस्याभावेन सह सम्बन्धग्रहणाद् भावलिङ्गेनैवाभावावगतिरित्याह 'न चैकदेशनास्तित्वाद् गृहाभावाद् गृहीतात् कारणात् सर्वाभावैर्हेतोर्लिङ्गस्य व्याप्तिसिद्धिः' । अयमर्थः भावाख्यं लिङ्गमभावावगतौ येन सह गृहीतसम्बन्धं तस्यैव गमकं भवितुमर्हति, गृहाभावेन च तस्य सम्बन्धग्रहो वृत्तोऽतस्तस्यैव गमकं भवतु; न च गृहाभावेन सह व्याप्तिर्गृहीता या सर्वा भावैः सह व्याप्तिः सिद्धयति, अतिप्रसङ्गादित्यलमप्रकृताभिधानेन

यस्य वस्त्वन्तराभावो गम्यस्तस्यैव दुष्यति ।
मम त्वदृष्टिमात्रेण गमकाः सहचारिणः ।।

इति कथयितुमुचितम् । अनिश्चितव्यतिरेकस्य साध्यनिश्चयाभावादिति दर्शयिष्यामः । पक्षधर्मान्वयव्यतिरेकोऽपि नागृहीतोऽनुमानाङ्गम् । बहिरभावसिद्धौ चानुमानप्रयोगः स एव यस्त्वया दर्शितः । प्रतिपक्षप्रयोगः प्रत्यक्षादिविरुद्धत्वाद्धेत्वाभास एवेत्यलं प्रसङ्गेन ।

श्रुतार्थापत्तिखण्डनम्

श्रुतार्थापत्तिरपि वराकी नानुमानाद्भिद्यते । वचनैकदेशकल्पनाया अनुपपन्नत्वाद् अर्थस्य च कार्यलिङ्गस्य सत्त्वात् । यथा क्षितिधरकन्दराधिकरणं धूममवलोक्य तत्कारणमनलमनुमिनोति भवान्, एवमागमात्पीनत्वाख्यं कार्यमवधार्य तत्कारणमपि भोजनमनुमिनोतु । कोऽत्र विशेषः ? तत्कार्यतया भूयोदर्शनतः प्रतिपन्नत्वात् । लिङ्गस्य तु क्वचित्प्रत्यक्षेण ग्रहणम्, क्वचिद्वचनतः प्रतिपत्तिरिति, नैष महान्भेदः, ।

ननु वचनमपरिपूर्णमिति प्रतीतिमेव यथोचितां जनयितुमसमर्थम् । किं 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यतो न भवति तत्पीनताप्रतीतिः ? न । न भवति, साकाङ्क्षा तु भवति, न च साकाङ्क्षप्रतीतिकारिणस्तस्य प्रामाण्यमिति तदेव तावत्पूरयितुं युक्तम् । तदसत्–कस्यात्र साकाङ्क्षत्वम् ? किं शब्दस्य ? किं वा तदर्थस्य, ? उत स्वित्तदवगमस्येति । शब्दस्य तावदर्थनिरपेक्षस्य न काचिदाकाङ्क्षानभिव्यक्तशब्दवत् । अर्थस्तु साकाङ्क्षः सन्नर्थान्तरमुपकल्पयतु, कोऽवसरो वचनकल्पनायाः । अवगमोऽप्यर्थविषय एव साकाङ्क्षो भवति, न शब्दविषयः श्रोत्रकरणकः । तस्मादवगमनैराकाङ्क्षचसिद्धये तदर्थकल्पनमेव युक्तम् । वचनैकदेशकल्पनमप्यर्थावगतिसिद्ध्यर्थमेवेति तत्कल्पनमेवास्तु किं सोपानान्तरेण ।

ममत्वदृष्टिमात्रेणेति । अस्य पूर्वमर्धम् 'यस्य वस्त्वन्तराभावो गम्यस्तस्यैव दुष्यति' इति । अस्यार्थः–यस्य वादिनो बौद्धस्य वस्त्वन्तराभावोऽनग्निव्यावृत्तिलक्षणोऽनुमानगम्यस्तस्य तत्तद्देशानवगमरूपो दोषः । यावत् सर्वानग्निव्यावृत्तान् देशान् नावगच्छति तावद् व्यतिरेकग्रहो न सिद्ध्यतीत्येवंरूपः । ननु चाग्न्याद्यभावेऽपि

यत्तु कल्प्यमानस्यावैदिकत्वमर्थस्य प्राप्नोतीति ? तत्र वचनकल्पनापक्षे सुतरामवैदिकः सोऽर्थः स्यात्, कल्प्यमानस्य वचनस्य वेदादन्यत्वात्, श्रुतोऽनुमितश्च द्विविधः स वेद एवेति चेत्, श्रौतार्थः श्रौतार्थानुमितो द्विविधः स वेदार्थ एव भविष्यतीति किं वचनसोपानान्तरकल्पनया ? तेन श्रूयमाणवेदवचनप्रतिपाद्यार्थसामर्थ्यलभ्यत्वादेव तस्य वेदार्थता भविष्यति। सर्वथा न वचनैकदेशविषया श्रुतार्थापत्तिः श्रेयसी। श्रुत्येकदेशकल्पनापक्षप्रतिक्षेपाच्च तदतीन्द्रियतया सम्बन्धग्रहणमघटमानमिति यदुक्तं तदपि प्रत्युक्तम्। अर्थे तु सामान्येन सम्बन्धग्रहणमपि सूपपादम्। तत्र तत्र यज्यादेरर्थस्याधिकाराद्यर्थान्तरासंबद्धस्य दृष्टत्वादिति।

प्राभाकरास्तु 'दृष्टः श्रुतो वेति' भाष्यं लौकिकमभिधानान्तरमेवेदमुपलब्धिवचनमि'ति वर्णयन्तः श्रुतार्थापत्तिं प्रत्याचक्षते। श्रूयमाणस्यैव शब्दस्य तावत्यर्थे सामर्थ्यमुपगच्छन्तः तमर्थं शाब्दमेव प्रतिजानते वाक्यस्य दूराविदूरव्यवस्थितगुणागुणक्रियाद्यनेककारककलापोपरक्तकार्यात्मकवाक्यार्थप्रतीताविषोरिव दीर्घदीर्घो व्यापारः। अविरतव्यापारे च शब्दे सा प्रतीतिरुदेति। तद्व्यापारविरतौ नोदेति तदुत्पादककारकाभावात्। वृद्धव्यवहारतश्च शब्देषु व्युत्पाद्यमानो लोकस्तथा-

---

धूमादिव्यतिरेकि (अवाच्यान्यक्षराणि) त्र वाक्यस्यैव तत्प्रतिपत्तिहेतोर्व्यापारः। कार्यं हि तेन प्रतिपाद्यम्। निराकाङ्क्षस्य च तस्य प्रतिपादने तत्प्रतिपादितं भवति इति तात्पर्यम्।

दूराविदूरेति दूरव्यवस्थिता गुणीभूता अङ्गभूता याः क्रियाः, अदूरव्यवस्थिता अगुणभूताश्च प्रधानक्रियाः। दूरव्यवस्थितत्वं भिन्नवाक्योपादानत्वम्। तथाहि 'आग्नेयोऽष्टाकपालो भवति' इत्यादिभिर्वाक्यैः प्रधानक्रिया उपात्ताः, 'समिधो यजति' इत्यादिभिस्तु गुणक्रियाः। एतत्तु 'दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः' इत्यधिकारवाक्यापेक्षयोत्पत्तिवाक्यानामुक्तम्। क्वचित्तु अदूरव्यवस्थिता एकवाक्योपात्ता गुणागुणक्रियाः। तद्यथा "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत" इति। अथ हि वारवन्तीयकरणं गुणक्रिया अन्यस्योत्पत्तिवाक्यस्याभावात्, यागश्च प्रधानक्रियानेनैवोपात्ता। आदिग्रहणाद् द्रव्यदेवतातद्विशेषणादीनामवरोधः। एवमादिनानेकेन कारककलापेनोपरक्तः कार्यान्तराद् व्यवच्छिन्नः कार्यात्मा यो वाक्यार्थः। अथवा गुणक्रिया द्रव्यं प्रति गुणत्वेन स्थिता द्रव्यचिकीर्षकत्वेन व्यवस्थिता या अवघातादयः, याश्चागुणक्रिया नियोगार्थाः समिदादयस्ताः।

भूतवाक्यव्यवहारिणो वृद्धान् पश्यन्वाक्यस्य च तादृशवाक्यार्थे सामर्थ्यमवधारयति। तदनुवर्त्तीनि तु पदानि तस्मिन्नैमित्तिके निमित्तानि भवन्ति। नैमित्तिकानुकूल्यपर्यालोचनया क्वचिदश्रूयमाणान्यपि तानि निमित्ततां भजन्ते, विश्वजिदादौ स्वर्गकामादिपदवत् क्वचिच्छ्रूयमाणान्यपि तदननुकूलत्वात्परित्यज्यन्ते,

---

दूरव्यवस्थिता विकृतिषु प्रकरणान्तरोपात्तत्वेन, अदूरव्यवस्थिताश्चैकप्रकरणत्वेन प्रकृतिषु; अन्यत् समानम्। कारकत्वन्तु क्रियाद्रव्यादीनां साक्षात् पारम्पर्येण च; नियोगसंपत्तेस्तदधीनत्वात्, न पुनर्घटादाविव मृदादीनां प्रवृत्तिविषयत्वेन कारकत्वम्। प्रवृत्तिप्रयोजनं हि नियोगो, न प्रवृत्तिविषय इति प्राभाकराः तत्सिद्धये हि धात्वर्थे प्रवर्तन्ते, न तु तत्रैवेति। **तदनुवर्तीनि तु पदानि तस्मिन्नैमित्तिके निमित्तानि भवन्तीति** ह्यस्यायमाशयः यदि पदानां वाक्यार्थविधृतौ सामर्थ्यमन्यतोऽवधृतं स्यात् तदा तदनुसारितया वाक्यार्थप्रत्ययोऽपि भवेत्; यदा पुनर्वाक्यार्थस्य कार्यरूपस्य प्रवृत्तिलक्षणेन व्यवहारेणावगमात् तत्रावापोद्वापाभ्यां पदानां निमित्तत्वमवगम्यते तदा यथावगतनिमित्तनैमित्तिकानुसरणादेव। यथा पदानां निमित्तत्वं सङ्गच्छते तथा अवगन्तव्यम्। अत एव वाचकत्वादन्यन्निमित्तत्वम्। वाचकत्वं सम्बन्धग्रहणसापेक्षत्वेन, निमित्तत्वं पुनस्तस्मिन्निरपेक्षत्वेन वाक्यार्थविगमं प्रति। अन्यथा प्रथमश्रुताद् वाक्यादर्थप्रतिपत्तिर्न स्यात्। **नैमित्तिकानुकूल्यपर्यालोचनयेति**। नैमित्तिकं नियोगानुकूल्यम्, अधिकारिणि सति तस्य सम्पत्तिसिद्धेः। **क्वचिच्छ्रूयमाणान्यपीति**। दर्शपूर्णमासयोः 'ऐन्द्रं दधि, ऐन्द्रं पयः' इति प्रधानं हविर्द्वयं विधायोक्तम् यस्योभयं हविरार्तिमार्च्छेत् 'स ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इति। यस्य हविरार्तिमार्च्छेत् हविर्यागायोग्यतां व्रजेदिति। हविरार्तिगमननिमित्ता पञ्चशरावौदनकर्तव्यता प्रतीयते। हविषश्चार्तिङ्गतस्य विधेयपञ्चशरावप्रवणत्वेन प्रतीतस्योभयविशेष्यत्वाश्रयणे तु स्वार्थत्वपरार्थत्वलक्षणं विरुद्धं रूपद्वयं प्रसज्यते। हविश्चेदार्तिमार्च्छेत् तच्चोभयमित्युभयपदेन च विशेष्यत्वे हविषोऽभिधानावृत्तिलक्षणो वाक्यभेदः प्रसज्यते। हविरार्तिमार्च्छेदित्येकवारमुच्चारितं हविरिति तच्चेद्धविरुभयमिति पुनरुच्चारयितव्यं प्रसज्यते। तत उद्देश्यत्वाद् ग्रहाद्येकत्ववद् विशेषणाविवक्षा। तस्माद्धविरार्तिगमननिमित्तैव पञ्चशरावौदनकर्तव्यता। उभयपदन्तु श्रुतमपि न विवक्षितम्। उभयमुभयात्मकं यदेतद्धविः प्रक्रान्तमित्यनुवादमात्रतयैव समन्वयो न विवक्षितत्वेनेति यावत्। यथा यावेतावुभौ चाण्डालौ गच्छन्तौ पश्यसि तौ न स्प्रष्टव्यौ, यदि स्पृशेः तत्

'यस्योभयं हविरार्त्तिमाच्छेदि'तिवत्, । क्वचिदन्यथा स्थितानि तदनुरोधादन्यथैव स्थाप्यन्ते 'प्रयाजशेषेण हवींष्यभिघारयती'तिवत्, तस्मात्प्रथमावगतैकघनाकार-वाक्यार्थानुसारेण सतामसतां वा पदानां निमित्तभावव्यवस्थापनादश्रूयमाण-तथाविधैकदेशादपि वाक्यात्तदर्थावगतिसम्भवात् किं श्रुतार्थापत्त्या ? अत एव च न सोपानव्यवहितं तस्यार्थस्य शाब्दत्वम्, साक्षादेव तत्सिद्धेः । न च श्रूयमाणेषु निमित्तेषु कुतस्तदर्थमवगच्छामः, अनवगच्छन्तश्च कीदृशं नैमित्तिकमवकल्पयामः ।

उच्यते श्रुतेष्वपि पदेषु तेषां निमित्तभावो न स्वमहिम्नावकल्पते किन्तु नैमित्तिकानुसारद्वारक इत्युक्तम् । एवमश्रुतेष्वपि भविष्यति, न यजौ करण-विभक्तिं शृणुमो, न स्वर्गे कर्मविभक्तिं, नाग्निचिदादिषु क्विप्प्रत्ययं, नाधुनादिषु प्रकृतिं, न समासतद्धितेषु यथोचितां विभक्तिमपि च प्रतीम एव तदर्थम् । एवं

स्नायाः इति अत्रैकचाण्डालस्पर्शेऽपि स्नानादुभावितियस्याविवक्षा । यथा च यद्येतावुभौ व्याधितौ स्यातां तदौषधं देयमित्येकस्यापि व्याधितत्वे ओषधदानम् ।

क्वचिदन्यथा स्थितानीति । 'प्रयाजशेषेण हवींष्यभिघारयेत्' [?] इत्यत्र शेषवाचोयुक्त्यैव प्रयाजशेषस्य कर्मान्तरं प्रति गुणत्वं न सम्भवति, प्रयाजार्थत्वेन गृहीतस्याज्यस्य यच्छेषं तदपि प्रयाजार्थमेव, अतस्तस्याज्यार्थताकरणस्यासम्भवात् प्रतिपत्तिकर्मतैव न्याय्या । प्रतिपत्तिकर्मत्वे च प्रयाजशेषस्य प्रतिपाद्यमानत्वात् प्रधानत्वेन द्वितीयानिर्देश एव युक्तः । 'कृष्णविषाणाणां चात्वाले प्रास्यति' इति [?] कृष्णविषाणाया इव हविषां चाधारत्वेन सप्तमीति निर्देश एव युक्तश्चात्वाल इतिवत् । तेन प्रयाजशेषं हविःष्वभिघारयेदिति प्रतिपत्तिकर्मत्वेन वाक्यार्थानुगुण्यात् समन्वयो युक्तः । प्रतिपत्तिरेव हि तदा प्रयाजशेषस्याज्यस्य दृष्टार्था । अतः परं हि जुह्वामाज्यभागार्थमाज्यं ग्रहीतव्यम्, तत्परार्थेनाज्येनामिश्रितं कर्तव्यमवश्यं तच्छेषं परित्यक्तव्यम् । परित्याग एव च विशिष्टेन रूपेण प्रतिपत्तिः, यथेश्वरशिरोधृतस्य मालादेर्विशिष्टे प्रदेशे त्यागो न यत्र तत्र । समिदादयः पञ्चाङ्गयागाः प्रयाजाख्याः । **अत एव च न सोपानव्यवहितमिति** । श्रुतार्थापत्तिरत्र सोपानम् ।

न यजौ करणविभक्तिमिति । 'स्वर्गकामो यजेत' इत्येतावत् तावच्छ्रूयते, न तु यागः करणम्, स्वर्गः फलमिति; तथापि वाक्यार्थभूतनियोगसामर्थ्यलभ्यमेतद् उभयो रूपम् । तथाहि स्वर्गकामो यागानुष्ठाने नियुज्यते । स च तत्रान्यदिच्छत्यन्यत् करोतीति

विश्वजिदादावपि यजेतेति नैमित्तिकबलादेव स्वर्गकामादिपदार्थं प्रत्येष्यामः । नियोगगर्भत्वाच्च विनियोगस्य, लिङ्गादीनि श्रुतिकल्पनामन्तरेणापि नियोगव्यापारपरिगृहीते वस्तुनि विनियोजकतां प्रतिपत्स्यन्ते ।

नन्वेवं सति सर्वत्र शब्दव्यापारसम्भवात् ।
मुख्यस्यापि भवेत्साम्यं गौणलाक्षणिकादिभिः ॥

न्यायात् कथं प्रवर्तेत ? न च यागेऽप्रवृत्तौ नियोगः सम्पत्तिं लभत इति नियोग एव स्वसिद्धये यागस्य करणत्वं स्वर्गस्य च फलत्वं व्यवस्थापयति; सोऽयमाधिकारिक एवानयोः सम्बन्धो न श्रूयमाणविभक्तिकृत इति । **नियोगगर्भत्वाच्च विनियोगस्येति** । योऽयं विनियोगः शेषभावः श्रुत्यादिना प्रमाणेनावघातादीनां प्रतिपाद्यतेऽत्यन्तपारार्थ्यलक्षणस्तादर्थ्येनानुष्ठानपर्यन्तः स नियोगगर्भो नियोगापेक्षाकृतः, न पुनः श्रुत्यादीनामेव तथाविधे तस्मिन् सामर्थ्यम् । 'सक्तून् जुहोति' इत्यादौ होमकृतस्य सक्तुसंस्कारस्य नियोगेनानपेक्षितत्वात् सत्यपि द्वितीया श्रुतिर्न होमस्य सक्त्वर्थतामनुष्ठानपर्यन्तां दर्शयति । 'गोदोहनेन पशुकामस्य प्रणयेत्' इति प्रणयनं प्रति श्रुतापि गोदोहनस्य करणता नियोगेन तथानपेक्षणात् फलं प्रति नीयते । 'कृष्णलमवहन्ति' इत्यत्र तु प्रत्युतावघातार्थता कृष्णलस्य नियोगवशादेव । नियोगेन च स्वसाधनसंस्कारकत्वेनावघातस्यापेक्षणात् यवेष्वश्रुतोऽप्यवघातः क्रियते । अत एव द्वारतादर्थ्ये श्रुत्यादीनां व्यापारमाहुः । नियोगेन स्वसिद्ध्यर्थमाक्षिप्तानामवघातादीनां श्रुत्यादयो द्वारमुपायं प्रदर्शयन्ति, अवघातेन चेन्नियोगस्योपकर्तव्यं तत्तदीयव्रीह्युपकारद्वारेणोपकुर्विति । **नियोगव्यापारपरिगृहीते वस्तुनीति** । नियोगस्य व्यापार उपादानात्मा, तत्प्रयुक्ताक्षेपापरपर्यायग्राहकव्यापारेण परिगृहीतं सर्वं नियोगार्थत्वेन व्यवस्थापितम् । अयं भावः । अनुष्ठानसिद्ध्यर्थं वा प्रयाजादीनां प्रकरणादिभिः श्रुत्यन्तरकल्पनं तादर्थ्यसिद्धये वा ? न तावद् अनुष्ठानसिद्ध्यर्थं नियोगव्यापारपरिग्रहादेव तत्सिद्धेः । अथ तादर्थ्यसिद्धये, तदपि न, विनापि श्रुत्यन्तरकल्पनं श्रुत्यादिभिरर्थानामेव शेषशेषिभावप्रतिपादनस्य कर्तुं शक्यत्वादिति ।

गौणलाक्षणिकादिभिरिति । अभिधेयाविनाभूतः पदार्थो यदा कार्ययोगित्वेन विवक्ष्यते तदा अभिधेयाविनाभावाल्लक्षणात आगतो लाक्षणिको, यथा 'गङ्गायां घोषः प्रतिवसति' इति घोषप्रतिवसनलक्षणेन कार्येण तट एव लक्ष्यमाणः सम्बध्यते । 'सिंहो

श्रुतिलिङ्गादिमानानां विरोधो यश्च वर्ण्यते ।
पूर्वपूर्वबलीयस्त्वं तत्कथं वा भविष्यति ॥

उच्यते सत्यपि सर्वत्र शब्दव्यापारे तत्प्रकारभेदोपपत्तेरेष न दोषः । न हि पदानां सर्वात्मना निमित्तभावमपहायैव नैमित्तिकप्रतीतिरुपप्लवते । तदपरित्यागाच्च तत्स्वरूपवैचित्र्यमनुवर्त्तत एव ।

अन्यथा सिंहशब्देन मतिः केसरिणीसुते ।
अन्यथा देवदत्तादौ प्रतीतिरुपजन्यते ॥

माणवकः' इत्यादौ तु सिंहजात्याभिधेयया लक्ष्यमाणो यः शौर्यलक्षणो गुणः, स गुणोऽर्थोवच्छेदकोऽन्यस्य, अत एत्र गुणादवच्छेदकादायातो गौण इत्युच्यते । अत्र हि तेन गुणेन शौर्यलक्षणेन लक्ष्यमाणेन योऽवच्छिद्यते देवदत्तः स कार्ययोगी, न पुनर्गुणः, लक्षणायान्तु लक्ष्यमाण एव कार्ययोगीति विशेषः । अत एव यस्यासावच्छेदकत्वेन गुणो विवक्ष्यते तस्य विशेष्यस्य देवदत्तादेरवश्यं प्रयोगो गौणे; न तु लक्षणायां तटेन लक्ष्यमाणेनान्यदवच्छिद्यते, अत एव तत्रावच्छेद्यस्याप्रयोगः । यथाह "गौणे हि प्रयोगो न लक्षणायाम्" इति [?] प्रभाकरोपाध्यायः । गौणलाक्षणिकादिभिरित्यादिग्रहणं लक्षितलक्षणाद्यर्थम् । **श्रुतिलिङ्गादिमानानामिति** श्रुतिलिङ्गयोर्विरोधे यथा 'निवेशनः सङ्गमनो वसूनाम्' इति मन्त्रो लिङ्गादभिधानसामर्थ्यादिन्द्रप्रकाशनसमर्थ इति यावदिन्द्रोपस्थाने विनियुज्यते तावच्छ्रुत्या 'ऐन्द्रया गार्हपत्यमुपतिष्ठते' इति गार्हपत्ये विनियोगाल्लिङ्गं बाध्यते, क्लृप्तस्य कल्प्यमानापेक्षया बलवत्त्वात् । उपतिष्ठत इति 'उपान्मन्त्रकरणे' इति आत्मनेपदप्रयोगादभिधानं विवक्षितम्, तत्प्रत्येव मन्त्रस्य करणत्वात् । तेनोपतिष्ठेताभिदध्यात् स्तुवीतेत्यर्थः । लिङ्गवाक्ययोर्विरोधे यथा 'स्योनं ते सदनं कृणोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन् सीद अमृते प्रतितिष्ठ, व्रीहीणां मेध सुमनस्यमानः' इति मन्त्रं प्रति संशयः । किं सकलोऽयं मन्त्रः पुरोडाशार्थे बर्हिष उपस्तरणे पुरोडाशासादने च प्रयोक्तव्यः ? उत कल्पयाम्यन्तः उपस्तरणे 'तस्मिन् सीद' इत्यादिः पुरोडाशासादन इति ? सर्वेषां पदानामस्मिन् मन्त्रे साकाङ्क्षत्वादेकवाक्यत्वादुभयत्र प्रयोग इति वाक्यसामर्थ्यात् प्राप्तः, लिङ्गस्याभिधानसामर्थ्यस्य बलीयस्त्वात् कल्पयाम्यन्तस्योपस्तरणे विनियोगोऽपरस्यासादने । 'तस्मिन् सीद' इत्यादेरप्येकवाक्यत्वाद् यावदुपस्तरणप्रकाशनसामर्थ्यं कल्प्यते तावत् क्लृप्तसामर्थ्येन कल्पयाम्यन्तेनोपस्तरणस्य प्रकाशितत्वान्न कल्पनां लभते, एवं

गङ्गायां मज्जतीत्यत्र गङ्गाशब्दो निमित्तताम् ।
उपयाति यथा नैवं घोषादिवसतौ तथा ॥

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानामप्यर्थसन्निकर्षविप्रकर्षकृतोऽस्त्येव विशेष इति तत्रापि न विनियोगसाम्यम् ।

श्रुतिलिङ्गादिभिर्योऽपि कल्पयेद्विनियोजिकाम् ।
तस्यापि तस्यास्तुल्यत्वाद् बाध्यबाधकता कथम् ॥

'स्योनं ते सदनं कृणोमि' इत्यादेरप्येकवाक्यताबलाद् यावत् पुरोडाशासादनप्रकाशनसामर्थ्यं कल्प्यते तावत् 'तस्मिन् सीद' इति क्लृप्तपुरोडाशासादनप्रकाशनसामर्थ्योपहतत्वान्नैव कल्पनासम्भवः। एकवाक्यतया ह्यभिधानसामर्थ्यं यावत् कल्प्यते तावत् क्लृप्तेन बाधितत्वाद् विप्रकर्षः। वाक्यप्रकरणयोर्विरोधे यथा—'अग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽक्रात, अग्निषोमाविदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम्, इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्राताम्' इत्यादि सूक्तवाकनिगदः। तत्र पौर्णमासीदेवता अमावास्यादेवताश्च समाम्नाताः परस्परेणैकवाक्यतां नाभ्युपयन्ति। तत्र लिङ्गसामर्थ्यात् पौर्णमासीप्रयोगादिन्द्राग्नीशब्दः उत्क्रष्टव्योऽमावास्यायां च प्रयोक्तव्यः पौर्णमास्यामिन्द्राग्न्योर्देवतयोरभावात् कं प्रकाशयत्वेष शब्दस्तत्र प्रयुज्यमान इति। इतिकृत्वा तत उत्कृष्य तत्र तयोर्देवतयोरभावादसान्नाय्ययाजिनः सम्भवात् तत्रामावास्यायां प्रयोक्तव्यः। तस्य यः शेषः 'अवीवृधेतां महो ज्यायोऽक्राताम्' इति स किं यावत्कृत्वः समाम्नातस्तावत्कृत्व उभयोः पौर्णमास्यामावास्ययोः प्रयोक्तव्यः प्रकरणस्य बलवत्त्वात्, अथ येनेन्द्राग्नीशब्देन सहैकवाक्यतां प्राप्तो यत्रासौ तत्रैव प्रयोक्तव्यो वाक्यस्य बलीयस्त्वादिति ? तत्र प्रकरणवशाद् यावत् सर्वैः सहैकवाक्यता कल्प्यते तावदिन्द्राग्नीशब्देन क्लृप्तयैकवाक्यतया प्रकरणं बाध्यत इति विप्रकर्षः। क्रमप्रकरणयोर्विरोधे यथा, राजसूयप्रकरणेऽभिषेचनीयस्य क्रमे शौनःशेपाद्युपाख्यानमाम्नातम्, तत्किं प्रकरणवशात् सर्वार्थमाहोस्वित् क्रमाम्नानादभिषेचनीयार्थमिति ? तत्र क्रमाम्नातेन यावत् सन्निधानबलोद्भूताकाङ्क्षाकृतैकवाक्यताऽभिषेचनीयेन सहास्य कल्प्यतेऽभिषेचनीयस्य पृथक्प्रयोजकशक्तिबललब्धप्रकरणभावकल्पनया तावत् क्लृप्तयैवाधिकारविधेः प्रकरणशक्त्यैकवाक्यतेति विप्रकर्षः। क्रमसमाख्ययोर्विरोधे यथा पौरोडाशिकमिति समाम्नाते काण्डे सान्नाय्यक्रमे 'शुन्धध्वं दैव्याय कर्मणे' इति शुन्धनार्थो मन्त्रश्चाम्नातः। स किं समाख्या-

अथ तत्कल्पने तेषां विदूरान्तिकवृत्तिता ।
स एवार्थगतो न्याय इति तत्कल्पनेन किम् ।।

ऐन्द्राग्न्यादिषु वैकृतेषु कर्मसु न प्राकृतविध्यन्तवचनानुमानम्, अपि तु चोदकव्यापारेण तस्यैव प्राप्तिः, वैकृतस्य विधेः काचिदाकाङ्क्षा चोदक इत्युच्यते ।

नन्वेवमुभयत्र तदवगमाविशेषादुपदेशातिदेशयोः को विशेषः ? न नियोगावगमे कश्चिद्विशेषः, किन्तूपदेशे, यथोपदेशं कार्यमतिदेशे तु यथाकार्यमुपदेश इत्येव तयोर्विशेषः ।

सामर्थ्यात् पुरोडाशपात्राणां शुन्धने विनियोक्तव्योऽथ सान्नाय्यपात्राणां सन्निधेरिति ? तत्र यावत् पौरोडाशिकमिति समाख्याबलात् पुरोडाशसन्निधिं धर्माणां कल्पयित्वा पुरोडाशार्थत्वं प्रतिपाद्यते तावत् क्लृप्तसान्नाय्यसन्निधानबलेनैव सान्नाय्यार्थत्वस्य प्राप्तत्वान्न समाख्यया सन्निधिकल्पनाद्वारेण पुरोडाशार्थत्वकल्पनमिति विप्रकर्षः । सान्नाय्ये दधिपयसी ।

अथ तत्कल्पने तेषां विदूरान्तिकवृत्तितेति । लिङ्गं हि साक्षादेव श्रुतिं कल्पयति, वाक्यं पुनर्लिङ्गमभिधानसामर्थ्यमकल्पयित्वा न श्रुतिकल्पनायां प्रभवतीति दूरान्तिकवृत्तिता; एतच्च प्राक् स्पष्टीकृतमेव ।

वैकृतस्य विधेः काचिदाकाङ्क्षेति । 'प्राकृतविधिना दृष्टादृष्टसाधनोपकारवता सम्पन्नम्, अहमपि च विधिः, मयापि च तथाविधसाधनोपकारवता सम्पत्तव्यम्' इति याकाङ्क्षा सा चोदको धर्माक्षेपकः पदार्थः ।

यथोपदेशं कार्यमिति । अस्यार्थः किं धर्मा यथोपदेशं ये यत्सम्बन्धेन श्रुत्यादिभिः प्रमाणैरुपदिष्टास्ते तैः सम्बन्धमनुभूय पश्चात् कार्येण नियोगेन सम्बध्यन्ते आहोस्विद् यथाकार्यमुपदेशः प्रथमं कार्येण नियोगेन सम्बध्य पश्चाच्छ्रुत्यादिकृतस्तेषां परस्परसम्बन्ध इति । अनेन च किं यजिप्रयुक्ता धर्मा उतापूर्वप्रयुक्ता इति भाष्यकृता यः संशयः सप्तमाद्ये कृतः स व्याख्यातः । तत्र यदि यथोपदेशं कार्यमिति पक्षस्तदा प्रथ तावद् यजिना सर्वे धर्माः सम्बन्ध्यन्ते तत्सम्बन्धविधानार्थं च यजिरुद्देश्यो यजित्वमात्रेण, न तु विशिष्टनियोगसाधनत्वविशिष्टः, परार्थस्य सतः प्राधान्येनोद्देष्टुमशक्यत्वाद् विशिष्टानुवादे वाक्यभेदप्रसङ्गाच्च । तस्माद् यथोद्देशस्य ग्रहादेरेकत्वस्या-

ननु यथाकार्यमुपदेशेऽनुपयुज्यमानकृष्णलचर्ववघातादेः प्राप्तिरेव न भवेदिति को बाधार्थः ? न अखण्डमण्डलविघ्यन्तकाण्डप्राप्तेः, न ह्यंशांशिकया चोदकः प्रवर्त्तते, इत्यलमनया प्रसक्तानुप्रसक्त्यागतशास्त्रान्तरगर्भकथाविस्तरप्रस्तावनया ।

इति प्रसङ्गाद् व्याख्यातं लेशतो वाक्यविन्मतम् ।
एतस्य युक्तायुक्तत्वपरिच्छेदे तु केवलम् ॥
श्रुतार्थापत्तिरस्माकं दूषणीयतया स्थिता ।
तद्दूषणश्च पूर्वोक्तवीथ्यानेन पथास्तु वा ॥

विवक्षा प्राग्वद् विशेषश्चोद्देश्यत्वादेवोभयपदविशेष्यत्वाभात्रः । तथा च निर्विशेषणं यजिमात्रमुद्दिश्य प्रयाजादिधर्मविधानम् । तच्च यजिमात्रं प्राकृतवैकृतेषु सर्वयागेषु समानमिति सर्व(मातृकात्र खण्डिता)व्येत्यतिदेशककल्पनया विकृतिषु धर्मप्राप्तिश्चिन्तनीया । अतश्च नारब्धव्य उत्तरः षट्कः । अथ नु····न तदा प्रतिकरणमपूर्वशब्दाभिधेयानां कार्याणां नियोगानां भेदाद् ये धर्मा येन कार्येण··शब्दान्तरादिप्रमाणवशासादितभेदत्वेन भिन्नत्वात् । अतश्च दर्शपूर्णमासकार्यसम्बन्धित्वेन ते व्यः उत्तरः षट्कः अतिदेशतश्च प्राप्तौ । उक्तम् 'प्रकृतिवद् विकृतिः कर्तव्या' इति । तत्र यजौ श्रूयन्ते त्वाच्चापूर्वस्य तेनैव प्रथमं धर्माणां सम्बन्धः स एवात्मानं साधिकारं साधयितुं करणमि····त्यादिकृतः पश्चात् परस्परसम्बन्ध इति किं यथोपदेशं कार्यमथ यथाकार्यमुपदेश इति···शयः । यथाकार्यमुपदेशे हि व्यवस्था धर्माणां तत्र यत्र न विहितास्तत्र कार्योपकाराकाङ्क्षा·· इति चोदकस्तं पदार्थमसावाक्षेप्तुमर्हति येन कार्यस्योपकारः कश्चित् कर्तुं शक्यते न च····लकृतेनावघातेन कश्चिदुपकारो जनयितुं शक्यते प्रकृताविव दृष्टस्य तुषकणविमो ····णाः कृष्णलास्तेषामवघातेन किमिव क्रियेत ? अतः प्राप्त्यभावादेव कृष्णलेष्वर्थलोपादक(रणम् ?)··भावे कीदृशी बाधना ।

अखण्डमण्डलविघ्यन्तकाण्डप्राप्तेर्न ह्यंशांशिकया चोदकः प्रवर्तत इति । न····[अ]खण्डमण्डलविध्यन्तकाण्डप्राप्तेरिति तत्र ग्रन्थकृता तावदनेनैवाभिप्रायेणातिप्रसङ्गमाशङ्क्य **अलमनये**त्यादिनोपसंहृतम् । इदं त्वत्रोत्तरम्, प्रकृतौ विधिर्दृष्टादृष्टोपकारवत्साधनसिद्ध्या सम्पन्नस्तत्रायमपि वैकृतो विधिरुपकारमेवापेक्षते न तु तज्जनकान्

ध्वनिकारसम्मतध्वनितस्यार्थत्वनिरासः

एतेन शब्दसामर्थ्यमहिम्ना सोऽपि वारितः ।
यमन्यः पण्डितम्मन्यः प्रपेदे कञ्चन ध्वनिम् ॥
विधेर्निषेधावगतिर्विधिबुद्धिर्निषेधतः ।

यथा

भम धम्मिअ वीसत्थो पान्थ मा मे गृहं विश ॥

पदार्थान्, प्राकृतस्य विधेरुपकारापेक्षित्वदर्शनात् । स च प्राकृत उपकारोऽपेक्षासमये विभागेनापेक्षितुं न शक्यते । उपकारजनका हि विभक्ताः, न तु तैर्जन्यते यो महोपकारः । अतस्तेन महोपकारेणाविभक्तेन कथं विभागेन पदार्था आक्षेप्तुं पार्यन्ते ? यथा वनशब्दादविभागेन वृक्षाणां प्रतीतौ न धवानर्थिना तत्प्रतीतिसमये धवत्यागः शक्यक्रियः, एवमविभक्तोपकारापेक्षातो धर्माणामाक्षेपे नानुपयुक्तानां परित्यागः शक्यक्रिय इति । इममेव चार्थं हृदि विनिवेश्याह **न ह्यंशांशिकया चोदकः प्रवर्तत** इति ।

एतेन पण्डितम्मन्य इति **आनन्दवर्धनाचार्यं ध्वनिकारं** परामृशति । स हि यस्मिन् काव्यप्रभेदे वाच्यवाचकौ प्रकरणादिसहायौ वाच्यदशोत्तीर्णस्य प्रतीयमानस्य प्राधान्येन स्थितस्य व्यञ्जकतां प्रतिपद्येते तं काव्यप्रभेदं ध्वनिमाह । यथा च व्याकरणमूलत्वात् सर्वविद्यानां प्रथमैर्विद्वद्भिर्वैयाकरणैः श्रूयमाणेषु वर्णेषु स्फोटाभिव्यञ्जकत्वात् ध्वनिशब्दः प्रयुक्तस्तयामुनापि तादृशे प्रभेदे व्यञ्जकत्वसामान्याद् ध्वनिशब्द एव प्रयुक्तः । आह च ।

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः" ॥ इति ॥

अस्योदाहरणं – **भम धम्मिअ** इत्यादि ।

भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ तेण ।
गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण ॥

भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन ।
गोलानदीकच्छलताकुञ्जवासिना दृप्तसिंहेन ॥

कच्छः कूलभागः । कुडङ्गं लतागहनम् । अत्र च यद्यपि कदाचिदविनयवत्या चौर्यसुरतक्रीडासु प्रच्छायतया सर्वस्वभूतानि गोदावरीकूलवर्तीनि लतागेहानि प्रत्यहं पुष्पावचयार्थमागतेन धार्मिकेण चोर्यमाणसौभाग्यानि रक्षन्त्या वैदग्ध्याद् भयोपन्यासपूर्वं तत्र तस्य भ्रमणपरिहारायैवमुक्तम्, तथाप्यञ्जसा प्रव्रजितस्य शुनो भयमाशङ्कमानस्य सिंहेन तस्य व्यापादनमुपन्यस्य भयनिवृत्तिं कृत्वा भ्रमणं विधीयत इति विधेर्वाच्यता । अथ च विधिरूपवाच्यार्थोत्थापनाङ्गभूतेन दृप्तसिंहकर्तृकश्वव्यापादनलक्षणेन वाच्येनार्थात्मना वाक्येनैवमर्थाभिधानव्यवधानेन व्यञ्जकेनामुना सम्भूय द्वाभ्यां प्रकरणाभिधातृप्रतिपत्तिविशेषपर्यालोचनसहायाभ्यां 'तत्र मा भ्रमीः' इति निषेधावगतिः क्रियते, विधिनिषेधयोश्च युगपद् वाच्यदशोपारोहासम्भवादेकस्य वाच्यत्वमपरस्य प्रतीयमानत्वम् । अत्र च यद्यपि स्वत एव भ्रमणप्रवृत्तेरप्रवृत्तप्रवर्तनात्मकविध्यर्थाभावान्न मुख्यं विधित्वं तथापि स्वरससिद्धाया अपि भ्रमेः श्वभयान्निवृत्तायास्तन्निवारणेन यः प्रतिप्रसवः स एव विधिशब्देन निर्दिष्टः ।

'तरुण्येकाहमेवास्मि सार्धं दृक्छुतिहीनया । श्वश्वा चिरगतो भर्ता' इत्येवंप्रायश्लोकैकदेशोऽयं **'पान्थ ! मा मे गृहं विश'** इति । एतद् **एतेने**त्यादिना निराकुरुते । अयमाशयः । वेदे शब्दनिबन्धनत्वादर्थव्यवस्थायास्तत्र यथाशब्दमर्थव्यवस्थाऽस्तु, लोके पुनर्ज्ञातमर्थं परं प्रतिपादयितुं शब्दान् प्रयुञ्जते ज्ञानञ्च प्रमाणान्तरात् । तत् शब्दप्रतिपादितं वस्तु यदि प्रमाणान्तरेण न विरुध्यते तद्यथावगतमेव ग्राह्यम्, विरोधे तु न, यथा अविरोधो भवति तथा तस्यार्थो व्यवस्थाप्यः । तथाहि यथा "गङ्गायां घोषः" इति लक्षणायां स्रोतोरूपस्यार्थस्याधारत्वानुपलम्भात् प्रमाणान्तरानुगुण्येन तटप्रतिपादन एव पर्यवस्यति शब्दव्यापारः, यथा च गौणे 'सिंहो माणवकः' इत्यादौ द्वयोरपरजात्योर्विरुद्धयोरेकत्र समावेशासम्भवाद् गुणविशेष एव शौर्यलक्षणे प्रतिपादनशक्तिः सिंहशब्दस्य, एवमत्र यद्यपि विधावभिधानशक्तिः पर्यवसिता तथापि तात्पर्यशक्तेरपर्यवसानाद् विधौ च पदार्थानन्वयाद् मा भ्रमीरिति निषेध एव झगिति वाक्यार्थतयावभासते । ततोऽत्र यद्यपि श्वव्यापादनोपन्यासेन भयनिवृत्तिं कृत्वा भ्रमणमेव विधीयते तथापि दृप्तपदविशेषितसिंहपदार्थपर्यालोचनायां सदर्पपञ्चाननबाधिताध्वप्रतिपादनेन सुतरां भयहेतूपन्यासाद् विरुद्धकारणोपलम्भाद् भ्रमणविधिर्न वाक्यार्थतामुपगन्तुमलम्, प्रत्युत तन्निषेधस्यैवोद्भूतनिमित्तत्वमिति तस्यैव वाक्यार्थतोपारोहः । यद्यपि साक्षाल्लोटा प्रतिपाद्यमानो विधिः श्रूयते

मानान्तरपरिच्छेद्यवस्तुरूपोपदेशिनाम् ।
शब्दानामेव सामर्थ्यं तत्र तत्र तथा तथा ॥
अथ वा नेदृशी चर्चा कविभिः सह शोभते ।
विद्वांसोऽपि विमुह्यन्ति वाक्यार्थगहनेऽध्वनि ॥

तथाप्यनन्वयबलाद् भ्रमेत्यनेन विपरीतलक्षणया भ्रमणनिषेध एव प्रतिपाद्यते । दृश्यते च विपरीतलक्षणयापि व्यवहारः । तथाहि चन्द्रदर्शस्वभावाममावास्यां दर्शशब्देन विपरीतलक्षणया प्रतिपादयन्ति । अपि च, अस्ति तावदेवंप्रायाद् वाक्यादित्थम्भूतनैमित्तिकावगतिः अस्याश्चावगतौ यथा निमित्तानां निमित्तत्वमवकल्प्यते तथा कल्प्यमिति । एतदेव चेतसि निधाय 'एतेन पण्डितम्मन्यः' इत्यत्र 'एतेन' इति सर्वनाम प्रयुक्तम् । युक्तञ्च प्रतीयमानार्थप्रतिपत्तेः शाब्दत्वमेव, अन्यथेदृशमर्थमवगम्य प्रतिपत्तुः 'उत्प्रेक्षितो मयायमर्थो न तु शब्दात् प्रतिपन्नः' इति प्रतीतिः स्यात्, अस्ति च शाब्दत्वेन प्रतीतिः, अतः शाब्द एवायम् । यस्य तु यथाश्रुतग्राहिणो विधिमात्रप्रतीत्यैव संतोषः सोऽनवधारितवाक्यार्थ एव । यदाहुः 'गन्तव्यं दृश्यतां सूर्यः' इत्युक्ते बहिर्निःसृत्य प्रविश्य यो ब्रूयाद् 'दृष्टः सूर्यो निर्मलः प्रकीर्णरश्मिः' इति, न तेन यथोक्तं कृतमित्युच्यते, कालविशेषोपलिप्सानिबन्धनत्वाद् वाक्यस्येति । तथा

काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽस्य चोदितः ।
उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति ॥

एवञ्चैवमादौ सर्वत्र नैमित्तिकावगतिपूर्वकत्वेन निमित्तानां निमित्तत्वव्यवस्थापनान्न निमित्तस्वरूपमात्राश्रयणेन व्यवहारः प्रवर्तनीयः । आह च

स्तुतिनिन्दाप्रधानेषु वाक्येष्वर्थो न तादृशः ।
पदानां प्रविभागेन यादृशः परिकल्प्यते ॥

तदित्थंस्थिते न्यायस्य समानत्वाद् यथा 'रसायनोपयोगादमृतो जायते' 'दध्युपयोगात् पृथिव्यां निमज्जति' इत्यत्र 'दीप्ताग्निर्मन्दाग्निश्च भवति' इत्ययमर्थस्तात्पर्यशक्त्या वाक्यार्थस्तथा सर्वत्र व्यङ्ग्याभिमतोऽर्थात्मा वाक्यतात्पर्यशक्तिक्रोडीकृतत्वाद् वाक्यार्थ एव । 'पान्थ मा मे गृहं विश' इत्यत्र निषेधं प्रति कारणोपन्यासो यः कृतः स विरुद्धत्वात् विधिमेव पर्यवस्थापयतीति विधिरेव वाक्यार्थ इत्यलमतिप्रसङ्गेन । **तत्र तत्र** लक्षणादौ । **तथा तथा** तेनैव प्रकारेण लक्षणाद्यात्मकव्यापारसमाश्रयेण ।

तदलमनया गोष्ठ्या विद्वज्जनोचितया चिरम् ।
परमगहनस्तर्कज्ञानामभूमिरयं नयः ।
प्रकृतमधुना तस्माद् ब्रूमो न भात्यनुमानत-
स्तनुरपि सतामर्थापत्तेर्विशेष इति स्थितम् ।।

अभावस्य प्रमाणान्तरत्वम्

आह अभावस्तर्हि प्रमाणान्तरमस्तु ।

सत्परिच्छेदकं यत्र न प्रमाणं प्रवर्त्तते ।
तदभावमितौ मानं प्रमाणाभाव उच्यते ।।

'इह घटो नास्ती'ति घटं प्रति सदुपलम्भकप्रमाणप्रवृत्तिर्नास्तीति, असौ प्रमाणाभावो घटाभावं परिच्छिनत्ति । तत्र च घटविषयज्ञातृव्यापारानुत्पाद एव दृश्यादर्शनशब्दवाच्यः प्रमाणम्, नास्तीति बुद्धिः फलम् ।

अथ वा घटाभावग्राही ग्रहीतृव्यापारः सदुपलम्भकप्रमाणाभावजनितो नास्तीति प्रत्ययस्वभावः प्रमाणम्, फलन्तु हानादिज्ञानं भविष्यति तदुक्तम् ।

प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
सात्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि ।। इति ।

अन्यवस्तुशब्देन घटाभाव उक्तः । तत्र तावदिदं नास्तीति ज्ञानं न प्रत्यक्षजनितमिन्द्रियार्थसन्निकर्षाभावात् । सन्निकर्षो हि संयोगसमवायस्वभावः तत्प्रभावभेदो वा । संयुक्तसमवायादिरिह नास्त्येव । संयुक्तविशेषणभावोऽपि न सम्भवति कुम्भाभावस्य भूप्रदेशविशेषणत्वाभावात् । न ह्यसंयुक्तमसमवेतं वा किञ्चिद्विशेषणं भवति, संयुक्तस्य दण्डादेः समवेतस्य शुक्लगुणादेस्तथाभावदर्शनाद् । अभावश्च न केनचित्संयुज्यते अद्रव्यभावात्, न क्वचित्ससमवैति गुणादिवैलक्षण्यादिति । यदि च संयुक्तविशेषणभावसन्निकर्षोपकृतं चक्षुरभावं गृह्णाति

दृश्यादर्शनशब्दवाच्य इति । दृश्यस्य दर्शनयोग्यस्य यददर्शनं तच्छब्दाभिलप्यः

सात्मनोऽपरिणामो वेति । घटज्ञातृतालक्षणावस्थानाविर्भावोऽत्रापरिणामो विवक्षितः ।

तर्हि तदविशेषात्संयुक्तद्रव्यवर्तीन् रसादीनपि गृह्णीयात्, तदभावमपि मा ग्रहीद-योग्यत्वाविशेषात् । योग्यायोग्यत्वकृतग्रहणाग्रहणनियमवादे वा योग्यतैव सन्निकर्षो भवति, किं षट्कघोषणेन ? तस्मान्न घटाभावज्ञानं चाक्षुषम् ।

ननु भूप्रदेशाञ्च घटाभावञ्च विस्फारिते चक्षुषि निरीक्षामहे । निमीलिते तु तस्मिंस्तयोरन्यतरमपि न पश्यामः । तत्र समाने च तद्भावभावित्वे भूप्रदेशज्ञानं चाक्षुषम्, अभावज्ञानन्तु न चाक्षुषमिति कुतो विशेषमवगच्छामः ? बाढम्, अव-गच्छामः, सन्निकर्षाभावादेव। न ह्यसन्निकृष्टं चक्षुरवगतिजन्मने प्रभवति। तद्भाव-भावित्वं त्विदमन्यथासिद्धम्, विदूरदेशे व्यवस्थितस्थूलज्वालावलीजटिलज्वलनगत-भास्वररूपोपलम्भानुवर्त्तितद्गतोष्णस्पर्शज्ञानवत् । तत्र यथा रूपानुमीयमानस्पर्श-वेदने नयनान्वयव्यतिरेकान्वयविधानमन्यथासिद्धम्, एवमिहापि भूप्रदेशोपलम्भा-विनाभाविनि कुम्भाभावग्रहणे तत्कृतमिन्द्रियान्वयव्यतिरेकान्वयविधानमिति न चाक्षुषो घटाभावप्रतिभासः । तदुक्तम्

गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥ इति ।

अतश्चैवमसन्निहितस्यापि क्वचिद् ग्रहणदर्शनात्, स्वरूपमात्रकेण गौर-मूलकमुपलब्धवतस्ततो देशान्तरं गतस्य तत्र केनचिद् गर्गोऽस्ति वा नास्ति वेति पृष्टस्य सतः स्वरूपमात्रं गृहीतं गौरमूलकमनुस्मरतः तदानीमसन्निकृष्टेऽपि गर्गस्याभावे तदैव तस्य ज्ञानमुदेति, तत्रेन्द्रियकथापि नास्ति इति न तस्य प्रत्यक्ष-त्वम्, चानुमानगम्योऽयमभावः । भूप्रदेशस्य तद्गतघटादर्शनस्य वा लिङ्गत्वानुप-पत्ते र्न भूप्रदेशो लिङ्गम्, अगृहीतसम्बन्धस्यापि तत्प्रतीतेः, अनैकान्तिकत्वाद् अपक्षधर्मत्वात्, तदधिकरणभावानन्त्येन सम्बन्धग्रहणासम्भवाच्च । नापि घटा-दर्शनं लिङ्गम्, अपक्षधर्मत्वाद्, घटादर्शनं घटस्य धर्मो न तदभावस्य । घटाभाव-

---

गृहीत्वा वस्तुसद्भावम् । वस्तुनः शुद्धस्य भूतलस्य सत्ताम् । **स्मृत्वा च प्रति-योगिनं** घटम् । निमीलिताक्षस्यापि भावात् सतोऽप्यक्षस्यानपेक्षणम् ।

गौरमूलकमुपलब्धवत इति । गौरमूलकाख्यो ग्रन्थकृदभिजनग्रामः । **अनैकान्ति-कत्वात्** सत्यपि घटे भूतलस्योपलम्भात् ।

प्रतीतिं प्रति व्याप्रियमाणत्वात्तद्धर्मत्वमस्येति चेत् न, इतरेतराश्रयप्रसङ्गात्। तद्धर्मत्वे सति लिङ्गप्रतीतिजनकत्वम्, प्रतीतिजन्मनि सति तद्धर्मताज्ञानमदर्शनस्य दुर्घटमेव। सिद्धायान्तु किं पक्षधर्मताज्ञानेन, साध्यप्रतीतेः सिद्धत्वात्।

अपि चेदमदर्शनाख्यं लिङ्गमविदितव्याप्ति कथमभावस्यानुमापकं भवेत्? व्याप्तिग्रहणञ्च धूमाग्निवदुभयधर्मिग्रहणपूर्वकम्। तत्र व्याप्तिग्रहणवेलायामेव तावत् कुतस्त्यमभावाख्यधर्मिग्रहणमिति चिन्त्यम्। तत एवानुमानादिति यद्युच्यते तदितरेतराश्रयम्। अनुमानान्तरनिबन्धने तु तद्ग्रहणेऽनवस्था अदर्शनाख्यलिङ्गमपि दर्शनाभावस्वभावमिति तत्स्वरूपपरिच्छेदचिन्तायामपि अयमेव पन्थाः। अतो दूरमपि गत्वा तदवगमसिद्धये प्रमाणान्तरमभावपरिच्छेदनिपुणमवगन्तव्यमिति, तत एव तदवगमसिद्धेर्न तस्यानुमेयत्वम्। न चेदमिह घटो नास्तीति ज्ञानं शब्दोपमानार्थापत्त्यन्यतमनिमित्तमाशङ्कितुमपि युक्तमिति, सदुपलम्भकप्रमाणातीतत्वादभावस्यैव भूमिरभाव इति युक्तम्,

अपि च प्रमेयमनुरूपेण प्रमाणेन प्रमातुमुचितम्।

भावात्मके प्रमेये हि नाभावस्य प्रमाणता।
अभावेऽपि प्रमेये स्यान्न भावस्य प्रमाणता॥
न प्रमेयमभावाख्यं निह्नुतं बोधयत्त्वया।
प्रमाणमपि तेनेदमभावात्मकमिष्यताम्॥

अभावस्य प्रमाणान्तरतानिरासः

अत्राभिधीयते, सत्यम् अभावः प्रमेयमभ्युपगम्यते, प्रत्यक्षाद्यवसीयमानस्वरूपत्वान् न प्रमाणान्तरमात्मपरिच्छित्तये मृगयते।

अदूरमेदिनीदेशवर्तिनस्तस्य चक्षुषः।
परिच्छेदः परोक्षस्य क्वचिन्मानान्तरैरपि॥

अनुमानान्तरनिबन्धने तु तद्ग्रहणेऽनवस्थेति। येनापि हि लिङ्गेन घटाभावं गृहीत्वा तस्य घटाभावस्य घटादर्शनेन सह सम्बन्धो गृह्यते, तेनापि घटाभावेन सह गृहीतसम्बन्धेनैव सता घटाभावः प्रतिपाद्यः, अतस्तस्याप्यनुमानान्तरगृहीतेनाभावेन सह सम्बन्धो ग्राह्यः, तस्याप्यनुमानान्तरगृहीतेनेत्यनवस्था।

तथा 'चेह घटो नास्ती'ति ज्ञानमेकमेवेदम्, 'इह कुण्डे दधी'ति ज्ञानवद् उभयालम्बनमनुपरतनयनव्यापारस्य भवति। तत्र भूप्रदेशमात्र एव नयनजं ज्ञानमितरत्र प्रमाणान्तरजनितमिति कुतस्त्योऽयं विभागः ? अत्राग्निरिति युक्तोऽयमनक्षजः प्रतिभासः, धूमग्रहणानन्तरमविनाभावस्मरणादिबुद्ध्यन्तरव्यवधानसम्भवात्। इह तु तथा नास्त्येव, अव्यवहितैव हि भूप्रदेशवद् घटनास्तितावगतिरविच्छेदेनानुभूयते। न च क्षितिधराधिकरणपरोक्षाशुशुक्षणिवदनीक्षणविषयता भवति, भावस्य तद्व्यापारान्वयव्यतिरेकानुविधानात्तत्प्रतीतेः। तत्र हि व्यापृताक्षोऽपि न पर्वतवर्त्तिनमनलमवलोकयितुमुत्सहते। इह तु घटाभावमपरिम्लाननयनव्यापार एव पश्यतीति चाक्षुषमभावज्ञानम्, तद्भावभावित्वविधानात्। न च दूरव्यवस्थितहुतवहरूपदर्शनपूर्वकस्पर्शानुमानवदिदमन्यथासिद्धं तद्भावभावित्वम्। तत्र हि बहुशः स्पर्शदर्शनकौशलशून्यत्वमवधारितं चक्षुषः, स्पर्शपरिच्छेदि च करणान्तरं त्वगिन्द्रियमवगतम्। अविनाभाविता च पुरा तथाविधयो रूपस्पर्शयोरुपलब्धेत्यनुमेय एवासौ स्पर्श इति युक्तं तत्रान्यथासिद्धत्वं चक्षुर्व्यापारस्य। प्रकृते तु नेदृशः प्रकारः समस्ति। न चैकत्र तद्भावभावित्वमन्यथासिद्धमिति सर्वत्र तथा कल्प्यते। एवं हि रूपमपि चाक्षुषतामवजह्यात्।

ननु नीरूपस्यासम्बद्धस्य च चाक्षुषत्वमभावस्य कथमभिधीयते ? चक्षुर्जनितज्ञानविषयत्वाच्चाक्षुषत्वम्, न रूपवत्त्वेन, रूपवतामपि परमाणूनामचाक्षुषत्वात्। सम्बद्धमपि न सर्वं चाक्षुषमाकाशस्य तथात्वेऽपि तदभावात्।

नन्वसम्बद्धस्य चक्षुषा ग्रहणे दूरव्यवहितस्य विभीषणादेरपि चाक्षुषत्वप्रसङ्गः ? उच्यते, भावे खल्वयं नियमो यदसम्बद्धस्य चक्षुषा अग्रहणम्। अभावस्त्वसम्बद्धोऽपि चक्षुषा ग्रहीष्यते। षट्प्रकारसन्निकर्षवर्णनमपि भावाभिप्रायमेव। सम्बद्धं हि यद् गृह्यते तत् षण्णां सन्निकर्षाणामन्यतमेन सन्निकर्षेणेति। प्राप्यकारित्वमपि इन्द्रियाणां वस्त्वभिप्रायमेवोच्यते। तस्मादवस्तुत्वादभावस्य तेन सन्निकर्षमलभमानमपि नयनमुपजनयति तद्विषयमवगममिति न दोषः। न चासम्बद्धत्वाविशेषाद् देशान्तरादिषु सर्वाभावग्रहणमाशङ्कनीयम्, आश्रयग्रहणसापेक्षत्वादभावप्रतीतेः।

सम्बद्धमपि न सर्वं चाक्षुषमिति । चक्षूरश्मीनां मूर्तत्वादवश्यंभाव्याकाशेन संयोगः, सर्वमूर्तद्रव्यसंयोगित्वात् तस्य ।

आश्रयस्य च सन्निहितस्यैव प्रत्यक्षत्वात् । अथवा संयुक्तविशेषणभावाख्यसन्निकर्षोपकृतं चक्षुरभावं ग्रहीष्यति, यथा समवायप्रत्यक्षत्ववादिनां पक्षे समवायमिति ।

ननु तदिदमसिद्धमसिद्धस्य दृष्टान्तीक्रियते । मैवम्, भवतापि द्रव्यगुणयोर्वृत्तेरपरिहार्यत्वात् । भेदबुद्ध्या सिद्धभेदयोरसम्बद्धयोश्च द्रव्यगुणयोरदर्शनादवश्यं काचिद् वृत्तिरेषितव्येत्यलमर्थान्तरचिन्तनेन ।

यत्तूक्तं संयोगसमवाययोरभावादभावो न भूप्रदेशस्य विशेषणमिति, तदप्यसाधु । संयोगसमवायाभ्यामन्यस्यैव विशेषणविशेष्यभावनाम्नः सम्बन्धस्यादूर एव प्रतीतिबलेन दर्शयिष्यमाणत्वात् ।

यस्तु संयुक्तविशेषणभावे सन्निकर्षे रसादिभिरतिप्रसङ्ग उद्भावितः सोऽयं संयुक्तसमवायाख्ये चक्षूरूपसन्निकर्षेऽपि समानो दोषः । संयुक्तसमवायोऽपि तर्हि मा भूत् सन्निकर्षः ? किं नश्छिन्नम् । तत्किमसम्बद्धमेव रूपं गृह्णातु चक्षुः ? न हि संयुक्तसमवायादन्यश्चक्षूरूपयोः सम्बन्धः ।

नन्वर्थग्रहणात्मको व्यापार एव चक्षुषः सन्निकर्षो योग्यता वा, तद्वशादेव रूपस्य तद्ग्राहकत्वमुपेयते न संयुक्तसमवायादिनेति । स तर्हि व्यापारः, सा वा योग्यता, कथमभावमपि प्रति तस्य न स्यात् ? प्राप्यकारीणि चेन्द्रियाणि कारकत्वादिष्यन्ते सन्निकर्षश्च निह्नुयते इति विप्रतिषिद्धम् । तस्मात् षट्प्रकारा सन्निकर्षानुगामिनी योग्यता वक्तव्या, न योग्यतामात्र एव विश्रम्य स्थातव्यम् । यत्र योग्यता तत्र सन्निकर्षोऽप्यस्ति, न तु यत्र सन्निकर्षस्तत्रावश्यं योग्यतेति । एवमभ्युप-

---

तदिदमसिद्धमिति । मीमांसकानां हि समवायोऽसिद्धः, स कथं तेषां दृष्टान्तीभवेत् । तथाहि त आहुः

न चाप्ययुतसिद्धानां सम्बन्धित्वेन कल्पना ।
नानिष्पन्नस्य सम्बन्धो निष्पत्तौ युतसिद्धता ॥ इत्यादि ।

चक्षूरूपसन्निकर्षेऽपि समानो दोषः । रसेनापि सह चक्षुषः संयुक्तसमवायसम्भवात् ।

योग्यता वेति । नियतार्थविज्ञानहेतुरतीन्द्रियो नियतविज्ञानात्मककार्यानुमेयो योग्यतात्मकः सम्बन्धः ।

गच्छतां न रसाद्यतिप्रसङ्गचोदना धुनोति । मनोरसादेः सत्यपि सन्निकर्षे योग्यत्वाभावादग्रहणम् ।

योग्यतामात्रवादेऽपि नाभावस्यास्त्ययोग्यता ।
भवद्भिर्वस्तुधर्मोऽस्य को वा नाभ्युपगम्यते ॥
सर्वोपाख्यावियुक्तत्वान्नास्त्येवेत्येष वोच्यताम् ।
अभावश्चाक्षुषज्ञानविषयो वाऽभ्युपेयताम् ॥

यदपि स्वरूपमात्रं दृष्टञ्च पश्चात् किञ्चित्स्मरन्नपि ।
तत्रान्यनास्तितां पृष्टस्तदैव प्रतिपद्यते ॥

इत्युक्तं तदपि न युक्तम् । वस्त्वन्तरविविक्तगौरमूलकस्वरूपग्रहणसमय एव तत्रासन्निहितसकलपदार्थाभावग्रहणस्य मेचकबुद्धया सिद्धत्वाद् इदानीं तद्गतगर्गाभावस्मरणं न तस्य परोक्षस्यानुभवः । तथा हि तदानीं गर्गस्तत्र नासीदित्येवमसौ स्मृत्वा सत्यवादी स्मरति, इदानीं त्वस्तित्वनास्तित्वे प्रति संशेते एवासौ, गर्गस्य कुतश्चिदागतस्येदानीं तत्रास्तित्वसम्भवात् ।

ननु न पूर्वं सर्वाभावग्रहणमनुभूतवानसौ गौरमूलके, अननुभूयमानमपि तदस्य बलात्कल्प्यते, अभ्यस्तविषयेऽविनाभावस्मरणवत् । तथा हि तेन तेनानुयुक्तस्तस्य तस्याभावं स्मृत्वोत्तरमसौ सर्वेभ्य आचष्टे ।

ननु मेचकबुद्धया सकलाभावग्रहणे सहसैव सकलाभावस्मृतिरुपजायेत ? मैवम्, यत्रैव प्रश्नादिस्मरणकारणमस्य भवति तदेव स्मरति न सर्वमविद्यमानस्मरणनिमित्तम् । अन्यत्र तु युगपदुपलब्धेष्वपि वर्णेषु युगपदन्त्यवर्णानुभवसमनन्तरं स्मरणम्, अन्यत्र तु युगपदुपलब्धेष्वपि क्रमेण स्मरणं भविष्यतीति न मेचकबुद्धावयं दोषः। किञ्च स्वरूपमात्रं दृष्टमिति वदता भवतापि मेचकज्ञानमभ्युपगतमेव, मात्रग्रहणेन तदन्याभावग्रहणसिद्धेः । एवं हि भवानेवाभ्यधात्

नास्त्येवेत्येष वोच्यताम् । नास्त्येवैष इति वोच्यतामिति सम्बन्धः ।

मेचकबुद्धचेति । मयूरग्रीवाया वर्णे यथा व्यक्तितिरस्कृतानेकवर्णसम्भवे मेचकव्यवहार एवं व्यक्तितिरस्कृताखिलाभावग्राहिण्यामपि बुद्धौ मेचकतामात्रग्रहणेन तदन्याभावग्रहणसिद्धिरिति । यदि ह्यन्येऽपि पदार्था दृष्टाः स्युस्तदा कथं स्वरूपमात्रेण दृष्टः स्यात् । न ह्यन्यैः सह दृष्टः स्वरूपमात्रेण दृष्टो भवति ।

अयमेवेति यो ह्येष भावे भवति निर्णयः ।
नैष वस्त्वन्तराभावसंवित्त्यनुगमाद् विना ॥

इति । तस्माद् गौरमूलकावेशसमय एव तत्रासन्निहितस्य गर्गादेरभावग्रहणान्नेदानीं परोक्षाभावग्रहणमभावकारणमभ्युपगन्तव्यमिति, प्रत्यक्षगम्य एवायमभावः ।

यत्पुनरननुमेयत्वम् 'इह घटो नास्ती'ति प्रकृताभावविषयमभ्यधायि तदस्माकमभिमतम् । कश्चित्पुनरसन्निकृष्टदेशवृत्तिरनुमेयोऽपि भवत्यभावः । यथा सन्तमसे सलिलधाराविसरसिक्तसस्यमूलमभिवर्षति देवे घनपवनसंयोगाभावोऽनुमीयते । यथा वार्थापत्तावुदाहृतं गृहभावेन चैत्रस्य बहिरभावकल्पनमिति ।

आगमादप्यभावस्य क्वचिद्भवति निश्चयः ।
चौरादिनास्तिताज्ञानमध्वगानामिवाप्ततः ॥

यत्पुनरुक्तमनुरूपेण प्रमाणेन प्रमेयं प्रमीयते प्रमेयत्वाद्भावात्मकप्रमेयवदिति, एतदप्यप्रयोजकं साधनम् ।

अभावः पटलादीनां प्रत्यक्षं प्रतिपद्यते ।
विपक्षे वृत्त्यभावश्च लिङ्गस्य सहकारिताम् ॥
पुरुषोक्तिषु दोषाणामभावश्चोपयुज्यते ।
सामग्र्यन्तर्गतात्तस्मादभावादपि भावधीः ॥
अभावश्च क्वचिल्लिङ्गमिष्यते भावसंविदः ।
वृष्ट्यभावोऽपि वाय्वभ्रसंयोगस्यानुमापकः ॥
तस्माद्युक्तमभावस्य नाभावेनैव वेदनम् ।
न नाम यादृशो यक्षो बलिरप्यस्य तादृशः ॥

बौद्धमतेऽभावस्यावस्तुत्वम् ततश्चाप्रमाणत्वम्

अत्र रक्तपटाः प्राहुः प्रमेये सति चिन्तनम् ।
युक्तं नाम प्रमाणस्य तदेव त्वतिदुर्लभम् ॥

नैष वस्त्वन्तराभावसंवित्त्यनुगमाद् विनेति । यावद् वस्त्वन्तराभावसंवित्तिमसौ नानुगच्छति नापेक्षते तावदसौ न भवतीत्यर्थः ।

अभावो नाम प्रतीयमानो न स्वतन्त्रतया घटाभावस्वरूपवदनुभूयतेऽपि तु देशकालप्रतियोगिविशिष्टत्वेन। तथा ह्येवं प्रतीतिरिदमिदानीमिह नास्तीति स चेत्थमवगम्यमानोऽपि यदि तैः सम्बद्ध एव भवेदभावः क एनं द्विष्यात् ? न त्वसौ तत्सम्बद्धः। न हि देशेन कालेन प्रतियोगिना सहास्य कश्चित्सम्बन्धः, संयोगसमवायादेरनुपपत्तेः। न च सम्बन्धरहितमेव विशेषणं भवति।

प्रसङ्गात् विशेषणविशेष्यभावसम्बन्धस्वरूपविचारः

ननु विशेषणविशेष्यभाव एव सम्बन्धः, किं सम्बन्धान्तरापेक्षया ? मैवम् सम्बन्धान्तरमूलत्वेन तदवगमात्। संयुक्तं, समवेतं वा विशेषणं भवति दण्डी देवदत्तो नीलमुत्पलमिति। अतश्च न वास्तवः स्वतन्त्र एव विशेषणविशेष्यभावः सम्बन्धः पुरुषेच्छया विपर्यस्यन्तमप्येनं पश्यामः। विशेषणमपि विशेष्यीभवति विशेष्यमपि विशेषणीभवतीति काल्पनिक एवायं सम्बन्धो न वस्तुधर्मः, प्रतियोगिना सह नतरामभावस्य सम्बन्धोऽसमानकालत्वात्। यदा हि घटो न तदा तदभावः, यदा वा तदभावो न तदा घट इति। विरोधाख्यसम्बन्धो भविष्यतीति चेत्, को विरोधार्थः ? यदि हि प्राक्सिद्धो घटाभाव आगत्य घटं विरुन्ध्याद् भवेदपि तद्विरोधो घटमुद्गरयोरिव, न त्वेवमस्ति तयोरसमानकालत्वात्। अभ्युपगमे वा घटतदभावयोरिव वध्यघातकयोः साहचर्यमनुभूयते। घटाभावः किं कुर्वन् घटं विरुन्ध्याद् ? अकिञ्चित्करस्य विरोधित्वेऽतिप्रसक्तिः। अभावान्तरकरणेऽनवस्था। मुद्गरादयो घटस्य नाभावहेतवो भवितुमर्हन्ति, भावस्य स्वत एव भङ्गुरत्वेन विनाशहेत्वनपेक्षत्वात्।

भावो विनश्वरात्मासौ कृतं प्रलयहेतुभिः।
अथाप्यनश्वरात्मासौकृतं प्रलयहेतुभिः॥

तस्माद्विजातीयकपालादिसन्ततिजनन एव मुद्गरादिकारकव्यापारः। सामग्र्यन्तरानुप्रवेशे सति सन्तत्यन्तरोत्पादो, न पुनरभावस्य ततो निष्पत्तिः। स हि घटाद्वस्त्वन्तरं चेत् किमायातम् ? यदसौ न पूर्ववदुपलभ्यते, तद्विरोधित्वादिति चेत् प्रत्युक्तमेतत्। अनर्थान्तरत्वे तु घटस्यैव मुद्गरकार्यत्वं स्यात्।

अभावान्तरकरणे त्वनवस्थेति। तदपि ह्यभावान्तरं क्रियमाणं घटविरोधित्वात् किञ्चित्करमभ्युपेतव्यम्, तच्च यद्यभावान्तरं कुर्यात् तदानवस्थेति।

अथाप्यनश्वरात्मासौ कृतं प्रलयहेतुभिः, नित्यस्य नाशयितुमशक्यत्वात्।

ननु यानि मुद्गरेण कपालानि जन्यन्ते स एव घटाभावः। हन्त तर्हि कपालस्फोटने सति घटाभावस्य विनष्टत्वाद् घटस्योन्मज्जनं प्राप्नोति। किञ्चाकिञ्चित्कराणि कपालानि घटस्याभाव इति यद्युच्यते, पटस्यापि तथोच्येरन्। किञ्च कारकत्वं तेषां पूर्ववत् प्रतिक्षेप्तव्यम्। अपि चायमभावो भवनधर्मा वा स्याद् अभवनधर्मा वा ? भवनधर्मत्वे भावोऽसौ भवेद्, घटादिवत्। अभवनधर्मा तु यद्यभावोऽस्ति स नित्य एवासौ तर्हि भवेत्। स चायमेकपदार्थसम्बन्धी वा स्यात् सर्वपदार्थसम्बन्धी वा ? तत्रैकभावसम्बन्धित्वे न तस्य नियमकारणमुत्पश्यामः। सर्वभावसम्बन्धित्वे तु सर्वपदार्थप्रतिकूलस्याभावस्य नित्यत्वान्नित्यः सन्नित्यो वा कश्चिदभावो नामास्ति।

नन्वभावानभ्युपगमे भावानामितरेतरसङ्करादखिलव्यवहारविप्लवः प्राप्नोति, यदाह

क्षीरे दधि भवेदेवं दध्नि क्षीरं घटे पटः।
शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्त्तिरात्मनि ॥ इति।

अभावाभ्युपगमे तु भावानामितरेतराभावादसङ्कीर्णस्वभावत्वाद् अभावकारणकसङ्करपरिहारकथने तु सुतरां विप्लवः।

भावो भावादिवान्यस्मादभावांशादपि ध्रुवम्।
असङ्कीर्णोऽभ्युपेतव्यः स कथं वा भविष्यति ॥
अन्योन्यमपि भावानां यद्यसङ्कीर्णता स्वतः।
भावैः किमपराद्धं वा परतश्चेत्कुतो नु सा ॥
भावेभ्यो यद्युपेयेत भवेदन्योन्यसंश्रयम्।
अभावान्तरजन्या चेदनवस्था दुरुत्तरा ॥

मूर्तिरात्मनीति। महत्परिमाणादन्यत् परिमाणान्तरम्।

भावो भावादिवान्यस्मादिति। यथा भावोऽन्यस्माद् भावादितरेतराभाववशाद् भिद्यते तथा इतरेतराभावाद्भिद्यतेऽभावो न वा ? न भिद्यते चेद् भावाभावसङ्करप्रसङ्गः। अथ भिद्यते, स्वतः अभावान्तरवशाद् वा ? स्वतश्चेद् भावानामपि स्वत एवास्तु भेदः। अभावान्तरवशाच्चेदनवस्था। असङ्कीर्णभाववशाद् भावानामसङ्करस्तद्वशाच्चाभावासङ्कर इत्याशङ्क्याह **भवेदन्योन्यसंश्रयमिति**। अभावान्तर-

अभावस्वभावतायाश्च सर्वान् प्रत्यविशेषात्प्रतिषेध्यनिबन्धन एव तद्भेदः । प्रतिषेध्याश्च भावाः परस्परेण भिद्यमानास्तं भिन्दन्तीति । प्रत्युत भावाधीनमभावानामसाङ्कर्यं वक्तुमुचितम्, न तु विपर्ययो युक्तः, तदखिलपदार्थव्यवस्थाविसंष्ठुलीभावभयादपि नाभावाभ्युपगमो युक्तः ।

नन्वभावप्रतिक्षेपे नञः किं वाच्यमुच्यताम् ।
न वै शब्दानुसारेण वस्तुस्थितिरुपेयते ।।
बौद्धाः खलु वयं लोके सर्वत्र ख्यातकीर्त्तयः ।
विकल्पमात्रशब्दार्थपरिकल्पनपण्डिताः ।।
क्वचिन्नामपदप्राप्तवृत्तिना जन्यते नञा ।
निषेधपर्युदस्तात्मविषयोल्लेखिनी मतिः ।।
क्वचित्त्वाख्यातसम्बन्धमुपेत्य विदधात्यसौ ।
तदुपात्तक्रियारम्भनिवृत्त्युल्लेखमात्रकम् ।

एकादशविधानुपलब्धिनिरूपणम्

ननु चानेन मार्गेण यदि भावो निरस्यते ।
एकादशप्रकारैषानुपलब्धिः क्व गच्छतु ।।

स्वभावानुपलब्धिर्यथा नेह घटोऽनुपलब्धेरिति । कारणानुपलब्धिर्यथा नात्र धूमो दहनानुपलब्धेरिति । कार्यानुपलब्धिर्यथा नात्र निरपवादा धूमहेतवः सन्ति धूमानुपलब्धेरिति । व्यापकानुपलब्धिर्यथा नात्र शीतस्पर्शः पावकोपलब्धेरिति ।

जन्यत्वे च परस्परमन्यासङ्करस्य तस्याप्यभावान्तरजन्या असङ्करता चेदनवस्था दुरुत्तरेति तदेवाह **अभावान्तरजन्या चेदनवस्था दुरुत्तरेति** ।

न वै शब्दानुसारेण वस्तुस्थितिरुपेयते । शब्दानामर्थासंस्पर्शित्वात् ।

स्वभावानुपलब्धिरिति । घटस्य प्रतिषेध्यस्य दृश्यस्य यः स्वभाव आत्मीयं रूपं तस्यानुपलब्धिः । अत्र च दृश्यस्येति विशेषणं कर्तव्यमन्यथा सन्तमसव्यवस्थितस्य घटादेरनुपलब्धिमात्रेणाभावव्यवहारः स्यात् स्वभावासिद्धेः । **कार्यानुपलब्धिरिति** । ननु च नावश्यं कारणानि कार्यवन्ति भवन्तीति वह्निश्च स्याद् धूमश्च न भवेदिति तन्नेत्याह—**निरपवादेति** धूमजन्मन्यप्रतिहतसामर्थ्या इत्यर्थः ।

तादृशश्च धूमानुपलम्भेनावश्यमभावसिद्धेः । **व्यापकानुपलब्धिरिति** । शिंशपा-

स्वभावविरुद्धोपलब्धिर्यथा नात्र शीतस्पर्शः पावकोपलब्धेरिति । स्वभावविरुद्धकार्योपलब्धिर्यथा नात्र शीतस्पर्शो धूमोपलब्धेरिति । विरुद्धव्याप्तोपलब्धिर्यथा नाध्रुवभावी भूतस्यापि भावस्य विनाशो हेत्वन्तरापेक्षणादिति । कार्यविरुद्धोपलब्धिर्यथा नात्र शीतकारणमप्रतिबद्धसामर्थ्यमस्ति ज्वलनोपलब्धेरिति । व्यापकविरुद्धोपलब्धिर्यथा नात्र तुहिनस्पर्शः कृशानुदर्शनादिति । कारणविरुद्धोपलब्धिर्यथा नैतस्य रोमहर्षदन्तवीणादिविशेषाः सन्ति सन्निहितहुतवहाधिष्ठितविशेषादिति । कारणविरुद्धकार्योपलब्धिर्यथा प्रवृत्तदन्तवीणादिविशेषपुरुषाधिष्ठित एष देशो न भवति धूमवत्त्वादिति ।

सत्यमेकादशविधाऽनुपलब्धिरिहेष्यते ।
सा त्वसद्व्यवहारस्य हेतुर्नाभावसंविदः ॥

नन्वनुपलब्धेः स्वभावहेतावन्तर्भाव उक्तः । स्वभावहेतौ च साध्यसाधनयोरव्यतिरेक इष्यते । असद्व्यवहारश्च ज्ञानाभिधानात्मकत्वात्तत एव पृथगिति कथं तद्विषयतां यायात् ? सत्यमेवम् । किन्तु नासद्व्यवहारस्तया साध्यतेऽपि तु तद्योग्यता । योग्यता च न ततोऽर्थान्तरमिति न स्वभावहेतुत्वहानिः ।

ननु योग्यता भावात्मिकानुपलब्धिस्त्वभावस्वभावेति, कथमनर्थान्तरत्वम् । नैतदेवम् । नह्युपलब्धिप्रतिषेधात्मिकामभावस्वभावामनुपलब्धिमनुपलब्धिविदो वदन्ति, किन्तु प्रतिषेधपर्युदस्तवस्त्वन्तरोपलब्धिमेवार्थाभावस्वभावामिति । अत

स्वरूप प्रतिबद्धो धर्मो तादृशश्च वृक्षत्वाख्यस्तस्य व्यापकस्तस्यानुपलम्भाच्छिंशपाया अभावः । **स्वभावविरुद्धोपलब्धिरिति** । प्रतिषेध्यस्य शीतस्पर्शस्य स्वभावेन स्वात्मना यो विरुद्धोऽग्निस्तस्योपलब्धेः शीतस्पर्शाभावः । **स्वभावविरुद्धकार्योपलब्धिरिति** । निषेध्यस्य शीतस्पर्शस्य स्वभावेनात्मना यो विरुद्धोऽग्निस्तस्य कार्यं धूमस्तदुपलम्भाच्छीतस्पर्शाभावः । **विरुद्धव्याप्तोपलब्धिरिति** । ध्रुवभावित्वस्य निषेध्यस्य विरुद्धं हेत्वन्तरापेक्षित्वम् तेन व्याप्तस्य नाशस्योपलम्भाद् ध्रुवभावित्वाभावः । ध्रुवभावित्वस्य हेत्वन्तरापेक्षित्वं विरुद्धम् । न हि लाक्षादिद्रव्यान्तरापेक्षो वर्णो ध्रुवो भवतीति । ध्रुवमवश्यं भवतीति ध्रुवभावी भूतस्यापि कृतकस्यापि यस्यावश्यं (अत्र टीकाग्रन्थो नष्टः) ।

एवेदमपि न चोद्यम्, अनुपलब्धेरभावात्मकत्वादनुपलब्ध्यन्तरपरिच्छेद्यत्वादनवस्थेति । यस्माद्वस्त्वन्तरोपलम्भात्मिकाऽनुपलब्धिः स्वसंवेद्यैवेति ।

नन्वनुपलब्धेरसद्व्यवहारसिद्धावदृष्टस्यापि तथात्वं सिध्येद् । न । दृश्यत्वविशेषणोपादानादुपलब्धिलक्षणप्राप्तस्यानुपलब्धेरसद्व्यवहारो, न यस्य कस्यचिदिति । तत्र

घटादेः पूर्वदृष्टस्य दृश्यत्वपरिनिश्चयात् ।
असत्त्वव्यवहारो हि सिध्यत्यनुपलब्धितः ॥
एकान्तानुपलब्धेषु विहायःकुसुमादिषु ।
पिशाचादेस्तु दृश्यत्वयोग्यतानवधारणात् ॥
न शक्योऽनुपलम्भेन कर्तुं नास्तित्वनिश्चयः ।
तत्रापि त्वपिशाचोऽयं चैत्र इत्येवमादिषु ॥
तादात्म्यप्रतिषेधे च दृश्यत्वं नोपयुज्यते ।
पिशाचेतररूपो हि चैत्रः प्रत्यक्षगोचरः ॥

अनुपलब्धेरभावात्मकत्वादिति । यथा घटाभावोऽभावत्वादनुपलब्ध्या परिच्छिद्यते तथा अनुपलब्धिरप्यभावत्वादेवानुपलब्ध्यन्तरेण परिच्छेद्येति ।

उपलब्धिलक्षणप्राप्तस्येति । उपलब्धेर्लक्षणं जनिका सामग्री, तां प्राप्तो जनकत्वेन तदन्तःप्रविष्ट उपलब्धिलक्षणप्राप्तो-दृश्य इत्यर्थः । तत्कालमदृश्यत्वेऽपि एकज्ञानसंसर्गिणो भूतलादेर्दृश्यत्वाद् योग्यतया च दृश्यत्वसमारोपः । यदि दृश्यस्यानुपलब्ध्या अभावनिश्चयः, नादृश्यस्य, तदा नभःकुसुमादेरदृश्यत्वादनुपलब्ध्या अभावनिश्चयो न स्यादित्याशङ्क्याह **एकान्तानुपलब्धेष्विति** । तेष्वपि दृश्यत्वयोग्यताया योगाद् युज्यमानत्वादितरकुसुमवदित्यर्थः । **पिशाचादेस्तु दृश्यत्वयोग्यतानवधारणादिति** । तदनवधारणन्तु स्वभावविप्रकृष्टत्वेन पिशाचादीनाम् । त्रिविधा चादृश्यता भवति स्वभावविप्रकर्षेण यथा पिशाचादीनाम्, देशविप्रकर्षेण यथा मेर्वादीनाम्, कालविप्रकर्षेण यथा रामादीनाम् । अतो नास्तित्वनिश्चयस्तत्र कर्तुमशक्यः, सन्देह एव तत्रेत्यर्थः । यदि तर्हि अदृश्यस्यानुपलब्ध्या अभावनिश्चयो न सिद्ध्यति, तदा 'अपिशाचोऽयं चैत्रः' इत्यस्यामपि प्रतीतावभावनिश्चयो न स्यात्, अदृश्यत्वात् पिशाचस्य, ततश्च पिशाचापिशाचरूपतया चैत्रं प्रति सन्देह एव स्यादित्याशङ्क्याह **तत्रापि त्वपिशाचोऽयमिति** ।

तादृप्यनिश्चये तस्य किं फलं तद्विशेषणम् ।
इत्यसद्व्यवहारस्य सिद्धेरनुपलब्धितः ॥
न भाववदभावाख्यं प्रमेयमवकल्पते ।

अभावस्य वस्तुत्वसाधनम्

अत्राभिधीयते, इदं तावत्सकलप्राणिसाक्षिकं संवेदनद्वयमुपजायमानं दृष्टम्, इह घटोऽस्ति, इह नास्तीति। तत्र विकल्पमात्रसंवेदनमनालम्बनमात्मांशावलम्बनं वेत्यादि यदभिलप्यते, तन्नास्तिताज्ञान इवास्तित्वज्ञानेऽपि समानम् अतो द्वयोरपि प्रामाण्यं भवतु द्वयोरपि वा मा भूत्। यत्त्वस्तीति ज्ञानं प्रमाणमितरदप्रमाणमिति कथ्यते तदिच्छामात्रम्। अस्तीति ज्ञानसमानयोगक्षेमत्वे च नास्तीति ज्ञानस्य विषयश्चिन्तनीयः।

ननु घटविविक्तभूतलोपलम्भभावे घटानुपलम्भ इत्युक्तं तदयुक्तम्। केयं घटविविक्तता? सा भूप्रदेशादभिन्ना, भिन्ना वा। अभेदे भूप्रदेशाविशेषाद् घटसन्निधानेऽपि घटो नास्तीति प्रतिपत्तिर्जायेत। भेदे तु नाम्नि विवादः स्यात्।

अयमाशयः—यत्र पदार्थस्य स्वरूपेणासत्त्वं साध्यते तत्रानुपलब्धिमात्रस्य व्यभिचारात् सविशेषणया तया साध्यम्, अन्यस्य मानान्तरस्य तथाविधासत्त्वसिद्धावव्यापारात्। यत्र तु पररूपेणासत्त्वं साध्यते तत्र यदेव प्रत्यक्षं प्रमाणं परस्य रूपं निश्चिनोति चैत्रादेस्तदेव पिशाचादिरूपतामपि तस्य व्यवच्छिनत्ति। यो हि पदार्थो येन रूपेणोपलभ्यते तदेव तस्य रूपम्, चैत्रश्च स्वेन रूपेणोपलभ्यमानः कथं पिशाचः स्यात्। अतः प्रत्यक्षमहिमत एव तस्यापिशाचरूपत्वसिद्धेः किं दृश्यत्वविशेषणापेक्षया। यत्र तु संयोगित्वेन विवक्षा 'चैत्राधिष्ठिते प्रदेशे पिशाचो नास्ति' इत्यादौ तत्र संदेह एव युक्तः, परमाण्वादिवददृश्यपदार्थसम्बन्धेऽपि प्रदेशप्रतिपत्तेरविशेषदर्शनात्, न त्विह तथा। यो ह्यतदात्मा प्रत्यक्षेणोपलभ्यते कथमसौ तदात्मा स्यात्। यथा नीलवस्तु पीतं न भवतीत्यत्र नानुपलब्धेर्व्यापारः, प्रत्यक्षत एव तत्सिद्धेः। पीतसम्बन्धाभावे तु तस्य निश्चयेऽनुपलब्धेरेव व्यापारः, तथा प्रकृतेऽपीति। **पिशाचेतररूप** इति। पिशाचादितरद्रूपं स्वभावौ यस्य। **किंफलं तद्विशेषणम्**। तदनुपलब्धेर्विशेषणं दृश्यत्वं किंफलं न क्वचिदुपयुज्यत इत्यर्थः।

अनालम्बनम्। असदाकारनिष्ठत्वाद् यथाह धर्मोत्तरः। **आत्मालम्बनम्**। स्वाकारालम्बनं यथाह धर्मकीर्तिः।

भेदाभेदे न चिन्त्या च घटादपि विविक्तता ।
अभेदे घट एव स्याद्भेदे चाभाव एव सा ॥

तदिह घटो नास्तीति घटविविक्तभूतलालम्बनतायामस्याः स्वसंविद इहेति तावदस्मिन्संविदंशे देश आलम्बनमित्यविवाद एव । इह घटोऽस्तीति भावप्रतीति समयेऽपि तत्र तदवभासाभ्युपगमात् । घटो नास्तीत्यत्र तु यदवभासते तन्न भूतलमात्रमेव, भावप्रतीतिसमये तदतिरिक्तप्रतिभासस्यावश्यम्भावित्वात् । तदतिरिक्तन्तु प्रतिभासमानं घटविविक्ततेति वा कथ्यताम्, घटाभाव इति वा, नात्र वस्तुनि विशेषः ।

ननु घटो नास्तीति विकल्पमात्रमेतत् । न । दर्शनानन्तरप्रवृत्तत्वेन विधिविकल्पतुल्यत्वात् ।

यथानुभवमुत्पत्तुमर्हन्ति किल कल्पनाः ।
प्रतिषेधविकल्पस्तु न विध्यनुभवोचितः ॥

ननु नैव विकल्पानां वयं प्रामाण्यवादिनः ।
कामं विधिविकल्पानामपि मा भूत्प्रमाणता ॥

प्रामाण्यं दर्शनानाञ्चेत्स्वविकल्पानुसारतः ।
इहापि तेषामेवास्ति तद्विकल्पानुसारतः ॥

वस्तुप्राप्त्या विधिविकल्पानां प्रामाण्यव्यवहार इति चेद्, इहापि तत्प्राप्त्यैव निषेधविकल्पानामस्तु प्रामाण्यव्यवहारः । किमत्र वस्तु प्राप्यत इति चेत्त्रापि किं प्राप्यते ? नीलमिति चेत्, सेयमभावस्यापि प्राप्तिर्भवत्येव । नीलं हि प्राप्यमाणं तदभावाविनाभूतपीतादिव्यवच्छिन्नरूपं प्राप्यते । सा चेयं तथाभूतनील-

---

भेदाभेदे न चिन्त्या चेति । यथा प्रदेशाद् घटविविक्तता किं भिन्ना आहोस्विद् अभिन्ना तद्वद् घटादपि सा किं भिन्ना विविक्तता आहोस्विद् अभिन्नेति ।

कामं विधिविकल्पानामपि मा भूत् प्रमाणतेति । दर्शनानां प्रामाण्यदायिनो विकल्पा न स्वतः प्रमाणमिति बौद्धाभिप्रायः । तत्राप्याह नैयायिकः **प्रामाण्यं दर्शनानां चेदिति** ।

प्राप्तिर्भवन्तीतराभावप्राप्तिरपि भवत्यन्यथा हि नीलप्राप्तिरेव न स्यादिति। एतच्च लाक्षणिकं विरोधमाचक्षाणैर्भवद्भिरेवोपगतम्।

सुखदुःखसमुत्पत्तिरभावे शत्रुमित्रयोः।
कण्टकाभावमालक्ष्य पदं पथि निधीयते॥
प्रागुत्पत्तेर्घटाभावं बुद्ध्वा तत्कारणादरः।
व्याध्यभावपरिच्छेदादौषज्यविनिवर्तनम्॥
इहाभावप्रतिष्ठानव्यवहारपरम्पराम्।
पश्यन्नभावं को नाम निह्नुवीत सचेतनः॥

ननु नाजनकमालम्बनं भवति, ज्ञानस्याभावस्तु सकलोपाख्याविनिर्मुक्तस्वरूप इति न ज्ञानजननपटुः। अतः कथं तदालम्बनम्? उच्यते सौगतानां तावन्न किञ्चिज्जनकं वस्तु प्रतिभासते, द्वित्रिक्षणावस्थितिप्रसङ्गेन क्षणभङ्गव्रतविलोपप्रसङ्गात्। उत्पद्यते चार्थज्ञानञ्च जनयति, जातेन तेन गृह्यते चेत्यासां क्रियाणामेककालत्वाभावात्। तस्मादकारक एव भावः प्रतिभासते, आकारार्पणपक्षञ्च प्रतिक्षेप्स्यामः। एवं भाववदभावोऽप्यजनकः प्रतिभासताम्। अस्माभिस्तु भाववदभावोऽपि ज्ञानजननसमर्थ इष्यते। न हि निःशेषसामर्थ्यरहितत्वमभावलक्षणम्। अपितु नास्तीति ज्ञानगम्यत्वम्। सत्प्रत्ययगम्यो हि भाव इष्यते, असत्प्रत्ययगम्यस्त्वभाव इति। तदिदमुक्तं 'सदसती तत्त्वम्' इति।

ननु भाववदेष ज्ञानजनकः सन्नभावो न भावाद्विशिष्यते। अहो निपुणदर्शी देवानाम्प्रियः। प्रतीतिभेदश्चास्ति। तत्र प्रतीयमानौ भावाभावौ न भिद्येते इति कथमेवं भवेद्? अपि रे मूढ! ज्ञानजनकत्वाविशेषेऽपि रूपरसौ कथं भिद्येते, प्रतीतिभेदादिति चेद्? भावाभावावपि जनकत्वधर्मसामान्येऽपि प्रतीतिभेदादेव भिद्येयाताम्। न हि प्रतिभास्यभेदमन्तरेण प्रतिभासभेदो भवतीति भवताप्यभ्युपगतम्।

लाक्षणिकं विरोधमिति। लक्ष्यते व्यावृत्तत्वेन वस्तु वस्त्वन्तराद् येन तल्लक्षणमसाधारणं पदार्थानां स्वरूपम्, तत्प्रयोजनं यस्यासौ लाक्षणिकः परस्परपरिहारस्थिततालक्षणो विरोधः। तद्वशाद्धि पदार्थानां परस्परासंकीर्णस्वरूपलाभः।

'सदसती तत्त्वम्' इति सच्चासच्चेत्यविपरीतरूपेण गृह्यमाणं तत्त्वमित्यर्थः।

प्रामाण्यं वस्तुविषयं द्वयोरर्थभिदां जगौ ।
प्रतिभासस्य भिन्नत्वादेकस्मिंस्तदयोगतः ।। इति

तस्मादस्तीति प्रतीतेरेव भावः । नास्तीति प्रतीतेरभावो भूमिरित्यभ्युपगम्यताम् । अथ वा विज्ञानवाद एव सुस्पष्टमास्थीयताम् । अन्तरावस्थानन्तु न साम्प्रतम् । अर्थक्रियासामर्थ्यमपि तस्य दर्शितमेव ।

स्वज्ञानाख्यक्रियाशक्तिरमुष्य दुरपह्नवा ।
अर्थक्रियान्यजन्या तु न भावेनापि जन्यते ।।
एवञ्च सति यः पूर्वं शक्तिवादोऽत्र वर्णितः ।
स प्रत्यक्षविरुद्धत्वात् कण्ठशोषाय केवलम् ।।

तथा सम्बन्धाभावादिति यदुक्तं तत्र देशेन सह तावदभावस्य विशेषणविशेष्यभावः सम्बन्धः । स तु सम्बन्धान्तरमूल इति भावेऽयं नियमो, नाभावे । न च भावेऽप्येष नियमो । न ह्येवं भवति यत्सम्बद्धं तद्विशेषणमेव । पादपीडिते, शिरसि वा धार्यमाणे दण्डे, दण्डीति प्रत्ययानुत्पादात् । नाप्येवं यद्विशेषणं तत्सम्बद्धमेवेति, समवायस्य सत्यपि विशेषणत्वे सम्बन्धान्तराभावात् । तस्मात्सम्बन्धान्तररहितोऽपि प्रतिबन्ध इव, वाच्यवाचकभाव इव, विशेषणविशेष्यभावः स्वतन्त्र एव सम्बन्धस्तथाप्रतीतेरवधार्यते । उभयोरुभयात्मकत्वात् कदाचित् कस्यचित्तथा प्रतिभासात् पुरुषेच्छानुवर्त्तनेन व्यत्ययप्रत्ययत्वेऽपि न दोषः । यस्माद्विशेषणविशेष्यभाव एव सम्बन्धो देशे भूतलादिना सहाभावस्य सम्बन्धः । एवं कालेनापि सह स एव वेदितव्यः । क्रियया कर्तृस्थया वा गमनादिकया कर्मस्थया

प्रामाण्यं वस्तुविषयमिति । द्वयोरपि प्रत्यक्षानुमानयोर्वस्तुप्राप्तिपर्यन्तप्रमाणव्यापारत्वाद् वस्तुविषयत्वम् । ग्राह्यभेदस्तर्हि कथमुक्तम्, आचार्यदिग्नागेनेत्याह **अर्थभिदां** ग्राह्यभेदं **जगौ** कथितवानाचार्यो दिङ्नागः । कथम् ? **प्रतिभासस्य भिन्नत्वादिति** । प्रतिभासत इति प्रतिभास आकारस्तस्यार्थक्रियाकारित्वेनार्थक्रियाकारित्वाभावेन च प्रत्यक्षग्राह्यस्यानुमानग्राह्यस्य च स्फुटास्फुटत्वे भिन्नत्वात् । **एकस्मिन्** पुनर्ग्राह्ये **तयोः** स्फुटास्फुटयोराकारयोर**योगात्** असम्भवादिति । यद्यपि वस्तुनिष्ठत्वमुभयोस्तथापि ग्राह्याकारभेदाद् विषयभेदः; एकस्य हि स्वलक्षणं ग्राह्यमपरस्य सामान्यम् ।

प्रतिबन्ध इवेति । प्रतिबन्धो गम्यस्य गमकायत्तता । **क्रियया कर्तृस्थयेति** । 'देवदत्तेन गम्योऽयं ग्रामः' इत्यादौ । 'कुशूलभेत्ताऽयं चैत्रः' इत्यादौ तु **कर्मस्थया** ।

वा भेदनादिकया सह संयोगाद्यभावेऽपि विशेषणविशेष्यभाव एव सम्बन्धः। तद्वदभावस्यापि भविष्यतीति। प्रतियोगिना तु सह विरोधोऽस्य सम्बन्धः। अयमेव च विरोधार्थो यदेकत्रोभयोरसमावेशः। अतश्चैकविनाशे न सर्वविनाशो, घटाभावस्य घटैकप्रतियोगित्वात्।

यत्तु भवनधर्मा अभवनधर्मा वेति विकल्पितम्, तत्राभवनधर्मैवाभावोऽभ्युपगम्यते। भवनधर्मत्वेऽपि चाभावो न भावान्न भिद्यते, प्रतिभासभेदस्य रूपरसादिषूपदर्शितत्वात्। भवनधर्मत्वञ्चास्य हेत्वन्वयव्यतिरेकित्वाद्भवति। घटो हि मृत्पिण्डदण्डादीनिव जन्मनि, विनाशेऽपि मुद्गरादीननुवर्त्तते हेतून्। विजातीयसन्ततिजननपक्षेऽपि सदृशसन्तानजनिकायाः शक्तेरभावः क्रियत एव, अन्यथा मुद्गराद्युपनिपातेऽपि विजातीयेव सजातीयसन्ततिरभिजायेत। सजातीयविजातीयोभयसन्ततिजननशक्तियुक्तो घट इति चेद्? मुद्गरादियोगात् पूर्वमपि कपालसन्ततिजननम्, तद्योगेऽपि वा सति घटसन्ततिजननम्, अनियमेन दृश्येतेति विजातीयक्षणोत्पादनस्वभावे च घटे मुद्गरादेर्वैयर्थ्यमेव स्यात्।

तदुत्पादस्वभावे हि न किञ्चिन्मुद्गरादिना।
अतदुत्पादकत्वेऽपि न किञ्चिन्मुद्गरादिना॥
मुद्गरोपनिपाताच्च यद्युत्पन्नं क्षणान्तरम्।
घटक्षणस्य किं वृत्तं येन नाभाति पूर्ववत्॥
नन्वस्याभवनं वृत्तं स एवार्थोऽयमुच्यते।
घञा किमपराद्धं वा किं वाप्युपकृतं ल्युटा॥

ननूक्तं 'न तस्य किञ्चिद्भवति न भवत्येव केवलमि'ति। तदयुक्तम्। यदसौ न भवति स एवास्याभावः।

ननु स न, न तु तस्याभावः। मैवम्। 'स नेति'शब्दयोर्ज्ञानयोश्च विषयभेदात्। स इति ज्ञानस्य स्मर्यमाणो घटादिर्विषयः। 'ने'ति तु ज्ञानस्याभावो भूमिरित्यलमलीकविदग्धविरचितविफलवक्रवचनविमर्दन।

तस्मादित्थमभावस्य प्रमेयत्वोपपादनात्।
न ह्यसद्व्यवहाराय कल्पन्तेऽनुपलब्धयः॥

न चाप्रतीतिमात्रेण तदभावनिबन्धनाः ।
व्यवहाराः प्रकल्पन्ते मृदन्तरिततोयवत् ॥
खपुष्पस्य पिशाचस्य मृदन्तरितवारिणः ।
न खल्वनुपलभ्यत्वे विशेषः प्रतिभाति नः ॥
सर्वदानुपलम्भोऽपि कुर्वन्नास्तित्वनिश्चयम् ।
विशेष्यते मृदन्तःस्थसलिलानुपलब्धितः ॥
आगमाद् युक्तितश्चापि सत्त्वसम्भावनां गतः ।
सर्वदानुपलब्धोऽपि न पिशाचः खपुष्पवत् ॥

अतश्च यदुच्यते अनुपलब्धे पुनरनुपलब्धिरेवानुपलब्धिरिति तद्दूणिति-

---

खपुष्पस्य पिशाचस्येति । खपुष्पस्य दृश्यत्वाद् अनुपलब्ध्या अभावनिश्चयः, पिशाचस्य मृदन्तरितवारिणश्च दृश्यत्वाभावान्नास्त्यभावनिश्चय इति व्यवस्था । सा अनुपलब्धिमात्रान्नास्तिताव्यवहारिणां भवतां मते विघटते । मृदन्तरितवारिणः सर्वदानुपलम्भाभावात् कथमविशेष इत्याह—**सर्वदानुपलम्भोऽपीति** । एतदुक्तं भवति किल भवतैवमुच्यते सर्वदा यो नोपलभ्यते तस्याप्रतीतिमात्रेण नास्तित्वनिश्चयो भवति, मृदन्तरितवारिणश्च कदाचिदुपलम्भेन सर्वदानुपलम्भासिद्धेः । तस्याप्रतीतिमात्रान्नास्तित्वनिश्चयः कथं सिध्येदित्यतः सर्वदानुपलम्भस्तस्य नास्तीति तस्य न नास्तितानिश्चयः' इति तदयुक्तम्, अनेन क्रमेण पिशाचस्यापि नास्तितानिश्चयप्रसक्तेरिति । भवत्विति चेत्, तन्नेत्याह **आगमाद् युक्तितश्चापीति** । आगमादवगतो नियतशरीरावच्छिन्नो यः पिशाचस्तेनावश्यमदृश्येन नियते क्वचिद् देशे भाव्यम् । अयमपि च विवादास्पदं देशो नियतदेश एव, अत्रापि पक्षे तस्यावस्थितिः सम्भाव्यत इति सम्भावनायुक्तिः ।

अनुपलब्धे पुनरनुपलब्धिरेवेति एवमस्याष्टीकाया अवतरणम्, सतोऽपि घटादेरनुपलब्धिदर्शनात् कथमीश्वरादेरनुपलब्धिमात्रान्नास्तितानिश्चयः, अतः सन्देह एव युक्तः । न च 'इह घटो नास्ति' इतिवदुपलब्धिलक्षणप्राप्तत्वं तस्य, येन नास्तितानिश्चयः स्यात्, तस्मान्नास्तितासन्देह एव तस्य प्राप्त इत्याशङ्क्याह 'उपलब्धिविषये ह्यनुपलब्धिः कारणान्तरमपेक्षते, अनुपलब्धे पुनरनुपलब्धिरेवानुपलब्धिः' इति । अस्यार्थः ।

न स्वभावानुमाने च तदन्तर्भावसम्भवः ।
मेयं पृथगभावाख्यममूषामुपपादितम् ॥
कारणानुपलब्ध्यादेर्बाढमस्त्वनुमानता ।
स्वभावानुपलब्धिस्तु प्रत्यक्षमिति साधितम् ॥

या चेयमेकादशानुपलब्धिवधूशुद्धान्तमध्ये विरुद्धव्याप्तोपलब्धिरुदाऽहृता नाध्रुवभावी भूतस्यापि भावस्य विनाशो हेत्वन्तरानपेक्षणादिति, सेयमिदानीमेव साध्वी दूषिता । विस्तरतस्तु क्षणभङ्गभङ्गे दूषयिष्यते ।

अभावानभ्युपगन्तृप्रभाकरमतनिरासः

यैस्तु मीमांसकैस्सद्भिरभावो नाभ्युपेयते ।
प्रमादेनामुना तेषां वयमप्यद्य लज्जिताः ॥

घटो हि न प्रतीयते, न तु तदभावः प्रतीयते, इत्येवं वदद्भिरेभिर्दर्शनादर्शने एव पदार्थानां सदसत्त्व इति कथितं स्यात् । एतच्चायुक्तम् । दर्शनादर्शनाभ्यां हि सदसत्त्वे निश्चीयेते । न तु दर्शनादर्शन एव सदसत्त्वे

यैस्तु मीमांसकैः सद्भिरिति । प्राभाकरान् निर्दिशति । ते हि ज्ञानञ्च सालम्बनमिच्छन्ति, शब्दञ्च बाह्यार्थविषयम् । अथ च नास्तीति प्रत्ययं शब्दञ्च निर्विषयमाहुः ।

घटो हि न प्रतीयत इति । घटस्यादर्शनमात्रमेव तत् केवलम्, न पुनर्घटाभावस्यात्र प्रतिभास इत्यर्थः । अदर्शनादेव चास्तित्वासिद्धिः । यैव चास्तित्वासिद्धिः सैव नास्तित्वसिद्धिः । कः पुनरस्य बौद्धपक्षाद् प्राभाकरस्य पक्षस्य विशेषः ? अयं विशेषः बौद्धपक्षेऽनुपलब्ध्या अभावव्यवहारः साध्यः, स च सविकल्पकज्ञानस्वभावः, विकल्पप्रतिभासि च न बाह्यमिति तेषां मतम् । प्राभाकराणान्तु विकल्पस्य बाह्यवस्तुविषयत्वात् तथाविधे व्यवहारेऽनुपलब्ध्याभ्युपगम्यमाने बलाद् अभावालम्बनत्वमायातीति तेषां व्यवहारो भूतलघटयोर्वैविक्त्यस्थापनामयः, पुरुषेच्छाकृतः, केवलभूतलदर्शने घटस्मरणे च सति पश्चाद् 'भूतलमेव प्रत्यक्षेण गृहीतं न घटः' इत्येवंरूपो यो भवति, स एव विवक्षितः, न ज्ञानस्वभाव इति । **दर्शनादर्शने एवेति** । 'घटो हि न प्रतीयते, न तु तदभावः प्रतीयते' इत्येवं वदद्भिरेवमभ्युपगतं भवति 'घटानुपलम्भव्यतिरेकेणान्यद् घटस्यासत्त्वं नास्ति, स एवासत्त्वम्' इति ।

मात्रम् । खपुष्पादेस्तु सविशेषणयानुपलब्ध्या अभाव एव निश्चीयते, न तस्यानुपलब्धिमात्रम् ।

अनिष्यमाणे चाभावे भावानां प्रतियोगिनि ।
नित्यतैषां प्रसज्येत न ह्येते क्षणिकास्तव ॥
मुद्गरादेश्च किं कार्यं कपालपटलीति चेत् ।
घटस्तर्ह्यविनष्टत्वात् स्वकार्यं न करोति किम् ॥

अदर्शनादिति चेत्,

तदानीमेव दृष्टस्य स्थिरस्यामुष्य किं कृतम् ।
सर्वेन्द्रियादिसामग्रीसन्निधानेऽप्यदर्शनम् ॥

तस्मात्तदभावकृतमेव तदानीं तस्यादर्शनम् ।

स्वप्रकाशा च नास्तीति संवित्तिर्भवतां मते ।
न निरालम्बना चेयमस्तीति प्रतिपत्तिवत् ॥
विकल्पविषयाः शब्दा यथा शौद्धोदनेर्गृहे ।
गीयन्ते भवता नैवमिति नञ्वाच्यमुच्यताम् ॥
प्रसिद्धिश्च परित्यक्ता न चाभावः पराकृतः ।
उपेक्षितश्च भाष्यार्थ इत्यहो नयनैपुणम् ॥
अलञ्च बहुनोक्तेन विमर्दोऽत्र न शोभते ।
महात्मनां प्रमादोऽपि मर्षणीयो हि मादृशैः ॥

तस्मान्नास्तीति प्रत्ययगम्योऽभाव इति सिद्धम् ।

सतोऽपि घटस्यानुपलब्धिदर्शनादुपलब्धघटादिविषयानुपलब्धिर्नास्तितानिश्चये कारणान्तरमुपलब्धिलक्षणप्राप्तत्वमपेक्षते, अनुपलब्धे पुनरीश्वरादौ यानुपलब्धिः सैवानुपलब्धिः, सैव नास्तिताव्यवहारसाधनी, न तत्र दृश्यत्वादेः कारणान्तरस्यापेक्षोपयुज्यत इति यावत् । ननु यदि सर्वदानुपलम्भादपि न नास्तितानिश्चयः पिशाचादेस्तर्हि खपुष्पादेरपि न प्राप्नोतीत्याशङ्क्याह **खपुष्पादेस्त्विति** । नानुपलब्धिमात्रं केवलं तत्र व्याप्रियत इत्यर्थः ।

उपेक्षितश्च भाष्यार्थ इति । 'अभावोऽपि प्रमाणाभावो नास्तीत्यस्यासन्निकृष्टस्यार्थस्य' इति भाष्यस्याभावात्मकप्रमाणप्रमेयप्रतिपादकत्वात् ।

वस्तुत्वेन सिद्धस्याभावस्य भेदाः

स च द्विविधः। प्रागभावः, प्रध्वंसाभावश्चेति। चतुर्विध इत्यन्ये। इतरेतराभावः, अत्यन्ताभावश्च तौ च द्वाविति। षट्प्रकार इत्यन्ये। अपेक्षाभावः सामर्थ्याभावः, ते च चत्वार इति। तत्र च

प्रागात्मलाभान्नास्तित्वं प्रागभावोऽभिधीयते।
उत्पन्नस्यात्महानन्तु प्रध्वंस इति कथ्यते॥

न प्रागभावादन्ये तु भिद्यन्ते परमार्थतः।
स हि वस्त्वन्तरोपाधिरन्योन्याभाव उच्यते॥

स एवावधिशून्यत्वादत्यन्ताभावतां गतः।
अपेक्षाभावता तस्य देशोपाधिनिबन्धना॥

सामर्थ्यं पूर्वसिद्धञ्चेत् प्रध्वंसे तदभावधीः।
नो चेत्तर्हि विशेषोऽस्य दुर्लभः प्रागभावतः॥

उत्पन्नस्य विनाशो वा तदनुत्पाद एव वा।
अभावस्तत्त्वतोऽन्ये तु भेदास्त्वौपाधिका मताः॥

तस्मादभावाख्यमिदं प्रमेयं तस्येन्द्रियेण ग्रहणञ्च सिद्धम्।
अतः प्रमाणेषु जगाद युक्तं चतुष्ट्वमेतन्मुनिरक्षपादः॥

सम्भवैतिह्ययोः प्रमाणान्तरत्वखण्डनम्

ननु नाद्यापि चतुष्ट्वमेवमवतिष्ठते सम्भवैतिह्ये इति द्वयोः प्रमाणान्तरभावात्। सम्भवो नाम समुदायेन समुदायिनोऽवगमः। सम्भवति खार्यां द्रोणः, सम्भवति सहस्रे शतमिति। अनिर्दिष्टप्रवक्तृकं प्रवादपरम्परा चैतिह्यम्। इह वटे यक्षः प्रतिवसतीति। न चायमागमः, आप्तस्योपदेष्टुरनिश्चयादिति। तदनुपपन्नम्।

स हि वस्त्वन्तरोपाधिरिति। यदा स्वकारण एवानुत्पत्तिस्तदा प्रागभावः, यदा तु स्वकारणादन्यत्रानुत्पत्तिस्तदेतरेतराभावः, 'इह देशे काले वा इदं नास्ति' इत्यपेक्षाभावः। स्वकारणाद्धि वस्त्वन्तरमुपाधिरवच्छेदकमितरस्माद् यस्य।

भिन्नः सम्भव एष न ह्यनुमितेराख्यायि खार्यां खलु
द्रोणः सम्भवतीति सेयमविनाभावान्मतिर्लैङ्गिकी ।
ऐतिह्यन्तु न सत्यमत्र हि वटे यक्षोऽस्ति वा नेति वा
को जानाति कदा च केन कलितं यक्षस्य कीदृग्वपुः ॥

सत्यम् । अपि चागमात्पृथङ्नैतिह्यमुपदेशरूपत्वात् । आप्तग्रहणं सूत्रे न लक्षणायेति वक्ष्यामः ।

प्रमाणसंख्याविषये चार्वाकमतसमालोचनम्

चार्वाकधूर्त्तस्तु 'अथातस्तत्त्वं व्याख्यास्यामः' इति प्रतिज्ञाय प्रमाण-प्रमेयसंख्यालक्षणनियमाशक्यकरणीयत्वमेव तत्त्वं व्याख्यातवान् । प्रमाण-संख्यानियमाशक्यकरणीयत्वसिद्धये च प्रमितिभेदान् प्रत्यक्षादिप्रमाणानुपजन्यान् ईदृशानुपादर्शयत् ।

वक्राङ्गुलिः प्रविरलाङ्गुलिरेष पाणि-
रित्यस्ति धीस्तमसि मीलितचक्षुषो वा ।

आख्यायि 'खार्यां खलु द्रोणः सम्भवति' इति आख्यायि आख्यातं केनचित् । अत आगमात् सम्बन्धग्रहणमत्र ।

आप्तग्रहणं सूत्र इति । तत्र ह्युपदेश इत्युक्ते लक्षणमविनिश्चितं स्यात् । न ह्युप-देशमात्रस्याव्यभिचारादिविशिष्टप्रमाजनकत्वं सम्भवतीति कथं तस्यैवंरूपता निश्चीये-तेत्यविनिश्चितत्वमायातं लक्षणस्य, आप्तग्रहणन्तु तद्विनिश्चयाय कृतम्, अस्त्याप्तसम्बध्यु-पदेश एवंरूप इत्येवमर्थम्, न लक्षणायेति । चार्वाकधूर्तस्त्विवति । उद्भटः । स हि लोकायतसूत्रेषु विवृतिं कुर्वन् 'अथातस्तत्त्वं व्याख्यास्यामः' 'पृथिव्यापस्तेजोवायुरिति' सूत्रद्वयं यथाश्रुतार्थत्यागेनान्यथा वर्णयामास । प्रथमसूत्रे तत्त्वपदेन प्रमाणप्रमेयसङ्ख्यालक्षण-नियमाशक्यकरणीयतामाह, द्वितीयसूत्रमपि प्रमेयानियमप्रतिपादकं तेन व्याख्यातम् । तत्र हि 'पृथिव्यापस्तेजोवायुरिति' य 'इति'शब्दः स एवंप्रायप्रमेयान्तरोपलक्षणत्वेन तस्याभिमतः ।

नेयं त्वगिन्द्रियकृता न हि तत्करस्थं
तत्रैव हि प्रमितिमिन्द्रियमादधाति ॥

दूरात्करोति निशि दीपशिखा च दृष्टा
पर्यन्तदेशविसृतासु मतिं प्रभासु ।

धत्ते धियं पवनकम्पितपुण्डरीक-
षण्डोऽनुवातभुवि दूरगतेऽपि गन्धे ॥

स एवंप्रायसंवित्तिसमुत्प्रेक्षणपण्डितः ।
रूपं तपस्वी जानाति न प्रत्यक्षानुमानयोः ॥

प्रत्यक्षाद् विरलकराङ्गुलिप्रतीति-
र्व्यापित्वादकुशलमिन्द्रियं न तस्याम् ।

आनाभेस्तुहिनजलं जनैः पिबद्भि-
स्तत्स्पर्शः शिशिरतरोऽनुभूयतेऽन्तः ॥

संयोगबुद्धिश्च यथा तदुत्था
तथैव तज्जा तदभावबुद्धिः ।

क्रियाविशेषग्रहणाच्च तस्मा-
दाकुञ्चितत्वावगमोऽङ्गुलीनाम् ॥

न हि तत्करस्थं तत्रैवेति। न हि चक्षुः स्वगोलक एव प्रतीतिं जनयेदित्यभिप्रायः। **व्यापित्वादकुशलमिन्द्रियमिति**। अस्यार्थः न हि त्वग्गतमेवेन्द्रियं तत्रैव त्वचि प्रतीतिमादधाति इति ब्रूमो येन चक्षुषि तथा अदर्शनादयुक्ततोच्येत, किन्त्वन्तर्गतं व्यापि यदिन्द्रियं तद् बहिस्त्वग्गतस्य वक्राङ्गुलित्वादेः क्रियाविशेषावगमं जनयद् ग्राहकम्। नन्वन्तर्गतस्य त्वगिन्द्रियस्य ग्राहकत्वं क्व दृष्टमित्याह **आनाभेस्तुहिनजलमिति**। ननु द्रव्यान्तरेण संयोगोऽङ्गुलीनामन्तस्त्वगिन्द्रियेण गृह्यतां नाम अन्तःप्रविष्टेनेवोदकेन, विरलाङ्गुलित्वन्तु संयोगाभावः कथं गृह्येतेत्याह **संयोगबुद्धिश्चेति**। यथा संयुक्ता अङ्गुल्य इमा इति चाक्षुषी बुद्धिरेवं विरला अङ्गुल्य इति, चक्षुष एव तत्रापि व्यापाराविशेषात्। एवं सन्तमसे यथा अङ्गुलिसंयोगग्राहि त्वगिन्द्रियं तथा तत्संयोगाभावरूपविरलताग्राह्यपि तदेव भविष्यतीत्यर्थः। आकुञ्चितत्वस्य तर्हि वक्रत्वापरपर्यायस्य कथं तेन ग्रहणमिति। तत्राप्याह **क्रियाविशेषग्रहणादिति**। तस्मात् त्वगिन्द्रियादेव क्रिया-

पद्मामोदविदूरदीपकविभाबुद्धिः पुनर्लैङ्गिकी
व्याप्तिज्ञानकृतेति का खलु मतिर्मानान्तरापेक्षिणी ।
संख्याया नियमः प्रमाणविषये नास्तीत्यतो नास्तिकै-
स्तत्सामर्थ्यविवेकशून्यमतिभिर्मिथ्यैव विस्फूर्जितम् ॥
ईयत्त्वमविलक्षणं नियतमस्ति मानेषु नः
प्रमेयमपि लक्षणादिनियमान्वितं वक्ष्यते ।
अशक्यकरणीयतां कथयतान्तु तत्त्वं सतां
समक्षममुनात्मनो जडमतित्वमुक्तं भवेत् ॥

इति श्रीजयन्तभट्टकृतायां न्यायमञ्जर्यां प्रथममाह्निकम् ।

विशेषस्याङ्गुलिगतस्याकुञ्चनाख्यस्य कर्मविशेषस्य विशेषणभूतस्यावगमः । आकुञ्चिता अङ्गुल्य इति विशेष्यज्ञानं यत् तत् तज्जमेव । यथा चक्षुषा चैत्रगतं चलनमुपलभ्य चलत्ययं चैत्र इति विशेष्यज्ञानं चाक्षुषमेवमिदमपीति सिद्धम् ।

भट्टश्रीशङ्करात्मजश्रीचक्रधरकृते
न्यायमञ्जरीग्रन्थिभङ्गे प्रथममाह्निकम् ॥

द्वितीयमाह्निकम्

तत्र प्रत्यक्षलक्षणम्

एवं प्रमाणानां सामान्यलक्षणे विभागे च निर्णीते सति अधुना विशेषलक्षणवर्णनावसर इति सकलप्रमाणमूलभूतत्वेन पूर्वपठितत्वेन च ज्येष्ठत्वात् प्रथमं प्रत्यक्षस्य लक्षणं प्रतिपादयितुमाह

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥

प्रत्यक्षमिति लक्ष्यनिर्देशः। इतरल्लक्षणम्। समानासमानजातीयव्यवच्छेदो लक्षणार्थः। समानजातीयं प्रमाणतया अनुमानादि, विजातीयं प्रमेयादि, ततो व्यवच्छिन्नं प्रत्यक्षस्य लक्षणमनेन सूत्रेणोपपाद्यते।

प्रत्यक्षलक्षणे सूत्रितार्थविषये पूर्वपक्षः

अत्र चोदयन्ति इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणैः स्वरूपं वा विशिष्यते, सामग्री वा, फलं वा। तत्र स्वरूपविशेषणपक्षे यद् एवंस्वरूपं ज्ञानं तत्प्रत्यक्षमिति तत्स्वरूपस्य विशेषितत्वात् फलविशेषणानुपादानाच्च लक्षणमव्याप्त्यतिव्याप्तिभ्यामुपहतं स्यात्। अव्याप्तिस्तावद् अतथाविधस्वरूपस्य बोधस्येन्द्रियादेश्च

घोरे जगज्जलनिधौ भवतो ययामी
मज्जन्ति न स्मृतिपथप्रतिपन्नयापि।
सा काप्यचिन्त्यचरितस्य विचित्ररूपा
शक्तिर्जयत्युडुपखण्डभृतो भवस्य ॥
प्रज्ञोन्मेषपटु प्रपञ्चय वचो बौद्ध, त्वमप्युद्भटा-
श्चार्वाक स्वविकल्पजालजटिलाः स्वैरं गिरः स्फारय।
रे मीमांसक साङ्ख्य जैन भवतां यत् सम्मतं ब्रूहि तत्
स्वातन्त्र्यान्मम रोचते न हि न हि त्र्यक्षादृतेऽन्यः प्रभुः ॥

ॐ नमः शिवाय। अतथाविधस्वरूपस्येति। संशयविपर्ययात्मकस्येत्यर्थः।

निर्मलफलजनकतया लब्धप्रमाणभावस्यापि प्रामाण्यं नोक्तं भवेत् । अतिव्याप्तिश्च तथाविधस्वरूपस्यापि ज्ञानस्याकारस्य वा, संस्कारकारिणो वा, स्मृतिं जनयतो वा, संशयमादधानस्य वा, विपर्ययमुत्पादयतो वा प्रमाणत्वं प्राप्नोति, फलस्याविशेषितत्वात् । तद्विशेषणाभिधाने पुनरश्रुतसूत्रान्तराध्याहारप्रसक्तिः । अव्याप्तिश्च तदवस्थैवेति न स्वरूपविशेषणपक्षः । नापि सामग्रीविशेषणपक्षः । तत्र ह्यीन्द्रियार्थसन्निकर्षोत्पन्नमिति इन्द्रियार्थसन्निकर्षोपपन्नं सामग्र्यमिति व्याख्यातव्यम् । अव्यपदेश्यमव्यभिचारि व्यवसायात्मकं ज्ञानमिति च तज्जनकत्वादुपचारेण तथा साकल्यं वर्णनीयमिति क्लिष्टकल्पना । फलविशेषणपक्षोऽपि न सङ्गच्छते । ज्ञानप्रत्यक्षयोः फलकरणवाचिनोः सामानाधिकरण्यप्रसङ्गात् । प्रमाणलक्षणप्रस्तावात् प्रत्यक्षं फलमिति कथमैकाधिकरण्यम् । तस्मात् पक्षत्रयस्याप्ययुक्तियुक्तत्वात् पक्षान्तरस्याप्यसम्भवादयुक्तं सूत्रमिति ।

तत्र सिद्धान्तपक्षः

अत्रोच्यते । स्वरूपसामग्रीविशेषणपक्षौ तावद्यथोक्तदोषोपहतत्वान्नाभ्युपगम्येते । फलविशेषणपक्षमेव संमन्यामहे । तत्र च यद् वैयधिकरण्यं चोदितम् तद्यतःशब्दाध्याहारेण परिहरिष्यामः । यत एवं यद्विशेषणविशिष्टं ज्ञानाख्यं फलं भवति तत्प्रत्यक्षमिति सूत्रार्थः । इत्थश्च न क्वचिदव्याप्तिरतिव्याप्तिर्वा । न काचित् क्लिष्टकल्पना । यतःशब्दाध्याहारमात्रेण निरवद्यलक्षणोपवर्णनसमर्थसूत्रपदसङ्गतिसम्भवात् ।

करणं फलं वा प्रत्यक्षपदार्थः ?

ननु समानाधिकरण एव ज्ञानप्रत्यक्षपदे कथं न व्याख्यायेते ? किं यतःशब्दाध्याहारेण ? उक्तमत्र करणस्य प्रमाणत्वाज्ज्ञानस्य च तत्फलत्वात् फलकरणयोश्च स्वरूपभेदस्य सिद्धत्वात् । तदत्र

प्रमाणतायां सामग्र्यास्तज्ज्ञानं फलमिष्यते ।
तस्य प्रमाणभावे तु फलहानादिबुद्धयः ॥

अव्याप्तिश्च तदवस्थैवेति । संशयादेस्तथाविधफलजनकत्वेऽप्यप्रामाण्यप्रसक्तेः ।

आलोचनज्ञानस्य हानादिफलकत्वे शङ्का

ननु स्मृत्याद्यनेकबुद्धिव्यवधानसम्भवात् कथमिन्द्रियार्थसन्निकर्षोत्पन्नमालोचनाज्ञानं हानादिफलं भवेत् ? तथा हि कपित्थादिजातीयमर्थमिन्द्रियादिसन्निकर्षादिसामग्रीत उपलभ्य तद्गतं सुखसाधनत्वमनुस्मरति 'एवञ्जातीयकेन मम पूर्वं सुखमुपजनितमभूदिति' ततः स्मृत्यनन्तरं परामर्शज्ञानमस्योपजायते 'अयञ्च कपित्थजातीय' इति, परामर्शानन्तरं सुखसाधनत्वनिश्चयो भवति तस्मादेष सुखसाधनमिति, तत उपादेयज्ञानमुत्पद्यते, यत एष सुखसाधनं कपित्थादिजातीयः पदार्थस्तस्मादुपादेय इति। अत्रान्तरे प्रथमस्येन्द्रियार्थसन्निकर्षजन्मनः कपित्थालोचनज्ञानस्य नामापि नावशिष्यत इति कथमस्य तत्फलत्वमिति।

तत्र न्यायवार्त्तिकटीकाकर्तृ रुचिकारप्रभृतीनां मतम्

अत्राचार्यास्तावदाचक्षते 'साधु चोदितम्'। सत्यम्, ईदृश एवायं ज्ञानानां क्रमः। न वयं प्रथमालोचनज्ञानस्य उपादानादिषु प्रमाणतां ब्रूमः। तथा हि प्रथममिन्द्रियार्थसन्निकर्षोत्पन्नमालोचनज्ञानमिन्द्रियार्थसन्निकर्षादिसामग्रीस्वभावस्य प्रत्यक्षस्य प्रमाणस्य फलमेव, न तु स्वयं प्रमाणतां प्रतिलभते, स्मृतिजनकत्वात्। तदनन्तरं हि सुखसाधनत्वस्मृतिर्भवतीति, सेयमनुस्मृतिरप्रमाणफलमपि सती प्रत्यक्षप्रमाणं सम्पद्यते। तथा 'अयं कपित्थादिजातीय' इतीन्द्रियविशेषपरामर्शोत्पत्तौ इन्द्रियार्थसन्निकर्षेण सह व्याप्रियमाणत्वात् स पुनः परामर्शप्रत्ययः प्रत्यक्षजनितो धूमज्ञानवदनुमानं प्रमाणमुच्यते, परोक्षस्याग्नेरिव सुखसाधने सामर्थ्यस्य ततोऽवगतेः। यद्यपि न काचिदतीन्द्रिया शक्तिरस्मन्मते विद्यते, तथापि स्वरूपसहकार्यादिदृष्टकारणसमूहसन्निधानस्वभावमपि सामर्थ्यमतीन्द्रियमेव। तस्मादेष कपित्थादिजातीयोऽर्थः सुखसाधनमिति वह्निमत्पर्वतप्रतीतिवत्तज्जातीयलिङ्गकमानुमानिकमिदं ज्ञानम्। तदिदमनुमानफलमपि सुखसाधनत्वनिश्चयात्मकं ज्ञानमिन्द्रियविषये कपित्थादावुपादेयज्ञानमिन्द्रियार्थसन्निकर्षेण सह

अत्राचार्यास्तावदिति। वक्ष्यमाणव्याख्यातृमतापेक्षया तावच्छब्दप्रयोगः। इह च सर्वत्राचार्यशब्देन उद्द्योतकरविवृतिकृतो रुचिकारप्रभृतयो विवक्षिताः, व्याख्यातृ-

जनयत्प्रत्यक्षं प्रमाणं भवति। तदेव च हृदि व्यवस्थाप्य भाष्यकृद् बभाषे 'यदा ज्ञानं वृत्तिस्तदा हानोपादानोपेक्षाबुद्धयः प्रमितिरिति'।

तत्रैव वात्स्यायनभाष्यविवरणकाराणां प्रवरप्रभृतीनां मतम्

व्याख्यातारस्तु ब्रुवते, नायमीदृशो ज्ञानानां क्रमः। आद्यम्, आलोचनाज्ञानं-सुखसाधनत्वानुस्मृतिमुपजनयतीति सत्यम्। स्मृत्या च तस्य विनश्यत्ता। विनश्यदवस्थश्चेन्द्रियविषये कपित्थादौ सुखसाधनत्वनिश्चयमादधाति। सुखसाधनत्वज्ञानमेव चोपादेयज्ञानमुच्यते नान्यत्, परामर्शस्तु न कश्चिदन्तराले इति किमसंवेद्यमानज्ञानकन्थाकल्पनेनेति।

हानादिफलके प्रत्यक्षे चक्षुःसन्निकृष्टे उपादेयतास्मरणात्मकपरामर्शस्याप्रत्याख्येयत्वम्

ननु परामर्शज्ञानमनुभूयत एव, न तु कल्प्यते। धूमज्ञानानन्तरमविनाभावं यत्र धूमस्तत्राग्निरित्यनुस्मृत्य परामृशति तथा चायं धूम इति। असति तु परामर्शे न लिङ्गज्ञानं लिङ्गिनि प्रमाणतां प्रतिपद्येत। स्मरणजनकं हि तत्। न च स्मृतिजनकं प्रमाणमिष्यते। स्मरणानन्तरश्च लिङ्गप्रतीतिर्भवन्ती नोपलभ्यानुवादेन भवेद् अयमग्निमानिति। अपि च तथा च कृतकः शब्द इति यदुपनयवचनमवयवेषु पठ्यते तस्य किं वाच्यं भविष्यति परामर्शापलापवादिनाम्? स्वप्रति-

---

शब्देन च भाष्यविवरणकृतः प्रवरप्रभृतय इति। **यदा ज्ञानं वृत्तिरिति**। भाष्यकृता हि "अक्षस्याक्षस्य प्रतिविषयं या वृत्तिः सा प्रत्यक्षम्" इत्यभिधाय "वृत्तिस्तु सन्निकर्षो ज्ञानं वा" इत्युक्तम्, "यदा ज्ञानं वृत्तिः" इत्याद्यभिहितम्। इन्द्रियस्य हि विषयं प्रति वृत्तिर्व्यापारः, कदाचित् तेन सन्निकर्षोऽथवा तद्विषयज्ञानजननमिति।

स्मृत्या च तस्य विनश्यत्ता। स्मृतेर्ज्ञानरूपत्वाज्ज्ञानस्य च ज्ञानान्तरविरोधित्वात्

उपलभ्यानुवादेनेति। स्मरणानन्तरं परामर्शानभ्युपगमे धूमज्ञानस्य विनष्टत्वात् स धूमोऽग्निमानित्युपलब्धधूमानुवादेन प्रतीतिः स्यात् नत्वयं धूमोऽग्निमानित्युपलभ्यमानधूमानुवादेनेत्यर्थः। यदा धूम एवाग्निमत्तया साध्यते तदैवम्, यदा तु पर्वतस्तदापि स धूमवान् प्रदेशोऽग्निमानिति स्यान्न त्वयमिति।

पत्तिवच्च परप्रतिपत्तिरवयवैर्जन्यत इति वक्ष्यामः। तस्मादप्रत्याख्येयः परामर्श इति।

तत्र सिद्धान्तः

अत्र वदन्ति

न तावदन्तरा कश्चित् परामर्शोऽनुभूयते।
अनुमेयमितेः पूर्वमूर्ध्वञ्च निगमे स्मृतेः॥
अत एवार्थमालोक्य विनैव हि दवीयसा।
बिलम्बेन व्यवस्यन्ति ग्रहणादिषु लौकिकाः॥

लिङ्गज्ञानञ्च विनश्यदवस्थमनुमेयप्रतीतौ व्याप्रियमाणं प्रमाणतां प्रतिपत्स्यते। तत्कृतैवोपलभ्यानुवादेन लिङ्गिबुद्धिर्भविष्यति। तस्मात् कपित्थादिपदार्थदर्शनस्य परामर्शसोपानमनारोहत एवोपादेयज्ञानफलता वक्तुं युक्तेति।

अपि च अनुमेयविषये वह्न्यादौ सुखसाधनत्वानुस्मृतिकृतमुपादेयताज्ञानं तव न समस्त्येव। ततश्च तत्रापि 'तथा चायं ज्वलनजातीय' इति परामर्शो भवताऽभ्युपेय एव। स च किंकरणक इति निरूपणीयम्। न तावदिन्द्रियद्वारकः, पावकस्य परोक्षत्वात्, शब्दोपमाने त्वाशङ्कितुमपि तत्र न युक्ते। धूमाख्याल्लिङ्गादेव स उत्पद्यत इति चेन्न। लिङ्गस्य परामर्शाविषयीकृतस्यानुमेयमितिजनननैपुणानभ्युपगमात्। धूमावमर्शस्य च तदानीमतिक्रान्तत्वात्। तथा हि प्रथमं लिङ्गज्ञानम्, ततो व्याप्तिस्मरणम्, ततो धूमपरामर्शः, ततो बह्निज्ञानम्, तेन धूमपरामर्शस्य विनश्यत्ता, ततोऽग्नौ सुखसाधनत्वानुस्मरणम्, तदा च धूमपरामर्शस्य विनाश एवेति। तस्मिन् विनष्टे न केवलो धूमस्तदानीमनलपरामर्शं जनयितुमुत्सहते।

अग्नौ सुखसाधनत्वानुस्मरणानन्तरं पुनर्धूमज्ञानमिन्द्रियादुत्पद्यत इति चेन् मैवम् अननुभवात्। भवतु वा धूमज्ञानं तथापि धूमज्ञानानन्तरं पुनर्व्याप्तिस्मृतिः, पुनर्धूमपरामर्शश्चावश्यं भवेद् इत्यत्रान्तरे हुतभुजि सुखसाधनत्वानु-

---

ननु वह्निज्ञानानन्तरं धूमपरामर्शस्मरणम्, ततोऽग्नौ सुखसाधनत्वस्मरणम्, तेन धूमपरामर्शस्मरणस्य विनश्यत्ता, ततो विनश्यदवस्थपरामर्शसहितात् सुखसाधनत्वस्मरणादग्नौ तज्जातीयत्वपरामर्शः, तस्माद् विनश्यदवस्थाच्च सुखसाधनत्वानुस्मरणात्

स्मृतिरतिक्रान्तेति तत्सहायपरामर्शज्ञानजन्यसुखसाधनत्वनिश्चयोत्पादो न स्यात् । सुखसाधनत्वानुस्मरणेन हि विनश्यदवस्थेन जन्यमानः प्रत्यक्षविषयेऽसौ दृष्ट इति ।

अथ मन्यसे, न तदानीं पुनर्धूमज्ञानव्याप्तिस्मरणतत्परामर्शोत्पादादिज्ञानशृङ्खलाभ्युपेयते, किं तु प्राक्तन एव धूमपरामर्शः कृशानौ सुखसाधनत्वानुस्मरणान्तरं स्मरिष्यते, तेन स्मृतिविषयवर्त्तिना सता 'तथा चायमग्निजातीय' इति ज्वलनपरामर्शो जनयिष्यत इति, एतदप्ययुक्तम् । अग्निज्ञानानन्तरं युगपत् स्मरणद्वयोदयप्रसङ्गात् तदैव सुखसाधनतानुस्मृतिः तदैव धूमपरामर्शस्मृतिरिति । न हि क्रमोत्पादे किञ्चित् कारणमस्ति, ज्ञानयौगपद्यञ्च शास्त्रे प्रतिषिद्धम् । भवतु वा क्रमोत्पादः, तदापि स्मरणद्वयसमनन्तरमुपजायमानः पावकपरामर्शो नोपलभ्यानुवादेन जायते । क्रमपक्षेऽपि च वह्निज्ञानानन्तरं तद्गतसुखसाधनत्वानुस्मरणमेव पूर्वं भवेत्, ततो धूमपरामर्शस्मरणम्, तेन तस्य विनश्यत्ता, ततोऽग्नौ तज्जातीयत्वपरामर्शः, तेन सुखसाधनत्वस्मृतेर्विनाश एवेति पुनरपि सा विनष्टा सती सुखसाधनत्वानुस्मृतेर्निश्चयजन्मनि न व्याप्रियेतेति । न च धूमलिङ्गानुमितवह्निज्ञानानन्तरं धूमस्मरणमुचितम्, अनलमुपलभ्य हि तद्गतसुखसाधनत्वमनुस्मरति लोको न धूममिति ।

तेनानुमानविषये परामर्शोऽतिदुर्घटः ।
प्रत्यक्षविषयेऽप्येवं किमनेन शिखण्डिना ॥

यत्पुनरुपनयवचनमभिधेयरहितमप्रयोज्यं प्रसज्यत इति परिचोदितम्, तदवयवप्रसङ्ग एव निरूपयिष्यामः । तस्मादन्तरावर्त्तिनः परामर्शज्ञानस्याभावादाद्यमालोचनाज्ञानमेव हेयादिज्ञानफलं यथोक्तरीत्या भविष्यतीति ।

सुखसाधनत्वनिश्चयो भविष्यतीत्याशङ्क्याह **न च धूमलिङ्गानुमितवह्निज्ञानानन्तरमिति** ।

किमनेन शिखण्डिनेति । अकिञ्चित्करत्वं परामर्शस्याह । यथा भीष्मवधः किरीटिनैव सम्पादितो मध्ये त्वकिञ्चित्करः शिखण्डी कृत इति ।

ननु च प्रत्यक्षफलमिह मीमांस्यं वर्त्तते। स चायं सुखसाधनत्वनिश्चयः तज्जातीयत्वाल्लिङ्गादुद्गम्यमान आनुमानिक इति न प्रत्यक्षफलतामवलम्बते। सत्यमेतत्, किन्तु सम्बन्धग्रहणसमये सुखसाधनत्वनिश्चयः प्रत्यक्षजनितोऽपि समस्ति यतोऽनुमानं प्रवर्त्तते, महानसादौ धूमाग्निदर्शनवत्। अतः सम्बन्धग्रहणकालभाविनं सुखसाधनत्वनिश्चयं चेतसि निधाय भाष्यकारस्तत्फलं प्रत्यक्षज्ञानस्य वर्णितवानिति।

शक्तेः प्रत्यक्षग्राह्यत्वम्

ननु सम्बन्धग्रहणकालेऽपि सुखसाधनत्वशक्तेरतीन्द्रियत्वात् कथं प्रत्यक्षगम्यता? तज्जातीयत्वाल्लिङ्गादेव तदापि तद्ग्रहणे इष्यमाणे, ततः पुनः सम्बन्धग्रहणापेक्षणादनवस्था। सुखादेव कार्यात् तदा तदवगम इति चेत् तदापि नाज्ञातसम्बन्धमवगतिजननसमर्थमिति तत्सम्बन्धग्रहणवेलायामपि शक्तिग्रहणे प्रत्यक्षस्याक्षमत्वादनुमानान्तरापेक्षायामनवस्था तदवस्था। उच्यते

न खल्वतीन्द्रिया शक्तिरस्माभिरुपगम्यते।
यया सह न कार्यस्य सम्बन्धज्ञानसम्भवः॥

स्वरूपसहकारिसन्निधानमेव शक्तिः। सा च सुगमैव।

ननु सहकारिणां मध्येऽदृष्टमप्यनुप्रविष्टम्, न च तत्प्रत्यक्षगम्यम्, अतीन्द्रियत्वाद्धर्मस्येति, सापि न सुगमा शक्तिः नैतत् न धर्मादेः शक्तित्वादतीन्द्रियत्वम् अपि तु तन्नैसर्गिकमेव, जगद्वैचित्र्येण च तदनुमानं वक्ष्यामः। तदेवं तदितरसहकारिस्वरूपसन्निधानात्मिकायाः शक्तेः प्रत्यक्षग्राह्यत्वसम्भवादुपपन्नं तज्जातीयत्वलिङ्गस्य सम्बन्धग्रहणम्।

पुनः सम्बन्धग्रहणापेक्षणादनवस्थेति। तज्जातीयत्वस्य लिङ्गस्य तेन सह गृहीतसम्बन्धस्य तद्गमकत्वम्। न च सुखसाधनत्वस्यायथाग्रहणं सम्भवतीति पुनस्तस्मादेव लिङ्गात् तदवगमे तावत्सम्बन्धग्रहणापेक्षित्वं यावज्जातमात्रस्य सुखहेतुत्वावगमः। तत्रापि जन्मान्तरे लिङ्गलिङ्गिनोरविनाभावग्रहणे जातमात्रस्यापि तस्मादेव लिङ्गादवगतिः, जन्मान्तरेऽप्येवमेवेत्यनवस्था।

न खल्वतीन्द्रिया शक्तिरिति। ननु यद्यतीन्द्रिया नाभ्युपगम्यते शक्तिः कथं तर्ह्यदृष्टस्य शक्तित्वमिति। तत्राह **न धर्मादेः शक्तित्वादतीन्द्रियत्वमिति**।

सम्बन्धस्य प्रत्यक्षगम्यत्वविचारः

ननु कपित्थादिकार्यस्य सुखस्येदानीं न चक्षुर्ग्राह्यत्वमिति सम्बन्धिग्रहणाभावात् कथं चाक्षुषप्रत्ययगम्यः सम्बन्धः ? न चाक्षुषप्रत्यक्षगम्यः सम्बन्धः, किन्तु मानसप्रत्यक्षगम्यः ।

सुखादि मनसा बुद्ध्वा कपित्थादि च चक्षुषा ।
तस्य कारणता तत्र मनसैवावगम्यते ॥

ननु च मनसा कपित्थादेः सुखसाधनत्वग्रहणाभ्युपगमे बाह्यविषयप्रमितिषु मन एव निरङ्कुशं करणमिदानीं संवृत्तमिति कृतं चक्षुरादिभिः, अतश्च न कश्चिदन्धो बधिरो वा स्यात् ?

नैष दोषः प्रथमप्रवृत्तसमनस्कबाह्येन्द्रियजनितविज्ञानविषयीकृतवपुषा बाह्यस्य वस्तुनो मनोग्राह्यत्वाभ्युपगमात् तस्यैव नियामकत्वान्नाभृङ्खलमन्तःकरणं बाह्यविषये प्रवर्त्तते ।

ननु च सम्बन्धग्रहणकाले यदि मानसेन प्रत्यक्षेण सुखसाधनत्वावधारणम्, तर्हि तत्काल इव व्यवहारकालेऽपि मानसप्रत्यक्ष एव सुखसाधनत्वनिश्चयोऽस्तु, किं तज्जातीयत्वलिङ्गापेक्षणेनेति ? मैवम् । शब्दलिङ्गेन्द्रियाद्युपरतौ केवलमन्तःकरणं करणं कल्प्यते, परिदृश्यमानायाः प्रतीतेरपह्नोतुमशक्यत्वात् । लिङ्गाद्युपायान्तरसम्भवे तु यदि मन एव केवलं कारणमुच्यते, तन्मानसमेवैकं प्रमाणं स्यान् न चत्वारि प्रमाणानि भवेयुरित्यलं प्रसङ्गेन ।

तस्मात्सम्बन्धग्रहणकाले यत्तत्कपित्थादिविषयमक्षजं ज्ञानं तदुपादेयादिज्ञानफलमिति, भाष्यकृतश्चेतसि स्थितम् । सुखसाधनत्वज्ञानमेवोपादेयादिज्ञानमित्युक्तम् ।

प्रमाणतत्फलयोरभेदशङ्कानिरासः

आह किमर्थमयमीदृशः क्लेश आश्रीयते ? प्रमाणादभिन्नमेव फलमस्तु । तदेव चक्षुरादिजनितं कपित्थादिपदार्थदर्शनं विषयप्रकाशेन व्याप्रियमाणमिवाभातीति करणमुच्यताम् । तदेव विषयानुभवस्वभावत्वात् फलमिति कथ्यताम् । इत्थञ्च प्रमाणफले न भिन्नाधिकरणे भविष्यतः, अन्यत्र प्रमाणमन्यत्र फल-

---

इत्थञ्च प्रमाणफले न भिन्नाधिकरणे भविष्यत इति । अनेन लोकप्रसिद्ध्यानुगुण्यमस्य पक्षस्य दर्शयति । लोके हि परशुनिपातस्य करणस्य छिदेश्च फलस्यैकवृक्षगत-

मिति । तदुक्तम् 'सव्यापारप्रतीतत्वात् प्रमाणं फलमेव सत्' इति ।

तदिदमनुपपन्नम्, प्रमाणस्य स्वरूपहानिप्रसङ्गात् । करणं हि प्रमाणमुच्यते प्रमीयते चानेनेति । न च क्रियैव क्वचित् करणं भवति । क्रियायां साध्यायां कारक किमपि करणमुच्यते । तत्र यथा दात्रेण चैत्रः शालिस्तम्भं लुनातीति कर्तृकर्मकरणानि क्रियातो भिन्नान्युपलभ्यन्ते, तथेहापि चक्षुषा घटं पश्यतीति दर्शनक्रियातः पृथग्भाव एव तेषां युक्तो न दर्शनं करणमेवेति । प्रमा प्रमाणमिति तु फले प्रमाणशब्दस्य साधुत्वाख्यानमात्रं कृतिः करणमितिवत् ।

यत्तु न भिन्नाधिकरणे प्रमाणफले इत्थं भविष्यत इति सेयमपूर्ववाचोयुक्तिः । किमत्राधिकरणं विवक्षितम् ? यदि तावद्विषयस्तदस्त्येवैकविषयत्वम् । यद्विषयं हि दर्शनं स एव चक्षुरादेः करणस्य विषयः । आश्रयोऽस्त्वधिकरणमिति बौद्धगृहे तावदवाचको ग्रन्थः, क्षणिकत्वेन सर्वकार्याणां निराधारत्वात् । अस्मत्पक्षे तु भिन्नाश्रययोरपि फलकरणभावः पाककाष्ठयोर्दृष्टः । तथा चक्षुर्ज्ञानयोरपि भविष्यतीति । क्वचित्तु भिन्नयोरपि ज्ञानयोः फलकरणत्वेन स्थितयोर्लिङ्गलिङ्गिज्ञानयोरिव विशेषणविशेष्यज्ञानयोरिव चैकात्माश्रयत्वमस्ति । नत्वनेन समाना-

---

त्वेन दर्शनात्, इहापि तत्रैव ज्ञाने करणत्वं फलत्वञ्चेति । **सव्यापारप्रतीतत्वादिति** । नियतार्थाधिगमे सव्यापारस्य नियतार्थपरिच्छेदाख्यव्यापारवतः प्रतीतत्वादुपलब्धत्वात् फलमेव सत् प्रमाणमिति भण्यते । इदमेव हि दात्रादेः करणस्य करणत्वं यत् क्रियायां व्यापृतत्वम् । नन्वर्थपरिच्छेदात्मकत्वाज्ज्ञानस्य कथं स्वात्मन्येव व्यापृतत्वोक्तिः ? अस्त्येतत्, किन्तु यदा अर्थाकारानुकारि ज्ञानमुत्पद्यते तदैवमुपचर्यते । यथा पितृसदृशमपत्यमुपलभ्य पितुरनेन रूपं गृहीतमिति लोको व्यपदिशति, अथ च नानेन किञ्चिद्रूपं गृहीतम्; एवं नियतार्थाकारं ज्ञानमुपलभ्यार्थग्रहणे व्यापृतवमर्थोऽनेन गृहीतम् इत्येवं कल्पयति । यदाह

यथा फलस्य हेतूनां सदृशात्मतयोद्भवात् ।
हेतुरूपग्रहो लोकेऽक्रियावत्त्वेऽपि दृश्यते ॥ इति ॥

कृतिः करणमिति । यथा भावे सिद्ध्यतोऽपि करणशब्दस्य, न कारकस्याधिकारे ग्रहणमिति भावः ।

श्रयत्वेन प्रयोजनं चक्षुरादावनिर्वहणात् । अथैकफलनिष्पत्तौ व्यापारः समानाश्रयत्वमुच्यते, तदपि भवतु कारकान्तराणाम्, न तु फलस्वभावस्य ज्ञानस्य फलनिष्पत्तौ सव्यापारत्वमुपपद्यते, अपि तु पृथग्भूतफलनिर्वर्तकत्वेनैवेति ।

ननु वस्तुस्थितया फलमेव ज्ञानमुच्यते, न तु विषयानुभवः, विषयानुभवे स व्यापारो भवति । अथ मनुषे विषयाधिगमाभिमानस्तस्मिन् सति भवतीति, कोऽयमभिमानो नाम ? विषयानुभवाद्भिन्नः, अभिन्नो वा । अभेदे सति तस्मिन् सति भवतीत्यसङ्गता वाचोयुक्तिः । भेदे त्वस्मन्मतानुप्रवेशः । अपि च ज्ञानं विषयाधिगमे व्यापृतमिति कृत्वा विषयाधिगमाभिमानमुपजनयत्युत विषयाधिगमस्वभावत्वादेवेति विचारे विषयाधिगमात् पृथग्भूतस्य तत्र व्याप्रियमाणस्यानुपलम्भाद्विषयाधिगमस्वभावमेव ज्ञानमवधार्यते तत्कृतश्चाभिमान इति, फलमेव ज्ञानमवकल्पते न करणमिति । तथा च लोकः फलत्वमेव ज्ञानस्यानुमन्यते न करणत्वम् । तथा ह्येवं वदति 'चक्षुषा पश्यामि' 'लिङ्गेन जानामी'ति न तु ज्ञानेन जानामीत्येवं व्यपदिशन् कश्चिद् दृश्यते ।

ननु च सत्स्वपि चक्षुरादिषु विषयज्ञानमनुपजनयत्सु न करणतां व्यपदिशति लोको, जनयत्सु च व्यपदिशतीति, लोके करणोत्पादकत्वादेव तेषां करणत्वव्यपदेशो न साक्षात्करणत्वादिति ।

तदयुक्तम् । चक्षुराद्येव करणम्, न तु तेनान्यत्करणमुपजन्यते । किं हि तदन्यत्करणम् ? ज्ञानमिति चेत्, कस्यां क्रियायां तत्करणमिति परीक्ष्यतामेतत् । न ह्यात्मन्येव किञ्चित् करणं करणं भवतीति । यत्तु ज्ञानमजनयति चक्षुरादौ न करणतामाचष्टे लोकस्तद्युक्तमेव । न हि क्रियोत्पत्तावव्याप्रियमाणं करणं कारकं भवति । तेन चक्षुरादेर्ज्ञानक्रियामुपजनयतः करणत्वम्, ज्ञानस्य फलत्वमेवेति युक्तस्तथाव्यपदेशः ।

प्रमाणस्य प्रमाणत्वं तस्मादभ्युपगम्यताम् ।
भिन्नं फलमुपेतव्यमेकत्वे तदसम्भवात् ॥

विषयाधिगमाभिमान इति । अधिगतोऽयं मया घट इत्येवंरूपोऽत्राभिमानो विवक्षितः ।

यस्तु मूढतरः प्रमाणप्रमेयफलव्यवहारमेकत्रैव ज्ञानात्मनि निर्वाहयितुमुद्यच्छति

यदाभासं प्रमेयं तत्प्रमाणफलते पुनः ।
ग्राहकाकारसंवित्त्योस्त्रयं नातः पृथक् कृतम् ।। इति ।

तमपवर्गाह्निके ज्ञानाद्वैतदलनप्रसङ्गेन दुराचारं निर्भर्त्सयिष्यामह इत्यलं विस्तरेण ।

तस्मात् सुष्ठूक्तं 'यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलमि'ति, तदेवं फलविशेषणपक्षे 'यतः' शब्दाध्याहारेण वाचकं सूत्रम्, यत इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणविशेषितं ज्ञानाख्यं फलं भवति तत्प्रत्यक्षमिति । तत्रेन्द्रियार्थसन्निकर्षोत्पन्नपदमर्थानपेक्षजन्मनः स्मृत्यादिज्ञानस्य, अर्थजनितस्यापि च परोक्षविषयस्यानुमानादिज्ञानस्य व्यवच्छेदार्थम् । अतस्तज्जनकस्य न प्रत्यक्षता प्रसज्यते ।

प्रत्यक्षलक्षणेऽतिव्याप्तिनिरासः

नन्विन्द्रियार्थसन्निकर्षोत्पन्नमिन्द्रियगत्यनुमानमप्यस्ति, तद्धीन्द्रियार्थसन्निकर्षेण लिङ्गभूतेन जन्यते देशान्तरप्राप्त्येव तपनगमनानुमानम् इति कथमनेन पदेनानुमानमपाक्रियते ?

नैतदेवम् । इन्द्रियेण स्वविषयसन्निकृष्टेन सता तत्रैव यद्विज्ञानमुत्पद्यते तदिन्द्रियार्थसन्निकर्षोत्पन्नमिह ब्रूमहे, न चेदृशमिन्द्रियगत्यनुमानम् । कुतो विशेषप्रतिलम्भ इति चेद्, उत्पन्नग्रहणादिति ब्रूमः । उत्पन्नग्रहणेन हि सन्निकर्षस्य कारकत्वं ख्याप्यते, तच्चापीन्द्रियविषयेऽर्थे ज्ञानमुत्पादयतो निर्वहति, इन्द्रियगत्यनुमाने तु न सन्निकर्षं कारकमाहुरपि तु ज्ञापकम् । अत एव स्वग्रहणसापेक्षस्तदनुमानेऽसौ व्याप्रियते न रूपादिप्रमिताविव इतरनिरपेक्ष इति ।

यदाभासं प्रमेयं तदिति । आभासत इत्याभासो ग्राह्याकारः । य आभासो यस्मिंस्तद् यदाभासम्; यस्तत्र ज्ञाने ग्राह्याकारः प्रतिभाति तत् प्रमेयमित्यर्थः ।

इन्द्रियगत्यनुमानमप्यस्तीति । न हि गोलकस्थस्येन्द्रियस्यासत्यां गतौ बाह्येन विषयेण सन्निकर्ष उपपद्यत इति सन्निकर्षात् तद्गत्यनुमानम् ।

प्रत्यक्षलक्षणघटकपदार्थनिर्वचनम्

इन्द्रियाणि घ्राणरसननयनस्पर्शनश्रोत्राणि पृथिव्यादिभूतपञ्चकप्रकृतीनि वक्ष्यन्ते ।

अर्थास्तु गन्धरूपरसस्पर्शशब्दगन्धत्वादिस्वजात्यवच्छिन्नाः, तदधिकरणानि पृथिव्यप्तेजांसि द्रव्याणि, तदधिष्ठानाः संख्यादयो गुणाः, उत्क्षेपणादीनि कर्माणि, तद्वृत्तीनि सामान्यानि, येषां स्पर्शनेन चक्षुषा ग्रहणं कणव्रतमते निरूपितं तेऽर्थाः, प्रागुक्तश्चाभावोऽप्यर्थ एव, विचार्यं गम्यमानत्वात् ।

सन्निकर्षस्त्विन्द्रियाणामर्थैः सह षट्प्रकारः । तत्र द्रव्यं चक्षुषा, त्वगिन्द्रियेण वा संयोगाद् गृह्यते । तद्गतो रूपादिर्गुणः संयुक्तसमवायात् । रूपत्वादिसामान्यानि संयुक्तसमवेतसमवायाद् गृह्यन्ते । चक्षुषा संयुक्तं द्रव्यम्, तत्र समवेतं रूपम्, रूपे च समवेतं रूपत्वमिति । समवायाच्छब्दो गृह्यते । श्रोत्रमाकाशद्रव्यम्, तत्र समवेतः शब्दः । शब्दत्वं समवेतसमवायाद् गृह्यते, श्रोत्राकाशसमवेते शब्दे तद्धि समवेतमिति । संयुक्तविशेषणभावादभावग्रहणं व्याख्यातम् । इह घटो नास्तीति चक्षुषा संयुक्तो भूप्रदेशस्तद्विशेषणीभूतश्चाभाव इति ।

सन्निकर्षस्यावश्यकत्वम्

ननु सन्निकर्षावगमे किं प्रमाणम् ? व्यवहितानुपलब्धिरिति ब्रूमः । यदि ह्यसन्निकृष्टमपि चक्षुरादीन्द्रियमर्थं गृह्णीयाद् व्यवहितोऽपि ततोऽर्थ उपलभ्येत, न चोपलभ्यते, तस्मादस्ति सन्निकर्षः ।

नन्वव्यवधानमेवास्तु किं सन्निकर्षेण ? मैवम् । इन्द्रियाणां कारकत्वेन प्राप्यकारित्वात्, संसृष्टञ्च कारकं फलाय कल्पत इति कल्पनीयः संसर्गः । एतच्चेन्द्रियपरीक्षाप्रसङ्गे निपुणं निर्णेष्यत इति नेह विविच्यते । रसनस्पर्शनयोश्च स्पष्टं प्राप्यकारित्वमुपलभ्यत इति तत्सामान्यादिन्द्रियान्तरेष्वपि कल्पनीयमिति ।

नन्वेवं सत्यर्थाक्षिप्तः कारकत्वादेव सन्निकर्ष इति स्वकण्ठेन कस्मादुच्यते ? षड्विधत्वज्ञापनार्थमित्युक्तम् । उत्पन्नग्रहणेन इन्द्रियार्थयोर्ज्ञानजनकत्वम् अर्थस्य कर्मत्वेन ।

नन्वर्थस्य ज्ञानजनकत्वं कुतोऽवगम्यते ? तद्विषयज्ञानोत्पादाद् । एवमाकारस्य निराकृतत्वात् प्रकारान्तरेण प्रतिकर्मव्यवस्थाया असिद्धेः ।

ननु प्रयोजनमेतत्, प्रमाणं पृष्टोऽसि, तद् ब्रूहि । उच्यते । एतदेव प्रमाणम्, अन्यस्यापि वीरणादेः कर्मकारकस्य कटादिकार्योत्पत्तौ प्रत्यक्षानुपलम्भप्रतिपन्नाभ्यामन्वयव्यतिरेकाभ्यां यथा कारणत्वमवधार्यते तथार्थस्यापि ज्ञानोत्पत्तौ । यथा हि देवदत्तार्थी कश्चित् तद्गृहं गतस्तत्रासन्निहितं न पश्यति देवदत्तं क्षणान्तरे चैनमायातं पश्यति तत्रान्वयव्यतिरेकाभ्यां देवदत्तसदसत्त्वानुवर्त्तिनौ ज्ञानोत्पादानुत्पादाववधार्य मानसेन प्रत्यक्षेण चन्दनसुखवदस्य तत्कारणतां प्रतिपद्यते ।

ननु वीरणकटयोः पृथगुपलम्भाद्युक्त एष न्यायः । अर्थो ज्ञानात् पृथङ् न कदाचिदुपलभ्यत इति दुर्गमौ तत्रान्वयव्यतिरेकौ । उच्यते । अयमेव पृथगुपलम्भो यदसन्निहितेऽर्थे न तद्विषयमबाधितं ज्ञानमुत्पद्यत इति । तदलमस्मिन्नवसरे ज्ञानवादगर्भचोद्योद्विभावयिषया, भविष्यत्येतदवसर इति । यथा चेन्द्रियाणां करणानामन्वयव्यतिरेकाभ्यां ज्ञानकारणत्वम् एवमर्थस्य करणेऽपीत्युपन्नग्रहणेन दर्शितम् ।

प्रत्यक्षलक्षणेऽव्याप्तिनिरासः

नन्विन्द्रियार्थसन्निकर्षोत्पन्नपदेन सुखादिविषयं प्रत्यक्षं न संगृहीतम् ? न न संगृहीतम्, मनस इन्द्रियत्वात् सुखादेरर्थस्य तद्ग्राह्यत्वात्, भौतिकघ्राणादीन्द्रियधर्मवैलक्षण्यात्तु मनसस्तद्वर्गे परिगणनं न कृतमिति ।

प्रत्यक्षप्रवृत्तिप्रकारः

तच्चेदं प्रत्यक्षं चतुष्टयत्रयद्वयसन्निकर्षात् प्रवर्त्तते । तत्र बाह्ये रूपादौ विषये चतुष्टयसन्निकर्षाज् ज्ञानमुत्पद्यते, आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति । सुखादौ तु त्रयसन्निकर्षाज्ज्ञानमुत्पद्यते, तत्र चक्षुरादिव्यापाराभावात् । आत्मनि तु योगिनो द्वयोरात्ममनसोरेव संयोगाज्ज्ञानमुपजायते, तृतीयस्य ग्राह्यस्य ग्राहकस्य तत्राभावात् । तस्मात् सुखादिज्ञानसंग्रहादिन्द्रियार्थसन्निकर्षोत्पन्नमिति युक्तमुक्तम् । आत्ममनसोस्तु सदपि ज्ञानजनकत्वमिह न सूत्रितं सर्वप्रमाणसाधारणत्वादिति ।

घ्राणादीन्द्रियधर्मवैलक्षण्यादिति । नित्यत्वानियतविषयत्वादिना वैलक्षण्यम् ।

प्रत्यक्षलक्षणे ज्ञानपदसार्थक्यम्

ज्ञानग्रहणं विशेष्यनिर्देशार्थम्, तस्य हीन्द्रियार्थसन्निकर्षोत्पन्नत्वादीनि विशेषणानि । तानि असति विशेष्ये कस्य विशेषणानि स्युरिति ।

अथ वा सुखादिव्यावृत्त्यर्थं ज्ञानपदोपादानम् । इन्द्रियार्थसन्निकर्षोत्पन्नं हि सुखमपि भवति तत्र तज्जनकं कारकचक्रं प्रमाणं मा भूत्, ज्ञानजनकमेव प्रमाणं यथा स्यादिति ज्ञानग्रहणम् ।

शाक्यमते सुखादेरपि ज्ञानरूपत्वम्

अत्र शाक्याश्चोदयन्ति न ज्ञानपदेन सुखादिव्यवच्छेदः कर्तुं युक्तः, शक्यो वा, सुखादिनामपि ज्ञानस्वभावत्वात् । ज्ञानस्यैवामी भेदाः सुखं दुःखमिच्छा द्वेषः प्रयत्न इति । कारणाधीनो हि भावानां भेदो भवितुमर्हति । समानकारणानामपि तु भेदेऽभिधीयमाने न कारणकृतं पदार्थानां नियतं रूपमिति तदाकस्मिकत्वप्रसङ्गः । तदुक्तम्

तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः ।
तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम् ।। इति ।

तस्माज् ज्ञानरूपाः सुखादयः, तदभिन्नहेतुजत्वादिति ।

सुखादेर्ज्ञानातिरिक्तत्वम्

तदिदमनुपपन्नम् प्रत्यक्षविरुद्धत्वाद्धेतोः । सुखादि संवेद्यमानमानन्दादिरूपतयाऽनुभूयते, ज्ञानं विषयानुभवस्वभावतयेति, प्रत्यक्षसिद्धभेदत्वात् कथमभेदेऽनुमानं क्रमते । अत एव इदमपि न वचनीयम् 'एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्त्तं पश्यामस्तत्र यथेष्टं सञ्ज्ञाः क्रियन्तामि'ति । संविदो विषयानुभवस्वभावतयैव प्रतिभासात्, सुखादेश्च विषयानुभवस्वभावानुस्यूतस्याप्रतिभासात्,

---

तदतद्रूपिणो भावा इति । तद्रूपिणस्तद्रूपवन्तः शाल्यङ्कुराः, अतद्रूपिणश्चातद्रूपवन्तो यवाङ्कुराः । शाल्यङ्कुरा यवाङ्कुराश्च कथमेकरूपा अनेकरूपाश्चेत्यर्थः । एवं गूढाशयेन पृष्टे स्पष्टमुत्तरमाह **तदतद्रूपहेतुजाः** । तद्रूपैरेकरूपैः शालिबीजैर् द्रूपैर्भिन्नरूपैश्च यवबीजैर्जनिता इति । परः स्वाभिप्रायमाह **तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजमिति** ।

एकमेवेदमिति । हर्षविषादादिरनेकाकारो विवर्तः परिणामो यस्य ।

ज्ञानमेव विषयग्रहणरूपं प्रकाशते, न सुखं दुःखं वा। यस्तु सुखज्ञानं दुःखज्ञानमिति प्रतिभासः स ज्ञानस्वभावभेदकृत एव संशयज्ञानं विपर्ययज्ञानमितिवत्, उक्तमत्र संशयविपर्ययादौ विषयानुभवस्वभावत्वमनुस्यूतमवभाति। संशयो हि विषयग्रहणात्मकोऽनुभूयते, अनिश्चितं तु विषयं गृह्णाति। विपर्ययोऽपि विषयग्रहणात्मक एव विपरीतमसन्तं वा विषयं गृह्णाति। न तु विषयग्रहणस्वभावं सुखं दुःखञ्चानुभूयते। अन्य एवायं ग्राह्यैकस्वभाव आन्तरो धर्मः सुखदुःखादिरिति, घटज्ञानवद् विषयतयैव ज्ञानं भिनत्ति, न स्वभावभेदेन संशयवदिति। तत्रैतत्स्यात्।

स्वप्रकाशत्वात् सुखादेर्न ग्राह्यैकस्वभावत्वम्, अतश्च ग्राह्यग्रहणोभयस्वभावत्वाज् ज्ञानमेव तदिति। मैवं वोचः। प्रकाशत्वं ज्ञानेऽपि प्रतिक्षिप्तं प्रतिक्षेप्स्यते, तत्कुतः सुखादौ भविष्यति? न हि ग्रहणस्वभावं कश्चित् सुखमनुभवति ज्ञानवदिति।

नन्वस्य प्रकाशत्वानभ्युपगमे सुखादेरुत्पादानुत्पादयोरविशेषात् सर्वदा सुखित्वं न कदाचिद्वा स्यादिति। नैतदेवम्। उत्पन्नमेव सपदि सुखं गृह्यते ज्ञानेनेति कथमनुत्पन्नान्न विशिष्यते? प्रत्युत स्वप्रकाशसुखवादिनामेष दोषः, स्वप्रकाशस्य दीपादेः सर्वान् प्रत्यविशिष्टत्वात्। क्वचित् सन्ताने स्वप्रकाशसुखोत्पादात् तेनैव स्वप्रकाशेन सुखेनान्योऽपि सुखी स्याद् यस्यापि सुखं नोत्पन्नमिति। किञ्च किमेकमेव ज्ञानं सर्वसुखदुःखाद्यशेषाकारभूषितमिष्यते, उत किञ्चित्सुखात्मकं, किञ्चिद् दुःखात्मकं ज्ञानमिति? आद्ये पक्षे सर्वाकारखचितज्ञानोपजननादेकस्मिन्नेव क्षणे परस्परविरुद्धसुखदुःखादिधर्मप्रबन्धवेदनप्रसङ्गः, उत्तरस्मिंस्तु किञ्चित् सुखज्ञानं किञ्चिद्दुःखज्ञानमिति यत् किञ्चित्सुखदुःखचितं विषयानुभवस्वभावमपि ज्ञानमनुभूयमानमेषितव्यमेव। तच्च न स्वच्छम्, अपि तु केनचिद्घटादिनाविषयेणोपरक्तमन्वयव्यतिरेकाभ्याञ्च घटाद्युपजननापायेऽपि बोधस्वभावमनुवर्त्तमानं प्रतीयते।

न स्वभावभेदेन संशयवदिति। यथा संशयरूपत्वेनोभयकोटिस्पृश्यस्वभावेनानुभयकोटिस्पृशो ज्ञानान्तराद् विशिष्यते 'संशयात्मकमेतज्ज्ञानं न व्यवसायात्मकम्' इति तथा न सुखज्ञानम्, अपि तु विषयकृत एव तस्य भेदः 'सुखस्य ज्ञानम्' इति।

तच्च न स्वच्छमिति। यदि हि विषयानुरागरहितस्य बोधमात्रस्यानुभवनं स्यात् तदा आत्मीयेन सुखात्मनापि स्वरूपेण तस्यानुभवो युज्येतेत्यभिप्रायः। **अन्वयव्यतिरेकाभ्याञ्चेति।** अयं भावः। सुखादयो ग्राह्याः, न च ग्राह्यरूपमेव ग्राहकम्।

तदिदानीं सुखज्ञानमप्यनुभूयमानं सुखेन विषयभावजुषा घटादिनेवोपरज्यत इति गम्यते, न स्वरूपेणैव सुखात्मकम्, ततो भिन्नरूपस्य बोधमात्रस्वभावस्य ज्ञानस्यान्यदा अदृष्टत्वादिति । तस्मान्न बोधरूपाः सुखादयः । अभिन्नहेतुजत्वादिति चायमसिद्धो हेतुः, समवायिकारणस्यात्मनोऽसमवायिकारणस्यात्ममनःसंयोगस्याभेदेऽपि निमित्तकारणस्य सुखत्वज्ञानत्वादेर्भिन्नत्वात् ।

कार्योत्पत्तेः पूर्वमाश्रयाभावान्निराश्रयं सुखत्वादि न कारकं स्यात्

ननु सुखोत्पादात् पूर्वमनाश्रयं सुखत्वसामान्यं कथं तत्र स्यात् ? कश्चापि सुखहेतुभिः कारकैः संसर्गः ? असंसृष्टञ्च कथं कारकं स्यात् ?

उच्यते । सर्वसर्वगतानि सामान्यानि साधयिष्यन्त इति सन्ति तत्रापि सुखत्वादीनि । योग्यतालक्षण एव चैषां सुखहेतुभिः कारकैः संसर्गः धर्माधर्मवत् । धर्माधर्मौ हि सर्वस्य प्राणिनां सुखदुःखहेतोर्जायमानस्य शाल्यादेः कार्यस्य कारणम् । तयोश्च तत्कारणैर्बीजक्षितिजलादिभिः सह योग्यतैव संसर्गः । एवं सुखत्वादीनामपि स्यात् । तस्मान्निमित्तकारणभेदाद्भिन्नानि ज्ञानसुखादीनि कार्याणि ।

निमित्तकारणन्यत्वमपि कार्यस्य भेदकम् ।
विलक्षणा हि दृश्यन्ते घटादौ पाकजा गुणाः ।।

यदि हि ग्राह्यरूपमेव ग्राहकं स्यात् तदा 'घटो मया ज्ञातोऽधुना पटं जानामि' इत्यादौ ग्राह्यरूपानुवृत्तिवद् ग्राहकरूपानुवृत्तिरपि नोपलभ्येत, उपलभ्यते च बोधरूपोऽनुवर्तमानो ग्राहकाकारः, ततोऽवसीयते ग्राह्येणोपरक्तमेव ज्ञानं न ग्राह्यरूपमिति । सत्यपि घटे कदाचिदभावाद्, असत्यपि च तस्मिन् पटादौ भावात्, ततो व्यावृत्तरूपादन्यैव विलक्षणबोधरूपता प्रतीयत इति । **अन्यदा अदृष्टत्वादिति** । यदि सुखमेव ज्ञानं स्यान्न सुखस्य ज्ञानम्, तदा तदनन्तरभाविनि ज्ञाने बोधरूपतावत् सुखरूपताप्यनुवर्तेत । 'अन्यदा वा दृष्टत्वात्' प्राङ्नीत्या यदा ग्राह्याद् भिन्नं बोधस्वभावं ज्ञानमुपलब्धं तद्वदत्रापि भवतु, अस्यापि ग्राह्यत्वात् ।

योग्यतालक्षण एवेति । नियतसुखादिकार्यगम्यः कश्चित् सम्बन्धविशेषो योग्यताख्यः ।

विलक्षणा हि दृश्यन्त इति । समवायिकारणानां परमाणूनामग्निसंयोगस्य

अपि च ज्ञानमिच्छन्ति न सर्वं ज्ञानपूर्वकम् ।
सुखदुःखादि सर्वन्तु विषयज्ञानपूर्वकम् ।।
विषयानुभवोत्पाद्या यत्रापि न सुखादयः ।
तत्रापि तेषामुत्पत्तौ कारणं विषयस्मृतिः ।।

क्वचित्तु सङ्कल्पोऽपि सुखस्य कारणतां प्रतिपद्यते । तस्मात् सर्वं सुखादि ज्ञानपूर्वकमेव । ज्ञानमपि ज्ञानपूर्वकमेवेति चेद्, उपरिष्टान्निराकरिष्यमाणत्वात् । न हि गर्भादौ, मदमूर्छाद्यनन्तरं वा ज्ञानमुपजायमानं ज्ञानान्तरपूर्वकं भवतीति । वक्ष्यामः । तेन सुखादीनां वैलक्षण्योपपादनात् सुखादिव्यवच्छेदस्य सिद्धत्वात् ।

अव्यभिचारिपदादेव ज्ञानव्यवच्छेदः ?

व्यभिचाराव्यभिचारौ हि ज्ञानस्य धर्मौ न सुखादेरतस्तदुपादानात्तद्धर्मयोगि ज्ञानं लभ्यत एव, किं ज्ञानग्रहणेन ? नैतदेवम्, सुखस्यापि सव्यभिचारस्य दृष्टत्वात् । किं पुनः सुखं व्यभिचारवद् दृष्टम् ? यदेतत् परदाराभिमर्शादिनिषिद्धाचरणसम्भवं सुखं तद् व्यभिचारि ।

ननु सुखस्य कीदृशो व्यभिचारः ? ज्ञानस्यापि कीदृशो व्यभिचारः ? अतस्मिंस्तथाभावः । सुखस्यापि अतस्मिंस्तथाभाव एव । किं परपुरन्ध्रिपरिरम्भसम्भवं सुखं सुखं न भवति ? किं शुक्तिकायां रजतज्ञानं ज्ञानं न भवति ? ज्ञानं तद्भवति किं तु मिथ्या । इदमपि सुखं भवति किं तु मिथ्या ।

ननु न सुखं मिथ्या, तदपि ह्यानन्दस्वभावमेव । यद्येवं शुक्तिकायां रजतज्ञानमपि न मिथ्या, तदपि हि विषयानुभवस्वभावमेव ।

ननु विषयानुभवस्भावमपि तज्ज्ञानं विषयं व्यभिचरति । सुखमपि तर्हि इदमानन्दस्वभावमपि विषयं व्यभिचरत्येव । किमसुखसाधनेन तज्जनितम् ? ज्ञानमपि किमज्ञानसाधनेन जनितम् ?

चासमवायिकारणस्याभेदेऽपि रूपत्वरसत्वादिनिमित्तकारणभेदात् पाकजानां रूपरसादीनां वैलक्षण्यं भेदः ।

क्वचित्तु सङ्कल्पोऽपीति । यत्र भाविनं स्त्र्यादिसङ्गमं चित्ते सङ्कल्पयति ।

आनन्दस्वभावमपि विषयं व्यभिचरत्येवेति । सुखजनकमत्र विषयत्वेन विवक्षितम्, सुखस्य तदालम्बनत्वेनोत्पादात् ।

ननु ज्ञानं ज्ञानसाधनेन जनितम् असत्येन प्रत्यक्षबाधितेन रजतादिना। सुखमपि सुखसाधनेन जनितम् असत्येन तु शास्त्रबाधितेन परवनितादिना। किं परवनितादि न सत्यम्। तत्रापि ज्ञानजनकं सत्यम्, असत्यं प्रत्यक्षबाधितत्वात्? परवनिताद्यपि सुखसाधनम् असत्यं शास्त्रबाधितत्वात्।

ननु शास्त्रेण किमत्र बाध्यते? ज्ञानेऽपि प्रत्यक्षेण किं बाध्यते? विषयो मिथ्येति ख्याप्यते। शास्त्रेणापि सुखस्य हेतुर्मिथ्येति ख्याप्यते। किं स विषयः सुखहेतुर्न भवति? यथा त्वेष विषयः कलुषस्य ज्ञानस्य हेतुस्तथा सोऽपि कलुषस्य कटुविपाकस्य सुखस्य हेतुरिति तथाविधं सुखमपि व्यभिचारि भवत्येवेत्यलमतिकेलिना। तस्मात् समानन्यायत्वात् सुखेऽव्यभिचारितास्तीत्यव्यभिचारिपदाज्ज्ञानं न लभ्यते।

व्यवसायपदेनैव ज्ञानलाभसम्भवे तद्ग्रहणे हेतुप्रदर्शनम्

अपर आह। किमनेन डिम्भकलहेन। मा भूदव्यभिचारिपदाज्ज्ञानस्य लाभस्तथापि व्यवसायात्मकपदाल्लभ्यत एव ज्ञानम्। न हि सुखदुःखादयो व्यवसायात्मका भवन्ति, किन्तु ज्ञानमेव तथाविधमिति। संशयव्यवच्छेदार्थञ्च तत्पदमिति चेत्। सत्यम्। सुखादिव्यवच्छेदमपि कर्तुमलमेव भवति व्यवसायात्मकत्वस्य सुखादिष्वसम्भवादिति। तदेवं सिद्धेऽपि सुखादिव्यवच्छेदे कर्त्तव्यमेव ज्ञानग्रहणम्, विशेष्यनिर्देशार्थत्वात्। तस्य हि सर्वाण्यमूनि विशेषणान्युपात्तानि तदनुपादाने निरालम्बनानि भवेयुः, श्रोतुश्च बुद्धिर्न समाधीयेतेति। तेन बलाद् गम्यमानमेव कर्त्तव्यमेव ज्ञानग्रहणम्। अर्थाक्षिप्तस्यावचने प्रत्यक्षं प्रत्यक्षमित्येतावन्मात्रमभिधेयं स्याद्, अन्यदर्थालभ्यत एव। तस्माद्धर्मिनिर्देशार्थं युक्तं ज्ञानपदम्।

अव्यपदेश्यपदसार्थक्यविचारः

शब्दानामर्थसंस्पर्शित्वं शाक्यमतनिरासेन साधयिष्यत इति शब्दानुप्रवेशवशेन व्यपदेश्यं नाम ज्ञानमुपपद्यत इति तद्व्यवच्छेदार्थमव्यपदेश्यपदम्।

प्रत्यक्षं प्रत्यक्षमित्येतावन्मात्रमभिधेयमिति। सामान्यलक्षणापेक्षित्वाद् विशेषलक्षणस्य। अक्षं प्रति गतं जन्यत्वेन प्रत्यक्षम्। तत्र यतः प्रमाणात् फलमुत्पद्यते तत् प्रमाणं प्रत्यक्षम्। तच्च फलं ज्ञानमव्यभिचारि व्यवसायात्मकञ्च भविष्यति; तथाविधफलजनकस्यैव प्रमाणत्वस्य सामान्यलक्षणे प्रतिपादितत्वात्।

तत्र वृद्धनैयायिकमतनिरासेन रुचिकारादिमतम्

तत्र वृद्धनैयायिकास्तावदाचक्षते, व्यपदिश्यत इति व्यपदेश्यं शब्दकर्मतापन्नं ज्ञानमुच्यते। यदिन्द्रियार्थसन्निकर्षादुत्पन्नं सद्विषयनामधेयेन व्यपदिश्यते रूपज्ञानं रसज्ञानमिति तद्व्यपदेश्यं ज्ञानं प्रत्यक्षफलं मा भूदित्यव्यपदेश्यग्रहणम्।

तदिदमनुपपन्नम्, न हि नामधेयव्यपदेश्यत्वमप्रामाण्यकारणं भवति, यदि हि तद्रूपज्ञानं रसज्ञानञ्च विषयाव्यभिचारि निःसंशयञ्च तत्कथमप्रमाणफलमुच्यते ? व्यभिचारादिदोषयोगे वा पदान्तरेण तत्प्रतिक्षेपात् किमव्यपदेश्यपदेन ? प्रमाणफलञ्च तद्विज्ञानमिदानीं किं प्रमाणप्रभवं भवन् न प्रत्यक्षफलम्, एतत्पदप्रक्षिप्तत्वात् ? नानुमानादिजन्यं तद्वैलक्षण्यात्, नास्ति किञ्चित् पञ्चमं प्रमाणम्। असङ्ग्रहोऽस्य लक्ष्यस्य लक्षणेनेति प्रज्ञाप्रमादः। तस्मादपव्याख्यानमेतदिति व्यवच्छेद्यान्तरमव्यपदेश्यपदस्य वर्णयाञ्चक्रुराचार्याः, शब्दार्थेषु स्थविरव्यवहारतो व्युत्पद्यमानो जनः संशयापगमसमये संज्ञोपदेशकाद् 'अयं पनस उच्यते' इति वृद्धोदीरिताद्वाक्यात् पुरोऽवस्थितशाखादिमन्तमर्थं पनसशब्दवाच्यतया जानाति। तदस्य ज्ञानमिन्द्रियजमपि न केवलेन्द्रियकरणकं भवितुमुचितम्, असति संज्ञोपदेशिनि शब्दे तदनुत्पादात्, तेन शब्देन्द्रियाभ्यां सम्भूय जनितत्वादुभयजमिदं ज्ञानं व्यपदेशाज्जातमिति व्यपदेश्यमुच्यते। तदव्यपदेश्यपदेन व्युदस्यते। न चेदं पञ्चमं प्रमाणमवतरति किन्तु शाब्दमेवैतदनुमन्यते लोकः। तथा च 'कथं पुनर्जानीते भवान् पनसोऽयमि'ति पृष्टः प्रतिवक्ति 'मम देवदत्तेनाख्यातं पनसोऽयमि'ति। पुनरेवं विस्मृत्यापि ब्रवीति 'चक्षुषा मया प्रतिपन्नं पनसोऽयमुच्यते' इति। तदिन्द्रियान्वयव्यतिरेकानुविधाने सत्यपि शब्द एवात्र करणम्। अत एव सूत्रकृता शब्दलक्षणं वर्णयता नेन्द्रियानुप्रवेशप्रतिषेधाय किमपि विशेषणमुपरचितम्। 'उपदेशः शब्द' इत्येतावदेव लक्षणमभिहितम्। अतश्चेन्द्रियानुप्रवेशेऽपि शाब्दतामस्य मन्यते सूत्रकारः। इह पुनरव्यपदेश्यविशेषणपदोपादानेन शब्दानुप्रवेशप्रतिषेधान्न प्रत्यक्षफलमेतज् ज्ञानम्। तस्मादेवंविधव्यपदेश्यविज्ञानव्यवच्छेदार्थमव्यपदेश्यपदमिति।

शब्दकर्मतापन्नं ज्ञानमिति। 'रूपज्ञानम्' इत्यादेः शब्दस्य कर्मतामभिधेयतामापन्नम्।

रुचिकारादिमते प्रवरादीनामरुचिप्रदर्शनम्

तदेतद् व्याख्यातारो नानुमन्यन्ते । यद्युभयजं ज्ञानमव्यपदेश्यपदेन व्युदस्यते तदपि नाप्रमाणम् अप्रमाणलक्षणातीतत्वादिति । प्रमाणं भवत् कस्मिन्ननुनिविशतामिति चिन्त्यम् ।

ननु शाब्दमिदं ज्ञानं तद्भावानुविधानतः ।
भवत्वक्षजमप्येतत् तद्भावानुविधानतः ॥
शाब्दञ्चोभयजञ्चेति विरुद्धमभिधीयते ।
प्रमाणान्तरमेव स्यादित्थं तदपि पूर्ववत् ॥

ननु लोकः शाब्दतामस्य व्यपदिशति 'देवदत्तेनाख्यातं पनसोऽयमि'ति व्यवहारादित्युक्तम् । अहो लोकवत् सः श्रद्दधानो महानुभावः । न खलु लोकस्य व्यपदेशैकशरणा वस्तुस्थितयो भवन्ति । लोको हि यथारुचि व्यपदिशति नानामुनिजनसाधारणमपि तीर्थं नन्दिकुण्डमिति किं न श्रुतवान् भवान् ? हन्त तर्हि सूत्रकाराशयमनुसरन्तः शाब्दमिदं ज्ञानं प्रतिपद्यामहे, यदयं सूत्रकारः प्रत्यक्षे शब्दानुप्रवेशव्यवच्छेदाय विशेषमिदमुपदिशति, शब्दे तु नेन्द्रियव्युदासाय किञ्चिद्विशेषणमुपादत्ते । स पश्यति करणान्तरानुप्रवेशेऽपि शाब्दमेतज् ज्ञानमिति । उच्यते

मनुवत्सूत्रकारोऽपि न धर्मस्योपदेशकः ।
येनैतदनुरोधेन तस्य ब्रूयाम शाब्दताम् ॥

वस्तुस्थित्या तु निरूप्यमाणमिन्द्रियान्वयव्यतिरेकानुविधायित्वादिदं विज्ञानं न प्रत्यक्षफलतामतिवर्त्तते । ततश्च व्युदस्यमानं प्रमाणान्तरमेव स्पृशेत् ।

तस्मादुभयजज्ञानव्युदासानुपपत्तितः ।
व्याख्या भङ्ग्यन्तरेणास्य पदस्येयं विधीयते ॥

संज्ञोल्लेखिप्रत्यक्षस्य शाब्दत्वम्

असम्भवदोषव्यवच्छेदार्थमव्यपदेश्यपदोपदानम् । एवं हि परो मन्यते सति लक्ष्ये लक्षणवर्णनमुचितम्, इह तु लक्ष्यमाणं प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नं नाम

नन्दिकुण्डमिति । तीर्थविशेषाख्या ।

न किञ्चिदस्ति, गौरित्यादिज्ञानानां शब्दावच्छिन्नवाच्यविषयत्वेन शाब्दत्वात्, इह हि विषयव्यतिरेकेण ज्ञानानामतिशयो दुरुपपादः, बोधस्वभावस्य सर्वान् प्रत्यविशिष्टत्वात्। तत्र यथा 'दण्डी'ति 'शुक्लः' इति वा प्रत्ययो विशेषणावच्छिन्नविशेष्यविषयतया सातिशयत्वमश्नुते तथा गौरित्यादिप्रत्ययोऽपि वाचकावच्छिन्नवाच्यविषयत्वात् सातिशयत्वं भजते। शब्दावच्छिन्नवाच्यविषयत्वाच्च शाब्द एष प्रत्ययः, तद्व्यतिरिक्तकरणकार्यत्वानुपपत्तेः। न हीन्द्रियकरणमिदं ज्ञानं भवितुमर्हति, चक्षुषो विशेषणाविषयत्वाद् विशेष्ये च श्रोत्रस्यासामर्थ्यात्। न च युगपदिन्द्रियद्वयद्वारकमेकमुत्पद्यमानं ज्ञानं क्वचिद् दृष्टम्, तत्रैतत् स्यात्। मानसमिदं ज्ञानं सुगन्धिबन्धूकबोधवद् भविष्यति, उक्तमत्र शब्दलिङ्गादिकरणान्तरव्यापारविरतौ कार्यमुपजायमानं केवलमनःकरणमिति कल्प्यते। न। तत्सम्भवेऽपि तथा हि सति मानसमेवैकं प्रमाणं स्यादिति। अस्ति चात्र शब्द एव करणम्। स हि सहस्रकिरणवदात्मानञ्च विषयञ्च प्रकाशत इति, तस्मादिन्द्रियविषयेऽपि गौरित्यादिज्ञानमुत्पद्यमानं शाब्दमेवेत्यवधार्यते।

शाब्दिकसिद्धान्तबलेन प्रत्ययमात्रस्य शाब्दत्वसमर्थनम्

ननु सङ्केतावगमसमये गौरित्यादिशब्दः श्रुत आसीत्, स इदानीमतिक्रान्त इति कथं तत्कृत एष प्रत्ययः स्यात्? उच्यते। तदानीमश्रूयमाणस्य शब्दस्य स्मृत्यारूढस्य तत्प्रत्ययहेतुत्वात्,

> तच्छ्रुतावपि किं सर्वे वर्णाः प्रत्यक्षगोचराः।
> विशेषः कोऽन्त्यवर्णेन गृहीतेन स्मृतेन वा॥

तदेवं स्मृतिविषयीकृतशब्दजनित एष प्रत्यय इत्यभ्युपेतव्यः। यथा परोक्षेऽपि शब्द उच्चरित आत्मानं प्रकाशयत्यर्थञ्च तथा प्रत्यक्षे विषये स एव स्मर्यमाण आत्मानमर्थञ्च प्रकाशयतीति वाचकावच्छिन्नवाच्यप्रतिभासश्चैवंविधासु

यथा दण्डीति शुक्ल इति। केवलपुरुषपटप्रत्ययापेक्षयात्र सातिशयत्वम्।

ननु वाचकः स उच्यते यो वाचकत्वेन गृहीतः। सङ्केतकालभावी च वाचकत्वेन गृहीतः। स चेदानीं नास्तीत्याह **ननु सङ्केतावगमसमय** इति।

बुद्धिषु नूनमेषितव्यः, यथाह वृद्धः 'सञ्ज्ञित्वं केवलं परम्' इति । सञ्ज्ञित्वमिति-मत्वर्थीयप्रत्ययान्तादुत्पन्नो भावप्रत्ययः सम्बन्धमाचष्टे सञ्ज्ञासञ्ज्ञिसम्बन्धः सञ्ज्ञित्वमिति, कृत्तद्धितसमासेषु सम्बन्धाभिधानमित्यभियुक्तस्मरणात्, सञ्ज्ञा च शब्दः, सोऽयं शब्दविशिष्टार्थप्रतिभास उक्तो भवति । न च शब्दानुसन्धानरहितः कश्चित् प्रत्ययो दृश्यते, अनुल्लिखितशब्दकेष्वपि प्रत्ययेष्वन्ततः सामान्यशब्दसमुन्मेषसम्भवात् तदुल्लेखव्यतिरेकेण प्रकाशात्मिकायाः प्रतीतेरनुत्पादात् । तथाह भर्तृहरिः

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥

निर्विकल्पकस्य शब्दानुगमशून्यत्वादव्यपदेश्यत्वम्

तस्मात् प्रत्यक्षस्य लक्ष्यस्यासद्भावात् कस्येदं लक्षणमुपक्रान्तमिति असम्भवदोषमाशङ्क्याह सूत्रकारः अव्यपदेश्यमिति । यदिदमविदितपदपदार्थसम्बन्धस्य

'संज्ञित्वं केवलं परम्' इति ।

'यथा रूपादयो भिन्नाः प्राक्छब्दात् स्वात्मनैव तु ।

गम्यन्ते तद्वदेवेदं संज्ञित्वं केवलं परम् ॥' इति परिपूर्णं वार्त्तिकम् । यद्वद्रूपादयः सम्बन्धग्रहणात् पूर्वं विविक्ततया शब्दविविक्तेन रूपेणोपलभ्यन्ते तद्वद् गोत्वाद्यपि, सविकल्पकज्ञाने केवलं संज्ञित्वं प्रतिभासत इति वार्तिकार्थः । अनेन तु 'संज्ञित्वमिति वदता 'वाचकविशिष्टवाच्यप्रतिभासः सविकल्पकज्ञानजन्य' इत्यभ्युपगतं बलाद् भवति' इत्यभिप्रायेण ज्ञापकतयोपन्यस्तम् । **कृत्तद्धितसमासेषु सम्बन्धाभिधानम् ।** 'पाचकत्वौपगवत्वराजपुरुषत्वादौ कृत्तद्धितसमासेषु सम्बन्धाभिधानमन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बधेभ्यः' इति परिपूर्णं वार्तिकम् । तेन सत्यपि कृच्छब्दत्वे कुम्भकारत्वमित्यादौ न सम्बन्धाभिधानम्, जातिरेव तत्र 'त्व'प्रत्ययाभिधेया; रूढिशब्दत्वात् संज्ञाशब्दत्वादस्य । शुक्लगुणव्याप्तः शुक्ल इति मत्वर्थीयप्रत्ययलोपपक्षे शुक्लस्य भावः शुक्लत्वमिति न गुणसम्बन्धाभिधानम्, अपि तु द्रव्यादभेदरूपेणास्य शुक्लशब्दस्य प्रवृत्तेर्गुणमात्रवाचित्वमेव । एवं सतो भावः सत्तेत्यत्र पदार्थानां सत्तासम्बन्धेनाव्यभिचारान्न तत्सम्बन्धोऽभिधेयोऽपि तु सत्तैव ।

ज्ञानमुत्पद्यते, विदितसम्बन्धस्यापि वा यत् प्रथमाक्षसन्निपातसमय एव ज्ञानमनुल्लिखितशब्दकं शब्दानुस्मरणे हेतुभूतमुपजायते तदशाब्दम्, अशब्दावच्छिन्नविषयमव्यपदेश्यमिन्द्रियार्थसन्निकर्षैककरणमविकल्पं प्रत्यक्षम् । न च शब्दकृता बुद्धीनां प्रकाशस्वभावता, स्वत एव तासामेवंरूपत्वात्, न च निर्विकल्पकसमये यत् 'किञ्चिदिदमि'त्यादिसामान्यशब्दोल्लेखः कोऽपि कैश्चिदनुभूयते । तस्माद् गौरित्यादिज्ञानानां शाब्दत्वेऽपि तथाविधस्य ज्ञानस्य लक्ष्यस्य सद्भावान्न व्यर्थं लक्षणमित्येवमसम्भवदोषनिराकरणार्थमव्यपदेश्यपदमिति,

प्रत्यक्षस्याशाब्दत्वे रुचिकारादिसम्मतिः

तदेतद् आचार्या न क्षमन्ते । न गौरित्यादिज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमपीदं शाब्दमिति वक्तुं युक्तम् । न चात्र शब्दावच्छिन्नार्थः प्रकाशते, तथाविधार्थग्रहणे करणाभावाद् । विशेषार्थप्रमितौ तावच्छब्दः करणम्, विशेषणभूतस्य तु शब्दस्य ग्रहणे किं करणमिति निरूप्यताम् । न श्रोत्रं, विरम्य व्यापारसंवेदनात्, सम्बन्धग्रहणादूर्ध्वञ्च स्मर्यमाणशब्दयोजनया जायमाने गौरित्यादिज्ञाने श्रोत्रंकरणमाशङ्कितुमपि न युक्तम्, नापि मनो बाह्यकरणनिरपेक्षं बाह्ये विषये धियमाधातुमलम् अन्धाद्यभावप्रसङ्गात् ।

प्रत्यक्षे शब्दस्य न करणत्वम्

ननु शब्द एव करणमित्युक्तं तत् किमपरकरणाशङ्कनेन ? मैवम् एकस्य कारकस्यैकस्यामेव क्रियायां कर्मकरणभावानुपपत्तेः । सवितृप्रकाशवदिति चेन् न । क्रियाभेदाद् यत्रासौ करणं न तत्र कर्म, यत्र वा कर्म न तत्र करणमिति । घटादिविषयप्रमितिजन्मनि करणमेव तरणिप्रकाशो न कर्म । तद्ग्रहणकाले तु कर्मैवासौ न करणम् । किं तर्हि तत्र करणमिति चेत् ? केवलमेव चक्षुरिति ब्रूमः, आलोकग्रहणे चक्षुषः प्रकाशान्तरनिरपेक्षत्वात् । कथमेवमिति चेद् । अपर्यनुयोज्या हि वस्तुशक्तिः । घटादिग्रहणे चक्षुरुद्द्योतमपेक्षते न उद्द्योतग्रहण इति कमनुयुञ्ज्महे । सोऽयं सूर्यप्रकाशः प्रकाशान्तरनिरपेक्षचक्षुरिन्द्रियप्रथमगृहीतः चिरमवतिष्ठमानस्तदिन्द्रियग्राह्य एकविषये गृह्यमाणे करणतामुपयातीति युक्तम् । शब्दस्तु क्षणिकः श्रोत्रेन्द्रियग्राह्यस्तदितरपरिच्छेद्ये विषये तदवगमक्रियायां करणीभूय भूयस्तस्यामेव क्रियायां कथमिव कर्मभावमनुभवेत् । शब्दो हि धूमादिवदुपाय एव नोपेयः । स

उपायत्वात् प्रथमं गृह्यतां नाम न उपेयग्रहणकाले पुनर्ग्रहणमर्हति धूमवदेवेति । एवं स्मर्यमाणोऽपि शब्दो यत्रार्थप्रतीतिकारणम्, तत्रापि प्रथमं शब्दस्मरणं ततः शब्दार्थसम्प्रत्ययो भवति, नतरां तत्रार्थप्रतीतिवेलायां शब्दग्रहणं सम्भाव्यते । तस्मान्नास्ति वाचकविशेषितवाच्यप्रतिभासः । अपि च गौरित्यादिज्ञानमिन्द्रियार्थसन्निकर्षान्वयव्यतिरेकानुविधायि प्रसभं तत्कथं शाब्दमित्युच्यते ?

शब्दस्मरणसापेक्षं यस्योत्पादकमिन्द्रियम् ।
तदेव यदि ते शाब्दमहो नैयायिको भवान् ॥

ननु शब्दावच्छिन्नमर्थं न चक्षुःश्रोत्रयोरन्यतरदपि करणं ग्रहीतुमलमित्युक्तम्, भोः साधो चक्षुरेवैनं ग्रहीष्यतीति कथं न ब्रूषे ?

ननु नाविषये युक्तमिन्द्रियस्य प्रवर्त्तनम् ।
तेन शब्दविशिष्टार्थज्ञानं नेन्द्रियजं ब्रुवे ॥

मरीचिषु जलज्ञानं कथमिन्द्रियजं तव ।
तत्रापि हि न तोयेन सन्निकर्षोऽस्ति चक्षुषः ॥

ननु च स्मृत्युपारूढमुदकं तत्र गृह्यते ।
इहापि स्मृत्युपारूढः शब्दः कस्मान्न गृह्यते ॥

ननु शब्दो न नेत्रस्य कदाचिदपि गोचरः ।
असन्निहितमप्यम्बु किं वा भवति गोचरः ॥

नन्वेकेन्द्रियवादः स्याच्चक्षुषा शब्दवेदने ।
अत्रापि सर्वबोधः स्यादसन्निहितवेदने ॥

ननु च मरीचिजलज्ञानं भ्रान्तमिति कथमिह दृष्टान्तीक्रियते ? कथमस्य भ्रान्तत्वम् ? किमनिन्द्रियजत्वादुत व्यभिचारित्वात् । तत्रानिन्द्रियजत्वेनास्य भ्रान्ततायामिन्द्रियार्थसन्निकर्षोत्पन्नपदेनैव निरासादव्यभिचारिपदमनुपादेयमिति । तदु-

---

भोः साधो चक्षुरेवैनं ग्रहीष्यतीति कथं न ब्रूष इति । अनेन वरं चाक्षुषत्वमस्याभ्युपगम्यतां न त्वत्यन्तासम्बध्यमानं शाब्दत्वमिति । प्रौढवादितया स्वयं शब्दविशिष्टार्थप्रतिभासम्—अभ्युपगमेनापि प्रतिपादयति ।

पादानात्तु व्यभिचारित्वेनास्य भ्रान्तत्वमिति नूनमिदमिन्द्रियजमसन्निहितसलिलज्ञानमभ्युपगन्तव्यम् ।

यथा चाविषये तस्मिन्नीरे नयनजा मतिः ।
तथा वाचकसंस्पृष्टे वाच्ये किमिति नेष्यते ॥
यथा च तव कालादि नीरूपमपि चाक्षुषम् ।
तथा शब्दानुरक्तोऽपि किमित्यर्थो न चाक्षुषः ॥

एवं हीन्द्रियव्यतिरेकानुविधानमत्र न बाधितं भविष्यति ।

ननु चाक्षुषतां शब्दे न जीवन् वक्तुमुत्सहे ।
त्यजैनं वाचकोपेतवाच्यावगमदुर्ग्रहम् ॥
अपि चामुष्य शाब्दत्वे सम्बन्धग्रहणं कथम् ।
न चागृहीतसम्बन्धः शब्दो भवति वाचकः ॥
निर्विकल्पकविज्ञानविषये न च तद्ग्रहः ।

सविकल्पकस्यापि शाब्दत्वखण्डनम्

शाब्दपक्षे तु निक्षिप्तं भवता सविकल्पकम् ॥
सम्बन्धः शक्यते बोद्धुं न च मानान्तराद् विना ।
शाब्दज्ञानेन तद्बोधे भवेदन्योन्यसंश्रयम् ॥
न च शब्दोपरक्तेऽर्थे सम्बन्धं बुध्यते जनः ।
गोशब्दवाच्यो गोशब्द इति हि ग्रहणं भवेत् ॥

वाच्यस्य हि गवादेर्गोशब्दविशेषितस्य वाच्यत्वाद् वाच्योऽर्थ इव गोशब्दोऽपि वाच्यतामवलम्बते ।

यदि च स्वानुरागेण वाचकाद् वाच्यवेदनम् ।
लिङ्गादपि भवेद् बुद्धिः स्वावच्छेदेन लिङ्गिनि ॥

निर्विकल्पकविज्ञानविषये न च तद्ग्रहः । निर्विकल्पके शब्दविशिष्टस्यार्थस्य तद्वाच्यस्य अप्रतिभासात्, चक्षुषः शब्दाविषयत्वात् । **शाब्दज्ञानेन तद्बोध** इति । शब्दात् तदनुरक्तार्थप्रत्यये तेनार्थेन शब्दस्य सम्बन्धग्रहणम्, गृहीतसम्बन्धश्च शब्दोऽर्थं प्रत्याययतीतीतरेतराश्रयता ।

अथ धूमान्वितत्वेन न वह्निरवगम्यते ।
इहापि शब्दयोगेन गवादिर्नैव गम्यते ।।
न चास्ति वस्तुनो धर्मो वाच्यता नाम कश्चन ।
यदि स्यान्निर्विकल्पेऽपि प्रतिभासेत रूपवत् ।।

अर्थासंस्पर्शिनः शब्दान् कथयन् दुष्टसौगतः ।
प्रत्यक्षास्त्रेण हन्तव्यः स कथं हन्यते त्वया ।।

प्रत्यक्षविषये वृत्तिः शब्दानां भवतः कुतः ।
तेषां यद्विषये वृत्तिस्तद्धि शाब्दीकृतं त्वया ।।

अपि च विषयभेदेन प्रतिभासभेदो भवतीति दुराशया शब्दविशिष्टमर्थं निर्विकल्पात् सविकल्पस्य विषयमधिकं पश्यति। भवान् अनेन वर्त्मना अवतरन् परं शब्दाध्यासं न पश्यतीति कोऽयं व्यामोहः ? स त्वं वचनीयोऽसि संवृत्तः 'मधु पश्यसि दुर्बुद्धे प्रपातं नैव पश्यसि' इति ।

तस्माद्गौरिति विज्ञानं प्रत्यक्षमवधार्यताम् ।
शब्दस्मरणसापेक्षचक्षुरिन्द्रियनिर्मितम् ।।

मानसत्वं तु यत्तस्य नेष्यते युक्तमेव तत् ।
तद्भावानुविधायित्वाद् बाह्येन्द्रियजमेव तत् ।।

प्रत्यक्षास्त्रेण हन्तव्य इति । अयं भावः । 'यदि अर्थासंस्पर्शिनः शब्दास्तत्प्रत्यक्षमप्यर्थासंस्पर्शि प्राप्तम्, तत्समानविषयत्वाच्छब्दानाम्' इत्युक्ते प्रत्यक्षस्यार्थासंस्पर्शित्वानभ्युपगमान्निवर्तेत बौद्धः । तत्र निर्विकल्पकं तावत् समानविषयं न भवति वाच्यताविशिष्टार्थप्रतिभासस्य भवन्मते शब्दजत्वात्, तादृशस्य चार्थस्य निर्विकल्पकाविषयत्वात्; सविकल्पकञ्च न प्रत्यक्षं तवेति ।

अनेन वर्त्मना अवतरन्तं शब्दाध्यासमिति । विलसति गौरयमित्यादिके शब्दोल्लेखेनोत्पद्यमाने ज्ञाने सामान्यादयोऽवभासन्ते, असति तु शब्दोल्लेखेन ज्ञाने नावभासन्ते । अतः शब्दवशादवभासमानास्ते कथं न शब्दाकाराः स्युः । अतः शब्दाकारा एवामी सामान्यादयोऽर्था अध्यस्ताः प्रतिभासन्ते न पुनर्बहिः सन्ति । यथा रक्तः स्फटिकमणिरिति प्रतीतिः सति लाक्षासन्निधाने समुत्पद्यतेऽन्यथा नेति तद्वशाल्लाक्षा-

विषयभेदेन प्रतिभासभेदे भाष्यविवरणकर्तृप्रवरसम्मतिः

अत्र पुनः प्रवराः प्राहुः, नन्वेवं गौरित्यादिबोधेषु वाचकावच्छिन्नवाच्यप्रतिभासे सर्वप्रकारमपाक्रियमाणे प्रथमाक्षसंनिपातसमयमासादितसद्भावनिर्विकल्पकवेदनवैलक्षण्यं कथमेषां भवेत् ? न हि विषयातिशयमन्तरेण प्रतिभासातिशयो भवितुमर्हति, 'दण्डी'ति दण्डविशिष्टः पुरुषः प्रतिभासते, इतरथा न केवलपुरुषप्रतीतेरेषा प्रतीतिर्विशिष्यते, उभयप्रतिभासेऽपि न दण्डपुरुषाविति प्रतीतेः, विशेषणविशेष्यभावस्य नियामकत्वात् ।

पूर्वापरचिरक्षिप्रक्रमाद्यवगमेष्वपि ।
दिक्कालादिविशिष्टोऽर्थः स्फुरत्यतिशयग्रहात् ॥
प्रत्यक्षः किं स कालादिः प्रतीतिं पृच्छ किं मया ।
गृह्यते तद्विशिष्टोऽर्थः स च नेत्येतदद्भुतम् ॥
एतेन समवायेऽपि प्रत्यक्षत्वं प्रकाशितम् ।
इहेति तन्तुसम्बद्धपटप्रत्ययदर्शनात् ॥

'अयं पटः' इति प्रत्ययाद् 'इह तन्तुषु पटः' इति विलक्षण एष प्रत्ययस्तन्तुपटसम्बन्धस्य विशेषणस्याप्रत्यक्षतायां न केवलपटप्रत्ययाद् विशिष्येतेति । अथ मतम् उपायभेदात् प्रतीतिभेदो भवति दूराविदूरदेशव्यवस्थितस्थाण्वादिपदार्थप्रतीतिवत् संस्कृतासंस्कृताक्षकरणविषयबोधवद्वेति । तदसाम्प्रतम्, उपायभेदेऽपि तद्भेदासिद्धेः । उपायो बुद्धावतिशयमादधाति न विषये, विषयावगतिसमये च न बुद्धिरवभातीति नैयायिकाः । तदयमतिशयो यदधिकरणः सा न प्रतिभासते बुद्धिः, यच्च तदानीमव-

---

रूपाध्यारोपः स्फटिके कल्प्यते । एवं शब्दवशात् समुत्पद्यमानानां सामान्यादिप्रत्ययानां शब्दाकारसामान्यादिरूपाध्यारोपोऽर्थे कल्प्यतामिति पर्यनुयुक्तैर्भवद्भिरिदमेवोत्तरं वक्तुम् शक्यम्, सविकल्पके ज्ञाने शब्दरहितस्यार्थस्यावभासनम्, शब्दस्तु तत्र चक्षुरादिवदुपाय एव, न तु सोऽपि तत्र प्रतिभासतेऽतः प्रतिभासमानानां सामान्यादीनां कथमप्रतिभासमानशब्दाकारताकल्पना सम्भवतीति । तदिदानीमित्थं शब्दविशिष्टार्थप्रतिभासेऽङ्गीक्रियमाणे विघटते । कथम् ? अर्थवच्छब्दस्यापि यदि प्रतिभासोऽभ्युपगम्यते तदानीं शब्दस्याप्रतिभासमानत्वे यत् शब्दाकारत्वनिराकरणं सामान्यादीनां कृतं तन्नैव कर्तुं

भासते विषयस्तत्रातिशयो नास्ति, दृश्यते चातिशयसंवेदनमिति सङ्कटः पन्थाः। न च दूराविदूरदेशवर्त्तिनि पदार्थे प्रतीतिरुपायभेदाद् भिद्यते, सापि हि विषयभेदादेव भिद्यते।

दूराद्धि वस्तुसामान्यं धर्ममात्रोपलक्षितम्।
अदूरतस्तु विस्पष्टविशेषमवसीयते॥

यथा माघेन वर्णितम्

चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥

रुचिकारादिमते उपायभेदात् प्रतिभासभेदसमर्थनम्

क्रियान्तराणां वैचित्र्ये यद्वा तद्वाऽस्तु कारणम्।
भेदो ज्ञानक्रियायास्तु कर्मभेदनिबन्धनः॥

तदेतदाचार्याः प्रतिसमादधते न विषयभेदादेव प्रतिभासभेदः। किन्तूपायभेदाद्भवत्येव। यच्च चोदितं विषयप्रतिभासकाले तत्प्रतिभासाप्रतिभासादतिशयवचने सङ्कटः पन्था इति तदविदितनैयायिकदर्शनस्यैव चोद्यम्। ज्ञानोत्पाद एव विषयस्य प्रत्यक्षतेति नो दर्शनम्, न ज्ञानग्रहणमिति। तत्र यथा पुरुष इति निरतिशयज्ञानमात्रोत्पादे तावन्मात्रविषयप्रत्यक्षता भवति न तत्र ज्ञानं प्रकाशते, अगृह्यमाणेऽपि ज्ञाने विषय एव प्रतिभासते, एवं 'दण्डी'ति 'शुक्लवासा' इति विशेषण-

---

शक्यत इति। पुनरनेन मार्गेणावतरन् केन वार्यते शब्दाध्यास इति। एवञ्चेदं शब्दाध्यासपक्षावतरणं विश्वरूपटीकातो व्यपदेश्यपदं व्याचक्षाणैः भट्टश्रीशशाङ्कधरपादैर्व्याख्यातम्। ग्रन्थकारस्त्वपवर्गाह्निके स्वाभिप्रायेण शब्दाध्यासस्वरूपं प्रपञ्चयिष्यति। शब्दाकारस्य सामान्यादेरर्थे न्यासः समारोपः शब्दाध्यासः।

चयस्त्विषामिति। विभुर्हरिरम्बरात् खादवतरन्तं मुनिं क्रमान्नारद इत्यनेन विशेषेणाबोधि बुद्धवान्। यः पूर्वं दूरतया स्पष्टग्रहणाभावे सति त्विषां चयस्तेजसां पिण्ड इत्यवधारितः, पुनः किञ्चिन्निकटतया शरीरितया ज्ञाताकारम्, ततोऽपि नैकट्यादवयव-

ज्ञानाभ्युपायातिशयवशात् सातिशयप्रत्ययजनने तद्ग्रहणे स एव विषयोऽवभासत इति कियानेष सङ्कटः पन्थाः ? तथा च 'दण्डीति' पुरुषप्रवणैव मतिः, को दण्डी ? पुरुषः, कः पुरुषः ? दण्डीति, सामानाधिकरण्येन निःसन्धिबन्धनस्य पुंस एव प्रतिभासात् । एवं दण्डिनं भोजय, दण्डिने देहीति भोजनादिकार्ययोगित्वं न दण्डे, अपि तु पुंस्येव ।

ननु 'दण्डी पर्वतमारोहती'ति दण्डेऽपि कार्यान्वयो दृश्यते लोके, वेदेऽपि 'दण्डी मैत्रावरुणः प्रैषानन्वाहेति' प्रैषानुवचनस्य वचनान्तरतः प्राप्तेर्दण्डविधानार्थमेतद्वाक्यं भवति । यथा 'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'ति श्येनादौ ऋत्विजां प्रकृतिवद्भावेन प्राप्तानां लोहितोष्णीषविधानमात्रमेतद्भवति ? उच्यते । भवत्वेवं, किन्तु दण्डमवलम्ब्य पुरुषः पर्वतमारोहति, न दण्डो निश्चेतनः । वेदेऽपि दण्डपाणिः पुरुषः प्रैषाननुभाषते न दण्डः । न लोहिता उष्णीषाः प्रचरन्ति किन्तु अन्यपदार्थीभूता ऋत्विज एवेति सर्वत्र विशेष्यप्रवणैव मतिः । उभयप्रतिभाने तु दण्डपुरुषाविति स्यान्न दण्डीति, विशेषणविशेष्यभावस्य नियामकत्वादिति चेत् ? सेयं विशेष्यप्रवणा मतिरुक्तैव भवति, विशेषणस्य विशेषणत्वेनैवोपसर्जनत्वाद् दण्डोऽस्यास्तीति पुरुष एवोच्यते न दण्डपुरुषौ । एवं पूर्वापरादिप्रत्ययाश्चिरक्षिप्रादिप्रत्यया इह तन्तुषु पट इत्यादिप्रत्ययाश्च दिक्कालसमवायग्राहिणः, त इमे दिक्कालसमवायाः सामग्र्यन्तर्गताः सन्तः प्रत्ययातिशयमादधति, न तद्विषये भवन्ति पटादिद्रव्यवत् ।

विभागावबोधात् पुंस्त्वेन निर्ज्ञातम्, ततोऽप्यतिनैकट्यान्नारद इत्येवमबोधि । **स एव विषयोऽवभासते** अविशिष्ट एव भासत इत्यर्थः । **निःसन्धिबन्धनस्य** शुद्धपुरुषप्रत्ययप्रतिभास्यादविभक्तस्वरूपस्य ।

प्रैषानुवचनस्य वचनान्तरतः प्राप्तेरिति । 'मैत्रावरुणः प्रैष्यति चानु चाऽऽह' इति वचनान्तरेण यत् प्राप्तं प्रैषानुवचनं तदनूद्य दण्डित्वं विधीयते, यत् प्रैषानुवचनं मैत्रावरुणेनर्त्विजा कर्तव्यं तद् दण्डिना यजमानतः प्राप्तदण्डहस्तेन कर्तव्यम् । पशुयागेऽध्वर्युणा अग्नये छागस्य वपाया मेदसः प्रेष्येति, एवं प्रेषितो मैत्रावरुणो यत् 'होतर्यज' इति प्रतिप्रेषणं करोति तत् प्रैषानुवचनम्, तदेव 'प्रैष्यति चानु चाऽऽह' इत्यत्र प्रैष्यतीत्यनेन विहितम्, न केवलमेवंभूतं प्रैषानुवचनमसौ करोतीति यावदनु चाह अन्वाह च अनुवाक्यमप्यसावेव पठतीत्यर्थः । **प्रकृतिवद्भावेन प्राप्तानामिति** ।

एवं पतनाद्यनुमेयगुरुत्वादिकारणभेदजनिता 'गुरुः पाषाण' इत्यादिप्रत्ययाः परोक्षविशेषणं विशेष्यमवलम्बन्त इत्यलं विस्तरेण ।

तस्माद् गौरित्यादिज्ञानं न वाचकावच्छिन्नवाक्यविषयम् । अतश्च न शाब्दं तत्, अपि तु सुस्पष्टं प्रत्यक्षमेव । तस्मिंश्च लक्षिते सति लक्षणवैयर्थ्यशङ्काकरणाभावान्नासम्भवदोषनिराकारणार्थमव्यपदेश्यपदम् ।

रुचिकारादिमतेऽव्यपदेश्यपदावश्यकता

किमर्थं तर्हीदमस्तु ? उक्तमाचार्यैः उभयजज्ञानव्यवच्छेदार्थमिति । ननु तदपि प्रत्यक्षमेवेति अनपोह्यमुक्तम् । पुरोऽवस्थितगवादिपदार्थस्वरूपमात्रग्रहणनिष्ठितसामर्थ्यमत्र प्रत्यक्षम्, गोशब्दवाच्यतायान्तु संज्ञाकर्मोपदेशी शब्द एव प्रमाणम् । यद्यपि शब्दार्थसम्बन्धपरिच्छेदे गत्यन्तरमपि सम्भवति तथापि यत्र तावत् संज्ञिनं निर्दिश्य सञ्ज्ञा वृद्धैरुपदिश्यते 'गोशब्दवाच्योऽयं' 'पनसशब्दवाच्योऽयमि'ति तत्र तद्वाच्यतापरिच्छेदे स एव कारणम् ।

अत एव च लोकोऽपि शाब्दत्वमभिमन्यते ।
शब्दोपरचितापूर्वज्ञानातिशयतोषितः ॥
तच्छब्दवाच्यताज्ञप्तिर्विना संज्ञोपदेशिनः ।
शब्दान्नेति स एवात्र सत्यप्यक्षे प्रकर्षभाक् ॥
अतः सूत्रकृताप्यत्र शब्दातिशयदर्शनाद् ।
व्यधायि तद्व्यवच्छेदो न तु धर्मोपदेशिना ॥

तस्मादुभयजज्ञानव्यवच्छेदार्थमेवेदं पदमिति ।

तत्र केषाञ्चित् पूर्वपक्षः

अन्ये मन्यन्ते यदि सङ्केतग्रहणकाले भाविनः संज्ञोपदेशकवचनजनितस्योभयजज्ञानस्य व्यवच्छेदकमिदं वर्ण्यते पदम्, तदा तद्व्यवहारकालेऽपि

सोमप्रकृतित्वाद् एवंभूतानामव्यक्तयागानां श्येनादीनां प्रकृति वद्भावात् षोडश ऋत्विज प्राप्ता एव; तान् प्राप्ताननूद्य लोहितोष्णीषता तेषां विधीयत इति ।

संज्ञाकर्मोपदेशीति । संज्ञासंज्ञिसम्बन्धक्रिया संज्ञाकर्म । **गत्यन्तरमपि सम्भवतीति** । यत्र वृद्धोक्तं वाक्यमुपलभ्य परः प्रवर्ततेऽन्यश्च तटस्थ एव शब्दार्थे व्युत्पद्यते 'अमुष्माच्छब्दादवगतादत्रायं प्रवृत्तः, तन्नूनमस्यायमर्थ' इत्यादिप्रकारेण ।

यदयं गौरिति सङ्केतग्रहणकालानुभूतदेवदत्ताद्युदीरितसंज्ञोपदेशकवचनस्मरणपूर्वकं विज्ञानमुत्पद्यते तदप्युभयजमेवेति कथमनेन न व्युदस्यते ?

ननु तत्र शब्दस्मरणं कारणं न शब्दः, सङ्केतकालेऽपि शब्दस्मरणमेव कारणम्। न हि क्रमभाविनो वर्णा युगपदनुभवितुं पार्यन्ते, अन्त्यवर्णे तु गृह्यमाणे स्मर्यमाणे वा किं शब्दव्यापारो विशिष्यते ?

ननु व्यवहारकाले गवादिनामधेयपदमात्रमेव स्मर्यमाणमिन्द्रियेण सह सविकल्पप्रत्ययोदये व्याप्रियते। सङ्केतकाले तु संज्ञोपदेशिवृद्धवाक्यमिति चेत्, मैवम्। व्यवहारकालेऽपि संज्ञोपदेशकं वृद्धवाक्यमेव स्मर्यते तदस्मरणे तच्छब्दवाच्यतानवगमात्। 'अस्य गौरिति नाम देवदत्तेनोपदिष्टमासीदि' त्येवमनुस्मृत्य गोशब्दवाच्यतयैवं व्यवहरतीति वाक्यस्मरणजमेवेदं ज्ञानम्।

तस्मादस्यापि तद्वाक्यं संज्ञाकर्मोपदेशकम्।
हेतुतामुपयातीति शाब्दमेतदपोष्यताम्॥
एवमस्त्विति चेच्छान्तमेवं सति तपस्विनाम्।
नैयायिकानामुत्पन्नं प्रत्यक्षं सविकल्पकम्॥
यत्र मार्गान्तरेणापि सङ्केतज्ञानसम्भवः।
तत्राप्यनेन न्यायेन शाब्दता न निवर्तते॥

नैयायिकानाञ्च सविकल्पप्रत्यक्षमयाः प्राणाः, तस्मान्नोभयजस्य शाब्दत्वं ज्ञानस्य वक्तव्यम्। सम्बन्धाधिगमस्तु नानाप्रमाणकः। तत्र स्वे स्वे विषये तत्तत् प्रमाणं प्रवर्तते, यथाह भट्टः "सम्बन्धस्त्रिप्रमाणक" इति। तस्मान्नैकस्य शब्दस्य भार आरोपणीयः। प्रत्यक्षन्तु सङ्केतग्रहणकालेऽपि स्वविषयग्राहकम्। इदानीमपि व्यवहारकालेऽपि तत्स्वविषयग्राहकमिति नोभयजज्ञानं व्यवच्छेदपक्षो निरवद्यः।

एवमस्त्विति चेच्छान्तमिति। शान्तम्, मा भूदेवम्, अमङ्गलमेतदित्यर्थः। **तत्राप्यनेन न्यायेन शाब्दता न निवर्तत** इति। तत्रापि यस्मादन्यं वृद्धं प्रत्युदीरिताद् वृद्धवाक्याद् यत्रार्थे तस्य व्युत्पत्तिर्ज्ञाता, तदर्थग्रहणकाले तस्य वाक्यस्य स्मरणात्।

सम्बन्धस्त्रिप्रमाणक इति।

शब्दवृद्धाभिधेयांस्तु प्रत्यक्षेणैव पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥

तस्माद् वरं जरन्नैयायिककथितशब्दकर्मतापन्नज्ञानव्यवच्छेद एवाश्रीयताम्, तत्र तावत्कर्मणि कृत्ये कृते व्यपदेश्यशब्दो यथार्थतरो भवति ।

ननु तत्र चोदितं न तादृशं ज्ञानमप्रमाणम्, न पञ्चमं प्रमाणमिति । सत्यम् । अयन्तु तेषामाशयः, रूपादिविषयग्रहणाभिमुखं हि तदक्षजं ज्ञानं प्रमाणं वा फलं वोच्यते । यदा तु तदेव शब्देनोच्यते रूपज्ञानं रसज्ञानमिति तदा रूपादिज्ञानविषयग्रहणव्यापारलभ्यां प्रमाणतामपहाय शब्दकर्मतापत्तिकृतां प्रमेयतामेवावलम्बत इति न तस्यां दशायां तत्प्रमाणमिति कुतः पञ्चमप्रमाणप्रसङ्ग इति ।

केषाञ्चिदपरेषां मतेऽव्यपदेश्यपदसार्थक्यम्

अपर आह, सविकल्पकस्य शब्दसङ्कल्पकस्य शब्दसंसर्गसापेक्षजन्मनः प्रत्यक्षज्ञानस्य शाब्दतां पूर्ववदाशङ्क्य तस्यैवाशाब्दतां दर्शयति अव्यपदेश्यपदेन सूत्रकारः, प्रत्यक्षमेव तज्ज्ञानमिन्द्रियान्वयव्यतिरेकानुविधायित्वादव्यपदेश्यमशाब्दमित्यर्थः ।

स्पष्टत्वाद् वाचकाभावादिन्द्रियानुविधानतः ।
लोकस्य सम्मतत्वाच्च प्रत्यक्षमिदमिष्यते ॥

शब्दानुस्मृतिजत्वेऽपि न शाब्दं ज्ञानमीदृशम् ।
शब्दस्मृतिः सहायः स्यादिन्द्रियस्य प्रदीपवत् ॥

नन्वेवं सविकल्पस्य प्रत्यक्षत्वे प्रसाधिते ।
नेदानीं संगृहीतं स्यात्प्रत्यक्षं निर्विकल्पकम् ॥

यत्तु शब्दानुवेधेन शाब्दत्वं सविकल्पके ।
कश्चिदाशङ्कते तस्य प्रतिशब्दोऽयमुच्यते ॥

अन्यथानुपपत्त्या च वेत्ति शक्तिं द्वयाश्रिताम् ।
अर्थापत्त्यावबुध्यन्ते सम्बन्धं त्रिप्रमाणकम् ॥ इति ॥

चेष्टया प्रवृत्तिनिवृत्तिलक्षणया । अनुमानेनानुमानभूतया । प्रमाणत्रयावगम्यत्वेऽपि सम्बन्धस्यार्थापत्तेः साक्षाद् व्यापारादितरयोस्तदुपकारत्वेन 'अर्थापत्त्यावबुध्यन्ते' इत्युक्तम् ।

यत्र शब्दानुवेधेऽपि प्रत्यक्षं ज्ञानमिष्यते ।
तत्र तत्स्पर्शशून्यस्य तथात्वे का विचारणा ॥
निर्विकल्पकवत्तस्मात् प्रत्यक्ष सविकल्पकम् ।
समग्रहीच्च तदिदं पदेनानेन सूत्रकृत् ॥
इत्याचार्यमतानीह दर्शितानि यथागमम् ।
यदेभ्यः सत्यमाभाति सभ्यास्तदवलम्ब्यताम् ॥

अव्यभिचारिपदसार्थक्यम्

अव्यभिचारिग्रहणं व्यभिचारिज्ञानव्यवच्छेदार्थम् । यथा ग्रीष्मे तपति ललाटन्तपे तपने तन्मरीचिषु चतुरमूषरभुवमभिहत्य समुत्फलितेषु तरङ्गाकारधारिषु यद् वारिधिज्ञानं तदतस्मिंस्तदिति ग्रहणाद् व्यभिचारि भवति तदनेन पदेन व्यवच्छिद्यते न तत्प्रत्यक्षमिति । तत्र च निर्विकल्पकमपि प्रथमनयनसन्निपातजज्ञानमुदकसविकल्पकज्ञानजनकमुदकग्राह्येव न यथा, तथा तथागताः कथयन्ति मरीचिविषयमविकल्पकं ज्ञानमुदकसविकल्पकजननादप्रमाणमिति निर्विकल्पावस्थायामविचारयत एवं प्रथमोन्मीलितचक्षुषो झगिति सलिलप्रतिभासात्- । अथवा वाचकोल्लेखपूर्विका अपि संविदः नैवेन्द्रियार्थजन्यत्वं जहतीत्युपपादितम्, तस्मात् सविकल्पकमविकल्पकं वा यदतस्मिंस्तदिति ज्ञानमुत्पद्यते तद्व्यभिचारि, तच्चेह व्यावर्त्यमिति ।

ननु मरीचिषु जलज्ञानमविद्यमानसलिलावभासित्वादनिन्द्रियार्थसन्निकर्षजमतश्चेन्द्रियार्थसन्निकर्षोत्पन्नपदेन तद्व्युदाससिद्धेः, किमव्यभिचारिपदेन ? नैतदेवम्,

तस्येन्द्रियार्थजन्यत्वं सिद्धं तद्भावभावतः ।
न ह्यनुन्मीलिताक्षस्य मरौ सलिलवेदनम् ॥
अर्थोऽपि जनकस्तस्य विद्यते नासतः प्रथा ।
तदालम्बनचिन्तां तु त्रिधाचार्याः प्रचक्रिरे ॥
कैश्चिदालम्बनं तस्मिन्नुक्तं सूर्य्यमरीचयः ।
निगूहितनिजाकाराः सलिलाकारधारिणः ॥

तत्र तरङ्गादिसामान्यधर्मग्रहणे सति न स्थाणुपुरुषवदुभयविशेषाः, न च सन्निहितमरीचिविशेषाः स्मरणपथमवतरन्ति किन्तु पूर्वोपलब्धविरुद्धसलिलवर्तिनो

विशेषाः, तत्स्मरणाच्च स्थगितेषु स्वविशेषेषु मरीचयः स्वरूपमुपदर्शयितुमशक्नुवन्तस्तोयरूपेणावभासन्त ।

आलम्बनपदार्थविचारः

अन्ये त्वालम्बनं प्राहुः पुरोऽवस्थितधर्मिणः ।
सादृश्यदर्शनोद्भूतस्मृत्युपस्थापितं पयः ॥

यत्र किल ज्ञाने यद्रूपमुपप्लवते तत्तस्यालम्बनमुच्यते, न सन्निहितम् । न चैकान्तासतः खपुष्पादेः ख्यातिरवकल्पत इति देशान्तरादौ विद्यमानमेव सलिलं सदृशदर्शनप्रबुद्धसंस्कारोपजनितस्मरणोपारूढम् इहावलम्बनी भवति ।

अन्यदालम्बनञ्चान्यत् प्रतिभातीति केचन ।
आलम्बनं दीधितयस्तोयञ्च प्रतिभासते ॥

कर्तृकरणव्यतिरिक्तं ज्ञानजनकमालम्बनमुच्यत इति न परमाण्वादौ प्रसक्तिरिति । तदिदं पक्षत्रयमप्युपरिष्टान्निपुणतरं निरूपयिष्यते । तदेवं बाह्येन्द्रियार्थान्वयव्यतिरेकानुविधायिनां विभ्रमाणामिन्द्रियार्थसन्निकर्षोत्पन्नपदेन निरसितुमशक्यत्वाद् युक्तमव्यभिचारिपदोपादानम् ।

विभ्रमवारणार्थमव्यभिचारिपदमिति शङ्कायाः समाधानम्

यत्तु मानसा विभ्रमा बाह्येन्द्रियानपेक्षजन्मानः, तेषां सत्यमिष्यत एवेन्द्रियार्थसन्निकर्षपदेन पर्युदसनमिति न तदर्थमव्यभिचारिपदोपादानम् । तद्यथा

विरहोद्दीपितोद्दामकामाकुलितदृष्टयः ।
दूरस्थामपि पश्यन्ति कान्तामन्तिकवर्त्तिनीम् ॥

नन्वेवम्प्रायेषु निरालम्बनेषु विभ्रमेषु कुतस्त्य आकारः प्रतिभाति ? उच्यते

आकारः स्मृत्युपारूढः प्रायेण स्फुरति भ्रमे ।
स्मृतेस्तु कारणं किञ्चित् कदाचिद्भवति क्वचित् ॥

कर्तृकरणव्यतिरिक्तं ज्ञानजनकमिति । ज्ञानजन्मनि कारकत्रयव्यापारोपलम्भाच्छुक्तिकायाः कर्तृकरणरूपतानन्वयादवश्यं कर्मतया विषयत्वेनालम्बनत्वेनान्वयो वाच्य इति ।

क्वचित् सदृशविज्ञानं कामशोकादयः क्वचित् ।
क्वचित् कुदर्शनाभ्यासश्चक्षुषस्तिमिरं क्वचित् ।।
क्वचिन्निद्रा क्वचिच्चिन्ता धातूनां विकृतिः क्वचित् ।
अलक्ष्यमाणे तद्धेतावदृष्टं स्मृतिकारणम् ।।
बालस्येन्दुद्वयज्ञानमस्ति नास्तीति वेत्ति कः ।
अस्तित्वेऽपि स्मृतौ हेतुमदृष्टं तस्य मन्वते ।।
नूनं नियमसिद्ध्यर्थं जनकस्यावभासनम् ।
न चैकान्तासतो दृष्टा ज्ञानोत्पादनयोग्यता ।।

क्वचित् सदृशविज्ञानमिति । यथा मरीचिषु जलज्ञाने । **कामशोकादयः** पुरोऽवस्थितस्त्र्यादिदर्शने ।

कुदर्शनाभ्यासो बौद्धादिदर्शनाभ्यास आत्मादौ नास्तिताज्ञाने । **चक्षुषस्तिमिरं** द्विचन्द्रादिज्ञाने । **निद्रा** स्वप्नज्ञाने । **चिन्ता** यमर्थं चिन्तयति तत् प्रत्यक्षतया पुरोऽवस्थितमिव गृह्णाति । **धातूनां** पित्तादीनां **विकृतिः** शर्करादेस्तिक्ततादिज्ञाने । ननु जाततैमिरिकस्येहजन्मनि घटादिगतस्य द्वित्वस्याऽननुभवात् स्मरणाभावाद् द्विचन्द्रादिज्ञानानुत्पाद इत्याशङ्क्याह—**अलक्ष्यमाणे तद्धेता**विति । इदमेवोत्तरश्लोकेन 'बालस्येन्दुद्वयज्ञानमस्ति नास्ति' इत्यादिना व्यनक्ति । यद्यपीहजन्मनि नानुभवस्तथापि जन्मान्तरानुभूतस्य अदृष्टवशादनुस्मरणमिति तात्पर्यम् । अलक्ष्यमाणे वा स्वशिरश्छेदादावनुभवाभावाददृष्टस्य कारणता । ननु जाततैमिरिकस्यापि तिमिरमेव मिथ्याज्ञाने हेतुः । सत्यम्, तत्तु तिमिरं द्वित्वस्मरणद्वारेण जनकम्, तस्य स्मरणं चानुभूते भवति, न च जातमात्रस्येहजन्मन्यनुभवोऽस्ति । अथ तिमिरमेव जन्मान्तरानुभूतस्मरणहेतुः कस्मान्न कल्प्यते । न, दृष्टस्य हेतोर्जन्मान्तरानुभूतस्मरणसामर्थ्यकल्पनायामननुभूतरजतस्यापीहजन्मनि शुक्तिकायां सादृश्यजनितजन्मान्तरानुभूतरजतस्मरणे सति रजतज्ञानं स्यात्, न च दृश्यते । अतोऽदृष्टमेव जन्मान्तरानुभूतस्मरणजनकत्वेन कारणं कल्प्यम्, यत्र कार्यञ्च दृश्यते न च तदनुगुणकारणं तत्र सर्वत्रादृष्टस्यैव कारणत्वात्, अग्नेरूर्ध्वज्वलनादौ । नन्विदमत्र कारणमिदं चात्रेत्यत्र किं प्रमाणम् ? तदाह—**नूनं नियमसिद्ध्यर्थमि**ति । यदि हि अजनकं प्रतिभासेत तदजनकत्वाविशेषाद् यत्किञ्चित् प्रतिभासेत; शुक्तिकायां घटोऽपि प्रतिभासेत, रजतवत् तस्याप्यजनकत्वादिति ।

न च सन्निहितं वस्तु तत्रास्ति वनितादिकम् ।
तेनेदं स्मृत्युपारूढमवभातीति मन्वते ॥
तत्राद्येन पदेनैताः स्वान्तःकरणसम्भवाः ।
निरस्ता भ्रान्तयोऽक्षादिसंसर्गरहितोदयाः ॥
याः पुनः पीतशङ्खादिमरुनीरादिबुद्धयः ।
अक्षजास्तद्व्युदासाय सूत्रे पदमिदं कृतम् ॥

व्यवसायपदसार्थक्यम्

दूरात् स्थाणुपुरुषसाधारणं धर्ममारोहपरिणाहरूपमुपलभमानस्य तयोरन्यतरत्र वर्तमानान् वक्रकोटरादीन् करचरणान् वा विशेषानपश्यतः समानधर्मप्रबुद्धसंस्कारतया चोभयवर्तिनोऽपि विशेषाननुस्मरतः पुरोऽवस्थितार्थविषयं स्थाणुर्वा पुरुषो वेति संशयज्ञानमुपजायते तद् इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणयुक्तमपि न प्रत्यक्षफलम् । अतस्तद्व्यवच्छेदाय व्यवसायात्मकग्रहणम् ।

संशयमानसत्ववादिमते शङ्का तत्समाधानञ्च

ननु मानसत्वात् संशयज्ञानस्य इन्द्रियार्थसन्निकर्षोत्पन्नग्रहणेन निरासः सिद्ध्यत्येवेति किं पदान्तरेण ? तथा च भाष्यकारः स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहसुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानीति वक्ष्यति ।

मैवम्, स्थाण्वादिसंशयस्य बाह्येन्द्रियान्वयव्यतिरेकानुविधायित्वात् । कश्चिद्धि मानसः संशयः समस्त्येव यथा आदेशिकस्य ज्योतिर्गणकादेरेकदा अन्यदा चासम्यगादिश्य तृतीये पदे पुनरादिशतः संशयो भवति 'किमयमस्मदादेशः संवदेदुत विसंवदेदि'ति स भाष्यकृतश्चेतसि केवलमनःकरण इति स्थितिः । यस्तु विस्फारिताक्षस्य स्थाणुर्वा पुरुषो वेत्यादिः संपद्यते संशयस्तम्, अनिन्द्रियार्थसन्निकर्षजं को नामाचक्षीत ।

स्मृत्यनुमानागमेति । स्मृत्यादीनां बाह्यकरणव्यापारोपरमेऽप्युपलम्भात्, अकरणस्य चात्मनस्तज्जन्मनि बाह्यविषयज्ञान इव सामर्थ्यादर्शनात् करणं कल्प्यम्, तच्च मन इति ।

संशयविपर्ययोरपाकरणार्थमव्यभिचारिपदमिति विचारः

नन्वतस्मिंस्तदिति ज्ञानं व्यभिचारि व्याख्यातम्। एकरूपञ्च पुरोऽवस्थितमर्थमनेकरूपतया स्पृशति संशयः स्थाणुर्वा पुरुषो वेति सोऽयमतस्मिंस्तथाभावाद्विपर्यय एवेति पूर्वपदव्युदस्तत्वान्न पदान्तरव्यवच्छेद्यतामर्हतीति। नैतदेवम्, स्वरूपभेदात् कारणभेदाच्च। एवमेव विरुद्धमाकारमुल्लिखन् विपर्ययो जायते स्थाणौ पुरुष इति पुंसि वा स्थाणुरिति, अनियताकारद्वयोल्लेखी तु संशयो भवति स्थाणुर्वा स्यात्पुरुषो वेति। सोऽयं स्वरूपभेदः प्रत्यात्मसंवेद्यः। कारणभेदात्तु विरुद्धविशेषस्मरणप्रभवो विपर्ययः, शुक्तिकायां सन्निहितायां रजतविशेषानुस्मरणान्मरीचिषु सलिलगतविशेषाननुस्मरतो विपर्ययो भवति। उभयविशेषस्मरणजन्मा तु संशय इति पदान्तरनिरसनीय एवायम।

तत्रैव प्रवरपक्षीयाशङ्का तत् समाधानञ्च

ननु संशयविपर्ययोरपि निर्विकल्पयोरसम्भवादव्यपदेश्यपदेनैव प्रवरपक्षे प्रतिक्षेपः सिद्धयेत्, पुरोऽवस्थितस्थाण्वादिधर्मिदर्शनमात्रमेव निर्विकल्पकमिन्द्रियव्यापारजम्, अनन्तरन्तूभयान्यतरविशेषस्मरणजन्मनोरुल्लिखितशब्दयोरेव संशयविपर्ययोरुत्पादः, तत्र विशेषस्मृत्यैव शब्दानुवेधस्याक्षेपात्, अतः पदद्वयमपि तद्व्युदासाय न कर्त्तव्यम्। अत्र तदेव तावद्वक्तव्यम् प्रवरपक्षः प्रतिक्षिप्त एव यतः शब्दानुवेधजातमस्ति प्रत्यक्षमुपपादितम्।

संशयविपर्ययोरपि अव्यपदेश्यत्वमेव

ननु भवतु प्रवरपक्षः प्रतिक्षिप्तः सदृशदर्शननिष्ठिते तु नयनव्यापारे विशेषस्मृतेरूर्ध्वमुपजायमानौ संशयविपर्ययौ नेन्द्रियजाविति प्रथमपदेनैव निरस्तौ भवतः। तदसत् स्मृतेरूद्ध्वंमपीन्द्रियव्यापारानुवृत्तेरित्युक्तत्वात्, एतच्चान्वयव्यतिरेकाभ्यामवगम्यते निमीलितचक्षुषस्तदनुत्पादात्, न च तदानीमन्तःसङ्कल्परूपेणापि शब्दोल्लेखः, उत्पन्ने तु संशये विपर्यये च वाचकस्मरणं भविष्यतीति सम्यग्ज्ञानवत् संशयविपर्ययावपि शब्दोल्लेखशून्यौ संवेद्येते, विशेषस्मृतिस्तु विशेषविषयत्वात् तानेवाक्षिपतु शब्दस्य किं वर्त्तते वाचकशब्दस्मृतिस्तु शब्दमुपस्थापयति, सा च न तावदुपपन्नेति।

सम्यक्प्रत्ययवत्तस्माद्वाचकोल्लेखवर्जितौ ।
अक्षव्यापारजन्मानौ स्तः संशयविपर्ययौ ॥

ईदृशयोः कथमनयोराद्यपदव्युदसनीयता, तस्मात् तदपाकृतये युक्तं पदद्वयस्याप्युपादानम्, एवं लक्षणपदानि व्याख्यातानि ।

प्रत्यक्षपदस्य यौगिकत्वादिविचारः

लक्ष्यपदन्तु प्रत्यक्षमिति ज्ञानविशेषे रूढ्यैव प्रवर्त्तते, योगस्य व्यभिचारात् । प्रतिगतमक्षं प्रत्यक्षमित्यक्षरार्थः, स चायं सुखादावपि सम्भवतीति रूढिरेव साधीयसी । अथवा ज्ञानपदस्य सूत्रे निर्देशाद् योगपक्षोऽप्यस्तु न चासौ दृश्यमानो निह्नोतुं युक्तः । योगरूढिस्तु न सम्मतैव विदुषाम् । यत्रापि हि द्वयं दृश्यते तत्रापि शब्दप्रवृत्तौ प्रयोजकमेव भवति, कथं पुनरक्षं प्रतिगतं ज्ञानमिष्यते, न संयोगित्वेन अञ्जनादेः प्रत्यक्षप्रसङ्गात्, न समवायित्वेन अक्षवर्तिनां रूपादीनां तथात्वप्रसङ्गात्, न जनकत्वेन अक्षारम्भकाणां परमाणूनामपि तथाभावप्रसक्तेः, तस्माज्जन्यत्वेनैव ज्ञानमक्षं प्रतिगतमिति व्याख्येयम् । अव्ययीभावव्याख्यानन्तु न युक्तं प्रत्यक्षः पुरुषः प्रत्यक्षा स्त्रीत्यादिव्यवहारदर्शनादित्यलं प्रसङ्गेन ।

तेनेन्द्रियार्थजत्वादिविशेषणगणान्वितम् ।
यतो भवति विज्ञानं तत्प्रत्यक्षमिति स्थितम् ॥

योगरूढिस्तु न सम्मतैवेति । या पङ्कजादिषु कैश्चिदभ्युपगता तस्या दूषणं स्वयमप्याह—**यत्रापि हि द्वयं दृश्यत** इत्यादिना । **अव्ययीभावव्याख्यानमिति** । अक्षमक्षं गतं प्रत्यक्षमिति वीप्सायामव्ययीभावः । 'प्रत्यक्षेण प्रत्यक्षादिति दर्शनात्' इति नापपाठः, एतयोरव्ययीभावेऽपि सम्भवात् । 'अपञ्चम्याः' इति पञ्चम्या अमादेशप्रतिषेधात्, 'तृतीयासप्तम्योर्बहुलम्' इति च तृतीयासप्तम्योर्बहुलवचनात् । अतः 'प्रत्यक्षस्य प्रत्यक्षयोः' इत्यादि पठनीयम् । ननु च प्रतिगतमक्षं प्रत्यक्षम् 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति तत्पुरुषाश्रयणात् परवल्लिङ्गतायां प्रत्यक्षो बोध इत्यादि न स्यात् । उच्यते, 'द्विगुप्राप्तापन्नालंगतिसमासेषु' परवल्लिङ्गतानिषेधादभिधेयलिङ्गतैव भवति, प्राप्तो जीविकां प्राप्तजीविक इतिवत् ।

इति विगतकलङ्कमस्य धीमानकुरुत लक्षणमेतदक्षपादः ।
न तु पररचितानि लक्षणानि क्षणमपि सूक्ष्मदृशां विशन्ति चेतः ॥

धर्मकीर्त्तिसंस्कृतदिङ्नागीयप्रत्यक्षलक्षणम्

यत्तावत् कल्पनापोढमभ्रान्तमिति लक्षणम् ।
प्रत्यक्षस्य जगौ भिक्षुस्तदत्यन्तमसाम्प्रतम् ॥
शब्दसंसर्गयोग्यार्थप्रतीतिः किल कल्पना ।
अस्याश्च केन दोषेण प्रामाण्यं न विषह्यते ॥

नन्वभिलापसंसर्गयोग्यप्रतिभासत्वादपि हि कम् अन्यं दोषं मृगयते भवान्, असदर्थविषयत्यागे तत्त्वमुक्तं भवति शब्दार्थस्य वास्तवस्याभावात्, स्वलक्षणस्य सजातीयेतरव्यावृत्तात्मनः सम्बन्धाधिगमसव्यपेक्षप्रवृत्तिना शब्देन विषयीकर्तुमशक्यत्वात्, तद्व्यतिरिक्तस्य वस्तुनोऽनुपलम्भात् । न चेन्द्रियार्थसन्निकर्षान्वयव्यतिरेकानुविधायिनी कल्पनाबुद्धिः, तमन्तरेणापि भावात्, तस्मिन् सत्यपि च पूर्वानुभूतवाचकशब्दयोजनं विनानुत्पादात् । यदि चेन्द्रियार्थसन्निकर्षस्तज्जनको भवेत् प्रथममेव तथाविधां धियं जनयेन्, न च जनयति, तदयं शब्दस्मृतेरूर्ध्वमपि न जनक इति मन्यामहे । तदुक्तम्,

यः प्रागजनको बुद्धेरुपयोगाविशेषतः ।
स पश्चादपि तेन स्यादर्थाभावेऽपि नेत्रधीः ॥ इति ।

अभिलापसंसर्गेति । अभिलप्यतेऽनेन ह्यभिलापः शब्दस्तेन संसर्गः सम्बन्धस्तद्योग्यः सामान्याकारः प्रतिभासतेऽस्यामित्यभिलापसंसर्गयोग्यप्रतिभासा । बालो हि यदा स्तनं पूर्वोपलब्धस्तनैक्येन न गृह्णाति न तदा रोदनादिपरिहारेण तत्र मुखमर्पयति, अतः शब्दसंसर्गाभावेऽपि तद्योग्यत्वात् प्रतिभासस्य तद्ग्राहिज्ञानस्य कल्पनात्वसिद्धये योग्यग्रहणम् । **तमन्तरेणापि भावात्**, आभोगादाविति शेषः; आभोगादौ हि इन्द्रियसम्बन्धं विनापि नानार्थकल्पना जायन्ते ।

यः प्रागजनक इति । योऽर्थः प्रथमेन्द्रियसन्निकर्षकाले सविकल्पकस्य न जनकः स पश्चादप्यजनक एव । तस्य हि तज्जन्मन्युपयोगो योग्यदेशावस्थितत्वम्, स च प्रागप्यस्ति; प्राक् चेदजनकः स पश्चादप्यजनक एव । अतोऽर्थाभावेऽपि **नेत्रधीः** । नेत्रधीरूपतया भवदभिमता सविकल्पिका बुद्धिर्भवेदिति ।

अपि च सत्यपीन्द्रियार्थसंसर्गे स्मृत्यपेक्षया सोऽर्थस्तथैव व्यवहितः स्यात्, आह च

अर्थोपयोगेऽपि पुनः स्मार्यच्छब्दानुयोजनम् ।
अक्षधीर्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत् ।। इति ।

सङ्केतस्मरणसहकारिसव्यपेक्षमक्षमीदृशीं बुद्धिमुपजनयतीति चेद्, न, व्यतिरिक्ताव्यतिरिक्तोपकारादिविकल्पैः सहकारिणो निरस्तत्वात्, किञ्च दण्डीत्यादिविकल्पविज्ञानं नेन्द्रियापातवेलायामेव जायते किन्तु बहुप्रक्रियापेक्षम्, यदाह ।

विशेषणं विशेष्यञ्च सम्बन्धं लौकिकीं स्थितिम् ।
गृहीत्वा सकलञ्चैतत्तथा प्रत्येति नान्यथेति ।।

न चेयतीं प्रक्रियां प्रथमनयनोपनिपातजातमविकल्पकं ज्ञानमुद्बोढुं क्षममित्याह

सङ्केतस्मरणोपायं दृष्टसङ्कलनात्मकम् ।
पूर्वापरपरामर्शशून्यं तच्चाक्षुषं कथम् ।।

तत्रैतत्स्यात्, द्विविधा विकल्पाः छात्रमनोरथविरचिताः इदन्ताग्राहिणश्च नीलमित्यादयः । तत्र पूर्वे मा भूवन् प्रमाणं कस्तेष्वर्थनिरपेक्षजन्मसु प्रामाण्येऽभिनिवेशः? इदन्ताग्राहिणां त्वर्थाविनाभूतत्वात् कथं न प्रामाण्यमिति उच्यते, सर्वं एवामी विकल्पाः परमार्थतोऽर्थं न स्पृशन्त्येव स हि निर्विकल्पकेनैवासर्वात्मना परिच्छिन्नः । तदुक्तम्

अर्थोपयोगेऽपीति । अर्थस्योपयोगेऽपि योग्यदेशावस्थितत्वेऽपि यदि स्मर्यमाणशब्दसंपर्कमपेक्षेत तज्ज्ञानम्, तदा सोऽर्थो व्यवहितो भवेत् । स्मरणजन्मन्येव तस्य व्यापृतत्वात् तज्जन्मनि पुनरव्यापारणं व्यवधानम् ।

लौकिकीं स्थितिमिति । हस्तस्थदण्डे दण्डी न पादाद्याक्रान्तेऽपीति सङ्कल्प्य संयोज्यैकत्र तथा प्रत्येति दण्डीति उच्यते ।

ननु तथाविधे दण्डीत्यादौ कल्पनाज्ञाने यदुपलब्धं रूपम् कीदृक् तदुपलब्धमित्याह **सङ्केतस्मरणोपायमिति ।** **दृष्टसङ्कलनात्मकं** पूर्वदृष्टस्य दृश्यमानेन सह संयोजनात्मकम् ।

एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न दृष्टो भागः स्याद् य प्रमाणैः परीक्ष्यते ।। इति ।

यत्तु केषाञ्चिद्विकल्पानामिदन्ताग्राहित्वस्पष्टत्वादिरूपं तदर्थाविनाभाविनिर्विकल्पकदर्शनपृष्ठभावित्वावाप्ततच्छायासंसर्गजनितं न तु तेषामर्थस्पर्शः कश्चिदस्ति अर्थात्मनो निर्विकल्पेनैव मुद्रितत्वात् ।

तस्मादतात्त्विकाकारसमुल्लेखपुरःसराः ।
न यथावस्तु जायन्ते कदाचिदपि कल्पनाः ।।

तन्मते कल्पनापञ्चकं सोदाहरणम्

पञ्च चैताः कल्पना भवन्ति, जातिकल्पना गुणकल्पना क्रियाकल्पना नामकल्पना द्रव्यकल्पना चेति । ताश्च क्वचिदभेदेऽपि भेदकल्पनात् क्वचिच्च भेदेऽप्यभेदकल्पनात् कल्पना उच्यन्ते ।

जातिजातिमतोर्भेदो न कश्चित् परमार्थतः ।
भेदारोपणरूपा च जायते जातिकल्पना ।।

इदमस्य गोर्गोत्वमिति न हि कश्चिद्भेदं पश्यति तेनाभेदे भेदकल्पनैव ।

एतया सदृशन्यायान्मन्तव्या गुणकल्पना ।
तत्राप्यभिन्नयोर्भेदः कल्प्यते गुणतद्वतोः ।।

तथा चाहुः, एष गुणी रूपादिभ्योऽर्थान्तरत्वेन नात्मानं नो दर्शयति तेभ्यश्च व्यतिरेकं वाञ्छसीति चित्रम् ।

एकस्यार्थस्वभावस्येति । एकस्य निर्भागस्य । **प्रमाणैरिति** । सविकल्पकैः प्रत्यक्षैर्भवदभिमतैरनुमानैश्च । यदि हि प्रत्यक्षेणैवानित्यत्वादिसकलविशेषच्छुरितः शब्दो गृहीतस्तत् 'अनित्यः शब्दः कृतकत्वात्' इत्यनुमानेन किं कार्यमित्यर्थः ।

जातिजातिमतोर्भेदो न कश्चिदिति । न व्यक्तेर्व्यतिरिक्ता जातिरुपलभ्यते, तदुक्तम्—'अयं गौः' इति हि लौकिकाः प्रतिपद्यन्ते, न 'इदं गोत्ववद् द्रव्यम्' इति भेदेन ।

आत्मानं नो दर्शयति, एषोऽहमस्माद् व्यतिरिक्त इति ।

भेदारोपणरूपैव गुणवत्कर्मकल्पना ।
तत्स्वरूपातिरिक्ता हि न क्रिया नाम काचन ।

गच्छति देवदत्त इति देवदत्तस्यैवान्यूनानतिरिक्तस्य प्रतिभासात् ।

विभिन्नयोस्त्वभेदेन प्रवृत्ता नामकल्पना ।
चैत्रोऽयमित्यभेदेन निश्चयो नामनामिनोः ॥

चैत्र इत्ययं शब्दः, अयमित्यर्थः, कीदृशमनयोः सामानाधिकरण्यम् ?

एवं दण्ड्ययमित्यादिर्मन्तव्या द्रव्यकल्पना ।
सामानाधिकरण्येन भेदिनोर्ग्रहणात्तयोः ॥

कल्पनाज्ञानस्याप्रमाणत्वाविपर्ययत्वाबाधितत्वञ्च

ननु यद्यभेदे भेदं भेदे चाभेदमारोपयन्त्यः कल्पनाः प्रवर्त्तन्ते तत्कथमासु बाधकः प्रत्ययो न जायते शुक्तिकारजतबुद्धिवद् ? उच्यते, यत्र वस्तु वस्त्वन्तरात्मनाऽवभासते तत्र बाधको भवति मरीचिष्विव जलबुद्धौ, इह तु न जात्यादिवस्त्वन्तरमस्ति यतो वस्त्वन्तरात्मनास्य ग्रहो भवेत् । व्यक्तिविषया एवैते सामानाधिकरण्यवैयधिकरण्यविकल्पाः तस्माद्वस्त्वन्तरानवभासित्वेषु न बाधकः प्रत्ययो जायते, तस्मान्न विपर्ययात्मानो विकल्पाः, न चैते प्रमाणम्, एतदुल्लिख्यमानस्य जात्यादेरपारमार्थिकत्वात्, अत एव प्रमाणविपर्ययाभ्यामयमन्य एव विकल्प इत्याचक्षते इत्यलं विस्तरेण ।

एवमेताः प्रवर्त्तन्ते वासनामात्रनिर्मिताः ।
कल्पितालीकभेदादिप्रपञ्चाः पञ्च कल्पनाः ॥
एवञ्च पश्यता तासां प्रामाण्यामोदमन्दताम् ।
भिक्षुणा लक्षणग्रन्थे तदपोढपदं कृतम् ॥

तन्मतखण्डने कल्पनाया अप्रामाण्यत्वनिरासः

अत्र प्रतिविधीयते, तदिदं संकीर्णप्रायमतिबहुविलपता भवता न नियतं किमपि विकल्पनानामप्रामाण्यकरणमिति स्पष्टमावेदितं तदुच्यताम्, किं शब्दा-

---

ननु ज्ञानानां निर्विषयत्वाभावाद् भिन्नसामान्याभावे कथं सामान्याकारज्ञानादय इत्याशङ्क्याह—व्यक्तिविषया एवैत इति ।

र्थविभासित्वगर्भीकृतमसदर्थवाचित्वं तदप्रामाण्यकारणमभिमतमुत सङ्केतस्मृत्यपेक्षोपनतमनिन्द्रियार्थसन्निकर्षजत्वमुत विशेषणग्रहणाद्यपेक्षावाप्तं बहुप्रयाससाध्यत्वमुत पूर्वापरपरामर्शशून्यचाक्षुषवैलक्षण्यवाचोयुक्तिसमर्पितं विचारकत्वम् उत निर्विकल्पकपरिच्छिन्नवस्तुग्राहितानिबन्धनमधिगताधिगन्तृत्वम् उत भेदाभेदसमारोपभणितमतस्मिंस्तदिति ग्राहित्वम् उत वृत्तिविकल्पादिबाधितसामान्यग्रहणसूचितं बाध्यत्वमेवेति। तत्र तावन्न शब्दसंसर्गयोग्यार्थग्रहणद्वारकमसदर्थग्राहित्वमेषामप्रामाण्यकारणमभिधातुं युक्तम्, शब्दार्थस्य वास्तवस्य समर्थयिष्यमाणत्वात्। कः पुनरसाविति चेद्, य एव निर्विकल्पके प्रतिभासते। किं निर्विकल्पके सामान्यादिकमवभासते ? बाढमभासत इति वक्ष्यामः। अत एव बाध्यत्वमपि न प्रामाण्यापहारकारणमेषां वक्तव्यम्, वृत्तिविकल्पादेर्बाधस्य परिहरिष्यमाणत्वात्। बाधकान्तरस्य च नेदमिति प्रत्ययस्य शुक्तिकारजतज्ञानादिवद् भवतैवानभ्युपगमात्। नाप्यनिन्द्रियार्थसन्निकर्षजन्यत्वं सङ्केतग्रहणकालानुभूतशब्दस्मरणापेक्षणादस्य वक्तव्यम्, सहकार्यपेक्षायामपि तद्व्यापाराविरतेः।

यः प्रागजनको बुद्धेः स लब्ध्वा सहकारिणम्।
कालान्तरेण तां बुद्धिं विदधत् केन वार्यते॥

व्यतिरिक्ताव्यतिरिक्तोपकारकरणादिविकल्पास्तु क्षणभङ्गभङ्गे निराकरिष्यन्ते। रूपग्रहणे च चक्षुषः प्रदीपादेरपेक्षायां दुष्परिहारास्ते विकल्पाः। न वै किञ्चिदेकं जनकमिति भवन्तोऽपि पठन्ति, भवत्पक्षेऽपि तुल्यास्ते। यद्युभयोर्दोषो न तेनैकश्चोद्यो भवति। तस्मादुपयोगाविशेषादिन्द्रियालोकमनस्कारविषयवद् वाचकस्मरणमपि सामग्र्यन्तर्गतं एतत्प्रत्ययजन्मनि व्याप्रियत इति न वाचकस्मरणजनितत्वेन स्मार्त्तत्वादप्रमाणं विकल्पः, रूपस्मृत्याख्यसमनन्तरप्रत्ययनिर्मितस्य निर्विकल्पस्य रसज्ञानस्यापि तथात्वप्रसङ्गात्।

यच्चेदमुच्यते सोऽर्थो व्यवहितो भवेदिति, तन्न विद्मः कीदृशं व्यवधानमर्थस्येति। न हि दीपेन वा मनसा वा विज्ञानहेतुना कदाचिदर्थो व्यवधीयते, मनोवच्च

न तेनैकश्चोद्यो भवति। नासौ दोष एकस्य वाच्यः। **इन्द्रियालोकमनस्कारेति।** मनस्कारः समनन्तरप्रत्ययः।

वाचकस्मृतिरपि सामग्र्यन्तर्गता सती तत्प्रतीतौ व्याप्रियत इति कथमर्थं व्यवदधीत। स्मृतिविषयीकृतः शब्दस्तमर्थं व्यवधत्त इति चेन्न, शब्दस्य तत्प्रकाशकत्वेन ज्ञानवद् दीपवद्वा व्यवधायकत्वाभावात्। न चेन्द्रियव्यापारतिरोधानं व्यवधानम्, तस्याधुनाऽप्यनुवर्त्तमानत्वात् ।

यथा तद्भावभावित्वादाद्यविज्ञानमक्षजम् ।
तथा तद्भावभावित्वादुत्तरं ज्ञानमक्षजम् ॥

न हि वाचकस्मरणानन्तरमक्षिणी निमील्य विकल्पयति पटोऽयमिति ।

अथ यावद् वाचकविज्ञानं हृदयपथमवतरति तावत् सोऽर्थः क्षणिकत्वादतिक्रान्त इति व्यवहित उच्यते, तदपि दुराशामात्रम्, क्षणभङ्गस्योपरिष्टान्निराकरिष्यमाणत्वात् ।

अपि च प्रदर्शितप्राप्त्यादिव्यवहारवत् सन्तानद्वारकमिहापि तद्ग्रहणं भविष्यतीति सर्वथा न व्यवधानम् । तदेवं समयस्मरणसापेक्षत्वेऽपि नेन्द्रियार्थसन्निकर्षोत्पन्नतामतिवर्त्तते सविकल्पकं विज्ञानमिति कथमप्रत्यक्षम् ? यत्पुनर्विशेषणविशेष्यग्रहणादिसामग्र्यपेक्षत्वेन बहुप्रयाससाध्यत्वमप्रामाण्यकारणमभिधीयते तदतीव सुभाषितम् । न हि बहुक्लेशसाध्यत्वं नाम प्रामाण्यमुपहन्ति । उक्तश्च न हि गिरिशृङ्गमारुह्य यद् गृह्यते तदप्रत्यक्षमिति, रसादिज्ञानापेक्षया च रूपज्ञानस्य दीपाद्यालोकाहरणप्रयाससाध्यत्वादप्रामाण्यं स्यात् ।

यदपि पूर्वापरपरामर्शरहितचाक्षुषविज्ञानवैपरीत्येन विकल्पज्ञानानां विचारकत्वादप्रामाण्यमुच्यते तदपि न सम्यक्, सर्वत्र ज्ञानस्य विचारकत्वानुपपत्तेः । विचारको हि माता स हि पश्यति स्मरत्यनुसन्धत्ते विचारयतीच्छति द्वेष्टि यतते गृह्णाति जहाति सुखमनुभवतीति वक्ष्यामः । अर्थञ्च स्पृशतो विज्ञानस्य विचारयतोऽपि कथमप्रामाण्यं स्यात् ?

अथास्य निर्विकल्पकेनैव सर्वात्मना स्पृष्टत्वात् पिष्टपेषणमयुक्तम्, इति सविकल्पमपि अधिगतार्थग्राहित्वादप्रमाणमिति मन्यसे, तदपि न साधु, पूर्वमेव परिहृतत्वात् । न ह्यनधिगताधिगन्तृत्वं प्रामाण्यमित्युक्तम्, गृहीतग्रहणेऽपि प्रमाणस्य प्रमाणत्वानतिवृत्तेः ।

सामान्यतः कल्पनाया बाधितत्वनिरासः

यत्त्वभ्यधायि भिन्नेऽप्यभेदमभिन्नेषु च भेदं कल्पयन्त्यः कल्पना अतस्मिंस्तद्ग्रहे प्रामाण्यमवजहतीति तद्युक्तम् । अतस्मिंस्तद्ग्रहो भवत्यप्रमाणत्वकारणम् । तत्त्विह नास्ति । तस्य हि बाधकप्रत्ययोपसन्निपातान्निश्चयः । न च भवदुपवर्णितासु पञ्चस्वपि जात्यादिकल्पनासु बाधकं किञ्चिदस्तीति नातस्मिंस्तद्ग्राहिण्यः कल्पना भवन्ति ।

जातिर्जातिमतो भिन्ना गुणी गुणगणात् पृथक् ।
तथैव तत्प्रतीतेश्च कल्पनोक्तिरबाधिका ॥

एतच्चोपरिष्टान्निर्णेष्यते । द्रव्यनाम्नोस्तु भिन्नयोर्भेदेनैव प्रतीतिर्नाभेदकल्पना । न हि देवदत्तशब्दोऽयमित्येवं तद्वाच्यावगतिरेषा । न शब्दोऽस्यामर्थारूढोऽवभासते । न शब्दविवर्त्तरूपेणार्थः परिस्फुरति । किं तर्हि ?

शब्दस्मृत्याख्यसामग्र्यसामर्थ्यातिशयोद्भवः ।
प्रत्ययातिशयः सोऽयमित्येवं प्राक् प्रसाधितम् ॥

दण्डययमिति द्रव्याभेदकल्पना तु मन्दमतिभिरेवोदाहृता । न हि दण्डोऽयमिति देवदत्ते प्रतीतिः, अपि तु दण्डीति । तत्र च प्रकृतिप्रत्ययौ पृथगेवोपलभ्येते दण्डोऽस्यास्तीति दण्डी, तदिह यथैव वस्तु तथैव तदवसाय इति नाभेदारोपः । कर्मणि तद्द्वयमपि नास्ति नाभिन्ने भेदकल्पनं न च भिन्नेऽप्यभेदकल्पना ।

क्रियाहि तत्त्वतो भिन्ना भेदेनैव च गृह्यते ।
चलतीत्यादिबोधेषु तत्स्वरूपावभासनात् ॥
तेन क्रियागुणद्रव्यनामजात्युपरञ्जितम् ।
विषयं दर्शयन्नेति विकल्पो नाप्रमाणताम् ॥
विपर्ययात् समुत्तीर्ण इति साधु सहामहे ।
प्रमाणात्तु बहिर्भूतं विकल्पं न क्षमामहे ॥

न शब्दोऽस्यामर्थारूढोऽवभासते इत्यध्यासपक्षः । स्वरूपादप्रच्युतस्यासत्याकारोपग्रहो **विवर्तः** । स्वप्न इत्यविज्ञातस्य स्वापाकारापरित्यागेनासत्यगजाश्वाकारोपग्रहः ।

क्वचिद् बाधकयोगेन यदि तस्याप्रमाणता ।
निर्विकल्पेऽपि तुल्योऽसौ द्विचन्द्राद्यवभासिनि ॥
मनोराज्यविकल्पानां काममस्त्वप्रमाणता ।
यथावस्तुप्रवृत्तानां न त्वसावक्षजन्मनाम् ॥

निर्विकल्पकपृष्ठभावित्वेऽपि सविकल्पकस्य प्रामाण्यम्

न च निर्विकल्पकपृष्ठभावित्वकृतमेषामेतद्रूपम्, विषयसंस्पर्शमन्तरेण स्वतः स्वच्छरूपाणां ज्ञानानामेवमाकारत्वानुपपत्तेः, किं निर्विकल्पकपृष्ठभाविता करिष्यति ? तदनन्तरभाविना हि स्मृतिरपि क्वचिद् दृश्यत एव, न च सा तच्छायावतीति दुराशामात्रमेतत् ।

ननु निर्विकल्पकेनैव वस्तुसर्वस्वं गृहीतमेकस्यार्थस्वभावस्येति वर्णितम्, प्रतिविहितमेतद्, गृहीतग्रहणेऽपि प्रामाण्यानपायात् ।

निर्विकल्पकस्य ग्राह्ये विषये मतान्तराणि

किञ्च किं निर्विकल्पकेन गृह्यते इत्येतदेव न जानीमः ।

भवन्तो निर्विकल्पस्य विषयं सम्प्रचक्षते ।
सजातीयविजातीयपरावृत्तं स्वलक्षणम् ॥
महासामान्यमन्ये तु सत्तां तद्विषयं विदुः ।
वागूरूपमपरे तत्त्वं प्रमेयं तस्य मन्वते ॥

महासामान्यमन्ये त्विति । ब्रह्मविदां हि सद्रूपतायाः सर्वत्राव्यभिचारात् सैव पारमार्थिकी प्रत्यक्षग्राह्या न भेदाः, तेषामपारमार्थिकत्वात्, यथा घटादौ मृद्रूपतैव सत्यं न विकाराः, तेषामाद्यावन्ते चासत्त्वेनासद्भिस्तुल्यत्वात् । तथा च श्रुतिः 'वाचारम्भणं नामधेयं विकारो मृत्तिकेत्येव सत्यम्' इति । मृद्रूपतापि यदापगच्छति तदा सन्मात्रमनुल्लिखितविशेषमवतिष्ठत इति तदेव सन्मात्रं सत्यम् । न च भेदः प्रत्यक्षस्य विषयः, तस्येतरेतराभावरूपत्वेन प्रत्यक्षाविषयत्वात्, तदुत्तरकालभाविनान्तु विशेषग्राहिणां विकल्पानामप्रामाण्यात् । **वाक्तत्त्वमपर** इति । यथा हि ब्रह्मविदां सर्वत्र सद्रूपताया अव्यभिचारेण परमार्थसत्त्वान्निर्विकल्पकग्राह्यत्वमभिमतं तथैव शाब्दैरपि सर्वत्र प्रत्यये शब्दरूपताया अनुगमात् तस्या एवासत्याकारोपग्रहरूपविवर्तरूपत्वात् रूपादीनां परमार्था-

केचिद् गुणक्रियाद्रव्यजातिभेदादिरूषितम् ।
शबलं वस्तु मन्यन्ते निर्विकल्पकगोचरम् ॥
प्रत्यक्षविषयेऽप्येताश्चित्रं विप्रतिपत्तयः ।
परोक्षार्थे हि विमतिः प्रत्यक्षेणोपशाम्यति ॥
प्रत्यक्षे हि समुत्पन्ना विमतिः केन शाम्यति ।
इदं भाति न भातीति संविद्विप्रतिपत्तिषु ॥
परप्रत्यायने पुंसां शरणं शपथोक्तयः ।

स्वमते निर्विकल्पकग्राह्यप्रमेयविषये शङ्का तत्समाधानश्च

न तु शपथशरणा एव निरुद्यममास्महे । मार्गान्तरेणापि तत्प्रमेयं निश्चिनुमः ।

निर्विकल्पानुसारेण सविकल्पकसम्भवात् ।
ग्राह्यं तदानुगुण्येन निर्विकल्पस्य मन्महे ॥

तत्र न तावत् सकलसजातीयविजातीयव्यावृत्तं स्वलक्षणं प्रत्यक्षस्य विषयः ।

गृहीते निर्विकल्पेन व्यावृत्ते हि स्वलक्षणे ।
अकस्मादेव सामान्यविकल्पोल्लसनं कथम् ॥

निर्विकल्पानुसारेण हि विकल्पाः प्रादुर्भवितुमर्हन्ति । अपि च

विजातीयपरावृत्तिविषया यदि कल्पना ।
व्यावृत्तिरूपं सामान्यं गृहीतं हन्त दर्शनैः ॥

सत्त्वाद् वाक्तत्त्वं शब्दतत्त्वं सैव प्रत्यक्षविषयत्वेनोक्ता । तथाहि भेदानां तद्विवर्ततया तैरसत्त्वं प्रतिपादितम् । यदाहुः

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥
यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
सङ्कीर्णमिव मात्राभिश्चित्राभिः प्रतिपद्यते ॥
तथेदममलं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं प्रतीयते ॥

विजातीयपरावृत्तिविषया यदि कल्पनेति । अयं भावः सजातीयविजातीय-

व्यावृत्तान्ननु नैवान्या व्यावृत्तिः परमार्थतः ।
व्यावृत्तग्रहणेनैव सुतरां तद्ग्रहो भवेत् ॥
सामान्यग्रहणेऽप्येवं तद्व्यापारविकल्पनात् ।
स्वलक्षणपरिच्छेदनिष्ठं तन्नावतिष्ठते ॥

नापि सत्ताद्वैतवादिसम्मतसत्ताख्यो निर्विकल्पस्य विषयो युक्तः ।

सत्ताग्रहणपक्षेऽपि विशेषावगतिः कुतः ।
सा भाति भेदस्पृष्टा चेत् सिद्धमद्वैतदर्शनम् ॥
न च भेदं विना सत्ता ग्रहीतुमपि शक्यते ।
नाविद्यामात्रमेवेदमिति च स्थापयिष्यते ॥
वाक्तत्त्वप्रतिभासोऽपि प्रतिक्षिप्तोऽनया दिशा ।
कथञ्च चाक्षुषे ज्ञाने वाक्तत्त्वमवभासते ॥
अगृहीते तु सम्बन्धे गृहीते वापि विस्मृते ।
अप्रबुद्धेऽपि संस्कारे वाचकावगतिः कुतः ॥
चित्रतापि पृथग्भूतैर्धर्मैस्तत्समवायिभिः ।
जात्यादिभिर्यदीष्येत धर्मिणः काममस्तु सा ॥
तदात्मता तु नैकस्य नित्यं तत्त्वानुपग्रहात् ।
अंशनिष्कर्षपक्षे तु धर्मभेदो बलाद् भवेत् ॥
यस्य यत्र यदोद्भूतिर्जिघृक्षा चेति कथ्यते ।
तदात्मकत्वं धर्माणामुच्यते चेत्यसंगतम् ॥

व्यावृत्तिरूपं हि स्वलक्षणम्, तन्नागृहीतायां सजातीयविजातीयव्यावृत्तौ प्रत्यक्षेण गृहीतं भवति। गृहीतञ्चेद् विजातीयव्यावृत्तिरपि सामान्यरूपतया भवदभिमता गृहीतैवेति कथं स्वलक्षणैकविषयं निर्विकल्पकम् ?

शबलं वस्तु निर्विकल्पकग्राह्यं ये मन्यन्ते तान् प्रत्याह **चित्रतापि पृथग्भूतैरिति । नित्यं तत्त्वानुपग्रहात् ।** 'गोर्गोत्वम्' इत्याद्यपि दर्शनात्। अथ तादात्म्येऽपि धर्मधर्मिणोर्बुद्ध्या निष्कृष्य पृथक्कृत्य अंशा धर्मा व्यपदिश्यन्ते 'गोर्गोत्वम्' इत्यादौ तदाह **अंशनिष्कर्षपक्षे त्विति**। न ह्यसति भेदे निष्कर्षः कर्तुं शक्येतेत्यभिप्रायः। अथ मन्येत केनांशनिष्कर्षपक्षोऽभ्युपगत इति तदाह **यस्य यत्र यदोद्भूतिरिति** ।

देशभेदस्तु धर्माणामस्माभिरपि नेष्यते ।
धर्मी हि तेषामाधारो न पुनः स तदात्मकः ॥

तस्माद् य एव वस्त्वात्मा सविकल्पस्य गोचरः ।
स एव निर्विकल्पस्य शब्दोल्लेखविवर्जितः ॥

किमात्मकोऽसाविति चेद् यद्यदा प्रतिभासते ।
वस्तुप्रमितयश्चैव प्रष्टव्या न तु वादिनः ॥

क्वचिज्जातिः क्वचिद् द्रव्यं क्वचित् कर्म क्वचिद् गुणः ।
यदेव सविकल्पेन तदेवानेन गृह्यते ॥

इदं शब्दानुसन्धानमात्रमभ्यधिकं परम् ।
विषये न तु भेदोऽस्ति सविकल्पाविकल्पयोः ॥

अतः शब्दानुसन्धानबन्ध्यं तदनुबन्धि वा ।
जात्यादिविषयग्राहि सर्वं प्रत्यक्षमिष्यते ॥

दिङ्नागधर्मकीर्त्योः प्रत्यक्षलक्षणखण्डनम्

तस्माद् यत् कल्पनापोढपदं प्रत्यक्षलक्षणे ।
भिक्षुणा पठितं तस्य व्यवच्छेद्यं न विद्यते ॥

अभ्रान्तपदस्यापि व्यावर्त्यं न किञ्चन तन्मतेन पश्यामः ।

यस्य यत्र यदोद्भूतिर्जिघृक्षा वोपजायते ।
चेत्यतेऽनुभवस्तस्य तेन च व्यपदिश्यते ॥

इति भट्टश्लोकः। तत्रोद्भवः प्रमेयधर्मः, जिघृक्षा प्रमातृधर्मः। यदा सजनं गृहमसकृदुपलब्धवतो निर्जनगृहदर्शनं तदा 'नास्त्यत्र कश्चित्' इत्येवंरूपज्ञानजननयोग्यस्याभावांशस्योद्भवः, यदा त्वपूर्वमेव प्रदेशविशेषं पश्यति तदा 'कोऽत्रास्ते' इत्येवंरूपप्रतीतिसमर्थस्य भावांशस्योद्भवः । अयमसौ भावाभावांशयोः प्रमेयधर्मयोरुद्भवः। जिघृक्षा तु यदा निर्जनप्रदेशार्थी तदा अभावांशस्य ग्रहणम्। यदा तु शीताद्यार्तो गृहं मृगयते तदा भावांशस्येति । चेत्यतेऽनुभवस्तस्यैवांशस्य, तत्प्रकटताया एवोद्भवात्; तेनैव चांशेनासौ पदार्थो व्यपदिश्यत इति ।

ननु तिमिराशुभ्रमणनौयानसंक्षोभाद्याहितविभ्रमं द्विचन्द्रालातचक्रचलत्पादपादिदर्शनमपोह्यमस्य परैरुक्तम्, सत्यम् । उक्तमयुक्तम् । कल्पनापोढपदेनैव तद्व्युदाससिद्धेः । तत्रापि निर्विकल्पकं ज्ञानमेकं चन्द्रादिविषयमेव । विकल्पास्तु विपरीताकारग्राहिणो भवन्ति यथा मरीचिग्राहिणि निर्विकल्पके सलिलावसायी विकल्प इति ।

ननु तिमिरेण द्विधाकृतं चक्षुरेकतया न शक्नोति शशिनं ग्रहीतुमिति निर्विकल्पकमपि द्विचन्द्रज्ञानम् । यद्येवं तरङ्गादिसादृश्यरूषितमूषरे मरीचिचक्रं चक्षुषा परिच्छेत्तुमशक्यमिति तत्रापि निर्विकल्पकमुदकग्राहि विज्ञानं किमिति नेष्यते ? अभ्युपगमे वा सदसत्कल्पनोत्पातादिकृतः प्रमाणेतरव्यवहारो न स्यात् । अपि च न बाधकोपनिपातमन्तरेण भ्रान्ततावकल्पने ज्ञानानाञ्च क्षणिकवादिमते बाध्यबाधकभावो बुद्धीनामुपपद्यत इत्यलं विमर्देन ।

इति सुनिपुणबुद्धिर्लक्षणं वक्तुकामः
पदयुगलमपीदं निर्ममे नानवद्यम् ।
भवतु मतिमहिम्नश्चेष्टितं दृष्टमेत-
ज्जगदभिभवधीरं धीमतो धर्मकीर्त्तेः ॥

श्रोत्रादिवृत्तिरपरैरविकल्पिकेति
प्रत्यक्षलक्षणमवर्णि तदप्यपास्तम् ।
साम्यान्न यस्य न च सिद्धयति बुद्धिवृत्त्या
दृष्टत्वमात्मन इति प्रतिपादितं प्राक् ॥

तिमिराशुभ्रमणेति । संक्षोभो वातादिसम्बन्धी ज्वलत्स्तम्भादिदर्शनहेतुः । तिमिराशुभ्रमणनौयानसंक्षोभैराहितो विभ्रमो यत्र ।

भवतु मतिमहिम्न इति । भवतु आस्तां तावत् । यदेतम्

न्यायमार्गतुलारूढं जगदेकत्र यन्मतिः ।
जयेत् तस्य क्व गम्भीरा वाचोऽहं जडधीः क्व च ॥

इत्यादि स्तुतिवाक्यैरर्चटादिरचितैर्जगदभिभवधीरं चेष्टितं धर्मकीर्तेः सम्बन्धिनो मतिमहिम्नः कथ्यते तदेतद् दृष्टमिति योजना, न किञ्चिदेतदिति तात्पर्यम् । **साम्यान्न यस्येति** । तैरप्यविकल्पिकेत्यभिहितत्वात् ।

जैमिनीयसूत्रस्य सत्सम्प्रयोग इत्यादेः प्रत्यक्षलक्षणत्वखण्डनम्

'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वादि'त्येतत्सूत्रं जैमिनीयैः साक्षात् प्रत्यक्षलक्षणपरत्वेन न व्याख्यातम्, "चोदनालक्षणोऽर्थो धर्मः" इति प्रकृतप्रतिज्ञासङ्गत्यभावात्, अपि तु धर्मं प्रति प्रत्यक्षमनिमित्तम्, एवंलक्षणकत्वादित्यनुवादत्वं लक्षणस्यापि सम्भवेदिति। तदेतल्लक्षणवर्णने सूत्रयोजनमसमीचीनम्, अतिव्याप्तिदोषानतिवृत्तेः। तथा हीन्द्रियाणां सत्सम्प्रयोगे सति पुरुषस्य जायमाना बुद्धिः प्रत्यक्षमितिसूत्रार्थः, तथा चातिव्याप्तिः संशयविपर्ययबुद्ध्योरपि इन्द्रियसंप्रयोगजत्वेन प्रत्यक्षत्वप्रसङ्गात्।

अथ सत्सम्प्रयोग इति सतां सम्प्रयोग इति व्याख्यायते तथाऽपि निरालम्बनं विभ्रमा एवार्थनिरपेक्षजन्मानो निरस्ता भवेयुर्न सालम्बनौ संशयविपर्ययौ।

अथ सति सम्प्रयोग इति सत्सप्तमीपक्ष एव न त्यज्यते संशयविपर्ययच्छेदी च सम्प्रयोग इत्युपसर्गो वर्ण्यते यथोक्तम्

'चोदनालक्षणोऽर्थो धर्मः' इति **प्रकृतप्रतिज्ञासङ्गत्यभावादिति**। चोदनैव धर्मे प्रमाणं न प्रत्यक्षादि, यतस्तदेवंलक्षणकं प्रसिद्धमित्येवंलक्षणानुवादेन प्रकृतसङ्गतिर्भवेन्न लक्षणविधानेन 'एवंरूपं यत् तत् प्रत्यक्षं बोद्धव्यम्' इति। 'एवं सत्यनुवादत्वं लक्षणस्यापि सम्भवेत्'; एवंसति 'सम्यगर्थे हि संशब्दो दुष्प्रयोगनिवारणः' इत्यादिप्रकारप्रतिपादने।

निरालम्बनविभ्रमाः स्वप्नादिज्ञानानि।

अथ सति संप्रयोग इति 'सति' सप्तमीपक्ष एवेति। संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्मेति क्रियमाणे संप्रयोग इति किं सप्तम्यधिकरणे, उभयस्य च भावेन भावलक्षण इति सन्देहः स्यात्। अधिकरणसप्तमीपक्षे हि संप्रयोगविषयं यद् ज्ञानं तत् प्रत्यक्षं स्यान्न संप्रयुज्यमानघटादिविषयमिति, तन्निवृत्त्यर्थः सच्छब्दोपादानम्। सति संप्रयोगे सम्प्रयोगे सतीत्यर्थः। तथा चाह—

सप्तम्यैव हि लभ्येत सदर्थः कल्पना पुनः।
परेषां वारणीयेति यत्नो जैमिनिना कृतः। इति।

सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः ।
दुष्टत्वाच्छुक्तिकायोगो वार्यतां रजतेक्षणात् ॥ इति ॥

तथापि प्रयोगसम्यक्त्वस्यातीन्द्रियत्वेन प्रत्यक्षानवगम्यत्वात् कार्यतोऽवगतिर्वक्तव्या, कार्यं च ज्ञानं न च तद्विशेषितमेव प्रयोगस्य सम्यक्तामवगमयति । न च तद्विशेषणपरमिह पदमप्यक्षरमपि मात्रामात्रमपि वा सूत्रे पश्यामः । सतां प्रयोग इति च परं निरालम्बनविज्ञाननिवृत्तये वर्णितम्, सतीति तु सप्तम्यैव गतार्थत्वादनर्थम् । लोकत एव कार्यविशेषावगमात् प्रयोगसम्यक्त्वमवगमिष्याम इति चेल्लोकत एव प्रत्यक्षस्य सिद्धत्वात् किं तल्लक्षणे सूत्रसामर्थ्ययोजनाक्लेशेन ।

यदप्यत्रभवान् वृत्तिकारः प्राह यद् व्यभिचारि न तत्प्रत्यक्षम्, यत्प्रत्यक्षं यद्विषयं ज्ञानमन्यसम्प्रयोगे भवति न तत्प्रत्यक्षमित्येवं तत्सतोर्व्यत्ययेन लक्षणमनपवादमवकल्पत इति तदपि वृथाटाटद्यामात्रम्, संशयज्ञानेन व्यभिचारानतिवृत्तेः । तत्र हि यद्विषयं ज्ञानं तेन सम्प्रयोगे इन्द्रियाणां पुरुषस्य बुद्धिजन्म सत् प्रत्यक्षं तदन्यविषयं ज्ञानमन्यसम्प्रयोगे भवति न तत्प्रत्यक्षमस्त्येव ।

ननूभयविषयं ज्ञानं न चोभाभ्यां सम्प्रयुक्तमिन्द्रियम्, मैवम् न हि धवखदिरवत् द्वावपि संशयसंविदि प्रतिभासेते, किन्तु स्थाणुर्वा पुरुषो वेत्यनिर्धारितैकतरपदार्थतत्त्वावमर्शी संशयो जायते, नूनं च तयोरन्यतरेणेन्द्रियं सम्प्रयुक्तमेवेति उभयावमर्शित्वाच्च संशयस्य येन सम्प्रयुक्तं चक्षुस्तद्विषयमपि तज्ज्ञानं भवत्येवेति नातिव्याप्तिः परिहृता भवति ।

अथ ब्रूयुः किमनेन परिक्लेशेन, न लक्षणवर्णनमस्माकमभिमतम्, अनुवादपक्षनिक्षिप्तत्वात् । अपि तु लोकप्रसिद्धप्रत्यक्षानुवादेन धर्मं प्रति अनिमित्तत्वमेव विधीयते । न धर्मं प्रति प्रमाणं प्रत्यक्षं विद्यमानोपलम्भनत्वात्, विद्यमानार्थग्राहि-

---

शुक्तिकायोगो दुष्टत्वात् 'सं' शब्देन वार्यते । कथं तस्य दुष्टत्वमिति चेत् तदाह **रजतेक्षणादिति** ।

यदप्यत्रभवानिति । अत्रभवान् पूज्यो वृत्तिकार उपवर्षः, तत्कृतसत्तच्छब्दव्यत्ययपक्षे सच्छब्दः शोभनपर्यायः 'सत्प्रत्यक्षं शोभनं प्रत्यक्षम्' इत्यर्थः ।

त्वादित्यर्थः। धर्मश्च त्रिकालानवच्छिन्नः, तस्य यजेत दद्यात् जुहुयाद् इत्यादिशब्देभ्यः प्रतीतेः। तर्हि सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति किमर्थो ग्रन्थ इति चेन्न, विद्यमानोपलम्भनत्वमसिद्धमिति परो ब्रूयात् स वक्तव्यः विद्यमानोपलम्भनं प्रत्यक्षं सत्सम्प्रयोगजत्वादिति। प्रत्यक्षग्रहणमपि हेतुनिर्देशार्थमेव, सत्सम्प्रयोगस्यासिद्धतां ब्रुवन्ननेन प्रत्याख्यायते, सत्सम्प्रयोगजं प्रत्यक्षं प्रत्यक्षत्वादिति। तदुक्तम्, "प्रत्यक्षत्वमदो हेतुः शेषहेतुप्रसिद्धये" इति। स्वातन्त्र्येणापि प्रत्यक्षत्वं धर्मग्राहकत्वनिषेधाय वक्तव्यम्। न धर्मग्राहि प्रत्यक्षं प्रत्यक्षत्वादस्मदादिप्रत्यक्षवदित्येवमन्यत्रैव सूत्रतात्पर्यान्नातिव्याप्त्यादिदोषावसर इहेति।

लौकिकालौकिकप्रत्यक्षयोर्धर्मग्राहित्वसाधने दोषः

तदेतदपि न प्रामाणिकमनोनुकूलम्। कतरस्य प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वं प्रतिपाद्यते? किमस्मदादिप्रत्यक्षस्य योगिप्रत्यक्षस्य वा। तत्रास्मदादिप्रत्यक्षस्य तथात्वे सर्वेषामविवाद एवेति किं तत्रेयता श्रमेण? योगिप्रत्यक्षस्य तु भवतामसिद्धत्वात् कस्य धर्मं प्रत्यनिमित्तत्वप्रतिपादनम्?

एवञ्च धर्मिणोऽभावादाश्रयासिद्धतां स्पृशेत्।
विद्यमानोपलम्भत्वप्रत्यक्षत्वादिसाधनम्॥

परप्रसिद्धया तत्सिद्धिरिति चेत् केयं प्रसिद्धिर्नाम? प्रमाणमूला तद्विपरीता वा। आद्ये पक्षे प्रमाणस्यापक्षपातित्वात् परस्येव तवापि तत्सिद्धिर्भवतु, अप्रमाणमूलत्वे तु न कस्यचिदप्यसौ प्रसिद्धिः।

योगिज्ञानं परेषां यत् सिद्धं तदनुभाषणे।
प्रतिज्ञापदयोरेव व्याघातस्ते प्रसज्यते॥

धर्मश्च त्रिकालाऽनवच्छिन्न इति। यजेतेत्यादौ हि विधिर्भावनायाः कार्यत्वमवगमयति, तेन च कार्यात्मना रूपेण सैव भावना धर्मः, तच्चास्याः कालत्रयासंस्पृष्टं रूपम्। अयजत यजते यक्ष्यत इति धर्मे कालत्रयासंस्पर्शेन तत्प्रतीतेः। न च खपुष्पादिवत् कालत्रयासंस्पर्शाद् असत्त्वमाशङ्क्यम्, यतो न खपुष्पादीनां कालत्रयासंस्पर्शकृतमसत्त्वम्, अपि तु उपलम्भकप्रमाणाभावनिबन्धनम्। **प्रत्यक्षत्वमदो हेतुः शेषहेतुप्रसिद्धये** इति। अस्य परमर्द्धम् 'अस्मदादौ प्रसिद्धत्वाद् योग्यर्थमभिधीयते' इति।

परैर्हि धर्मग्राहि योगिज्ञानमभ्युपगतम्, अतस्तदनुभाषणे धर्मग्राहकं न धर्मग्राहकमिति उक्तं स्यात् ।

परसंसिद्धमूलञ्च नानुमानं प्रकल्पते ।
उक्तं भवद्भिरेवेदं निरालम्बनदूषणम् ॥
साध्यसिद्धिर्यथा नास्ति परसिद्धेन हेतुना ।
तथैव धर्मिसिद्धत्वं परसिद्ध्या न युज्यते ॥

तत्रैतत् स्यात् प्रसङ्गसाधनमिदं प्रसङ्गश्च नाम परप्रसिद्धेन परस्यानिष्टापादनमुच्यते, परस्य च विद्यमानोपलम्भनं सत्सम्प्रयोगजन्यं च प्रत्यक्षं प्रसिद्धम्, अतस्तेनैव धर्मेण हेतुना धर्मानिमित्तत्वं तस्योपपद्यत इति को दोषः ? नैतदेवम्

प्रसङ्गसाधनं नाम नास्त्येव परमार्थतः ।
तद्धि कुड्यं विना तत्र चित्रकर्मेव लक्ष्यते ॥

न हि नभःकुसुमस्य सौरभासौरभविचारो युक्तः, अथापि किं न एतेन भवत्विदं प्रसङ्गसाधनम् ।

तदत्रापि न तु व्याप्तिप्रतीतिरिह मादृशाम् ।
न धर्मग्राहि सर्वेषां प्रत्यक्षमिति वेत्ति कः ॥

मत्प्रत्यक्षमक्षमं धर्मग्रहणे इति भवान्न जानीते, त्वत्प्रत्यक्षमपि न धर्मग्राहीति नाहं जाने, अन्यस्य प्रत्यक्षमीदृशमेवेत्युभावप्यावां न जानीवहे ।

त्वया तु यदि सर्वेषां प्रत्यक्षं ज्ञातमीदृशम् ।
तर्हि त्वमेव योगीति योगिनो द्वेक्षि किं वृथा ॥
प्रामाणिकस्थितिं तस्मादित्थं श्रोत्रिय बुध्यसे ।
परोक्तेऽतीन्द्रिये ह्यर्थे मा वादीर्दूषणं पुनः ॥
प्रमाणसिद्धे हतशक्तिदूषणं प्रमाणशून्येऽपि वृथा तदुक्तयः ।
निरस्य चोद्यव्यसनन्तु मृग्यतामतीन्द्रिये वस्तुनि साधनं पुनः ॥
स चेत् पर्यनुयुक्तः सन् वक्तुं शक्नोति साधनम् ।
ओमिति प्रतिपत्तव्यं नो चेन्नास्त्येव तस्य तत् ॥

मीमांसकानभिमतयोगिप्रत्यक्षसाधनम्

आह शिक्षिताः स्मः, प्रामाणिकवृत्तं न दूषणं ब्रूमो भवन्तमेवानुयुञ्ज्महे तदेतर्हि कथ्यतां धर्माधिगमनिपुणयोगिप्रत्यक्षसिद्धौ किं प्रमाणमिति । इदमुच्यते,

दर्शनातिशय एव प्रमाणम् । तथा ह्यस्मदादिरपेक्षितालोकोऽवलोकयति निकटस्थितमर्थवृन्दम्, उन्दुरवैरिणस्तु सान्द्रतमतमःपङ्कपटलविलिप्तदेशपतितमपि संपश्यन्ति, संपातिनामा च गृध्रराजो योजनशतव्यवहितामपि दशरथनन्दनसुन्दरीं ददर्शेति रामायणे श्रूयते, सोऽयं दर्शनातिशयः शुक्लादिगुणातिशय इव तारतम्यसमन्वित इति गमयति परमपि निरतिशयमतिशयम् । अतश्च यत्रास्य परः प्रकर्षस्ते योगिनो गीयन्ते । दर्शनस्य च परोऽतिशयः सूक्ष्मव्यवहितविप्रकृष्टभूतभविष्यदादिविषयत्वम् ।

ननु स्वविषयानतिक्रमेण भवतु तदतिशयकल्पना, धर्मस्तु चक्षुषो न विषय एव । यदुक्तम्

> यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
> दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ॥

अपि च

> येऽपि चातिशया दृष्टाः प्रज्ञामेधाबलैर्नृणाम् ।
> स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनादिति ॥

एतदयुक्तम् । यतो यद्यपि नास्मदादिनयनविषयो धर्मस्तथापि योगीन्द्रियगम्यो भविष्यति । तथाहि योजनशतव्यवहितमन्धकारान्तरितं वा नास्मदादिलोचनगोचरतामुपयाति सम्पातिवृषदंशदृशोस्तु विषयो भवत्येव ।

नन्वेवमविषये प्रवृत्तं योगिनां चक्षुर्गन्धरसादीनपि गृह्णीयात् ? यथोक्तम्

उन्दुरवैरिणो मार्जाराः । **रामायणे श्रूयते** इति । रामायणोक्त्या प्रामाणिकत्वमस्यार्थस्य दर्शयति, तस्य च प्रमाणत्वं प्रमाणभूते भारते तदर्थसंकीर्तनात् । शिष्टैश्च शिष्टस्मृतित्वेन परिग्रहादिति । **तारतम्यसमन्वित** इति । तथाहि ये तारतम्यसमन्वितास्ते परातिशययोगिनो दृष्टा, यथाणुत्वमहत्त्वादयः परिमाणविशेषाः परमाणुत्वपरममहत्त्वलक्षणे परस्मिन्नतिशये प्रकर्षे विश्रान्ताः ।

यत्राप्यतिशय इति । सोऽतिशयः स्वार्थानतिलङ्घनात् । स्वार्थं स्वविषयमनतिलङ्घ्य दूरगं सूक्ष्मं वा स्वार्थं गृह्णातु, न पुना रूपे ग्रहणं श्रोत्रव्यापारादित्यर्थः ।

वृषदंशो मार्जारः । **सम्पातिः** गृध्रराजः ।

एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते ।
नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते ।। इति ।

नैतदेवम् । रसादिग्राहीण्यपि योगिनामिन्द्रियाणि चक्षुर्वदतिशयवन्त्येवेति न रसादिषु चक्षुर्व्यापारः परिकल्प्यते । धर्मेऽपि न तर्हि कल्पनीय इति चेद्, न, तस्य रसादिवत्तदविषयता शब्दस्याभावात् ।

अपि च योगीन्द्रियाविषयत्वं धर्मस्य कथमवगतवान् भवान् ? अविषयत्वं तद्भावेऽपि तदनवगमादवगम्यते । यथा नयनसद्भावेऽपि शब्दाश्रवणात् तदविषयता शब्दस्यावसीयते । न चैवं योगिचक्षुषि सत्यपि धर्मस्याग्रहणमवगन्तुं शक्नोति भवान् उभयस्यापि भवतः परोक्षत्वादिति, विषयः स तस्य नेति नैव वक्तुं युक्तमिति ।

ननु कर्त्तव्यतारूपस्त्रिकालस्पर्शवर्जितः ।
चक्षुर्विषयतामेति धर्म इत्यतिसाहसम् ।।
सत्यं साहसमेतत्ते मम वा चर्मचक्षुषः ।
नत्वेष दुर्गमः पन्था योगिनां सर्वदर्शिनाम् ।।

यच्च त्रिकालानवच्छिन्नो यजेतेत्यादिलिङादियुक्तशब्दैकशरणावगमो धर्मः कथं ततोऽन्येन प्रमाणेन परिच्छिद्यतामित्युच्यते तदपि प्रक्रियामात्रम् । किमिव हि त्रिकालस्पर्शास्पर्शाभ्यां कृतम् ? यथा वयं गमनादिक्रियाणां देशान्तरप्राप्त्यादिप्रयोजनतां जानीमस्तथाग्निहोत्रादिक्रियाणां स्वर्गादिफलतां ज्ञास्यन्ति योगिन इति किमत्र साहसम् ? यदि हि बाह्येन्द्रियेष्वमर्षो, न तेष्वतिशयो विषह्यते तदलमनुबन्धेन ।

मनःकरणकं ज्ञानं भावनाभ्याससम्भवम् ।
भवति ध्यायतां धर्मे कान्तादाविव कामिनाम् ।।

मनो हि सर्वविषयम्, न तस्याविषयः कश्चिदस्ति । अभ्यासवशाच्चातीन्द्रियेष्वप्यर्थेषु परिस्फुटाः प्रतिभासाः प्रादुर्भवन्तो दृश्यन्ते । यथाहुः

कामशोकाभयोन्मादचौरस्वप्नाद्युपद्रुताः ।
अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ।। इति ।

कामशोकभयोन्मादेति । कामशोकभयैर्यो जनित उन्मादश्चित्तवैकृत्यम् । स च चौरस्वप्नश्च तदादिभिरुपप्लुताः । यत्र स्वप्ने चौरं दृष्ट्वा सहसैव प्रबुद्धः शस्त्राण्युद्यच्छति

नन्वेतेषां मिथ्याज्ञानत्वान्न योगिविज्ञाने दृष्टान्तत्वं युक्तम् । न स्फुटाभासमात्रतया दृष्टान्तत्वोपपत्तेः । न हि शब्दघटयोरपि सर्वात्मना तुल्यत्वम् । तत्र कामशोकादिभावनाभ्यासभुवां प्रतिभासानां बाधकवैधुर्यादप्रामाण्यं भविष्यति नेतरेषां तदभावात् । स्फुटाभासत्वन्तूभयत्रापि तुल्यम् ।

नन्वभ्यासोऽपि क्रियमाणो नात्यन्तमपूर्वमतिशयमावहति लङ्घनाभ्यासवत् । योऽपि हि प्रतिदिनमनन्यकर्मा लङ्घनमभ्यस्यति सोऽपि कतिपयपदपरिमितमवनितलमभिलङ्घयति, न तु पर्वतमम्बुधिं वेति । उच्यते

लङ्घनं देहधर्मत्वात् कफजाड्यादिसम्भवात् ।
मा गात् प्रकर्षं, ज्ञाने तु तस्य कः प्रतिबन्धकः ॥

लङ्घनादौ तु पूर्वेद्युः प्रयत्नसमुपार्जितः ।
न देहेऽतिशयः कश्चिदन्येद्युरवतिष्ठते ॥

तत्र केवलमभ्यासात् प्रक्षये कफमेदसोः ।
शरीरलाघवं लब्ध्वा लङ्घयन्ति यथोचितम् ॥

इह विज्ञानजन्यस्तु संस्कारो व्यवतिष्ठते ।
क्रमोपचीयमानोऽसौ परातिशयकारणम् ॥

यथानुवाकग्रहणे संस्थाभ्यासोपकल्पितः ।
स्थिरः करोति संस्कारः पाठस्मृत्यादिपाटवम् ॥

यथा वा पुटपाकेन शोध्यमानं शनैः शनैः ।
हेमनिष्प्रतिकाशं तद् याति कल्याणतां पराम् ॥

तथैव भावनाभ्यासाद् योगिनामपि मानसम् ।
ज्ञाने सकलविज्ञेयसाक्षात्कारे क्षमं भवेत् ॥

अस्मदादेश्च रागादिमलावरणधूसरम् ।
मनो न लभते ज्ञानप्रकर्षपदवीं पराम् ॥

स चौरस्वप्न इति धर्मोत्तरो व्याचष्टे । **संस्थाभ्यासोपकल्पित** इति । एकस्यैव पदादेर्दशकृत्व आद्युच्चारणमभ्यासार्थः, संस्था अध्येतृप्रसिद्धा । **निष्प्रतिकाशमिति** । निर्गतं

प्रत्यूहभावनाभ्यासक्षपिताशेषकल्मषम् ।
योगिनान्तु मनः शुद्धं कमिवार्थं न पश्यति ॥
यथा च तेषां रागादि प्रमाणमवकल्पते ।
तथापवर्गचिन्तायां विस्तरेणाभिधास्यते ॥
तदेवं क्षीणदोषाणां ध्यानावहितचेतसाम् ।
निर्मलं सर्वविषयं ज्ञानं भवति योगिनाम् ॥

प्रातिभज्ञानस्वरूपादिविचारः

अपि चानागतं ज्ञानमस्मदादेरपि क्वचित् ।
प्रमाणं प्रातिभं 'श्वो मे भ्रातागन्ते'ति दृश्यते ॥
नानर्थजं न संदिग्धं न बाधविधुरीकृतम् ।
न दुष्टकारणञ्चेति प्रमाणमिदमिष्यताम् ॥
क्वचिद् बाधकयोगश्चेदस्तु तस्याप्रमाणता
यत्रापरेद्युरभ्येति भ्राता तत्र किमुच्यताम् ॥
काकतालीयमिति चेन्न प्रमाणप्रदर्शितम् ।
वस्तु तत् काकतालीयमिति भवितुमर्हति ॥

नन्वनर्थजमिदं ज्ञानं भ्रातुः, तज्जनकस्य तदानीमसत्त्वात् । स्यादेतदेवम् यदि तदास्तित्वेन भ्रातरं गृह्णीयात्, किन्तु भाविनमेनं गृह्णाति, भावित्वञ्च तदस्यास्त्येवेति कथमनर्थजं तज्ज्ञानम् ?

ननु भावितया ग्रहणमघटमानम् । भावित्वं हि नाम सावधिः प्रागभावः । अभावस्य च भावेन भ्रात्रा सह कः सम्बन्धः, वस्त्ववस्तुनोर्विरोधात् ? तदेतदसम्यक् ।

प्रतिकाशमन्यसादृश्यं यस्मात् तन्निष्प्रतिकाशम् अनन्यसदृशमित्यर्थः । **प्रत्यूहभावनाभ्यासेति** । रागादीनां मिथ्याज्ञानमूलानां प्रत्यूहो मूलविरोधित्वेन विरुद्धो यस्तत्त्वज्ञानाख्यस्तस्य । **प्रमाणमिदमिष्यतामिति** । एवम्भूतस्य भवद्भिः प्रमाणतयाभ्युपगमात् । तदुक्तम्

'तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम् ।
अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम् ॥' इति ॥

तद्देशसम्बन्धस्य तत्र प्रागभावो न भ्रातुर्धर्मिणः, स हि विद्यत एव प्रागभावतः। स च कुतश्चिद्भोजनोत्कण्ठादेः कारणात् स्मरणपदवीमुपारूढः श्वस्तनागमनविशिष्टत्वेन प्रतिभातीति प्रातिभस्य स एव जनक इति। तस्मादनर्थजत्वाभावात् प्रमाणं प्रातिभम्। प्रमाणञ्च सत् प्रत्यक्षमेव, न प्रमाणान्तरम्, शब्द-लिङ्ग-सारूप्य-निमित्तानपेक्षत्वात्।

ननु प्रत्यक्षमपि मा भूदिन्द्रियानपेक्षत्वात्? मैवम्। मनस एव तत्रेन्द्रियत्वात्। पूर्वोत्पन्नचाक्षुषविज्ञानविशेषणस्य बाह्यस्य वस्तुनो मनो ग्राहकमिति नान्धाद्यभाव इत्युक्तम्। शब्दाद्युपायान्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति, सुरभि केतकीकुसुमम्, मधुरा शर्करेति ज्ञानवदित्यप्युक्तम्, अत एव नानियतनिमित्तकम्, न चार्षज्ञानं प्रत्यक्षातिरिक्तस्यार्षनाम्नः प्रत्ययस्याभावात्, 'ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्' इति हि वदन्ति, आगमग्रहणञ्च निदर्शनार्थम्, अनुपायस्य ज्ञानस्य तेषामसत्वात्। न च सिद्धदर्शनं प्रतिभा, अस्मदादेरपि भावात्। तस्मान्न प्रमाणान्तरं प्रातिभम्, अपि तु प्रत्यक्षमेव।

ननु प्रत्यक्षमपि नेदं भवति तद्धि वर्त्तमानैकविषयम्, यथोक्तम् 'सम्बद्धं वर्त्तमानञ्च गृह्यते चक्षुरादिने'ति, तथा एषः प्रत्यक्षधर्मश्च वर्तमानार्थतयैवेति। मैवम्। अनागतग्राहिणः प्रत्यक्षस्य प्रदेशान्तरे स्वयमेवोक्तत्वात्। 'रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते' इति भवानेवावोचत्, तस्मात् प्रत्यक्षमनागतग्राहि 'श्वो मे भ्राता आगन्ते'ति सिद्धम्।

न भ्रातुर्धर्मिण इति। तत्र देशे भ्रातुरसत्त्वम्, न स्वरूपेणेत्यर्थः।

अत एव नानियतनिमित्तकमिति। अनियतनिमित्तकत्वान्निर्निमित्तत्वम्, अतश्चाप्रामाण्यं प्रातिभस्येति तेषामभिप्रायः। ननु च आर्षाख्यस्य ज्ञानविशेषस्य प्रत्यक्षादिविलक्षणस्य धर्मविशेषाद् ऋषीणां कदाचिच्चास्मदादीनामुत्पद्यमानस्य प्रतिभात्वमुक्तम्, अतस्तस्याः कथं प्रत्यक्षत्वमित्याह—**न चार्षज्ञानमिति**। केचित् सिद्धानां योगिज्ञानवद् ज्ञानविशेष उत्पद्यते तत् प्रतिभेत्याहुः, तदपि न, अस्मदादीनामसिद्धानामपि प्रतिभाया दर्शनादित्याह—**न च सिद्धदर्शनमिति**।

चिरस्थायीति गृह्यत इति। चिरस्थायित्वं हि भाविकालसत्त्वम्, तत् कथं प्रत्य-

योगिनः सर्वज्ञा न वेति विचारः

एवञ्च अस्मदादीनामिवानागते भ्रातरि योगिनां भविष्यति धर्मे प्रत्यक्षं प्रवर्त्स्यतीति । तस्माद् यत् सर्वज्ञनिषेधाय कथ्यते

यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
भवेदिदानीं लोकस्य तथा कालान्तरेऽप्यभूदिति ॥

तदपास्तं भवति । तत्रैतत्स्यात् । सर्वज्ञता योगिनां किमेकेन ज्ञानेन बहुभिर्वा ? न तावदेकेन, न ह्येकस्मिन् ज्ञाने परस्परविरोधिनोऽर्थाः शीतोष्णवदवभासते । नापि बहुभिः, तानि हि क्रमेण वा भवेयुर्युगपद्वा ? न युगपज्ज्ञानानि सम्भवन्ति सूक्ष्मान्तःकरणसापेक्षत्वात् । क्रमभाविभिस्तु ज्ञानैरशेषत्रिभुवनकुहरनिहितनिखिलपदार्थसार्थसाक्षात्करणमेषां मन्वन्तरकोटिभिरपि दुर्घटमिति कथं सर्वज्ञा योगिनः ? उच्यते, युगपदेकयैव बुद्ध्या सर्वत्र सर्वान् अर्थान् द्रक्ष्यन्ति योगिनः ।

यत्तु विरुद्धत्वादिति तदप्रयोजकम्, विरुद्धानामपि नीलपीतादीनामेकत्र चित्रप्रत्यये भासनात्, एकत्र च मेचकप्रत्यये सन्निहितपदार्थव्यतिरिक्तसकलवस्त्वभावग्रहणस्य पूर्वं दर्शितत्वात् । शीतोष्णयोरपि क्वचिदवसरे भवति युगपदुपलम्भः । तद् यथा प्रतपति हुतवहविस्फुलिङ्गनिकरानुकारिकिरणे तरुणोष्मणि ग्रीष्मे हिमशकलशिशिरपयसि सरसि निमग्ननाभिदघ्नदेहस्य पुंसो युगपदेव सरःसलिलसूर्यातपवर्तिनौ शीतोष्णस्पर्शावनुभवपथमवतरतः ।

नन्वेकेन ज्ञानेन सर्वान् अर्थान् भूतभाविनः परोक्षानपि पश्यन्तो योगिनः कथमखिलत्रैलोक्यवृत्तान्तदर्शिनः सकलजगद्गुरोरीश्वराद् विशिष्येरन् ? अस्ति विशेष ईश्वरस्य तथाविधं नित्यमेव ज्ञानम्, योगिनान्तु योगभावनाभ्यासप्रभवमिति ।

ननु नादृष्टपूर्वेऽर्थे क्वचिद् भवति भावना ।
आगमात्तु परिच्छिन्ने धर्मे भावनयापि किम् ॥

चोदनैव धर्मे प्रमाणमिति सावधारणप्रतिज्ञार्थः प्रथममागमादवगतधर्मस्वरूपेषु सत्स्वपि योगिषु न विप्लवत एवेति । उच्यते । योगिष्वस्त्येवायं प्रकारः । पश्चादपि प्रवर्त्तमाने धर्मग्राहिणि प्रत्यक्षे चोदनैवेत्यवधारणं शिथिलीभवत्येव ।

अपि चेश्वरज्ञानं सांसिद्धिकमेव धर्मविषयं वेदस्य कारणभूतं वक्ष्यामः। तस्मिन्नपि सति न चोदनैवेत्यवधारणार्थसिद्धिः। तस्मान्न धर्मग्राहकं योगिप्रत्यक्षं विद्यमानोपलम्भनत्वात् सत्सम्प्रयोगजत्वादित्यादिसाधनमप्रयोजकम्।

प्रमाणान्तरविज्ञातप्रमेयप्रतिपादकः ।
धर्मोपदेशकः शब्दः शब्दत्वाद् घटशब्दवत् ॥
प्रत्यक्षः कस्यचिद् धर्मः प्रमेयत्वाद् घटादिवत् ।
इत्यादयश्च सुलभाः सन्त्येव प्रतिहेतवः ॥
तेन निष्प्रतिघयुक्तिसाधितां योगबुद्धिमखिलार्थदर्शिनीम् ।
किं विडम्बयितुमुच्यते मुधा दुष्टहेतुनिकुरुम्बशम्बरम् ॥

तदित्थमपि जैमिनीयं सूत्रमसङ्गतार्थम्, लक्षणपरत्वन्त्वस्य निरस्तमेव।

यदपि कैश्चित् प्रत्यक्षलक्षणमुक्तम्, आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् यदुत्पद्यते ज्ञानं तदन्यदनुमानादिभ्यः प्रत्यक्षमिति, तदपि त्र्यद्वयसन्निकर्षजन्मनां सुखात्मादि-ज्ञानानामव्यापकमतिव्यापकञ्च व्यभिचार्यादिबोधानामित्युपेक्षणीयम्।

सांख्यकारिकोक्तप्रत्यक्षलक्षणखण्डनम्

ईश्वरकृष्णस्तु 'प्रतिविषयाध्यवसायो दृष्टमि'ति प्रत्यक्षलक्षणमवोचत्। तदपि न मनोज्ञम्, अनुमानादिज्ञानानामपि विषयाध्यवसायस्वभावत्वेनातिव्याप्तेः। यत्तु राजा व्याख्यातवान् 'प्रतिराभिमुख्ये वर्त्तते, तेनाभिमुख्येन विषयाध्यवसायः प्रत्यक्ष-मिति तदप्यनुमानादावस्त्येव, घटोऽयमितिवदग्निमान् पर्वत इत्याभिमुख्येनैव प्रतीतेः। स्पष्टता तु सर्वसंविदां स्वविषये विद्यत एव। अथ मन्यसे सामान्यविहितस्य

क्षेण गृह्येतेति भावः। **निष्प्रतिघयुक्तिरिति**। निष्प्रतिघा युक्तिर्निर्बाधमनुमानम्। **"आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् यद् उत्पद्यते ज्ञानं तदन्यद् अनुमानादिभ्यः प्रत्यक्षम्"** इति वैशेषिकोक्तं प्रत्यक्षलक्षणम्। तत्र आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति यः सन्निकर्षस्तस्मात्। इन्द्रियगतिज्ञानमानुमानिकं यत् तथा 'अयं पनसः' इति वोभयजं ज्ञानं प्रत्यक्षं प्रसज्यत इति तद्व्यवच्छेदाय 'अन्यदनुमानादिभ्यः' इति विशेषणम्।

राजा व्याख्यातवानिति। राजा राजवार्तिककारः। **सामान्यविहितस्येति**

विशेषेण बाधादनुमानादिव्यावृत्तिः सेत्स्यति, सामान्येनाध्यवसाय उत्सृष्टः स लिङ्गशब्दाभ्यां विशेषित इति तदितरोऽध्यवसायः प्रत्यक्षमिति स्थास्यति । यद्येवं प्रत्यक्षलक्षणमिदानीमव्याकरणीयमेव, शब्दलिङ्गग्रहणे वर्णिते सति तद्वैलक्षण्यादेव प्रत्यक्षं ज्ञास्यत इति । तस्मादिन्द्रियार्थसन्निकर्षोत्पन्नपदोपादानमन्तरेण नानुमानादि व्यवच्छेद उपपद्यत इति इदमपि न प्रत्यक्षलक्षणमनवद्यम् ।

अलमतिविस्तरेण परदर्शनगीतमतो
विगतकलङ्कमस्ति न हि लक्षणमक्षधियः ।
तदमलमक्षपादमुनिनैव निबद्धमिदं
हरति मनांसि लक्षणमुदारधियाम् ॥

अनुमानलक्षणपरीक्षणम्

एवं प्रमाणज्येष्ठेऽस्मिन् प्रत्यक्षे लक्षिते सति ।
कथ्यतेऽवसरप्राप्तमनुमानस्य लक्षणम् ॥

तत्पूर्वकञ्च त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतोदृष्टञ्च ॥५॥

तत्रानुमानस्वरूपं ब्रूमहे ततस्तत्र सूत्रं योजयिष्यामः ।

पञ्चलक्षणकाल्लिङ्गाद् गृहीतान्नियमे स्मृतेः ।
परोक्षे लिङ्गिनि ज्ञानमनुमानं प्रचक्षते ॥

अत्रापि लिङ्गविषयं ज्ञानं ज्ञानविषयीकृतं वा लिङ्गं प्रतिबन्धस्मरणसहितं प्रमाणम् । लिङ्गिज्ञानं फलम् । लिङ्गिज्ञानस्य वा प्रमाणतायां पूर्ववदुपादानादिज्ञानं फलमुपवर्णनीयम् । करणस्य हि प्रमाणत्वमिति स्थितमेवैतत् । तत्र परोक्षोऽर्थो लिङ्ग्यते गम्यतेऽनेनेति लिङ्गम् । तच्च पञ्चलक्षणम् । कानि पुनः पञ्च लक्षणानि ? पक्षधर्मत्वम्, सपक्षधर्मत्वम्, विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वञ्चेति । सिषाधयिषितधर्मविशिष्टो धर्मी पक्षः, तद्धर्मत्वं तदाश्रितत्वमित्यर्थः । साध्यधर्मयोगेन निर्ज्ञातं धर्म्यन्तरं सपक्षस्तत्रास्तित्वम् । साध्यधर्मसंस्पर्शशून्यो धर्मी विपक्षः, ततो व्यावृत्तिः । अनुमेयस्यार्थस्य प्रत्यक्षेणागमेन वानपहरणमबाधितविषयत्वम् ।

अध्यवसायमात्रस्य प्रत्यक्षत्वे उत्सर्गत्वात् प्राप्ते लिङ्गशब्दजाध्यवसायस्य लिङ्गशब्दविषयत्वेन प्रतिपादनात् तदितरस्य प्रत्यक्षतेति तात्पर्यम् ।

संशयबीजभूतेनार्थेन प्रत्यनुमानतया प्रयुज्यमानेनानुपहतत्वम्, असत्प्रतिपक्षत्वम् । एतैः पञ्चभिर्लक्षणैरुपपन्नं लिङ्गमनुमापकं भवति । एतेषामेव लक्षणानामेकैकापायात् पञ्च हेत्वाभासा वक्ष्यन्ते । यस्य पक्षधर्मता नास्त्यसावसिद्धो हेत्वाभासः, यथा नित्यः शब्दः चाक्षुषत्वात् । साध्यविपर्ययव्याप्तस्तु विरुद्धः, स यथा नित्यः शब्दः कृतकत्वाद् आकाशवत् । सपक्षे सत्त्वं यस्य नास्ति सोऽनैकान्तिकः, यथा नित्यः शब्दः प्रमेयत्वादिति । यस्याबाधितविषयत्वं नास्ति स कालात्ययापदिष्टः, यथा अनुष्णस्तेजोऽवयवी कृतकत्वाद् घटवदिति । यस्य निष्प्रतिपक्षता नास्ति स प्रकरणसमः, यथा अनित्यः शब्दो नित्यधर्मानुपलब्धेः घटवत्, नित्यः शब्दोऽनित्यधर्मानुपलब्धेराकाशवदिति । सोऽयमेतेषु पञ्चसु लक्षणेष्वविनाभावो लिङ्गस्य परिसमाप्यते ।

ननु च त्रिलक्षणके हेतावविनाभावः परिसमाप्यते, न च तथाविधे बाधः सम्भवति, बाधाविनाभावयोर्विरोधात् । यच्चेदमग्न्यनुष्णत्वसाधने कृतकत्वं त्रिलक्षणमपि बाधकविधुरितविषयमित्युदाहृतं तदसमीक्षिताभिधानम्, अत्र त्रैलक्षण्यानुपपत्तेः । पक्षधर्म एव तावदयं न भवति, प्रत्यक्षाद्यनिराकृतो हि पक्ष उच्यते, न चायमीदृश इत्यपक्ष एव, तद्धर्मो हेतुः कथं पक्षधर्मः स्यात् ? नाप्ययमन्वयी हेतुरन्वयग्रहणसमय एव तद् विप्लवावधारणात् । अन्वयो हि गृह्यमाणः सर्वाक्षेपेण यद् यत् कृतकं तत्तदनुष्णमित्येवं गृह्यते । ततश्च तद्ग्रहणसमय एवायमुष्णोऽपि कृतक इति हृदयपथमवतरति तनूनपादिति कथमन्वयग्रहणम् ?

यदि त्वनलमुत्सृज्य घटादावन्वयग्रहः ।
नान्तर्व्याप्तिर्गृहीता स्यात् साध्यसाधनधर्मयोः ॥
ततश्चैवंविधाद्धेतोः स्वसाध्यनियमोज्झितात् ।
साध्याभिलाष इत्येवं षण्ढानुनयदोहदः ॥

अन्वयपूर्वकत्वाच्च व्यतिरेकग्रहणस्य तन्निराकरणे तदपाकरणमवगन्तव्यम् । अपि च सिषाधयिषितधर्मवैपरीत्येन वह्नेः प्रत्यक्षतो निश्चयाद् वस्तुवृत्तेन स एव विपक्ष इति न ततो व्यतिरेकः कृतकत्वस्येति । तस्मात् त्रैलक्षण्यापायादेव

बाधाविनाभावयोर्विरोधादिति । अविनाभावेन साध्यप्रतिबद्धं साधनं ख्याप्यते, बाधया तु साध्यं विनापि साधनस्य सद्भाव इति ज्ञाप्यत इति विरोधः ।

हेत्वाभासोऽयमिति न रूपान्तरमबाधितविषयत्वमपेक्षते। कथञ्चेदमबाधितत्वं निश्चीयते ?

न ह्यदर्शनमात्रेण बाधाविरहनिश्चयः।
सर्वात्मना हि नास्तित्वं विद्युः कथमयोगिनः ॥
अनिश्चिते तदङ्गे च न हेतोर्हेतुता भवेत्।
यथैव पक्षधर्मादिरूपाणामनुपग्रहे ॥

तस्मादबाधितत्वं रूपान्तरमवचनीयमिति।

अत्राभिधीयते। यदुक्तम् अन्वयग्रहणं सर्वाक्षेपेणेति तद्ग्रहणवेलायामेव सिषाधयिषितधर्मविपर्ययाध्यासितहुतवहस्वरूपपरिस्फुरणादन्वयशून्योऽयं हेतुरिति तदहृदयङ्गमम्। अन्वयः सत्यं सर्वाक्षेपेण गृह्यते न पुनरेकैकधर्मिसमुल्लेखेन। एवं हि तदानन्त्यादन्वयो ग्रहीतुमेव न शक्यते, अनुमानस्य च वैफल्यमित्थं भवेदग्निमतां धूमवतां सर्वधर्मिणामन्वयावगमकाल एव गृहीतत्वात्।

धूमो हि यत्र यत्रेति सामान्येनैव गृह्यते।
न पुनः पर्वतेऽरण्ये गृहे वेत्येवमिष्यते ॥

एवञ्च सत्याक्षेपवाचोयुक्तिरुपपन्ना भविष्यति।

न चैवं सति वक्तव्यं षण्ढानुनयमार्गणम्।
न हि तद् वर्जमित्येवं व्याप्तिग्रहणमिष्यते ॥

सामान्येन च व्याप्तिर्गृहीता सती सिषाधयिषितधर्म्यपेक्षायां सैवान्तर्व्याप्तिरुच्यते। यैव च नगलग्नाग्न्यनुमानसमये तद्व्यतिरिक्तकान्तारादिप्रदेशवर्त्तिनी बहिर्व्याप्तिरभूत् सैव कालान्तरे कान्तारवर्त्तिनि वह्नावनुमीयमानेऽन्तर्व्याप्तिरवतिष्ठते। तदिहापि यत्कृतकं तदनुष्णमिति सामान्यतः परिच्छेदान्न तदानीमनलोन्मेष इति सिद्धोऽन्वयः। व्यतिरेकोऽपि कार्ये तेजोऽवयविनि पक्षीकृते कृतकत्वस्य तेजः-

---

एवञ्च सत्याक्षेपवाचोयुक्तिरिति। अन्यथा हि परामर्श एव स्यान्नाक्षेपः। अप्रतीयमानस्य हि कल्पनमाक्षेप इति।

परमाणुभ्यो विधुतारकपरमाण्वनभ्युपगमे तु विपक्ष एव नास्तीति तदभावात् सुतरां तत्रावृत्तिर्भवतीति । न हि सपक्ष इव विपक्षे वृत्तिरिष्यते येन यत्नतः तत्सिद्धये यतेत । अग्निरेव विपक्ष इति चेन्, मैवम् । न हि पक्ष एव विपक्षो भवितुमर्हति ।

ननु वस्तूनामद्विरूपत्वात् पक्षो नाम परमार्थतो नास्त्येव साध्यधर्माधिकरणभूतश्चेत् सोऽर्थस्तत् सपक्ष एव, विपर्यये तु न विपक्षतामतिवर्त्तते । न च क्रमद्वययोगित्वं रूपद्वयरहितत्वं वा वस्तुनः समस्तीति । तदयुक्तम् । अनुमानोच्छेदप्रसङ्गात् । अद्विरूपत्वेऽपि वस्तूनां निसर्गविषयीकृतोऽर्थः कश्चित् पक्ष एषितव्यः, तदभावे तदपेक्षस्वरूपयोः सपक्षविपक्षयोरप्यभावः स्यात् । तदस्य पक्षस्य सतोऽपि सपक्षत्वमारोप्य यत्तेन व्यभिचारचोदनं तेनाग्न्यनुमानमपि विप्लवेत ।

ननु पर्वतादिर्धर्मी न ज्वलनाख्यसाध्यधर्मशून्यतया तत्र निश्चितः, तेजोऽवयवी त्वनुष्णत्ववैपरीत्येन प्रत्यक्षतो निश्चित इति, तत् किमिदानीं पर्वतादिरग्निमत्तयानिश्चितः, तथाभ्युपगमे वा किमनुमानेन ?

ननु न पर्वतोऽग्निमत्तया निश्चितो नापि तद्वैपरीत्येन, किन्तु सन्दिग्ध एवास्ते । यद्येवं सन्दिग्धेऽपि विपक्षे वर्त्तमानो धूमादिरहेतुरेव स्यान्निश्चितविपक्षवृत्तिवत् सन्दिग्धविपक्षवृत्तेरप्यहेतुत्वात् सर्वमनुमानमुत्सीदेत् । तस्मात् पक्षेण व्यभिचारचोदनमनुचितमिति व्यतिरेकवानेवायं हेतुः । यत्पुनरभिहितम् । अनिराकृतपक्ष-

---

तदभावात् सुतरां तत्रावृत्तिरिति । तथा चाह

तस्माद् वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः ।
तदभावेऽपि तन्नेति वचनादपि तद्गतेः ॥

ननु वस्तूनामद्विरूपत्वादिति । कथं हि यत् साध्यधर्माधिकरणतया लब्धसपक्षव्यपदेशं तद्विपर्ययेण चासादितविपक्षभावं तदेव तथाविधं पक्षव्यपदेशं लभेतेत्यर्थः ।

संदिग्धविपक्षवृत्तेरिति । श्यामोऽयं तत्पुत्रत्वादिति संदिग्धविपक्षवृत्तिः । यद्यपि दृश्यमानेषु तत्पुत्रेषु श्यामत्वदर्शनात् सपक्षवृत्तित्वमस्य तथाप्यदृश्यमानेषु कदाचिदश्यामेष्वपि तत्पुत्रत्वं भवेदिति तत्पुत्रत्वस्य विपक्षे अश्यामे च वृत्तिः सन्दिग्धा । **व्यतिरेकवानेवायं हेतुरिति** । न सन्दिग्धविपक्षवृत्तिरित्यर्थः ।

वृत्तित्वमस्य नास्तीति, तत् सत्यम् । वयमप्यमुं पक्षमध्यक्षबाधितमिच्छाम एव, यत्तु न पक्षमात्रपर्यवसितो बाधः किन्तु हेतुमपि स्पृशति ।

न हेतुनिरपेक्षात्मा पक्षो नामास्ति कश्चन ।
प्रसाधयितुमिष्टो हि हेतुना पक्ष उच्यते ॥
स न साधयितुं शक्यः प्रत्यक्षे प्रतियोगिनि ।
साध्यापहारद्वारेण हेतुर्भवति बाधितः ॥
अबाधितानुमेयत्वमत एवास्य लक्षणम् ।
ननु हेतुरसिद्धोऽयं ज्वलने वृत्तिसम्भवात् ॥
यत्तु बाधितता ज्ञातुं शक्या नेति विकल्पितम् ।
पक्षस्यापि महाभाग कथं तां प्रतिपत्स्यसे ॥
प्रयत्ने क्रियमाणेऽपि यदि बाधा न दृश्यते ।
नास्त्येवेत्यवगन्तव्यं व्यवहारो हि नान्यथा ॥

अतस्त्रिलक्षणेऽपि हेतौ बाधसम्भवादबाधितत्वं रूपान्तरं वक्तव्यम् । एवञ्च यदुच्यते बाधाविनाभावयोर्विरोधादिति तत् कथञ्चिद् युक्तं कथञ्चिदयुक्तम् । पञ्चलक्षणके लिङ्गे यः परिसमाप्तोऽविनाभावस्तत्र नास्त्येव बाध इत्येवं युक्तमेतत् । त्रिलक्षणकलिङ्गाविनाभावाभिप्रायेण त्वयुक्तमेतदित्यलं प्रसङ्गेन ।

नियमस्मृतेरिति, विविच्यतां कोऽयं नियमो नाम ? व्याप्तिरविनाभावो नित्यसाहचर्यमित्यर्थः ।

व्यवहारो हि नान्यथेति । यत्ने क्रियमाणेऽपि यन्नोपलभ्यते तच्चेन्नास्तितया निश्चीयते तदा सर्पाद्यभावनिश्चयनिबन्धनो व्यवहारो न स्यात् । **अत एव विरुद्धाव्यभिचारीति**[१] । अत एव वस्तुनोऽद्विरूपत्वादेव परैरिष्टोऽपि भवद्भिर्विरुद्धाव्यभिचारी नेष्यत इति ।

१—अतःपरं 'अत एव विरुद्धाव्यभिचारीति' ग्रन्थप्रतीकष्टिप्पण्यां वर्त्तते परन्तु तादृशीग्रन्थपंक्तिर्न दृश्यतेऽत्र ।

व्याप्तिग्रहोपाये शाक्यमतम्

आह नैतावत्येव विरन्तुमुचितम्, तस्य तदविनाभावित्वमित्यत्र हि निमित्तमन्वेषणीयं तार्किकैः । तच्च तादात्म्यतदुत्पत्तिरूपमीक्षितवन्तो भिक्षवः । यो हि यदात्मा भावः स कथं तमुत्सृजति ? वृक्षात्मिकैव हि शिंशपा तेन वृक्षत्वमनुमापयति, सोऽयं स्वभावहेतुरुच्यते वृक्षोऽयं शिंशपात्वादिति । तत्र तादात्म्यं प्रतिबन्धः, कार्यश्च नाम कारणाधीनात्मलाभमेव भवति न कारणानपेक्षमिति, तदुपलभ्यमानं तदनुमापयत्यग्निरत्र धूमादिति । कार्यहेतौ तदुत्पत्तिः प्रतिबन्धः । एवं हि द्विविधं प्रतिबन्धमनुमेयाव्यभिचारनिबन्धनमनुक्त्वा केवलसाहचर्यनियममात्रवर्णनं यत् प्रसारिका सैवेति ।

शाक्यमतखण्डनम्

उच्यते । पादप्रसारिकैव साधीयसी स्थूलदृष्टिभिरवलम्बिता, परं न सूक्ष्मदृष्टिभिरुत्प्रेक्षितास्तादात्म्यादिप्रतिबन्धाः । तादात्म्ये तावद् गमकाङ्गे हेतुसाध्ययोरव्यतिरेके गम्यगमकभाव एव दुरुपपपादः । न खल्वगृहीतं लिङ्गं लिङ्गिप्रतीतिमाधातुमर्हति । तत्र लिङ्गबुद्धौ लिङ्गं प्रतिभासते न वा ? अप्रतिभासे तद्बुद्ध्या तदग्रहणात् कथं तस्य तदात्मकत्वम् ? प्रतिभासे तु लिङ्गवत् प्रत्यक्ष एव सोऽर्थ इति किमनुमानेन ? विपरीतसमारोपव्यवच्छेदार्थमनुमानमिति चेद् ? न । तत्स्वरूपग्रहणे विपरीतारोपणावसराभावात् । न हि शिरःपाण्यादिविशेषदर्शने सति स्थाणुसमारोपः प्रवर्तते । तत्र तद्भेदादुपपद्येतापि न हि शिरःपाण्यादय एव पुरुष इति । तद्ग्रहणेऽप्यपुरुषारोपः कामं भवेत् । इह वृक्षत्वशिंशपात्वयोरभेदात् शिंशपात्वग्रहणे सति का कथा वृक्षेतरसमारोपस्य ? अपि च वृक्षत्वग्रहणे सति सामान्यधर्मग्रहणाद् विशेषानध्यवसायात् कदाचिदशिंशपारोपः स्यात्, न तु शिंशपात्वग्रहणे सति अवृक्षत्वसमारोपो युक्तः ।

विपरीतसमारोपव्यवच्छेदार्थमिति । यो हि द्राघीयसीषु शिंशपासु प्रवृत्तवृक्षव्यवहारो लघ्व्यां शिंशपायामवृक्षत्वमारोपयति तस्यासौ आरोपोऽनेन व्यवच्छिद्यते "वृक्षोऽयं शिंशपात्वात्" । शिंशपात्वप्रतिबद्धं वृक्षत्वं न द्राघीयस्त्वादिप्रतिबद्धमित्यर्थः ।

प्रमातुः शिंशपात्वं हि यस्य प्रत्यक्षगोचरः ।
परोक्षं तस्य वृक्षत्वमिति नातीव लौकिकम् ॥

किञ्च साध्यसाधनयोरव्यतिरेकाद् यथा शिंशपात्वेन वृक्षत्वमनुमीयते तथा वृक्षत्वेनापि शिंशपात्वमनुमीयेत तादात्म्याविशेषात् । तथा च प्रयत्ननान्तरीयकत्वेनानित्यत्वं साध्यते तद्वद् अनित्यत्वेनापि तत्साध्येत । ततश्च सपक्षव्याप्त्यव्याप्तिभ्यां कृतकत्वप्रयत्ननान्तरीयकत्वयोर्यो भेद उक्तः स हीयेत ।

ननु चान्यः सम्बन्धोऽन्यश्च प्रतिबन्धः । द्विष्ठः सम्बन्धः प्रतिबन्धस्तु परायत्तत्वलक्षणः । तत्र शिंशपात्वं वृक्षत्वे प्रतिबद्धं न वृक्षत्वं शिंशपात्वे । प्रयत्ननान्तरीयकत्वमप्यनित्यत्वे नियतं न त्वनित्यत्वं तत्रेति । तथा धूमस्याग्नौ प्रतिबन्धो न त्वग्नेर्धूमे, सत्यमेवम्, किन्त्वेवमुच्यमाने नियम एवाङ्गीकृतो भवेद् न तादात्म्यम् । तादात्म्ये हि यथा शिंशपात्वं शिंशपां विना न दृश्यते तथा वृक्षत्वमपि शिंशपारहितं न दृश्यते । दृश्यते च खदिरादौ शिंशपारहितं वृक्षत्वम्, विद्युदादौ च प्रयत्ननान्तरीयकत्वरहितमनित्यत्वमुपलभ्यते इति कथमभेदः ?

विना साधनधर्मेण साध्यधर्मोऽयमस्ति हि ।
दृष्टस्तद्व्यतिरेकेण तदात्मा चेति कैतवम् ॥

अथ विद्युदाद्यनित्यत्वादन्यदेव घटाद्यनित्यत्वं यत्प्रयत्ननान्तरीयकत्वाभिन्नमुच्यते तर्हि धर्मिभेदेन धर्माणां भेदेऽन्वयग्रहणानुपपत्तेः सर्वमनुमानमुत्सीदेत् । धूमाग्न्योस्तु कार्यकारणयोर्भेदाद्युक्तं वक्तुं धूमस्याग्नौ प्रतिबन्धो न त्वग्नेर्धूमे । इह तु साध्यसाधनयोरव्यतिरेकान्न तथा शक्यते वक्तुम्, तथाभिधाने वा नाव्यतिरेकः, सर्वदा तादात्म्यं वा त्यज्यतां वृक्षत्वानित्यत्वाभ्यां शिंशपात्वप्रयत्ननान्तरीयकत्वे अनुमीयेताम् नान्तरावस्थातुं लभ्यते । यश्चायमनित्यः शब्दः कृतकत्वादिति स्वभावहेतुरुदाहृतः स कथं स्वभावहेतुः ? इदं हि चिन्त्यताम्, अनित्यत्वं नाम किमुच्यते ? किञ्च कृतकत्वमिति । तत्रानित्यत्वं विनाशयोगः, उत्पत्तियोगश्च कृतकत्वम् । उत्पन्नस्य च भावस्य विनाशो न तु उत्पाद एव विनाश इति, कथं साध्यसाधनयोरव्यतिरेकः ?

अथ विद्युदाद्यनित्यत्वादिति । यदनित्यत्वं प्रयत्नान्तरीयकत्वप्रतिबद्धं न तत् ततोऽन्यत्र. विद्युदादाविति नास्ति तस्य ततोऽन्यत्र वृत्तिरिति ।

अत्र चोदयन्ति, विनाशयोगे ह्यनित्यत्वे विनाशी शब्द इति बुद्धिः स्यान्नानित्य इति, एष्या च मिथ्याबुद्धिः शिखरिण एव कृशानुविशेषितस्य विनाशवतः शब्दस्य ग्रहीतुमशक्यत्वात् ।

अभावेन हि धर्मेण तद्वत्ता धर्मिणः कथम् ।
अभावग्रहवेलायां धर्मिणोऽनुपलम्भनात् ॥

अनित्यत्वमिति च भावप्रत्ययः कथमभावे भवेद्, विरुद्धत्वात् । तस्मादुभयान्तपरिच्छिन्ना वस्तुसत्ता अनित्यत्वमुच्यताम् । कृतकत्वमपि सत्तैव कारणोत्पादिताधारा सती कथ्यत इति । एवञ्च सत्तैव साध्यं साधनञ्चेति सिद्धं स्वभावहेतुत्वम् । तदिदमनुपपन्नम् । साध्यसाधनयोस्तथात्वेनानवभासनात् । एवं ह्युच्यमाने शब्दः सत्तावान् सत्तावत्त्वादिति प्रतीतिः स्यात्, न चैवं दृश्यते, अपि तु अनित्यः शब्दः कृतकत्वादिति । अथोभयान्तपरिच्छिन्ना सत्ता साध्या कारणनिर्वर्त्त्याश्रयसमवायिनी च साधनमित्युच्यते, तदेतदघटमानम् । विनाशरूपस्यान्तस्य तदानीमविद्यमानत्वेन सत्तापरिच्छेदकत्वाभावात् ।

बुद्धिस्थेनाथ तेनास्याः परिच्छेदोऽभ्युपेयते ।
शब्दस्यैव परिच्छेदो विनाशेनास्तु तादृशा ॥
धर्मः समानकालोऽपि बुद्ध्यैव विषयीकृतः ।
तद्विशेषणतां याति तथा भाव्यपि यास्यति ॥

तदेवं विनाशी शब्द इति विशेषणविशेष्यभावसिद्धेः किं सत्तासाध्यकल्पनया । यत्पुनरभिहितम् अभावे भावप्रत्ययस्त्वतलादिर्न स्यादिति, तदत्यन्तानभिज्ञस्य चोद्यम्, शब्दप्रवृत्तिनिमित्तस्य तत्र भावप्रत्ययेनाभिधानात्, यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेश इति, अभावेऽपि अभावत्वमिति दर्शनात् । तस्माद् बुद्धिस्थ-

---

अनित्यत्वमिति भावाभिधायीति । 'तस्य भावस्त्वतलौ' इति त्वप्रत्ययस्य भावाभिधायित्वम्, न चाभावस्य भावोऽस्तीति विरुद्धम् । **तस्मादुभयान्तेति** । प्रागभावप्रध्वंसाभावविशिष्टवस्त्वाधारा सत्ता उभयान्तपरिच्छिन्नेत्यभिधीयते ।

विनाशेनास्तु तादृशा भाविना ।

विनाशी शब्दः अनित्यः शब्द इति । **'यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलादयः'** इत्यत्र द्रव्यशब्देन विशेष्यमुक्तम्, गुणशब्देन तु

विनाशयोग एवानित्यत्वम्, कृतकत्वमपि उत्पत्तियोग एव न सत्ता। कारणोत्पादिताश्रयावच्छेदे तु तस्या इष्यमाणे धर्मिण एव तदवच्छेदो भवत्विति किं सोपानान्तरेण ?

ननूत्पादविनाशाख्यं न धर्मद्वयमन्वयि।
यद् घटे नास्ति तच्छब्दे यच्च शब्दे न तद् घटे॥

अथैक एव धर्मः सर्वभावसम्बन्धी इष्येत तर्हि

एकभावसमुत्पादे सर्वोत्पादः प्रसज्यते।
एकप्रलयकाले च सकलप्रलयो भवेत्॥

तस्मात् सत्तापक्ष एव वरम्। नैतदेवम्। धर्मिभेदेऽपि धर्माणां तुल्यरूपाणामवभासात्।

न घटादिस्वरूपं हि नाश इत्यवकल्पते।
येनानन्वयदोषः स्यात् तद्भेदोपनिबन्धनः॥
एकत्वमपि धर्मस्य नास्ति सर्वेषु धर्मिषु।
येनैकध्वंससमये सकलध्वंससङ्करः॥

भिन्नत्वेऽपि च धर्माणां समानरूपत्वेनावभासमानत्वादन्वयग्रहणादिकार्यविरोधः, अत एव सामान्यमन्तरेणापि समानधर्ममूलान्वयादिव्यवहारोपपत्तेः। तत्र न सूत्रकारेण सामान्यग्रहणं कृतम्, अपि तु साधर्म्यग्रहणमुपात्तम्, 'उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः' 'साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणमिति। तेन विनाशोत्पादधर्मयोः साध्यसाधनभावात्, तयोश्च भेदाद् अनित्यः शब्दः कृतकत्वादिति

तत्र शब्दस्य प्रवृत्तिनिमित्तमात्रमुक्तमिति मन्यते, तच्चाभावेऽपि किञ्चिदस्ति यद्वशादभावत्वमिति भवति; तच्च भाववैलक्षण्यादि किञ्चिदवश्यकल्प्यमित्यभिप्रायः। **धर्मिण एव तदवच्छेदो भवत्विति**। कारणोत्पादावच्छिन्नो धर्म्यैव कृतकः, तस्य च यः कारणत उत्पादस्तदेव कृतकत्वमिति।

एक एव धर्म इति। उत्पादाख्यो विनाशाख्यश्च।

न सूत्रकारेण सामान्यग्रहणं कृतमिति। 'उदाहरणसामान्यात् साध्यसाधनं हेतुः' इति हि क्रियमाणे न घटाख्योदाहरणसामान्यघटत्वं शब्देऽस्तीत्यहेतुत्वं स्यात्।

न स्वभावहेतुरिति सिद्धम् । कार्यहेतुरपि न सम्भवति । भवतां हि पक्षे क्षणयोर्वा कार्यकारणभावो भवेत् सन्तानयोर्वा ?

क्षणयोर्नेति वक्ष्यामः क्षणभङ्गनिराकृतौ ।
सम्भवन्नपि दुर्लक्ष्यः सूक्ष्मत्वाच्च तयोरसौ ।।

धूमाग्निसन्तानयोस्तु अवास्तवत्वादेव नास्ति कार्यकारणभावः । अर्थक्रियाकारित्वमेव वस्तुत्वम् । यदि धूमः कार्यत्वादनलमनुमापयेत् कटुमलिनगगनगामित्वादिधर्मैरपि तस्य गमको भवेत् । न च कथञ्चित् तत्कार्यत्वं कथञ्चिदतत्कार्यत्वञ्च धूमस्योपपन्नम्, सर्वात्मकस्य तदन्वयव्यतिरेकानुविधायिप्रभवत्वात् अथ सर्वात्मनापि तत्कार्यत्वे ।

धूमत्वमात्रमेवाग्निसहचारीति मन्यते ।
सहचारित्वमेवास्तु तदुत्पत्तिकथा वृथा ।।

साहचर्यस्यैवानुमितिहेतुत्वस्थापनम्

ननु भवद्भिरपि कार्यानुमानमङ्गीकृतमेव यथा शेषवदिति व्याख्यास्यते, यथाह कणव्रतः 'कार्यं कारणं संयोगि समवायि विरोधि चेति लैङ्गिकमि'ति, न साहचर्योपलक्षणार्थत्वात्, धूमाग्न्योर्नदीपूरयोर्वा न कार्यकारणभावाद् गमकत्वं यथोक्तेन न्यायेन, अपि तु नित्यसाहचर्यान्नियमादेवेति । विरोधिनोः कथं साहचर्यमिति चेत्, सदसतोर्गम्यगमकभावाद् विरोधिनोरेकतरदर्शनादन्यतरस्याभावोऽनुमीयते, भावाभावयोश्च साहचर्यं तयोरस्त्येव, कणादसूत्रे कार्यादिग्रहणञ्चोपलक्षणम् ।

अन्येषामपि हेतूनां भूम्नां जगति दर्शनात् ।
सूर्यास्तमयमालोक्य कल्प्यते तारकोदयः ।।
पूर्णचन्द्रोदयाद् वृद्धिरम्बुधेरवगम्यते ।
उदितेनानुमीयन्ते सरितः कुम्भयोनिना ।।
शुष्यत्पुलिनपर्यन्तविश्रान्तखगपङ्क्तयः ।

कार्यं कारणमित्यादि । 'अस्येदं कार्यं कारणं संयोगि समवायि विरोधि चेति लैङ्गिकम्' इति सूत्रम् । अस्यार्थः अस्येदं कार्यमिति कार्यदर्शनाद् यत् कारणे ज्ञानमुत्पद्यते तल्लैङ्गिकमानुमानिकम् ; एवं कारणादिदर्शनात् कार्य कारण संयोग्यन्तर-समवा-

पिपीलिकाण्डसञ्चारचेष्टानुमितवृष्टयः ॥
भवन्ति पथिकाः पर्णकुटीरकरणोद्यताः ॥
अन्येऽपि सौगतोद्गीतप्रतिबन्धद्वयोज्झिताः ।
कियन्तो बत गण्यन्ते हेतवः साध्यबोधकाः ॥
लोकप्रसिद्धतादात्म्यतदुत्पत्त्यवधीरणात् ।
डिम्भहेवाकसदृशं स्वमत्या तत्समर्थनम् ॥

अतश्च तत्स्वभावकालस्तत्कार्यमित्यादि व्यसनमात्रम्, अपि च

व्यावृत्त्योर्लिङ्गलिङ्गित्वं प्रतिबन्धश्च वस्तुनोः ।
विकल्पैर्ग्रहणं तस्य कथं सङ्गच्छतामिदम् ॥

उक्तश्चैतत् प्रथमे एवाह्निके इत्यलं प्रसङ्गेन ।

तस्मादनुमितिहेतुः सम्बन्धः साहचर्यमिति सिद्धम्, न तु शौद्धौदनिशिष्यपरिकल्पितमुभयमप्येतत् ।

यत्त्वभ्यधीयत परैः किमधीनमस्य
तत्साहचर्यमिति तत्र विधिः प्रमाणम् ।
तादात्म्यतज्जननयोरपि चैष तेषां
तुल्योऽनुयोग इति किं विफलैः प्रलापैः ॥

नियमस्वरूपनिर्देशानन्तरं स्मृतिस्वरूपविचारः

नियमो व्याख्यातः । स्मृतेरिति कोऽर्थः ? उच्यते

नियमो हि गृहीतोऽङ्गमनुमेयप्रमां प्रति ।
न नारिकेलद्वीपस्थो धूमादग्निं प्रपद्यते ॥

व्यन्तरविरोध्यन्तरेषु यज्ज्ञानं तल्लैङ्गिकम् । कार्यात् नदीपूरादुपरि देशे वृष्टेरनुमानम्, कारणाद् विशिष्टाया मेघोन्नतेर्भाविन्या वृष्टेः । संयोगिनो धूमादग्नेः, समवायिन उष्णस्पर्शाद् वारिस्थस्य तेजसः, विरोधिनो विस्फुर्जनविशिष्टाहेर्नकुलस्य ।

अतश्च तत्स्वभावः काल इति । सूर्यास्तमयादिः कालोऽत्यासन्नतारकोदयस्वभाव इति भावात् स्वभावानुमानात् स्वभावहेतुतेति त आहुः ।

तादात्म्यतज्जननयोरपीति । वृक्षत्वशिंशपात्वयोरग्निधूमयोश्च यत् तादात्म्यं तदुत्पत्तिश्च ते किंकृते इति ।

साध्यानुमितिवेलायां न चास्ति नियमग्रहः ।
नियमग्रहकाले च न साध्यमनुमीयते ॥
तेन पूर्वगृहीतः सन्निदानीं स्मृतिगोचरः ॥
नियमः प्रतिपत्त्यङ्गं तथावगतिदर्शनात् ।

द्वितीयलिङ्गदर्शने सत्यपि नियमस्मरणमन्तरेण साध्यप्रमितेरनुत्पादात् ।

यत्रापि विषयेऽभ्यस्ते नैव सञ्चेत्यते स्मृतिः ।
तत्राप्यनेन न्यायेन बलात् सा परिकल्प्यते ॥

अत एव केचन प्रत्युत्पन्नकारणजन्यां स्मृतिमेवानुमानमुक्तवन्तः । प्रत्युत्पन्नश्च कारणं कुत्रचिद्धर्मिपरोक्षस्यापि चेश्वरादृष्टेन्द्रियादेरनुमेयतां वक्ष्यामः ।

तस्माद् यथोचितात्लिङ्गाद् यथोक्तनियमस्मृतेः ।
यथोक्तलिङ्गिविज्ञानमनुमानमिति स्थितम् ॥

अनुमानप्रामाण्यपरीक्षायां पूर्वपक्षः

ननु सत्यनुमानस्य प्रामाण्ये लक्षणाश्रयः ।
कार्यो विचारो न पुनः प्रामाण्यं तस्य युज्यते ॥

अत एवेति । अविनाभावस्मृतिं विनानुमेयप्रतीतेरनुत्पादाद्धेतोः । नन्वविनाभावसम्बन्धस्मरणस्यानुमानत्वे केवलसंस्कारजन्यस्यापि हेतुत्वप्रसङ्ग इत्याशङ्क्याह— **प्रत्युत्पन्नकारणे**ति । प्रत्युत्पन्नं वर्तमानम् । धूमस्य सन्निहितस्य दर्शनाद् उत्पन्नाविनाभावस्मृतिः 'यत्र धूमस्तत्राग्निः' इत्येवंरूपा 'इहैव च धूमोऽतोऽत्रैवाग्निना भाव्यम्' इत्यस्यां प्रतीतौ पर्यवस्यति, न तु केवलसंस्कारजनितेत्यभिप्रायः ।

षोडश विकल्पा इति ।[१] तथा चोक्तम्

सर्वोऽनिर्धारितः पूर्वः शैलस्थोऽग्निश्चतुर्विधः ।
प्रत्येकं साध्यते सर्वपूर्वानिर्धारितादिभिः ॥

---

१. अतोऽनन्तरं ग्रन्थिभङ्गधृतप्रतीकद्वयोपजीवका। षोडशविकल्पा इति 'तत्र देशविशेषावच्छेद' इत्यादि च ग्रन्थपंक्तिर्न दृश्यते ।

विशिष्ट इति । एवं चत्वारोऽग्नयः प्रत्येकं चतुर्धा भिद्यमानाः षोडश भवन्ति । तत्रैते पञ्चदश पक्षाः । तत्र प्रथमः पक्षः 'सर्वोऽग्निरग्निमात्रं सर्वत्र यत्र क्वचन विद्यते' इति सिद्धसाध्यतया इष्टम्, विनाऽपि धूमदर्शनमस्यार्थस्य लाभादिति. अत्र हि सर्व-शब्दः प्रकृतापेक्षः । 'अनिर्धारितः पूर्वोपलब्ध इहोपलभ्यमानश्च यः स सर्वः सर्वस्मिन्ननिर्धारिते देशे पूर्वत्रेह भवत्येव' इति द्वितीये तृतीये चतुर्थे प्रत्यक्षादिविरोधः; न हि सर्वोऽग्निः शशशृङ्गवदनिर्धारित एकस्मिन् देशे, पूर्वानुभूते रसवत्याख्ये, समुपलभ्यमाने चाद्रौ सम्भवति । पञ्चमः प्रत्यक्षविरुद्धः, 'अनिर्धारितोऽग्निः सर्वत्र देशे विद्यते' इति । न ह्यनिर्धारितस्य कस्यचिदग्नेरव्यापकत्वात् सर्वत्रावस्थानसम्भवः, रसवत्यादौ च निर्धारितस्यापि दर्शनात् । षष्ठे च 'अनिर्धारितोऽग्निरनिर्धारितदेशे विद्यते' इति सिद्धसाध्यतयैव कस्यचिदग्नेरवश्यं क्वचिद्देशे भावात् । 'अनिर्धारितोऽग्निः पूर्वत्र रसवत्यां विद्यते' इति सप्तमे तथा 'अनिर्धारितोऽग्निरिह पर्वते विद्यते' इति अष्टमे च प्रत्यक्षविरोधः, उभयत्र निर्धारितस्य दर्शनात् । 'पूर्वोऽग्निः सर्वत्र विद्यते' इति नवमेऽपि प्रत्यक्षविरोध एव, तस्य तद्देशं प्रत्यागमनाभावादव्यापकत्वात् सर्वत्र वृत्त्यभावात् । तथा 'पूर्वोऽग्निरनिर्धारिते देशे विद्यते' इति दशमेऽपि प्रागवत् प्रत्यक्षविरोध एव । पूर्वोऽग्निः पूर्वत्र विद्यते' इति एकादशे सिद्धसाध्यता, अवश्यं यस्तत्र स तत्र भवतीति । एतत् तु अचिरदृष्टाभिप्रायेणोक्तम्, न तु पूर्वोऽग्निरवश्य सर्वदा वा तत्र सम्भवतीति । 'पूर्वोऽग्निरिहाद्रौ विद्यते' इति द्वादशे असर्वगतत्वात् तस्यान्यत्र वृत्त्यसम्भवात् प्रत्यक्षविरोधः । एवं 'शैलस्थोऽग्निः सर्वत्र विद्यते' इति त्रयोदशेऽपि द्वादशवत् प्रत्यक्षविरोध एव । स एव शैलस्थोऽग्निरनिर्धारिते क्वचिद्देशे विद्यते' इति चतुर्दशे स एव । 'स एव पूर्वस्मिन् देशे विद्यते' इति च पञ्चदशे तस्याग्नेरसर्वगतत्वेनान्यत्र सञ्चाराभावात् प्रत्यक्षादिविरुद्धतैव ।

तत्र देशविशेषावच्छेद इत्यादि । अयं भावः । स्वरूपेण गृहीतस्योत्पलादेर्नीलादि अवच्छेदकम् । न च देशग्रहणमन्तरेणाग्निग्रहणं समस्तीति देशग्रह उत्पलग्रह इव प्राक्पश्चादग्निग्रहो नीलत्वग्रहवदिति बलादायातमग्नेरेव विशेषणत्वम् । न ह्यगृहीत उत्पले तस्य नीलत्वसम्बन्धः प्रतिपादयितुं शक्यते । विशेष्यत्वेन हि ग्रहणं विशेषणग्रहणात् परतः, स्वरूपेण तु पूर्वमेवेति ।

तथा चाहुः प्रमाणस्यागौणत्वादनुमानार्थनिश्चयो दुर्लभः । पक्षधर्मादिरूपं हि लिङ्गस्य बलाद् गौण्या वृत्त्या दर्शयितव्यम् । धर्मे हि साध्ये न हेतोः पक्षधर्मत्वम्, अग्निधर्मत्वाद् धूमस्य धर्मिणि साध्ये हेतोरनन्वयित्वम् । न हि यत्र धूमस्तत्र पर्वत इत्यन्वयः । द्वये तु साध्ये द्वयमपि नास्ति, न हि दहनमहीध्रयोर्धर्मो धूमः । नाप्येवमन्वयः यत्र धूमस्तत्र पर्वताग्नी इति । धर्मविशिष्टे धर्मिणि साध्ये तदुभयमघटमानमेव, नाग्निविशिष्टधराधरधर्मतया धूमः प्रथममुपलब्धुं शक्यते, न चाप्येवमन्वयो यत्र धूमस्तत्राग्निमान् पर्वत इति । तस्मादवश्यं पक्षधर्मत्वान्वयव्यवहारसिद्धये धर्मविशिष्टे धर्मिणि रूढः पक्षशब्दस्तदेकदेशे धर्मिणि गौण्या वृत्त्या वर्णनीयः, अन्वयप्रदर्शनसमये च तदेकदेशे तथैव योजनेऽतिगौणलक्षणत्वादिन्द्रियार्थसन्निकर्षजत्वादिवदगौणलक्षणत्वाभावादनुमानमप्रमाणम् ।

अपि च

विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनात् ।
तद्वतोऽनुपपन्नत्वाद् अनुमानकथा कुतः ॥

साहचर्ये च सम्बन्धे विस्रम्भ इति मुग्धता ।
शतकृत्वोऽपि तद्दृष्टौ व्यभिचारस्य सम्भवात् ॥

देशकालदशाभेदविचित्रात्मसु वस्तुषु ।
अविनाभावनियमो न शक्या वस्तुमाह च ॥

अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥

प्रमाणस्यागौणत्वादिति । प्रमाणं प्रत्यक्षादि अगौणम्, उपचारानाश्रयणेन तल्लक्षणपदानां व्याख्यानात् ।

सामान्ये सिद्धसाधनादिति । व्याप्तिग्रहणसमय एव धूममात्रस्याग्निमात्रेण व्याप्तिग्रहणादत्रापि धूममात्रमग्निमात्रेण व्याप्तं गृहीतमेव, इति स्मृतिमात्रमिदानीं न त्वपूर्वं किञ्चिदित्यर्थः ।

अवस्थादेशकालानामिति । गुडूच्यादेरभिनवजातस्यान्या शक्तिरन्या चिर-

भवन्नप्यविनाभावः परिच्छेत्तुं न शक्यते ।
जगत्त्रयगताशेषपदार्थालोचनाद् विना ॥
न प्रत्यक्षीकृता यावद् धूमाग्निव्यक्तयोऽखिलाः ।
तावत् स्यादपि धूमोऽसौ योऽनग्नेरिति शङ्क्यते ॥
ये तु प्रत्यक्षतो विश्वं पश्यन्ति हि भवादृशः ।
किं दिव्यचक्षुषामेषामनुमानप्रयोजनम् ॥
सामान्यद्वारकोऽप्यस्ति नाविनाभावनिश्चयः ।
वास्तवं हि न सामान्यं नाम किञ्चन विद्यते ॥
भूयोदर्शनगम्यापि न व्याप्तिरवकल्पते ।
सहस्रशोऽपि तद्दृष्टे व्यभिचारावधारणात् ।
बहुकृत्वोऽपि वस्त्वात्मा तथेति परिनिश्चितः ।
देशकालादिभेदेन दृश्यते पुनरन्यथा ॥
भूयो दृष्ट्वा च धूमोऽग्निसहचारीति गम्यताम् ।
अनग्नौ तु स नास्तीति न भूयोदर्शनाद् गतिः ॥
न चापि दृष्टिमात्रेण गमकाः सहचारिणः ।
तत्रैव नियतत्वं हि तदन्याभावपूर्वकम् ॥
नियमश्चानुमानाङ्गं गृहीतः प्रतिपद्यते ।
ग्रहणञ्चास्य नान्यत्र नास्तितानिश्चयं विना ॥
दर्शनादर्शनाभ्यां हि नियमग्रहणं यदि ।
तदप्यसदनग्नौ हि धूमस्येष्टमदर्शनम् ॥
अनग्निश्च कियान् सर्वं जगज्ज्वलनवर्जितम् ।
तत्र धूमस्य नास्तित्वं नैव पश्यन्त्ययोगिनः ॥
तदेवं नियमाभावात् सति वा ज्ञप्त्यसम्भवात् ।
अनुमानप्रमाणत्वदुराशा परिमुच्यताम् ॥

जातस्य, तथा वत्मदेशजातस्यानूपदेशप्रभवाच्छक्तिभेदः, वसन्तादिगृहीतस्य च शरदाद्यृत्वन्तरोद्भूतात् ।

अनुमानविरोधो वा यदि चेष्टविघातकृत् ।
विरुद्धाव्यभिचारो वा सर्वत्र सुलभोदयः ॥
अत एवानुमानानामपश्यन्तः प्रमाणताम् ।
तद्विस्रम्भनिषेधार्थमिदमाहुर्मनीषिणः ॥
हस्तस्पर्शादिनान्धेन विषमे पथि धावता ।
अनुमानप्रधानेन विनिपातो न दुर्लभः ॥

अपि च

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥

अनुमानलक्षणे आक्षेपनिरासः

अत्राभिधीयते, किमयमनुमानस्वरूपाक्षेप एव क्रियते, उत तत्तार्किकोपलक्षिततल्लक्षणाक्षेप इति । तत्रानुमानस्वरूपञ्चाशक्यनिह्नवमेव सर्वलोकप्रसिद्धत्वात् ।

अबलाबालगोपालहालिकप्रमुखा अपि ।
बुध्यन्ते नियतादर्थादर्थान्तरमसंशयम् ॥
अनुमानापलापे तु प्रत्यक्षादपि दुर्लभा ।
लोकयात्रेति लोकाः स्युर्लिखिता इव निश्चलाः ॥

प्रत्यक्षदृष्टमपि पदार्थजातं तज्जातीयत्वलिङ्गव्यापारेण सुखसाधनम् इतरकारणमिति वा निश्चित्य तदुपाददते जहति वा लौकिकाः । अथाविचारितरमणीयतैव तत्त्वं न तु लक्षणनियमः शक्यक्रियस्तस्येति लक्षणाक्षेपोऽयमुच्यते ? सोऽप्ययुक्तः; यतः,

यं कञ्चिदर्थमालोक्य यः कश्चिन्नावगम्यते ।
कञ्चिदेवाक्षिपत्यर्थमर्थः कश्चिदिति स्थितिः ॥

अनुमानविरोधो वा यदीति । यत्र बलीयसा दुर्बलस्य विषयोऽपह्रियते तत्रानुमानविरोधव्यवहारः, यत्र तूभयोः प्रयोगः समकक्षतया संशयापादकस्तत्र विरुद्धाव्यभिचारिता, यत्पुनः प्रयुक्तं सदभिमतं धर्मं विहन्ति तदिष्टविघातकृत् यथा 'चक्षुरादयः परार्थाः संघातत्वात्, शयनादिवत्' इत्यत्र शरीररूपसंघातपरार्थत्वेन शयनादीनां दर्शनादिष्टासंहतरूपात्मार्थत्वासिद्धेरिष्टविघातकारित्वम् ।

तत्र वस्तुस्वभावोऽयमिति पादप्रसारिका ।
दृश्यते ह्यविनाभूतादर्थादर्थान्तरे मतिः ।।
अतो यद्दर्शनाद् यत्र प्रतीतिरुपजायते ।
तयोरस्त्यर्थयोः कश्चित् सम्बन्ध इति मन्महे ।।
तदात्मतातदुत्पत्ती न श्रद्दधति तद्विदः ।
साहचर्यन्तु सम्बन्ध इति नो हृदयङ्गमम् ।
तस्मिन् सत्येव भवनं न विना भवनं ततः ।
अयमेवाविनाभावो नियमः सहचारिता ।।
किङ्कृतो नियमोऽस्यास्मिन्निति चेदेवमुत्तरम् ।
तदात्मतादिपक्षेऽपि नैष प्रश्नो निवर्त्तते ।।
ज्वलनाज्जायते धूमो न जलादिति का गतिः ।
एवमेवैतदिति चेत् साहचर्येऽपि तत्समम् ।।
यद् यस्य यावान् विषयः स तावति निरूप्यते ।
वस्तुस्वभावभेदे तु न तस्य प्रभविष्णुता ।।
अयञ्च विषमो युक्तेर्यदुक्तं नियमाद् विना ।
नार्थादर्थान्तरे ज्ञानमतस्तस्य प्रकल्पनम् ।।

ततः परन्तु 'नियमोऽप्येष किंकृत' इति न युक्तिः प्रभवति, तादात्म्यतदुत्पत्त्योरनुपपन्नत्वात् । अतो नियम एव विरच्यते ।

अनुमितिहेतुस्वरूपविचारः

न च प्रतिभामात्रमानुमानिकी प्रमितिरिति वक्तुं युक्तम्, नियतात् कुतश्चिदेव वस्तुनि प्रतीतिदर्शनादित्युक्तत्वात्, । नियमश्च यदि अगृहीत एव प्रतीत्यङ्गं भवेन्नारिकेलद्वीपनिवासिभिरपि धूमदर्शनात् कृशानुरनुमीयेत, नचैवमस्तीति नियमग्रहणमपेक्षणीयम् ।

यद् यस्य यावान् विषय इति । पूर्वोक्तमेव दृढयति यद् यस्माद् यस्य युक्त्यादेर्यावान्नियमो विषयः स युक्त्यात्मा तावदिष्टविषये निरूप्यते प्रवर्त्यते ।

न च प्रतिभामात्रमिति । बाह्यनिमित्तानियन्त्रिता प्रतिभासमाना सद्भूतार्थाकारा प्रज्ञा प्रतिभा ।

यच्च विकल्पितम् 'अशक्यं तद्ग्रहणमिति', तत्र केचिदाचक्षते मानसं प्रत्यक्षं प्रतिबन्धग्राहीति । प्रत्यक्षानुपलम्भाभ्यामनलसहचरितमनग्नेश्च व्यावर्त्तमानं धूममुपलभ्य विभावसौ नियतो धूम इति मनसा प्रतिपद्यते ।

मनश्च सर्वविषयं केन वा नाभ्युपेयते ।
असन्निहितमप्यर्थमवधारयितुं क्षमम् ॥

न च सकलत्रिभुवनविवरनिरुद्धधूमाग्निव्यक्तिसार्थसाक्षात्करणमुपयुज्यते, ज्वलनत्वादिसामान्यपुरःसरतया व्याप्तिग्रहणात् । यत्तूक्तं 'सामान्यं वास्तवं नास्ती'ति तच्छब्दार्थचिन्ताप्रसङ्गे प्रतिसमाधास्यते ।

अपरे पुनः योगिप्रत्यक्षकल्पं यौक्तिकं सम्बन्धग्राहि प्रत्यक्षं प्रतिपेदिरे किल । धूमत्वाग्नित्वसामान्यपुरस्कारेण व्याप्यव्यापकयोरन्वयो नाम गृह्यताम् । व्यतिरेकस्त्वनग्निभ्यो धूमस्य ग्रहीतव्यः । अनग्नयश्चातिविततः । न च तेष्वनग्नित्वं नाम सामान्यमस्ति । तेन समस्तत्रैलोक्यान्तर्गताग्न्यनग्निगतान्वयव्यतिरेकग्राहिप्रत्यक्षव्यतिरेकेण न प्रतिबन्धोऽवधृतो भवेत् । अनवधृतश्च न प्रमाङ्गम् । अस्ति च प्रमेति, युक्तं बलात् प्रतिबन्धग्राहकमेकस्मिन् क्षणे प्रत्यक्षमिदमशेषव्यक्तिविषयमसंवेद्यमानमपि कल्पितमिति यौक्तिकमुच्यते ।

अन्ये पुनः, अत एव तत्कल्पनाभयाद् भूयोदर्शनपरिच्छिन्नसामान्यपुरःसरान्वयमनपेक्षितव्यतिरेकनिश्चयमेव लिङ्गं गमकमभ्युपागमन् । यथोक्तम् 'भमत्वदृष्टिमात्रेण गमकाः सहचारिण' इति, अयमाशयः

भूयोदर्शनतस्तावदुदेति मतिरीदृशी ।
नियतोऽयमनेनेति सकलप्राणिसाक्षिका ॥

तावता च गमकत्वमौत्सर्गिकं सिध्यति ।

मीमांसकानन्तु विपक्षे दर्शनं बाधकप्रत्ययः । न च सोऽस्ति नाद्ययावदनग्नौ धूमो दृष्टः । अनुत्पन्नेऽपि बाधके तदाशङ्कनमयुक्तमित्युक्तं तैः । "दोषज्ञाने त्वनुत्पन्ने नाशङ्का निष्प्रमाणिकेति" एतत्तु न चारु, व्यतिरेकनिश्चयमन्तरेण प्रतिबन्धग्रहणानुपपत्तेरित्युक्तत्वात्, । ज्ञापककत्वाद्धि नियमः स्वग्रहणमपेक्षते, नियमश्चाय-

---

यौक्तिकम् युक्तिबलात् कल्प्यम् ।

मुच्यते यत् तस्मिन् सति भवनं ततो विना न भवनमिति भूयोदर्शनम् । तच्च तस्मिन् सति भवनमित्यन्वयमात्रपरिच्छेदादर्धगृहीतो नियमः स्यात्, ततो विना न भवनमित्यस्यार्थस्यापरिच्छेदादिति ।

अपरे पुनः अनग्नित्वसामान्यमन्तरेणापि योगिप्रत्यक्षकल्पनामकुर्वन्त एव मानसप्रत्यक्षगम्यमन्वयव्यतिरेकमाहुः । धूमाग्निसामान्ये तावत् सहचरिते उपलब्धे, तद्वत् तदभावावपि सहचरितावुपलभ्येते एव, धूमत्वसामानस्यानग्नौ जलादावदर्शनात् । सर्वगतत्वेऽपि सामान्यानां वृत्तिभेदो नियामक इति वक्ष्यते । यद्यपि चानग्नित्वाद्यभावसामान्यं नास्ति तथापि प्रतिषेध्याग्नित्वसामान्यानुगमसिद्धैव तदभावानुगमग्रहणं सिध्यति, सकलव्यक्तिज्ञानमनङ्गं व्याप्तिनिश्चये ।

भावसामान्ययोर्यद्वत् तथैव तदभावयोः ।
भावयोः साहचर्यं यदन्वयं तत्प्रचक्षते ॥
व्यतिरेकन्तु मन्यन्ते साहित्यं तदभावयोः ।
साध्यसाधनभावस्तु भवेद् यत्राप्यभावयोः ॥
तयोरेवान्वयस्तत्र व्यतिरेकस्तु भावयोः ।

तदेवमभावान्वयवद् भावव्यतिरेकोऽपि प्रत्यक्षगम्यो भवत्येव ।

इयानेव विशेषस्तु भावयोर्यादृशी ययोः ।
व्याप्यव्यापकता सैव व्यत्यस्ता तदभावयोः ॥

अभावयोस्तु गम्यगमकभावे भावयोर्व्याप्तिव्यत्ययो द्रष्टव्यः । एवञ्च प्रतिषेध्यानुगमपूर्वकसामान्यभावद्वयानुगमप्रत्ययोपपत्तेरन्वयतद्व्यतिरेकनिश्चयेऽपि न योगिप्रत्यक्षमुपयुज्यते, भावाभावसाहचर्यमवधार्य मनसा नियमज्ञानसिद्धेरित्यलं निर्बन्धेन ।

अनुमानलक्षणे आक्षेपसमाधानम्

तस्मान्नियमवत् तद्ग्रहणोपायोऽप्यस्तीति सिद्धम् ।

गृहीते नियमे यावत्पुनः क्वचिद्धर्मिणि धूमादेर्लिङ्गस्य ग्रहणं न वृत्तं तावन्न भवति लिङ्गिनोऽवगतिरिति सम्बन्धग्रहणकालापेक्षया द्वितीयं तल्लिङ्गदर्शनम-

---

तयोरेवान्वयस्तत्रेति । यथा 'नास्त्यत्र धूमोऽग्न्यभावात्' इति यत्र यत्र अग्न्यभावस्तत्र तत्र धूमाभाव इत्यन्वयः । यत्र तु धूमस्तत्राग्निरिति व्यतिरेकः ।

पेक्षितव्यम्, सैवेयं पक्षधर्मतोच्यते । पक्षधर्मान्वयव्यतिरेकनिश्चये सत्यपि प्रत्यक्षागमविरोधेन, प्रतिपक्षोपनिपातेन वा न गमकत्वमिति तदपरं लक्षणद्वयमुपदिष्टम्, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वञ्चेति । तदेवमनुभवसिद्धत्वादनुमानस्वरूपमिव तस्य लक्षणमपि तान्त्रिकविरचितमवाचकं लक्षणं चेत् स्वयमनवद्यमावेद्यताम्, न तु तद्द्वेषेण लक्ष्यमप्यनुमानं निह्नोतुं युक्तम् ।

यत्पुनरभाणि 'प्रमाणस्य गौणत्वादनुमानादर्थनिश्चयो दुर्लभ' इति तन्न बुद्ध्यामहे । न हि प्रमाणस्य किञ्चिद्गौणत्वमिह पश्यामः । पक्षधर्मादिपदानि यदि नाम व्याख्यातृभिर्गौणानि प्रयुक्तानि किमेतावता प्रमाणं गौणीभवेत् ? शब्दान्तरेण हि तल्लक्षणाभिधाने न कश्चिद् गौणतादिप्रमादः ।

यदप्यवादि 'विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनादि'ति तदप्यसाधु, साध्यस्य मत्वर्थस्य दर्शितत्वात् ।

यदपि 'अवस्थादेशकालानां भेदादि'त्यभ्यधायि तदपि न भयावहम्, सम्यगवधृतायां व्याप्तौ विप्लवाभावात्, प्रमातुरेव तत्र तत्रापराधो नानुमानस्येति ।

यदपि व्याहारि 'विरुद्धानुमानविरोधयोः सर्वत्र सम्भवात्' कुत्रचिच्च विरुद्धाव्यभिचारिण इष्टविघातकृतश्च सुलभत्वादि'ति, तदप्यालजालम्, प्रयोजकहेतौ प्रयुक्ते सत्येवम्प्रायाणामनवकाशत्वात् ।

सद्वितीयप्रयोगास्तु न भवन्ति प्रयोजकाः ।
उत्प्रेक्षामात्रमूलत्वाद्धेत्वाभासा भवन्ति ते ।।

इति वक्ष्यामः ।

न विशेषविरुद्धश्च न चास्तीष्टविघातकृत् ।
हेतौ सुप्रतिबद्धे हि नैताः सन्ति विडम्बनाः ।।

विरुद्धानुमानविरोधयोरिति । धर्मविशेषाणां विपर्ययहेतवोऽत्र विरुद्धाः, यथा यदि कार्यत्वाच्छब्दस्य पराश्रितत्वं सिद्ध्यति रूपादिषु तथादर्शनात् तदा तेषु तथादर्शनादेव नित्यसर्वगताश्रितत्वाभावोऽपि सिद्ध्येदिति । इष्टविघातकृत् पुनः साध्यस्यैव धर्मस्य विहन्तेति विशेषः ।

सद्वितीयप्रयोगास्त्विति । अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयुक्ते परः

तादृशा चानुमानेन पुंसोऽर्थमधिगच्छतः ।
नान्धेन तुल्यता हस्तस्पर्शानुमितवर्त्मना ॥
यत्नेनानुमितो योऽर्थः कुशलैरनुमातृभिः ।
अभियोगशतेनापि सोऽन्यथा नोपपाद्यते ॥

लोकायतैकदेशिमते केषाश्चिदनुमानानामप्रामाण्यं तत्खण्डनञ्च

सुशिक्षिततराः प्राहुः । द्विविधमनुमानम्, किञ्चिदुत्पन्नप्रतीति किञ्चिदुत्पाद्यप्रतीति । ईश्वराद्यनुमानन्तु उत्पाद्यप्रतीति ।

तत्र धूमानुमानादेः प्रामाण्यं केन नेष्यते ।
अतो हि साध्यं बुध्यन्ते तार्किकैरक्षता अपि ॥
यस्त्वात्मेश्वरसर्वज्ञपरलोकादिगोचरम् ।
अनुमानं न तस्येष्टं प्रामाण्यं तत्त्वदर्शिभिः ॥
ऋजूनां जायते तस्मान्न तावदनुमेयधीः ।
यावत् कुटिलितं चेतो न तेषां विटतार्किकैः ॥
एवन्तु कथयद्भिस्तैः परं नास्तित्वयमात्मनः ।
ख्याप्यते स्म जडत्वं वा नानुमानाप्रमाणता ॥

न हि सम्बन्धग्रहणोपायवैचित्र्यादप्रमाणता भवितुमर्हति ।

आगमेनानुमानेन तर्कव्युत्पादनेन वा ।
प्रत्यक्षेण गृहीतो वा सम्बन्धो न विशिष्यते ॥
ईश्वराद्यनुमानानां तत्प्रसङ्गे सविस्तरम् ।
द्रढिमानञ्च वक्ष्याम इत्यलं बहुभाषितैः ॥
प्रमाणमुपगम्यतां तदनुमानमेवंविधै-
रविप्लुतपराक्रमं भवदुदीरितैर्दूषणैः ।
अनभ्युपगमे पुनर्विगतचेष्टिताः प्राणिनो
भवेयुरुपलोपमा इति हि पूर्वमावेदितम् ॥

सद्वितीयप्रयोगेण प्रत्यवतिष्ठते 'अस्तु तत्साध्यधर्माधिकरणत्वशून्यधर्मिघटान्यतर-सद्वितीयो घटोऽनुत्पलत्वात् (?) कुड्यवत्' इत्यादिना ।

उत्पन्ना स्वत एव तर्काभ्यासनिरपेक्षेण प्रतीतिर्यतर**तदुत्पन्नप्रतीति** ।

अनुमानसूत्रे तत्पूर्वकपदार्थविचारः

अथेदानीं सूत्रमनुसरामस्तत्पूर्वकमित्यादि। अनुमानमिति लक्ष्यनिर्देशः। तत्पूर्वकमिति लक्षणम्। तदिति सर्वनाम्ना प्रक्रान्तं प्रत्यक्षमवमृश्यते। तत् पूर्वं कारणं यस्य तत्तत्पूर्वकम्। एतावत्युच्यमाने निर्णयोपमानादौ तत्पूर्वके प्रसङ्गो न व्यावर्त्तते तद्व्यावृत्तये द्विवचनान्तेन विग्रहः प्रदर्शयितव्यः। ते द्वे प्रत्यक्षे पूर्वं यस्येति। यदेकमविनाभावग्राहि प्रत्यक्षं व्याख्यातम्, यच्च द्वितीयं लिङ्गदर्शनम्, ते द्वे प्रत्यक्षे अनुमानस्यैव कारणं नोपमानादेः। तत्र प्रतिबन्धग्राहि प्रत्यक्षं स्मरणद्वारेण तत्कारणम्, लिङ्गदर्शनन्तु स्वत एव।

ननु प्रत्यक्षमात्रस्य प्रकृतत्वात्, प्रकृतावमर्शित्वाच्च सर्वनाम्नः, कुतोऽयं विशेषप्रतिलाभः? उच्यते। उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरिति वक्ष्यते। हेतुरेव चानुमानं यदिह लक्ष्यं निर्दिष्टम्। न चागृहीतमुदाहरणसाधर्म्यं तद्वैधर्म्यं वा साध्यसाधनं भवतीति तद्ग्रहणोपायोऽपेक्षितव्यः। प्रत्यक्षव्यतिरिक्ततदवगमोपायपरिकल्पने चानवस्थादूषणमसकृदभिहितमिति प्रत्यक्षस्यैव तदुपायत्वम्। अतोऽनुमानकारणभूतप्रत्यक्षापेक्षया प्रत्यक्षमात्रप्रक्रमेऽपि सर्वनाम्ना तद्विशेष आक्षिप्यते यत् प्रतिबन्धग्राहि प्रत्यक्षं यच्च द्वितीयं लिङ्गदर्शनमिति।

ननु प्रत्यक्षविशेषद्वयपूर्वकत्वमनुमानाभासेष्वपि सव्यभिचारविरुद्धादिषु सम्भवतीत्यतिव्याप्तिः। मैवम्। हेतुलक्षणेन साध्यसाधनग्रहणेन तत्प्रतिक्षेपात्। प्रतिबन्धस्वरूपं हि तत्रैव निपुणमभिधास्यते। इह तु तद्ग्रहणोपायमात्रमुच्यते। सम्यक् प्रवृत्ते च प्रतिबन्धग्राहिणि प्रत्यक्षे व्याप्तिविप्लवाभावान्नानुमानाभासप्रसङ्गः। सामान्यलक्षणानुवादेन च विशेषलक्षणे वर्ण्यमाने तत एव प्रमाणाभासव्युदाससिद्धेः, केवलमिदानीं समानजातीयोपमानादिव्यवच्छेदो वचनीय इति स एव तत्पूर्वकपदेनोपात्तः। अर्थोत्पन्नमव्यभिचारि व्यवसायात्मकमिति फलविशेषणानां सर्वप्रमाणेष्वनुवृत्तेः।

युगपच्च क्वचिन्नास्ति व्यापारः शब्दलिङ्गयोः।
अतो नाव्यपदेश्यत्वविशेषणमिहार्थवत्॥

द्वयोरपि च शब्दलिङ्गयोर्ज्ञापकत्वेन स्वरूपग्रहणापेक्षत्वाज् ज्ञानायौगपद्येन युगपद् ग्रहणासम्भवात्।

नन्वेवं निरस्यतामतिव्याप्तिः, अव्याप्तिस्तु कथं निरसिष्यते, आगमादिपूर्वकाणामनुमानानामसङ्ग्रहात् । तेष्वपि मूलभूतं प्रत्यक्षमेव कारणमिति केचिदाहुः । यथोक्तम्

यत्राप्यनुमितात्लिङ्गाल्लिङ्गिनि ग्रहणं भवेत् ।
तत्रापि मौलिकं लिङ्गं प्रत्यक्षादेव गम्यते ।। इति ।

यद्वा प्राधान्याभिप्रायेण प्रत्यक्षपूर्वकत्वमुच्यते न नियमार्थमिति नाव्याप्तिः, तानीति वा पुनस्तावदवबोधाय विग्रहः कर्तव्यः, तानि प्रत्यक्षादीनि पूर्वं यस्येति । यद्यपि प्रत्यक्षमेव लक्ष्यत्वेन प्रस्तुतं तथापि व्यवच्छेद्यतयानुमानादीनामपि प्रकृतत्वं न वार्यते ।

अत्र चोदयन्ति तदिति करणावमर्शो वा स्यात्, फलावमर्शो वा ? करणावमर्शे इन्द्रियादिकरणपूर्वकं ज्ञानं तत्फलम्, तत्पूर्वकं चानुमानमिति पूर्वशब्दस्य द्विः पाठः स्यात्, स चाश्रुत्वा कल्पनीयः । फलावमर्शे तु प्रत्यक्षफलपूर्वकमनुमानमिति तत्पूर्वकशब्दस्य फलवचनस्यानुमानशब्देन करणवाचिना सह सामानाधिकरण्यं न स्यात् तत्पूर्वकमनुमानमिति । प्रत्यक्षफलेन हि लिङ्गदर्शनेन परोक्षार्थप्रतिपत्तिरूपजन्यते, सा चानुमानफलं नानुमानमिति । उच्यते । उभयथाऽपि न दोषः । करणावमर्शे तावदिन्द्रियादिकरणपूर्वकं तत्फलं लिङ्गदर्शनं यत् तदेव परोक्षार्थप्रतिपत्तौ करणमनुमानमिति न द्विः पूर्वकशब्दस्य पाठ उपयुज्यते । फलेऽप्यवमृश्यमाने प्रत्यक्षफललिङ्गदर्शनपूर्वकं यदविनाभावस्मरणं तदनुमानं करणमेव, ततः परोक्षार्थप्रतिपत्तेः । यदुक्तं 'प्रत्युत्पन्नकारणजन्या स्मृतिरनुमानमि'ति स्पष्टमेव सामानाधिकरण्यम् । फले वा अनुमानशब्दं वर्णयिष्यामोऽनुमितिरनुमानमिति । यतः शब्दं वा अध्याहरिष्यामः, प्रत्यक्षफलपूर्वकं परोक्षार्थप्रतिपत्तिरूपं फलं यतो भवति तदनुमानमिति । अत्र हि प्रथमं लिङ्गदर्शनम्, ततः प्रतिबन्धस्मरणम्, ततः केषाञ्चिन्मते परामर्शज्ञानम् ततः साध्यार्थप्रतीतिः, ततःप्रत्यक्षलक्षणावसरवर्णितेन क्रमेण हेयादिज्ञानमितीयति प्रतीतिकलापे यथोपपत्ति कार्यकारणभावो वक्तव्य इत्येवं तत्पूर्वकपदमेव केवलमनुमानलक्षणक्षममिति गुरवो वर्णयाञ्चक्रुः ।

यत्राप्यनुमितादिति । प्रभाभेदेनानुमिताद् देशान्तरप्राप्तिरूपाल्लिङ्गिनि सूर्यगत्यादौ । **मौलिकम्** मूले भवं प्रभाभेदरूपम् ।

सूत्रस्थत्रिविधपदसार्थक्यम्

अन्ये पुनः उपमानाद्यतिव्याप्तिव्युदासाय त्रिविधग्रहणं व्याख्यातवन्तः। तत्पूर्वकमनुमानमित्युच्यमाने सति उपमानादौ प्रसङ्ग इति त्रिविधग्रहणम्। लिङ्गं वक्ष्यमाणकार्यादिभेदाद्वा त्रिविधम्, पक्षधर्मादिरूपत्रययोगाद्वा त्रिरूपं त्रिविधमुच्यते। लिङ्गे च त्रिविधे सति तदालम्बनज्ञानमुपचारात् त्रिविधमभिधीयते। तेन प्रत्यक्षपूर्वकं त्रिविधलिङ्गालम्बनज्ञानमनुमानमित्युक्ते सति नातिव्याप्तिः।

पूर्ववदादिशब्दार्थविचारः

ननु पूर्ववदादिभिः शब्दैः कार्यादिभेदवर्णनं ज्ञास्यामः। पक्षधर्मादिरूपत्रयन्तु कथमेभिः शब्दैः प्रतिपाद्यते इति।

अत्राहुः, वादादिकथात्रयेऽपि पूर्वमुपादीयमानत्वात् पक्षः पूर्वशब्देनोच्यते, सोऽस्यास्त्याश्रयत्वेनेति पूर्ववल्लिङ्गमित्येवमनेन पदेन पक्षधर्मत्वमुक्तं भवति। पक्षे उपयुक्ते सति शेषः सपक्षो भवति, सोऽस्यास्त्याश्रयत्वेनेति शेषवत्, एवमनेन सपक्षे वृत्तिरुक्ता भवति। सामान्यतोदृष्टमित्यनेन विपक्षाद्व्यावृत्तं लिङ्गमुच्यते। कथम्? अकारप्रश्लेषात् सामान्यतोऽदृष्टमिति। तिष्ठतु तावद्विशेषः सामान्यतोऽपि न दृष्टम्, क्वेति पक्षसपक्षयोर्वृत्तेरुक्तत्वात् परिशेषाद्विपक्षे सामान्यतोऽपि न दृष्टमित्यवतिष्ठते। इत्थं त्रिरूपं लिङ्गमेभिः शब्दैरुक्तं भवति, तदालम्बनं ज्ञानमनुमानम्।

तदेवं लक्षणे कश्चित् सर्वं सूत्रमयोजयत्।
एवन्तु ख्यापितं न स्यात् सूत्रकारस्य कौशलम्॥

किञ्च पञ्चलक्षणमिह शास्त्रेऽभ्युपगम्यत इति त्रिरूपे तस्मिन् वर्ण्यमाने कालात्ययापदिष्टप्रकरणसमयोः प्रसङ्गो न व्यावर्तते इति, तस्मात् तत्पूर्वकपदमेव लक्षणप्रतिपादनार्थमनवद्यम्।

त्रिविधग्रहणं तस्य विभागप्रतिपादकम्।
भेदाः पूर्ववदित्यादिग्रन्थेन कथितास्त्रयः॥
तत्पूर्वकपदोद्गीतनिर्मलन्यायलक्षणाः।
परिम्लानादरोऽन्यत्र सूत्रकृद्वाक्यलाघवे॥
विभागवचनात् सिद्धं त्रैविध्यं स्वगिरा भवेत्।
तथा च सिद्धशब्दान्तच्छलेष्वेवमदीदृशत्॥

पूर्ववदनुमानविषये विचारः

पूर्ववदिति यत्र कारणेन कार्यमनुमीयते, यथा जलधरोन्नत्या भविष्यति वृष्टिरिति ।

अत्र चोदयन्ति, पूर्वं हि कारणमुच्यते, पूर्वमस्यास्तीति पूर्ववत् कार्यं युक्तम्, तेन कार्यात् कारणानुमानमिहोदाहर्त्तव्यम्, न कारणात् कार्यानुमानम् । न च कारणेन कार्यमनुमातुमपि पार्यते । कार्यस्य तावत् पक्षत्वमयुक्तम्, सिद्धयसिद्धिविकल्पानुवृत्तेः । सिद्धे हि कार्ये किमन्यदनुमेयम् । असिद्धे खपुष्पवन्न पक्षत्वम् । अपि चास्ति कार्यम् कारणस्यास्तित्वादिति व्यधिकरणो हेतुः, अनित्यः शब्दः काकस्य कार्ष्ण्यादितिवत् । सत्तायाञ्च साध्यायां भावधर्मस्य हेतोरसिद्धत्वम्, अभावधर्मस्य विरुद्धत्वम्, उभयधर्मस्यानैकान्तिकत्वमिति कथं साधयितुं शक्यते ? तदुक्तम्,

नासिद्धे भावधर्मोऽस्ति व्यभिचार्यभयाश्रयः ।
धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम् ।। इति ।

न च कारणमात्रस्य हेतुत्वं युक्तम्, विना च प्रतिबन्धादिना व्यभिचारसम्भवात् । कारणविशेषश्च न कश्चिद्विपश्चितापि निश्चेतुं शक्यः, चलदचलविपुलवपुषामुत्पलदलमलीमसत्विषामपि पयोमुचाममुक्तपयसामुपरमदर्शनात् ।

यदि त्वन्त्यदशावर्ति कारणं लिङ्गमिष्यते ।
व्याप्तिस्मरणवेलायां कार्यप्रत्यक्षता भवेत् ।।

ननु सौगतैरपि कारणात् कार्यानुमानमङ्गीकृतमेव ।

हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षित्वात् स स्वभावोऽनुवर्णितः ।। इति ।

भावधर्मस्य हेतोरसिद्धत्वमिति । यावत् तस्य सत्ता न सिद्धा तावत् धर्मो हेतुः कथं भावधर्मो भवेत् । अभावधर्मस्य विरुद्धत्वम्, न ह्यभावधर्मेण भावः साधयितुं शक्यते प्रत्युत तस्याभावसाधकत्वात् ।

हेतुना यः समग्रेणत्यस्योत्तरमर्धम् 'अर्थान्तरानपेक्षित्वात् स स्वभावोऽनुवर्णितः' इति ।।

ग्रन्थज्ञो देवानाम्प्रियः। उत्पाद्यतेऽस्मादित्युत्पादो योग्यता कथ्यते। सा चात्रानुमेया। अत एव तस्य वस्तुनोऽनन्यत्वात् स्वभावानुमानमिदमिष्यते, स स्वभावोऽनुवर्णित इति।

अत्राहुः, सर्वमिदमविदितानुमानप्रयोगक्रमस्य दुर्मतेश्चोद्यम्। न कार्यमत्र पक्षीक्रियते, न सत्ता साध्यते, न व्यधिकरणो हेतुः प्रयुज्यते, अपि तु पयोधरा एव धर्मिणोऽदूरकालभाविन्या वृष्टया तद्वन्तः साध्यन्ते विशिष्टोन्नतिरूपधर्मादियोगेनेति न पूर्वकथितदोषावसरः, यथा अग्निमानयं धूमः बहुलपाण्डुतादिधर्मयोगित्वान्महानसावधूतधूमवदिति, धूम एवाग्निमत्तयानुमीयते। एवं समनन्तरोत्पादितवृष्टयोऽमी जीमूताः सातिशयोन्नत्यादिधर्मयोगित्वात् पूर्वोपलब्धपर्जन्यवद् इति जलधरा एव भविष्यद्वृष्टिमत्तयानुमीयन्ते। यथाह भट्टः

तस्माद्धर्मविशिष्टस्य धर्मिणः स्यात् प्रमेयता।
सा देशस्याग्नियुक्तस्य धूमस्यान्यैश्च कल्पिता॥ इति।

यत्तु पूर्वं कारणमुच्यते इति, तत् सत्यम्। पूर्वमस्यास्तीति पूर्ववत्, कारणगतमुन्नतत्वादिधर्मजातमुच्यते, तदेव लिङ्गमिति ग्रन्थदोषोऽपि न कश्चित्। न च कारणमात्रस्य हेतुत्वं ब्रूमो येनास्य विधुरप्रत्ययोपनिपातादिकृतो व्यभिचारः स्यात्। अपि च विशिष्टमेव कारणं हेतुः, न च कारणविशेषो दुरवगमः।

गम्भीरगर्जितारम्भनिर्भिन्नगिरिगह्वराः।
रोलम्बगवलव्यालतमालमलिनत्विषः॥

त्वङ्गत्तटिल्लतासङ्गपिशङ्गोत्तुङ्गविग्रहाः।
वृष्टिं व्यभिचरन्तीह नैवं प्रायः पयोमुचः॥

अनभ्युपगमे चैवमनुमानस्य जीवितम्।
न स्याद्धर्मविशेषाणामपि बोद्धुमशक्तितः॥

यदपि कार्यप्रत्यक्षत्वमाशङ्कितम् तदप्ययुक्तम्। न ह्यत्र वृष्टयनुमानसमय एव शिरसि सलिलकणाः पतन्तः पयोदमुक्ता दृश्यन्ते। परोक्षे लिङ्गिनि ज्ञानमनुमान-

---

धूमस्यान्यैश्च कल्पिता सा प्रमेयता 'अग्निमानयं धूमः' इति।
रोलम्बो भ्रमरः। **गवलं** महिषशृङ्गम्।

मिति च विशेषणोपादानात् यत्र यत्र न तदानीमेव वृष्टिः प्रत्यक्षीभवति तदुदाहरणं भविष्यति। अपि च अनुपजातावयवक्रियतया अनाशङ्क्यमानविनाशेऽन्त्यतन्तौ जातया क्रियया पटनिष्पत्त्यनुमाने क्रियमाणे पटप्रत्यक्षताकाले व्यवधानसम्भवात्। तथा हि एकतस्तावत् अन्त्यतन्तौ क्रियावमर्शनम्, अविनाभावस्मरणम्, परामर्शज्ञानम्, अनुमेयप्रतीतिरिति त्रिचतुराः क्षणाः। अन्यतस्तु क्रिया, क्रियातो विभागः, विभागात् पूर्वसंयोगनिवृत्तिः, तत उत्तरसंयोगोत्पादः, ततः पटनिष्पत्तिः, निष्पन्ने पटे क्षणान्तरे रूपादिगुणारम्भः, रूपादिजन्मनि पटस्य समवायिकारणत्वात् कारणस्य कार्यादवश्यं पूर्वकालभावित्वम्, अतो निष्पन्नोऽपि नूनमेकस्मिन् क्षणे नीरूपः पटो भवतीति न तदैव प्रत्यक्षः, ततः क्षणान्तरे रूपोत्पादाद् रूपवद् द्रव्यमिन्द्रियसन्निकर्षात् प्रत्यक्षं भविष्यतीत्यतिबहव एते क्षणाः, अतो न कार्यप्रत्यक्षत्वम्। नापि विधुरप्रत्ययादिना कार्यानुत्पत्तिरनुत्पन्नावयवक्रियात्वविशेषणोपादानेन तद्विनाशानाशङ्कनात्, क्रियातश्चोत्तरोत्तरकार्याणामवश्यम्भावित्वात्।

यदपि 'हेतुना यः समग्रेणे'त्यादिना योग्यतानुमानं व्याख्यातम् तदप्यसाधु। स्वभावानुमानस्य निरस्तत्वात्। लोकश्च कारणादविकलात् कार्यमेव कल्पयति न योग्यतामित्यलं प्रसङ्गेन।

शेषवदनुमानस्वरूपविचारः

शेषवदिति यत्र कार्येण कारणमनुमीयते, यथा नदीपूरेणोपरितने देशे वृष्टिरिति। अत्रापि वृष्टिमदुपरितनदेशसंसर्गलक्षणो नदीधर्मः तद्धर्मेणैव विशिष्टेन पूर्णतादिनानुमीयते, वृष्टिमत्पृष्ठदेशसंसृष्टेयं नदी, फेनिलकलुषत्वादिविशिष्टपूरोपेतत्वात्, पूर्वोपलब्धैवंविधधुनीवत्। अयं देशो वा वृष्टिविशिष्टदेशान्तरसंसृष्टो विशिष्टनदीपूरवत्त्वेनानुमीयत इति प्राक्तनवैयधिकरण्यादिचोद्यचक्रस्येहापि नास्ति प्रसरः। फलतस्त्वियं वाचोयुक्तिः कार्येण कारणमनुमीयत इति। परमार्थतस्तु धर्मी धर्मवत्त्वेन धर्मवाननुमीयत इति स्थितिः। यदाह भट्टः:

स एव चोभयात्मायं गम्यो गमक एव च।
असिद्धेनैकदेशेन गम्यः सिद्धेन बोधकः॥ इति।

क्रियावमर्शनमिति। उत्पन्नामन्त्यतन्तुक्रियां यदा अवमृशति 'अन्त्यतन्तुक्रियेयम्' इति तदा तदनन्तरमसकृत् पटोत्पत्तिदर्शनादविनाभावसम्बन्धस्मरणम्। धुनी नदी।

यत्तु सेतुभङ्गहिमविलयनादिनापि नदीपूरोपपत्तिर्दृष्टेति, तत्राप्युच्यते

आवर्त्तवर्त्तनाशालिविशालकलुषोदकः ।
कल्लोलविकटास्फालस्फुरत्फेनच्छटाञ्चितः ॥
वहद्बहलशैवालवनशाद्वलसंकुलः ।
नदीपूरविशेषोऽपि शक्येत न निवेदितुम् ॥
प्रमातुरपराधोऽयं विशेषं यो न पश्यति ।
नानुमानस्य दोषोऽस्ति प्रमेयाव्यभिचारिणः ॥
रोधोपघातसादृश्यव्यभिचारनिबन्धनम् ।
अनुमानाप्रमाणत्वमतो वक्तुमसाम्प्रतम् ॥
पारम्पर्येण वृष्टिश्च नदीपूरस्य कारणम् ।
पतद्घनपयोबिन्दुसंदोहस्पन्दनक्रमात् ॥

सामान्यतोदृष्टानुमानस्वरूपम्

सामान्यतोदृष्टन्तु यदकार्यकारणभूताल्लिङ्गात्तादृशस्यैव लिङ्गिनोऽनुमानम् । यथा कपित्थादौ रूपेण रसानुमानम् । रूपरसयोः समवायिकारणमेकं कपित्थादि द्रव्यं न तु तयोरन्योन्यं कार्यकारणभावः । शाक्यदृष्टयापि वर्त्तमानयोः क्षणयोरितरेतरकार्यकारणता न सम्भवत्येव । धर्मिणश्च रूपवत्त्वेन रसवत्तानुमानाद् असिद्धादिचोद्यानां पूर्ववदनवकाशो वक्तव्यः । यत्पुनर्भाष्यकारेण भास्करस्य देशान्तरप्राप्त्या गत्यनुमानमुदाहृतं तदयुक्तम्, देशान्तरप्राप्तेर्गतिकार्यत्वात् कार्येण कारणानुमानं शेषवदेवेदं स्यात् ।

आवर्त्तेति । आवर्त्तानां या वर्त्तनाः सम्पादनास्ताभिः शालि श्लाघ्यशीलं यदुदकम् ।

रोधोपघातेत्यनेन पूर्वपक्षसूत्रं 'रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम्' इति सूचितम् । यदि नदीपूराद् वृष्ट्यनुमानं तदसौ रोधात् सेतुभङ्गादपि भवति; यदि पिपीलिकाण्डसञ्चाराद् भविष्यद्वृष्ट्यनुमानं तदसौ रथाद्युपघातादपि भवति; यदि च केकारवाद् मयूरानुमानं तदसौ पुरुषेणानुक्रियमाणोऽपि तत्सदृशो भवतीति ।

अपि च देशान्तरप्राप्तिर्देशान्तरसंयोगः, न च दशशतांशोर्देशान्तरेण शैलादिना संयोगः सम्भवति, नभसा तु भवन्नपि दिशा वा दुर्लक्ष्यः, प्रत्यक्षेतरवृत्तित्वात् पवनवनस्पतिसंयोगवत् मातृगर्भसंयोगवद्वा ।

अथ देशान्तरे तरणिदर्शनं हेतुरुच्यते, तस्यापि गतिकार्यता पारम्पर्येण विद्यते एव, गत्या प्राप्तिः प्राप्त्या च तत्र दर्शनमिति । अथ देशान्तरे उपवने दर्शनं पक्षीकृत्य दर्शनत्वेन च दर्शनशब्दवाच्यत्वेन च वा तस्य गतिपूर्वकत्वमनुमीयते देशान्तरे दिवाकरदर्शनं गतिपूर्वकं देशान्तरदर्शनत्वात् तच्छब्दवाच्यत्वाद्वा देवदत्तदेशान्तरदर्शनवदिति, तथाऽपि पारम्पर्येण गतिकार्यता न निवर्त्तते एव । न हि दर्शनत्वं गोत्वादिवत् सामान्यमस्ति किन्तु भावप्रत्ययेनात्र दर्शनोत्पादिका शक्तिरुच्यते सा च नातीन्द्रिया नित्या काचिद्, अपि तु स्वरूपसहकारिस्वभावैवेति । दृश्यमानञ्च देशान्तरप्राप्त्यात्मकमिति गतिकार्यम् । एवं दर्शनशब्दवाच्यत्वेऽपि हेतूकृते वक्तव्यम्, गत्या देशान्तरप्राप्तिर्जन्यते, तया तत्र दर्शनम्, तेन शब्दप्रयोगः, स एव भावप्रत्ययेनोक्तः । तस्मात् सर्वथा गतिकार्यत्वानपायाच्छेषवदेवेदमनुमानम् ।

तदेतद्भाष्यकारीयमुदाहरणमीदृशम् ।
रूपाद्रसानुमानन्तु तस्माद्युक्तमुदाहृतम् ॥
अकार्यकरणप्रायहेतूनाञ्च प्रदर्शितः ।
भदन्तकलहेऽस्माभिरुदाहरणविस्तरः ॥

प्रकारान्तरेणानुमानत्रैविध्यम्

एवं तावन्मतुव्याख्यया त्रैविध्यमनुमानस्य वर्णितम्, एतत्तु फल्गुप्रायमिव मन्यन्ते । नियमात्मकसम्बन्धबलादेव लिङ्गस्य गमकत्वमुक्तं न कार्यादिस्वरूपेण, तत् किमीदृशत्रैविध्येन दर्शितेनेति । वतिप्रत्ययमाश्रित्यान्यथा व्याचक्षते, पूर्ववदिति । अत्र सम्बन्धग्रहणकाले लिङ्गलिङ्गिनोः प्रत्यक्षतः स्वरूपमवधार्य पुनस्तादृशेनैव लिङ्गेन तादृगेव लिङ्गी गम्यते, तत्पूर्वेण तुल्यं वर्तते इति पूर्ववदनुमानम् यथा महानसे धूमाग्नी सहचरितौ दृष्ट्वा पुनः पर्वते धूमाग्न्यनुमानम् ।

देशान्तरेण शैलादिना संयोगः सम्भवतीति । अतिदूरवर्तित्वात् सूर्यस्येति भावः ।

स एव भावप्रत्ययेनोक्तः । तत्र दर्शनशब्दप्रयोगे सति 'तच्छब्दवाच्योऽयम्'

ननु प्रत्यक्षप्रतीत्या विषयगतसकलविशेषसाक्षात्करणक्षमया तुल्या नानुमानिकी मतिरिति कथं क्रियातुल्यत्वम् ? तदभावात् ? कथं वतिः ? सत्यमेवम् । तथापि वह्नेरेव तादृशस्य वैलक्षण्यापादकविशेषावच्छिन्नस्य लिङ्गेन ग्रहणाददूरविप्रकर्षेण क्रियातुल्यत्वमुपपत्स्यते, शेषवन्नाम परिशेषः । स च 'प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणसम्प्रत्ययः', यथा क्वचित् प्रदेशे धूमेनाग्निमात्रेऽनुमिते किमिन्धनोऽयमग्निरिति विमर्शे प्रसक्तानां तृणपर्णकाष्ठादीनां प्रतिषेधान्मृत्पाषणादीनामप्रसङ्गाच्च गोमयेन्धनोऽग्निः परिकल्प्यते । यथा वा शब्दे द्रव्यकर्मत्वप्रतिषेधात् सामान्यादावप्रसङ्गाच्च गुणत्वानुमानं वक्ष्यते । सामान्यतोदृष्टन्तु यत्र सम्बन्धकालेऽपि लिङ्गस्वरूपमप्रत्यक्षं नित्यपरोक्षमेव सामान्यतो व्याप्तिग्रहणादनुमीयते । यथा शब्दाद्युपलब्ध्या श्रोत्रादि करणम् । इद्रियाणामतीन्द्रियत्वान्न कदाचित् प्रत्यक्षगम्यत्वम् । अथ च च्छेदनादिक्रियाणां परश्वधादिकरणपूर्वकत्वेन व्याप्तिग्रहणाच्छब्दाद्युपलब्धिक्रियाणां करणपूर्वकत्वमनुमीयते ।

तत्र शङ्का तत्समाधानञ्च

अत्र वतिव्याख्याने चोदयन्ति, पूर्ववदेव एकमनुमानमुक्तं स्यान्न त्रिविधम्, यतो न तावदनवगतव्याप्तिकं लिङ्गं गमकं भवति विशेषाणामनन्तत्वेन च तदन्वयव्यतिरेकयोर्दुरवगमत्वात् सर्वत्र सामान्येनैव व्याप्तिग्रहणम् । यच्चेत्थं व्याप्तिज्ञानं तत्तुल्यं त्रितयेऽपि । अतः सर्वं पूर्ववदेव स्याद्वतेः सर्वत्र सम्भवात् ।

तदेतदयुक्तम् । अवान्तरविशेषस्य सुस्पष्टस्य भावात्, व्याप्तिपूर्वकमनुमानमित्येतावता यद्येकविधमुच्यते, तत् सत्यम् । एवम्प्रकारमेवेदम्, तस्मिन् सत्यपि तु साम्ये भेदान्तरसम्भवात् त्रैविध्यमस्य प्रतिपाद्यते । तथा हि धूमज्वलनयोः पूर्वं प्रत्यक्षेण ग्रहणादिदानीं तेनैव धूमेन स एवाग्निरनुमीयते इति पूर्ववदिदमनुमानमुच्यते यत् प्रत्यक्षपूर्वकमिति प्रसिद्धम् ।

ननु धूमान्तरेण वह्न्यन्तरानुमानं किं न प्रत्यक्षपूर्वकम् ? क एवमाह न पूर्ववदिति ? कथं तर्हीदमुच्यते ? तेनैव धूमेनेति जात्यभिप्रायमेतदुच्यते न व्यक्त्यभिप्रायम् ।

इति शब्दप्रयोगात् । **तदभावे कथं वतिः ।** "तेन तुल्यं क्रिया चेद्वतिः" इति क्रियातुल्यत्वे वतेः स्मरणात् ।

ननु सामान्यतस्तर्हि तत्परिच्छेदात् सामान्यतोदृष्टमेवेदं स्यात् ? न । सामान्यतोदृष्टस्य नित्यपरोक्षानुमेयैकविषयत्वात्, प्रसक्तप्रतिषेधादिना च नियतसाध्यपरिच्छेदहेतुः परिशेषानुमानमुच्यते । यथा गोमयेन्धनदहनानुमानमुदाहृतम्, शब्दे वा गुणत्वकल्पनम् । सामान्यतोदृष्टन्तु नित्यपरोक्षविषयमुदाहृतमेव श्रोत्राद्यनुमानम्, तदेवं भेदसम्भवात् त्रिविधमनुमानमिति युक्तम् ।

आस्तां वा उदाहरणभेदः । एकत्राप्युदाहरणे त्रैविध्यमभिधातुं शक्यते, यथा इच्छादिकार्यमाश्रितं कार्यत्वाद् घटवद् इत्याश्रयमात्रे साध्ये पूर्ववदनुमानम् । प्रसक्तशरीरेन्द्रियाद्याश्रयप्रतिषेधेन विशिष्टाश्रयकल्पने तदेव परिशेषानुमानम् । अनुमेयस्य नित्यपरोक्षत्वात् तदेव सामान्यतोदृष्टञ्च ।

सामान्यतोदृष्टशेषवदनुमानयोरविशेष इति शङ्कायाः समाधानम्

ननु परिशेषस्य सामान्यतोदृष्टस्य च को विशेषः ? उच्यते परिशेषानुमानप्रवृत्तावन्यः पन्थाः सामान्यतोदृष्टस्यान्यः । इच्छादिकार्यं देहादिविलक्षणाश्रयं शरीरादिषु बाधकप्रमाणोपपत्तौ सत्यां कार्यत्वादिति सामान्यतोदृष्टस्य क्रमः । परिशेषानुमानस्य तु इत्थं प्रवृत्तिः, इच्छादेराश्रयत्वेन प्रसक्तानि शरीरेन्द्रियमनांसि निषिध्यन्ते, दिक्कालादौ च तत्प्रसङ्गो नास्ति, तत्पारिशेष्यादात्मैव तदाश्रय इति । परिशेषानुमाने च सर्वत्र नैष नियमः साध्यस्यातिपरोक्षत्वमिति गोमयाग्निकल्पनादिदर्शनात्, सामान्यतोदृष्टन्तु नित्यपरोक्षविषयमेवेति सूक्तं त्रैविध्यम् ।

क्रियानुमानवादः

अपरे पुनरदृष्टस्वलक्षणविषयं शक्तिक्रियानुमानं सामान्यतोदृष्टमुदाहरन्ति, देवदत्तादावपि क्रियायाः परोक्षत्वात् । चलतीति प्रत्यये हि न देवदत्तस्वरूपातिरिक्तक्रियातत्त्वप्रतिभासः ।

अपरे पुनरिति प्राभाकराः । अदृष्टं स्वलक्षणं स्वरूपं यस्य क्रियादेस्तददृष्टस्वलक्षणम्, अनवधृतस्वरूपमित्यर्थः । तथाहि यथा सत्यपि बीजे सलिलाद्यभावाद् अङ्कुरोऽभवन् बीजव्यतिरिक्तकारणान्तरापेक्ष इति गम्यते एवं सत्यपि देवदत्ते संयोगविभागौ कदाचिद् भवन्तौ कदाचिच्चाभवन्तौ देवदत्तव्यतिरिक्तकारणान्तरापेक्षाविति गम्यते । तस्य हीत्थमस्तित्वमात्रेणावगतिः, 'अस्ति किञ्चित् कारणान्तरम्' इत्येवंरूपेण क्रियादेर-

य एव देवदत्तात्मा तिष्ठन् प्रत्ययगोचरः ।
चलतीत्यपि संवित्तौ स एव प्रतिभासते ।।

अविरलक्षमुल्लसत् संयोगविभागप्रबन्धविषयत्वात्, चलतीति प्रत्ययस्य न सर्वदा तदुत्पादः, कथं तर्हि नित्यपरोक्षे क्रियास्वलक्षणेऽनुमानं क्रमते इति चेत्, कार्यस्य कादाचित्कत्वेन कारणपूर्वकत्वात् परिदृश्यमानस्य द्रव्यस्वरूपस्य कारणत्वे सर्वदा कार्योत्पादनप्रसङ्गात्, सर्वदा तत्स्वरूपसद्भावाद्, न च सर्वदा कार्यमुत्पद्यते इति तदतिरिक्तक्रियानुमानम् । एवं शक्तावपि द्रष्टव्यम् । क्रियाशक्तिस्वरूपस्य च नित्यपरोक्षत्वात् तददृष्टस्वलक्षणविषयमनुमानमुच्यते न तु विशेषविषयम्, विशेषे व्याप्तिग्रहणस्यासम्भवादिति ।

क्रियानुमानवादखण्डनम्

तदिदमनुपपन्नम्, परिस्पन्दरूपस्योत्क्षेपणादिभेदवतः कर्मणः चलत्यादिप्रतीतौ प्रकाशमानत्वेन प्रत्यक्षत्वाद् न तस्य नित्यानुमेयत्वम् । संयोगविभागालम्बनत्वे तु संयुज्यते विभज्यते इति प्रतीतिः स्याद् न चलतीति, यथाविषयं प्रत्ययोत्पादात् । संवेदनानुसारिणी च विषयव्यवस्था, अन्यथा घटप्रत्ययेऽपि परस्यालम्बनता स्यात् । संयोगविभागालम्बनत्वे सति तिष्ठत्यपि चलत् प्रत्ययः प्राप्नोति, तत्रापि संयोगविभागसम्भवात् । स्थाणौ च श्येनसंयोगविभागवति चलतीति प्रतिभासो

नुमानात्, अत एवादृष्टस्वलक्षणत्वम् । तथा च तट्टीका "अत्र केचिन्नीतिज्ञम्मन्या अनवधृतस्वलक्षणमेव क्वचिदनुमानेन सामान्यतो गृह्यत इति मन्यन्ते, तद्भ्रमापनयायेदमुक्तम् 'तत्तु द्विविधम्' इति । अदृष्टस्वलक्षणविषयमप्यनुमानमस्ति क्रियादिषु । कथं पुनरदृष्टस्वलक्षणे सम्बन्धिदर्शनम् ? उत्पत्तिमतः फलस्य दर्शनात्' इत्यादि । ननु मीमांसकभाष्यकृता देवदत्तस्य देशान्तरप्राप्तिं गतिपूर्विकां दृष्ट्वा आदित्येऽपि देशान्तरप्राप्त्या साक्षाद् विशेषरूपेणैव क्रियानुमानमुक्तम्, अतः कथमेवमुच्यते इत्याशङ्क्याह **न तु विशेषविषयमिति । विशेषे व्याप्तिग्रहणस्यासम्भवादिति ।** गतेर्नित्यपरोक्षत्वान्न कदाचित् प्रत्यक्षेण देशान्तरप्राप्त्या सह सम्बन्धग्रहणं तस्या इति । अदृष्टस्वलक्षणानुमाने तु सम्भवति सम्बन्धग्रहः; यथा अङ्कुरादि कार्यं सत्यपि बीजे कदाचिद् दृश्यमानं बीजातिरिक्तकारणान्तरापेक्षमिति दृष्टम्, एवं संयोगादि सत्यपि देवदत्ते कदाचिद् दृश्यमानं तदतिरिक्तकारणापेक्षीति भवति सम्बन्धग्रहः । शक्तावपि

भवेत् । अविरलतरुपजनप्रबन्धेऽपि भूतभाविनोः संयोगविभागयोः परोक्षत्वाद् वर्त्तमानयोर्ग्रहणम् । तौ च चलित्वाऽपि स्थिते देवदत्ते स्त इति तत्रापि कथं न चलतीति प्रत्ययः ।

निरन्तरञ्च संयोगविभागश्रेणिदर्शनात् ।
भूमावपि भवेद् बुद्धिश्चलतीति मनुष्यवत् ।।

अथ मनुषे यत्क्रियाजन्यत्वं संयोगविभागयोस्तत्रैव चलतीत्यादिबुद्धिर्नान्यत्र, देवदत्तक्रियया च तौ जन्येते न निष्क्रियया भूम्येति न तस्यां तथा प्रत्ययः । यद्येवं क्रियान्वयव्यतिरेकानुविधानात् क्रियालम्बन एवायं प्रत्ययो न संयोगविभागालम्बनः । तदालम्बनत्वे हि तयोर्द्वयवृत्तित्वाविशेषाद् विशेषे कारणं वाच्यम् येन पुरुष एवायं प्रत्ययो न भूमाविति, देवदत्तक्रियाजन्यत्वेन तु न विशेषो यतः क्रियायाः परोक्षत्वे सति तदेव न विद्मः, किमसौ देवदत्ताश्रया क्रिया किं वा भूम्याश्रितेति, संयोगविभागकार्यानुमानस्योभयत्रापि तुल्यत्वात् । न च देवदत्ते गच्छति भूमावनवरतवहद्वातसंयोगविभागवत्यपि वा तरङ्गिणीतीरपाषाणे चलतीति प्रत्ययो दृष्टः, तस्मात् क्रियाविषय एव चलतीति प्रत्ययो न संयोगविभागालम्बनः । संयोगविभागाग्रहणेऽपि च निरालम्बे विहायसि विहरति विहंगमे चलतीति संवेदनं दृश्यते, न च गगनसंयोगः प्रत्यक्षः प्रत्यक्षेतरवृत्तित्वाद् गन्धवहमहीरुहसंयोगवत्, विततालोकावयव्याकाशस्तत्संयोगश्च पत्त्रिणः प्रत्यक्ष इति चेन्नैतदेवम्—

दाहादेः कादाचित्कत्वात् कार्यत्वम्, कार्यश्च कारणं विना न सम्भवति, दृष्टस्य चाग्निस्वरूपस्य मन्त्रादिसन्निधाने व्यभिचाराददृष्टस्य कारणत्वकल्पना कार्यत्वबलादेव, इति कार्यमात्राच्छक्त्यनुमानम् । कार्यविशेषाच्च संयोगादेः क्रियानुमानम् । अथवा यथा भाट्टैर्व्याख्यातम् 'यत्र तेनैव धूमेन तस्यैवाग्नेरनुमानं तत् प्रत्यक्षतो दृष्टसम्बन्धम्, यत्र तु अन्येन विशेषेण सम्बन्धग्रहोऽन्यस्य चावगमस्तत् सामान्यतोदृष्टम्, तदनेन 'न तु विशेषविषयम्' इत्यादिना निराक्रियते । यो विशेषोऽनुमीयते तेन सह व्याप्तिर्न गृहीता, न चान्येन व्याप्तौ गृहीतायामन्यस्यानुमितिः, अतिप्रसङ्गादिति ।

विततालोकावयवीति । आकाशते आ समन्तात् प्रकाशत इति व्युत्पत्त्या आलोकावयविन एवाकाशत्वम् ।

तमालनीलजीमूतसमूहपिहिताम्बरे ।
निशीथे सान्धकारेऽपि चलत्खद्योतदर्शनात् ।।

न तत्रालोकावयवी न च कश्चन तिमिरावयवी वा विद्यते इति केन संयोगो गृह्यते विभागो वा । भूकम्पोत्पाते च जाते चलति वसुमतीति मतिरस्ति न तत्र संयोगविभागौ गृह्येते, बहुलनिशीथे च नतराम्, तस्मान्न संयोगाद्यालम्बना चलतीति मतिरपि तु क्रियालम्बनैवेति। न च नित्यपरोक्षा क्रिया अनुमातुमपि शक्या, कार्यस्य कारणपूर्वकत्वेन भवन्मते सम्बन्धग्रहणानुपपत्तेः, न हि ते द्रव्यस्वरूपं कारणमपि तु क्रियाविष्टम्, क्रियायाश्च परोक्षत्वान्न तदाविष्टद्रव्यग्रहणं सुघटमिति कारणत्वाग्रहणाद् घटादावपि दुर्घटा व्याप्तिप्रतीतिः । आत्मानुमाने तु नायं दोषः, घटादेः कार्यस्याश्रितस्य प्रत्यक्षमुपलम्भात्। तस्मान्न कार्यानुमेया क्रिया, न च संयोगानुमेया, 'संयोगान्तं कर्मे'ति न्यायाद् वर्त्तमानायाः क्रियायास्तेनानुमातुमशक्यत्वात्। क्रियानुमानवादश्च सामान्यलक्षणे विस्तरेण निरस्तः ।

शक्त्यनुमानवादप्रतिषेधः

एतेन शक्त्यनुमानमपि व्युदस्तं वेदितव्यम् । पुरा च सविस्तरमतीन्द्रियशक्तिनिराकरणं कृतमेव ।

तेनादृष्टक्रियाशक्तिस्वलक्षणमिति　　क्षमम् ।
नेदं　सामान्यतोदृष्टमिति　पूर्वोक्तमेव　तत् ।।
इति　मतुपि　वतौ　वा　प्रत्यये　वर्त्तमाने
त्रिविधमिदमिहोक्तं　　युक्तमेवानुमानम्　।
परकविरचितानां　　लक्षणानां　　त्वमुष्मिन्
सति　न　भवति　शोभा　भास्वतीवेन्दुभासाम् ।।
बौद्धोक्तप्रतिबन्धदूषणदिशा　तल्लक्षणं　दूषितं
भूयोदृष्टमितान्वयैककरणं　शोच्यं पुनः शाबरम् ।
सांख्यानान्तु कुतोऽनुमानघटनोपादानरूपा यत-
स्तेषांजातिरसौ च तद्विकृतिवद्भिन्नेति दुःस्थोऽन्वयः ।।

साङ्ख्यानान्तु कुतोऽनुमानघटनेति । तेषामुपादानरूपा जातिः, यथा घटादीनां मृदुपादानम्, सर्वेषु घटादिषु मृद्रूपतानुवृत्तेः, सैव तेषां जातिः सामान्यम् ।

अनुमानस्य त्रैकालिकविषयग्रहणसामर्थ्यम्

इदमिदानीं चिन्त्यते, यदेतदिन्द्रियादिसन्निकर्षजत्वादिना लक्षितमस्मदादिप्रत्यक्षं तत्किल प्रायशो वर्त्तमानकालविशिष्टवस्तुविषयम् । एवमिदमनुमानमपि किं तद्गोचरमेव, किं वा कालान्तरपरिच्छेदेऽपि क्षममिति, तदुच्यते, त्रिकालविषयमनुमानमिति, कस्मात् त्रैकाल्यग्रहात्, त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते, भूता नदीपूरेण वृष्टिरनुमीयते, सैव भविष्यन्ती मेघोन्नत्या, धूमेन वर्त्तमानोऽग्निरिति । अतश्च यन्मीमांसकैरुच्यते चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं नान्यदिति तदयुक्तम्, चोदनावत् प्रमाणान्तरस्याप्येवंजातीयकविषयत्वोपपत्तेः । प्रत्यक्षमपि योगिनां त्रिकालविषयमुक्तम्, अस्मदादीनामपि क्वचिदिति ।

कालासत्त्वादः

अत्र चोदयन्ति, काले सति त्रैकाल्यग्रहणं चिन्त्यम्, स एव तु दुरुपपादः, तदभावे कस्य वर्त्तमानादिविभागो निरूप्यते ।

न तावद् गृह्यते कालः प्रत्यक्षेण घटादिवत् ।
चिरक्षिप्रादिबोधोऽपि कार्यमात्रावलम्बनः ॥

न चामुनव लिङ्गेन कालस्य परिकल्पना ।
प्रतिबन्धो हि दृष्टोऽत्र न धूमज्वलनादिवत् ॥

यस्तु 'अयं घटोऽयं घटः' इत्यादिक एकाकारप्रत्ययः स तेषां मते साद्दश्यनिबन्धनो न सामान्यनिबन्धन इति । यदुक्तम् 'पिण्डसारूप्यमेव सामान्यम्' इति; सारूप्यावच्छिन्नः पिण्ड एवानुगतप्रत्ययहेतुरित्यर्थः । तच्चोपादानं प्रतिविकारमन्यच्चान्यच्चाभ्युपगन्तव्यम्, अन्यथा विकाराः परस्परं भिन्नास्तदुपादानं यद्यभिन्नमुपेयते तदा चाभिन्नात्मन्युपादाने भिन्नात्मनो विकारस्य कथं सम्भवः । तत्र ह्युपादाने योंऽशो नास्ति स चेद् विकारेऽभ्युपगम्यते तदा असत उत्पादात् सत्कार्यवादहानापत्तिः । तद्भिन्नात्मनो विकारस्य भिन्नात्मैवोपादानमभ्युपेयम् ।

प्रतिभासातिरेकस्तु कथञ्चिदुपपत्स्यते ।
प्रचितां काञ्चिदाश्रित्य क्रियाक्षणपरम्पराम् ॥
न चैष ग्रहनक्षत्रपरिस्पन्दस्वभावकः ।
कालः कल्पयितुं युक्तः क्रियातो नापरो ह्यसौ ॥
मुहूर्त्तयामाहोरात्रमासर्त्त्वयनवत्सरैः ।
लोके काल्पनिकैरेव व्यवहारो भविष्यति ॥
यदि त्वेको विभुर्नित्यः कालो द्रव्यात्मको मतः ।
अतीतवर्त्तमानादिभेदव्यवहृतिः कुतः ॥

एवमाक्षिप्ते सति--

कालासत्त्वप्रतिषेधे कालप्रत्यक्षतावादिनां मतम्

प्रत्यक्षगम्यतामेव केचित् कालस्य मन्वते ।
विशेषणतया कार्यप्रत्यये प्रतिभासनात् ॥
क्रमेण युगपत् क्षिप्रं चिरात् कृतमितीदृशः ।
प्रत्यया नावकल्पन्ते कार्यमात्रावलम्बनाः ॥

न हि विषयातिशयमन्तरेण प्रतिभासातिशयोऽवकल्पते ।

अरूपो नन्वयं कालः कथं गृह्येत चक्षुषा ।
रूपमेव तवारूपं कथं गृह्येत चक्षुषा ॥
कथं वा रूपवन्तोऽपि परोक्षाः परमाणवः ।
तस्मात् प्रतीतिरन्वेष्या किं निमित्तपरीक्षया ॥

ननु द्रव्येऽयं नियमो न रूपादौ, द्रव्येऽपि नायं नियमः यद्रूपवत् तत्प्रत्यक्षमिति, येन परमाणूनां तथाभावः स्यात्। किन्तु यत् प्रत्यक्षं तद्रूपवदिति। तदुक्तम्, 'त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वादीनी'ति। नेदं दैविकं वचनं यदनतिक्रमणीयम्। न च वच-

---

प्रचितां काञ्चिदाश्रित्येति। क्रियाक्षणपरम्परायाः प्रचितत्वेन बृद्धया 'चिरेण कृतम्' इति प्रत्ययः।

मुहूर्तयामाहोरात्रेति। 'मुहूर्तेन कृतम्' इत्यादिविकल्पानामपि कार्यमात्रालम्बनत्वम्; यथा सामान्यविकल्पस्य व्यक्तिमात्रालम्बनत्वं तद्वदेषामिति भावः।

नेन प्रत्यक्षत्वमप्रत्यक्षत्वं वा व्यवस्थाप्यते। प्रत्यक्षत्वं ह्यैन्द्रियकप्रतीतिविषयत्वमुच्यते, तच्चेदस्ति कालस्य नीरूपस्यापि प्रत्यक्षता केन वार्यते। रूपित्वं तद् द्रव्याणामस्तु तथा दर्शनात्,

न चानुद्घाटिताक्षस्य क्षिप्रादिप्रत्ययोदयः।
तद्भावानुविधानेन तस्मात् कालस्तु चाक्षुषः॥

स्वतन्त्र एव तर्हि घटादिवत् कस्मान्न गृह्यते काल इति चेद् वस्तुस्वभाव एष न पर्यनुयोगार्हः। रूपिद्रव्यविशेषणतां गतस्य तस्य ग्रहणं न दण्डादिवत् स्वतन्त्रस्यापीति, गगनादेस्त्वन्यविशेषणतयापि न ग्रहणमस्तीति तस्याप्रत्यक्षत्वं न त्वरूपत्वात्।

अथ वदेद् विशेषणस्यापि रूपवत एव दण्डादेः चक्षुषा ग्रहणं न कालादेरिति, तदयुक्तम्, अरूपस्यापि सामान्यादेर्विशेषणस्य चक्षुषा ग्रहणात्। द्रव्ये नियम इति चेद्, उक्तमत्र यदेव नयनकरणकावगमगोचरे संचरति तदेव चाक्षुषं रूपवदरूपं वा द्रव्यमद्रव्यं वेति। एवं गुरु द्रव्यमिति कार्तस्वरादौ प्रतिभासाद् गुरुत्वमपि प्रत्यक्षं न पतनानुमेयमेव।

तस्मात् स्वतन्त्रभावेन विशेषणतयापि वा।
चाक्षुषज्ञानगम्यं यत् तत्प्रत्यक्षमुपेयताम्॥

अत एव प्रत्यक्षः कालः। एवं समानन्यायत्वात् पूर्वापरादिप्रत्ययगम्या दिगपि प्रत्यक्षा वेदितव्येति।

कालासत्त्वप्रतिक्षेपे कालस्यानुमेयतावादिनां मतम्

अन्ये मन्यन्ते दण्डी देवदत्तो नीलमुत्पलमितिवद् विषयातिरेकस्याग्रहणात् प्रत्ययातिशयस्य च परोक्षकालपक्षेऽपि तत्कारणकस्योपपत्तेरनुमेय एव कालः।

अप्रत्यक्षत्वमात्रेण न च कालस्य नास्तिता।
युक्ता पृथिव्यधोभागचन्द्रमःपरभागवत्॥

अप्रतिभासमानोऽपि कालः संस्कार इवेन्द्रियसहचरितः प्रत्यभिज्ञां क्षिप्रादिप्रतीतिं जनयिष्यति। कुतश्च प्रत्यक्षलक्षणे महान् कलिः किं विषयभेदादेव प्रतिभासभेदः, उतोपायभेदादपीति तदलं पुनस्तद्विमर्दनेन।

प्रावरं मतमुपसंहृत्य 'अन्ये मन्यन्ते' इत्यादिनाचार्यमतमाह।

प्रमाणमिति निर्णीतं प्रत्यक्षं सविकल्पकम् ।
तस्मान्न कल्पनामात्रं चिरक्षिप्रादिसंविदः ॥

न च सम्परिदृश्यमानकरणविर्निर्मितत्वमुपपद्यते क्रियमाणस्य पटादेः कार्यस्य । तदुत्पादस्य च तन्तुतुरीवेमशलाकाकुविन्दादिकारणवृन्दस्य साम्येऽपि क्वचित्तूर्णं कृतं क्वचिच्चिरेण कृतमिति प्रतिभासभेददर्शनान्निमित्तान्तरं चिन्तनीयम् ।

ननु परिस्पन्दादिक्रियाभेद एवात्र निमित्तम्, कश्चित्परिस्पन्दश्चतुरः कश्चिन्मन्थर इति क्वचित् क्षिप्रबुद्धिः क्वचित् चिरबुद्धिरिति । नैतच्चारु । परिस्पन्दगतयोरपि चातुर्यमान्थर्ययोर्निमित्तान्तरकार्यत्वात्, परिस्पन्देऽपि चिरेण गच्छति शीघ्रं धावतीति चिरक्षिप्रादिप्रतीतिर्दृश्यते । आह न देवदत्तादिपरिस्पन्दनिबन्धनाः क्रमाक्रमादिप्रत्ययाः किन्तु ग्रहनक्षत्रादिपरिस्पन्दनिबन्धनाः । स एव च ग्रहतारादिपरिस्पन्दः काल इत्युच्यते, तत्कृत एवायं यामाहोरात्रमासादिव्यवहारः । तस्य स्वत एव भेदादौपाधिकभेदकल्पनाक्लेशो न भविष्यति । भेदपरिच्छेदे नालिकाप्रहरादिरुपाय इयती नालिका इयन्मुहूर्तम् इयान् प्रहर इति । तत्रैकस्मिन् मुहूर्ते प्रहरे वा निर्वर्त्यमानेषु बहुषु कार्येषु युगपदिति भवति मतिः, मुहूर्तान्तरापेक्षेषु क्रमेणेति । तस्माद् ग्रहादिपरिस्पन्द एव तैस्तैर्निमित्तैरुपलक्ष्यमाणप्रमाणः काल इति । कालविदश्च ज्योतिर्गणकास्त एवैनं बुध्यन्ते । तदसाम्प्रतम् । चन्द्रादिग्रहपरिच्छेदेऽपि क्रियादिप्रतीतिदर्शनात् ।

चिरेणास्तं गतो भानुः शीतांशुः शीघ्रमुद्गतः ।
उदिताविव दृश्येते युगपद् भौमभार्गवौ ॥

इति दृश्यते प्रतिभासः । न च ग्रहान्तरपरिस्पन्दकारणक एष शक्यते वक्तुमनवस्थाप्रसङ्गात् । तस्मान्न ग्रहादिपरिस्पन्दः कालः किन्तु वस्त्वन्तरम् यत्कृतोऽयं क्रमादिव्यवहारः ।

ननु भवत्कल्पितोऽपि कालः किं स्वत एव क्रमस्वभावः हेत्वन्तराद्वा ? स्वतस्तस्य तत्स्वभावत्वे कार्यस्यैव पटादेः परिदृश्यमानस्य तत्स्वाभाव्यं भवतु किं कालेन ? हेत्वन्तरपक्षे त्वनवस्था, तस्यापि हेत्वन्तरापेक्षत्वादिति ।

तदेतद्बालिशचोद्यम् । शुक्लगुणादावप्येवं वक्तुं शक्यत्वात् । गुणस्य स्वतः शुक्लस्वभावत्वे द्रव्यस्यैव तद भवतु किं गुणेन ? गुणान्तरकल्पने त्वनवस्थेति । अथ

तत्र तथा दर्शनान्नेदं चोद्यम्, तदिहापि समानम् । कार्येषु पटादिषु निमित्तान्तरकृतः क्रमादिव्यवहारः, निमित्तान्तरे निमित्तान्तरं न मृग्यमिति । तस्मादस्ति युगपदादिव्यवहारहेतुः कालः, अतश्चैवम्

दृष्टः परापरत्वस्य दिक्कृतस्य विपर्ययः ।
युवस्थविरयोः सोऽपि विना कालं न सिध्यति ।।

दूरतरदिगवच्छिन्नो देवदत्तादिः पर इति प्रतिभासते निकटदिगवच्छिन्नस्तु अपर इति । तदत्र न कालव्यतिरिक्तं कारणमुपपद्यते इत्यतोऽनुमीयते कालः । सचायमाकाशवत् सर्वत्रैकः कालः । यथा आकाशलिङ्गस्य शब्दस्य सर्वत्राविशेषाद् विशेषलिङ्गाभावाच्चैक आकाशः सर्वत्र तद्व्यवहाराद् विभुः, अवयवाश्रयानुपलम्भाद् निरवयवः, अनाश्रितश्च अनाश्रितत्वादेव द्रव्यम्, अत एवावयवविभागादिनाशकारणानुपपत्तेर्नित्य इति ।

उपाधिकृतकालत्रैविध्यप्रदर्शनम्

नन्वेवञ्चैकत्वात् कालस्य कुतो वर्त्तमानादिविभागः, तदभावात् कथं त्रिकालविषयमनुमानमुच्यते ? उच्यते । न तात्त्विकः कालस्य भेदो वर्त्तमानादिः किन्त्वसन्नप्यसौ व्यवहारसिद्धये केनचिदुपाधिना कल्प्यते । कः पुनरसावुपाधिः ? क्रियेति ब्रूमः ।

ननु तस्या अपि न स्वतो वर्त्तमानादिभेदः, तद्भावे वा सैव तथा भवतु किं कालेन ? मैवम् । उत्पत्तिस्थितिनिरोधयोगिफलावच्छेदेन नानाक्षणपरम्परात्मिकापि क्रियेत्युच्यते । सा वर्त्तमानादिभेदवती च । तथा हि, स्थाल्यधिश्रयणात् प्रभृति आ तदवतरणादुत्पद्यमानौदनाख्यफलावच्छेदात् क्रिया वर्त्तमानोच्यते, पचतीति तदवच्छेदाद् घटाकाशवत् कालोऽपि तावान् वर्त्तमान इत्युच्यते । अभिनिर्वृत्तफलावच्छेदात्मा परिस्पन्दसन्ततिरतीता भवति अपाक्षीदिति, तदवच्छेदात् कालोऽप्यतीत उच्यते । अनारब्धफलावच्छेदाद् भविष्यन्ती क्रियोच्यते पक्ष्यतीति, तथा कालोऽपीत्येवं

दृष्टः परापरत्वस्येति । दूरस्थोऽपि युवा अपरोऽप्रकृष्टकालत्वात् कालापेक्षया, दिगपेक्षयात्र पर एवासौ; निकटस्थोऽपि स्थविरः प्रकृष्टकालत्वात् कालापेक्षया तु परो दिगपेक्षया त्वपर एव सन् ।

उत्पत्तिस्थितिनिरोधेति । उत्पत्तियोगि उत्पद्यमानम्, स्थितियोगि उत्पन्नम्,

सोपाधिकः, काले एव वर्त्तमानादित्रयव्यवहारः। अतश्च यदुच्यते वृक्षात् पततः पर्णस्य भूतभविष्यन्तावध्वानौ दृश्येते न वर्त्तमानः, तस्माद् वर्त्तमानः कालो नास्तीति तदसम्बद्धम्,अध्वव्यङ्ग्यत्वाभावात् कालस्य। न ह्यध्वव्यङ्ग्यः कालभेदः किन्तु यथोक्तक्रमेण क्रियाव्यङ्ग्य एवेति क्रियापरिकल्पितभेदनिबन्धनश्चायं क्षणलवकाष्ठाकलानालिकामुहूर्त्तयामाहोरात्रमासर्त्वयनसंवत्सरयुगमन्वन्तरकल्पव्यवहार इत्यलं प्रसङ्गेन।

तिथ्यादिभेदावधारणञ्च वैदिककर्मप्रयोगाङ्गम्, पौर्णमास्यां पौर्णमास्यया यजेत अमावस्यायाममावस्यया यजेते'ति। एवं वसन्ताद्यृतुभेदोऽपि तदङ्गं 'वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः, शरदि वैश्यः वर्षासु रथकार' इति। स चायमृतुतिथ्यादिविभागः क्रिययैव ज्योतिःशास्त्रोपदिष्टविशिष्टराशिसंसृष्टचन्द्रादिग्रहगतया लक्ष्यते लौकिकेन च लक्ष्मणा तेन तेनेति, तद्यथा

चञ्च्वग्रचुम्बिताताम्रचूताङ्कुरकदम्बकैः।
कथ्यते कोकिलैरेव मधुर्मधुरकूजितैः॥
दिवाकरकरालातपातनिर्दग्धवीरुधः।
मार्गाः समल्लिकामोदा भवन्ति ग्रीष्मशंसिनः॥
शिखण्डमण्डनारब्धोद्दण्डताण्डवडम्बरैः।
प्रावृडाख्यायते मेघमेदुरैर्मेदिनीधरैः॥
मौक्तिकाकारविस्तारितारानिकरचित्रितम्।
शरत् पिशुनतां याति यमुनाम्भोनिभं नभः॥
आयामियामिनीभोगसफलाभोगविभ्रमाः।
हेमन्तमभिनन्दन्ति सोष्माणस्तरुणीस्तनाः॥

निरोधयोगि प्रागभावाक्रान्तं यत् फलम्। **अतश्च यदुच्यत** इत्यनेन 'वर्तमानाभावः पततः पतितव्यपतितकालोपपत्तेः' इति सूत्रं सूचयति। अतिक्रान्तेनाध्वना यः सम्प्रयुक्तोऽतीतकालः, अनागतेनाध्वना यः सम्प्रयुक्तस्तच्छेषः, तृतीयस्याध्वनोऽभावात् किंसम्प्रयुक्तो वर्तमानः स्यादित्यध्वव्यङ्ग्यकालवाद्यभिप्रायः।

आयामियामिनीति। आयामी दीर्घो यो यामिनीनां रात्रीणां भोगः विस्तरस्तेन हेतुना सफलः सप्रयोजनः आभोगविभ्रमः परिणाहाश्रयो गुणविशेषो येषाम्।

आस्कन्दनदलत्कुन्दकलिकोत्करदन्तुराः ।
वदन्ति शिशिरं वातास्तुषारकणकर्कशाः ॥
तस्मादेकोऽप्ययं कालः क्रियाभेदाद् विभिद्यते ।
एतेन सदृशन्यायान्मन्तव्या दिक् समर्थिता ।

प्रसङ्गात् कालवदेवदिशः सिद्धिरिति प्रदर्शनम्

पूर्वपश्चिमादिप्रत्ययानां केवलवृक्षादिप्रत्ययवैलक्षण्येन कारणान्तरानुमानात्। दिग्लिङ्गाविशेषादेकत्वेऽपि दिशो दशविधाः। प्रदक्षिणावर्त्तपरिवर्त्तमानमार्तण्डमण्डलमरीचिनिचयचुम्ब्यमानकाञ्चनाचलकटकसंयोगोपाधिकृतः पूर्वपश्चिमादिभेदः कल्प्यते पूर्वा पूर्वदक्षिणा दक्षिणा दक्षिणपश्चिमा पश्चिमा पश्चिमोत्तरा उत्तरा उत्तरपूर्वा अधरतनी ऊर्ध्वा चेति। देवतापरिग्रहवशाच्च पुनरेषैवदिग् दशधोच्यते ऐन्द्री आग्नेयी याम्या नैर्ऋती वारुणी वायव्या कौबेरी ऐशानी नागीया ब्राह्मी चेति।

ननु च येनैव प्रत्ययेन प्रत्यक्षेण लिङ्गेन वा सता दिक्कालाववगम्येते तेनैव तयोर्भेदग्रहणात् कथमेकत्वं तदवगमसमय एव तथा भेदप्रतिभासात्? उक्तमत्र सर्वत्र तत्प्रत्ययाविशेषादिति, व्यत्ययदर्शनाच्च यैवैकत्र पूर्वा दिक् सैवान्यत्र दक्षिणेति गृह्यते, 'प्राग्भागो यः सुराष्ट्राणां मालवानां स दक्षिण' इति। कालेऽपि चिरक्षिप्रादिविभागश्चाव्यवस्थित एव दृश्यते। यो हि अनागत इति परिस्फुरति कालः स एव वर्त्तमानीभवति, भूतो भवति च, तथा च चिरमपि शीघ्रीभवति शीघ्रमपि चिरीभवति। तस्मात् तद्भेदोऽप्यौपाधिक इति सिद्धम्।

समानतन्त्रे दिक्कालौ वैतत्येन विचिन्तितौ।
तन्नेह लिख्यते लोके द्वेष्या हि बहुभाषिणः॥

प्राग्भागो यः सुराष्ट्राणामित्यस्य 'प्राग्भागः पुनरेतेषां तेषामुत्तरतः स्थितः' इति शेषः। सुराष्ट्रवासिनो यदा पूर्वदिग्रेखात उद्यन्तमादित्यं पश्यन्ति तदा मालवा दक्षिणदिक्संस्थं पश्यन्ति; सुराष्ट्रोत्तरादअवस्थितत्वान्मालवानाम्। **स एव वर्तमानीभवतीति**। उक्तम्

अयमेव हि ते कालः पूर्वमासीदनागतः।
अवश्यम्भाविनं नाशं विद्युः सम्प्रत्युपस्थितम्॥ इति॥

सिद्धः कालश्चाक्षुषो लैङ्गिको वा तन्नानात्वं सिद्धमौपाधिकञ्च ।
तस्माद् युक्तं निश्चिकाय त्रिकालग्राहीत्येवं सूत्रकारोऽनुमानम् ॥

उपमाननिरूपणे वृद्धनैयायिकमतम्

अनुमानान्तरमुपमानं विभागसूत्रे पठितमिति तत्क्रमेण तस्य लक्षणमुच्यते ।

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ ६ ॥

अत्र वृद्धनैयायिकास्तावदेवमुपमानस्वरूपमाचक्षते, संज्ञासंज्ञिसम्बन्धप्रतीतिफलं प्रसिद्धेतरयोः सारूप्यप्रतिपादकमतिदेशवाक्यमेवोपमानम् । गवयार्थी हि नागरकोऽनवगतगवयस्वरूपस्तदभिज्ञमारण्यकं पृच्छति कीदृग् गवय इति स तमाह यादृशो गौस्तादृशो गवय इति । तदेतद् वाक्यमप्रसिद्धस्य प्रसिद्धेन गवा सादृश्यमभिदधत् तद्द्वारकमप्रसिद्धस्य गवयसंज्ञाभिधेयत्वं ज्ञापयतीत्युपमानमुच्यते ।

ननु शब्दस्वभावत्वादस्याप्तोपदेशः शब्द इत्यनेन गतार्थत्वान्नेदं प्रमाणान्तरं भवेत्, न च संज्ञासंज्ञिसम्बन्धपरिच्छेदफलत्वेन प्रमाणान्तरता वक्तव्या फलवैचित्र्येण प्रमाणानन्त्यप्रसङ्गात् । लौकिकानि हि वचनानि वैदिकानि च विधिनिषेधबोधकानि नानाफलान्यपि भवन्ति न शब्दतामतिक्रामन्ति ।

उच्यते यत्र शब्दप्रत्ययादेव तत्प्रणेतृपुरुषप्रत्ययादेव वा अर्थतथात्वमुपायान्तरानपेक्षमवगम्यते स आगम एव, ततस्तदर्थप्रतीतेः । यत्र तु पुरुषः प्रतीत्युपायमपरमुपदिशति तत्र तत एवोपायात्तदर्थावधारणम् । उपायमात्रावगमे तु शब्दव्यापारो यथा परार्थानुमाने अग्निमानयं पर्वतो धूमवत्त्वान्महानसवदिति । अत्र हि न पुरुषोपदेशविश्वासादेव शैलस्य कृशानुमत्तां प्रतिपत्ता निमित्तान्तरनिरपेक्षः प्रतिपद्यते अपि तु तदवबोधकधूमाख्यलिङ्गसामर्थ्यादेव । तदिह यद्याटविको नागरकाय गवयार्थिने तदवगमोपायं प्रसिद्धसाधर्म्यं नाभ्यधास्यत् तर्हि तदुपदेश आगमे एव अन्तरभविष्यत्, तदुपदेशात्तु तत एव तदर्थावगम इति सत्यपि शब्दस्वभावत्वे प्रमाणान्तरमेवेदम् । प्रतिपत्तापि नागरको नारण्यकवाक्यादेव तं प्राणिनं गवयशब्दवाच्यतया बुध्यते किन्तु सारूप्यं प्रसिद्धेन गवा तस्य पश्यति । किमारण्यकवाक्येन न सम्प्रत्ययो नागरकस्य ? न ब्रूमो नसम्प्रत्यय इति किन्तु सारूप्यमुपायान्तरम्, तदवगतावसावुपदिष्टवानिति ततोऽवगतिर्भवन्ती न निह्नोतुं शक्यते इति न शाब्दी सा प्रतीतिरपि

त्वौपमानिकीति वचनमपि भवदिदमुपमानं प्रमाणान्तरमिति युक्तम् । भाष्याक्षराण्यपि चैतत्पक्षसाक्ष्यच्छायामिव वदन्ति लक्ष्यन्ते । तानि तु ग्रन्थगौरवभयान्न योज्यन्ते इत्यलं प्रसङ्गेन ।

तत्रैव नव्यमतम्

अद्यतनास्तु व्याचक्षते श्रुतातिदेशवाक्यस्य प्रमातुरप्रसिद्धे पिण्डे प्रसिद्धपिण्डसारूप्यज्ञानमिन्द्रियजं संज्ञासंज्ञिसम्बन्धप्रतिपत्तिफलमुपमानम् । तद्धीन्द्रियजनितमपि धूमज्ञानमिव तदगोचरप्रमेयप्रमितिसाधनात् प्रमाणान्तरम्, श्रुतातिदेशवाक्यो हि नागरकः कानने परिभ्रमन् गोसदृशं प्राणिनमवगच्छति ततो वनेचरपुरुषकथितं 'यथा गौस्तथा गवय' इति वचनमनुस्मरति स्मृत्वा च प्रतिपद्यते 'अयं गवयशब्दवाच्य' इति । तदेतत् संज्ञासंज्ञिसम्बन्धज्ञानं तज्जन्यमित्युपमानफलमित्युच्यते ।

प्रत्यक्षं तावदेवैतद्विषये न कृतश्रमम् ।
वनस्थगवयाकारपरिच्छेदफलं हि तत् ॥
अनुमानं पुनर्नात्र शङ्कामप्यधिरोहति ।
क्व लिङ्गलिङ्गिसम्बन्धः क्व संज्ञासंज्ञितामतिः ॥
आगमादपि तत् सिद्धिर्न वनेचरभाषितात् ।
तत्कालं संज्ञिनो नास्ति गवयस्य हि दर्शनम् ॥

संज्ञासंज्ञिनोश्च परिच्छेदे सति तत्सम्बन्धः सुशको भवति नान्यथा, अत एव प्रत्यक्षपूर्वकं संज्ञाकर्मेत्याचक्षते ।

उपमानस्य प्रमाणान्तरत्वे शङ्का

एतदाक्षिपति

ननु नागरकप्रश्नमनुरुध्य वनेचरः ।
ब्रूतेऽतिदेशकं वाक्यं यथा गौर्गवयस्तथा ॥

भाष्याक्षराणीति । भाष्यकारो हि तत्र तत्र वाक्यमेवोपमानशब्देनाह "यथा गौरेवं गवय इत्युपमाने प्रयुक्ते" इत्यादौ ।

अस्यायमर्थो यस्य त्वं गोसादृश्यं निरीक्षसे ।
तमेव गवयं विद्याः स चायं संज्ञिनो ग्रहः ॥
सम्बन्धकारणञ्चेह विशेषेषु न युज्यते ।
आनन्त्यात् किन्तु सामान्ये तच्चेत्थमवधारितम् ॥
प्रत्यक्षपूर्वकं संज्ञाकर्मेति न हि वैदिकी ।
चोदना किन्त्ववच्छेदः संज्ञिनोऽत्र विवक्षितः ॥
स तु प्रत्यक्षतो वास्तु प्रमाणान्तरतोऽपि वा ।
स्मर्यमाणोऽपि चार्थोऽस्ति सङ्केते कारणं क्वचित् ॥
योऽसौ तत्र त्वया दृष्टः प्राणी स रुरुरुच्यते ।
क्वचित्तु कश्चिन्निर्दिश्य परोक्षमुपलक्षणैः ॥
संज्ञिनं व्यवहर्त्तारस्तत्र संज्ञां नियुञ्जते ।
दन्तुरो रोमशः श्यामो वामनः पृथुलोचनः ॥
यस्तत्र चिपिटग्रीवस्तं चैत्रमवधारयेः ।
एवमत्रापि गोपिण्डसारूप्येणोपलक्षिते ॥
वाच्ये वाचकसम्बन्धबोधनं नैव दुर्घटम् ।
अथ सोपप्लवा वाक्याद् बुद्धिरित्यभिधीयते ॥
उपप्लवोऽपि सम्बन्धे न कश्चिदनुभूयते ।
यस्त्वस्ति गवयाकारं प्रति कीदृगसाविति ॥
सोऽपि प्रत्यक्षतो दृष्टे गवये विनिवर्त्तते ।
प्रत्यक्षागमसिद्धेऽर्थे तस्मान्मानान्तरेण किम् ॥

उपमानस्य प्रमाणान्तरत्वव्यवस्थापनम्

अत्राहुः, नाटविकरटितवाक्याद्विस्पष्टः संज्ञासंज्ञिसम्बन्धप्रत्ययो भवितुमर्हति, संज्ञिनस्तदानीमप्रत्यक्षत्वात् । यद्यपि गोसारूप्यविशिष्टतया तदवगम उपपादितस्तथापि सोपप्लवेव भवति तदानीं बुद्धिः ।

न निराकाङ्क्षताबुद्धिस्तदानीमुपजायते ।
तदुत्पादनपर्यन्तः शब्दव्यापार इष्यते ॥

अथ सोपप्लवा अनिराकाङ्क्षा ।

न चासौ निर्वहत्यत्र वाच्यसंवित्त्यपेक्षणात् ।
शब्देन तदनिर्वाहान्न स्वकार्यं कृतं भवेत् ॥
सम्बन्धप्रतिपत्तिश्च सामान्ये यदि वेष्यते ।
तदप्यविदितव्यक्ति न सम्यगवधारितम् ॥
गवयाकारवृत्तिश्च तदानीं बुद्ध्युपप्लवः ।
सम्बन्धेऽपि द्व्यधिष्ठाने दधाति श्यामलां धियम् ॥
प्रत्यक्षपूर्वकं तस्मात् संज्ञाकर्मेति गीयते ।
क्वचित्तदेव प्रत्यक्षं स्मृतिद्वारेण कारणम् ॥
पूर्वदृष्टे कुरङ्गादौ सम्बन्धो दर्शितो यथा ।
चैत्रे प्रत्यक्षवत्सिद्धिर्दन्तुरादिविशेषणैः ॥

इह पुनरतिदेशवचनसमये गोसादृश्यमात्रोपदेशे सत्यपि संज्ञिनि न निवर्त्तते एवोपप्लवः प्रमाणान्तरपरिच्छेदसापेक्षकसंज्ञिरूपोपदेशात् । 'यत्र गोसादृश्यं पश्यसी'ति प्रत्यक्षादेव तर्हि उपप्लवो विरंस्यतीति चेद्, न । प्रत्यक्षस्येन्द्रियसन्निकर्षादिस्वभावस्य संज्ञासंज्ञिसम्बन्धबोधकरणासमर्थत्वात् ।

प्रत्यक्षफलमेतत्तु समर्थं सत्यमिष्यते ।
तस्यैव च वयं ब्रूम उपमानप्रमाणताम् ॥

यथा प्रत्यक्षफलमपि धरणिधरकुहरभुवि धूमदर्शनमनिन्द्रियविभावसुबोधसाधनत्वादनुमानम्, एवं गोसारूप्यविशेषितविपिनगतगवयपिण्डदर्शनमध्यक्षफलमपि तद् अनवगतसंज्ञासंज्ञिसम्बन्धबोधविधानादुपमानमुच्यते । यथा च तत्र पूर्वावगतधूमाग्निप्रतिबन्धस्मरणं सहकारितामुपैति तथा इहापि पूर्वश्रुतारण्यकवाक्यार्थस्मरणम् । यथा तत्र व्याप्तिवेलायामनालीढविशेषा बुद्धिरधुना पक्षधर्मताबलाद् विशेषे व्यवतिष्ठते अत्राग्निरिति तथात्राप्यनवगतवाच्यविशेषाद् वाक्याद् बुद्धिरिदानीं वाच्यविशेषे दृष्टे निरुपप्लवा जायते 'अयं स गवयशब्दाभिधेय' इति । नैतावतानुमानमेवेदमित्याशङ्कनीयम्, अनपेक्षितधर्मान्वयव्यतिरेकादिसामग्रीकस्य तत्प्रत्ययोत्पादात् ।

श्यामलापि तादृश्येव । (?)

तस्मादयं स गवयो नामेत्येवंविधा मतिः ।
उपमानैकजन्यैव न प्रमाणान्तरोद्भवा ॥

न चैषा नास्ति, सन्दिग्धा, बाध्यते, कल्पनामात्रं वेति सर्वथैतस्याः प्रमितेः साधनमुपमानं प्रमाणमिति सिद्धम् । तदिदमाह 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्' । प्रसिद्धसाधर्म्यादिति कर्मधारयः, तृतीयासमासः, बहुव्रीहिर्वा । प्रसिद्धञ्च तत् साधर्म्यम्, प्रसिद्धेन गवा वा साधर्म्यम्, गवयस्य प्रसिद्धं वा साधर्म्यं यस्य स प्रसिद्धसाधर्म्यो गवयः। तस्मात् प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् । साध्यः संज्ञिसम्बन्धः, तस्य साधनम् बोधनम्, संज्ञासंज्ञिसम्बन्धज्ञानं वा साध्यं तस्य साधनं जननमित्यर्थः । एवं प्रसिद्धसाधर्म्यज्ञानमुपमानम्, फलं संज्ञासंज्ञिसम्बन्धज्ञानमित्युक्तं भवति ।

साध्यसाधनशब्देन करणस्य प्रमाणताम् ।
ब्रवीत्येतच्च मन्तव्यं सर्वत्र परिभाषितम् ॥

अत एव मध्ये लिखितमिदं यदुभयतः प्रमाणलक्षणानि व्याप्स्यतीति ।

उपमानस्योपयोगविषये पूर्वपक्षस्तत्समाधानञ्च

अत्यन्तप्रायसाधर्म्यविकल्पादिनिबन्धनः ।
क्षिप्तः सूत्रकृतः साक्षादुपमानस्य विप्लवः ॥

येन सदृशप्रतीतिर्जन्यते तत्सदृशमिति किमत्यन्तसादृश्यादिविकल्पैः ?

अभिन्नप्रत्यये हेतुर्यथा सामान्यमुच्यते ।
सदृशप्रत्यये हेतुस्तथा सादृश्यमुच्यते ॥

ननूपमानलक्षणमस्मिन् मोक्षशास्त्रे क्वोपयुज्यते ? आगमात् तावदात्मज्ञानं मोक्षसाधनं सेतिकर्त्तव्यताकमवगम्यते, अनुमानादागमप्रामाण्यनिश्चयः, प्रत्यक्षादनुमानस्य व्याप्तिपरिच्छेद इति त्रयमेवोपदेष्टव्यम् । सत्यमेवम् । उपमानमपि क्वचिद् गवयालम्भादिचोदनार्थानुष्ठाने सोपयोगम्, अनवगतगवयस्वरूपे तदालम्भा-

---

अत्यन्तप्रायेति । 'अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः' इति सूत्रं लक्षयति । अत्यन्तसाधर्म्यादुपमानं न सिद्ध्यति, न हि भवति यथा गौरेवं गौरिति, प्रायःसाधर्म्यादपि, न हि भवति यथानड्वांस्तथा महिष इति, एकदेशसाधर्म्यन्तु सत्तापेक्षया सर्वेष्वस्तीति ।

भावात्, यथा मुद्गस्तम्भस्तथा मुद्गपर्णीति मुद्गपर्ण्याद्योषधिपरिज्ञानेऽपि तदुपयोगि भवति ।

सर्वानुग्रहबुद्ध्या च करुणार्द्रमतिर्मुनिः ।
मोक्षोपयोगाभावेऽपि तस्य लक्षणमुक्तवान् ।।

नन्वेवं सति यागौषधाद्युपयोग्यन्यदपि बह्वपदेष्टव्यं स्यात् । न । प्रमाणशास्त्रत्वादस्य प्रमाणमेवार्थपरिच्छित्तिसाधनमिहोपदिश्यते । तच्चतुर्विधमेव न न्यूनमधिकं वेति निर्णीतम् । प्रमेयन्तु मोक्षाङ्गमेवोपदिश्यते इत्यलं प्रसङ्गेन ।

मीमांसकाभिमतोपमानस्वरूपम्

जैमिनीयास्तु अन्यथोपमानस्वरूपं वर्णयन्ति । यदा श्रुतातिदेशवाक्यस्य वने गवयपिण्डदर्शनानन्तरं नगरगतं गोपिण्डमनुस्मरत एतेन सदृशी गौरिति ज्ञानं तदुपमानम् । तस्य विषयः सम्प्रत्यवगम्यमानगवयसादृश्यविशिष्टः परोक्षो गौः, तद्वृत्ति वा गवयसादृश्यम् । अत एव तज्ज्ञानं न प्रत्यक्षजन्यं परोक्षगोपिण्डविषयत्वात्, अश्रुतातिदेशवाक्यस्याभावान्न शाब्दम् ।

न च स्मरणमेवेदं प्रमेयाधिक्यसम्भवात् ।
गवयेन हि सादृश्यं न पूर्वमवधारितम् ।।
भूयोऽवयवसामान्ययोगो यद्यपि मन्मते ।
सादृश्यं तस्य तु ज्ञप्तिर्गृहीते प्रतियोगिनि ।।

न चानुमानिकमिदं ज्ञानमनपेक्षितपक्षादिधर्मादिकस्य भावात्, न च गवयगतं सादृश्यं तत्र लिङ्गमपक्षधर्मत्वात्, नापि गोगतमप्रसिद्धत्वात् प्रतिज्ञार्थैकदेशत्वाच्च, विषाणाद्यवयवजातमपि न गोगतं लिङ्गमिदानीं वनस्थस्य तद्ग्रहणा-

---

तस्य तु ज्ञप्तिर्गृहीते प्रतियोगिनीति । अमुकस्यायं सदृश इति द्वयोर्ग्रहणसापेक्षत्वात् सादृश्यप्रत्ययस्येति ।

गवयगतं सादृश्यमिति । न हि गोः पक्षीकृताया गवयगतं सादृश्यं धर्मः, तस्य गवयधर्मत्वात् । नापि गोगतमिति । गोगतं यद् गवयसादृश्यं 'गवयसदृशी सा' इति बुद्धिनिमित्तम्, तत् प्रागुपमानव्यापारादसिद्धम् । प्रतिज्ञार्थैकदेशत्व (अत्र ग्रन्थः खण्डितः) नापि कल्प्यमानं ग्रहणम् ।

भावात्, अगृहीतस्य च लिङ्गत्वानुपपत्तेः। गवयगतमपि तदलिङ्गमेव पूर्ववदपक्षधर्मत्वात्। तस्माद् गवयसादृश्यविशेषितनगरगतपरोक्षगोपिण्डज्ञानं काननवर्तिनः प्रमातुः प्रमाणान्तरं भवतीत्यभ्युपगन्तव्यम्।

तत्रानुपपत्तिप्रदर्शनम्

तदिदमनुपपन्नम्, एवंविधप्रतीत्यभावात्।

> प्रसिद्धेन हि सादृश्यमप्रसिद्धस्य गम्यते।
> गवा गवयपिण्डस्य न तु युक्तो विपर्ययः॥

तथा हि, अश्रुतातिदेशको नागरकः कानने परिभ्रमन् अदृष्टपूर्वं गोसदृशं प्राणिनमुपलभमान एवं बुद्ध्यते ब्रवीति च 'अहो नु गवा सदृश एष कश्चन प्राणी'ति, न त्वनेन सदृशो गौरिति ज्ञानमभिधानं वा तदानीं कस्यचिदस्तीति। अतः प्रमितेरेवाभावात् किं प्रमाणचिन्तया? भवतु वैषा बुद्धिरनेन सदृशो गौरिति तथापि स्मृतित्वान्न प्रमाणफलम्।

नन्वत्र गोपिण्डमात्रे सत्यं स्मृतिरेवैषा, सम्प्रत्यवगतगवयसादृश्यविशिष्टत्वन्तु तस्य पूर्वमनुपलब्धमधुनैव गम्यते इति न तस्मिन्नेषा स्मृतिः। मैवम्। गवयसादृश्यस्यापि तत्र पूर्वं ग्रहणात्।

नन्वनवगतगवयेन गवि गवयसादृश्यमवगतमिति चित्रम्, व्यक्तितिरस्कृतस्य ग्रहणात्।

नन्विदमपि चित्रतरं गृहीतञ्च व्यक्तितिरस्कृतञ्चेति। व्यक्तिर्हि ग्रहणमेव तत्तिरस्कारे च नास्त्येव ग्रहणम्। उच्यते। नैतदपि चित्रतरम्। तथाहि वने गवयमालोक्य नागरको, न करेणुमनुस्मरति न करभं, न तुरङ्गम्, अपि तु विशिष्टमेव पिण्डम्। न च निर्निबन्धनमेवेदं विशिष्टविषयस्मरणमुत्पत्तुमर्हति। तस्माद् यत्रैव परिदृश्यमानपिण्डसादृश्यं पूर्वमवगतं स एव पिण्डोऽस्मिन् दृश्यमाने स्मरणपथमवतरति नेतर इति। सादृश्यग्रहणमसंवेद्यमानमप्यनभ्यस्तविषयाविनाभावस्मृतिबलात् परिकल्प्यते। पूर्वञ्च गवयग्रहणाद् विना गवयसदृशीयं गौरिति ग्रामीणस्यानुभवो न भवतीति व्यक्तितिरस्कृतं तत्सादृश्यग्रहणमुच्यते इति न किञ्चिच्चित्रम्। तस्मात् स्मृतिरेवे-

यम् । तथा हि प्रतीतिः 'अनेन सदृशो गौर्मया नगरे दृष्टः' इति, नत्वद्यैतत्सदृशो गौर्दृश्यते इति बुद्धिः ।

ननु प्रतियोगिग्रहणाद् विना कथं ग्राम्यस्य सादृश्यग्रहणम् अत्रभवतैवात्मनः प्रतिकूलमभिहितम् ?

सामान्यवच्च सादृश्यमेकैकत्र समाप्यते ।
प्रतियोगिन्यदृष्टेऽपि तस्मात्तदुपलभ्यते ॥ इति ।

स च भूयोऽवयवसामान्ययोगोऽगृहीतगवयेनापि नागरकेण ग्रहीतुं शक्यते ।

अथ तदा तद्ग्रहणेऽपि सति न तस्य सदृशप्रत्ययः । न तर्हि भूयोऽवयवसामान्ययोगः सादृश्यम् । यथोक्तं सादृश्यं सदृशप्रत्ययहेतुत्वमेव सादृश्यम्, भूयोऽवयवसामान्ययोगे च तल्लक्षणे चित्रादावव्याप्तिः, अतिव्याप्तिश्च प्राण्यन्तरेषु विसदृशेष्वपि तदवयवसामान्यानां खुरादीनां भावात् । भूयस्त्वन्तु कियत्तेषामिति न विद्मः । यावता सदृशप्रत्ययोत्पत्तिरिति चेत्, तर्हि सदृशप्रत्ययहेतुत्वमेव सादृश्यमस्त्वित्युक्तम् । तस्माद् गवयदर्शनात् पूर्वमपि गव्यनभिव्यक्तसादृश्यग्रहणोपपत्तेः स्मृतिरेवेयम् ।

अथ मतं यथा नैयायिकानामतिदेशवाक्यवेलायां सोपप्लवा संज्ञासंज्ञिसम्बन्धबुद्धिरुपमानं निरुपप्लवीभवति एवमियमपि यासौ पूर्वं व्यक्तितिरस्कृता गवि गवयसादृश्यबुद्धिरभूत् स इदानीमुपमानाद् व्यक्तीभविष्यतीति

अत्रभवतैवात्मनः प्रतिकूलमभिहितमिति ।

भूयोऽवयवसामान्ययोगो यद्यपि मन्यते ।
सादृश्यं तस्य तु ज्ञप्तिर्गृहीते प्रतियोगिनि ॥

इति वदता भवता सादृश्यस्य सत्त्वं तावदभ्युपगतम्, ग्रहणन्तु सामान्यवद् भविष्यतीत्येतदेव 'सामान्यवच्च' इत्यादिना व्यक्तीकृतम् । भूयोऽवयवसामान्ययोगस्य सादृश्यलक्षणस्य इष्टतामासेव्य प्रभाकरेण तल्लक्षणं कृतम् ''सादृश्यमिति सादृश्यम्'' 'सादृश्यम् अनेनास्य', 'अमुना सदृशोऽयम्' इति यतो बुद्धिरुत्पद्यते तत् सादृश्यम् ।

चित्रादावव्याप्तिरिति । चित्रे रेखारूपे हि न खुरत्वादिसम्भवः, प्राणिस्थखुराद्यवयवव्यङ्ग्यत्वात् तेषां खुरत्वादीनाम् ।

नैतदस्ति, गवयग्राहिणा प्रत्यक्षेणैव तत्स्पष्टतासिद्धेः। यथा भवद्भिर्नैयायिका उक्ताः 'अथ त्वधिकता काचित् प्रत्यक्षादेव सा भवेत्' इति तथा नैयायिका अपि युष्मान् वक्ष्यन्ति।

ननु वनस्थप्रमातुर्गवयविषयं प्रत्यक्षं कथं ग्रामवर्तिनि गवि सादृश्यबुद्धेः स्पष्टतामादधीत? किं कुर्मस्तद्दर्शनानन्तरं सुस्पष्टतत्सादृश्यविशिष्टगोपिण्ड-स्मरणात्।

नन्वत एवेदमुपमानं प्रमाणान्तरमुच्यते, प्रत्यक्षस्य सन्निहितगवयस्वरूपमात्र-निष्ठत्वात्। परोक्षे च गवयसादृश्यप्रत्ययस्य विस्पष्टस्यान्यतोऽसिद्धेरिति। उक्तमत्र स्मृतिरेवेयं तथावभासनात्, अनधिगतार्थग्राहि च प्रमाणमुपगच्छन्ति भवन्तः। भवतु स्मृतिविलक्षणेयं प्रतीतिः तथाप्यनुमानजन्यत्वान्न प्रमाणान्तरमाविशति, स्मर्यमाणो गौः धर्मी, एतत्सदृश इति साध्यो धर्मः, एतदवयवसामान्ययोगित्वात्, सन्निहितद्वितीयगवयपिण्डवत्। तदसन्निधाने सामान्येन व्याप्तिर्दर्शयितव्या यत्र यदवयवसामान्ययोगित्वं तत्र तत्सादृश्यं यथा यमयोरिति। विशिष्टस्य तद्योगस्य हेतुत्वान्नानैकान्तिकत्वम्, सामान्ययोगोऽन्योऽन्यच्च सादृश्यमित्युक्तत्वान्न प्रतिज्ञार्थैक-देशो हेतुः। अव्युत्पन्नस्य नारिकेलद्वीपवासिनो, बालस्य वा तत्प्रत्ययानुत्पादान्न व्याप्तिनैरपेक्ष्येण सा प्रतीतिरिति वक्तव्यम्। तस्मादित्थमनुमानजन्यत्वात्, स्मृति-त्वाद्वा, पूर्वोक्तादसम्भवादेव वा नेत्थमवगतिरुपमानकार्येति सिद्धम्।

मीमांसकमतसिद्धोपमानस्य न स्वातन्त्र्येणोपयोगः

कश्चास्य भवदुपमानस्य स्वतन्त्रोपयोगः? एवं ह्याहुर्भवन्तः

अपरीक्षामिषेणापि लक्षणानि वदन्नयम्।
न स्वतन्त्रोपयोगित्वनिरपेक्षाणि जल्पति।

'अथ त्वधिकता काचित्' इत्यस्योत्तरमर्धम् 'यावद्धीन्द्रियसम्बद्धं तत् प्रत्यक्ष-मिति स्थितम्' इति।

यमयोरिति। युगपदेकस्मिन् गर्भे सम्भूतौ यमौ। **सामान्ययोगोऽन्योऽन्यच्चेति**। सत्यपि सामान्ययोगे प्राण्यन्तरेषु सदृशप्रत्ययानुत्पादात्।

अपरीक्षामिषेणापीति। न परीक्षितव्यानि प्रत्यक्षादीनि प्रमाणानीति मिषेण व्याजेन।

ननूक्त एवोपयोगः। सौर्ये चरौ द्रव्यदेवतासारूप्यादाग्नेयविध्यन्तलाभः। आग्नेयोऽष्टाकपाल इत्युपदिष्टादृष्टेतिकर्त्तव्यताकलापतया निराकाङ्क्षो विधिः। 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्यत्र प्रधानमात्रोपदेशाद् विध्यादिरस्ति न तु विध्यन्त इतिकर्त्तव्यताभिधानम्। न चानितिकर्त्तव्यताकं कर्म प्रयोगयोग्यम्। अतः कीदृशमितिकर्त्तव्यताजातमिह गृह्यतामित्यपेक्षायां चरुपुरोडाशयोर्व्रीह्याद्यौषधिसाधनत्वेन द्रव्यसादृश्यात् सूर्याग्न्योश्च तेजस्वितया देवतयोः सारूप्यादाग्नेयेतिकर्त्तव्यता सौर्ये क्रियते इत्युपमानाद् गम्यते। अपि च क्वचिच्चोदितद्रव्यादावलभ्यमाने प्रतिनिध्युपादानेन कर्मसमापनात् प्रतिनिधिमात्रोपादाने प्राप्ते व्रीहिसदृशनीवारोपादानमुपमानात् प्रतीयते इति। तदाह

भिन्नानुमानादुपमेयमुक्ता
सौर्यादिवाक्यैरसहापि दृष्टम्।
सादृश्यतोऽग्न्यादियुतं कथं नु
प्रत्याययेदित्युपयुज्यते नः॥

आग्नेयोऽष्टाकपाल इति। अयं हि दर्शपूर्णमासप्रधानयागषट्कान्तःपातित्वाद् विहितसकलेतिकर्तव्यताकः। **विध्यादिरस्तीति**। यद्वाक्यमुपलभ्य पुरुषः कस्मिंश्चिदर्थे प्रवर्तते कुतश्चिद् विनिवर्तते स विधिः। विधीयतेऽनेनार्थ इति। यथा लोके 'देवदत्त गामभ्याज शुक्लाम्' इति। तस्य 'अभ्याज' इति आदिः, इतरोऽन्तः। वेदेऽपि 'दर्शपूर्णमासाभ्यां यजेत' इति विध्यादिः, विध्यन्तोऽप्रधानविवर्जितं कृत्स्नं पौरोडाशिकं ब्राह्मणम्। तेन सहितोऽयं विध्यादिर्विशिष्टापूर्वनिर्वृत्तं प्रति पुरुषं प्रवर्तयति इति विध्यादिविध्यन्तयोर्लक्षणम्।

भिन्नानुमानादुपमेयमुक्तेति। अग्न्यादियुतं 'आग्नेयोऽष्टाकपालो भवति' इत्यादिसम्बद्धं यत् प्रयाजादिकमितिकर्तव्यताजातम्। सौर्यादिवाक्यैः 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्यादिभिः। **असहापि दृष्टम्**। तैः सहाश्रुतमपि, तद्गतत्वेन कथं प्रत्याययेदुपमेति नोऽस्माकमुपयुज्यते। कथञ्च प्रत्याययितुं शक्नुयादित्याह **सादृश्यतः**। तत्सदृशत्वादाग्नेयादेः।

प्रतिनिधिरपि चैवं व्रीहिसादृश्ययोगाद्
भवति तदपचारे यत्र नीवारजातौ ।
तदपि फलमभीष्टं लक्षणस्योपमायाः
प्रकृतिरपि च गौणैर्बाध्यते यत्र चान्यैः ।।

तदेतदसमञ्जसम् । प्रसिद्धेनाप्रसिद्धस्य सादृश्यमवगम्यते इत्येष भवद्भिरुत्सृष्टः पन्थाः, विपर्ययस्तु आश्रितः । यदप्यदृष्टेन नूतनेनाप्रसिद्धेन गवयेन वाक्यसिद्धस्य गोः सादृश्यमुपमानात् प्रतीयते इति तदिहापि निर्ज्ञातेतिकर्त्तव्यताकेन गोवत्प्रसिद्धेनाग्नेयेन सौर्यस्य गवयवदप्रसिद्धस्य सादृश्यमवगम्यते, न तु गवयेन गोः सौर्येणाग्नेयस्य । तदिह यस्य विध्यन्तार्थिता न तत्रोपमानात् सादृश्यावगमः, यत्र वा तदवगमो न तत्रेतिकर्त्तव्यतार्थित्वम् ।

ननु सौर्ये विध्यन्तार्थिनि प्रतीयमाने द्रव्यदेवतासारूप्यादेराग्नेयः स्मरणपथमवतरतीति तत एवासौ विध्यन्तमधिगच्छतीति । एवमपि स्मरणमात्रात्सिद्धेऽर्थे किमुपमानेन ? आग्नेयस्मरणादेव तदितिकर्त्तव्यता सौर्ये उपादास्यते । स्मृतिविशेष एव विषयाधिक्यादुपमानमुच्यते इति चेत्, प्रतिविहितमिदमित्यलं प्रसङ्गेन ।

किञ्चोपमानप्रतिपादितार्थो
न चोदनालक्षणतां बिभर्त्ति ।
तस्मान्न युज्येत ततोऽधिगन्तु-
माग्नेयविध्यन्तविशेषलाभः ।।
प्रतिनिधिरपि चैवं नास्ति नीवारजाते-
र्नहि भवदुपमानाद् व्रीहिसादृश्यबुद्धिः ।

तदपचारे तेषां व्रीह्यादीनां विहितानामपचारे परिहारादिकृते 'असम्भवे प्रतिनिधिः' इति । नीवारजातौ नीवारजातेः । प्रतिनिधिर्मुख्यस्थाने विनियोगः ।

प्रतिविहितमिदमिति । 'मैवं, गवयसादृश्यस्यापि पूर्वं ग्रहणात्' इत्यादिना प्रतिविधानात् ।

प्रतिनिधिरपि चैवं नास्ति नीवारजातेः । कथं नास्ति ? तदाह न हि

भवति तु मतिरेषा व्रीहयस्तत्सदृक्षा
इति न च फलमस्याः किञ्चिदस्ति प्रतीतेः ॥
भवत्यङ्गं यागे क्वचन गवयालम्भनमतः
तदाकारज्ञाने प्रतिनिधिविवेके च कृतिनाम् ।
उपायत्वं युष्मत्कथितमुपमानं न भजते
परिग्राह्यं तस्मात् प्रवरमुनिगीतं सुमतिभिः ॥

इति द्वितीयमाह्निकम् ॥

भवदुपमानाद् 'व्रीहिसदृशा नीवाराः' इति सादृश्यबुद्धिः । कीदृशी तर्हि बुद्धिरित्याह **भवति नु मतिरेषेति** ॥

भट्टश्रीशङ्करात्मजश्रीचक्रधरकृते
न्यायमञ्जरीग्रन्थिभङ्गे द्वितीयमाह्निकम् ॥

तृतीयमाह्निकम्

उपमानानन्तरं शब्दस्य विभागसूत्रे निर्देशात् तस्य लक्षणं प्रतिपादयितुमाह

आप्तोपदेशः शब्दः ॥ ७ ॥

उपदेशः शब्द इत्युच्यमाने पर्यायमात्रोच्चारणादकारके शब्दमात्रे प्रसक्तिरिति प्रत्यक्षसूत्राज् ज्ञानपदस्य, स्मृतिजनकस्य व्यवच्छेदार्थं चार्थग्रहणस्य, संशयविपर्ययजनकनिराकरणाय च व्यवसायात्मकाव्यभिचारिपदयोरनुवृत्तिरित्येवमव्यभिचारादिविशेषणार्थप्रतीतिजनक उपदेशः शब्द इत्युक्तं भवति ।

तदेवं पर्यायमेवोपदेशशब्दं शब्दलक्षणमपेक्षितपूर्वसूत्रोपात्तविशेषणपदं केचिद् व्याचक्षते, आप्तग्रहणञ्च लक्षणविनिश्चयार्थमाहुः । 'घ्राणरसनत्वक्चक्षुःश्रोत्राणीन्द्रियाणि भूतेभ्यः' इत्यत्र भूतग्रहणं वक्ष्यते । एवं हि ऐतिह्यस्य न प्रमाणान्तरता भविष्यति, उपदेशरूपत्वाविशेषादिति ।

अन्ये तु ब्रुवते युक्तमुपदेशपदमेव शब्दलक्षणम् । युक्तञ्च तन्निश्चयार्थमाप्तग्रहणम् । पूर्वसूत्रोपात्तविशेषणपदानुवृत्तिस्तु नोपयुज्यते, सामान्यलक्षणानन्तरं विशेषलक्षणप्रक्रमात् । सामान्यलक्षणेन च स्मृत्यादिजनकसकलप्रमाणाभासव्युदासे कृते सजातीय-

---

लक्षणविनिश्चयार्थमिति । अव्यभिचारादिविशिष्टार्थोपलब्धिजनकत्वं प्रमाणलक्षणम् । तद् दृष्टे विषये उपदेशस्य प्रमाणान्तरसंवादसम्भवान्निश्चीयेतापि, अदृष्टे तु विषये प्रमाणान्तरसंवादासम्भवात् कथं तद्विनिश्चय इति तदर्थमाप्तग्रहणम् । **आप्तस्योपदेशो दृष्टे** विषयेऽव्यभिचारादिविशेषणार्थोपलब्धिजनकत्वेन दृष्टः, अदृष्टेऽप्याप्तोपदेशरूपत्वात् तथाविधो भवत्येवेति । यथा नियतगन्धाद्युपलब्धिजनकत्वं लक्षणं घ्राणादीनां कथं विनिश्चीयेतेति तद्विनिश्चयार्थं 'भूतेभ्यः' इति पदम् । विशिष्टभूतप्रकृतिकत्वाद् भवति नियतार्थोपलब्धिजनकत्वं लक्षणमिति । **एवं हि ऐतिह्यस्येति** । 'इह वटे यक्षः प्रतिवसति' एतदुपदेशरूपं न त्वाप्तोपदेशः, एतदुपदेष्टुराप्तस्यानिर्ज्ञानात् ।

प्रत्यक्षादिव्यवच्छेद एव केवलमिदानीं वक्तव्यः । तत्र च पर्यायतापर्याप्तमुपदेशपदमेव बुद्ध्यादिपदवदिति किं विशेषणानुवृत्तिक्लेशेनेति ।

अपर आह अनवलम्बितसामान्यलक्षणानुसरणदैन्यम्, अनध्याहृतप्राक्तनविशेषणपदम्, आप्तोपदेशः शब्दलक्षणम् । न च अकारकेण, शब्दान्तरकारिणा वा, स्मृतिजनकेन वा, संशयाधायिना वा शब्देन किञ्चिदुपदिश्यते इति निर्वचनसव्यपेक्षाद् उपदेशग्रहणादेव तन्निवृत्तिः सिद्धा । मिथ्योपदेशे तु रथ्यापुरुषादिवचसि विपरीतप्रतीतिकारिणि प्रसङ्गो न निवर्त्तते इति तत्प्रतिक्षेपार्थमाप्तग्रहणम् । ऐतिह्ये यथार्थप्रतीतिहेतावाप्तानुमानान्न प्रमाणान्तरत्वमिति । तस्माद्यथाश्रुतमेव सूत्रं शब्दलक्षणार्थं युक्तम् ।

उपदेशपदार्थविचारः

भवत्वेवम् । उपदिश्यते इति कोऽर्थः ? अभिधानक्रिया क्रियते । केयमभिधानक्रिया नाम? प्रतीतिरिति चेत् चक्षुरादेरपि तत्करणत्वादुपदेशत्वप्रसङ्गः । स्वसादृश्येन प्रतीतिरिति चेद् बिम्बस्यापि पादाद्यनुमितावुपदेशत्वप्रसङ्गः, शब्दे च तदभावादनुपदेशत्वं स्यात् । शब्दावच्छिन्ना प्रतीतिरिति चेत् श्रोत्रस्य तज्जनकत्वादुपदेशत्वप्रसङ्गः । शब्दस्य च स्वावच्छेदेन प्रतीतिजनकत्वनिषेधादनुपदेशत्वप्रसङ्गादित्यभिधानक्रियास्वरूपानिश्चयान्न तस्याः करणमुपपदेशः ।

उच्यते । श्रोत्रग्राह्यवस्तुकरणिका तदर्थप्रतीतिरभिधानक्रिया, इत्थं लोके व्यवहरात् । उक्तोऽभिहितश्च स एवार्थो लोके व्यपदिश्यते यस्तु तथाविधप्रतीतिविषयतां प्रतिपन्नः । श्रोत्रग्राह्यस्य वर्णराशेरेवार्थप्रतीतिकरणत्वान्न तु श्रोत्रप्रत्ययाविषयविशेषः स्फोटात्मा शब्दः । श्रोत्रग्रहणे ह्यर्थे शब्दशब्दः प्रसिद्धः । वर्णा एव च श्रोत्रग्रहणाः । यतोऽर्थप्रतीतिः स शब्द इति तूच्यमाने धूमादिरपि शब्दः स्यात्, अगृहीतसम्बन्धश्च शब्दः शब्दत्वं जह्यादर्थप्रतिपत्तेरकरणात् ।

बुद्ध्यादिपदवदिति । यथा 'बुद्धिरुपलब्धिः' इत्यत्र पर्यायाणामेव लक्षणत्वमुक्तम् ।

बिम्बस्यापीति । बिम्बस्य प्रतिबिम्बे दृष्टे देवदत्तस्यैतत्पदमिति प्रतीतेः । न वर्णेभ्योऽर्थप्रतिपत्तिरपि तु वर्णाभिव्यक्तात् स्फोटादिति पक्षं निराकर्तुमाह श्रोत्रग्राह्यस्य वर्णराशेरित्यादिना ।

ननु प्रतीतेः संविदात्मकत्वान्नाभिधानक्रिया नाम काचिदपूर्वा संविदन्या विद्यते तत्करणस्य चोपदेशतायामतिप्रसङ्ग इत्युक्तम्। सत्यम् । संविदात्मैव सर्वत्र प्रतीतिः, सा चक्षुरादिकरणिका प्रत्यक्षफलम्, श्रोत्राग्राह्यकरणिकानुमानफलम्, श्रोत्रग्राह्यकरणिका शब्दफलम् । न हि दृश्यतेऽनुमीयतेऽभिधीयते इति पर्यायशब्दः । तत्प्रतीतिविशेषजनने च शब्दस्योपदेशत्वमुच्यते, विवक्षादौ तु तस्य लिङ्गत्वमेवेत्यलं प्रसङ्गेन ।

आप्तपदार्थविचारः

आप्तो भाष्यकृता व्याख्यातः आप्तः खलु साक्षात्कृतधर्मा, यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा चेति ।

धर्म इत्युपदेष्टव्यः कश्चिदर्थो विवक्षितः ।
साक्षात्करणमेतस्य यथार्थ उपलम्भनम् ॥

न तु प्रत्यक्षेणैव ग्रहणमिति नियमः, अनुमानादिनिश्चितार्थोपदेशिनोऽप्याप्तत्वानपायात् ।

चिख्यापयिषया युक्त इत्युक्ता वीतरागता ।
उपदेष्टेत्यनेनोक्तं प्रतिपादनकौशलम् ॥

वीतरागोऽपि मूकादिरुपदेष्टुमशक्तः किं कुर्यात् ? वक्तुं शक्तोऽपि साक्षात्कृतधर्माप्यवीतरागो न वक्ति तूष्णीमास्ते इति ।

तस्य च प्रतिपाद्येऽर्थे वीतरागत्वमिष्यते ।
सर्वथा वीतरागस्तु पुरुषः कुत्र लभ्यते ॥
ऋष्यार्यम्लेच्छसामान्यं वक्तव्यं चाप्तलक्षणम् ।
एवं हि लोकेऽप्याप्तोक्त्या व्यवहारो न नङ्क्ष्यति ॥

येऽप्यार्प्ति दोषक्षयमाचक्षते तैरपि दोषक्षयः प्रतिपाद्यार्थेष्वेव वर्णनीयोऽन्यथा लोके दृश्यमानस्याप्तोक्तिनिबन्धस्य व्यवहारस्य निह्नवः स्यात् । अथ वा वेदप्रामाण्यसिद्ध्यर्थत्वाच्छास्त्रस्य तत्प्रणेतुराप्तस्येश्वरस्य यथाश्रुतमेवेदं लक्षणं

आप्ति दोषक्षयमाचक्षते । 'क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद् हेत्वसम्भवात्' इति तदुपदेशः सत्य एवेति ।

(स ?) साक्षात्कृतधर्मेव धर्मस्येश्वरप्रत्यक्षगोचरत्वात्, चिख्यापयिषया प्रयुक्त इति कारुणिक एव भगवानिति वक्ष्यते। उपदेष्टा च वेदाद्यागमानां तत्प्रणीतत्वस्य समर्थयिष्यमाणत्वादिति।

शब्दस्यानुमान एवान्तर्भावपक्षः

आह; आस्तां तावदेतद्, इदन्तु चिन्त्यतां किमर्थमिदं पुनः शब्दस्य पृथग्लक्षणमुपवर्ण्यते ?

शब्दस्य खलु पश्यामो नानुमानाद् विभिन्नताम्।
अतस्तल्लक्षणाक्षेपान्न वाच्यं लक्षणान्तरम्॥
परोक्षविषयत्वं हि तुल्यं तावद् द्वयोरपि।
सामान्यविषयत्वञ्च सम्बन्धापेक्षणाद् द्वयोः॥
अगृहीतेऽपि सम्बन्धे नैकस्यापि प्रवर्त्तनम्।
सम्बन्धश्च विशेषाणामानन्त्यादतिदुर्गमः॥
यथा प्रत्यक्षतो धूमं दृष्ट्वाग्निरनुमीयते।
तथैव शब्दमाकर्ण्य तदर्थोऽप्यवगम्यते॥
अन्वयव्यतिरेकौ च भवतोऽत्रापि लिङ्गवत्।
यो यत्र दृश्यते शब्दः स तस्यार्थस्य वाचकः॥
पक्षधर्मत्वमप्यस्ति शब्द एव यतोऽर्थवान्।
प्रकल्पयिष्यते पक्षो धूमो दहनवानिव।
तत्र धूमत्वसामान्यं तद्वदत्रापि वक्ष्यते॥
एवं विषयसामग्रीसाम्यादेकत्वनिश्चये।
न विलक्षणतामात्रं किञ्चिदन्यत्वकारणम्॥
पूर्ववर्णक्रमोद्भूतसंस्कारसहकारिता।
पुरुषापेक्षवृत्तित्वं विवक्षानुसृतिक्रमः।
इत्यादिना विशेषेण न प्रमाणान्तरं भवेत्॥
कार्यकारणधर्मादिविशेषोऽत्रापि नास्ति किम्।
यथेष्टविनियोज्यत्वमपि नान्यत्वकारणम्॥

हस्तसंज्ञादिलिङ्गेऽपि तथाभावस्य दर्शनात् ।
दृष्टान्तनिरपेक्षत्वमभ्यस्ते विषये समम् ॥
अनभ्यस्ते तु सम्बन्धस्मृतिसापेक्षता द्वयोः ।
अनेकप्रतिभोत्पत्तिहेतुत्वमपि विद्यते ॥
अस्पष्टलिङ्गे कस्मिंश्चिदश्व इत्यादिशब्दवत् ।
स्फुटार्थानवसायाश्च प्रमाणाभासतो यथा ।
लिङ्गे तथैव शब्देऽपि नानार्थभ्रमकारिणि ॥
अपि च प्रतिभामात्रे शब्दाज्जातेऽपि कुत्रचित् ।
आप्तवादत्वलिङ्गेन जन्यते निश्चिता मतिः ॥
अत एव हि मन्यन्ते शब्दस्यापि विपश्चितः ।
आप्तवादाविसंवादसामान्यादनुमानताम् ॥
किञ्च शब्दो विवक्षायामेव प्रामाण्यमश्नुते ।
न बाह्ये व्यभिचारित्वात् तस्याश्चैतस्य लिङ्गता ॥

शब्देऽनुमानतः पृथक् प्रामाण्यव्यवस्थापनम्

तत्राभिधीयते, द्विविधः शब्दः पदात्मा वाक्यात्मा चेति । तत्र वाक्यमनवगतसम्बन्धमेव वाक्यार्थमवगमयितुमलम्, अभिनवविरचितश्लोकश्रवणे सति पदसंस्कृतमतीनां तदर्थावगमनदर्शनात् । अतः सम्बन्धाधिगममूलप्रवृत्तिनानुमानेन तस्य कथं साम्यसम्भावना ? पदस्य तु सम्बन्धाधिगमसापेक्षत्वे सत्यपि सामग्रीभेदाद् विषयभेदाच्चानुमानाद् भिन्नत्वम् । विषयस्तावद् विसदृश एव पदलिङ्गयोः ।

हस्तसंज्ञादिलिङ्गेऽपीति । यदेत्थमङ्गुल्यस्तदेदं बोद्धव्यमिति ।

अश्व इत्यादिशब्दवदिति । अश्व इति घोटकाभिधायि प्रातिपदिकम् । आख्यातन्तु श्वयतेः चङि सिपि "विभाषा धेट्श्व्योः" इति श्वेः अङि 'श्वयतेरः' इत्यत्वेऽडागमे च कृते यत् सिद्धयति तद् वृंहितवांस्त्वमित्यर्थे ।

आप्तवादाविसंवादसामान्यादिति । यथा धूमसामान्यादग्निसामान्यनिश्चय एवमाप्तवादसामान्यादविसंवादित्वसामान्यनिश्चय इत्यर्थः । आप्तवादानां वा अविसंवादः सामान्यं रूपम्, यो य आप्तवादः स सोऽविसंवादीत्यर्थः ।

तद्वन्मात्रं पदस्यार्थ इति च स्थापयिष्यते। अनुमानन्तु वाक्यार्थविषयम् अत्राग्निरग्निमान्पर्वत इति, ततः प्रतिपत्तेः । उक्तश्च तत्र धर्मविशिष्टो धर्मी साध्य इति ।

ननु पदान्यपि वाक्यार्थवृत्तीनि सन्ति गोमान् औपगवः, कुम्भकार इति । सत्यम् । किन्तु तेष्वपि साकाङ्क्षप्रत्ययानुत्पादात् गोमान् क इत्याकाङ्क्षाया अनिवृत्तेः ।

अपि च पर्वतादिविशेष्यप्रतिपत्तिपूर्विका पावकादिविशेषणावगतिर्लिङ्गादुदेति, पदात्तु विशेषणावगतिपूर्विका विशेष्यावगतिरिति विषयभेदः ।

ननूक्तं यथानुमाने धर्मविशिष्टो धर्मी साध्य एवमिहार्थविशिष्टः शब्दः साध्यो भवतु । मैवम् । शब्दस्य हेतुत्वात्, न च हेतुरेव पक्षो भवितुमर्हति ।

ननु यथा अग्निमान् अयं धूमो धूमवत्त्वात् महानसधूमवदित्युक्तं 'सा देशस्याग्नियुक्तस्य धूमस्यान्यैश्च कल्पिता'इति, एवं गोशब्द एवार्थवत्त्वेन साध्यताम्, गोशब्दत्वादित्यादिसामान्यञ्च हेतूक्रियतामिति । एतदपि दुर्घटम् । शब्दस्य धर्मिणः किमर्थविशिष्टत्वं वा साध्यते ? प्रत्यायनशक्तिविशिष्टत्वं वा? अर्थप्रतीतिविशिष्टत्वं वा ? न तावदर्थविशिष्टत्वं साध्यं शैलज्वलनयोरिव शब्दार्थयोर्धर्मधर्मिभावाभावात् ।

अथार्थविषयत्वाच्छब्दस्यार्थविशिष्टतेत्युच्यते, तदप्ययुक्तम् । तत्प्रतीतिजननमन्तरेण तद्विषयत्वानुपपत्तेः । प्रतीतौ तु सिद्धायां किं तद्विषयत्वद्वारकेण तद्धर्मत्वेन ? यदि तु तद्विषयत्वमूलं तद्धर्मित्वपूर्विकार्थप्रतीतिः, अर्थप्रतीतिमूलं तद्विषयत्वं तदितरेतराश्रयम् । तस्मान्नार्थविशिष्टः शब्दः साध्यः, नाप्यर्थप्रत्यायनशक्तिविशिष्टः, तदर्थितया शब्दप्रयोगाभावात् ।

न शक्तिसिद्धये शब्दः कथ्यते श्रूयतेऽपि वा ।
अर्थगत्यर्थमेवामुं शृण्वन्ति च वदन्ति च ॥

नाप्यर्थप्रतीतिविशिष्टः शब्दः पक्षतामनुभवितुमर्हति, सिद्धयसिद्धिविकल्पानुपपत्तेः ।

पदात्तु विशेषणावगतीति । गोशब्दाद् गोत्वविशिष्टपिण्डावगतेः ।

सा देशस्येति । प्रमेयता, पूर्वस्मिन्नर्धे 'तस्माद्धर्मविशिष्टस्य धर्मिणः स्यात् प्रमेतया' इति तस्या एव प्रक्रान्तत्वात् ।

असिद्धयापि तद्वत्त्वं शब्दस्यार्थधिया कथम् ।
सिद्धायां तत्प्रतीतौ वा किमन्यदनुमीयते ॥

ज्वलनादावपि तुल्यो विकल्प इति चेद्, न हि तत्राग्निर्धूमेन जन्यते अपि तु गम्यते, इयं त्वर्थप्रतीतिर्जन्यते शब्देनेत्यस्यामेव सिद्धासिद्धत्वविकल्पावसरः । तस्मात् त्रिधापि न शब्दस्य पक्षत्वम् ।

अपि च गोशब्दे धर्मिणि गत्वादिसामान्यात्मकस्य हेतोर्ग्रहणम्, ततो व्याप्तिस्मरणम्, ततः परामर्शः, ततोऽर्थप्रतिपत्तिरिति कालद्राघीयस्त्वाद्धर्मी तिरोहितो भवेद्,न पर्वतवदवस्थितिस्तस्य अपि तूच्चरितप्रध्वंसित्वं शब्दस्य । न च शब्दमर्थवत्त्वेन लोकः प्रतिपद्यते किन्तु शब्दात् पृथगेवार्थमिति न सर्वथा शब्दः पक्षः । अतो धर्मविशिष्टस्य धर्मिणः साध्यस्येहासम्भवाच्छब्दलिङ्गयोर्महान् विषयभेदः ।

सामग्रीभेदः खल्वपि पक्षधर्मान्वयादिरूपसापेक्षमनुमानं व्याख्यातम् । शब्दे तु न तानि सन्ति रूपाणि । तथा च शब्दस्य पक्षत्वप्रतिक्षेपान्न तद्धर्मतया गत्वादिसामान्यस्य लिङ्गता, न चार्थस्य धर्मित्वं सिद्ध्यसिद्धिविकल्पानुपपत्तेः । न च तद्धर्मत्वं शब्दस्य शक्यते वक्तुं तत्र वृत्त्यभावात्, प्रतीतिजनकत्वेन तद्धर्मतायामुच्यमानायां पूर्ववदितरेतराश्रयम्, पक्षधर्मादिबलेन प्रतीतिः प्रतीतौ च सत्यां पक्षधर्मादिरूपलाभः ।

अपि च यद्यर्थधर्मतया शब्दस्य पक्षधर्मत्वं भवेत् तदानवगतधूमाग्निसम्बन्धोऽपि यथा धूमस्य पर्वतधर्मतां गृह्णात्येव तथानवगतशब्दार्थसम्बन्धोऽपि अर्थधर्मतां शब्दस्य गृह्णीयान्न च गृह्णातीत्यतो नास्ति पक्षधर्मत्वं शब्दस्येति । अन्वयव्यतिरेकावपि तस्य दुरुपपादौ देशे काले च शब्दार्थयोरनुगमाभावात् । न हि यत्र देशे शब्दस्तत्रार्थः । यथोक्तं श्रोत्रियैः 'मुखे हि शब्दमुपलभामहे भूमावर्थमि'ति, वयन्तु कर्णाकाशे शब्दमुपलभामहे इत्यास्तामेतत् । नापि यत्र काले शब्दस्तत्रार्थः । तदानीं युधिष्ठिरार्थाभावेऽपि तद्बुद्ध्योरन्वयो ग्रहीष्यते इत्युच्यते ? तर्हि वक्तव्यं किमर्थ-

गत्वादिसामान्यात्मकस्य हेतोरिति । गकार, औकार, विसर्जनीयव्यतिरेकेणान्यस्य भिन्नस्य गोशब्दास्याभावात् । तेषाञ्च क्षणिकत्वेनान्यत्रान्वयाभावेन गमकत्वाभावात् तत्सामान्यानामेव हेतुत्वमिति ।

बुद्धावुत्पन्नायामन्वयो गृह्यते अनुत्पन्नायां वा ? अनुत्पन्नायां तावत् स्वरूपासत्त्वात्-कुतोऽन्वयग्रहणम् ? उत्पन्नायान्त्वर्थबुद्धौ किमन्वयग्रहणेनेति नैष्फल्यम् । तत्पूर्वकत्वे तु पूर्ववदितरेतराश्रयम् । एतेन व्यतिरेकग्रहणमपि व्याख्यातम् ।

नन्वावापोद्वापद्वारेण शब्दार्थसम्बन्धे निश्चीयमाने उपयुज्येते एवान्वय-व्यतिरेकौ, यथोक्तं 'तत्र योऽन्वेति यं शब्दमर्थस्तस्य भवेदसौ'इति । सत्यमेतत् । किन्तु समयबलेन सिद्धायामर्थबुद्धौ समयनियमार्थावन्वयव्यतिरेकौ शब्देनान्वय-व्यतिरेककृता च धूमादेरिव ततोऽर्थबुद्धिः । अपि च

धूमादिभ्यः प्रतीतिश्च नैवावगतिपूर्विका ।
इहावगतिपूर्वैव शब्दादुत्पद्यते मतिः ॥
स्थविरव्यवहारे हि बालः शब्दात् कुतश्चन ।
दृष्ट्वार्थमवगच्छन्तं स्वयमप्यवगच्छति ॥

तत्पूर्वकत्वे त्विति । अन्वयग्रहणे सति अर्थबुद्धिः, अर्थबुद्धौ सत्यामन्वयग्रहण-मिति । **एतेन व्यतिरेकग्रहणमिति** । (किम् ?) अर्थबुद्धावुत्पन्नायाम् 'यत्रेयमर्थबुद्धिर्नास्ति तत्र शब्दबुद्धिरपि नास्ति' इत्यादि । **तत्र योऽन्वेति यं शब्दमिति** । तथाहि यथा 'घटं करोति' इत्यत्र कर्मशक्तिः प्रतीयते तथा घटशब्दापाये 'पटं करोति' इत्यत्रापि प्रतीय-माना 'अम्'प्रत्ययवाच्यत्वमात्मनो निश्चाययति; एवं 'घटं करोति' इत्यत्र घटप्रातिपदि-कार्थो योऽवगतः स सत्यप्यम्प्रयोगे 'पटं करोति' इत्यत्राप्रतीयमानः प्रकृत्यर्थ इति निश्चीयते । **समयनियमार्थाविति** । प्रकृतिप्रत्ययात्मकत्वाच्छब्दस्य कस्य कस्मिन्नंशे समयः कृत इत्ययमंशोऽस्य शब्दांशस्य वाच्योऽयमस्येति प्रागुक्ताभ्यामन्वयव्यतिरेकाभ्यां निश्चीयते ।

नैवावगतिपूर्विकेति । न हि येन पूर्वं धूमादग्निरवगतः स एव धूमादग्निं प्रति-पद्यतेऽपि तु येनापि न प्रतिपन्नोऽग्निना सह भूयोदर्शनेन धूमस्य गृहीतः सम्बन्धः सोऽपि प्रतिपद्यत एव ततोऽग्निम् । शब्दस्तु येन तदर्थवाचकत्वेनावगतः स एव ततोऽर्थं प्रतिपद्यते नान्यः ।

तत्राप्येवं समयः क्रियते एतस्माच्छब्दादयमर्थस्त्वया प्रतिपत्तव्य इति। तत्रापि प्रतीतिरेवाविनाभावो नाम सम्बन्धः, अन्यश्च शब्दार्थयोः समयापरनामा वाच्यवाचकभावः सम्बन्धः कारणत्वेन निर्दिष्टो द्रष्टव्यः। तस्मादन्यो लिङ्गलिङ्गिनोरविनाभावाद् वाच्यवाचकभावः सम्बन्धः प्रतीत्यङ्गम्। एवंविधविषयभेदाद् सामग्रीभेदाच्च प्रत्यक्षवदनुमानादन्यः शब्द इति सिद्धम्।

यत्तु पूर्ववर्णक्रमापेक्षणादिवैलक्षण्यमाशङ्क्य दूषितं कस्तत्र फल्गुप्राये निर्बन्धः।

यत्पुनरभिहितम् 'आप्तवादाविसंवादसामान्यादनुमानता' इति तदतीव सुभाषितम्, विषयभेदात्, आप्तवादत्वहेतुना हि शब्दार्थबुद्धेः प्रामाण्यं साध्यते न तु सैव जन्यते, यदाह

अन्यदेव हि सत्यत्वमाप्तवादत्वहेतुकम्।
वाक्यार्थश्चान्य एवेह ज्ञातः पूर्वतरश्च सः॥

तत्रापि प्रतीतिरेवेति। यद्यपि पूर्वमर्थमन्येन ततः प्रतिपन्नं ज्ञात्वा स्वयं न प्रतिपद्यतेऽपि तु परप्रतीतिं विनैव स्वयमेव प्रतिपद्यते तथापि परेण वक्त्रा 'अस्माच्छब्दादयमर्थो भवता प्रतिपत्तव्यः' इति वदता 'अस्यार्थस्यास्माच्छब्दात् प्रतीतिः' 'अयं शब्द एतदर्थवाचकः' इति तदर्थप्रतीतिरेव तस्य शब्दस्य वाचकत्वे कारणत्वेन निर्दिष्टा। अतस्तत्रापि तादृशाद् वाक्याद् 'यत एतस्यास्माच्छब्दादेतदर्थप्रतीतिरस्ति एतदर्थवाचकोऽयमतोऽहमप्यस्मादमुमर्थं प्रतिपद्ये' इति भवत्यवगतिपूर्विकैवावगतिः।

यत्तु पूर्ववर्णक्रमेति। यथाह भट्टः

पूर्वसंस्कारयुक्तान्त्यवर्णसंस्कारकल्पना।
विवक्षादि च धूमादौ नास्तीत्येतेन भिन्नता॥
यैरुक्ता तत्र वैधर्म्यविकल्पसमजातिता।
धूमानित्यविषाण्यादि विशेषान्न हि भिन्नता॥
त्रैलक्षण्यपरित्यागो यावन्न प्रतिपाद्यते।
तावद्विशेषमात्रेण वदतो जातिता भवेत्॥

ततश्चेदाप्तवादेन सत्यत्वमनुमीयते ।
वाक्यार्थप्रत्ययस्यात्र कथं स्यादनुमानता ।।
जन्म तुल्यं हि बुद्धीनामाप्तानाप्तगिरां श्रुतौ ।
जन्माधिकोपयोगी च नानुमायां त्रिलक्षण इति ।।

न च प्रामाण्यनिश्चयाद्विना प्रतिभामात्रं तदिति वक्तव्यम्, शब्दार्थसम्प्रत्ययस्यानुभवसिद्धत्वात्,

एतेन विवक्षाविषयत्वमपि प्रत्युक्तम् । न हि विवक्षा नाम शब्दस्य वाच्यो विषयः किन्त्वर्थ एव तथा ।

विवक्षायां हि शब्दस्य लिङ्गत्वमिह दृश्यते ।
आकाश इव कार्यत्वान्न वाचकतया पुनः ।।
शब्दादुच्चरिताच्च वाच्यविषया तावत् समुत्पद्यते
संवित्तिस्तदनन्तरन्तु गमयेत् कामं विवक्षामसौ ।
अर्थोपग्रहवर्जिता तु नियमात् सिद्धैवमाजीविता
तद्वाच्यार्थविशेषिता त्वविदिते नैषां तदर्थे भवेत् ।।

शब्दप्रामाण्ये शङ्का

ननु सिद्धे प्रमाणत्वे भेदाभेदपरीक्षणम् ।
क्रियते न तु शब्दस्य प्रामाण्यमवकल्पते ।।
अर्थप्रतीतिजनकं प्रमाणमिति वर्णितम् ।
विकल्पमात्रमूलत्वान्नार्थं शब्दाः स्पृशन्त्यमी ।।

न हि यद्धूमादग्नेरनुमानम्, यच्च कदाचिदनित्यत्वात् कृतकत्वस्य, विषाणित्वाच्चतुष्पादत्वस्य तदनुमानतया परस्परं भिद्यते ।

जन्माधिकोपयोगीति । अनुमायामनुमाने यस्त्रिलक्षणो हेतुः स न जन्माधिकोपयोगी, ज्ञानजन्मनो ज्ञानोत्पादादधिके कार्ये न व्याप्रियते । ज्ञानजन्मन्येव तस्य व्यापार इत्यर्थः । त्रिलक्षणशब्देनात्र हेतुरुक्तः ।

अर्थोपग्रहवर्जिता नियतार्थविषयत्वहीना । **नियमात्** अवश्यम्भावात्, अवश्यं हि जीवन् विवक्षति ।

अर्थो निरूप्यमाणश्च को वा शब्दस्य शक्यते ।
वक्तुं न जातिर्न व्यक्तिर्न तद्वान्नाम कश्चन ॥
सम्बन्धोऽप्यस्य नार्थेन नित्योऽस्ति समयोऽथ वा ।
शक्यः सन्नपि वा बोद्धुमर्थे कथमतीन्द्रिये ॥
वाक्यार्थोऽपि न निर्णेतुं पार्यते पारमार्थिकः ।
नियोगभावनाभेदसंसर्गादिस्वभावकः ॥
तत्प्रतीत्यभ्युपायश्च किम्पदार्थः पदानि वा ।
वाक्यं वा व्यतिषक्तार्थं स्फोटो वेति न लक्ष्यते ॥
सिद्धायामपि तद्बुद्धौ तस्या द्रढिमकारणम् ।
नित्यत्वमाप्तोक्तत्वं वा न सम्यगवतिष्ठते ॥
पदे नित्येऽपि वैदिक्यो रचनाः कर्तृपूर्विकाः ।
नित्या वा कृतकत्वेऽपि कृताः केनेति दुर्गमम् ॥
कर्तास्ति स च निर्द्वन्द्वः स चैकः स च सर्ववित् ।
स च कारुणिको वेति प्रतिपत्तुं न शक्यते ॥
परस्परविरुद्धाश्च सन्ति भूयांस आगमाः ।
तेषां कस्येश्वरः कर्ता कस्य नेति न मन्महे ॥
वेदे दोषाश्च विद्यन्ते व्याघातः पुनरुक्तता ।
फलस्यानुपलम्भश्च तथा फलविपर्ययः ॥

नियोगभावनाभेदेति । भेदः संसर्गो वा वाक्यार्थ इति वैयाकरणाः केचित् । आदिग्रहणाद् भेदसंसर्गौ वाक्यार्थ इत्यपि संगृहीतम्, तथा क्रिया वाक्यार्थ इत्यपि । नियोगभावनावादिमते नियोगस्य भावनाया वा संसृष्टाया वाक्यात् प्रतीयमानत्वात् तयोरेवैकतरस्य वाक्यार्थत्वम्, न संसर्गस्य भेदस्य वा तत्प्रतीत्युत्तरकालं प्रतीयमानस्य ।

व्यतिषक्तार्थमिति तदुक्तम् "व्यतिषक्ततोऽवगतेर्व्यतिषङ्गस्य" इति ।

परस्परविरुद्धाश्चेति । नाथवादाद्यागमा अशुचिलक्षणादिप्रतिपादका ईश्वरप्रणीततयाभिमताः केषाञ्चित्, तदपेक्षयेदमुक्तम् ।

व्याघातः यथा 'उदिते जुहोत्यनुदिते जुहोति' इत्यादौ । **पुनरुक्तता** यथा 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति । सकृदुच्चारणेनैव कर्मस्वरूपप्रकाशसिद्धेः पुनरुच्चारणं पुनरुक्तम् । **फलस्यानुपलम्भः** कृतायामपि पुत्रकामेष्टावनन्तरं पुत्रस्यानुपलम्भात् ।

कीदृशश्चार्थवादानां विरुद्धार्थाभिधायिनाम् ।
मन्त्राणां नामधेयादिपदानां वा समन्वयः ॥
सिद्धकार्योपदेशाच्च वेदे संशेरते जनाः ।
किमस्य कार्ये प्रामाण्यं सिद्धेऽर्थे वोभयत्र वा ॥
तेन वेदप्रमाणत्वं विषमे पथि वर्त्तते ।
जीविकोपायबुद्ध्या वा श्रद्धया वाभ्युपेयताम् ॥

तत्र शङ्कापरिहारः

अत्राभिधीयते । सर्व एवैते दोषा यथाक्रमं परिहरिष्यन्ते इत्यलं समाश्वासेन सुप्रतिष्ठमेव वेदप्रामाण्यमवगच्छत्वायुष्मान् ।

नन्वर्थासंस्पर्शित्वमेव तावत् कथं परिह्रियते ? न हि बाह्येऽर्थे शब्दाः प्रतीतिमादधति ते हि दुर्लभवस्तुसम्पर्कविकल्पमात्राधीनजन्मानः स्वमहिमानमनुवर्त्तमानास्तिरस्कृतबाह्यार्थसमन्वयान् विकल्पप्रायान् प्रत्ययानुत्पादयन्तो दृश्यन्ते अङ्गुल्यग्रे हस्तियूथशतमास्ते इति, स्वभाव एव शब्दानामर्थासंस्पर्शित्वम् । चक्षुरादीनामप्यलीककचकूर्चकादिप्रतीतिकारणत्वमस्ति न च तेषामर्थासंस्पर्शित्वमिति चेत्, तेषां हि तिमिरादिदोषकलुषितवपुषां तथाविधविभ्रमकारणत्वम्, न तु स्वमहिम्नैव । इहापि पुरुषदोषाणामेष महिमा न शब्दानामिति चेद्,

मैवम् । दोषवतापि पुरुषस्य मूकादेरनुच्चारितशब्दस्येदृशविप्लवोत्पादन-

---

विपर्ययः अन्त्येष्टयाम् तत्र हि पात्रचयं विधायाह 'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति' इति, स्वर्गफलविपरीतस्य भस्मीभावस्योपलम्भात् । यजमानशरीरावयवेषु यज्ञपात्राणां विशिष्टेन रूपेण विरचनं पात्रचयः । **अर्थवादानाम् विरुद्धार्थाभिधायिनाम्** । 'धूम एवाग्नेर्दिवा ददृशे नार्चिः, अर्चिरेवाग्नेर्नक्तं ददृशे न धूमः' इत्यादीनाम् । **मन्त्राणाम्** च कीदृशोऽन्वयो विधायकत्वेनाभिधायकत्वेन वा । **नामधेयादिपदानाम्** उद्भिदादीनां किं गुणार्थत्वेन समन्वय उत कर्मनामधेयतयेति । **जीविकोपायबुद्ध्ये**ति । यथोक्तम्

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्म मुण्डनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥ इति ॥

पाटवाभावात् । असत्यपि च पुरुषहृदयकालुष्ये यथा प्रयुज्यमानान्यङ्गुल्यग्रादिवाक्यानि विप्लवमावहन्त्येवेति शब्दानामेवैष स्वभावो न वक्तृदोषाणाम् । अपि च न चक्षुरादिबाधकज्ञानोदये सति न विरमति विपरीतवेदनजन्मनः शुक्तिकारजतादिबुद्धिषु विभ्रमस्यापायदर्शनात् । शब्दस्तु शतकृत्वोऽपि बाध्यमानो यथैवोच्चरितः 'करशाखादिशिखरे करेणुशतमास्ते' इति तदैव तथाभूतं भूयोऽपि विकल्पमयथार्थमुत्पादयत्येवेति, विकल्पाधीनजन्मत्वाच्छब्दानामेवेदं रूपं यदर्थासंस्पर्शित्वं नामेति । तदुक्तम्

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
तेषामन्योन्यसम्बन्धे नार्थं शब्दाः स्पृशन्त्यमी ॥ इति ।

अत्राभिधीयते भवेदेतदेवं यदि न कदाचिदपि यथार्थं शब्दः प्रत्ययमुपजनयेत् । अर्थसंस्पर्शित्वमेवास्य स्वभाव इत्यवगम्यते, भवति तु गुणवत्पुरुषभाषितान्नद्यास्तीरे फलानि सन्तीति वाक्याददतिरस्कृतबाह्यार्थो यथार्थः प्रत्ययः, ततः प्रवृत्तस्य तदर्थप्राप्तेः । न चेयमर्थप्राप्तिरर्थस्पर्शशून्यादपि शब्दविकल्पात् पारम्पर्येण मणिप्रभामणिबुद्धिवदवकल्पते इत्युपरिष्टाद् वक्ष्यामः ।

ननु गुणवद्वक्तृकादङ्गुल्यादिवाक्याद् दृष्ट एवासमीचीनः प्रत्ययः ? मैवम् गुणवतामेवंविधवाक्योच्चारणचापलाभावात् ।

यत्तु आप्तोऽपि कश्चिदनुशास्ति मा भवानभूतार्थं वाक्यं वादीः 'अङ्गुलिकोटौ करिघटाशतमास्ते' इति, तत्रेतिकरणावच्छिन्नस्य दृष्टान्ततया शब्दपरत्वेनोपादानात् प्रतिषेधैकवाक्यतया यथार्थत्वमेव । अर्थपरत्वे तु निषेधवाक्यैकवाक्यतैव न स्यादिति । तस्मादाप्तवाक्यानामयथार्थत्वाभावान्न स्वतोऽर्थासंस्पर्शिनः शब्दाः पुरुषदोषानुषङ्गकृत एवायं विप्लवः ।

विकल्पयोनयः शब्दा इति । 'अमुमर्थं प्रतिपादयामि' इत्येवमात्मकविकल्पोपारूढार्थप्रतिपादनाय शब्दप्रयोगात् शब्दाच्च 'अयमर्थोऽवगतः' इत्येवंरूपविकल्पोदयात् ।

निषेधवाक्यैकवाक्यतैव न स्यादिति । अननुभूतार्थं न प्रयोक्तव्यं यथा किमिति शब्दपरत्वे भवत्येकवाक्यता, अर्थपरत्वे तु यथा किमित्यपेक्षायामङ्गुल्यग्रहस्तियूथशतयोराधाराधेयसम्बन्धरूपोऽर्थो न सङ्गच्छते ।

नन्वाप्तैरेवंविधवाक्याप्रयोगेऽपि सन्दिग्धो व्यतिरेकः किं शब्दाभावादयथार्थप्रत्ययानुत्पादः, उत वक्तृदोषाभावादिति ? नैतदेवम्

अनुच्चरितशब्दोऽपि पुरुषो विप्रलम्भकः ।
हस्तसंज्ञाद्युपायेन जनयत्येव विप्लवम् ॥

न च हस्तसंज्ञादिना शब्दानुमानं तत्कृतश्च विप्लव इति वक्तव्यम् । इत्थमप्रतीतेः । उत्पन्ने च क्वचिन्नद्यादिवाक्याद् विज्ञाने तरङ्गिणीतीरमनुसरन् अनासादितफलः प्रवृत्तबाधकप्रत्ययः पुरुषमेवाधिक्षिपति 'धिक् हा तेन दुरात्मना विप्रलब्धोऽस्मी'ति न शब्दम् । प्राप्तफलश्च पुमांसमेव श्लाघते 'साधु साधुना तेनोपदिष्टम्' । इत्यतः पुरुषदोषान्वयानुविधानात् तदभावकृत एव आप्तेषु तूष्णीमासीनेषु विभ्रमानुत्पाद इति न सन्दिग्धो व्यतिरेकः । पुरुषदोषकृत एव शब्दाद् विप्लवो न स्वरूपनिबन्धनः ।

ननु पुरुषदोषास्तत्र किं कुर्युः ? पुरुषस्य हि गुणवता दोषवता वा शब्दोच्चारणमात्रे एव व्यापारः । ततः परन्तु कार्यं शब्दायत्तमेवेति तत्स्वरूपकृत एवायं विभ्रमः । हन्त तर्हि वक्तरि गुणवति सति सरितस्तीरे फलानि सन्तीति सम्यक्प्रत्ययेऽपि शब्दस्यैव व्यापारात् पुरुषस्योच्चारणमात्रे चरितार्थत्वान्नैकान्ततः शब्दस्यार्थासंस्पर्शित्वमेव स्वभावः । युक्तश्चैतदेव यद् दीपवत् प्रकाशत्वमात्रमेव शब्दस्य स्वरूपं न यथार्थत्वम् अयथार्थत्वं वा, विपरीतेऽप्यर्थे दीपस्य प्रकाशत्वानतिवृत्तेः । अयन्तु विशेषः, प्रदीपे व्युत्पत्तिनिरपेक्षमेव प्रकाशत्वं शब्दे तु व्युत्पत्त्यपेक्षमिति । प्रकाशात्मनस्तु शब्दस्य वक्तृगुणदोषाधीने यथार्थेतरत्वे । अत एवाङ्गुलिशिखराधिकरणकरेणुशतवचसि बाधितेऽपि पुनः पुनरुच्चार्यमाणे भवति विभ्रमः, प्रकाशकत्वतद्रूपानपायात् । न त्वेष शब्दस्य दोषः ।

पदार्थानान्तु संसर्गमसमीक्ष्य प्रजल्पतः ।
वक्तुरेव प्रमादोऽयं न शब्दोऽत्रापराध्यति ॥

तदुक्तम्, प्रमाणान्तरदर्शनमत्र बाध्यते न पुनर्हस्तियूथशतमिति शाब्दोऽन्वयः, पुरुषो हि स्वदर्शनं शब्देन परेषां प्रकाशयति । तत्र तद्दर्शनञ्चेद् दुष्टम्, दुष्टः शाब्दः प्रत्ययः, अदुष्टं चेददुष्ट इति । गुणवतः पुरुषस्यादुष्टं दर्शनं भवति दोषवतो

तदुक्तमिति । प्राभाकरं वचो ज्ञापकत्वेनाह **'प्रमाणान्तरदर्शनम्'** इति । वक्ता यद्वशेन परस्मै अर्थं प्रतिपादयति तदस्य प्रमाणान्तरदर्शनशब्देन विवक्षितम्, तच्च

दुष्टमिति । अदृष्ट्वापि वस्तु यदुपदिश्यते सोऽपि बुद्धिदोष एव । तस्मात् पुरुषगतगुणदोषान्वयव्यतिरेकानुविधायित्वात् तत्कृते एव शाब्दयथार्थत्वायथार्थत्वे । तत्तदुक्तं 'तथ्यमपि भवति वितथमपि भवति' इति ।

तेनाभिधातृदौरात्म्यकृतेयमयथार्थता ।
प्रत्ययस्येति शब्दानां नार्थसंस्पर्शिता स्वतः ॥
या तु जात्यादिशब्दार्थपराकरणवर्त्मना ।
अर्थसंस्पर्शिता प्रोक्ता सा पुरस्तान् निषेत्स्यते ॥

प्रामाण्यस्य स्वतस्त्वपरतस्त्वविचारोपक्रमः

प्रमाणत्वन्तु शब्दस्य कथमित्यत्र वस्तुनि ।
जैमिनीयैरयं तावत् पीठबन्धो विधीयते ॥
प्रामाण्यमप्रामाण्यं वा सर्वविज्ञानगोचरः ।
स्वतो वा परतो वेति प्रथमं प्रविविच्यताम् ॥

ननु शब्दप्रामाण्यचिन्तावसरे सकलप्रमाणप्रामाण्यविचारस्य कः प्रसङ्गः? न स्वातन्त्र्येण परीक्षणमपि तु तदर्थमेव समानमार्गत्वात्,

अथान्येषां स्वतः परतो वा प्रामाण्यम्, तथा शब्दस्यापि भविष्यतीति न हि तस्य स्वरूपमिव प्रामाण्यमपि तद् विसदृशमिति । तदुच्यते, किं विज्ञानानां प्रामाण्यमप्रामाण्यञ्चेति द्वयमपि स्वतः, उत उभयमपि परतः, आहोस्विद् अप्रामाण्यं स्वतः, प्रामाण्यन्तु परतः, उतस्वित्प्रामाण्यं स्वतः, अप्रामाण्यन्तु परतः इति,

प्रामाण्यं स्वत इति मीमांसकाः

तत्र द्वयमपि स्वत इति तावदसाम्प्रतम्, प्रवृत्तस्य विसंवाददर्शनात् । यदि हि प्रामाण्यमितरद् वा स्वत एव ज्ञानस्य गम्यते तर्हि शुक्तौ रजतज्ञानं प्रमाणतया वा प्रतिपन्नम् अन्यथा वा ?

प्रमाणत्वपरिच्छित्तौ विसंवदति तत्कथम् ।
अप्रामाण्यगृहीतौ वा तस्मिन् कस्मात् प्रवर्त्तते ॥

कदाचिदज्ञानमोहाद्यपि भवति । तत्तथ्यमपि भवतीति । पौरुषेयं वच इति प्रकृतम् ।
पीठबन्धः भूमिकारचनम् ।

एतेन तृतीयोऽपि पक्षः प्रत्युक्तः यदप्रामाण्यं स्वतः, प्रामाण्यं परत इति स्वतो ह्यप्रामाण्ये निश्चिते प्रवृत्तिर्न्न प्राप्नोतीति । किञ्च अप्रामाण्यमुत्पत्तौ कारणदोषापेक्षम्, निश्चये च बाधकज्ञानापेक्षम्, तत्कथं स्वतो भवितुमर्हति। यच्च 'अप्रामाण्यमवस्तुत्वान्न स्यात् कारणदोषतः' इति कैश्चिदुच्यते तदपि यत्किञ्चित् । संशयविपर्ययात्मनोऽप्रामाण्यस्य वस्तुत्वात् तद्गतम् अप्रामाण्यमपि वस्त्वेवेति । परतस्तु प्रामाण्यं यथा नावकल्पते तथा विस्तरेणोच्यते । एवञ्चायं द्वयमपि परत इति द्वितीयपक्षप्रतिक्षेपोऽपि भविष्यति । अर्थतथात्वप्रकाशकं हि प्रमाणमित्युक्तम्, तस्य स्वप्रमेयाव्यभिचारित्वं नाम प्रामाण्यम् । अतश्च परापेक्षायां सत्यां परत इति कथयितुमुचितम् । न चास्य परापेक्षा क्वचिद् विद्यते, सा हि भवन्ती उत्पत्तौ वा स्यात्, स्वकार्यकरणे वा, प्रामाण्यनिश्चये वा । उत्पत्तौ कारकस्वरूपमात्रापेक्षा, तदतिरिक्ततद्गतगुणापेक्षा वा ? कारकस्वरूपमात्रापेक्षायां सिद्धसाध्यत्वम्, असत्सु कारकेषु कार्यस्य ज्ञानस्यात्मलाभाभावात् कस्य प्रामाण्यमप्रामाण्यं वा चिन्त्यते ? कारकातिरिक्ततदधिकरणगुणापेक्षणन्तु दुर्घटम्, अप्रामाणिकत्वेन कारणगुणानामाकाशकुशेशयसदृशवपुषामपेक्षणीयत्वाभावात् ।

न कारणगुणग्राहि प्रत्यक्षमुपपद्यते ।
चक्षुरादेः परोक्षत्वात् प्रत्यक्षास्तद्गुणाः कथम् ॥
लिङ्गञ्चादृष्टसम्बन्धं न तेषामनुमापकम् ।
यथार्थबुद्धिसिद्धिस्तु निर्दोषादेव कारकात् ॥

यदि हि यथार्थत्वायथार्थत्वरूपद्वयरहितं किञ्चिदुपलब्ध्याख्यं कार्यं भवेत्ततः कार्यत्रैविध्यात् कारणत्रैविध्यमवश्यमवसीयेत। यथार्थोपलब्धेर्गुणवत्कारकं कारकम्, अयथार्थोपलब्धेर्दोषकलुषं कारकं कारकम्, उभयरूपरहितायास्तु तस्याः स्वरूपावस्थितमेव कारकं कारकमिति, न त्वेवमस्ति । द्विविधैव खल्वियमुपलब्धिः यथार्थत्वायथार्थत्वभेदेन । तत्र अयथार्थोपलब्धिस्तावद् दुष्टकारककार्यैव दृष्टा ।

दृष्टः कुटिलकुम्भादिसम्भवो दुष्टकारणात् ।
तथा मानान्तरमितात् तिमिरादेर्द्विचन्द्रधीः ।

अप्रामाण्यमवस्तुत्वादिति । अप्रामाण्यं धर्मि, कारणदोषतो न स्यादिति साध्यम्, अवस्तुत्वादिति हेतुः । 'वस्तुत्वात्तु गुणैस्तेषां प्रामाण्यमुपजन्यते' इत्युत्तरमर्धम् ।

अयथार्थोपलब्धौ च दुष्टकारककार्यत्वेन सिद्धायामिदानीं तृतीयकार्याभावात् यथार्थोपलब्धिः स्वरूपावस्थितेभ्य एव कारकेभ्योऽवकल्पत इति न गुणकल्पनायै प्रभवति। अनुमाने च यैव पक्षधर्मान्वयादिसामग्री ज्ञानस्य जनिका सैव प्रामाण्यकारणत्वेन दृष्टा। न च स्वरूपस्थितानि कारणानि कार्यजन्मन्युदासत एव, येन यथार्थोपलब्धिजनने तेषां गुणसहकारिता कल्प्यते इत्यतो न सन्ति कारणगुणाः। नैर्मल्यव्यपदेशस्तु लोचनादेः काचकामलादिदोषापायनिबन्धन एव न स्वरूपातिरिक्तगुणकृतः। अञ्जनाद्युपयोगोऽपि दोषनिर्हरणायैव न गुणजन्मने।

तस्मादवितथा संवित् स्वरूपस्थितहेतुजा।
दोषाधिकैस्तु तैरेव जन्यते विपरीतधीः॥
अत एवाप्रमाणत्वं परतोऽभ्युपगम्यते।
जन्मन्यपेक्षते दोषान् बाधकञ्च स्वनिश्चये॥

तस्मान्न उत्पत्तौ गुणापेक्षं प्रामाण्यम्, नापि स्वकार्यकरणे किञ्चिदपेक्षते, अर्थप्रकाशनस्वभावस्यैव तस्य स्वहेतोरुत्पादात्। अर्थप्रकाशनमेव च प्रमाणकार्यं प्रवृत्त्यादेः पुरुषेच्छानिबन्धनत्वात्।

नैव वा जायते ज्ञानं जायते वा प्रकाशकम्।
अर्थप्रकाशने किञ्चिन्न तूत्पन्नमपेक्षते॥

तथा चोक्तम्

मृद्दण्डचक्रसूत्रादि घटो जन्मन्यपेक्षते।
उदकाहरणे त्वस्य तदपेक्षा न विद्यते॥ इति।

अथवा

सापेक्षत्वं घटस्यापि सलिलाहरणं प्रति।
यत्किञ्चिदस्ति न त्वेवं प्रमाणस्योपपद्यते॥
न च स्वग्रहणापेक्षं ज्ञानमर्थप्रकाशकम्।
तस्मिन्ननवबुद्धेऽपि तत्सिद्धेश्चक्षुरादिवत्॥

उक्तञ्च 'न ह्यज्ञातेऽर्थे कश्चिद् बुद्धिमुपलभते ज्ञाते त्वनुमानादवगच्छति' इति। तस्मात् स्वकार्यकरणेऽपि न स्वग्रहणापेक्षं प्रमाणम्, नापि प्रामाण्यनिश्चये किञ्चिदपेक्षते अपेक्षणीयाभावात्। तथा ह्यस्य कारणगुणज्ञानाद् वा प्रामाण्य-

निश्चयो भवेद्, बाधकाभावज्ञानाद् वा, संवादाद् वा ?

न तावत् कारणगुणज्ञानात् कारणगुणानामिदानीमेव निरस्तत्वात्। अपि च न कारकगुणज्ञानमिन्द्रियकारणकम्, अतीन्द्रियकारकाधिकरणत्वेन परोक्षत्वाद् गुणानाम्, अपि तूपलब्ध्याख्यकार्यपरिशुद्धिसमधिगम्यगुणस्वरूपम्, अप्रवृत्तस्य च प्रमातुर्न कार्यपरिशुद्धिर्भवति तन्नेदानीं प्रामाण्यनिश्चयपूर्विका प्रवृत्तिर्भवेत्। अन्यथा वा, अनिश्चितप्रामाण्यादेव ज्ञानात् प्रवृत्तिसिद्धौ किं पश्चात्तन्निश्चयेन प्रयोजनम् ? निश्चितप्रामाण्यात्तु प्रवृत्तौ दुरतिक्रमश्चक्रकक्रकचपातः, प्रवृत्तौ सत्यां कार्यपरिशुद्धिग्रहणं कार्यपरिशुद्धिग्रहणात् कारणगुणावगतिः, कारणगुणावगतेः प्रामाण्यनिश्चयः। प्रामाण्यनिश्चयात् प्रवृत्तिरिति ?

नापि बाधकाभावपरिच्छेदात् प्रामाण्यनिश्चयः। स हि तात्कालिको वा स्यात कालान्तरभावी वा ?

तात्कालिको न पर्याप्तः प्रामाण्यपरिनिश्चये।

कूटकार्षापणादौ किञ्चित्कालमनुत्पन्नबाधकेऽपि कालान्तरे तदुत्पाददर्शनात्।

सर्वथा तदभावस्तु नासर्वज्ञस्य गोचरः॥

अथ संवादात् प्रामाण्यनिश्चय उच्यते ? तद्व्युच्यतां कोऽयं संवादो नाम। किमुत्तरं तद्विषयं ज्ञानमात्रम्, उतार्थान्तरज्ञानम्, आहोस्विदर्थक्रियाज्ञानमिति। आद्ये पक्षे कः पूर्वोत्तरज्ञानयोर्विशेषो यदुत्तरज्ञानसंवादात् पूर्वं पूर्वं ज्ञानं प्रामाण्यमश्नुवीत।

अपि चोत्तरसंवादात् पूर्वपूर्वप्रमाणताम्।
वदन्तो नाधिगच्छेयुरन्तं युगशतैरपि॥
सुदूरमपि गत्वा तु प्रामाण्यं यदि कस्यचित्।
स्वत एवाभिधीयेत को द्वेषः प्रथमं प्रति॥

यदाह

कस्यचित्तु यदीष्येत स्वत एव प्रमाणता।
प्रथमस्य तथाभावे विद्वेषः किं निबन्धन इति॥

चक्रकेति त्रियन्त्यादीनां(?) परस्परसापेक्षाणां चक्रवद् भ्रमतां चक्रकव्यपदेशः।

अथान्यविषयज्ञानमन्यस्य संवाद उच्यते ? तदयुक्तम्, अदर्शनात्, न हि स्तम्भज्ञानं कुम्भज्ञानस्य संवादः ।

अथार्थक्रियाज्ञानसंवादात् प्रथमस्य प्रवर्त्तकस्य ज्ञानस्य प्रामाण्यमिष्यते । तदपि ह्यनवसितप्रामाण्यं कथमादिमस्य प्रामाण्यमवगमयेत् ? कश्चार्थक्रियाज्ञानस्य पूर्वस्माद्विशेषो यदेतदायत्तस्तस्य प्रामाण्याधिगमः ? अर्थक्रियाज्ञानत्वमेव विशेष इति चेत् किल सलिलज्ञानमाद्यमविद्यमानेऽपि पयसि पूषदीधितिषु दृष्टमिति न भवति विस्रम्भभूमिः, इदं पुनरर्थक्रियासंवेदनमम्बुमध्यवर्त्तिनः पानावगाहनादिविषयमपीत्यनवधारितव्यभिचारतया तत्प्रामाण्यनिश्चयाय कल्पत इति । तदसत् । स्वप्ने पानावगाहनस्यापि व्यभिचारोपलब्धेः । किञ्च चरमधातुविसर्गोऽपि स्वप्ने सीमन्तिनीमन्तरेण भवतीति महानेष व्यभिचारः ।

अथ रागोद्रेकनिमित्तत्वेन, पित्तादिधातुविकृतिनिबन्धनत्वेन वा तद्विसर्गस्य न स्वसाधनव्यभिचार इत्युच्यते, तदसमञ्जसम् । असकृदनुभूतयुवतिपरिरम्भाद्यन्वयव्यतिरेकानुविधायित्वेन तत्कार्यत्वावधारणात् ।

तस्मादर्थक्रियाज्ञानव्यभिचारावधारणात् ।
तत्प्रामाण्यपरीक्षायामनवस्था न शाम्यति ॥

अथ वाप्तफलत्वेन किं तत् प्रामाण्यचिन्तया ।

न चेदमर्थक्रियाज्ञानमप्रवृत्तस्य पुंसः समुद्भवति । तत्र प्रामाण्यावधारणपूर्विकायां प्रवृत्तौ कारणगुणनिश्चेयप्रामाण्यचर्चाबद्धचक्रकक्रकचचोद्यप्रसङ्गस्तदवस्थ एव । अनिश्चितप्रामाण्यस्य तु प्रवृत्तौ पश्चात्तन्निर्णयो भवन्नपि कृतक्षौरस्य नक्षत्रपरीक्षावदफल एवेत्युक्तम् ।

तत्रैतत्स्याद्, द्विविधा हि प्रवृत्तिराद्या चाभ्यासिकी च । तत्राद्या यथा विनिहितसलिलावसिक्तमसृणमृदि शरावे शाल्यादिबीजशक्तिपरीक्षणाय कतिपयबीजकणवापरूपा । ततस्तत्र तेषामङ्कुरकरणकौशलमविकलमवलोकयन्तः कीनाशा निःशङ्कं केदारेषु तानि बीजान्यावपन्तीति सेयमाभ्यासिकी प्रवृत्तिः । एवमिहापि प्रथमपरीक्षितप्रमाणभावादेव ज्ञानात् कुतश्चित् कश्चिद् विपश्चिदपि व्यवहरंस्तद्व्यवहारपरस्तत्तत्फलज्ञाने तस्य प्रामाण्यमवगच्छन् पुनस्तथाविधे जाते

सति सुखमेव प्रवृत्त्यादिकं व्यवहारमशङ्कितकालुष्यः करिष्यतीति न सर्वात्मना वैयर्थ्यमिति । उच्यते । विषमोऽयं दृष्टान्तः ।

तज्जातीयतया बीजं शक्यते यदि वेदितुम् ।
तत्र तन्निश्चयाद् युक्तं निर्विशङ्कं प्रवर्त्तनम् ॥
ज्ञाने तथाविधत्वन्तु बोधरूपाविशेषतः ।
कार्याद् वा कारणाद् वापि ज्ञातव्यं न स्वरूपतः ॥ इति ।
कारणानां परोक्षत्वान्न तद्द्वारा तदा गतिः ।
कार्यात्तु नाप्रवृत्तस्य भवतीत्युपवर्णितम् ॥
तस्माद् वैयर्थ्यचोद्यस्य नायं परिहृतिक्रमः ।
एवञ्चार्थक्रियाज्ञानात् कीदृक् प्रामाण्यनिश्चयः ॥
समर्थकारणज्ञानाद् योऽपि प्रामाण्यनिश्चयम् ।
ब्रूते सोऽपि कृतोद्वाहस्तत्र लग्नं परीक्षते ।

किलातिविकसितकुसुममकरन्दपानमुदितमधुकरकुले कस्मिंश्चिदुद्याने वाद्यमानायां वीणायां निरन्तरलतासन्तानान्तरितवपुषि विदूरादनवलोक्यमाने वादके वीणाध्वनिसंविदि रोलम्बनादसंदेहदूषितायां तदभिमुखमेव प्रतिष्ठमानः श्रोता परिवादके दर्शनपथमवतीर्णे स्वरानुकूलकारणनिश्चयात् तत्प्रतीतौ संशयनिवृत्तेः प्रामाण्यं निश्चिनोतीत्येष समर्थकारणज्ञानकृतः प्रामाण्यनिश्चयः ।

तत्रापि नाप्रवृत्तस्य हेतुसामर्थ्यदर्शनम् ।
एवमेव प्रवृत्तौ तु निश्चितेनापि तेन किम् ॥
तन्निश्चयात् प्रवृत्तौ वा पुनरन्योन्यसंश्रयम् ।
तन्निश्चयात् प्रवृत्तिः स्यात् प्रवृत्तेस्तद्विनिश्चयः ॥

तदेवं न कुतश्चिदपि प्रामाण्यनिश्चयः चक्रकेतरेतराश्रयानवस्थावैयर्थ्यादिदूषणातीतस्थितिरस्तीति । अतः प्रामाण्यनिश्चयेऽपि न किञ्चिदपेक्षते प्रमाणम् । ततश्चोत्पत्तौ स्वकार्यकरणे स्वप्रामाण्यनिश्चये च निरपेक्षत्वादपेक्षात्रयरहितत्वात् स्वतः प्रामाण्यमिति सिद्धम् । तदुक्तम्

स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते ॥

अप्रामाण्यन्तूत्पत्तौ दोषापेक्षत्वात्, स्वनिश्चये बाधकप्रत्ययादिसापेक्षत्वात्, परत इत्युक्तमेव । तस्मात् पक्षत्रयस्यानुपपत्तेश्चतुर्थ एवायं पक्षः श्रेयान्, प्रामाण्यं स्वतः, अप्रामाण्यं परत इति ।

ननु चोत्पत्तिवेलायां न विशेषोऽवधार्यते ।
प्रमाणेतरयोस्तेन बलाद् भवति संशयः ॥

परिच्छित्तिमात्रं प्रमाणकार्यम्, तच्च यथार्थेतरप्रमितिसाधारणं रूपम्, साधारणधर्मग्रहणञ्च संशयकारणमिति प्रसिद्धः पन्थाः । एवं च स्थिते

प्रमाणान्तरसंवादविसंवादौ विना कथम् ।
प्रमाणेतरनिर्णीतिरतश्च परतो द्वयम् ।

तदेतदचतुरस्रम् । सत्यम्, परिच्छित्तिरेव प्रमाणकार्यम्, सा पुनरुपजायमानैव न संदेहादिदूषिततनुरुपलभ्यते इत्यौत्सर्गिकं प्रामाण्यमेव सा भजते । अर्थपरिच्छेदाच्च प्रवर्त्तमानः प्रमाता प्रमाणेनैव प्रवर्त्तितो भवति न संशयात् प्रवृत्तः । स्थितिश्चैवमौत्सर्गिके प्रामाण्ये, यत्र तस्यापवादः क्वचिद् भवति तत्राप्रामाण्यम् । अप्रामाण्ये चावश्यम्भावी अपवादः । द्विविध एव तदपवादः, बाधकप्रत्ययः, कारणदोषज्ञानञ्च । तदुक्तं भाष्यकृता 'यत्र च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्ययो नान्यः' इति । वार्त्तिककारोऽप्याह

तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥ इति

तत्र बाधकज्ञानं पूर्वज्ञानोपमर्दद्वारेणैव तस्मिन् विषये जायते इति समानविषयत्वात् स्पष्टमेव बाधकम्, कारणदोषज्ञानन्तु भिन्नविषयमपि कार्यैक्याद् बाधकतां प्रतिपद्यते । यथा 'चमसेनापः प्रणयन्ती'ति दर्शपूर्णमासाङ्गत्वात् क्रत्वर्थश्चमसः ।

अर्थान्यथात्वेति । अर्थान्यथात्वाज्ञानात् 'शुक्तिकेयं न रजतम्' इत्यादौ, हेतूत्थदोषज्ञानात् कारणदोषज्ञानाद् द्विचन्द्रज्ञानादौ ।

चमसेनापः प्रणयन्तीति । चमसेन यज्ञपात्रविशेषेण अपः प्रणयन्ति विशिष्टेन मन्त्रेण प्राङ् नयन्ति, गार्हपत्यदेशादाहवनीयदेशं नयन्ति । पिष्टसंयवनाद्यर्थं ताभिः संयुते पिण्डीकृते पिष्टे पुरोडाशनिर्वृत्तिद्वारेणाग्नेयोऽष्टाकपालो भवतीति प्रधानयागनिर्वृत्तेः क्रतूपकारकत्वात् क्रत्वर्थश्चमसः ।

'गोदोहनेन पशुकामस्य प्रणयेदि'ति काम्यमानपशुनिर्देशात् पुरुषार्थगोदोहनेन निवृ'त्तो तस्मिंश्चमसो निवर्त्तते। एवमिह कारणदोषज्ञानं दोषविषयमपि दोषाणामयथार्थज्ञानजननस्वभावत्वात् तस्य ज्ञानस्य प्रामाण्यं बाधते। तदुक्तम्

दुष्टकारणबोधे तु जातेऽपि विषयान्तरे।
अर्थात् तुल्यार्थतां प्राप्य बाधो गोदोहनादिवदिति ॥

यत्र पुनरिदमपवादद्वयमपि न दृश्यते तत्र तदौत्सर्गिकं प्रामाण्यमनपोदितमास्ते इति न मिथ्यात्वाशङ्कायां निमित्तं किञ्चित्। यदाह

दोषज्ञाने त्वनुत्पन्ने नाशङ्का निष्प्रमाणिका। इति।

तथाहि

कश्चिदुत्पन्न एवेह स्वसंवेद्योऽस्ति संशयः।
स्थाणुर्वा पुरुषो वेति को नामापह्नुवीत तम् ॥
हठादुत्पद्यमानस्तु हिनस्ति सकलाः क्रियाः।
स्वभार्यापरिरम्भेऽपि भवेन्मातरि संशयः ॥
विनाशी संशयात्मेति पाराशर्योऽप्यभाषत।
नायं लोकोऽस्ति कौन्तेय न परः संशयात्मनः ॥ इति।

यत्रापि क्वचिद् बाधकप्रत्यये संशयो जायते तत्रापि तृतीयज्ञानापेक्षणान्नानवस्था, न च स्वतः प्रामाण्यहानिः। यत्र प्रथमविज्ञानसंवादि तृतीयज्ञानमुत्पद्यते

गोदोहनेन पशुकामस्य प्रणयेदिति। यः पशुकामो यजमानस्तदर्थं गावो दुह्यन्ते यस्मिन् पात्रे तेनाध्वर्युरपां प्रणयनं कुर्यात्; अत्र गोदोहनमिष्टपशुसम्पादकत्वेन पुरुषेणार्थ्यमानत्वात् पुरुषार्थम्, क्रतोस्तु चमसकृतेनैव प्रणयनेनोपकारसिद्धेः क्रतुनाऽनपेक्षमाणत्वान्न क्रत्वर्थम्। तदेवमनयोः क्रत्वर्थपुरुषार्थत्वेन भिन्नविषयत्वेऽपि गोदोहनं प्रणयनमकुर्वन्न फलाय प्रभवति, क्रियामनाश्रित्य कारणस्य शुद्धस्य फलं जनयितुमसामर्थ्यात्; अतस्तेन प्रणयनमवश्यं कार्यम्; तेन चेत् प्रणयनं क्रियते कृतत्वात् प्रणयनस्य तेनैव संयवनादिकार्यसिद्धेरर्थाच्चमसो निवर्तते। नन्वत्रास्त्वेककार्यत्वान्निवृत्तिः, दार्ष्टान्तिके तु द्विचन्द्रज्ञानदोषज्ञानादौ कीदृश्येककार्यता ? उच्यते। एकस्मिन्नर्थे तथात्वातथात्वप्रदर्शनेन व्यापार एककार्यत्वम्। दोषज्ञानम् 'दुष्टं मे चक्षुः' इति ज्ञानम् दोषाणामयथार्थज्ञानजननद्वारेण द्विचन्द्रज्ञानप्रतिभासिनोऽर्थस्यातथात्वं ज्ञापयति, द्विचन्द्रज्ञानन्तु

तत्र प्रथमस्य प्रामाण्यमौत्सर्गिकं स्थितमेव, द्वितीयविज्ञानारोपितालीककालुष्यशङ्कानिराकरणन्त्वस्य तृतीयेन क्रियते, न त्वस्य संवादात् प्रामाण्यम् । यदि तु द्वितीयज्ञानसंवादि तृतीयं ज्ञानं तदा प्रथमस्याप्रामाण्यम्, तच्च परत इष्टमेव । द्वितीयस्य तु ज्ञानस्य न तृतीयसंवादकृतं प्रामाण्यम्, अपि तु सङ्कल्प्यमानकुशङ्काचमनमात्रे तस्य व्यापारः । उक्तञ्च

एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः ।
प्रार्थ्यते तावतैवैकं स्वतः प्रामाण्यमश्नुते ।। इति ।

तदेवं सर्वप्रमाणानां स्वतः प्रामाण्ये सिद्धे समानन्यायतया शब्दस्यापि तथैव प्रामाण्यं भवति । न च नैसर्गिकमर्थासंस्पर्शित्वमेव शब्दस्य स्वरूपमिति परीक्षितमेतत्, किन्त्वर्थबोधजनकत्वात् तस्य नैसर्गिके प्रामाण्ये सति पुरुषदोषानुप्रवेशकारितः क्वचिद्धि विप्लवः । तदुक्तम्, 'शब्दे दोषोद्भवस्तावद् वक्त्रधीन इति स्थितम्' । तत्र पौरुषेये वचसि गुणवति वक्तरि तद्गुणापसारितदोषतया तत्प्रामाण्यमौत्सर्गिकमनपोदितं भवति । न तु गुणकृतं तत्प्रामाण्यमनङ्गत्वात् प्रामाण्ये गुणानाम्, बोधकत्वनिबन्धनमेव तदित्युक्तम् ।

वेदस्यापौरुषेयत्वात् स्वतः प्रामाण्यम्

वेदे तु प्रणेतुः पुरुषस्याभावात् दोषाशङ्कैव न प्रवर्तते, वक्त्रधीनत्वाद्दोषाणाम् । न च बाधकप्रत्ययोऽद्य यावद् वेदार्थे कस्यचिदुत्पन्न इति निरपवादं वेदप्रामाण्यम् । आह च

तत्रापवादनिर्मुक्तिर्वक्त्रभावाल्लघीयसी ।
वेदे तेनाप्रमाणत्वं न शङ्कामधिगच्छतीति ।।

तथात्वमेव स्वप्रतिभास्यस्यार्थस्यावेदयते; न वै तत् तथात्वमतथात्वञ्चैकस्य वस्तुनः सम्भवतीत्यर्थाद् बाध इत्यर्थः ।

त्रिचतुरज्ञानजन्मनो नाधिकेति । जन्मन इति पञ्चमी ।

वक्त्रधीन इति स्थितमित्यस्यापरमर्धम् 'तदभावः क्वचित्तावद् गुणवद्वक्तृकत्वतः' इति ।

वक्त्रभावाल्लघीयसी अयत्नसिद्धा ।

तदिदमुक्तं 'तत्प्रमाणं बादरायणस्यानपेक्षत्वादि'ति ।

गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात् ।
अपौरुषेयं सत्यार्थमिति युक्तं प्रचक्षते ॥
गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात् ।
अपौरुषेयं सत्यार्थमित्ययुक्तन्तु मन्वते ॥
न हि पुरुषगुणानां सत्यतासाधनत्वं
वचसि खलु निसर्गादेव सत्यत्वसिद्धिः ।
गुणमपि नरवाचां विप्लवाधायिदोष-
प्रशमनचरितार्थं सङ्गिरन्ते गुणज्ञाः ॥

प्रामाण्यस्य स्वतस्त्वपरिहारः

अत्राभिधीयते । प्रत्यक्षादिषु दृष्टार्थेषु प्रमाणेषु प्रामाण्यनिश्चयमन्तरेणैव व्यवहारसिद्धेस्तत्र किं स्वतःप्रामाण्यमुत परत इति विचारेण न नः प्रयोजनम्, अनिर्णय एव तत्र श्रेयान् । अदृष्टे तु विषये वैदिकेष्वगणितद्रविणवितरणादिक्लेश-साध्येषु कर्मसु तत्प्रामाण्यावधारणमन्तरेण प्रेक्षावतां प्रवर्त्तनमनुचितमिति तस्य प्रामाण्यनिश्चयोऽवश्यकर्त्तव्यः । तत्र परत एव वेदस्य प्रामाण्यमिति वक्ष्यामः ।

तत् प्रमाणं बादरायणस्येति । तत् शाब्दं बादरायणस्याचार्यस्य मतेऽनपेक्षत्वात् प्रमाणम्, अन्यानपेक्षं प्रमाणं स्वत एव प्रमाणमित्यर्थः ।

एवं मीमांसकदृष्ट्या स्वतः प्रामाण्यं प्रतिपाद्य वेदस्य तदप्रामाण्ये धर्मकीर्तेः । श्लोकद्वयम्

गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात् ।
अपौरुषेयं सत्यार्थमिति केचित् प्रचक्षते ॥

इत्येकं मीमांसकमतानुवादतया व्यवस्थितमपरञ्च तत्प्रतिषेधाय

गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात् ।
अपौरुषेयं मिथ्यार्थं किन्नेत्यन्ये प्रचक्षते ॥

इति व्यत्ययेनेति तदिदानीं यथा पठितुं युज्यते तथा पठितुमाह **गिरां मिथ्यात्वहेतूना**मित्यादिना ।

यच्चेदमियता विस्तरेण स्वतःप्रामाण्यमुपपादितं तद् व्याख्येयम्। स्वतः प्रामाण्यमिति कोऽर्थः, 'किं स्वत एव प्रमाणस्य प्रामाण्यं भवति' उत स्वयमेव तत् प्रमाणमात्मनः प्रामाण्यं गृह्णातीति ? न तावत् स्वयमेव प्रामाण्यग्रहणमुपपन्नम्, अप्रामाणिकत्वात्। तथा हि यदेतन्नीलप्रकाशने प्रवृत्तं प्रत्यक्षं तन्नीलं प्रति तावत् प्रत्यक्षं प्रमाणं तावदिन्द्रियार्थसन्निकर्षोत्पन्नमिति जानीम एव, एतत्किमत्र विचार्यते। प्रामाण्यपरिच्छेदे तु किं तत्प्रमाणमिति चिन्त्यताम्, प्रत्यक्षमनुमानं वा, प्रमाणान्तराणामनाशङ्कनीयत्वात्। न तावत् स्वप्रामाण्यपरिच्छेदे तत् प्रत्यक्षं प्रमाणं तद्विज्ञानस्य वा प्रामाण्यं गृह्णीयात्, तत्फलस्य वा। तत्र ज्ञातृव्यापारात्मनो ज्ञानस्य भवन्मते नित्यपरोक्षत्वात् प्रत्यक्षतः परिच्छेदानुपपत्तौ तत्प्रामाण्यस्यापि कथं प्रत्यक्षेण ग्रहणम् ? फलस्याप्यर्थप्रकाशनाख्यस्य संवेदनात्मनो नेन्द्रियसंसर्गयोग्यता विद्यते, येन तद्गतमपि यथार्थत्वलक्षणं प्रामाण्यमिन्द्रियव्यापारलब्धजन्मना प्रत्यक्षेण परिच्छिद्येत। न च मानसमपि प्रत्यक्षं फलगतयथार्थतावसायसमर्थमिति कथनीयम्, तदानीमननुभूयमानत्वात्। न हि नीलसंवित्प्रसवसमनन्तरं यथार्थेयं नीलसंवित्तिरिति संवेदनान्तरमुत्पद्यमानमनुभूयते। अनुभवे वा ततो द्वितीयात् प्रथमोत्पन्ननीलज्ञानयाथार्थ्यग्रहणान्न स्वतः प्रामाण्यनिश्चयः स्यात्। तस्मान्न प्रत्यक्षस्यैव विषयः। अनुमानेनापि कस्य प्रामाण्यं निश्चीयते ज्ञानस्य फलस्य वेति पूर्ववद्वाच्यम्। फलस्य तावत्तन्निश्चये लिङ्गत्वमेव तावन्न कस्यचित् पश्यामः। ज्ञातृव्यापारात्मनो ज्ञानस्य तु स्वकार्यं फलं भवेदपि लिङ्गं फलस्य क्रियामात्रव्याप्तिग्रहणात् स्वरूपसत्तामात्रमनुमापयितुमुत्सहते न यथार्थत्वलक्षणं प्रामाण्यम्। तद्धि फलं निर्विशेषणं वा स्वकारणस्य ज्ञातृव्यापारस्य प्रामाण्यमनुमापयेद्, यथार्थत्वविशिष्टं वा ? आद्ये पक्षे यतःकुतश्चन फलात् तत्प्रामाण्यानुमाने नेदानीं किञ्चिदप्रमाणं भवेत्। उत्तरोऽपि नास्ति पक्षः फलगतयाथार्थ्यपरिच्छेदोपायाभावादित्युक्तम्।

ननु सोऽनुभव एवात्रोपायः। तद्धि नीलसंवेदनतया फलं स्वत एव प्रकाशते, नीलसंवेदनत्वमेव चास्य यथार्थत्वं नान्यत्। यद्येवं शुक्तिकायामपि रजतसंवेदने समानो न्यायः, न हि रजतसंवेदनादन्या यथार्थत्वसंवित्तिरिति।

ननु तत्र बाधकप्रत्ययोपनिपातेनायथार्थत्वमुपनीयते नूनं चास्य मिथ्यादर्शनेषु, देशान्तरे वा शुक्तिकारजतादिज्ञाने, कालान्तरे वा कूटकार्षापणादिप्रतीतौ,

पुरुषान्तरे वा जाततैमिरिके द्विचन्द्रप्रतीतौ, अवस्थान्तरे पीतशङ्खादिप्रतिभासे भवति बाधकप्रत्ययः। तदसत्त्वे न तच्छङ्का युक्तिमतीत्युक्तमेव। सत्यमुक्तमयुक्तन्तु एवं हि वदता बाधकाभावज्ञानाधीनं प्रामाण्यमभिहितं भवति, तच्च तात्कालिकं कालान्तरभावि वेति कल्प्यमानं नोपपद्यते इति दर्शितम्। तस्मादुत्पद्यमानमेव प्रमाणमात्मनः प्रामाण्यं निश्चिनोतीति न युक्तमेतत्। यदि तु प्रसवसमये एव ज्ञानस्य प्रामाण्यं निश्चिनुयामः, तर्हि ततः प्रवर्त्तमाना न क्वचिदपि विप्रलभ्येमहि, विप्रलभ्यामहे तु, तेन मन्यामहे न निश्चितं तत्प्रामाण्यं संशयादेव व्यवहराम इति।

ननु संशयोऽपि तदा नानुभूयते एव किमिदं रजतमिति अपि तु रजतमित्येव प्रतीतिः। न हि संशयानाः प्रवर्त्तन्ते लौकिकाः किन्तु निश्चिन्वन्त एव विषयमिति। किमननुभूयमान एवारोप्यते संशयः? एकतरग्राह्यप्ययं प्रत्ययः तन्निश्चयोपायविरहात् संशयकोटिपतित एव बलाद्भवति, यथास्ति कूपे जलमिति भिक्षवो मन्यन्ते। एवं रजतमिदमित्येकपक्षग्राह्यपि तदानीं प्रतिभासः वस्तुवृत्तेन संशय एव, यदि हि प्रमाणतयासौ गृह्येत कथं क्वचिद् विसंवदेत्। अप्रमाणतया तु गृह्यमाणः कथं पुमांसं प्रवर्त्तयेत्?

उभाभ्यामपि रूपाभ्यामथ तस्यानुपग्रहः।
सोऽयं संशय एव स्यादिति किं नः प्रकुप्यसि॥

यत्तु नानुभूयते संशय इति। सत्यम्। अननुभूयमानोऽपि न्यायादभ्यस्ते विषयेऽविनाभावस्मरणात् स परिकल्प्यते, निश्चयनिमित्तस्य तदानीमविद्यमानत्वात्, संशयजननहेतोश्च सामग्र्याः सन्निहितत्वात्। तथा हि यथार्थेतरार्थसाधारणो धर्मो बोधरूपत्वमूर्ध्वत्वादिवत् तदा प्रकाशते एव, न च प्रामाण्याविनाभावी विशेषः कश्चन तदानीमवभाति, तदग्रहणे च समानधर्माधिगमप्रबोध्यमानवासनाधीना तत्सहचरितपर्यायानुभूतविशेषस्मृतिरपि सम्भवत्येवेति, इयं सा संशयजननी सामग्री सन्निहितैवेति कथं तज्जन्यः संशयो न स्यात्?

अस्ति कूपे जलमिति। एतद् ज्ञानमुभयकोटिस्पृक्त्वेनानुत्पद्यमानमपि संवादविसंवादाभावात् संशय इति कल्प्यते। संवादे सम्यग् ज्ञानं स्यात् विसंवादे तु मिथ्या, संशयविपर्ययसम्यग्ज्ञानातिरिक्तस्य चतुर्थस्य ज्ञानात्मनोऽनभ्युपगमात्तु संशय एव।

ननु प्रमाणभूते प्रत्यये जायमान एव तद्गतो विशेषः परिस्फुरतीति कथं विशेषाग्रहणमुच्यते ? भो महात्मन् ! कथ्यतां स विशेषो, न हि तं वयमनुपदिष्टं कृशमतयो जानीमः। यदि तावत् स्पष्टताविशेषः शुक्तिकायामपि रजतावभासः स्पष्ट एव, न हि तत्रानध्यवसायकालुष्यं किञ्चिदस्ति। अथ निष्कम्पता ? शुक्तिकायामपि रजतावभासो निष्कम्प एव। न ह्यसौ जायमान एवाङ्गुल्यग्रादिवाक्यकरणबोधवत् कम्पमानो जायते। अथ निर्विचिकित्सता ? शुक्तिकायामपि रजतावभासो निर्विचिकित्स एव, किंस्विदिति कोटिद्वयानवमर्शात्। अथ यस्मिन् सति बाधा न दृश्यते सोऽस्य विशेष इति, नन्वेतदेव पृच्छामि कस्मिन् सति बाधा न दृश्यते इति, सर्वावस्थस्य बाधदर्शनात्। न चासौ चिरमपि चिन्तयित्वा विशेषयितुं शक्यः। अथ स्वविषयाव्यभिचारित्वमेव विशेषः ? स तदानीं नावभासते इत्युक्तम्। अपि च यदि तथाविधोऽपि विशेषः समस्ति तर्हि यत्र ज्ञानेऽसौ न दृश्यते ततः किमिति प्रवर्त्तते ? तद्विशेषदर्शी वा प्रवर्त्तमानः कथं विप्रलभ्येतेत्युक्तम्, यदयं स्थाणुर्न पुरुषः ?

तेनैव व्यवहारस्य सिद्धत्वात् सर्वदेहिनाम्।
अतश्च संशयादेव व्यवहारं वितन्वताम्॥
लौकिकानां प्रयोक्तव्या नाभिशापपरम्परा।

न च सर्वथा संशयसमर्थनेऽस्माकमभिनिवेशः। प्रामाण्यन्तु ज्ञानोत्पत्तिकाले ग्रहीतुमशक्यमिति नः पक्षः। प्रामाण्याग्रहणमेवानध्यवसायस्वभावं संशयशब्देनेह व्यपदेक्ष्यामः। प्रामाण्याग्रहणञ्च प्रदर्शितम्, प्रत्यक्षेणानुमानेन वा सता प्रमाणेनात्मनः प्रमाणत्वपरिच्छेदायोगात्। तस्मात् स्वयं प्रामाण्यं गृह्यते इत्येष दुर्घटः पक्षः।

यदि तावत् स्पष्टतेति। सत्यरजतवदर्थान्तरविवेकेन यत्रार्थः प्रतिभासते स स्पष्टः। समनन्तरमेव विरुद्धज्ञानान्तरानपसार्यमाणस्वभावो **निष्कम्पः**। अनाश्वासस्थानं यो न भवति संभाव्यमानार्थत्वात् स **निर्विचिकित्सः**।

अभिशापपरम्परा 'संशयात्मा विनश्यति' इत्यादिका।

प्रामाण्यं स्वत इति पक्षं निराकृत्य तस्य स्वत उत्पत्तिर्निराक्रियते

अथ स्वतः प्रामाण्यं भवतीत्येष पक्ष आश्रीयते, सोऽप्ययुक्तः, कार्याणां कारणाधीनजन्मत्वात् प्रामाण्यस्य च कार्यत्वात्। अस्ति च प्रामाण्यं वस्तु च, तन्न च नित्यमिति कार्यमेव तत्। कार्यञ्च कार्यत्वादेव न स्वतो भवितुमर्हति इति। अथोत्पत्तौ स्वकारकातिरिक्तगुणानपेक्षित्वमेव प्रामाण्यस्य स्वतो भवनमुच्यते न पुनरकार्यत्वमेवेति। तदप्यसम्यक्। सम्यग्रूपस्य कार्यस्य गुणवत्कारकव्यतिरेकेणानिष्पत्तेः। द्विविधं कार्यं भवति सम्यगसम्यग् वा। तत्र गुणवता कारणेन सम्यक् कार्यमुत्पद्यते दोषवता त्वसम्यगिति।

निर्दोषं निर्गुणं वापि न समस्त्येव कारणम्।
अत एव तृतीयस्य न कार्यस्यास्ति सम्भवः॥

सम्यग्ज्ञानोत्पादकम् कारकधर्मिस्वरूपातिरिक्तस्वगतधर्मसापेक्षं कार्यनिर्वर्त्तकमिति साध्यो धर्मः, कारकत्वात्, मिथ्याज्ञानोत्पादककारकवत्। सम्यग्ज्ञानं वा, धर्मिस्वरूपातिरिक्तधर्मसम्बन्धवत्कारकनिष्पाद्यमिति साध्यो धर्मः, कार्यत्वान् मिथ्याज्ञानवत्। आयुर्वेदाच्चेन्द्रियगुणान् प्रतिपद्यामहे, यदमी वैद्याः स्वस्थवृत्तेरौषधोपयोगमुपदिशन्ति तद् गुणोपयोगायैव न दोषशान्तये। दृश्यते च तदुपदिष्टौषधोपयोगादिन्द्रियातिशयः, तद्विषय एव च लोके नैर्मल्यव्यपदेशो न दोषाभावमात्रप्रतिष्ठ इत्यलं विमर्देन। तस्मादुत्पत्तौ गुणानपेक्षत्वात् स्वतः प्रामाण्यमिति यदुक्तं तदयुक्तम्।

यदपि च स्वकार्यकरणे प्रमाणस्य परानपेक्षत्वमुच्यते तदपि व्याख्येयम्। किं प्रमाणं स्वकार्यकरणे निरपेक्षम्, सामग्री वा, तदेकदेशो वा तज्जन्यं वा, ज्ञानमिति। तत्र सामग्र्याः सत्यं स्वकार्यजन्मनि नैरपेक्ष्यमस्ति, न तु तावता स्वतः प्रामाण्यम्, तत्परिच्छेदस्य परायत्तत्वात्। सामग्र्यन्तर्गतकारकस्य स्वकार्ये परापेक्षत्वमपरिहार्यम्, एकस्मात् कारकात् कार्यनिर्वृत्त्यभावात्। ज्ञानं फलमेव न प्रमाणमित्युक्तम्। न च फलात्मनस्तस्य स्वकार्यं किञ्चिदस्ति यत्र सापेक्षत्वमनपेक्षत्वं वा अस्य चिन्त्येत। पुरुषप्रवृत्त्यादौ तु तदिच्छाद्यपेक्षत्वं विद्यत एवेति यत् किञ्चिदेतत्।

यदपि प्रामाण्यनिश्चये नैरपेक्ष्यमभ्यधायि, तदपि न साम्प्रतम्। प्रामाण्यनिश्चयस्य हि द्वयी गतिर्नास्तित्वं कारणापेक्षिता वा। न पुनरस्ति च प्रामाण्यनिश्चयः कारणानपेक्षश्चेति शक्यते वक्तुम्। तत्र प्रथमप्रवर्त्तकप्रतिभासप्रसवसमये तावन्नास्त्येव प्रामाण्यनिश्चय इत्युक्तम्, न हि नीलग्राहिणा प्रमाणेन नीलस्वरूपमिव स्वप्रामाण्यमपि तदानीं निश्चेतुं शक्यते इति कालान्तरे तत्प्रामाण्यनिश्चयः। सत्यमस्ति, न तु तत्र नैरपेक्ष्यम्, प्रवृत्तिसामर्थ्याधीनत्वात्तन्निश्चयस्य।

ननु क्षणिकत्वात् कालान्तरे ज्ञानमेव नास्ति कस्य प्रामाण्यं निश्चिनुमः? शिशुचोद्यमेतद्। अप्रामाण्यमपि बाधकप्रत्ययादिना कालान्तरे कस्य निश्चिनुमः? क्षणिकत्वेन ज्ञानस्यातीतत्वात्। अतिक्रान्तस्यापि स्मर्यमाणस्य तदुत्पादस्य वा वर्त्तमानस्य कारकचक्रस्येति चेत् प्रामाण्यनिश्चयेऽपि समानोऽयं पन्थाः।

यत्पुनः कालान्तरे तन्निश्चयकरणे दूषणमितरेतराश्रयत्वं वा मुण्डितशिरोनक्षत्रान्वेषणवद् वैयर्थ्यं वेति वर्णितम्, तत्रादृष्टे विषये प्रामाण्यनिश्चयपूर्विकायाः प्रवृत्तेरभ्युपगमान्नेतरेतराश्रयम्, चक्रकं वा। दृष्टे विषये ह्यनिर्णीतप्रामाण्य एवार्थसंशयात् प्रवृत्तिरूपम्, अनर्थसंशयाच्च निवृत्त्यात्मकं व्यवहारमारभमाणो दृश्यते लोकः, एतदेव युक्तमित्युक्तम्। न प्रामाण्यनिश्चयपुरःसरं प्रवर्त्तनमिति कुत इतरेतराश्रयम्। वैयर्थ्यन्तु दृष्टे विषये सत्यमिष्यते, किन्तु तत्र प्रवृत्तिसामर्थ्येन प्रामाण्यं निश्चिन्वन्नाप्तोक्तत्वस्य हेतोः प्रामाण्येन व्याप्तिमवगच्छतीति, ह्यदृष्टविषयोपयोगिवेदादिप्रमाणप्रामाण्यपरिच्छेदे पारम्पर्येणोपायत्वात् स्वविषये व्यर्थोऽप्यसौ तत्र सार्थकतामवलम्बते इत्यदोषः।

किं पुनरिदं प्रवृत्तिसामर्थ्यं नाम, यतः प्रामाण्यनिश्चयमाचक्षते नैयायिकाः? उच्यते। पूर्वप्रत्ययापेक्षोत्तरा संवित् प्रवृत्तिसामर्थ्यम्, विशेषदर्शनं वेति पूर्वाचार्यैस्त-

---

पूर्वप्रत्ययापेक्षेति। व्यभिचारिता हि ज्ञानस्य दोषहेतुका, ते च सन्निकर्षविप्रकर्षापेक्षाः कारणं मिथ्याधियः। तत्र यदा विप्रकर्षाद् दोषेभ्यः मिथ्याधीस्तदासौ सन्निकर्षान्निवर्तते, मरीचिष्विव दूराज्जाता जलधीः सन्निकर्षात्तु मरीचिधीरेव; यत्र पुनः सन्निकर्षविप्रकर्षयोरपि तथात्वं तत्र सम्यक्त्वमेव। इतीयं सा पूर्वप्रत्ययापेक्षोत्तरा संवित्। संशयो हि साधर्म्यनिबन्धनो ज्ञाने विशेषदर्शनान्निवर्तते स्थाणाविव करपादादिविशेष-

त्स्वरूपमुक्तम्, तत्पुनर्नातीव हृदयङ्गमम्, इति भाष्यकृतैव 'समीहा प्रवृत्तिरित्युच्यते सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः' इति वदता अर्थक्रियारूपफलज्ञानमेव प्रवृत्तिसामर्थ्यमिति निर्णीतम् ।

यत्पुनरर्थक्रियाज्ञानस्यापि पूर्वस्मात् को विशेषः ? तस्यापि चान्यतः प्रामाण्यनिश्चयापेक्षायामनवस्थेत्युक्तम्, तदपि सकलप्राणभृत्प्रतीतिसाक्षिकव्यवहारविरोधित्वादसम्बद्धाभिधानम् । अपरीक्षणीयप्रामाण्यत्वादर्थक्रियाज्ञानस्य, प्रवर्त्तकं न सर्वज्ञानं प्रवृत्तिसिद्धये परीक्षणीयप्रामाण्यं वर्त्तते । फलज्ञाने तु सिद्धप्रयोजनत्वात् प्रामाण्यपरीक्षापेक्षैव नास्तीति कुतोऽनवस्था ? संशयाभावाद्वा तत् प्रामाण्यविचाराभावः । प्रवर्त्तकं हि प्रथममुदकज्ञानमविद्यमानेऽपि नीरे मिहिरमरीचिषु दृष्टमिति तत्र संशेरते जनाः । अर्थक्रियाज्ञानन्तु सलिलमध्यवर्त्तिनां भवत् तदविनाभूतमेव भवतीति न तत्र संशयः । तदभावान्न तत्र प्रामाण्यविचारः, विचारस्य संशयपूर्वकत्वात् । विशेषदर्शनाद् वा फलज्ञाने प्रामाण्यनिश्चयः ।

कः पुनर्विशेष इति चेद्, योऽयं शौचाचमनमज्जनामरपितृतर्पणपटक्षालनश्रमतापनोदनविनोदनाद्यनेकप्रकारनीरपर्यालोचनप्रबन्धः, न ह्ययमियान् कार्यकलापो मिथ्याज्ञानात् प्रवृत्तस्य क्वचिदपि दृष्टः । स्वप्नेऽप्यस्य प्रबन्धस्य दर्शनमस्तीति चेद्, न, स्वप्नदशाविसदृशविस्पष्टजाग्रदवस्थाप्रत्ययस्य संवेद्यत्वात्, एषोऽस्मि जागर्मि न स्वपिमीति स्वप्नविलक्षणमनिद्रायमाणः प्रत्यक्षमेव जाग्रत् समयं सकलो जनश्चेतयते, न च तस्मिन्नवसरे सलिलमन्तरेणैताः क्रियाः वर्त्तमाना दृश्यन्ते इति तद्विशेषदर्शनात् सुज्ञानमर्थक्रियाज्ञानप्रामाण्यम् । कारणपरीक्षातो वा तस्मिन् प्रामाण्यं निश्चेष्यामः । यथोक्तं भवद्भिरेव 'प्रयत्नेनान्विच्छन्तो न चेद्दोषमवगच्छेम तत्प्रमाणभावाददुष्टमिति मन्येमहि' इति । तथा हि विषयस्य चलत्वसादृश्यादि-

---

दर्शनादित्यभिप्रायेणोक्तम् **विशेषदर्शनं वेति** । **नातीव हृदयङ्गममिति** । उत्तरस्या अपि संविदः कदाचिदसत्यर्थे समुत्पादाशङ्कासम्भवाद् विशेषदर्शनस्य चासत्यपि विशेष इति । तथा च विशेषदर्शनेऽपि संशीतिः क्वचित् कराद्यवयवावलोकरूपे, तथाहि 'तस्याः पाणिरयं न कोमलदलश्चलत्यत्राङ्गुलिपल्लवः' इत्यादौ संशय्य पश्चान्निश्चिनुते ।

विषयस्य चलत्वेति । चलत्वं मरीचिकादौ, सादृश्यं शुक्तिकादौ ।

दोषविरहः, आलोकस्य मलीमसत्वादिकारणवैकल्यम्, अन्तःकरणस्य निद्राद्यदूषितत्वम्, आत्मनः क्षुत्प्रकोपाद्यनाकुलत्वम्, ईक्षणयुगलस्य तिमिरपटलाद्यविकलत्वमित्यादि, स्वयञ्च कार्यद्वारेण परोपदेशेन च सर्वं सुज्ञानम्। अतो निरवद्यकारणजन्यत्वात् प्रमाणमर्थक्रियाज्ञानमिति विद्मः।

यद्येवं प्रथमे प्रवर्त्तके एव प्रत्यये कस्मात् कारणपरीक्षैवेयं न क्रियते, किमर्थं क्रियाज्ञाने ? न। आयुष्मन् न आद्येऽपि ज्ञाने कारणपरीक्षायां क्रियमाणायां कः प्रमादः? किमेवं सति स्वतःप्रामाण्यं सिद्ध्यति तव, मम वा परतः प्रामाण्यमपहीयते ? किन्तु लोकः प्रवर्त्तकज्ञानानन्तरं फलप्राप्तिं प्रति यथा सोद्यमो दृश्यते न तथा तत्कारणपरीक्षां प्रति, फलज्ञानमेवेत्थं परीक्ष्यते। आद्यस्य हि ज्ञानस्य फलज्ञानादेव प्रामाण्यसिद्धिः। कश्च नाम निकटमुपायमुपेक्ष्य दूरं गच्छेदिति।

अथ संशयोत्पत्तिसामर्थ्यादेव यथार्थनिश्चयः फलज्ञानेन लप्स्यते। संशयो हि नाम द्वैविध्यदर्शनाद् विना न भवत्येव। न हि स्थाणुपुरुषसाहचर्यमूर्ध्वताख्यस्य धर्मस्य यो न जानाति स तं दृष्ट्वा स्थाणुर्वा स्यात् पुरुषो वेति संशेते। एवमूर्ध्वत्वाद् बाधरूपत्वस्य व्यभिचारित्वाव्यभिचारित्वाभ्यां सहदर्शनमवश्यमाश्रयणीयम्, अन्यथा तद्विषयसंशयानुत्पादाद्। अतः पूर्वमव्यभिचारित्वदर्शने सिद्धे यस्तदा तत्परिच्छेदोपायः स पश्चादपि भविष्यतीति सर्वथा सिद्ध्यत्यव्यभिचारित्वनिश्चयः। अनिश्चितप्रामाण्यादपि वा फलज्ञानात् प्रवर्त्तकस्य प्रामाण्यनिश्चयो युक्तः, न तु स्वत उत्पत्तौ प्रमाणतदाभासयोर्विशेषाग्रहणात्, फलज्ञाने च तद्विशेषप्रतिभासात्।

यत्तु तद् विशेषज्ञानमपि निश्चितप्रामाण्यमनिश्चितप्रामाण्यं वेति विकल्प्या-

---

अतःपूर्वमव्यभिचारित्वदर्शने सिद्ध इति। किञ्चित् फलज्ञानमव्यभिचारि दृष्टम् किञ्चिच्च व्यभिचारि यदा तदा तृतीये ज्ञाने संशयः। तत्र यदव्यभिचारि दृष्टं तस्य यथा अव्यभिचारित्वग्रहस्तथा अस्यापि इति भावः।

यत्तु तद्विशेषज्ञानमपीति। अर्थक्रियायां यद्विशेषज्ञानांशे च आचमनादिकार्यकलापज्ञानं प्रागुदाहृतं तदपि ज्ञानत्वादन्यतो निश्चितप्रामाण्यमिति तन्निश्चायकस्याप्यन्यतः प्रामाण्यनिश्चय इत्यनवस्था। अर्थक्रियाज्ञानप्रामाण्याद्वा तत्प्रामाण्यनिश्चये इतरेतराश्र-

नवस्थापादनम्, अप्रतिपत्तिप्रहततताकथनं वा, तद्दृष्टे विरुद्धत्वात् प्रलापमात्रम्, इत्यलमलीकोक्तविकल्पकलापनिर्मथनोदितदुरामोदास्वादनेन । स्थितमेतदर्थक्रियाज्ञानात् प्रामाण्यनिश्चय इति । तदिदमुक्तम् 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्' इति । तस्मादप्रामाण्यमपि परोक्षमित्यतो द्वयमपि परत इत्येष एव पक्षः श्रेयान् ।

यत्तु कश्चित् प्राज्ञमानी वदति अभ्यस्ते विषये स्वतः प्रामाण्यम्, अनभ्यस्ते तु परत इति, सोऽयमभ्यस्ते विषये इति च ब्रवीति स्वतश्च प्रामाण्यं मन्यते इति स्वयमेवात्मानं वाच्यमानं न चेतयते । अभ्यासो हि नाम पुनः पुनः प्रयोगक्रियाभ्यावृत्तिः, विषयस्य चाभ्यस्तता भूयो भूयः प्रवृत्तिः । अतश्च स्वशरीरग्रहे, निजगृहकुड्यस्तम्भादिप्रतिभासे वा सहस्रकृत्वः प्रवृत्तिसंवादज्ञानजन्मना प्रामाण्यनिश्चय उक्तो भवति । स्वतोऽभ्यस्तत्वं चान्यथा न भवेदिति यत्किञ्चिदेतत् । तस्मात् परतः प्रामाण्यमिति सिद्धम् ।

यत्पुनः कैश्चिच्चोद्यते, प्रमाणानां न परीक्षणमुपपद्यते । तद्धि प्रमाणैः क्रियेताप्रमाणैर्वा, प्रमाणैरपि परीक्षितैरपरीक्षितैर्वा । तत्र न नाम प्रमाणपरीक्षणं शक्यक्रियम् । प्रमाणैरप्यपरीक्षितैः, तत्करणे वरं व्यवहार एव तादृशैः क्रियतां किं परीक्षणेन ? परीक्षितैस्तु तत्परीक्षाकरणमपर्यवसितमनवस्थाप्रसङ्गादित्यादि, तदप्युक्तेन न्यायेन

यत्वम्, तत्प्रामाण्यादर्थक्रियाज्ञानप्रामाण्यम् अर्थक्रियाज्ञानप्रामाण्याच्च तत्प्रामाण्यम् । एतदेव **'अप्रतिपत्तिप्रहततताकथनं वा'** इत्यनेनोक्तम्, इतरेतराश्रयत्वे हि एकाप्रतिपत्तावितराप्रतिपत्तिरिति । **प्रमाणतोऽर्थप्रतिपत्ताविति** । प्रमाणादर्थप्रतिपत्तिस्ततः प्रवृत्तेश्च सामर्थ्यं फलाभिसम्बन्धस्ततोऽर्थवत् प्रमाणं ज्ञायते, अर्थसहकारित्वेन ज्ञायते प्रमाणतया ज्ञायत इत्यर्थः ।

प्रयोगक्रियाभ्यावृत्तिरिति । यथा 'द्विर्भुक्तः' इति भोजनस्य या प्रयोगक्रियाऽनुष्ठानसम्पादनं तस्याभ्यावृत्तिः पौनःपुन्यम् ।

परीक्षितैस्तु तत्परीक्षाकरणमिति । यैः प्रमाणैः परीक्षितैः परीक्षा क्रियते तेषामपि परीक्षितानां प्रमाणानां परीक्षाकारीणि प्रमाणानि अप्रमाणानि वा ? अप्रमाणैः परीक्षाकरणमयुक्तम्, प्रमाणैश्चैतेषामपि प्रामाण्यपरीक्षणमन्यत इति अनवस्था ।

परिहृतं भवति। दृष्टे विषये प्रमाणपरीक्षां विनैव व्यवहारात्, अदृष्टे तु परीक्षाया अवश्यकर्त्तव्यत्वादुपपत्तेश्चेति।

तस्माददृष्टपुरुषार्थपदोपदेशि
मानं मनीषिभिरवश्यपरीक्षणीयम्।
प्रामाण्यमस्य परतो निरणायि चेति
चेतःप्रमाथिभिरलं कुविकल्पजालैः॥

प्रभाकरमतेऽख्यातिवादेन परतः प्रामाण्यखण्डनम्

सुशिक्षितास्त्वाचक्षते, युक्तं यदमी मीमांसकपाशाः काशकुसुमराशय इव शरदि मरुद्भिरतिदूरात् समुत्सार्यन्ते दुष्टतार्किकैः। ये हि किलाभ्युपयन्ति च विपरीतख्यातिवादमकृतास्त्राः, प्रामाण्यञ्च स्वत इति च वदन्ति, तेषां कुतः कौशलम्, विपरीतख्यातावभ्युपगम्यमानायां बाध्यबोधसन्दर्भसुभिक्षे सति तत्साधर्म्यादनुत्पन्नबाधकेऽपि बोधे दुष्परिहरः संशयः, संशये च संवादाद्यन्वेषणमपि ध्रुवमवतरतीति परतः प्रामाण्यमनिवार्यम्।

तन्मते ज्ञानानामबाध्यत्वात् प्रामाण्यं स्वत एव

यदा तु न बाध्यो नाम जगति कश्चिदपि बोधस्तदा किंसाधर्म्यात् संशेरतां प्रमातारः? असंशयानाश्च किमिति परमपेक्षन्ताम्? अनपेक्षमाणाः कथं परतः प्रामाण्यं प्रतिपद्यन्ताम्? इति निश्चलं स्वत एव प्रामाण्यमवतिष्ठते।

कथं पुनर्बाध्यो नाम नास्ति बोधः? शुक्तिकादौ रजतादिप्रत्ययाः प्राचुर्येण बाध्यमाना दृश्यन्ते। अनभिज्ञो भवान् न हि ते बाध्याः प्रत्ययाः। इदं हि निरूप्यतां क इवोत्तरज्ञानेन पूर्वज्ञानस्य बाधः। बाधार्थमेव न विद्मः। यदि तावन्नाश एव बाधः स न तेषामेव, बुद्धेर्बुद्ध्यन्तराद् विरोध इति सकलबोधसाधारणत्वात्। अथ सहानवस्थानम्, तदपि समानम्, अबाधितानामपि ज्ञानानां सहावस्थानासम्भवात्।

प्रामाण्यमस्य निरणायि निश्चितम्।

सुशिक्षितास्त्विति प्राभाकरान् निर्दिशति।

अथ संस्कारोच्छेदो बाधः ? सोऽपि तादृगेव, सम्यक्प्रत्ययोपजनितसंस्कारस्याप्युच्छेददर्शनात् । कश्चिद् भवदभिमतबाध्यबोधाहितोऽपि संस्कारः सत्यपि बाधकप्रत्यये नोच्छेदमुपगच्छति कालान्तरे तत्कारणकतद्विषयस्मरणदर्शनात् ।

अथ विषयस्यापहारो बाधः ? सोऽपि दुर्घटः, प्रतिभातत्वेन विषयस्यापहर्तुमशक्यत्वात्, न हि बाधकं ज्ञानमित्थमुत्तिष्ठति यत् प्रतिभातं तन्न प्रतिभातमिति ।

अथ तदभावग्रहो बाधः ? स तात्कालिकः कालान्तरभावी वा ? कालान्तरभावितदभावग्रहणस्य बाधकत्वे प्रागवगतमुद्गरदलितघटाभावग्राहिणोऽपि विज्ञानस्य तद्बाधकत्वप्रसङ्गः । तदैव तु तदभावग्रहणे प्रत्ययद्वयसमर्पितरूपद्वितययोगादुभयात्मकमेव तदस्तु वस्तु किं कस्य बाध्यं बाधकं वा ।

अथ फलापहारो बाधः ? सोऽपि न सम्भवति, संविदः प्रमाणफलस्य उत्पन्नत्वेनानपहरणीयत्वात् । न हि यदुत्पन्नं तदनुत्पन्नमिति वदति बाधकः ।

अथ हानादिफलापहारो बाधः ? न, तस्य प्रमाणफलत्वाभावात् ।

हानादिव्यवहारो हि पुरुषेच्छानिबन्धनः ।
न तेनापहृतेनापि प्रमाणं बाधितं भवेत् ॥

तस्मान्न बाधो नाम कश्चित् । इतश्च नास्ति, स हि समानविषययोर्वा ज्ञानयोरिष्यते भिन्नविषययोर्वा ? न समानविषययोर्धारावाहिज्ञानेष्वदृष्टत्वात् । नापि भिन्नविषययोः, स्तम्भकुम्भोपलम्भयोस्तदनुपलम्भात् । यदि चोत्तरेण ज्ञानेन पूर्वज्ञानेन गृहीतादर्थादर्थोऽन्य इदानीं गृहीतस्तत् पूर्वज्ञानं किमिति बाधितमुच्यते ?

अपि च पूर्वस्मिन् प्रत्यये प्राप्तप्रतिष्ठे सति आगन्तुरुत्तरः प्रत्ययो बाधितुं युक्तं न पूर्वो, न चैवं दृश्यते । तस्मान्न बाध्यं नाम विज्ञानमस्ति, तदभावान्न तत्साधर्म्यनिबन्धनः संशयः, तदभावात् संवादाद्यनन्वेषणान्न परतः प्रामाण्यम् ।

विपरीतख्यातौ शङ्कान्तरम्

नन्वेवं बाधेऽपि निराक्रियमाणे किममी शुक्तिकारजतादिग्राहिणो विपरीतप्रत्यया अबाधिता एवासताम् ? आः कुमते ! नामी विपरीतप्रत्ययाः, न हीदृशानां विपर्ययाणामुत्पत्तौ किमपि कारणमुत्पश्यामः । न तावदिन्द्रियम्, एवंविधबोधविधायि भवितुमर्हति, सर्वदा तदुत्पादप्रसङ्गात् । नापि दोषकलुषितं दुष्टं कारणं स्वकार्य-

करणे एव कुण्ठितशक्ति जातमिति तदेव मा जीजनत्, विपरीतकार्यकरणस्य किं वर्त्तते, न हि दुष्टानि शालिबीजानि यवाङ्कुरकरणकौशलमवलम्बेरन् । तस्मात् कारणाभावादपि न विपरीतप्रत्ययास्ते ।

तत्किं सम्यक्प्रत्यय एव शुक्तिकायां रजतप्रतिभासः ? अयि मूढ ! नायमेकः प्रत्यय इदं रजतमिति, किन्तु द्वे एते ग्रहणस्मरणे, इदमिति पुरोऽवस्थितभास्वराकारधर्मिप्रतिभासः, रजतमिति तु भास्वररूपदर्शनप्रबोध्यमानसंस्कारकारणकं तत्साहचर्यादवगतरजतस्मरणम् । अतश्चेदं स्मरणं यतः प्रागनवगतरजतस्य न जायते, विदितरजतस्यापि रजन्यामन्यदा वा सादृश्यदर्शनाद् विना न भवतीति । स्मरणमपि भवदिदमात्मानं तथा न प्रकटयतीति प्रमुषितमुच्यते । स्वरूपेण चाप्रतिभासमनायां स्मृतावनुभवस्मरणयोर्विवेको न गृहीतो भवतीत्यग्रहणमख्यातिरुच्यते ।

तथा हि भ्रान्तबोधेषु प्रस्फुरद् वस्तुसम्भवात् ।
चतुष्प्रकारा विमतिरुपपद्येत वादिनाम् ॥

विपरीतख्यातिः, असत्ख्यातिः, आत्मख्यातिरख्यातिरिति तत्र विपरीतख्यातिस्तावत् कारणाभावादेव निरस्ता ।

तत्रैव शङ्कान्तरम्

अपि च विपरीतख्यातौ त्रयी गतिः, रजतं वाऽन्यदेशकालमत्रालम्बनम्, शुक्तिका वा निगूहितनिजाकारा सती परिगृहीतरजताकारा च । अथवा अन्यदालम्बनमन्यश्च प्रतिभाति, आलम्बनं शुक्तिका रजतञ्च प्रतिभातीति । तत्र यदि रजतमालम्बनं तदियमसत्ख्यातिरेव न विपरीतख्यातिः, असतस्तत्र रजतस्य प्रतिभासात् ।

अथान्यदेशकालं तदस्त्येवेत्यभिधीयते ।
इहासन्निहितस्यास्य तेन सत्त्वेन को गुणः ॥

अपि च देशकालावपि किं सन्तौ प्रतिभासेते उतासन्ताविति । यदि सन्तौ तर्हि तद्देशकालमेवेदं रजतमवभातमिति न भ्रान्तिरेषा स्यात् । असन्तौ तूभावपि रजतवन्नालम्बनं भवितुमर्हतः ।

अथ स्मृत्यारूढं रजतमस्यां प्रतीतौ परिस्फुरतीत्युच्यते ? तर्हि स्मृत्युपारूढमिति कोऽर्थः ? स्मरणमपि ज्ञानमेव तदपि कथमसदर्थविषयं स्यात् ? स्मृतेरनर्थजत्वमेव स्वरूपमिति चेद्, अस्तु, कामं तत्सामान्यादत्राप्येवं प्रयोग इत्येतदपि तावन्न ब्रूमः। तथा त्वनर्थजन्यया स्मृत्या सोऽर्थः कथमिह सन्निधापयितुं पार्यते ? सा हि न स्पृशत्येवाऽर्थम्। तस्मादसन्निहितरजतालम्बना विपरीतख्यातिरसत्ख्यातेर्न्न विशिष्यते एव।

अथ स्थगितनिजवपुरुपगृहीतरजतरूपा शुक्तिकात्र प्रकाशते इति नेयमसत्ख्यातिरुच्यते। तदिदमपूर्वं किमपि नाटकम् 'इयमस्मि कृत्यासीता संवृत्ते'ति। तथाहि किमत्र शुक्तीति प्रतीतिरुत रजतमिति, शुक्तिकाप्रतीतौ तु शुक्तिरेव न रजतमत्र भ्रमार्थः कः ? रजतप्रतीतौ तु शुक्तिरसावित्यत्र किं प्रमाणम् ? बाधकप्रत्ययादेवमधिगतम् इति चेन्मैवम्, न हि ज्ञानान्तरेणास्याः प्रतीतेर्विषयो व्यवस्थापयितुं युक्तः। बाधकेन हि ज्ञानेन पूर्वज्ञानगृहीतस्य वस्तुनोऽसत्त्वं नाम ख्याप्यतां न तु तस्य विषयो निरूप्यते। अनर्थित्वाद्वा कदाचिदप्रवृत्तस्य पुंसो बाधकानुत्पत्तौ कोऽस्याः प्रतीतेर्विषयं व्यवस्थापयिष्यति ? तस्माद् यदेवास्यां चकास्ति तदेव रजतमस्या विषय इति युक्तं वक्तुम्, शुक्तिस्तु निगूहितनिजवपुरिति दुर्विदग्धवाचोयुक्तिरियम्।

ये त्वालम्बनतां शुक्ते रजतस्यावभासनम्।
वदन्त्यस्मिन् भ्रमज्ञाने तेषामतितरां भ्रमः॥
न ह्यालम्बनता युक्ता सन्निधाननिबन्धना।
तत्रैव भूप्रदेशस्य तथाभावप्रसङ्गतः॥
तदेवालम्बनं बुद्धेर्यदस्यामवभासते॥
अन्यदालम्बनं चान्यद्भातीति भणितिर्नवा॥
अतो रजतमेवैतद् बुद्धिग्राह्यमसच्च तत्।
एवं विपर्ययख्यातिरसत्ख्यातेर्न भिद्यते॥

इयमस्मि कृत्या सीता संवृत्तेति। कृत्यारावणाख्यनाटकोक्तं वस्तूपहासपरत्वेन निर्दिशति। तत्र हि जातवेदसा रावणवधाय कृत्योत्थापिता सा रावणागमनसमये स्वरूपतिरोधानेन सीतारूपा संवृत्ता 'इयमस्मि कृत्या सीता संवृत्ता' इत्यभिधाय।

असत्ख्यातिस्वरूपम् तन्निरासश्च

तत्किमसत्ख्यातिरेव साधीयसी ? तामेवाभ्युपगच्छामः ? मैवम् । सापि नोपपद्यते एव । असत्ख्यातिरिति कोऽर्थः ? किमेकान्तासत एवार्थस्य प्रथनम्, अथ देशान्तरादौ विद्यमानस्येति ? उत्तरस्मिन् पक्षे विपरीतख्यातिरेवैषा, परैरपि तत्र रजतस्य सत्त्वानभ्युपगमात् । देशान्तरादौ तु तत्सत्तायास्त्वयापि प्रतिपन्नत्वाद् । एकान्तासतस्त्वर्थस्य ख्यातिरिति न पेशलम्, आकाशनलिनीपल्लवादेरप्रतिभासनात् । वासनाभ्यासादसतामपि प्रतिभासा भविष्यन्तीति चेद्, न । अर्थमन्तरेण वासनाया अप्यनुपपत्तेः । अर्थानुभवसमाहितो हि संस्कारो वासना कथ्यते, सा कथमसदर्थप्रतिभासहेतुः स्यात् ? भवत्वन्या वा भवदभिमता काचन वासना, अपि त्वसत्त्वाविशेषे किमिति रजतमितिम् उपजनयति न गगननलिनीप्रतीतिमिति कुतस्त्यो नियमः ? तदलमनया ।

नात्यन्तमसतोऽर्थस्य सामर्थ्यमवकल्पते ।
व्यवहारधुरं वोढुमियतीमनुपप्लुताम् ॥

आत्मख्यातिस्वरूपम् तन्निरासश्च

अपि च सत्त्वेन प्रतिभातीति असत्ख्यातिरपि न विपरीतख्यातिमतिवर्त्तते । तस्माद्वरमात्मख्यातिरस्तु ।

विज्ञानमेव खल्वेतद् गृह्णात्यात्मानमात्मना ।
बहिर्निरूप्यमाणस्य ग्राह्यस्यानुपपत्तितः ॥
बुद्धिः प्रकाशमाना च तेन तेनात्मना बहिः ।
तद्वहत्यर्थशून्यापि लोकयात्रामिहेदृशीम् ॥

उच्यते, नात्मख्यातिरपि युक्तिमती, विज्ञानात्मनो हि प्रतिभासेऽहं रजत-

---

भवत्वित्यादि । अनाद्यविद्यायाता असत्यरूपप्रदर्शनशक्तिर्विज्ञानस्य वासना, यत्सम्बन्धादात्मानं प्रदर्शयद् विज्ञानमसन्तमपि बाह्याकारं दर्शयतीति बौद्धाः ।

मिति प्रतीतिः स्याद् नेदं रजतमिति। किञ्च 'यदन्तर्ज्ञेयरूपं हि बहिर्वदवभासते' इत्यभ्युपगमादियमपि विपरीतख्यातिरेव स्यात्। असत्ख्यातिरपि चेयं भवत्येव बहिर्बुद्धेरसम्भवात्। बुद्धिरस्त्येवेति चेद्, बहिष्ट्वं तर्हि चिन्त्यं सदसत्त्वादिति। न तावत्सद्, बुद्धेर्बाह्यत्वाभावात्, असत्त्वे त्वसत्ख्यातिरित्युक्तम्।

अख्यातिस्वरूपम्

तस्मात् ख्यातित्रयेऽप्यस्मिन्नन्योऽन्यानुप्रवेशिनि।
युक्त्या विरुध्यमाने च श्रेयस्यख्यातिरेव सा॥

ख्यातित्रयवादिभिरपि चेयमप्रत्याख्येया नूनमख्यातिः, आत्मख्यातौ तावदात्मतया विज्ञानस्य ख्यातिर्नास्ति विच्छेदप्रतिभासादित्युक्तत्वात्, असत्ख्यातावपि असत्त्वमर्थस्य नैव प्रतिभासते प्रवृत्त्यादिव्यवहारोच्छेदप्रसङ्गात्, विपरीतख्यातावपि रजतस्य सन्निहितस्य ज्ञानजनकत्वम्, अजनकस्य च प्रतिभासो नेष्यते एव, तत्र स्मृत्युपस्थापितं रजतमवगतिजनकमुपगतम्, अतश्च रजतस्मृतिरपरिहार्या, सा च रजतस्मृतिर्न तदा स्वेन रूपेण प्रकाशते स्मरामीति प्रत्ययाभावात्।

तस्मात् प्रमुषितामेनां स्मृतिमिच्छन्ति तार्किकाः।
अभ्यस्ते विषये लिङ्गप्रतिबन्धां स्मृतिं यथा॥

सोऽयं स्मृतिप्रमोषस्तत्त्वाग्रहणमख्यातिरुच्यते।
एवंसतीयमख्यातिरिष्यते सर्ववादिभिः।
तथा प्रकटयद्भिस्तु पीतं प्राभाकरैर्यशः॥

ननु रजतमिति स्मृतेः स्वरूपोल्लेखो मा भूद् इदमित्यत्र पुरोऽवस्थितधर्मिप्रतिभासात् कथमख्यातिः? उच्यते, न पुरोऽवस्थितो धर्मी शुक्तिकेयमिति स्पष्टतया

यदन्तर्ज्ञेयरूपं ह्रीत्यस्योत्तरम्—'सोऽर्थो विज्ञानरूपत्वात् तत्प्रत्ययतयापि वा' इति। तदेव विज्ञानं प्रत्ययः कारण यस्यासौ तत्प्रत्ययः, तस्य भावः तत्प्रत्ययता, तया। **बहिर्बुद्धेरसम्भवादिति**। बहिःप्रतिभासस्तावदवश्याभ्युपेयः, बहिश्च बुद्धिर्नास्तीति बलादसत्ख्यातिवादापत्तिः।

तस्मात् प्रमुषितामेनां स्मृतिमिच्छन्ति तार्किकाः। अभ्यस्ते विषयेऽविनाभावस्मृतिवदिति योजना।

गृह्यते, तथा चाभ्युपगमे भ्रमाभावप्रसङ्गात्। किन्तु तेजस्वितादिविपरीतं धर्मिमात्रमवभासते। धर्मसारूप्याच्च तदानीं रजतं स्मर्यते। ते एते ग्रहणस्मरणे विविक्ते अपि विविक्ततया न गृह्येते इति विवेकाग्रहणमख्यातिः, न तु सर्वेण सर्वाप्रतिपत्तिरेव। व्यधिकरणयोश्च ग्रहणस्मरणयोर्वैयधिकरण्यं चेन्न गृहीतं किमन्यदस्तु सामानाधिकरण्यात्? न तु यदेवेदं तदेव रजतमिति सामानाधिकरण्येन ग्रहणमस्ति, सा हि विपरीतख्यातिरेव स्यात्। वैयधिकरण्यानुपग्रहादेव प्रमातुः प्रवृत्तिः, अविवेकात् साधारण्याभिमानेन प्रवृत्तिरिति, फलत इयं वाचोयुक्तिः

सामानाधिकरण्येन केचित्तत्पृष्ठभाविनम्।
परामर्शमपीच्छन्ति तन्न श्रद्दध्महे वयम्॥
अख्यातिपक्ष एवं हि ह्रीयेतैकत्ववेदनात्।
वक्रैश्च वितथा ख्यातिरक्षरैः कथिता भवेत्॥

नन्वेवमख्यातिपक्षे प्रतिष्ठाप्यमाने नेदं रजतमिति पूर्वावगतरजतप्रतिबोधरोधी बाधकप्रत्ययो दृश्यमानः कथं समर्थयिष्यते? अप्रतीतिज्ञो देवानां प्रियः। न ह्यनेन रजतनिषेधो विधीयते किन्तु प्रागगृहीतो विवेकः प्रख्याप्यते, न इदं रजतम्, यदेवेदं तदेव रजतमित्येतन्न, इदमिदं रजतं रजतम्। एतदुक्तं भवति इदमन्यद्रजतमन्यदिति सोऽयं विवेकः ख्यातितो भवति।

नन्वेवमिदं रजतमित्यादौ स्मरणानुभवयोर्भवतु विवेकाग्रहणं स्वप्ने तु कथमेतद्भविष्यति? भीरोः! किं जातं स्वप्ने?

विवेकेन न गृह्येते स्मरणानुभवौ क्वचित्।
स्वप्ने तु स्मृतिरेवैका तथात्वेन न गृह्यते॥

सदृशदर्शनाद् विना स्मृतिरेव कुतस्त्येति चेद्, न। नानाकारणकत्वात् स्मरणस्य निद्राकषायितमप्यन्तःकरणं स्मरणकारणं भवत्येव। यद्येवं द्विचन्द्रतिक्तशर्करादि-

---

सर्वेण सर्वं सर्वात्मना।

सामानाधिकरण्येन **केचिदिति**। "यदा वैयधिकरण्यानवभासस्तदा सामानाधिकरण्यभ्रमः, तन्निबन्धनः परामर्शोऽपि 'तथा नेदं रजतजातीयम्' इति यदि

प्रत्ययेषु कथं स्मृतिप्रमोषः ? आः कुण्डशेखर ! कथमसकृदभिहितमपि न बुध्यसे ?

न सर्वत्र स्मृतेरेव प्रमोषोऽभ्युपगम्यते ।
किं त्वख्यातिरतश्चासौ कथञ्चित् कस्यचित् क्वचित् ॥
भवत्यनुभवस्मृत्योर्विवेकाग्रहणं क्वचित् ।
क्वचित्तु स्मर्यमाणस्य तथात्वेनानुपग्रहः ॥
द्विधा कृता क्वचिद् वृत्तिर्नेत्रस्य तिमिरादिना ।
न हि ग्रहीतुमैक्येन शक्नोति शिशिरत्विषम् ॥
क्वचिद्रसनसम्पृक्ते पित्ते तिक्तत्ववेदनात् ।
परिच्छेत्तुं न शक्नोति माधुर्यं शर्करागतम् ॥
गृह्णाति यत्तु तिक्तत्वं वस्तुतः पित्तवर्त्ति तत् ।
तथा तु न विजानाति निगिरन्नेष शर्कराम् ॥

एतेन पीतशङ्खादिभ्रान्तयोऽपि व्याख्याताः ।

तदेवं सति सर्वत्र सम्यगग्रहणं भ्रमः ।
न मिथ्याप्रत्ययः कश्चिदस्ति शङ्कानिबन्धनम् ॥
अजातमिथ्याशङ्कश्च न संवादमपेक्षते ।
तस्मान्न कश्चित् परतः प्रामाण्यमधिगच्छति ॥
एवं स्वतः प्रमाणत्वे सिद्धे वेदेऽपि सा गतिः ।
अपवादद्वयाभावो वक्तव्यश्चात्र पूर्ववत् ॥

अख्यातिनिषेधेन विपरीतख्यात्युपपादनम्

अत्र प्रतिविधीयते, यदुक्तमिदं रजतमिति स्मरणानुभवस्वभावे विवेकेनागृह्यमाणे द्वे एते ज्ञाने इति तदसाम्प्रतम्, प्रत्यभिज्ञावदेकत्वेनैव संवेद्यमानत्वात् ।

भवेत्तथाऽपि नास्मत्पक्षक्षतिः प्रवृत्त्यादिव्यवहारवत् सोऽपि भवतु यद्यनुभूयते" इति केचित् प्राभाकराः । रजतज्ञानानन्तरं तदुपकारितास्मरणम्, ततः परामर्शः ।

एतेन पीतशङ्खादिभ्रान्तय इति । कामलोपहतं चक्षुः स्वगतं पीतत्वं गृह्णच्छंखगतं शुक्लत्वं ग्रहीतुं न शक्नोति स्वगतञ्च पीतत्वं स्वगतत्वेन न गृह्णाति ।

यदेवेदं पुरोऽवस्थितं भास्वररूपाद्यधिकरणं धर्मिसामान्यं तदेव रजतमिति विशेषतः प्रतिपद्यते, यदिदमग्रतः स्थितं तद्रजतमिति सत्यरजतप्रतीतिवत् । अनुभूततया हि न रजतमत्र प्रकाशते किन्त्वनुभूयमानतया । अनुभूतताग्रहणं हि स्मरणमुच्यते नानुभूयमानताग्रहणम् । स्वप्रकाशा च संवित्तिरिति भवतां दर्शनम्, तत्रैषा रजतसंवित्तिः केन रूपेण प्रकाशतामिति चिन्त्यम् । यदि स्मरणात्मना कः प्रमोषार्थः ? अथानुभवात्मना तदियं विपरीतख्यातिरेव, स्मृतेरनुभवत्वेन प्रतिभासात् । अथ संविन्मात्रतयैव प्रकाशते ? तदपि न युक्तम् । रजतविषयोल्लेखात्, स्मरणानुभवविशेषरहितायाश्च विषयसंवित्तेरनुपपत्तेः । न चेयमप्रतिपत्तिरेवेति वक्तुमुचितम्, मदमूर्च्छादिदशाविसदृशस्वप्रकाशसंवेदनानुभवात्, यथा इदमित्यंशे स्वप्रकाशं संवेदनं तथैव रजतमित्यत्रापि ।

अपि च द्वयोश्चांशयोः समाने संवेदने तत एकं प्रत्यक्षलब्धमपरं स्मरणफलमिति कुतस्त्यो विभागः ? इदमित्यत्र च किमवभासते इति निरूप्यम् । यदि शुक्तिकाशकलं सकलस्वगतविशेषखचितमवभाति तदा तद्दर्शने सति रजतस्मरणस्य कोऽवसरः ? भवदपि वा सादृश्यकृतं स्मरणं न तदविवेकाय कल्पते देवदत्तदर्शनानन्तरोद्गततत्सदृशपुरुषान्तरस्मरणवत् ।

अथ धर्मिमात्रमिदमिति प्रत्यये प्रतिभाति न शुक्तिकाशकलम्, तद्बाढमिष्यते । तदेव चेदं सामान्यधर्मग्रहणवशविरुद्धसंस्कारोपनिबन्धनविरुद्धविशेषस्मरणकारणकमिदं रजतमिति सामान्योपक्रमे विशेषपर्यवसानं ज्ञानम्, यदिदं तद्रजतमिति सामानाधिकरण्यावमर्शात्, रजतानुभवाभिमानेनैव च रजतार्थी तत्र प्रवर्त्तते ।

ननु स्मरणानुभवयोर्विवेकमप्रतिपद्यमानः प्रवर्त्तते इत्युक्तम्, श्रुतमिदं यत् अत्रभवद्भिर्धर्मकीर्त्तिगृहादाहृतं दृश्यविकल्पावर्थावेकीकृत्य प्रवर्त्तते इति । किञ्च चौर्यम-

---

अनुभूतताग्रहणं हीति । वस्तुगतानुभूतता यदा ज्ञानेन गृह्यते परामृश्यते 'ज्ञातः स' इत्यादिना रूपेण तदा स्मरणम्; अनुभूयमानतया तु ग्रहणम् 'अयम्' इत्यादिना रूपेण ।

विरुद्धविशेषाः शुक्तिरूपापेक्षया ये विरुद्धा रजतत्वादयः ।

एकीकृत्य प्रवर्तते इत्यस्यापि 'तयोर्भेदमगृहीत्वा प्रवर्तते' इत्येवंरूप एवार्थो यतः ।

पीदं न कथञ्चन स्वार्थं पुष्णाति, यावद्धि दृश्यं गृहीतमिति न जातः प्रत्ययस्तावत् कथं दृश्यार्थिनस्तत्र प्रवृत्तिः। एवमिहापि यावद्रजतं गृहीतमिति न जातः प्रत्ययस्तावत् कुतस्तदर्थिनां प्रवृत्तिः। तस्मादस्ति रजतग्रहणं न तु तत्स्मरणप्रमोषमात्रम्।

ननु रजतस्मरणं विपरीतख्यातिवादिभिरप्यङ्गीकृतमित्युक्तम्, सत्यम्, रजतगतविशेषस्मरणमभ्युपगतम्। यथा हि पुरोऽवस्थिते धर्मिण्यूर्ध्वत्वादिसाधारणधर्मग्रहणात् स्थाणुपुरुषगतविशेषाग्रहणादुभयविशेषस्मृतेः संशयो भवति एवमिहापि तेजस्वितादिसामान्यधर्मग्रहणाद् विशेषाग्रहणाद् रजतगतविशेषस्मृतेश्च तस्मिन् धर्मिणि रजतप्रत्ययो भवति विपर्ययात्मकः। संशये ह्युभयविशेषस्मरणं कारणम्, इह त्वन्यतरविशेषस्मरणमिति विशेषः। अत एव चागृहीतरजतस्येदं ज्ञानं नोत्पद्यते, सदृशाग्रहणे वा निशीथादाविति, न त्वेतावता स्मरणमात्रमेवेदमिति इयति चिरस्य स्थातव्यम्, स्मरणजन्यस्य विपर्ययप्रत्ययस्यापि संवेदनात्। अत एव तत्पृष्ठभाविपरामर्शवादिनो वरं सत्यवाचः, ते हि प्रतिभासं न निह्नुवते।

यत्तु विपर्ययावगतेः कारणं विकल्पितं तत्रोक्तमेव प्रामाणिकैः

कार्यञ्चेदवगम्येत किं कारणपरीक्षया।
कार्यञ्चेन्नावगम्येत किं कारणपरीक्षया॥

कार्याकस्मिकतानुपपत्तेश्च कल्प्यतां कारणम्, तच्च क्लृप्तमेव, दोषसहितमिन्द्रियं यथा संस्कारसहकारि प्रत्यभिज्ञायामिति।

सुवते शालयो दुष्टा न यद्यपि यवाङ्कुरम्।
शालिकार्यं त्वपूपादि जनयन्त्येव कल्मषम्॥

तस्माद् दोषकलुषितादिन्द्रियात् पुरोऽवस्थितधर्मिगतत्रिकोणत्वादिविशेषावमर्शकौशलशून्यात् सामान्यधर्मसहचरितपदार्थान्तरगतविशेषस्मरणोपकृताद् भवति विपरीतप्रत्ययः। सम्यग्ज्ञानापेक्षया च तद् दुष्टमुच्यते। स्वकार्ये तु विपर्ययज्ञाने तत्कारणमेव, न दुष्टम्। तस्माद् रजतमित्यनुभव एव, न प्रमुषितस्मृतिः।

अपि च नेदं रजतमिति बाधकज्ञानं पूर्वानुभवविषयीकृतरजतनिषेधमधिगमयद् उत्पद्यते नेदं रजतमिति, यदहमद्राक्षं तद्रजतं न भवतीति। प्रसक्तस्य चायं

निषेधः, अननुभूतस्त्वप्रसक्तमपि प्रतिषिध्यमानं रजतमिव कनकमपि किमिति न प्रतिषिध्यते ?

यत्तु व्याख्यातं प्रागलवगतस्मरणानुभवविवेकप्रतिपादकं बाधकज्ञानमिति, तद्व्याख्यानमात्रमेव, तथाननुभवात् । न ह्येवं बाधक उद्घाटयते यदविविक्तं तद्विविक्तमिति, अतो यत्किञ्चिदेतत् । तस्मान्न रजतस्मरणं रजते वा कदाचिदनुभवोऽभूदिति स्मरणमभिधीयमानं नात्यन्तमलौकिकम् । स्वप्ने तु स्वशिरश्छेदादेरत्यन्ताननुभूतस्य स्मृतिरिति कथ्यमानमेव त्रपाकरम् । जन्मान्तरे निजमस्तकलवनमनुभूतमनेनेति चेद्, इदमपि स्वभाषितमसारम् । यज्जन्मान्तरानुभूतं स्मर्यते तत्र च कुतस्त्य एव नियमो यत् कदाचिदेव स्मर्यते न सर्वदा सर्वमिति ?

ननु भवताप्यसत्ख्यातिं निरस्यता स्वप्नज्ञानेषु तादृक्षु किं वक्तव्यम् ? यद् वक्तव्यं तत्रैव श्रोष्यसि । असन्न प्रतिभातीत्युच्यते न त्वननुभूतमिति ।

नन्वननुभूतं सत् कथं जानीषे सदिति चेद्, ज्ञानं तदनुभूतमिति, मैवम् । मया तन्नानुभूतम्, अन्येनानुभविष्यते, परानुभूतञ्च सदिति शक्यते वक्तुम् । परानुभूतेन स्मरणमघटमानमिति नावयोरत्र वस्तुनि समानयोगक्षेमत्वम् ।

अपि च भवन्मते स्वप्नस्मृतेः स्मृतित्वेनाग्रहणे केन रूपेण ग्रहणमिति चिन्त्यम् । रूपान्तरेण ग्रहणे विपरीतख्यातिः सर्वात्मना त्वग्रहणे स्वप्नसुषुप्त्योरविशेषप्रसङ्गः । अनुभवप्रत्ययश्च स्वप्ने संवेद्यते न स्मरणानुल्लेखमात्रमिति दुरभिनिवेश एव स्मृतिप्रमोषसमर्थनं नामेति । द्विचन्द्रादिप्रत्ययेषु कथमख्यातिः ?

ननूक्तं सुषिरभिन्ना नयनवृत्तिरेकत्वेन ग्रहीतुं न शक्नोति शशाङ्कमिति । भोः श्रोत्रिय ! तादृशी दृशोर्वृत्तिरेकत्वमिन्दोर्मा ग्रहीद् द्वित्वानुभवन्तु भ्रान्तं क्व प्रच्छादयामः ? ननु चक्षुर्वृत्तौ तद् द्वित्वं तद्गतत्वेन तु यत् तस्याग्रहणं स एव भ्रमः । नैतदेवम् । नेत्रवृत्तेः सर्वत्र परोक्षत्वात् ।

किमेकचन्द्रबोधेऽपि　वृत्त्येकत्वं　प्रतीयते ।
इयं ह्यगृह्यमाणैव　चक्षुर्वृत्तिः　प्रकाशिका ॥

परानुभूतेन स्मरणमिति । भवतापि स्वप्ने स्वशिरश्छेदानुभवः स्मृतिरूप एवाभ्युपगतस्तत्र च स्वानुभवासम्भवात् परानुभूतस्यैव स्मरणमवश्याभ्युपेयम् ।

एवमुच्यमाने च एकचन्द्रग्रहणेऽपि वृत्त्येकत्वाग्रहणादख्यातिरेव भवेत् ।

यदपि तिक्तशर्करादिप्रत्ययेऽप्यख्यातिसमर्थन-कदाशया पित्तवृत्तेस्तिक्तत्वस्य संवेद्यमानस्य तत्स्थत्वेनाग्रहणमुपवर्णितं तदपि कुशकाशावलम्बनप्रायम् ।

मोहात् पित्तगतत्वेन तिक्तता चेन्न गृह्यते ।
मा ग्राहि शर्करायान्तु किंकृता तिक्ततामतिः ॥

पित्तं त्विन्द्रियस्थं तिमिरवदगृह्यमाणमपि भ्रममुपजनयति शरीरस्थमिव ज्वरं शिरोत्र्यादि रोगमित्यलं प्रसङ्गेन ।

एवं सर्वत्र नाख्यातिनिर्वहन्तीव लक्ष्यते ।
न चैतयापि परतः प्रामाण्यमपहन्यते ॥
रजतेऽनुभवः किं स्यादुत प्रमुषिता स्मृतिः ।
द्वैविध्यदर्शनादेवं भवेत्तत्रापि संशयः ॥
संशयानश्च संवादं नूनमन्वेषते जनः ।
तदपेक्षाकृतं तस्मात् प्रामाण्यं परतो ध्रुवम् ॥
न चैष शून्यवादस्य प्रतीकारक्रियाक्रमः ।
अनर्थजा हि निर्दग्धपित्रादौ भवति स्मृतिः ॥
दृष्टान्तीकृत्य तामेव शून्यवादः समुत्थितः ।
भ्रमापह्नवमात्रेण प्रतिहन्तुं न शक्यते ॥
अथास्ति काचित् परतः प्रामाण्यस्य निषेधिका ।
शून्यवादस्य या युक्तिः सैव वाच्या, किमेतया ॥
तस्माद्यथार्थमस्याः संश्रयणं तन्निषिद्धमख्यातेः ।
संविद्विरोध एव प्रकटित इति धिक् प्रमादित्वम् ॥

तदुक्तम्

कृतश्च शूलविध्वंसो न चानङ्गश्च सङ्गतः ।
आत्मा च लाघवं नीतस्तच्च कार्यं न साधितम् ॥

यत्पुनर्विपरीतख्यातौ पक्षत्रयमाशङ्क्य दूषितं तदपि न युक्तम् । अस्तु तावदयमेव पक्षः रजतमालम्बनं तदेव चास्यां प्रतीतौ परिस्फुरतीति ।

नन्वत्र चोदितम् असत्ख्यातिरेव सा भवेदिति। नैतत् साधु, देशान्तरादौ रजतस्य विद्यमानत्वात् । असत्ख्यातिपक्षे हि

तत्रैकान्तासतोऽर्थस्य किं देशान्तरचिन्तया ।
किं कुर्मस्तादृशस्यैव वस्तुनः ख्यातिदर्शनात् ॥
यस्तु देशान्तरेऽप्यर्थो नास्ति कालान्तरेऽपि वा ।
न तस्य ग्रहणं दृष्टं गगनेन्दीवरादिवत् ॥

अयमेव च द्वयोरसत्त्वयोर्विशेषः यदेकस्य ग्रहणं दृष्टमितरस्य न दृष्टमिति ।

ननूक्तं तत्रासतोऽर्थस्य कथं ज्ञानजनकत्वमजनकस्य वा कथं प्रतिभासः ? उक्तमत्र सदृशपदार्थदर्शनोद्भूतस्मृत्युपस्थापितस्य रजतस्यात्र प्रतिभासनमिति । न चास्योपस्थानं पशोरिव रज्ज्वा संयम्य ढौकनम्, अपि तु हृदये परिस्फुरतोऽर्थस्य बहिरवभासनम् । न चैतावतेयमात्मख्यातिरसत्ख्यातिर्वेति वक्तव्यम्, विज्ञानाद् विच्छेदप्रतीतेः, अत्यन्तासदर्थप्रतिभासाभावाच्चेति । अत एव पिहितस्वाकारा परिगृहीतपराकारा शुक्तिकैवात्र प्रतिभातीति भवतु पक्षः ।

ननूक्तं कृत्यासीतावत् किमिदं वेशभाषापरिवर्तनम्, कथञ्च रजतज्ञाने शुक्तिकावभासितुमर्हति ? श्रुतमिदं नाटकम्, न तु वयमत्रोपहासपात्रम् । शुक्तिकेति वस्तुस्थितिरेषा कथ्यते । पुरोऽवस्थितं धर्मिमात्रं भास्वररूपादिसादृश्योपजनितरजतविशेषस्मरणमत्र प्रतिभातीति ब्रूमः यदेतत् पुरः किमपि वर्त्तते तद् रजतमित्यनुभवात् । वस्तुस्थित्या तु शुक्तिरेव सा त्रिकोणत्वादिविशेषग्रहणाभावाच्च निगूहितनिजाकारेत्युच्यते रजतविशेषस्मरणाच्च परिगृहीतरजताकारेति । एतच्च विषयेन्द्रियादिदोषप्रभवेषु शुक्तिकारजतावभास-भास्करकिरणजलावगम-जलदगन्धर्वनगरनिर्वर्णन-रज्जुभुजगग्रहण-रोहिणीरमणद्वयदर्शन-शङ्खशर्करापीततिक्ततावसायकेशकूर्चकालोकनादि-विभ्रमेष्वभ्युपगम्यते । मनोदोषनिबन्धनेषु तु मिथ्याप्रत्ययेषु निरालम्बनेषु स्मृत्युल्लिखितनिराकारः प्रकाशते इति ।

यस्तु तृतीयः पक्षः अन्यदालम्बनमन्यश्च प्रतिभातीति कैश्चिदाश्रितः, तत्रापि न सन्निहितस्यालम्बनत्वमुच्यते येन भूप्रदेशस्यापि तथात्वमाशङ्क्येत । नापि

मनोदोषनिबन्धनेषु मानसनिद्रादिदोषजेषु स्वप्नादिज्ञानेषु ।

आलम्बनस्याजनकत्वं यच्चक्षुरादावपि प्रसज्येत, किन्त्विदमित्यङ्गुल्या निर्दिश्यमानं कर्मतया यज्ज्ञानस्य जनकं तदालम्बनमित्युच्यमाने न कश्चिद्दोषः ।

ननु केशोण्डुकज्ञाने किमालम्बनकारणम् ? किञ्चित्तु तिमिरं रोमराजिरिव नयनधाम्नो मध्ये एवास्ते, तेन द्विधा कृता नयनवृत्तिर्द्वित्वेन चन्द्रमसं गृह्णाति, किञ्चित्तु तिमिरं तितउ विवरवदन्तरान्तरा तिष्ठति चक्षुषः, तेन विरलप्रसृता नयनरश्मयः सूक्ष्माः सूर्यांशुभिरभिहन्यमानाः केशकूर्चकाकारा भवन्तीति तदेवालम्बनम्, अनुदितेऽस्तमिते वा सवितरि केशोण्डुकप्रत्ययस्यानुत्पादात् ।

गन्धर्वनगरज्ञाने जलदाः पाण्डुरत्विषः ।
आलम्बनं गृहाट्टालप्राकाराकारधारिणः ॥
तस्माद्विपरीतख्यातौ पक्षत्रयमपि निरवद्यम् ।

यः पुनरितरेतरसङ्करः ख्यातीनामुदाहारि तत्रात्मख्यात्यसत्ख्याती अपवर्गाह्निके वयमपि विज्ञानाद्वैतमपाकरिष्यन्तः पराकरिष्याम इति किं तच्चिन्तया । विपरीतख्यातौ तु तत्साङ्कर्यं परिहृतम् ।

यत्पुनरवादि सर्ववादिभिः स्मृतिप्रमोषोऽभ्युपगत एव प्राभाकरैस्तु यशः पीतमिति, तत्र वाद्यन्तराणि तावद्यथा भवन्ति तथा भवन्तु वयन्तु स्मृत्युपारूढरजताद्याकारप्रतिभासमभिवदन्तो बाढं स्मृतिप्रमोषमभ्युपगतवन्तः, किन्तु न तावत्येव विश्राम्यति मतिः, अपि तु रजताद्यनुभवोऽपि संवेद्यते इति न स्मृतिप्रमोषमात्रे एव विरन्तव्यम् । अतो विपरीतख्यातिपक्ष एव निरवद्य इति स्थितम् ।

यस्तु बाधप्रकारः प्राग् विकल्पितः, तत्र सहानवस्थानसंस्कारोच्छेदादिपक्षा अनभ्युपगमेनैव निरस्ता इत्यस्थाने कण्ठशोष आयुष्मतानुभूतः । विषयापहारस्तावदस्तु बाधः विषयस्य च न प्रतिभातत्वमपह्नियते किन्तु प्रतिभातस्यासत्वं ख्याप्यते इत्यपहारार्थः । असत्त्वमपि नेदानीमुपनतस्य ख्याप्यते येन दृष्टपूर्वद्रुघणभग्नकुम्भाभावप्रतिभासवदबाधः स्यात् । न च तदानीमप्यभावग्रहणे वस्तुनो द्व्यात्मकत्वमाशङ्कनीयम्, पूर्वावगताकारोपमर्दद्वारेण बाधकप्रत्ययोत्पादात्, यन्मया तदा रजतमिति गृहीतं तद्रजतं न भवति अन्यदेव तद्वस्त्विति ।

तिमिरं तितउविवरवदिति ; तितउ परिपवनम् ।

ननु स्वकालनियतत्वाद् ज्ञानानां कथमुत्तरस्य ज्ञानस्य पूर्वज्ञानोत्पादकालावच्छिन्नतद्विषयाभावग्रहणसामर्थ्यम् ? किं कुर्मः, तथा प्रत्ययोत्पादात्। न भग्नघटवदिदानीं तत्रास्तिता गृह्यते अपि तु तदैव तदसदिति प्रतीतिः। यथा च न वर्तमानैकनिष्ठैव विषयप्रतीतयस्तथा क्षणभङ्गभङ्गे वक्ष्यामः।

अथ वा फलापहारो भवतु बाधः, प्रमाणफलत्वञ्च हानादिबुद्धीनां प्रत्यक्षलक्षणे वर्णितमिति तदपहरणात् प्रमाणं बाधितं भवत्येव। किं कुर्वता बाधकेन प्रमाणफलमपहृतमिति चेत्

गायता नृत्यता वापि जपता जुह्वतापि वा।
तच्चेत् कार्यं कृतं तेन किमवान्तरकर्मणा॥
तदभ्युपगमे वापि तत् किं विदधता कृतम्।
तच्च किं कुर्वतेत्येवमवधिः को भविष्यति॥

तदलममुनावान्तरप्रश्नेन सर्वत्र बाधकप्रत्ययोपजनने सति हानादिरूपं पूर्वप्रमाणफलं निवर्त्तते इति तेन तद्बाधितमुच्यते। समानासमानविषयविकल्पोऽपि न पेशलः। एकस्मिन् विषये विरुद्धाकारग्राहिणोर्ज्ञानयोर्बाध्यबाधकभावाभ्युपगमात्। चित्रादिप्रत्यये कथं न बाध इति चेत्, पूर्वज्ञानोपमर्देनोत्तरविज्ञानानुत्पादात्। अत एवैकत्रापि धर्मिणि बहूनां धर्माणामितरेतरानुपमर्देन वेद्यमानानामस्त्येव समावेशः, पूर्वोपमर्देनेतरविज्ञानाजननाच्चैतदपि प्रत्युक्तं भवति।

यदुक्तम्, पूर्वस्मिन् प्रत्यये प्राप्तप्रतिष्ठे सत्यागन्तुज्ञानमुत्तरं बाध्यतामिति। यतः पूर्वोपमर्देनैव तदुत्तरं ज्ञानमुदेति विषयसहायत्वात् प्रमाणान्तरानुगृह्यमाणत्वाच्च उत्तरमेव ज्ञानं बाधकमिति युक्तम्। तस्मादस्ति ज्ञानानां बाध्यबाधकभावः। स चायं बाधव्यवहारो विपरीतख्यातिपक्षे एव सामर्थ्यमस्खलितं दधातीति स एव ज्यायान्।

मीमांसकैकदेशिमतनिरासः

अज्ञः कोऽपि नाम मीमांसकस्त्वाह, येयं शुक्तिकायां रजतप्रतीतिर्विपरीतख्यातिरिति तद्वादिनामभिमता सा तथा न भवतीति, सत्यरजतप्रतीतिवदत्राप्यवभास्यरजतसद्भावात्। लौकिकालौकिकत्वे तु विशेषः, रजतज्ञानावभास्यं हि रजतमुच्यते तच्च किञ्चिद् व्यवहारप्रवर्त्तकं किञ्चिन्नेति। तत्र व्यवहारप्रवर्त्तकं

लौकिकमुच्यते ततोऽन्यदलौकिकमिति । यच्च शुक्तिकाशकलमिति भवन्तो वदन्ति तदलौकिकं रजतम्, रजतज्ञानावभास्यत्वाद् रजतं तद्व्यवहाराप्रवृत्तेरलौकिकमिति ।

तदेतदपरामृष्टसंवेदनेतिवृत्तस्य अभिनवपदार्थसर्गप्रजापतेरभिधानम्, बाधकप्रत्ययेन तत्र रजताभावस्य ख्यापनात् । नेदं रजतमिति हि रजतं प्रतिषेधत्येष प्रत्ययो न विद्यमानरजतस्यालौकिकत्वमवद्योतयते इति ।

अथ नेदं लौकिकमिति व्याख्यायते, हन्त वाक्यशेषः क्रियतां संयजत्ररङ्गानीतिवत् । सोऽयं श्रोत्रियः स्वशास्त्रवर्त्तनीमिहापि न तां त्यजति, न तु तस्या अयमवसरः। अगृह्यमाणे तु रजताख्येऽन्यधर्मिणि कथं तद्धर्मत्वेन लौकिकत्वं गृह्यते, रजताभावग्रहणे त्वेष न दोषः भावतदभावयोः धर्मधर्मिभावाभावात् । स्मर्यमाणप्रतियोग्यवच्छिन्नो हि अभावो गृह्यते एव। तस्मादत्र नास्त्येव रजतं न पुनरलौकिकं तदस्ति, न च रजतज्ञानावभास्यत्वमात्रं रजतलक्षणमपि त्वबाधितरजतज्ञानगम्यत्वम् ।

अपि च लौकिकालौकिकप्रविभागः प्रतिभासनिबन्धनो वा स्याद् व्यवहारसदसद्भावनिबन्धनो वा । न तावत् प्रतिभासनिबन्धनः, यथाप्रतीतिभावात् । क्वचिद्धि रजतं क्वचिच्च तदभावः प्रतीयते न तु लौकिकत्वमलौकिकत्वं वा ।

अथ व्यवहारप्रवृत्त्यप्रवृत्तिभ्यां लौकिकालौकिकत्वे व्यवस्थाप्येते? तद्वक्तव्यं कोऽयं व्यवहारो नामेति ? ज्ञानाभिधानस्वभावो हि व्यवहारः स तद्विषयो नास्तीत्युक्तम् । तदर्थक्रियानिर्वर्त्तनं व्यवहार इति चेत्, तर्हि स्वप्ने परिरभ्यमाणाया योषितः कूटकार्षापणस्य च लौकिकत्वं प्राप्नोति । उत्पद्य नष्टे घटे अर्थक्रियाया निवृत्तेरलौकिकत्वं स्यात् ।

संयजत्रैरङ्गानि इति । "सं ते वायुर्वातेन गच्छतां सं यजत्रैरङ्गानि समाशिषा यज्ञपतिः" । वायुस्ते तव सम्बन्धी वातेन सङ्गच्छतां सम्बन्ध्यताम्, अङ्गानि यजत्रैर्देवैः सङ्गच्छताम्, यज्ञपतिर्यजमान आशिषा सङ्गच्छतामिति पशुविशसनमन्त्रस्यार्थः । अत्र प्रकृतस्य 'गच्छताम्' इत्यस्यैकवचनत्वात् 'यजत्रैरङ्गानि' इत्यत्र 'गच्छन्ताम्' इति लौकिको वाक्यशेषः कार्यः संशब्दस्तु श्रूयमाणः स्थित एव ।

अपि च यः शुक्तिकायां रजतव्यवहारं न करोति स रजताभावमेव बुद्ध्वा, न रजतस्य सतस्तस्यालौकिकताम्। यदि चेदमलौकिकं रजतं तत्किमर्थमिह तदर्थक्रियार्थं प्रवर्त्तते। अलौकिकं लौकिकत्वेन गृहीत्वेति चेत्, सैवेयं तपस्विनी विपरीतख्यातिरायाता। तस्माद् विपरीतख्यातिद्वेषेण कृतमीदृशा अत्रापि लोकसिद्धैव प्रतीतिरभ्युपगम्यताम्।

न वा मीमांसका एते स्वभार्यामपि वेश्मतः।
निःसारयितुमिच्छन्ति स्वतःप्रामाण्यतृष्णया॥
न चैवमपि तत्सिद्धिर्बुद्धिद्वैविध्यदर्शनात्।
संशये सति संवादसापेक्षत्वं तथैव तत्॥
क्लेशेन तदमुनापि स्वार्थस्तेषां प्रसिद्ध्यति न कश्चित्।
यद्भवति चैव गत्या राजपथेनैव तद्भवतु॥
नात्मख्यातिर्बाह्यतयाऽर्थप्रतिभासा-
न्नासत्ख्यातिर्न ह्यसतां धीविषयत्वम्।
उक्तोऽख्यातौ दूषणमार्गो विपरीत-
ख्यातिस्तस्मादाश्रयणीया मतिमद्भिः॥

विपरीतख्यातिसिद्धौ शब्दस्य परतः प्रामाण्यम्

स्थिते च तस्मिन् विपरीतवेदने
तदीयसाधर्म्यकृतोऽस्ति संशयः।
तदा च संवादमुखप्रतीक्षणाद्-
भजन्ति वेदाः परतःप्रमाणताम्॥
प्रत्यक्षादिप्रमाणानां तद्यथास्तु तथास्तु वा।
शब्दस्य हि प्रमाणत्वं परतो मुक्तसंशयम्॥

दृष्टे हि विषये प्रामाण्यनिश्चयमन्तरेणैव लघुपरिश्रमेषु कर्मसु प्रवृत्तिरिति तदुपयोगिप्रत्यक्षादिप्रमाणप्रामाण्यनिश्चयेऽदुरुपपादे कोऽभिनिवेशः? शब्दे पुनर-दृष्टपुरुषार्थपथोपदेशिनि प्रामाण्यमनिश्चित्य महाप्रयत्ननिर्वर्त्यानि ज्योतिष्टो-

---

न वा मीमांसका इति। विपरीतख्यातिरत्याज्यत्वाद् भार्यास्थानीया।

मादीनि न प्रेक्षापूर्वकारिणो यज्वानः प्रयुञ्जीरन् इत्यवश्यं निश्चेतव्यम् तत्र प्रामाण्यम् । तच्च परत एवेति ब्रूमः । शब्दस्य वृद्धव्यवहाराधिगतसम्बन्धोपकृतस्य सतः प्रतीतिजनकत्वं नाम रूपमवधृतम् । तत्तु नैसर्गिकशक्त्यात्मकसम्बन्धमहिम्ना वा पुरुषघटितसमयसम्बन्धबलेन वेति विचारयिष्यामः । प्रकाशकत्वमात्रन्तु दीपादेरिव तस्य रूपम्, यथा हि दीपः प्रकाशमानः शुचिमशुचिं वा यथासन्निहितमर्थमवद्योतयति तथा शब्दोऽपि पुरुषेण प्रयोज्यमानः श्रवणपथमुपगतः सत्योऽनृतो वा समन्वितेऽसमन्विते वा सफले निष्फले वा सिद्धे कार्ये वाऽर्थे प्रमितिमुपजनयतीति तावदेवास्य रूपम् । अयन्तु दीपाच्छब्दस्य विशेषो यदेष सम्बन्धव्युत्पत्तिमपेक्षमाणः प्रमामुत्पादयतीति, दीपस्तु तन्निरपेक्ष इति । तस्याः शब्दजनितायाः प्रमितेर्यथार्थेतरत्वं पुरुषाधीनं सम्यग् दर्शिनि शुचौ पुरुषे सति सत्यार्था सा भवति प्रतीतिरितरथा तु तद्विपरीतेति । तत्र यथा नैसर्गिकमर्थसंस्पर्शित्वं शब्दस्य न रूपमिति समर्थितम्, एवमस्य स्वाभाविकं सत्यार्थत्वमपि न रूपम् । एवमभ्युपगम्यमाने विप्रलम्भकवचसि विसंवाददर्शनं न भवेत् । तस्मात् पुरुषगुणदोषाधीनावेव शाब्दे प्रत्यये संवादविसंवादौ । न चेन्द्रियादाविव तत्र दुर्भणा गुणाः । रागादयो दोषाः करुणादयो गुणाः पुरुषाणामतिप्रसिद्धा एव । पुरुषगुणा एव शब्दस्य गुणाः न स्वशरीरसंस्थाः चक्षुरादेरिवेति । तत्र यदि पुरुषगुणानां प्रामाण्यकारणता नेष्यते दोषाणामपि विप्लवहेतुता माभूत् ।

यत्तु दोषप्रशमनचरितार्था एव पुरुषगुणाः प्रामाण्यहेतवस्तु न भवन्तीत्यत्र शपथशरणा एव श्रोत्रियाः । न च बाधानुत्पत्तिमात्रेण वैदिक्याः प्रतीतेः प्रामाण्यं भवितुमर्हति 'पक्ष्मलाक्षीलक्षमभिरमयेद् विद्याधरपदकाम' इत्यादावपि प्रामाण्यप्रसङ्गात् । उक्तञ्च केनचित्

यथा हि स्वप्नदृष्टोऽर्थः कश्चिद् द्वीपान्तरादिषु ।
असंवादविसंवादः श्रद्धातुं नैव शक्यते ।।
तथा चोदनयाप्यर्थं बोध्यमानमतीन्द्रियम् ।
असंवादविसंवादं न श्रद्दधति केचनेति ।।

नैसर्गिकशक्त्यात्मकेति । वाच्यवाचकशक्त्योः परस्परनियतत्वं शक्त्यात्मकः सम्बन्धः ।

तत्र स्वप्नज्ञाने हेतुर्निद्रादिदोषोऽस्तीति दुष्टकारणज्ञानादप्रामाण्यमिति चेत्, लोलाक्षीलक्षवाक्ये किं वक्ष्यसि ? प्रभवस्तस्य न ज्ञायते इति चेत् नतरामसौ वेदेऽपि त्वन्मते ज्ञायते इति को विशेषः ? महाजनादिपरिग्रहोऽस्य नास्तीति चेद्, अन्वेषणीयं तर्हि प्रामाण्यकारणम्, न बुद्ध्युत्पादकत्वादेवौत्सर्गिकं प्रामाण्यमिति युक्तम् ।

साक्षाद्द्रष्टृनरोक्तत्वं शब्दे यावन्न निश्चितम् ।
बाधानुत्पत्तिमात्रेण न तावत् तत्प्रमाणता ॥

यदपि वेदे कारणदोषनिराकरणाय कथ्यते 'यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रया' इति तदपि न साम्प्रतम्, असति वक्तरि प्रामाण्यहेतूनां गुणानामप्यभावेन तत्प्रामाण्यस्याप्यभावात् ।

वेदानामीश्वरोक्तत्वादाप्तोक्तत्वं ततश्च प्रामाण्यम्

न च वेदे वक्तुरभावः सुवचः, तथा ह्येतदेव तावद् विचारयामः, किं वेदे वक्ता विद्यते न वेति ।

ननु च वेदे प्रमाणान्तरसंस्पर्शरहितविचित्रकर्मफलगतसाध्यसाधनभावोपदेशिनि कथं तदर्थसाक्षाद्दर्शी पुरुष उपदेष्टा भवेत् ? उच्यते

वेदस्य पुरुषः कर्ता न हि यादृशतादृशः ।
किन्तु त्रैलोक्यनिर्माणनिपुणः परमेश्वरः ॥
स देवः परमो ज्ञाता नित्यानन्दः कृपान्वितः ।
क्लेशकर्मविपाकादिपरामर्शविवर्जितः ॥

ईश्वरसद्भावादौ शङ्का

अत्राह किं ब्रूषे त्रैलोक्यनिर्माणनिपुण इति ? अहो तव सरलमतित्वम् । न हि तथाविधपुरुषसद्भावे किञ्चन प्रमाणमस्ति ।

अन्वेषणीयं तर्हि प्रामाण्यकारणम् महाजनपरिग्रहादि ।

क्लेशकर्मविपाकादि इति । क्लेशा रागादयः । कर्माणि शुभाशुभानि । विपाको जात्यायुर्भोगाः । आदिग्रहणाद् आशयः संस्कारो धर्माधर्माख्यः । तदुक्तम् 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इति ।

तथा हीश्वरसद्भावो न प्रत्यक्षप्रमाणकः ।
न ह्यसावक्षविज्ञाने रूपादिरिव भासते ॥
न च मानसविज्ञानसंवेद्योऽयं सुखादिवत् ।
योगिनामप्रसिद्धत्वान्न तत्प्रत्यक्षगोचरः ॥
प्रत्यक्षप्रतिषेधेन तत्पूर्वकमपाकृतम् ।
अनुमानमविज्ञाते तस्मिन् व्याप्त्यनुपग्रहात् ॥
न च सामान्यतो दृष्टं लिङ्गमस्यास्ति किञ्चन ।
क्षित्यादीनान्तु कार्यत्वमसिद्धं सुधियः प्रति ॥
शैलादिसन्निवेशोऽपि नैष कर्त्रनुमापकः ।
कर्त्रपूर्वककुम्भादिसन्निवेशविलक्षणः ॥
दृष्टः कर्त्रविनाभावी सन्निवेशो हि यादृशः ॥
तादृङ् नगादौ नास्तीति कार्यत्ववदसिद्धता ।
सिद्धत्वेऽपि न सिद्धत्वमनैकान्त्यात् तृणादिभिः ॥
अकृष्टजातैः कर्त्तारमन्तरेणाप्तजन्मभिः ।
तेषामुत्पत्तिसमये प्रत्यक्षत्वं न लक्ष्यते ॥
कर्तुर्दृश्यत्वमप्येवमभावोऽनुपलब्धितः ।
न च क्षितिजलप्रायदृष्टहेत्वतिरेकिणः ॥
कस्यापि कल्पनं तेषु युज्यतेऽतिप्रसङ्गतः ।
तेन कर्तुरभावेऽपि सन्निवेशादिदर्शनात् ॥
अनैकान्तिकता हेतोर्विप्रत्वे पुरुषत्ववत् ।
किञ्च व्याप्त्यनुसारेण कल्प्यमानः प्रसिद्ध्यति ॥

कर्तृदृश्यत्वमिति अशरीरस्य कर्तृत्वानुपपत्तेः सशरीरत्वे चेतरकर्तृवद् दृश्यत्वम्, दृश्यस्य चानुपलब्धिरभावं साधयत्येव ।

युज्यतेऽतिप्रसङ्गत इति । अकिञ्चित्करस्य सत्त्वमात्रेण कारणत्वकल्पनायां चैत्रस्य व्रणरोपणे स्थाणोरपि कारणत्वं प्रसज्यते । तदुक्तम्

शस्त्रौषधादिसम्बन्धाच्चैत्रस्य व्रणरोपणे ।
असम्बद्धस्य किं स्थाणोः कारणत्वं न कल्प्यते ॥ इति ॥

कुलालतुल्यः कर्त्तेति स्याद् विशेषविरुद्धता ।
व्यापारवानसर्वज्ञः शरीरी क्लेशसंकुलः ॥

घटस्य यादृशः कर्त्ता तादृगेव भवेद् भुवः ।
विशेषसाध्यतायां वा साध्यहीनं निदर्शनम् ।
कर्त्तृसामान्यसिद्धौ तु विशेषावगतिः कुतः ॥

अपि च, सशरीरो वा जगन्ति रचयेदीश्वरः, शरीररहितो वा ? तदीयं शरीरं कार्यं नित्यं वा भवेत् सर्वथानुपपत्तिः

अशरीरस्य कर्तृत्वं दृश्यते नहि कस्यचित् ।
देहोऽप्युत्पत्तिमानस्य देहत्वाच्चैत्रदेहवत् ॥

कार्यमपीश्वरशरीरं तत्कर्तृकं वा स्यादीश्वरान्तरकर्तृकं वा ? तत्र

स्वयं निजशरीरस्य निर्माणमिति साहसम् ।
कर्त्रन्तरकृते तस्मिन्नीश्वरानन्त्यमापतेत् ॥

भवतु, को दोष इति चेत्, प्रमाणाभाव एव दोषः। एकस्यापि तावदीश्वरस्य साधने पर्याकुलतां गताः किं पुनरनन्तानाम् । किञ्च व्यापारेण वा कुलालादिरिव कार्याणि सृजेदीश्वरइच्छामात्रेण वा । द्वयमपि दुर्घटम्,

व्यापारेण जगत्सृष्टिः कुतो युगशतैरपि ।
तदिच्छां चानुवर्त्तन्ते न जडाः परमाणवः ॥

अपि च किं किमपि प्रयोजनमनुसंधाय जगत्सर्गे प्रवर्त्तते प्रजापतिः, एवमेव वा ? निष्प्रयोजनायां प्रवृत्तावप्रेक्षापूर्वकारित्वादुन्मत्ततुल्योऽसौ भवेत्, पूर्वोऽपि नास्ति पक्षः ।

अवाप्तसर्वानन्दस्य रागादिरहितात्मनः ।
जगदारभमाणस्य न विद्मः किं प्रयोजनम् ॥

अनुकम्पया प्रवर्त्तत इति चेद्, मैवम्

सर्गात् पूर्वं हि निःशेषक्लेशसंस्पर्शवर्जिताः ।
नास्य मुक्ता इवात्मानो भवन्ति करुणास्पदम् ॥

परमकारुणिकानामपि दुःसहदुःखदहनदन्दह्यमानमनसो जन्तूनवलोकयतामुदेति दया न पुनरपवर्गदशावदेषा दुःखशून्यानिति ।

करुणामृतसंसिक्तहृदयो वा जगत् सृजन् ।
कथं सृजति दुर्वारदुःखप्राग्भारदारुणम् ॥

अथ केवलं सुखोपभोगप्रायं जगत् स्रष्टुमेव न जानाति, सृष्टमपि वा न चिरमवतिष्ठते इत्युच्यते, तदप्यचारु । निरतिशयस्वातन्त्र्यसीमनि वर्त्तमानस्य स्वेच्छानुवर्त्तिसकलपदार्थसार्थस्थितेः परमेश्वरस्य किमसाध्यं नाम भवेत् ? नानात्मगतशुभाशुभकर्मकलापापेक्षः स्रष्टा प्रजापतिरिति चेत्, कर्माण्येव हि तर्हि सृजन्तु जगन्ति किं प्रजापतिना, अथाचेतनानां चेतनानधिष्ठितानां स्रष्टृत्वमघटमानमिति तेषामधिष्ठाता चेतनः कल्प्यते इति चेन्न । तदाश्रयाणामात्मनामेव चेतनत्वात् त एवाधिष्ठातारो भविष्यन्ति किमधिष्ठात्रन्तरेणेश्वरेण ? तस्यापि तादृशा परकीयकर्मान्तरापेक्षासङ्कोचितस्वातन्त्र्येण किमैश्वर्येण कार्यम् ? राज्यमिव मन्त्रिपरवशमैश्वर्यं क्वोपयुज्यते ? तादृग् यत्रापरनिरपेक्षं रुच्यैव न रच्यतेऽभिमतम् अन्येनाप्युक्तम्

किमीश्वरतयेश्वरो यदि न वर्त्तते स्वेच्छया ।
न हि प्रभवतां क्रियाविधिषु हेतुरन्विष्यते ॥ इति ।

अथ क्रीडार्था जगत्सर्गे भगवतः प्रवृत्तिः ईदृशा च शुभाशुभरूपेण जगता सृष्टेन क्रीडति परमेश्वर इत्युच्यते, तर्हि क्रीडासाध्यसुखरहितत्वेन सृष्टेः पूर्वमवाप्तसकलानन्दत्वं नाम तस्य रूपमवहीयते ।

न च क्रीडापि निःशेषजनतातङ्ककारिणी ।
आयासबहुला चेयं कर्तुं युक्ता महात्मनः ॥

तस्मान्न जगतां नाथ ईश्वरः स्रष्टा संहर्तापि भवति ।

न ह्यस्य ध्रियमाणेषु पूर्यन्ते जन्तुकर्मसु ।
सकृत् समस्तत्रैलोक्यनिर्मूलनमनोरथाः ॥

कर्मोपरमपक्षे तु पुनः सृष्टिर्न युज्यते ।
न कर्मनिरपेक्षो हि सर्गवैचित्र्यसंभवः ॥

अथ ब्राह्मेण मानेन संवत्सरशतनिष्ठामधितिष्ठति परमेष्ठिनि महेश्वरस्य संजिहीर्षा जायते, तया तिरोहितस्वफलारम्भशक्तीनि कर्माणि संभवन्तीति संपद्यते सकलभुवनप्रलयः। पुनश्च तावत्येव रात्रिप्राये काले व्यतीते सिसृक्षा भवति भगवतः, तयाभिव्यक्तशक्तीनि कर्माणि कार्यमारप्स्यन्ते इति, तदप्ययुक्तम्

उद्भवाभिभवौ तेषां स्यातां चेदीश्वरेच्छया।
तर्हि सैवास्तु जगतां सर्गसंहारकारणम्॥

किं कर्मभिः, एवमस्त्विति चेद्, न। ईश्वरेच्छावशित्वपक्षे हि त्रयो दुरतिक्रमाः दोषाः, तस्यैव तावन्महात्मनो निष्करुणत्वमकारणमेव दारुणसर्गकारिणः, तथा वैदिकीनां विधिनिषेधचोदनानामानर्थक्यम्। ईश्वरेच्छात एव शुभाशुभफलोपभोगसम्भवात्। अनिर्मोक्षप्रसङ्गश्च। मुक्ता अपि प्रलयसमये इव जीवाः पुनरीश्वरेच्छया संसरेयुः। तस्मान्नेश्वराधीनो जगतां सर्गः संहारो वा।

इत्यनन्तरगीतेन नयेनेश्वरसाधने।
नानुमानस्य सामर्थ्यमुपमाने तु का कथा॥
आगमस्यापि नित्यस्य तत्परत्वमसाम्प्रतम्।
तत्प्रणीते तु विस्रम्भः कथं भवतु मादृशाम्॥
किञ्चागमस्य प्रामाण्यं तत्प्रणीतत्वहेतुकम्।
तत्प्रामाण्याच्च तत्सिद्धिरित्यन्योन्याश्रयं भवेत्॥
अन्यथाऽनुपपत्त्या तु न शक्यो लब्धुमीश्वरः।
न हि तद् दृश्यते कार्यं तं विना यन्न सिद्धयति॥

तस्मात् सर्वसद्विषयप्रामाणानवगम्यमानस्वरूपत्वादभाव एवेश्वरस्येति सिद्धम्।

न च प्रसिद्धिमात्रेण युक्तमेतस्य कल्पनम्।
निर्मूलत्वात्तथा चोक्तं प्रसिद्धिर्वटयक्षवत्॥

ब्राह्मेण मानेनेति।

दैविकानां युगानान्तु सहस्रं परिसङ्ख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥ इत्यादिना।

तत्परत्वमसाम्प्रतम्। तत्परत्वे हि नित्यत्वव्याघातः, तेनैव कर्तुः प्रतिपादनात्।

अत एव निरीक्ष्य दुर्घटं जगतो जन्मविनाशडम्बरम् ।
न कदाचिदनीदृशं जगत् कथितं नीतिरहस्यवेदिभिः ।

सामान्यतोदृष्टानुमानेनैवेश्वरसिद्धिकथनम्

अत्र वदामः, यत्तावदिदमगादि नगादिनिर्माणनिपुणपुरुषपरिच्छेददक्षं प्रत्यक्षं न भवतीति तदेवमेव। प्रत्यक्षपूर्वकमनुमानमपि तेनैव पथा प्रतिष्ठितमिति तदप्यास्ताम् ।

सामान्यतोदृष्टन्तु लिङ्गमीश्वरसत्तायामिदं ब्रूमहे, पृथिव्यादि कार्यं धर्मि, तदुत्पत्तिप्रकारप्रयोजनाद्यभिज्ञकर्तृपूर्वकमिति साध्यो धर्मः, कार्यत्वाद्, घटादिवत् ।

तस्मिन्ननुमाने चार्वाकादीनामनुपपत्तिनिरासः

ननु कार्यत्वमसिद्धमित्युक्तम्, क एवमाचष्टे चार्वाकः शाक्यो मीमांसको वा ?

चार्वाकस्तावद् वेदरचनाया रचनान्तरविलक्षणाया अपि कार्यत्वमभ्युपगच्छति यः, स कथं पृथ्व्यादिरचनायाः कार्यत्वमपह्नुवीत ?

मीमांसकोऽपि न कार्यत्वमपह्नोतुमर्हति, यत एवमाह येषामप्यनवगतोत्पत्तीनां रूपमुपलभ्यते तन्तुव्यतिषक्तजनितोऽयं पटस्तद्व्यतिषङ्गविमोचनात् तन्तुविनाशाद्वा नङ्क्ष्यतीति कल्प्यते इति। एवमवयवसंयोगनिर्वर्त्यमानवपुषः क्षितिधरादेरपि नाशसम्प्रत्ययः सम्भवत्येव । दृश्यते च क्वचिद्विनाशप्रतीतिः प्रावृषेण्यजलधरधारा-

---

तदुत्पत्तिप्रकारेति। तस्योत्पत्तौ यः प्रकार इतिकर्तव्यता, उत्पन्नस्य च प्रयोजनम् ।

येषामप्यनवगतोत्पत्तीनामिति। शब्दाधिकरणे भाष्यं शब्दस्य कारणाभावाद्धेतोः कारणविनाशात् कारणसंयोगविनाशाद्वा विनाशाशङ्काप्रतिषेधपरम् "येषामनवगतोत्पत्तीनां द्रव्याणां भाव एव लक्ष्यते, तेषामपि केषाञ्चिदनित्यता गम्यते, येषां विनाशकारणमुपलक्ष्यते, यथाभिनवं पटं दृष्ट्वा; न चैनं क्रियमाणमुपलब्धवान्, अथवानित्यत्वमस्याध्यवस्यति रूपमेव हि दृष्ट्वा। तन्तुव्यतिषङ्गजनितोऽयं तद्व्यतिषङ्गविमोचनात् तन्तुविनाशाद्वा विनङ्क्ष्यति, इत्येवमवगच्छन्ति । न चैवं शब्दस्य किञ्चित् कारणमुपलभामहे यद्विनाशाद् विनङ्क्ष्यतीत्यवगम्यते" इति भाष्यम् । ननु कृतकत्वादनित्यत्वानुमानं न पुनरनित्यत्वात् कृतकत्वानुमानम्, एवंसत्यनित्यत्वात् प्रयत्नानन्तरीयकत्वा-

सारनिर्लुठित एव पर्वतैकदेशे पर्वतस्य खण्डः पतित इति । वस्तुगतयोश्च कार्यत्वविनाशित्वयोः समव्याप्तिकता वार्त्तिककृताप्युक्तैव

तेन यत्राप्युभौ धर्मौ व्याप्यव्यापकसम्मतौ ।
तत्रापि व्याप्यतैव स्यादङ्गं न व्यापिता मितेः ॥ इति वदता ।

तस्माद् विनाशित्वेनापि कार्यत्वानुमानात् तन्मतेऽपि न कार्यत्वमसिद्धम् ।

शाक्योऽपि कार्यत्वस्य कथमसिद्धतामभिदधीत येन नित्यो नाम पदार्थः प्रणयकेलिष्वपि न विषह्यते ? तस्मात् सर्ववादिभिरप्रणोद्यं पृथिव्यादेः कार्यत्वम् । अथवा सन्निवेशविशिष्टत्वमेव हेतुमभिदध्महे यस्मिन् प्रत्यक्षत उपलभ्यमाने सर्वापलापलम्पटा अपि न केचन विप्रतिपत्तुमुत्सहन्ते । तस्मान्नासिद्धो हेतुः ।

नुमानमपि स्यादित्याह **वस्तुगतयोश्चेति**। समव्याप्तिकतया 'यद् यत् कृतकं तत् तदनित्यम्, यद् यदनित्यं तत् तत् कृतकम्' इति। नैवं प्रयत्नानन्तरीयकत्वानित्यत्वयोः, 'यद् यदनित्यं तत् तत् प्रयत्नानन्तरीयकम्' इति कर्तुमशक्यत्वात्, विद्युदादौ व्यभिचारात् । वस्तुगतयोरिति वस्तुग्रहणेनाभावगतयोर्व्याप्त्यभावमाह; प्रध्वंसो हि कृतकोऽपि नानित्यः, प्रागभावश्चानित्योऽपि न कृतक इति ।

तेन यत्राप्युभौ धर्मौ इत्यस्य अन्त्यमर्धम् 'तत्रापि व्याप्यतैव स्यादङ्गं न व्यापिता मितेः' इति । यद्यपि कामचारेण व्याप्यव्यापकभावः सिद्ध्यति तथापि व्याप्यत्वेन गमकत्वं वाच्यं न व्यापकत्वेन; "'विषाण्ययं गोत्वात्' न 'विषाणित्वात् गौः'" इत्यादिषु व्याप्यत्वेनैव गमकत्वस्य दर्शनात् । तदुक्तम्

विस्पष्टं इष्टमेतच्च गोविषाणित्वयोर्मितौ ।
व्याप्यत्वाद् गमिका गावो व्यापिका न विषाणिता ॥

व्याप्यव्यापकयोश्च लक्षणम्

यो यस्य देशकालाभ्यां समो न्यूनोऽपि वा भवेत् ।
स व्याप्यो व्यापकस्तस्य समो वाऽभ्यधिकोऽपि वा ॥ इति ॥

यः कृतकत्वधूमादिर्यस्यानित्यत्वाग्न्यादेर्देशकालाभ्यां समो 'यत्र देशे काले वा अनित्यत्वं तत्रावश्यं कृतकत्वम्' इति, न्यूनस्तु 'यस्मिन् देशे काले वाग्निस्तत्र धूमो

ननु कर्त्रविनाभावितया यथाविधस्य सन्निवेशस्य शरावादिषु दर्शनं तादृशमेव सन्निवेशमुपलभ्य क्वचिदनुपलभ्यमानकर्तृके कलशादौ कर्त्रनुमानमिति युक्तम् । अयं त्वन्य एव कलशादिसन्निवेशात् पर्वतादिसन्निवेशः । नात्र सन्निवेशसामान्यं किञ्चिदुपलभन्ते लौकिकाः। सन्निवेशशब्दमेव साधारणं प्रयुञ्जते । न च वस्तुनोरत्यन्तभेदे सति शब्दसाधारणतामात्रेण तदनुमानमुपपद्यते । न हि पाण्डुतामात्रसाधारणत्वेन धूमादिवन्मुकुलरजोराशेरपि कृशानुरनुमातुं शक्यत इति । तदुक्तम्

सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत् ।
सन्निवेशादि तत्तस्माद्युक्तं यदनुमीयते ॥

वस्तुभेदप्रसिद्धस्य शब्दसाम्यादभेदिनः ।
न युक्तानुमितिः पाण्डुद्रव्यादिव हुताशने ॥ इति ।

उच्यते। यादृगिति न बुद्ध्यामहे। धूमो हि महानसे कुम्भदासीफूत्कारमारुतसन्धुक्ष्यमाणमन्दज्वलनजन्मा कृशप्रायप्रकृतिरुपलब्धः। स यदि पर्वते प्रबलसमीरणोल्लसितहुतवहप्लुष्यमाणमहामहीरुहस्कन्धेन्धनप्रभवो बहुलबहुलः खमण्डलमखिलमाक्रामन्नुपलभ्यते तत् किमिदानीमनलप्रमितिं मा कार्षीत् ? अथ विशेषरहितं धूममात्रमग्निमात्रेण व्याप्तमवगतमिति ततस्तदनुमानम् । इहापि सन्निवेशमात्रं कर्तृमात्रेण व्याप्तमिति ततोऽपि तदनुमीयताम् ।

ननु सन्निवेशशब्दसाधारण्यमात्रमत्र, न वस्तुसामान्यं किञ्चिदस्ति । भिक्षो ! धूमेऽपि भवद्दर्शने किं वस्तुसामान्यमस्ति ? मा भूद्वस्तुसामान्यम्, आकाशकालादिव्यावृत्तिरूपन्तु संव्यवहारकारणमस्त्येव। हन्त ! तर्हि प्रकृतेऽपि असन्निवेशव्यावृत्तिरूपं भवतु सामान्यम्, आकाशकालादिविलक्षणरूपत्वात् पृथिव्यादेः ।

नावश्यम्' इति स व्याप्यः; व्यापकस्तु अनित्यत्वाख्यः समः कृतकत्वेन, अभ्यधिकश्च धूमादग्निः, असत्यपि धूमे तस्य भावात् ।

सिद्धं यादृगिति । कर्त्रन्वयव्यतिरेकानुविधायि यादृक् सन्निवेशविशेषादि दृष्टं तस्माद् यदनुमीयते कर्तृजातं तद् युक्तमिति तात्पर्यार्थः । **शब्दसाम्यादभेदिन** इति । सन्निवेशशब्दसाम्याद् घटादिसन्निवेशात् कर्तुरनुमितिरयुक्ता, यथा धूमोऽपि पाण्डुर्भवतीति तच्छब्दसाम्यादन्येनापि पाण्डुद्रव्येण नाग्नेरनुमानम् ।

ननु तत्र धूमो धूम इत्यनुवृत्तविकल्पबलेन कल्पितमपोहस्वभावं सामान्यमभ्युपगतम् । इहापि सन्निवेशविकल्पानुवृत्तेः त्वत्कल्पितमपोहरूपमेव सामान्यमिष्यताम् । अपि च सकर्तृकत्वाभिमतेष्वपि संस्थानेषु न सर्वात्मना तुल्यत्वं प्रतीयते, न हि घटसंस्थानं पटसंस्थानं चतुःशालसंस्थानञ्च सुसदृशमिति । संस्थानसामान्यन्तु पर्वतादावपि विद्यत एवेति सर्वथा 'यादृग्' इत्यवाचको ग्रन्थः ।

यदपि व्यभिचारोद्भावनमकृष्टजातैः स्थावरादिभिरकारि तदपि न चारु, तेषां पक्षीकृतत्वात् । पक्षेण च व्यभिचारचोदनायां सर्वानुमानोच्छेदप्रसङ्गः ।

ननु च पृथिव्यादेरुत्पत्तिकालस्य परोक्षत्वात् कर्त्ता न दृश्यते इति तदनुपलब्ध्या तदसत्त्वनिश्चयानुपपत्तेः कामं संशयोऽस्तु, वनस्पतिप्रभृतीनान्तु प्रसवकालमद्यत्वे न वयमेव पश्यामः, न च यत्नतोऽप्यन्वेषमाणाः कर्त्तारमेषामुपलभामहे । तस्मादसौ दृश्यानुपलब्धेर्नास्त्येवेत्यवगच्छामः । अपि च येन येन वयं व्यभिचारमुद्भावयिष्यामस्तं तं चेत्पक्षीकरिष्यति भवान् सुतरामनुमानोच्छेदः, सव्यभिचाराणामप्येवमनुमानत्वानपायात् ।

उच्यते । स्थावराणामुत्पत्तिप्रत्यक्षत्वेऽपि कर्त्तुरदृश्यत्वमेवाशरीरत्वनिश्चयात् । अशरीरस्य तर्हि तदुत्पत्तावव्याप्रियमाणत्वात् कर्तृत्वमपि कथमिति चेद्, एतदग्रतो निर्णेष्यते । अदृश्यस्य च कर्तुरनुपलब्धितो नास्तित्वनिश्चयानुपपत्तेः नाकृष्टजातवनस्पतीनामकर्तृकत्वमिति विपक्षता ।

यत्तूक्तं परिदृश्यमानक्षितिसलिलादिकारणकार्यत्वात् स्थावराणाम्, किमदृश्यमानकर्तृकल्पनयेति चेत्, तदपेशलम् । परलोकवादिभिरदृश्यमानानां कर्मणामपि कारणत्वाभ्युपगमात् । बार्हस्पत्यानान्तु तत्समर्थनमेव समाधिः ।

सव्यभिचाराणामपीति । तथाहि प्रमेयत्वादयोऽप्यनित्यत्वसिद्धये उपादीयमाना येन येन नित्येन व्यभिचारदर्शनादनैकान्तिकतां प्राप्यन्ते तस्य तस्य पक्षीकरणात् सम्यग् हेतुतां व्रजेयुः ।

अदृश्यस्य च कर्तुरनुपलब्धितो नास्तित्वनिश्चयानुपपत्तेरिति । पिशाचादिवदिति भावः ।

तत्समर्थनम् परलोकसमर्थनम्, तस्मिन् समर्थित एव ते निराकृता भवन्ति ।

अथ जगद्वैचित्र्यं कर्मव्यतिरेकेण न घटते इति कर्मणामदृश्यमानानामपि कारणत्वं कल्प्यते। तत्र यद्येवमचेतनेभ्यः कारकेभ्यश्चेतनानधिष्ठितेभ्यः कार्योत्पादानुपपत्तेः कर्त्तापि चेतनस्तेषामधिष्ठाता कल्प्यताम् । तस्मात् स्थावराणामकर्तृकत्वाभावान्न विपक्षता इति न तैर्व्यभिचारः ।

यदप्युक्तम् येन येन व्यभिचार उद्भाव्यते स चेत्पक्षेऽन्तर्भावयिष्यते क इदानीमनुमानस्य नियम इत्येतदपि न साधु। यदि हि भवान् निश्चिते विपक्षे वृत्तिमुपदर्शयेत् कस्तं पक्षेऽन्तर्भावयेत्। न हि विप्रत्वे पुंस्त्वस्य, नित्यतायां वा प्रमेयत्वस्य व्यभिचारे चोद्यमाने वेधसापि विपक्षः पक्षीकर्तुं शक्यः, वादीच्छया वस्तुव्यवस्थाया अभावात्। इह तु स्थावरादौ कर्त्रभावनिश्चयो नास्तीत्युक्तम् ।

ननु स्थावरेषु पक्षीकृतेष्वपि व्यभिचारो न निवर्त्तते एव। न हि सपक्षविपक्षव्यतिरेकेण तात्त्विकः पक्षो नाम कश्चिदस्ति वस्तुनो द्वैरूप्यानुपपत्तेः। वस्तुस्थित्या सकर्तृकाश्चेद् वनस्पतिप्रभृतयः सपक्षा एव ते। न चेत्तर्हि विपक्षा एव, न राश्यन्तरं समस्तीति ।

उच्यते । पक्षाभावे सपक्षविपक्षवाचोयुक्तिरेव तावत् किमपेक्षा ? पक्षानुकूलो हि सपक्ष उच्यते तत्प्रतिकूलश्च विपक्ष इति । यद्येवं वक्तव्यं तर्हि कोऽयं पक्षो नामेति—

साध्यधर्मान्वितत्वेन द्वाभ्यामप्यवधारितः ।
सपक्षस्तदभावेन निश्चितस्य विपक्षता ॥
विमतो यत्र तु तयोस्तं पक्षं सम्प्रचक्ष्महे ।
वस्तुनो द्व्यात्मकत्वन्तु नानुमन्यामहे वयम् ॥
वादिबुद्ध्यनुसारेण स्थितिः पक्षस्य यद्यपि ।
तथापि व्यवहारोऽस्ति वस्तुनस्तन्निबन्धनः ॥

तावतैव नास्तिकताभ्युपगमस्तेषामपाकृतो भवति, परलोकानभ्युपगम एव हि नास्तिकत्वं यतः ।

वस्तुनो द्वैरूप्यानुपपत्तेरिति । यथा यस्य नित्यत्वं स नित्यो यस्य तु तदभावः सोऽनित्यो न पुनर्नित्यानित्योऽन्यः क्वचिदस्ति, एवं यस्य साध्यसम्बन्धः स सपक्षो यस्य तु तदभावः स विपक्षो न पुनस्तृतीयः कश्चिदपि राशिर्विद्यत इति भावः ।

संदिग्धे हि न्यायः प्रवर्तते, नानुपलब्धे, न निर्णीते इत्युक्तमेतत् । संदिह्यमान एव चार्थः पक्ष उच्यते। किञ्चित् कालं तस्य पक्षत्वं यावन्निर्णयो नोत्पन्नः । तदुत्पादे तु नूनं सपक्षविपक्षयोरन्यतरत्रानुप्रवेक्ष्यत्यसौ। अतश्च पक्षावस्थायां तेन व्यभिचारोद्भावनमसमीचीनम् ।

ननु निश्चितविपक्षवृत्तिरिव संदिग्धविपक्षवृत्तिरपि न हेतुरेव तदेवं वीरुधादिषु संदिग्धेऽपि कर्तरि सन्निवेशस्य दर्शनाद् अहेतुत्वात् । नैतत्सारम् । सदसत्पावकतया पर्वते संदिग्धे विपक्षे वर्तमानस्य धूमस्याहेतुत्वप्रसङ्गात् । सर्व एव च साध्यांशसंशयाद् विपक्षा एव जाता इति पक्षवृत्तयो हेतव इदानीं विपक्षगामिनो भवेयुरित्यनुमानोच्छेदः ।

अथ पक्षीकृतेऽपि धर्मिणि सदसत्साध्यधर्मतया सन्दिग्धे वर्तमानो धूमादिरन्यत्र व्याप्तिनिश्चयाद् गमक इष्यते, तर्हि सदसत्कर्तृकतया संदिग्धेऽपि वसुन्धरावनस्पत्यादौ वर्तमानं कार्यत्वमन्यत्र व्याप्तिनिश्चयाद् गमकमिष्यताम्, विशेषो वा वक्तव्यः ।

अन्ये मन्यन्ते किम् अकृष्टजातस्थावरादिव्यभिचारस्थानान्वेषणेन ? पृथिव्यादिभिरेवात्र व्यभिचारः, अस्य व्याप्तिग्रहणस्य प्रतीघातात् । व्याप्तिर्हि गृह्यमाणा सकलसपक्षक्रोडीकारेण गृह्यते । इत्थश्च तस्यां गृह्यमाणायामेव यद्यत् सन्निवेशविशिष्टं तत्तद्बुद्धिमत्कर्तृकमित्यस्मिन्नेवावसरे सन्निवेशवन्तोऽपि कर्तृशून्यतया शैलादयश्चेतसि स्फुरन्ति । यथा कृतकत्वेन वह्नेरनुष्णतानुमाने यद् यत् कृतकं तत्तदनुष्णमिति व्याप्तिपरिच्छेदवेलायामेव वह्निरुष्णोऽकृतक इति हृदयपथमवतरति, तत्र ह्यतिव्याप्तौ गृह्यमाणायां ततो हेतोः षण्ढादिव पुत्रजननमघटमानमेव वन्ध्यानुमानमिति ।

तदेतदनुपपन्नम् । विशेषोल्लेखरहितसामान्यमात्रप्रतिष्ठितस्य व्याप्तिपरिच्छेदस्यानुमानलक्षणे निर्णीतत्वात् । अग्न्यनुष्णतानुमाने हि न व्याप्तिग्रहणप्रतिघातादप्रामाण्यमपि तु प्रत्यक्षविरोधादित्युक्तमेतत् । अपि चायं पृथिव्यादौ कर्त्रनुमाननिरासप्रकारः 'शब्दाद्युपलब्धयः करणपूर्विकाः क्रियात्वात् छिदिक्रियावदि'त्यत्र श्रोत्रादिकरणानुमानेऽपि समानः । प्रतिबन्धावधारणवेलायामेव करणशून्यानां

शब्दाद्युपलब्धिक्रियाणामवधारणात् ताभिरेव व्यभिचारात् पक्षेण च पृथिव्यादिना व्यभिचारचोदनमत्यन्तमलौकिकम् ।

ननु वस्तुस्थित्या पर्वतादयोऽपि विपक्षा एव । त्वया तु तेषां पक्ष इति नाम कृतम्, न च त्वदिच्छया वस्तुस्थितिर्विपरिवर्तते ।

नन्वेवं शब्दाद्युपलब्धयोऽपि वस्तुस्थित्या विपक्षा एव, तासामपि पक्ष इति नामकरणमेव स्यात् ? न । तासां करणभावनिश्चयानुत्पादान्न विपक्षत्वम् । पर्वतादावपि कर्त्रभावनिश्चयानुत्पादान्न विपक्षत्वम् । तेषु कर्त्ता नोपलभ्यते इति चेत् शब्दाद्युपलब्धिकारणमपि नोपलभ्यते एव । कारणमदृश्यमानत्वादेव नोपलभ्यते, न नास्तित्वादिति चेत्, कर्त्ताप्यदृश्यत्वादेव नोपलभ्यते न नास्तित्वात् । अनुमानात् करणमुपलभ्यते तद्व्यतिरेकेण क्रियानुपपत्तेरिति चेत्, कर्त्ताप्यनुमानादुपलभ्यते कर्त्तारमन्तरेण कार्यानुपपत्तेः ।

तेनानुमानगम्यत्वान्न कर्तुर्नास्तिताग्रहः ।
तदभावाद् विपक्षत्वं क्षित्यादेरपि दुर्भणम् ॥
लिङ्गात् पूर्वन्तु सन्देहो दहनेऽपि न वार्यते ।
तथा सति प्रपद्येत धूमोऽप्यननुमानताम् ॥
अथास्य लिङ्गाभासत्वं क्षित्यादौ कर्त्रदर्शनात् ।
धूमेऽपि लिङ्गाभासत्वं तत्र देशेऽग्न्यदर्शनात् ॥
ननु तं देशमासाद्य गृह्यते धूमलाञ्छनः ।
अनयैव धिया साधो चरस्व शरदां शतम् ॥
यत् पश्चाद्दर्शनं तेन किं लिङ्गस्य प्रमाणता ।
अनर्थित्वाददृष्टे वा कृशानौ किं करिष्यसि ॥

तस्मात् सर्वथा नायमनैकान्तिको हेतुः ।

यदपि विशेषविरुद्धत्वमस्य प्रतिपादितं तदप्यसमीक्षिताभिधानम्, विशेष-

---

अथास्य लिङ्गाभासत्वमिति । पूर्वार्धेन परमतमाशङ्क्योत्तरार्धेन 'ननु तं देशमासाद्य' इति समर्थयति ।

यदपि विशेषविरुद्धत्वमिति । असर्वज्ञकर्तृपूर्वकाः क्षित्यादयः कार्यत्वाद् घटादिवद् इति ।

विरुद्धस्य हेत्वाभासस्याभावात्। अभ्युपगमे वा सर्वानुमानोच्छेदप्रसङ्गात्। श्रोत्राद्यनुमानेऽपि यथोदाहृते शक्यमेवमभिधातुम्। यादृगेव लवनक्रियायां दात्रादि करणं काठिन्यादिधर्मकमवगतं तादृगेव श्रोत्रादि स्यात् तद्विलक्षणकरणसाध्यतायान्तु साध्यविकलो दृष्टान्तः, छेदनादिक्रियाणामतीन्द्रियकरणकार्यत्वादर्शनादिति।

अथ क्रियामात्रं करणमात्रेण व्याप्तमवगतमिति तावन्मात्रमनुमापयति, तदिहापि सन्निवेशमात्रमधिष्ठातृमात्रेण व्याप्तमुपलब्धमिति तावन्मात्रमेवानुमापयतु, विशेषाणान्तु न तल्लिङ्गमस्ति यत्र बाधकम्, 'अनित्यः शब्दः कृतकत्वादि'त्ययमपि श्रावणत्वादि शब्दस्य विशेषजातं बाधत एव, धूमोऽपि पर्वताग्निविशेषान् कांश्चिन् महानसाग्नावदृष्टानपहन्त्येव। तस्माद्यथानिर्दिष्टसाध्यविपर्ययसाधनमेव विरुद्धो हेतुर्न हि विशेषविपर्ययावहः। प्रकृतहेतुश्च साध्यविपर्ययस्याकर्तृपूर्वकस्य न साधकः, अश्वोऽयं विषाणित्वादितिवत्। तस्मान्न विरुद्धः, नापि कालात्ययापदिष्टः, प्रत्यक्षागमयोर्बाधकयोरदर्शनात्। प्रत्युतागममनुग्राहकमिहोदाहरिष्यामः। नापि सत्प्रतिपक्षोऽयं हेतुः, संशयबीजस्य विशेषाग्रहणादेरिह हेतुत्वेनानुपादानात्। नाप्ययमप्रयोजको हेतुः यथा परमाणूनामनित्यत्वे साध्ये मूर्त्तत्वमभिधास्यते। न हि मूर्त्तत्वप्रयुक्तमनित्यत्वम्, इह तु कार्यत्वप्रयुक्तमेव सकर्तृकत्वं तत्र तत्रोपलब्धमित्यत एवानुमानविरोधस्येष्टविघातकृतश्च न कश्चिदिहावसरः, प्रयोजके हेतौ प्रयुक्ते तथाविधपांसुप्रक्षेपप्रयोगानवकाशात्। तस्मात् परोदीरिताशेषदोषविकलकार्यानुमानमहिम्ना नूनमीश्वरः कल्पनीयः। सकललोकसाक्षिकमनुमानप्रामाण्यमपीक्षणीयम्। अनुमानप्रामाण्यरक्षणे च कृत एव परिकरबन्धः प्रागिति सिद्ध एवेश्वरः। अन्यदपि तदनुमानमन्यैरुक्तम्, महाभूतादिव्यक्तं चेतनाधिष्ठितं सत् सुखदुःखे जनयति रूपादिमत्त्वात् तूर्यादिवत्, तथा पृथिव्यादीनि भूतानि चेतनाधिष्ठितानि सन्ति धारणादिक्रियां कुर्वन्ति युग्यादिवदिति। अत्रापि दोषाः पूर्ववदेव परिहर्त्तव्याः।

सर्वज्ञेश्वरसाधनम्

यत्पुनरवादि 'कर्तृसामान्यसिद्धौ वा विशेषावगतिः कुतः' इति तत्र केचिदागमाद् विशेषप्रतिपत्तिमाहुः

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः ।। इति ।

तथा

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति सर्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ।।

इति । श्रुतौ पठ्यते । ततः सर्वस्य कर्त्ता सर्वज्ञ ईश्वरो ज्ञाप्यते। न च कार्ये एवार्थे वेदः प्रमाणमिति मन्त्रार्थवादानामतत्परत्वमभिधातुमुचितम्, कार्ये इव सिद्धेऽप्यर्थे वेदप्रामाण्यस्य वक्ष्यमाणत्वात् । न चेतरेतराश्रयम् आगमैकशरणत्वाभावादीश्वरसिद्धेः ।

विश्वतश्चक्षुरिति । विश्वस्मिन् विश्वतः । विश्वस्मिन् यानि चक्षूंषि तानि चक्षूंषि यस्य स विश्वतश्चक्षुः । एवं विश्वसम्बन्धीनि मुखान्येव मुखं यस्य, विश्वसम्बन्धिनो बाहव एव बाहू यस्य, तत्पादा एव पादौ यस्येति विग्रहीतव्यम् । स द्यावापृथिवी जनयन् बाहुभ्यां बाहुसाध्येन व्यापारेण द्विपदं मनुष्यादीन् संधमति संयुनक्ति, अनेकार्थत्वाद् धातूनां संपूर्वो धमतिः संयोजनार्थः । पतत्रिणः पक्षिणस्तु पक्षैः पक्षव्यापारेण संधमति संयुनक्ति । तदधीना द्विपदां चतुष्पदां स्वस्वव्यापारे प्रवृत्तिरिति दर्शयति । अत्र संशब्देन व्यवहितेनापि धमतीत्यस्य सम्बन्धः, "छन्दसि परेऽपि" "व्यवहिताश्च" इति स्मरणात् ।

अपाणिपादो जवन इति । स्वतः पाणिपादरहितोऽपि जवनो ग्रहीता पादसाध्यवेगगमनयुक्तो हस्तसाध्यग्रहणयुक्तश्च; चक्षुःश्रवणरहितश्च तज्जन्यदर्शनश्रवणयुक्तः; स वेत्ति वेद्यममनस्कोऽपि सर्वज्ञत्वात्, न च तस्यास्ति वेत्ता ततोऽधिको यस्मात् । तमाहुरग्र्यं प्रधानं कारणम्, महान्तं विभुम् । क्रियाशक्तिः प्रकाशशक्तिश्चेतरात्मनां करणद्वारिका, भगवतः पुनः स्वत इति दर्शयति ।

अथ 'एवंभूतोऽयं रौद्रश्चरुः प्रशस्तो यस्यैवंविधो रुद्रो देवता' इति देवतास्तुतिद्वारेण कर्मस्तुतिपर्यवसायित्वादेवंप्रायाणां मन्त्रार्थवादानां कथं स्वार्थनिष्ठतेति ? तत्राप्याह **न च कार्ये एवार्थे वेदः प्रमाणमित्यादि** । **न चेतरेतराश्रयमिति** । सतीश्वरे कर्तर्यस्य प्रामाण्यम्, सति चैतत्प्रामाण्ये ईश्वरकर्तृकत्वसिद्धिरिति ।

अन्ये त्वन्वयव्यतिरेकिहेतुमूलकेवलव्यतिरेकिबलेन विशेषसिद्धिमभिदधति । देहादिव्यतिरिक्तात्मकल्पनमिव सुखदुःखादिगतेन कार्यत्वेन वर्णयिष्यते-पृथिव्यादिकार्यम्, अस्मदादिविलक्षणसर्वज्ञैककर्तृकम्, अस्मदादिषु बाधकोत्पत्तौ सत्यां कार्यत्वादिति ।

अपरे पक्षधर्मताबलादेव विशेषलाभमभ्युपगच्छन्ति । न हीदृशं परिदृश्यमानम् अनेकरूपम् अपरिमितम् अनन्तप्राणिगतविचित्रसुखदुःखसाधनं भुवनादिकार्यम् अनतिशयेन पुंसा कर्तुं शक्यमिति । यथा चन्दनधूममितरधूमविसदृशमवलोक्य चन्दन एव वह्निरनुमीयते तथा विलक्षणात् कार्यात् विलक्षण एव कर्त्तानुमास्यते, यथा स्तवरकेभ्य इव तत्कुशलः कुविन्दः, यथा च कुलालः सकलकलशादिकार्यकलापोत्पत्तिसंविधानप्रयोजनाद्यभिज्ञो भवंस्तस्य कार्यचक्रस्य कर्त्ता तथा इयतस्त्रैलोक्यस्य निरवधिप्राणिसुखदुःखसाधनस्य सृष्टिसंहारसंविधानं सप्रयोजनं बहुशाखं जानन्नेव स्रष्टा भवितुमर्हति महेश्वरः, तस्मात् सर्वज्ञः ।

अपि च यथा नियतविषयवृत्तीनां चक्षुरादीन्द्रियाणामधिष्ठाता क्षेत्रज्ञः तदपेक्षया सर्वज्ञः, एवं सकलक्षेत्रज्ञकर्मविनियोगेषु प्रभवन्नीश्वरस्तदपेक्षया सर्वज्ञः । तथा चाह व्यासः

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।।

मन्त्रश्च तदर्थानुवादी पठ्यते

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।। इति ।

स्तवरकेभ्य इवेति । पट्टसूत्रनिर्मितचित्ररूपः पटः स्तवरक उच्यते ।

अक्षरः परमात्मा, कूटस्थोऽविचलरूपतया नित्य इत्यर्थः । **लोकत्रयमाविश्य** अधिष्ठातृत्वेनाभिव्याप्य ।

द्वा सुपर्णा इति । द्वौ क्षेत्रज्ञपरमात्मानौ, सुपर्णौ शोभनगती, सह युज्येते नियम्यनियन्तृभावेनेति सयुजौ परस्परसम्बद्धौ, समानं ख्यानं प्रसिद्धिर्ज्ञातृत्वामूर्तत्वादि-

अतश्च सर्वज्ञ ईश्वरः ।

पुंसामसर्ववित्त्वं हि रागादिमलबन्धनम् ।
न च रागादिभिः स्पृष्टो भगवानिति सर्ववित् ॥
इष्टानिष्टार्थसम्भोगप्रभवाः खलु देहिनाम् ।
रागादयः कथन्ते स्युर्नित्यानन्दात्मके शिवे ॥

मिथ्याज्ञानमूलाश्च रागादयो दोषास्ते कथं नित्यनिर्मलज्ञानवतीश्वरे भवेयुः ?

ईश्वरज्ञानादेर्नित्यत्वसाधनम्

नित्यं तज्ज्ञानं कथमिति चेत्, तस्मिन् क्षणमप्यज्ञातरि सति तदिच्छाप्रेर्यमाणकर्माधीननानाप्रकारव्यवहारविरामप्रसङ्गात् । प्रलयवेलायां तर्हि कुतस्तन्नित्यत्वकल्पना इति चेन्, मैवम् । आप्रलयात् सिद्धे नित्यत्वे तदा विनाशकारणाभावादस्यात्मन इव तज्ज्ञानस्य नित्यत्वं सेत्स्यति । पुनश्च सर्गकाले तदुत्पत्तिकारणाभावादपि नित्यत्वं तज्ज्ञानानाम् । एवञ्च तत् अतीतानागतसूक्ष्मव्यवहितादिसमस्तवस्तुविषयम् न भिन्नम्, कर्मयौगपद्य विकल्पानुपपत्तेः । क्रमाश्रयणे क्वचिदज्ञातृत्वं स्यादिति व्यवहारलोपः । यौगपद्येन सर्वज्ञातृत्वे कुतस्त्यो ज्ञानभेदः ? प्रत्यक्षसाधर्म्याच्च तज्ज्ञानं प्रत्यक्षमुच्यते न पुनरिन्द्रियार्थसन्निकर्षोत्पन्नत्वमस्यास्ति, अजनकानामेवार्थानां सवितृप्रकाशेनेव ग्रहणात् । ज्ञानवदन्येऽप्यात्मगुणा येऽस्य सन्ति ते नित्या एव, मनःसंयोगानपेक्षजन्मत्वात् ।

दुःखद्वेषास्तस्य तावन्न सन्त्येव । भावनाख्येन संस्कारेणापि न प्रयोजनम्, सर्वदा सर्वार्थदर्शित्वेन स्मृत्यभावात् । अत एव न तस्यानुमानिकं ज्ञानमिष्यते ।

तुल्यधर्मयोगेन ययोस्तौ सखायौ तुल्यख्याती, समानं वृक्षमिव वृक्षं शरीराख्यं, परिषस्वजाते समाश्रित्य प्रवर्तेते; तयोरेकः पिप्पलमिव पिप्पलं स्वकर्मफलं स्वादु मिष्टं स्वादु च कृत्वा भुङ्क्ते, अनश्नन्नन्यः कर्माभावेन तत्फलस्याभावात्, अभिचाकशीति सर्वमभिपश्यन्नास्ते । यथा सुपर्णौ पक्षिणावेकं वृक्षं समाश्रयत इत्युपमयैवमभिहितम् । संसार्यात्मनान्तु सुगतित्वानुवादो बाहुल्यापेक्षया, न तु सर्वदा संसार्यात्मनः सुगतय इति । द्वा इत्यत्र औकारस्य छान्दसो डादेशः ।

धर्मस्तु भूतानुग्रहवतो वस्तुस्वाभाव्याद् भवन् न वार्यते, तस्य च फलं परमार्थनिष्पत्तिरेव। सुखन्त्वस्य नित्यमेव, नित्यानन्दत्वेनागमात् प्रतीतेः, असुखितस्य चैवंविधकार्यारम्भयोग्यत्वाभावात्।

ननु ज्ञानानन्दवदिच्छापि नित्या चेदीश्वरस्य तर्हि सर्वदा तदिच्छासम्भवात् सर्वदा जगदुत्पत्तिरिति जगदानन्त्यप्रसङ्गः। सर्गेच्छानित्यत्वाच्च संहारो न प्राप्नोति। संहारेच्छाया अपि नित्यत्वाभ्युपगमेन नक्तन्दिनं प्रलयप्रबन्धो न विरमेदेव जगतामिति, नैष दोषः। अनात्ममनःसंयोगजत्वादिच्छा स्वरूपमात्रेण नित्यापि कदाचित् सर्गेण कदाचित् संहारेण वा विषयेणानुरज्यते। सर्गसंहारयोरन्तराले तु जगतः स्थित्यवस्थायामस्मात् कर्मण इदमस्य सम्पद्यतामितीच्छा भवति प्रजापतेः। प्रयत्नस्तस्य सङ्कल्पविशेषात्मक एव। तथा चागमः 'सत्यकामः सत्यसङ्कल्पः' इति। काम इतीच्छा उच्यते, सङ्कल्प इति प्रयत्नः। तदेवं नवभ्य आत्मगुणेभ्यः पञ्च ज्ञानसुखेच्छाप्रयत्नधर्माः सन्तीश्वरे। चत्वारस्तु दुःखद्वेषाधर्मसंस्कारा न सन्तीत्यात्मविशेष एवेश्वरो न द्रव्यान्तरम्। आह च पतञ्जलिः 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इति। सोऽयमागमादनुमानात् पक्षधर्मतो वा विशेषलाभ इति स्थितम्।

ईश्वरस्य शरीराभावसाधनम्

यत् पुनर्विकल्पितं सशरीर ईश्वरः सृजति जगद्, अशरीरो वेति? तत्राशरीरस्यैव स्रष्टृत्वमस्याभ्युपगच्छामः।

ननु क्रियावेशनिबन्धनं कर्तृत्वं न पारिभाषिकम्, तत् अशरीरस्य क्रियाविरहात् कथं भवेत्? कस्य च कुत्राशरीरस्य कर्तृत्वं दृष्टमिति? उच्यते। ज्ञानचिकीर्षाप्रयत्नयोगित्वं कर्तृत्वमाचक्षते तच्चेश्वरे विद्यत एवेत्युक्तमेतत्। स्वशरीरप्रेरणे च दृष्टमशरीरस्याप्यात्मनः कर्तृत्वम्। इच्छामात्रेण च तस्य कर्तृत्वादनेकव्यापारनिर्वर्त्तनोपात्तदुर्वहक्लेशकालुष्यविकल्पोऽपि प्रत्युक्तः।

नन्वत्रोक्तम्

कुलालवच्च नैतस्य व्यापारो यदि कल्प्यते।
अचेतनः कथं भावस्तदिच्छामनुवर्त्तते॥ इति।

अस्माभिरप्युक्तमेव

यथा ह्यचेतनः काय आत्मेच्छामनुवर्त्तते ।
तदिच्छामनुवर्त्स्यन्ते तथैव परमाणवः ॥

ईश्वरस्य सृष्टिप्रलयकर्तृस्वभावत्वकथनम्

यस्तु प्रयोजनविकल्पः, किमर्थं सृजति जगन्ति भगवानिति ? सोऽपि न पेशलः। स्वभाव एवैष भगवतो यत् कदाचित् सृजति कदाचिच्च संहरति विश्वमिति। कथं पुनर्नियतकाल एषोऽस्य स्वभाव इति चेद्, आदित्यं पश्यतु देवानां प्रियः, यो नियतकालमुदेत्यस्तमेति च। प्राणिकर्मसापेक्षमेतद्विवस्वतो रूपमिति चेद्, ईश्वरेऽपि तुल्यः समाधिः ।

क्रीडार्थेऽपि जगत्सर्गे न ह्येयेत क्रियार्थता ।
प्रवर्त्तमाना दृश्यन्ते न हि क्रीडासु दुःखिताः ॥

अथ वा अनुकम्पयैव सर्गसंहारावारभतामीश्वरः ।

नन्वत्र चोदितम्, अनुपपन्नन्तु अनादित्वात् संसारस्य शुभाशुभसंस्कारानुविद्धा एवात्मानस्ते च धर्माधर्मनिगडसंवृतत्वादपवर्गपुरद्वारप्रवेशमलभमानाः कथं नानुकम्प्याः ? अनुपभुक्तफलानां कर्मणां न प्रक्षयः । सर्गमन्तरेण च तत्फलभोगाय नरकादिसृष्टिमारभते दयालुरेव भगवान् । उपभोगप्रबन्धेन परिश्रान्ता नाम् अन्तरान्तरा विश्रान्तये जन्तूनां भुवनोपसंहारमपि करोतीति सर्वमेतत् कृपानिबन्धनमेव ।

ननु च युगपदेव सकलजगत्प्रलयकरणमनुपपन्नम्, अविनाशिनां कर्मणां फलोपभोगप्रतिबन्धासम्भवाद् इति चोदितम् । न युक्तमेतत् । ईश्वरेच्छाप्रतिबद्धानां कर्मणां स्तिमितशक्तीनामवस्थानात् । तदिच्छाप्रेरितानि कर्माणि फलमादधति तदिच्छाप्रतिबद्धानि च तत्रोदासते । कस्मादेवमिति चेत् ? अचेतनानां चेतनानधिष्ठितानां स्वकार्यकरणानुपलब्धेः ।

जीवात्मनाश्च कर्मानधिष्ठातृत्वम्

ननु तेषामेव कर्मणां कर्त्तार आत्मानश्चेतना अधिष्ठातारो भविष्यन्ति ?

यथाह भट्टः 'कर्मभिः सर्वबीजानां तत्सिद्धेः सिद्धसाधनमि'ति । नैतदेवम् । नैते अधिष्ठातारो भवितुमर्हन्ति, बहुत्वाद् विरुद्धाभिप्रायत्वाच्च । तथा ह्येक एव कश्चित् स्थावरादिविशेषो राजादिविशेषो वा प्राणिकोटीनामनेकविधसुखदुःखोपभोगस्य हेतुः स तैर्बहुभिरव्यवस्थिताभिप्रायैः कथमारभ्येत ? तेषामेकत्र समानाभावात् । मठ-पर्षदोऽपि क्वचिदेव सकलधारणोपकारिणि कार्ये भवत्यैकमत्यम्, न सर्वत्र । महा-प्रासादाद्यारम्भे बहूनां तक्षादीनामेकस्थपत्याशयानुवर्त्तित्वं दृश्यते । पिपीलिकाना-मपि मृत्कूटकरणे तुल्यः कश्चिदुपकारः प्रवर्त्तकः, स्थपतिवदेकाशयानुवर्तित्वं वा कल्प्यम् । इह तु तत्स्थावरं शरीरं केषाञ्चिदुपकारकारणमितरेषामपि भूयसामप-कारकारणमिति कथं तैः सम्भूय सृज्यते ? अनधिष्ठितानान्त्वचेतनानामारम्भकत्वम-युक्तमेव तस्मादवश्यमेकस्तेषां कर्मणामधिष्ठाता कल्पनीयः, यदिच्छामन्तरेण भवन्त्यपि कर्माणि न फलजन्मने प्रभवन्ति ।

ईश्वरस्यैकत्वमेव

अत एवैक ईश्वर इष्यते न द्वौ बहवो वा, भिन्नाभिप्रायतया लोकानुग्रहोप-घातवैशसप्रङ्गात्, इच्छाविसंवादसम्भवेन च ततः कस्यचित् सङ्कल्पविघातद्वारका-नैश्वर्यप्रसङ्गाद्, इत्येक एवेश्वरः । तदिच्छया कर्माणि कार्येषु प्रवर्त्तन्ते इत्युपपन्नः सर्गः । तदिच्छाप्रतिबन्धात् स्तिमितशक्तीनि कर्माण्युदासते इत्युपपन्नः प्रलयः । एवञ्च यदुक्तम्

> तस्मादद्यवदेवात्र सर्गप्रलयकल्पना ।
> समस्तक्षयजन्मभ्यां न सिद्धत्यप्रमाणिका ॥

कर्मभिः सर्वबीजानामित्यस्य पूर्वमर्धम् 'कस्यचिद्धेतुमात्रस्य यद्यधिष्ठा-तृतोच्यते' इति । कर्मभिस्तत्सिद्धेरधिष्ठातृत्वसिद्धेः । बीजकार्यत्वाद् बीजशब्देन कार्यमत्रोच्यते, उपभोगसाधनत्वाद् वा कार्यं बीजमुक्तम्, कर्मद्वारेण चात्मेच्छा-पूर्वकत्वात् सर्वकर्मणामात्मेच्छाधिष्ठातृत्वसिद्धिर्विवक्षिता । मठच्छात्राणां भिन्ना-भिप्रायाणामपि क्वचित् कार्ये सङ्गानेऽपि नास्ति सर्वत्रैकमत्यमिति प्रदर्शयितुमाह **मठपर्षदोऽपी**त्यादिना ।

तस्मादद्यवदेवेति । समस्तक्षयजन्मभ्यां समस्तक्षयजन्मनी आश्रित्य । अतीतः कालो धर्मी समस्तक्षयजन्मयुक्तो न भवति, कालत्वात्, अद्यतनकालवदिति दृष्टान्तः ।

इत्येतदपि न साम्प्रतम् । तिष्ठतु वा सर्गप्रलयकालः, अद्यत्वेऽपि यथोक्तनयेन तदिच्छामन्तरेण प्राणिनां कर्मविपाकानुपपत्तेरवश्यमीश्वरोऽभ्युपगन्तव्यः, इतरथा सर्वव्यवहारविप्रलोपः । तदुक्तम्

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।। इति

जगद्वैचित्र्यं कर्माधीनं न तु ईश्वरेच्छाधीनम्

नन्वेवं तर्हि ईश्वरेच्छैव भवतु कर्त्री संहर्त्री च किं कर्मभिः ? मैवम् । कर्मभिर्विना जगद्वैचित्र्यानुपपत्तेः । कर्मनैरपेक्ष्यपक्षेऽपि त्रयो दोषा दर्शिता एवेश्वरस्य निर्दयकर्मचोदनानर्थक्यमनिर्मोक्षप्रसङ्गश्चेति, तस्मात् कर्मणामेव नियोजने स्वातन्त्र्यमीश्वरस्य, न तन्निरपेक्षम् । किं तादृशैश्वर्येण प्रयोजनमिति चेन्न, न प्रयोजनानुवर्त्ति प्रमाणं भवितुमर्हति, किं वा भगवतः कर्मापेक्षिणोऽपि न प्रभुत्वमित्यलं कुतर्कलवलिप्तमुख-नास्तिकालापपरिमर्दनेन ।

तस्मात् कुतार्किकोद्गीतदूषणाभासवारणात् ।
सिद्धस्त्रैलोक्यनिर्माणनिपुणः परमेश्वरः ।।

ये त्वीश्वरं निरपवाददृढप्रमाण-
सिद्धस्वरूपमपि नाभ्युपयन्ति मूढाः ।
पापाय तैः सह कथापि वितन्यमाना
जायेत नूनमिति युक्तमतो विरन्तुम् ।।
यस्येच्छयैव भुवनानि समुद्भवन्ति
तिष्ठन्ति यान्ति च पुनर्विलयं युगान्ते ।
तस्मै समस्तफलभोगनिबन्धनाय
नित्यप्रबुद्धमुदिताय नमः शिवाय ।।

न प्रयोजनानुवर्ति प्रमाणमिति । प्रमाणात् तथाविधं तदैश्वर्यमवगम्यते, यदि तन्निष्प्रयोजनं तत्प्रमाणं किं करोति । न हि लोष्ट्रदर्शनस्य निष्प्रयोजनत्वात् सुवर्णदर्शनं तदिति कल्प्यते ।

नित्यप्रबुद्धमुदिताय । नित्यो यः प्रबोधो ज्ञानम्, नित्यश्च यो मोदः सुखं तद्युतो यः ।

शब्दानां नित्यत्वान्न वेदानामीश्वरकर्तृत्वं वक्तृत्वं वेति मीमांसकाः

ननु त्रैलोक्यनिर्माणनिपुणे परमेश्वरे ।
सिद्धेऽपि तत्प्रणीतत्वं न वेदस्यावकल्पते ॥
पदे शब्दार्थसम्बन्धे वेदस्य रचनासु वा ।
कर्तृत्वमस्याशङ्क्येत तच्च सर्वत्र दुर्वचम् ॥
वर्णराशिः क्रमव्यक्तः पदमित्यभिधीयते ।
वर्णानाञ्चाविनाशित्वात् कथमीश्वरकार्यता ॥
सम्बन्धोऽपि न तत्कार्यः स हि शक्तिस्वभावकः ।
शब्दे वाचकशक्तिश्च नित्यैवाग्नाविवोष्णता ॥
रचना अपि वैदिक्यो नैताः पुरुषनिर्मिताः ।
कविप्रणीतकाव्यादिरचनाभ्यो विलक्षणाः ॥
एवञ्च वेदे स्वातन्त्र्यमीश्वरस्य न कुत्रचित् ।
कामन्तु पर्वतानेष विदधातु भिनत्तु वा ॥
स्वतः प्रामाण्यसिद्धौ तु वेदे वक्त्रनपेक्षताम् ।
वदामो, न तु सर्वत्र पुरुषद्वेषिणो वयम् ॥
अनपेक्षत्वमेवातो वेदप्रामाण्यकारणम् ।
युक्तं वक्तापि वेदस्य कुर्वन्नपि करोतु किम् ॥

शब्दानित्यत्ववादिमतखण्डनार्थं पूर्वपक्षवर्णनम्

कथं पुनरमी वर्णाः श्रुतमात्रतिरोहिताः ॥
नित्या भवन्तु कोऽयं वा शब्दस्वातन्त्र्यदोहदः ॥

उच्यते

शब्दस्य न ह्यनित्यत्वे युक्तिः स्फुटति काचन ।
प्रत्यक्षमर्थापत्तिश्च नित्यतां त्वधिगच्छतः ॥

तथाहि, अनित्यहेतव इमे किल कथ्यन्ते प्रयत्नानन्तरमुपलब्धेः कार्यः शब्द इति । कार्यत्वानित्यत्वयोः परस्पराविनाभावादेकतरसिद्धावन्यतरसिद्धिर्भवत्येवेति

क्वचित् किञ्चित्साधनमुच्यते । प्रयत्नप्रेरितकौष्ठ्यमारुतसंयोगविभागानन्तरमुपलभ्यमानः शब्दस्तत्कार्य एवेति गम्यते । उच्चारणादूर्ध्वमनुपलब्धेरनित्यः, शब्दः, न ह्येनमुच्चरितं मुहूर्त्तमप्युपलभामहे तस्माद् विनष्ट इत्यवगच्छामः । करोतिशब्दव्यपदेशाच्च कार्यः शब्दः, शब्दं कुरु शब्दं मा कार्षीरिति व्यवहर्त्तारः प्रयुञ्जते ते नूनमवगच्छन्ति कार्यः शब्द इति । नानादेशेषु च युगपदुपलम्भात् तेषु तेषु देशेषु क्रियमाणानामुपपद्यतेऽनेकदेशसम्बन्ध इति । शब्दान्तरविकार्यत्वाच्च अनित्यः शब्दः, दध्यत्रेति इकार एव यकारीभवति । सादृश्यात् स्मृतेश्चावगम्यते विकार्यत्वाच्च द्राक्षेक्षुरसादिवदनित्यत्वमस्येति । कारणवृद्ध्या च वर्धमानत्वात् बहुभिर्महाप्रयत्नैरुच्चार्यमाणो महान् गोशब्द उपलभ्यते अल्पैरल्पप्रयत्नैरुच्चार्यमाणोऽल्प इत्येतच्च तन्तुवृद्ध्या वर्धमानः पटो ज्ञातः ।

शब्दनित्यत्वसिद्धिः

सिद्धे नित्यत्वे प्रयत्नानन्तरमुपलम्भाद् अभिव्यक्तिः प्रयत्नकार्या, शब्दस्य नोत्पत्तिरिति गम्यते । तदेवं व्यङ्ग्येऽपि प्रयत्नानन्तरमुपलम्भसम्भवादनैकान्तिकत्वम्, अभिव्यञ्जकानाञ्च पवनसंयोगविभागानामचिरस्थायित्वान्न चिरमुच्चारणादूर्ध्वमुपलभ्यते शब्दः । प्रयोगाभिप्रायश्च करोतिशब्दव्यपदेशोऽस्य भविष्यति 'गोमयानि कुरु' 'काष्ठानि कुर्वि'तिवत्, तस्मात् सोऽप्यनैकान्तिकः । नानादेशेषु युगपदुपलम्भनमेकस्य स्थिरस्यापि शब्दस्य विवस्वत इव सेत्स्यति । विकार्यत्वं त्वसिद्धमेव शब्दान्तरत्वात्, दधिशब्द इकारान्तः संहिताव्यतिरिक्तविषयवृत्तिः, यकारस्त्वयमन्य एव अचि परतः संहिताविषये प्रयुज्यमानः, न पुनरिकार एवायं यकारीभूतः क्षीरमिव दधिभूतमुपलभ्यते । न हि इचुयशास्तालव्या इति स्थानसादृश्यमात्रेण तद्विकारत्ववर्णनमुचितम्, अप्रकृतिविकारयोरपि नयनोत्पलपल्लवयोः सादृश्यदर्शनात् । इको यणचि इति पाणिनिस्मृतेरपि नायमर्थः इकारो यकारीभवति क्षीरमिव दधीभवति, किन्त्वस्मिन् विषयेऽयं वर्णः

सादृश्याद् दध्यत्रेति इ-कारवद् य-कारस्यापि तालव्यत्वात् । स्मृतेर्व्याकरण-
2. लक्षणाया "इको यणचि" इत्यादिकायाः । प्रयोगाभिप्रायश्चेति । 'शब्दं कुरु' 'शब्दप्रयोगं कुरु' इति, अतो न 'शब्दमुत्पादय' इति; यथा 'गोमयान् कुरु' संस्कारार्थो न

प्रयोक्तव्योऽस्मिन्नयमिति सूत्रार्थः। सिद्धे हि शब्देऽर्थे सम्बन्धे च तच्छास्त्रं प्रवृत्तमिति। अपि च क्षीरं दधित्वमुपैति न तु दधि क्षीरताम्, इह तु यकारोऽपि क्वचिद् इकारतामुपैति विध्यतीति सम्प्रसारणे सति, तस्मादसिद्ध एव वर्णानां प्रकृतिविकारभावः, नापि कारणवृद्धया वर्धते शब्दः, बलवताप्युच्चार्यमाणानि बहुभिश्च तावन्त्येवाक्षराणि, ध्वनय एव तथा तत्र प्रवृद्धा उपलभ्यते न वर्णा इति।

शब्दनित्यतायामर्थापत्तेरेव प्रमाणत्वम्

तस्मादनित्यतासिद्धिर्नैवंप्रायैरसाधनैः।
शब्दस्य नित्यतायान्तु सैषार्थापत्तिरुच्यते॥
शब्दस्योच्चारणं तावदर्थगत्यर्थमिष्यते।
न चोच्चारितनष्टोऽयमर्थं गमयितुं क्षमः॥
सर्वेषामविवादोऽत्र शब्दार्थव्यवहारिणाम्।
यदि विज्ञातसम्बन्धः शब्दो नार्थस्य वाचकः॥
वेद्यमानः स सम्बन्धः स्थविरव्यवहारतः।
द्राघीयसा न कालेन विना शक्येत वेदितुम्॥

शब्दार्थयोः सम्बन्धज्ञानमपि शब्दनित्यत्वसाधकम्

तथाहि 'गां शुक्लामानय' इत्येकवृद्धप्रयुक्तशब्दश्रवणे सति चेष्टमानमितरं वृद्धमवलोकयन् बालस्तटस्थः तस्यार्थप्रतीतिं तावत् कल्पयति आत्मनि तत्पूर्विकायाश्चेष्टाया दृष्टत्वात्, प्रमाणान्तरासन्निधानाद् एतद्वृद्धप्रयुक्तशब्दसमनन्तरञ्च प्रवृत्तेः, तत एव शब्दात् किमप्यनेन प्रतिपन्नमिति मन्यते, ततः क्षणान्तरे तमर्थं तेन वृद्धेनानीयमानमुपलभमान एव बुध्यते अयमर्थोऽमुतः शब्दादनेनावगत इति। स चार्थोऽनेकगुणक्रियाजातिव्यक्त्याादिरूपसंकुल उपलभ्यते, शब्दोऽप्यनेकपदकदम्बकात्मा श्रुतः तत् कतमस्य वाक्यांशस्य कतमोऽर्थांशो वाच्य इत्यावापोद्वापयोगेन बहुकृत्वः शृण्वन् गुणक्रियादिपरिहारेण गोत्वसामान्यमस्मन्मते त्वन्मते वा तद्वन्मात्रं गोशब्दस्याभिधेयं निर्धारयतीति।

करोत्यर्थो न तुल्यास्येति। सिद्धे हि शब्देऽर्थे इति। सिद्धे नित्य इत्यर्थः। तदुक्तम् 'सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः

एवं दीर्घाध्वसापेक्षसम्बन्धाधिगमावधि ।
शब्दस्य जीवितं सिद्धमिति नाशुविनाशिता ॥

शब्दनित्यतायां न शब्दादर्थप्रतिपत्तिः सम्भाव्यते

भवतु वा नश्वरस्यापि शब्दस्य सम्बन्धग्रहणं तथाऽपि तस्मिन् गृहीतसम्बन्धे शब्दे विनष्टे सति कथमनवगतसम्बन्धाद् अभिनवाद् इदानीमन्यस्माच्छब्दादर्थप्रतिपत्तिः ।

अन्यस्मिन् जातसम्बन्धे यद्यन्यो वाचको भवेत् ।
वाचकाः सर्वशब्दाः स्युरेकस्मिन् जातसंगतौ ॥

न च वक्ता व्यवहरमाणः तदैव शब्दं चोच्चारयति सम्बन्धं करोति चैतञ्च व्युत्पादयति परञ्च व्यवहारयतीति । न हि युगपदिमाः क्रियाः भवितुमर्हन्ति, एवमदर्शनात् । अथादौ सम्बन्धग्रहणे वृत्ते तस्मिन् विनष्टेऽपि गोशब्दः स एवेति । न च भूयोऽवयवसामान्ययोगरूपसादृश्यं वर्णानाम् अनवयवानामुपपद्यते अभिनवस्य शब्दस्य स्वयमर्थवत्तानवधारणात् कथमयममुतः श्रोता प्रतिपद्येतेति शङ्कमानो वक्ता कथं प्रयोगं कुर्यात् । तर्हि यत्सदृशमसौ प्रयुङ्क्ते तस्याप्यन्यसादृश्यादेवार्थवत्तेति जगत्सर्गकालकृतस्य मूलभूतस्यार्थवतः शब्दस्य स्मरणं तन्मूलत्वाद् व्यवहारस्य, न चैवमस्ति, न च ततः प्रभृत्यद्य यावत् सादृश्यमनुवर्त्तते, तत्सदृशसदृशकल्पनायां मूलसादृश्यविनाशात्, विशेषतस्तु शब्दानाम् ।

भिन्नैर्वक्तृमुखस्थानप्रयत्नकरणादिभिः ।
न निर्वहति सादृश्यं शब्दानां दूरवर्त्तिनाम् ॥

क्रियते' इति । **तर्हि यत्सदृशमसौ प्रयुङ्क्त** इति । यतः येनार्थः प्रतिपन्नः सोऽपि साक्षादर्थवान् न भवति सम्बन्धाभावात् तेनार्थेनाभिनवोत्पन्नत्वेन तस्याप्यर्थवत्सादृश्येन गमकः ।

मूलसादृश्यविनाशादिति । यथाहि—पितृसदृशः पुत्रस्तत्सदृशः तत्पुत्रो मूलपितुः सादृश्याद् दूरीभवन् दृश्यते यावद् अन्येऽपि तत्पुत्रतत्पुत्रास्तत्सादृश्यं मनागपि न स्पृशन्तीति ।

भिन्नैर्वक्तृमुखेति । स्थानं ताल्वादि, प्रयत्न ईषत्स्पृष्टतादिः, करणं जिह्वामूलादि ।

सादृश्यजनितत्वे च मिथ्यैवार्थगतिर्भवेत् ।
धूमानुकारिनीहारजन्यज्वलनबुद्धिवत् ॥

तस्मात् सादृश्यनिबन्धनार्थप्रतीत्यनुपपत्तेर्गोशब्द एव स्थायीत्यभ्युपगमनीयम् ।

न च गोशब्दत्वादिकं सामान्यमस्ति

ननु यथा धूमव्यक्तिभेदेऽपि धूमत्वमतिमवलम्ब्य सम्बन्धग्रहणादिव्यवहारनिवहनिर्वहणम् एवमिह गकारादिवर्णव्यक्तिभेदेऽपि सामान्यनिबन्धनस्तन्निर्वाहः करिष्यते इति ।

मैवं तत्र हि धूमत्वसामान्यं विद्यते ध्रुवम् ।
शब्दत्वं व्यभिचार्यत्र गोशब्दत्वन्तु दुर्घटम् ॥
भिन्नैरयुगपत्कालैरसंसृष्टैर्विनश्वरैः ।
वर्णैर्घटयितुं शक्यो गोशब्दावयवी कथम् ॥
अनारब्धे च गोशब्दे गोशब्दत्वं क्व वर्त्तताम् ।
पटत्वं नाम सामान्यं न हि तन्तुषु वर्त्तते ॥

न वा गत्वादिकं सामान्यम्

ननु मा भूद् गोशब्दत्वं सामान्यं भिन्नाकारगकारादिव्यक्तिवृत्तिभिरेव गत्वादिजातिभिः कार्यं पूर्वोक्तमुपपद्यते, एतदपि नास्ति । गत्वादिजातीनामनुपपत्तेः । भेदाभेदप्रत्ययप्रतिष्ठो हि व्यक्तिजातिप्रविभागव्यवहारः । इह चायमभेदप्रत्ययो वर्णैक्यनिबन्धन एव न जातिकृतः, भेदप्रतिभासं व्यञ्जकभेदाधीनम्, व्यञ्जकाद्युपाधिनिबन्धनत्वोपपत्तेः परस्परविभक्तस्वरूपतया हि शाबलेयबाहुलेयपिण्डाः प्रत्यक्षमुपलभ्यते, स्थिते च व्यक्तिभेदे सर्वत्र गौरिति तदभेदप्रत्ययस्यानन्यविषयत्वादिष्यते एव गोत्वजातिः । इह पुनः

गकारव्यक्तयो भिन्नाः शाबलेयादिपिण्डवत् ।
क्व नाम भवता दृष्टा येनासां जातिमिच्छसि ॥

शब्दत्वं व्यभिचारीति । सर्ववर्णेषु भावान्नियतार्थप्रतिपत्तेरभावात् ।

व्यञ्जकभेदाधीनमिति । यथैकमपि मुखं खड्गादिव्यञ्जकभेदान्नानेवोपलभ्यते ।

शिशौ पठति वृद्धे वा स्त्रीजने वा शुकेऽपि वा ।
वक्तृभेदं प्रपद्यन्ते न वर्णव्यक्तिभिन्नताम् ।।

तथा च 'गर्गः पठति, माठरः पठती'त्युच्चारयितृभेद एव प्रतीयते, अमुं गविशेषमेष पठतीति नोच्चार्यमाणभेदः ।

एककर्तृप्रयोगेऽपि तस्यैवोच्चारणं पुनः ।
गङ्गागगनगर्गादौ न रूपान्तरदर्शनम् ।।
द्रुतादिभेदबोधोऽपि नामभेदनिबन्धनः ।
न व्यक्तिभेदजनितः शाबलेयादिभेदवत् ।।

अभ्युपगतेऽपि गत्वसामान्ये तस्य द्रुतादिभेदप्रतिभासे सत्यपि न भिन्नत्वमेषितव्यम्, औपाधिक एव तस्मिन् भेदप्रतिभासो वर्णनीयः, सोऽयं गकारव्यक्तावेव कथं न वर्ण्यते, तस्या एवैकत्वादेकप्रत्ययो भेदभ्रमस्तु व्यञ्जकाधीन इति । एवं हि कल्पना लघीयसी भवति, तस्मान्न नानागकारवृत्ति गत्वसामान्यं नाम किञ्चिदस्ति ।

अपि च गोगुरुगेहादौ भिन्नाजुपश्लेषकारित एव व्यञ्जनेषु बुद्धिभेदः परोपाधिरवधार्यते सोऽयमक्ष्वपि परोपाधिरेव भवितुमर्हति, वर्णाश्रितत्वाद् व्यञ्जनभेदप्रत्ययवदिति, तस्माद् गत्ववद् अत्वसामान्यमपि नास्ति । यत्पुनरष्टादशभेदमवर्णकुलमुच्यते तदौपाधिकमेव, ह्रस्वदीर्घप्लुतसंवृतविवृतादिबुद्धीनां ध्वनिभेदानुविधायित्वात् ।

विवृतः संवृतादन्यो न गकाराद् वकारवत् ।
अपि त्वकार एवासौ प्रतिभाति यथा तथा ।।

न भिन्नत्वमेषितव्यमिति । अन्यथा अभिन्नप्रत्ययानिर्वाहात् ।

व्यञ्जनभेदप्रत्ययवदिति । यथा व्यञ्जनानां हलां भेदप्रत्यय उपाधिकृत इति । **यत्पुनरष्टादशे**ति । ह्रस्वदीर्घप्लुतभेदेन त्रयोऽकारास्ते च प्रत्येकं सानुनासिकनिरनुनासिकत्वेन षट् सम्पद्यन्ते ते च षट् प्रत्येकमुदात्तानुदात्तस्वरितभेदेनाष्टादश सम्पद्यन्ते । **अवर्णकुलमि**ति । व्यञ्जकभेदमनुवर्तमानानां वर्णानामेककण्ठादिस्थानावच्छेदेन समुदायवाची कुलशब्दो यथैकदेशाद्युपाधिको वृक्षेषु वनशब्दः ।

विवृतो दीर्घप्लुतरूपो वर्णः । **संवृताद्** ह्रस्वाद् वर्णात् ।

कथं तर्हि शब्दभेदाभावे भिन्ने अर्थप्रतिपत्ती अरण्यमारण्यमिति, ध्वनिकृते एव ते भविष्यतः, अशब्दधर्मस्य दीर्घत्वादेः कथमर्थप्रतीत्यङ्गत्वमिति चेत्, तुरगवेगवद्भविष्यति ।

यथा तुरगदेहस्थो वेगः पुंसोऽर्थसिद्धये ।
परधर्मोऽपि दीर्घादिरेवं तस्योपकारकः ॥

इतश्चैतदकारसामान्यमनुपपन्नम्, अत्वं हि न दीर्घप्लुतयोरनुगतं भवति, आत्वं न ह्रस्वदीर्घयोरिति, तस्मादेकत्वाद् वर्णानां नावान्तरजातयः सम्भवन्ति । शब्दत्वन्तु नियतार्थप्रतिपत्तौ व्यभिचारीत्यतो नात्र धूमादिन्यायः ।

तेनार्थप्रत्ययः शब्दादन्यथा नोपपद्यते ।
न चेद् नित्यत्वमित्यस्मिन्नर्थापत्तेः प्रमाणता ॥
अनुमानादन्यथात्वमर्थापत्तेर्न दृश्यते ।
तेनानुमानमप्येतत् प्रयोक्तुं न न शक्यते ॥

शब्दनित्यतायां युक्त्यन्तरम्

तदिदमुच्यते शब्दो धर्मी, नित्य इति साध्यो धर्मः, सम्बन्धग्रहणसापेक्षार्थप्रतिपादकत्वाद् धूमादिजातिवत्, तदिदमुक्तं "नित्यस्तु स्याद्दर्शनस्य परार्थत्वादिति"। एवं सम्बन्धग्रहणात् प्रभृति आ अर्थप्रतिपत्तेरवस्थितस्य विनाशहेत्वभावादात्मादिवन्नित्यत्वम् । न ह्ययमवयवविनाशान्नश्यति शब्दो निरवयवत्वात् । तदेव कथमिति चेद् उच्यते

स्वल्पेनापि प्रयत्नेन यदि वर्णः प्रयुज्यते ।
यदि वा नानुभूयेत शकलो नानुभूयते ॥

सावयवे हि वस्तुनि द्विधावयवा दृश्यन्ते आरब्धकार्या अनारब्धकार्याश्चेति ।

नित्यस्तु स्यादिति । दर्शनस्योच्चारणस्य परार्थत्वादर्थप्रतिपत्त्यर्थत्वात्, न चागृहीतसम्बन्धोऽर्थं प्रत्याययतीति नित्यः । नित्यस्तु स्यादिति सूत्रे तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः ।

आरब्धकार्या अनारब्धकार्याश्चेति । आरब्धं कार्यं पटलक्षणं यैस्त आर-

इह पुनरारब्धकार्या अनारब्धकार्या वा पटे तन्त्वादय इव वर्णे न केचिदवयवा उपलभ्यन्ते, न चानुमीयन्ते लिङ्गाभावात्, नाप्याश्रयविनाशाद् विनाशः शब्दस्यात्मादिवदनाश्रितत्वात्, आकाशाश्रितत्वपक्षे वा तन्नित्यत्वात्, न चान्यः

तस्मात् तिरोहितोऽप्यास्ते यदि शब्दः क्षणान्तरम् ।
मृत्योर्दुःखादपक्रान्तः पुनः केनैष हन्यते ॥

अतश्च नित्यः शब्दः, संख्याभावाद्। अष्टकृत्वो गोशब्दः प्रयुक्त इति वदन्ति न त्वष्टौ गोशब्दा इति तेनैकत्वमवगम्यते । योऽयं क्रियाभ्यावृत्तिगणने विहितः कृत्वसुच्प्रत्ययः स क्रियावतामभेदे भवति तेनोच्चारणावृत्तिमात्रम्, तदुक्तम्

क्रियावतामभेदे हि क्रियावृत्तिषु कृत्वसुच् ।
तत्प्रयोगाद् ध्रुवं तस्य शब्दस्यावर्त्तते क्रिया । इति ॥

संख्यावताम् ।

संख्याभिधायिनः शब्दात् कृत्वसुच्प्रत्ययं विदुः ।
तदनेन प्रकारेण प्रत्यभिज्ञानमुच्यते ॥
प्रमाणं शब्दनित्यत्वे सकलश्रोतृसाक्षिकम् ।
तथा ह्यस्ति स एवायं गोशब्द इति वेदनम् ।
श्रौत्रं करणकालुष्यबाधसन्देहवर्जितम् ॥

श्रोत्रेन्द्रियव्यापारान्वयव्यतिरेकानुविधानाच्छ्रौत्रमिदं विज्ञानम्। न चैतज्जनकस्य करणस्य किमपि दौर्बल्यमुपलभ्यते । न च किं स्विदिति कोटिद्वयसंस्पर्शितयेदं विज्ञानमुपजायते, नच नैतदेवमिति प्रत्ययान्तरमस्मिन् बाधकमुत्पश्यामः । इदानीन्तनास्तित्वप्रमेयाधिगमग्रहणाच्चेदमनधिगतार्थग्राह्यपि भवितुमर्हति । भवन्मते च गृहीतग्राहित्वेऽपि प्रत्यभिज्ञायाः प्रामाण्यमिष्यते, न हि तदप्रामाण्यं वक्तुं शक्यते शाक्यैरिव भवद्भिः, क्षणिकपदार्थानभ्युपगमात् ।

न सादृश्यनिमित्तत्वं वक्तुं तस्याश्च युज्यते ।
सामान्यविषयत्वं वा द्वयस्यापि निषेधनात् ॥

ब्धकार्याः साक्षात् पटस्यारम्भकास्तन्तवः, अंश्वादयस्तु साक्षात् पटस्यानारम्भकत्वादनारब्धकार्याः, अंशुभिर्हि तन्तवः साक्षाद् आरभ्यन्त न पटः एवम् अंश्वारम्भकैरप्यंशवो न तन्तवो यावत् परमाणव इति ।

कैश्चित्तिरोहिते भावादित्यप्रामाण्यमुच्यते ।
तदसत् तत्प्रतीत्यैव तिरोधाननिषेधनात् ॥
जीवति त्वन्मतेऽप्येष शब्दस्त्रिचतुरान् क्षणान् ।
प्रत्यभिज्ञा च कालेन तावता न न सिद्ध्यति ॥
एकक्षणायुषि त्वस्मिन् प्रतीतिरतिदुर्लभा ।
न खल्वजनकं किञ्चिद् वस्तुज्ञानेन गृह्यत इति ॥

क्षणभङ्गभङ्गे वक्ष्यते, अपि च

यथा निशीथे रोलम्बश्यामलाम्बुदडम्बरे ।
प्रत्यभिज्ञायते किञ्चिदचिरद्युतिधामभिः ॥
तथाविरतसंयोगविभागक्रमजन्मभिः ।
प्रत्यभिज्ञायते शब्दः क्षणिकैरपि मारुतः ॥

शब्दानामभिव्यक्तौ दोषाः

अत्राह, मारुतैरित्यनेनोपोद्घातेन साधु स्मृतम् । तिष्ठतु तावत्प्रत्यभिज्ञानं, प्रथममेव शब्दस्य यन्नियतग्रहणं तदभिव्यक्तिपक्षे दुर्घटम् ।

नित्यत्वाद्व्यापकत्वाच्च सर्वे सर्वत्र सर्वदा ।
शब्दाः सन्तीति भेदेन ग्रहणे किं नियामकम् ॥

ध्वनयो हि नाम संयोगविभागविशेषिता वायवः, वायुवृत्तयो वा संयोगविभागास्ते हि शब्दस्य व्यञ्जका इष्यन्ते, तैश्च करणं वा संस्क्रियते कर्म वा द्वयं वा सर्वथा च प्रमादः ।

करणे संस्कृते तावत् सर्वशब्दश्रुतिर्भवेत् ।
गकारायैव संस्कार इत्येष नियमः कुतः ॥

तिरोहिते भावादिति । तिरोहिते विनष्टे शब्दे प्रत्यभिज्ञानस्य भावात्, तस्य निर्विषयत्वे शब्दाविनाशितायां न प्रामाण्यमित्यर्थः ।

अनेनोपोद्घातेन प्रस्तावेन ।

अपि च स्तिमितसमीरणापसरणमेव करणस्य संस्कारः। स चायं तद्देशव्यवस्थितसकलतद्विषयसाधारण एव।

यथा जवनिकापायप्राप्तप्रसरमीक्षणम्।
रङ्गभूमिषु तद्देशमशेषं वस्तु पश्यति ॥
तथा प्रसरसंरोधिसमीरोत्सारणे सति।
श्रोत्रं तद्देशनिःशेषशब्दग्राहि भविष्यति ॥

आकाशञ्च श्रोत्रमाचक्षते भवन्तः, तच्च विभु निरवयवं चेति, क्वचिदेव तस्मिन् संस्कृते सति सर्वे च तदैव संस्कृतकरणाः प्राणिनः सम्पन्ना इति सर्व एव शृणुयुः। विषये तु संस्क्रियमाणे तस्यानवयवस्य व्यापिनश्च संस्कृतत्वात् सर्वत्र श्रवणमिति। मद्रेष्वभिव्यक्तो गोशब्दः कश्मीरेष्वपि श्रूयेत। न हि तस्याधारद्वारकः संस्कारः आकाशवदनाश्रितत्वात्, आकाशाश्रितत्वपक्षेऽपि तदेकत्वात्। नापि भागशः संस्क्रियते गोशब्दः तस्य निरवयवत्वात्। उक्तं हि

अल्पीयसा प्रयत्नेन शब्दमुच्चारितं मतिः।
यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटमिति ॥

उभयसंस्कारपक्षे तु दोषद्वयस्याप्यनतिवृत्तिः सर्वेषां ग्रहणं सर्वत्र श्रवणमिति। न च समानदेशानां समानेन्द्रियग्राह्याणाञ्च भावानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमुपलब्धम्।

गृहे दधिघटीं द्रष्टुमानीतो गृहमेधिना।
अपूपानपि तद्देशान् प्रकाशयति दीपकः ॥

स्तिमितसमीरणेति। स्तिमितो निश्चलो यः श्रोत्रवर्ती समीरणः।

न हि तस्याधारद्वारक इति। यद्यपि शब्दो व्यापी तथापि तदाधाराणामव्यापितत्वात् तद्द्वारेण यः संस्कारः स कथं सकलदेशावस्थितशब्दसंस्कार इति शङ्कामनेन निराकरोति।

आकाशवदनाश्रितत्वात् इति। केषाञ्चिन्मीमांसकानामाकाशवदनाश्रितः शब्दः।

यदि वा नैव गृह्णातीति। मन्दोच्चारिते नैव वा गृह्यते, गृह्यते चेत् सकल एव वर्णो गृह्यते न तु तस्य भागा गृह्यन्त इत्यर्थः।

तस्मात् कृतकपक्षे एव नियतदेशं शब्दस्य ग्रहणं परिकल्पते नाभिव्यक्तिपक्षे इति। अपि च, अभिव्यक्तिपक्षे तीव्रमन्दविभागोऽभिभवश्च शब्दस्य शब्दान्तरेण न प्राप्नोति। न हि शब्दस्तीव्रो मन्दो वा कश्चित्, स्वतस्तस्य भेदाभावात्। संस्कारस्य च तदभिव्यक्तिहेतोर्न काचन तीव्रता मन्दता वा यदनुसारेण विषये तथा बुद्धिः स्यात्। पवनधर्मा वा तीव्रादिर्भवन् कथं श्रोत्रेण गृह्येत? सावयवे हि वस्तुनि सकलविशेषग्रहणाग्रहणसम्भवात् तदपेक्षया प्रतीतिभेदो भवेत्, इह तु निरवयवे शब्दे न तथोपपद्यते इति। तस्मात् कृतकपक्ष एव श्रेयानिति।

शब्दानामभिव्यक्तौ दोषपरिहारः

अत्रोच्यते, करणसंस्कारपक्ष एव तावदस्तु, तच्च करणं किञ्चिदेव मरुद्भिरुपाहितसंस्कारं कञ्चिदेव शब्दं गृह्णाति।

यथा ताल्वादिसंयोगविभागाः केचिदेव नः।
कस्यचिद् ग्रहणे शक्तं श्रोत्रं कुर्वन्ति संस्कृतम्॥
यथा च तेषामुत्पत्तौ सामर्थ्यनियमस्तव।
तथैवैषामभिव्यक्तौ सामर्थ्यनियमो मम॥

व्यञ्जकानां नियमो न दृष्ट इति चेत्, क एवमाह, सहस्राक्षः? तथा हि पृथिव्यामेव वर्त्तमानो गन्धः समानदेशो भवति समानेन्द्रियग्राह्यश्च, घ्राणैकविषयत्वात्। तस्य च नियमतस्तद्व्यजकव्यङ्ग्यता दृश्यते एव।

क्वचित् पावकसम्पर्कादर्कांशुस्पर्शतः क्वचित्।
क्वचित् सलिलसंसेकाद् गन्धोऽभिव्यज्यते भुवः॥

न च स्तिमितपवनापनोदनमात्रं करणस्य संस्कार इष्यते यः सर्वसाधारणः स्यात्। किन्त्वन्य एव नियतः प्रतिविषयं योग्यतालक्षणः।

यत्पुनरभ्यधायि नभसि श्रोत्रेऽभ्युपगम्यमाने सर्वप्राणिनामेकमेव श्रोत्रं भवेद् इति, तदप्यसाधु, धर्माधर्मयोर्नियामकत्वात्, आकाशस्यापि घटाकाशवद-

---

क एवमाह सहस्राक्ष इति। यस्य वि (?) सहस्रमक्ष्णां सः यद्येवं वक्तुं शक्नुयात् 'न दृष्टः' इति, न पुनरल्पदर्शी द्विदृगिति।

योग्यतालक्षणो नियतविषयग्रहणरूपकार्यानुमेयः।

न्यावच्छेदोपपत्तेः, धर्माधर्मनिबन्धन एव बधिरेतरविभागः। अपि च भवतामेवैष दोषो येषामाकाशमेव श्रोत्रमित्यभ्युपगमनियमः। मीमांसकानान्तु नावश्यमाकाशमेव श्रोत्रम्। कार्यार्थापत्तिकल्पितन्तु किमपि करणमात्रं प्रतिपुरुषनियतं श्रोत्रमिति नातिप्रसङ्गः। तथा च भर्त्तृमित्रः, 'पवनजनितसंस्कारपक्षो भवतु' तथापि नातिप्रसङ्गः, नियतदेशस्यैव तत्र संस्कारात्। न चास्य भागशः संस्कारो निरवयवत्वात्। तथापि जातिवदस्य ग्रहणनियमो भविष्यति। तथा च भवतामेव पक्षे

यथा सर्वगता जातिः पिण्डदेशैव गृह्यते।
न च कात्स्न्र्यगृहीतापि पिण्डेऽन्यत्र न दृश्यते॥
तथा सर्वगतः शब्दो नाददेशेषु गृह्यते।
कात्स्न्र्येन च गृहीतोऽपि पुनरन्यत्र गृह्यते॥
पिण्डोऽभिव्यञ्जको जातेः शब्दस्य व्यञ्जको ध्वनिः।
आश्रितानाश्रितत्वादिविशेषः क्वोपयुज्यते॥

सर्वगतत्वनिरवयवत्वाविशेषात् तीव्रमन्दत्वादयश्च ध्वनिधर्मा अपि भवन्तः शब्दवृत्तितयावभान्ति। यथा स्थूलत्वकृशत्वादयः पिण्डधर्मा अपि जातिवृत्तित्वेन क्वचिद् गृह्यन्ते, अगृहीतशावलेयादिविशेषस्य कृशा गाव इत्यादिप्रतिभासदर्शनात्।

यद्वा न तीव्रमन्दादेर्वर्णधर्मतया ग्रहः।
बुद्धिरेव तथोदेति व्यञ्जकानुविधायिनी॥
तावन्त एव ते वर्णाः प्रचयापचयस्पृशः।
एवञ्चाभिभवोऽप्येषां स्वतो नास्ति परस्परम्॥
मरुद्भिरभिभूयन्ते मारुता एव दुर्बलाः।
तेजोभिरिव दीप्तांशोर्दिवा दीपप्रभादयः॥

द्वयसंस्कारपक्षोऽप्येवं समाहितो भवति, उभयेषामपि दोषाणामुत्सारणात्। तस्मात् प्रत्यभिज्ञाप्रत्ययप्रभावसिद्धनित्यत्वस्य शब्दस्याभिव्यक्तिरेव साधीयसी।

तथा च भर्तृमित्रेति। भर्तृमित्राख्यस्तन्त्रशुद्ध्यादिप्रकरणकृन्मीमांसकः 'कर्णशष्कुल्यां पवनजनितः संस्कारः श्रोत्रम्' इत्याह, तदन्वयव्यतिरेकानुविधायित्वाच्छब्दग्रहणस्य।

शब्दानामभिव्यक्ति-कार्यपक्षयोर्लाघवगौरवविचारः

इदञ्चालोच्यतामार्याः कार्याभिव्यङ्ग्यपक्षयोः ।
शब्दस्य ग्रहणे गुर्वी लघ्वी वा कुत्र कल्पना ।।

तथा हि भवन्तो वैशेषिकाः, सांख्याः, जैनाः, सौगताश्च कार्यशब्दवादिनः, चार्वाकास्तु वराकाः कस्यैवंविधासु गोष्ठीषु स्मृतिपथमुपयान्ति ।

तत्रभवतां वैशेषिकाणां शब्दस्य श्रवणे तावदेषा तुल्यैव कल्पना, संयोगाद् विभागाद् वा शब्द उपजायते, जातश्चासौ तिर्यगूर्ध्वमधश्च सर्वतोदिक्कानि कदम्बगोलकाकारेण सजातीयनिकटदेशानि शब्दान्तराण्यारभते, तान्यपि तथेत्येवं वीचीसन्तानवृत्त्यारम्भप्रबन्धप्राप्तोऽन्त्यः श्रोत्राकाशजन्मा शब्दस्तत्समवेतस्तेनैव गृह्यते इति । तदियं तावदतिघर्घरी कल्पना ।

शब्दः शब्दान्तरं सूत इति तावदलौकिकम् ।
कार्यकारणभावो हि न दृष्टस्तेषु बुद्धिवत् ।।

जन्यन्तेऽनन्तरे देशे शब्दैः स्वसदृशाश्च ते ।
तिर्यगूर्ध्वमधश्चेति केयं वा श्रद्दधानता ।।

शब्दान्तराणि कुर्वन्तः कथञ्च विरमन्ति ते ।
न हि वेगक्षयस्तेषां मरुतामिव कल्पते ।।

कुड्यादिव्यवधाने च शब्दस्यावरणं कथम् ।
व्योम्नः सर्वगतत्वाद्धि कुड्यमध्ये व्यवस्थितिः ।।

अथावरणात्मककुड्यादिद्रव्यसंयोगरहितमाकाशं शब्दजन्मनि समवायिकारणमिष्यते तदत्र प्रमाणं विशेषे वक्तव्यम् ।

तुल्यारम्भे च मन्देन तीव्रस्य जननं कथम् ।
श्रूयते चान्तिकात्तीव्रःशब्दो मन्दस्तु दूरतः ।।

न दृष्टस्तेषु बुद्धिवदिति । यथा लिङ्गादिबुद्धिर्लिङ्ग्यादिबुद्धिमारभमाणा दृश्यते तथा न शब्दः शब्दान्तरमित्यर्थः ।

वीचीसन्तानतुल्यत्वमपि शब्दे सुदुर्वचम् ।
मूर्त्तिमत्त्वक्रियायोगवेगादिरहितात्मसु ॥

शब्दस्य शब्दजनकत्वे प्रमाणाभावप्रदर्शनम्

यदप्युच्यते सजातीयजनकः शब्दः गुणत्वाद्रूपादिवदिति तदिदमसिद्धमसिद्धेन साध्यं गुणत्वस्यासिद्धत्वात् ।

न शब्दः पारतन्त्र्येण कदाचिदुपलभ्यते ।
द्रव्यस्थ इव रूपादिरतोऽस्य गुणता कुतः ॥

अपि च न शब्दान्तरारम्भकः शब्दो गुणत्वाद् रूपवत्, शब्दः शब्दं नारभते शब्दत्वाच्छ्रोत्रशब्दवत्, न संयोगविभागौ शब्दस्य जनकौ संयोगविभागत्वादन्यसंयोगविभागवद् इत्यादयः प्रतिहेतवोऽप्यत्र सुलभा इति यत् किञ्चिदेतद् ।

कापिलास्तु ब्रुवते श्रोत्रवृत्तिः शब्ददेशं गच्छति सा शब्देन विक्रियते इति । तत्र श्रोत्रस्य व्यामिश्रत्वान्निकटदेशेनैव शब्देन तद्वृत्तिर्विक्रियते न दूरदेशेनेत्यत्र को नियमः ? नियमाभावाच्च कान्यकुब्जप्रयुक्तो गोशब्दो गौरमूलकेऽपि श्रूयेत । अमूर्त्ता च श्रोत्रवृत्तिः प्रसरन्ती न मूर्तैः कुडयादिभिरभिहन्तुं शक्यते इति व्यवहितस्यापि शब्दस्य श्रवणं स्यात् ।

मूर्तिमत्त्वक्रियायोगेति । वीच्या हि मूर्तिमत्त्वादिना वीच्यन्तरकारणजातस्य प्रेरणं क्रियते, तस्मिन् हि सति वीच्यन्तरनिष्पत्तेः । तथा चोक्तम् "देशान्तरगतं कार्यं नामूर्तस्यानभिघ्नतः" इति ।

पारतन्त्र्याद् गुणत्वं रूपादिवत् सेत्स्यतीत्याशङ्कयाह— **न शब्दः पारतन्त्र्येणेति ।**

कापिलास्तु ब्रुवत इति । श्रोत्रस्याहङ्कारिकत्वाद् व्यापकत्वेन गमनासम्भवः, शब्दाभिघातेन तु या तस्य वृत्तिरुदेति सा शब्ददेशं गच्छतीति केषाञ्चित् साङ्ख्यानां मतम् । **सा शब्देन विक्रियते** स्वनिर्भासा संपाद्यते ।

वायौ शब्दानुकूले च न तस्य श्रवणं भवेत् ।
गच्छन्त्याः प्रतिकूलो हि श्रोत्रवृत्तेः स मारुतः ॥

दूरेऽपि शब्दस्य श्रवणं यद् दृष्टं प्रतिवातश्च निकटेऽपि यदश्रवणं तदस्मिन् पक्षे विपरीतं स्यात् ।

वृत्तिवृत्तिमतोर्भेदो नास्तीतीन्द्रियवद्भवेत् ।
व्यापिका वृत्तिरित्येवं कथं सर्वत्र न श्रुतिः ॥

आर्हतास्त्वाहुः सूक्ष्मैः शब्दपुद्गलैरारब्धशरीरः शब्दः स्वप्रभवभूमेः निष्क्रम्य प्रतिपुरुषं कर्णमूलमुपसर्पतीति तदेतदतिसुभाषितम् ।

वर्णस्यावयवाः सूक्ष्माः सन्ति केचन पुद्गलाः ।
तैर्वर्णोऽवयवी नाम जन्यते पश्य कौतुकम् ॥
तेषामदृश्यमानानां कीदृशो रचनाक्रमः ।
केन तत्संनिवेशेन कः शब्द उपजायताम् ॥
लघवोऽवयवाश्चैते निबद्धा न च केनचित् ।
न चैनं कठिनं कर्तुं वर्णावयविनं क्षमाः ॥
कृशश्च गच्छन् स कथं न विक्षिप्येत मारुतैः ।
दलशो वा न भज्येत वृक्षाद्यभिहतः कथम् ॥
प्रयाणकावधिः कश्च गच्छतोऽस्य तपस्विनः ।
एकश्रोत्रप्रविष्टो वा स श्रूयेतापरैः कथम् ॥
निष्क्रम्य कर्णादेकस्मात् प्रवेशः श्रवणान्तरे ।
यदीष्येत कथं तस्य युगपद् बहुभिः श्रुतिः ॥

गच्छन्त्याः प्रतिकूलो हीति । यस्यां दिश्युत्पन्नः शब्दस्तत्र श्रोत्रवृत्तिर्यान्ती तद्दिगागतेन वायुना प्रतिहन्येत ।

यत्र शब्द उत्पन्नस्तत आगच्छन् शब्दानुकूलो वातोऽनुवातः शब्ददेशं पुनर्गच्छन् **प्रतिवातः** ।

सूक्ष्मैः शब्दपुद्गलैः शब्दपरमाणुभिः ।

निबद्धा न च केनचिदिति । उदकादिना कृतमीलना इत्यर्थः ।

श्रोतृसंख्यानुसारेण न नानावर्णसंभवः ।
वक्तुस्तुल्यप्रयत्नत्वाच्छ्रोतृभेदे तदत्यये ॥
तदलं परिहासस्य महतो हेतुभूतया ।
नग्नक्षपणकाचार्यप्रज्ञाचातुर्यचर्चया ॥

शाक्यप्रायास्त्वाचक्षते अप्राप्त एव शब्दः श्रोत्रशक्त्या गृह्यते इति, तदेतदतिव्यामूढभाषितम्, अप्राप्त्या तुल्यतायां दूरव्यवहितादीनामश्रवणकारणाभावात्, प्राप्यकारिताख्यकर्मधर्माप्रसङ्गाच्च, न च चार्वाकवदपरीक्षित एवायमर्थ उपेक्षितुं युक्तः ।

शब्दाभिव्यक्तिसमर्थनम्

इति कार्यत्वपक्षेऽमूः श्रुतास्तार्किककल्पनाः ।
अथाभिव्यक्तिपक्षेऽस्य शृणु श्रोत्रियकल्पनाम् ॥

विवक्षापूर्वकप्रयत्नप्रेर्यमाणस्तावद् वेगवत्तया क्रियावत्तया च कोष्ठ्यो बहिर्निःसरति समीरण इति सुस्पष्टमेतत् । प्रत्यक्षपवनवादिनां पक्षे पवनसमये वक्तृवदननिकटनिहितहस्तस्पर्शेनैव स उपलभ्यते । अनुमेयमारुतपक्षेऽपि तदानीमास्यसमीपसन्निधापिततूलककर्मणा सोऽनुमीयते ।

स गच्छन् सर्वतोदिक्कः स्तिमितानिलनोदनम् ।
करोति कर्णाकाशे च प्रयाति श्रुतियोग्यताम् ॥
स च प्रयत्नतीव्रत्वमन्दत्वेन तदात्मकः ।
शब्दे तथाविधज्ञप्तिहेतुतामवलम्बते ॥
स चैष गच्छन्नुद्दामवेगयोगाहितक्रियः ।
शरवद् वेगशान्त्यैव न दूरं गन्तुमर्हति ॥
स मूर्त्तः प्रसरन् मूर्त्तैरपरैः प्रतिरुध्यते ।
कुड्यादिभिरितो नास्य श्रुतिर्व्यवहितात्मनः ॥

अप्राप्त एवेति । महाभूतक्षोभजः शब्दस्तत्रस्थ एव गृह्यते श्रोत्रेण, श्रोत्रस्य हि तद्गुणादेव तादृशी शक्तिः कल्प्यते; यथा अयस्कान्तमणेर्दूरस्थस्याप्ययसः समाकर्षिका शक्तिर्दर्शनादेव कल्प्यते तद्वदस्येति भावः ।

स वेगगतियोगित्वादागच्छति यतो यतः ।
श्रोता ततस्ततः शब्दमायान्तमभिमन्यते ॥

स तु शङ्खादिसंयोगप्रेर्यमाणः समीरणः ।
शब्दस्यावर्णरूपस्य भवति व्यक्तिकारणम् ॥

शब्दो यद्यप्यवर्णात्मा श्रोत्रग्राह्यो न विद्यते ।
तथापि तत्र शब्दत्वं श्रवणेन ग्रहीष्यते ।

तदिह न काचिदस्माभिरधिका कल्पना कृता, मारुतगतेरस्याः सर्वलोकप्रसिद्धत्वात् कर्णाकाशसंस्कारमात्रमदृष्टं कल्पितम्, तदपि कार्यार्थापत्तिगम्यत्वान्नापूर्वमिति ।

अपक्षपातिनः सभ्याः सत्यमुत्पत्त्यपेक्षया ।
शब्दस्य कल्पनामाहुरभिव्यक्तौ लघीयसीम् ॥

तदेवमभिव्यक्तिपक्षे नियतग्रहणोपपत्तेः प्रत्यभिज्ञाप्रत्ययप्रामाण्यान्नित्यत्वमेवोपगन्तव्यम् ।

या त्वनैकान्तिकत्वोक्तिः धीकर्मप्रत्यभिज्ञया ।
प्रत्यक्षे चोद्यमानासौ दर्शयत्यतिमूढताम् ।

शब्दो यद्यप्यवर्णात्मेति । अयमाशयः । यथा गादयो वर्णा वर्णान्तरविलक्षणेन प्रातिस्विकेन रूपेण श्रोत्रप्रत्यये प्रतिभासन्ते नैवं भेर्यादिषु शब्देषु शब्दत्वमात्रव्यतिरेकेणान्यस्य कस्यचिद् उपलब्धिरिति ।

या त्वनैकान्तिकत्वोक्तिरिति । पञ्चकृत्वो गोशब्द उच्चरित इत्यादि यत् प्रत्यभिज्ञानमुक्तं तत्र नित्यत्वसाधनायानुमानत्वेनापि त्वनित्यत्ववादिनामुना प्रत्यभिज्ञारूपेण प्रत्यक्षेण विरुद्धतोद्भाव्यते; अनैकान्तिकत्वादयश्चानुमानदोषा न प्रत्यक्षे उद्भावयितुं युज्यन्त इति भावः ।

अथ मा भूत् प्रकृते दूषणम्, यथा पुनरनुमानं प्रत्यभिज्ञाबाधितत्वाच्छब्दानित्यत्वसाधकं प्रत्यक्षविरुद्धत्वेन न प्रमाणम्, तथा बुद्धिकर्मणोरप्यनुमानमनित्यत्वसा-

तेनानुमानदोषेण प्रत्यक्षं न हि दूष्यते ।
सिद्धान्तान्तरचिन्ता तु भवेद् भृशमसंगता ॥
निर्बाधं प्रत्यभिज्ञानमस्ति चेद् बुद्धिकर्मणोः ।
तयोरप्यस्तु नित्यत्वं नो चेत् का शब्दतुल्यता ॥

शब्दनित्यत्वे सिद्धान्तिमतम्

तस्मान्नित्यः प्रत्यभिज्ञाप्रभावात् सिद्धः शब्दः पश्यतां तार्किकाणाम् ।
अर्थापत्तिः पूर्वमुक्ता च तस्मिन्नस्थायित्वे युक्तयश्च व्युदस्ताः ॥
अस्ति च वेदे वचनं सिद्धामनुवदति यद् ध्रुवां वाचम् ।
तल्लिङ्गदर्शनादपि नित्यः शब्दोऽभिमन्तव्यः ॥
शिक्षाविदस्तु पवनात्मकमेव शब्दमाचक्षते तदसमञ्जसमप्रतीतेः ।
अर्हन्मतप्रथितपुद्गलपर्युदासनीत्या च वाय्ववयवा अपि वारणीयाः ॥

धकं प्रत्यभिज्ञाबाधितत्वादप्रमाणं कस्मान्नेष्यते । एवञ्च तयोरपि नित्यत्वं प्राप्नोतीत्याशङ्क्याह **सिद्धान्तान्तरचिन्तेति** ।

निर्बाधं प्रत्यभिज्ञानमिति । अयमाशयः । शब्दे आनुमानिक्यनित्यता, प्रत्यक्षेण च प्रत्यभिज्ञानात्मना नित्यत्वमिति प्रत्यक्षस्य बलीयस्त्वान्निर्बाधा सा प्रत्यभिज्ञा । धीकर्मणोः पुनरानुमानिकी प्रत्यभिज्ञा, अनित्यताप्यामानुनिकी; ततश्च तुल्यबलत्वात् तत्रानुमानयोर्नास्ति निर्बाधता प्रत्यभिज्ञायाः । बुद्धौ कर्मणि चातीन्द्रियद्रव्याधारे अप्रत्यक्षत्वादनुमानात् प्रतीतिः प्रत्यभिज्ञाया आनुमानिकत्वमुक्तम् । अनित्यत्वमप्यानुमानिकमेव, सर्वदा कार्यानुपलब्धिगम्यत्वात् तस्येति ।

पश्यतां तार्किकाणां पश्यतस्तार्किकान् अनादृत्येत्यर्थः । **अर्थापत्तिः पूर्वमुक्ता च तस्मिन्** 'दर्शनस्य परार्थत्वात्' इति ।

अनुवदति यद् ध्रुवां वाचं वाचा विरूपनित्ययेत्यादिकम् ।

शिक्षाविदस्त्विति । ते हि मन्यन्ते वाय्ववयवा एव बर्हिर्निःसृताः शब्दात्मना स्थूलीभवन्ति । काष्ठेभ्य एव निःसृता धूमावयवाः सूक्ष्माः स्थूलधूमावयविजनकतया सम्पद्यन्त इति ।

येऽपि स्थूलविनाशदर्शनवशाद् ब्रूयुः क्षणध्वंसिनो
भावांस्तेऽपि न शक्नुवन्ति गदितुं शब्दस्य विध्वंसिताम् ।
अन्ते हि क्षयदर्शनात् किल तथा तेषां भ्रमोऽस्मिन् पुनः
शब्देनान्तपरिक्षयाविति कथं कुम्भादिवद् भङ्गिता ॥

अत्र ब्रूमहे न खलु भवदभिहितमेतत्प्रमाणद्वयमपि शब्दनित्यतां प्रसाधयितुमर्हति, यावता यदर्थापत्तिर् अवादि दर्शनस्य परार्थत्वादिति सा क्षीणैवार्थप्रतीतेरन्यथाप्युपपन्नत्वात्, तत्र सादृश्यमप्यनभ्युपगतमेव दूषितमित्यस्थाने क्लिष्टा भवन्तः ।

गत्वादिजातीराश्रित्य सम्बन्धग्रहणादिकः ।
अर्थावगतिपर्यन्तो व्यवहारः प्रसेत्स्यति ॥
ननु गत्वं प्रतिक्षिप्तमेतदेव परीक्ष्यताम् ।
अस्मिन् समाप्यते वादो मर्मस्थानमिदञ्च नः ॥
प्रतिक्षिप्ते च गत्वादौ नार्थसम्प्रत्ययोऽन्यथा ।
प्रत्यभिज्ञानभूमिश्च नान्यास्तीति वयं जिताः ॥
सिद्धे तु गत्वसामान्ये तत एवार्थवेदनम् ।
तदेव प्रत्यभिज्ञेयमिति यूयं पराजिताः ॥
तेनान्यत् सर्वमुत्सृज्य वादस्थानक-डम्बरम् ।
गत्वादिजातिसिद्ध्यर्थमथातः प्रयतामहे ॥

गत्वादिसामान्यसाधनोपक्रमः

तत्रेदं विचार्यताम् य एव गकारभेदप्रतिभासः स किं व्यञ्जकभेदकृत उत वर्णभेदविषय इति । व्यञ्जकभेदकृते तस्मिन् एकत्वाद् गकारस्य किंवृत्ति

येऽपि स्थूलविनाशेति । योऽयं घटादेर्मुद्गरादिभ्यो असभागसन्ततिरूपः स्थूलो विनाशः प्रत्यक्षमुपलभ्यतेऽसौ विनश्वरस्वभावस्यावश्याभ्युपेयोऽविनश्वरस्वभावस्य वा ? अविनश्वरस्वभावस्य तदभ्युपगमे गगनादेरपि विनाशित्वप्रसङ्गात् । विनश्वरस्वभावत्वे चापेक्षणीयाभावात् प्रतिक्षणमेव विनाशकल्पनेति । सर्वदाभिव्यक्तस्योपलम्भादन्ताभावः ॥

गत्वसामान्यं स्यात्, वर्णभेदविषयत्वे तु तद्भेदसिद्धेरभेदप्रत्ययस्य विषयो मृग्य इति तद्ग्राह्यमपरिहार्यं गत्वसामान्यम्। तदुच्यते नायं व्यञ्जकभेदकृतो गकारभेदप्रत्ययः। यदि हि व्यञ्जकभेदाधीन एष भेदप्रतिभासस्तर्हि यरलवादिवर्णभेदप्रत्ययोऽपि तत्कृत एव किमिति न भवति? ततश्च सकलवर्णविकल्पातीतमेकमनवयवं शब्दब्रह्म वैयाकरणवदभ्युपगन्तव्यम्।

अथ मनुषे यरलवादीनामितरेतरविभक्तस्वरूपप्रतिभासात् शुकशारिकामनुष्येषु हि वक्तृभेदे सति व्यञ्जकनानात्वसम्भावनया वर्णभेदप्रत्ययस्य तत्कृतत्वं काममाशङ्क्येतापि वक्त्रेकत्वे तु गगनादौ कुतस्तत्कृतो भेदः?

ननु तत्रापि मरुतो भिन्ना एव व्यञ्जकाः मुखं त्वेकं भवतु किं तेन? तदपि वा भिन्नमित्येके। उच्यते स तर्हि मरुतां भेदो यरलवादिष्वपि तुल्य इति मा भूत्तेषामपि भेदः।

ननु यरलवानां विशेषप्रतीतिरस्ति गकारे तु सा नास्तीत्युक्तं उच्चारणस्यैव तत्र भेदो नोच्चार्यस्येति, नैतत् सारम्। मा भूदेष विशेष इति प्रतीतिर्भेदबुद्धिस्तु विद्यत एव। अन्या च विशेषबुद्धिरुच्यते अन्या च भेदबुद्धिरिति, विशेषाप्रतिभासेऽपि क्वचिद् विच्छेदेन प्रतीतिदर्शनात्।

शब्दब्रह्म वैयाकरणवदिति। यथा वैयाकरणानां उपलभ्यमाना अपि भिन्ना वर्णा निरवयवं शब्दतत्त्वं न भिन्दन्ति व्यञ्जकत्वेन तत्स्वरूपानुप्रवेशाभावात् तेषाम्, एवं भवतोऽपि मीमांसकस्य परोपाधित्वाद् वर्णभेदः शब्दस्वरूपं नानुप्रविशेदिति।

तदपि वा भिन्नमित्येक इति। एक इति वैशेषिकाः, पाकजोत्पत्तिन्यायेन ये आशुतरं शरीरस्यारम्भविनाशावाहुः, साङ्ख्या वा परिणामवादिनः, बौद्धा वा क्षणिकवादिन इति।

अन्या च विशेषबुद्धिरिति। विशेषबुद्धिर्यत्र पदार्थानां प्रातिस्विको विशेषः प्रतिभाति स्पष्टतया यथा 'ग' बुद्धौ यकारादिव्यतिरिक्तवर्णस्वरूपावभासः। **अन्या च भेदबुद्धिः। यत्र** प्रातिस्विकविशेषाप्रतिभासेऽपि वैलक्षण्यमात्रप्रतिभासो भिन्नवक्तृतयोच्चारितयोरिव गकारयोः। कथं पुनरसति विशेषोपलम्भे पदार्थानां भेदग्रह इत्याह **विशेषाप्रतिभासेऽपीति। विच्छेदेनेति**। विच्छेदेनान्यत्वेन प्रतीतिदर्शनादिति।

नन्वत्रोच्यते

दृश्यते शाबलेयादिव्यक्त्यन्तरविलक्षणा ।
बाहुलेयादिगोव्यक्तिस्तेन भेदोऽस्ति वास्तवः ।।
न तु द्रुतादिभेदेन निष्पन्ना सम्प्रतीयते ।
गव्यक्त्यन्तरविच्छिन्ना गव्यक्तिरपरा स्फुटा ।।

इति नैतद् युक्तम्, शाबलेयादौ प्रतिव्यक्ति सास्नाखुरककुदाद्यवयववर्तिनो विशेषाः प्रतिभासन्ते। ते च स्थूलत्वात् सुगमा भवन्ति। यत्र तु तिलतण्डुलकुलत्थादौ प्रतिसिक्थं विशेषो न प्रतिभाति तत्र विशेषप्रतीत्यभावेऽपि विच्छेदप्रतिभासो विद्यत एव, सिक्थात् सिक्थान्तरत्वेन प्रतिभासात्। एवमिहाप्येव गकारविशेष इति प्रतिभासाभावेऽपि विच्छेदग्रहणाद् गकारनानात्वम् ।

ननु तण्डुलादावपि सिक्थात् सिक्थान्तरे विशेषाः प्रतिभासन्त एव तदप्रतिभासे भेदस्यापि ग्रहीतुमशक्यत्वात्, मैवं वादीः, यत्ने सति चतुरश्रत्रिकोणवर्तुलत्वादिविशेषा अप्यमुत्र प्रतिभासिष्यन्ते, प्रयत्नं विनापि तु प्रथमाक्षनिपात एव विच्छेदबुद्धिरुत्पद्यते इति तयैव नानात्वसिद्धिः ।

ननु नैवानधिगतविशेषस्य विच्छेदबुद्धिरुत्पत्तुमर्हति इति विशेषबुद्धिरेव विच्छेदबुद्धिः, नैतदेवम्, भ्रमणादिकर्मक्षणानां सूक्ष्मविशेषाप्रतिभासेऽपि विच्छेद-

---

गव्यक्त्यन्तरविच्छिन्ना भेदेन न प्रतीयत इत्यर्थः।

प्रतिसिक्थं विशेषो न प्रतिभातीति। तिलादीनां हि ये सिक्थगुलकास्ते तुल्यजातयो अनभिलक्ष्यगुणक्रियागतविशेषाश्च। अतो जात्यादिकृतस्तावत् तेषां विशेषो-नोपलभ्यते। नापि यथा नित्यानां परमाण्वादीनामन्त्यविशेषसम्बन्धस्तथा तेषामस्ति, अनित्यत्वात् तेषाम्। एवञ्च विशेषानुपलम्भेऽपि यथा तत्र दृष्टत्वाद् भेदबुद्धिर्दुरपह्नवा तथेहापि भविष्यतीति भावः।

यत्ने सतीत्यादिनावयवसन्निवेशकृतविशेषदर्शनेन गुणस्य भेदकत्वमाह, कश्चिद् गुलकस्त्रिकोणः कश्चिच्चतुरस्र इति। अवयवसन्निवेशस्य च त्रिकोणत्वादेः संयोगविशेषत्वात्।

प्रतिभासात् । ननु तत्रापि विशेषग्रहणं कल्प्यते अन्यथा विच्छेदप्रतीत्यनुपपत्तेः । यद्येवं वर्णेष्वपि गगनादौ विच्छेदप्रतीतिदर्शनात् कल्प्यतां विशेषग्रहणम् ? नन्वस्त्येव तत्, किन्त्वौपाधिकः, स्फटिके रक्तताप्रत्ययवत् । विषमो दृष्टान्तः, स्फटिकस्य शुद्धस्य दृष्टत्वाल्लाक्षाद्युपाधिनिमित्तको रक्तताप्रत्ययः, वर्णानान्तु नित्यमेवोदात्तादिविशेषवतां प्रतिभासात् तद्रहितानामनुपलब्धेश्च नैसर्गिक एवायं भेदः । तद्यथा बुद्धीनां घटपटादिविषयविशेषशून्यानामसंवेदनात् प्रतिविषयं नानात्वं तथा वर्णानामपि प्रत्युदात्तादिविशेषं नानात्वम् । ननु बुद्धिरप्येका नित्या च विषयभेदोपाधिनिबन्धनस्तद्भेद इति साम्प्रतम्, स्वयमेव बुद्धिजन्म प्रत्यक्षमित्यभिधानात् । अस्माभिश्च बुद्धिनित्यताया उपरिष्टान्निराकरिष्यमाणत्वात्, विषयभेदाच्च तद्भेदाभिधाने विषयस्यापि कुत इदानीं भेदः, बुद्धिभेदादिति चेद् इतरेतराश्रयप्रसङ्गः । तदिमाः स्वत एव भेदवत्यो बुद्धयः, विषयाणामपि स्वत इव भेदो भवति स च बुद्धिभिर्ज्ञायते इत्यलमर्थान्तरगमनेन । यथा च शुक्लगुणस्य भास्वरधूसरादिभेदवतो

ननु बुद्धिरप्येका नित्या चेति साङ्ख्याभिप्रायेणाह अथवा भट्टदृष्ट्या । यथाह भट्टः

बुद्धीनामपि चैतन्यस्वाभाव्यात् पुरुषस्य नः ।
नित्यत्वमेकता चेष्टा भेदस्तु विषयाश्रयः ॥
स्वरूपेण यथा वह्निर्नित्यं दहनकर्मकः ।
उपनीतं दहत्यर्थं दाह्यं नान्यन्तु नान्यदा ॥
यथा वा दर्पणः स्वच्छो यथा वा स्फटिकोऽमलः ।
यद् यन्निधीयते योग्यं तच्छायां प्रतिपद्यते ॥
तथैव नित्यचैतन्याः पुमांसो देहवृत्तयः ।
गृह्णन्ति करणानीतान् रूपादीन् धीरसौ च नः ॥
तेनोपनीतसम्बन्धभङ्गित्वाद् भङ्गिनी मतिः ।
न नित्यं दाहको वह्निर्दाह्यासन्निधितो यथा ॥ इति ।

नानात्वं तथा वर्णस्याप्युदात्तादिभेदवतः । शुक्लगुणोऽप्येक एव आश्रयभेदात्तु तद्भेद इति चेद् अहो रससमारूढो भट्टः ।

कर्मैकं बुद्धिरप्येका जगत्येकः स्थितो गुणः ।
तैश्च तन्नित्यमित्येताः स्त्रीगृहे कामुकोक्तयः ॥

अपि चैकात्मवादोऽप्येवमेवावतरेत् सुखिदुःख्यादिभेदस्य शरीरभेदेनाप्युपपत्तेः। अद्वैतस्य च नातिदवीयानेष पन्था इत्यलमलीकविकत्थनेन । तस्माद् बुद्ध्यादिवत् सर्वदा सविशेषाणामेव वर्णानां ग्रहणान्नानात्वम् तत्रैतत् स्याद् गगनादावकारोपश्लेषकृत एव भेदप्रत्ययो न स्वरूपभेद इति, तदयुक्तम्, अकारस्यापि भवन्मते भेदाभावात् । अविद्यमाने च तदुपश्लेषे दिगजो दिग्गज इति भेदेन प्रतिभासो भवत्येव। तथा च समदः सम्मदः, पटः पट्टः, आसनम् आसन्नम्, मलः मल्लः, अविकः अविक्कः, पतिः पत्तिः, पतनं पत्तनमित्यादावपि वर्णभेदप्रतीतिः, अर्थप्रतीतिभेदोऽपि च दिगजदिग्गजादौ शब्दान्तरनिमित्तको भवितुमर्हति न द्विरुच्चारणकृतः । ग्रन्थाधिक्यादर्थाधिक्यं नोच्चारणभेदात्, शतकृत्वोऽपि प्रयुक्ते गोशब्दे सास्नादिमदर्थव्यतिरिक्तवाच्यसम्प्रत्ययाभावात् । तथा च दिग्गज इति द्विगकारको निर्देश इत्याचक्षते शब्दविदो न द्विर्गकार उच्चरित इति ।

ननु गोगुरुगिरिगेहादावज्भेदेऽपि गकारप्रत्ययानुवृत्तेरेक एवायं गकारः, मैवं वोचः, एष एव हि भेदप्रत्ययोऽस्माभिरुपदर्शितः विनापि च अजुपश्लेषं दिग्गजादौ भेदप्रत्ययो वर्णितः । न च वयमभेदप्रत्ययमपह्नुमहे किन्तु भेदप्रत्ययस्याप्यबाधितस्य भावादनन्यथासिद्धत्वाच्च गवादिवत्सामान्यविशेषरूपतां ब्रूमः, व्यञ्जकभेदनिबन्धनत्वन्तु यरलवादावपि वक्तुं शक्यमित्युक्तमेव ।

अहो रसमारूढो भट्ट इति । तथाहि गुणनित्यतां प्रत्यप्यसावाह

एतयैव दिशा वाच्या शुक्लादेरपि नित्यता ।
संसर्गिभेदमात्रेण स्यात्तत्रापि हि भेदधीः ॥
स्वरूपं तु तदेवेति को जातीः कल्पयिष्यति । इत्यादि ॥

अद्वैतस्य च नातिदवीयानिति । उपलभ्यमानभेदनिराकरणद्वारेण ।

अपि च शाबलेयादिभेदप्रत्ययस्यापि व्यञ्जकभेदनिबन्धनत्वादेक एवासौ स्यात्।

ननु तत्र को व्यञ्जको यद्भेदकृतः पिण्डभेदप्रत्यय इष्यते। आह च

न पिण्डव्यतिरेकेण व्यञ्जकोऽत्र ध्वनिर्यथा।
पिण्डव्यङ्ग्यैव गोत्वादिजातिर्नित्यं प्रतीयते ॥ इति

तदयुक्तम्, गोत्वजातेर्गत्ववदिदानीं विवादास्पदीभूतत्वात् पिण्डभेदप्रत्ययस्य चक्षुर्व्यापारभेदादप्युपपत्तेः।

ननु सकृदपि व्यापृतलोचनस्य परस्परविभक्तपिण्डप्रतिभासो भवति, मैवम्, तदानीं गोमात्रप्रतीतिः, एष शाबलेय एष बाहुलेय इति तु विशेषणग्रहणे चक्षुर्व्यापारभेदोऽपरिहार्यः। यदि चाद्यगोपिण्डभेदे प्रथमाक्षसन्निपातजा बुद्धिः सुभगतां गता गकारभेदे तर्हि किंकृतमस्या दौर्भाग्यम्। तत्रापि प्रथमश्रोत्रव्यापारवेलायामनवगतव्यञ्जकविभागस्यापि गगनगङ्गादौ गकारभेदः प्रतिभासत एवेत्यलं प्रसङ्गेन।

तदयं वस्तुसंक्षेपः, उपेक्ष्यतां वा सर्वत्र सामान्यविशेषव्यवहारः, इष्यतां वा गोत्वादिवद्गकारभेदवृत्ति गत्वसामान्यम्।

अत्वमपि गत्ववदप्रत्याख्येयम्, इतरेतरविलक्षणानामकाराणां ह्रस्वदीर्घप्लुतादिभेदेन प्रतिभासात्, यः पुनर(ा?)कारेऽप्यकारप्रत्यभिज्ञानं ब्रूयात् तस्यैकारोकारप्रतीतिष्वप्यकारस्यैव ग्रहणप्रसक्तिरत्वाविशेषात्। अथ तदविशेषेऽपि अवर्णादिवर्णस्य भेद इष्यते स तर्ह्याकारस्य न निह्नोतव्यः। एवञ्च सत्यरण्यार-

---

गत्ववदिदानीं विवादास्पदीभूतत्वादिति। यथा भेदाधिष्ठानं गत्व गव्यक्तिभेदस्यौपाधिकत्वेन स्वतो गवर्णस्य भेदाभावान्निराक्रियते तद्वत् शाबलेयादि भेदप्रतिभासस्याप्यौपाधिकत्वेन पिण्डभेदस्य स्वतोऽसम्भवाद् भेदाधिष्ठानगोत्वाभावः। **चक्षुर्व्यापारभेदादप्युपपत्तेरिति**। यथैकोऽपि वर्णो ध्वनिभेदाद् भिन्नः प्रतिभासते तथैकोऽपि गौः पुनः पुनश्चक्षुषा दृश्यमानः शाबलेयादिभेदेन प्रतिभासत इत्यर्थः।

अत्वाभ्युपगमे अगमनशब्दवदागमनेऽप्यकारप्रत्यभिज्ञाने तुल्यार्थताशङ्कानिवारणायाह **यः पुनर(ा ?) कारेऽपीति**।

रण्यशब्दभ्यां भिन्नार्थप्रतीतिरुपपत्स्यते। उदात्तानुदात्तस्वरितसंवृतविवृतादिभेदोऽपि शब्दविदां प्रत्यक्ष एव गीतज्ञानामिव स्वरग्रामभाषाविभागः। तस्मादष्टाद-शभेदमकारमाक्षते, अतश्च तत्सामान्यमवर्णकुलशब्देन व्यवहरन्तीति प्रतिपद्यन्ते लोका न मरुद्भ्यः। अथ मरुतामपि तथा व्युत्पत्तेरर्थप्रतीतिहेतुत्वम्? तर्हि व्युत्पत्तिरेव प्रमाणं स्याद् न शब्दः, व्युत्पत्तेरव्यभिचारात् शब्दस्य च व्यभिचारा-दित्यास्तामेतत्।

तस्माद् गत्वादिसामान्यैरर्थसम्प्रत्ययात्मनः।
कार्यस्य परिनिष्पत्तेर्न वर्णव्यक्तिनित्यता॥

प्रभाकरमते शब्दत्वसामान्याक्षेपः

अपर आह, तिष्ठतु तावद् दूरत एव गत्वाद्यपरसामान्यं महासामान्यमपि शब्दत्वं वर्णेषु नोपपद्यते।

व्यक्त्यन्तरानुसन्धानं यत्रैकव्यक्तिदर्शने।
तत्रैकरूपसामान्यमिष्यते तत्कृतं हि तत्॥
गकारश्रुतिवेलायां न वकारावमर्शनम्।
बाहुलेयपरामर्शः शाबलेयग्रहे यथा॥
शब्दः शब्दोऽयमित्येवं प्रतीतिस्त्वप्रयोजिका।
एषा हि श्रोत्रगम्यत्वमुपाधिमनुरुध्यते॥

तन्मतनिरासः

तदेतन्निरनुसन्धानस्याभिधानम्, अनुसन्धानप्रत्ययस्य सामान्यसिद्धावप्रयो-

---

मरुतामपि तथा व्युत्पत्तेरिति। यथा व्यञ्जकवशाद् अकार एव दीर्घतया प्रतिभाति तथा अगमन-आगमनादौ भेदप्रतीतिदर्शनात् तथैव व्युत्पत्तिः।

अपर आहेति प्रभाकरः।

व्यक्त्यन्तरानुसन्धानमिति। व्यक्त्यन्तरे दृष्टे पूर्वानुभूतस्य गव्यक्त्यन्तरस्य यत्रानुसन्धानं परामर्शः। **तत्कृतं हि तत्;** यत् कस्याश्चिद् व्यक्तेर्व्यक्त्यन्तरेऽनुसन्धानं न सर्वासां तत् सामान्यकृतमित्यर्थः।

जकत्वात्, अनुसन्धानं हि सारूप्याद् विजातीयेष्वपि भवति गवयग्रहणसमये गोपिण्डानुसन्धानवत्, तस्मादबाधितैकरूपप्रत्ययप्रतिष्ठ एव सामान्यव्यवहारः ।

समानबुद्धिग्राह्योऽपि सामान्येऽवस्थिते क्वचित् ।
भवत्यन्यानुसन्धानं क्वचिद्वा न भवत्यपि ॥
तदस्ति खण्डमुण्डादौ पिण्डसारूप्यकारितम् ।
गकारादिषु वर्णेषु तदभावात्तु नास्ति तत् ॥

न तु सामान्याभावात् । न च सारूप्यमेव सामान्यं साङ्ख्यवदभिधातुं युक्तं विजातीयेष्वपि गोगवयादिषु तस्य दृष्टत्वात् । यदि च शब्दः शब्द इत्यनुवृत्तबुद्धेः श्रोत्रगम्यत्वोपाधिकृतत्वमुच्यते तर्हि गवादावप्येकबुद्धेर्वाहदोहाद्येकार्थक्रियाकारित्वनिबन्धनत्वाद् गोत्वादिजातिनिह्नवो बौद्धवन्मन्तव्यः । न चैतदेवम्, तद् गोत्ववच्छब्दत्वमपि न प्रत्याख्येयम् ।

एतेन ब्राह्मणत्वादिसामान्यमपि समर्थितं वेदितव्यम्, उपदेशसहायप्रत्यक्षगम्यत्वात् । न चोपदेशापेक्षणादप्रत्यक्षत्वं तस्य भवितुमर्हति गोत्वादिप्रत्ययस्यापि सम्बन्धग्रहणकाले तदपेक्षत्वदर्शनात् । उक्तञ्च न हि यद् गिरिभृङ्गमारुह्य गृह्यते तदप्रत्यक्षमिति । न चौपाधिकः पैठीनसिपैप्पलादिप्रभृतिषु ब्राह्मणप्रत्ययः, उपाधेरग्रहणात्, औपाधिकत्वस्य गोत्वादावपि वक्तुं शक्यत्वात् ।

अपि चोपदेशनिरपेक्षमपि चक्षुः क्षत्रियादिविलक्षणां सौम्याकृतिं ब्राह्मणजातिमवगच्छति इत्येके । तदलमनया कथया ।

गवयग्रहणसमये गोपिण्डानुसन्धानवदिति । अनेनानुसन्धानस्य परामर्शकत्वात् स्मरणस्वभावाभेदात् सादृश्यदर्शनमेव हेतुत्वेन कल्प्यते न सामान्यानुभव इति ।

पिण्डसारूप्यकारितं पिण्डसादृश्यजनितमित्यर्थः ।

एतेन ब्राह्मणत्वादीति । एतेन श्रवणग्राह्यत्वकृतशब्दः 'शब्द' इत्यभेदप्रत्ययनिराकरणेन । 'ब्राह्मणो ब्राह्मणः' इत्यादिरप्यभेदप्रत्ययो विशिष्टानुष्ठानाद्युपाधिकृत इति हि स आह । **गिरिभृङ्गमारुह्ये**ति । सापेक्षतया सङ्क्लेशतया तदपेक्षया दृष्टान्तः ।

शब्दनित्यत्वपक्षपरिहारः

प्रकृतमुच्यते । गत्वादिभिर्जातिभिरेवार्थसम्प्रत्ययोपपत्तेर्यदुक्तम् 'नित्यस्तु दर्शनस्य परार्थत्वात्' इति एतदयुक्तम् । एतेन 'सर्वत्र यौगपद्यात्' इत्येतदपि प्रत्युक्तम्, सम्बन्धनियमस्य गत्वादिभ्य एव सिद्धेः ।

यदपि संख्याभावात् कृत्वसुच् प्रयोगदर्शनमुदग्राहि तदपि व्यभिचारि ।

कृतं कान्तस्य तन्वङ्ग्या त्रिरपाङ्गविलोकनम् ।
चतुरालिङ्गनं गाढमष्टकृत्वश्च चुम्बनम् ।। इति ।

तद्भेदेऽपि दर्शनात् । अथ तत्र स्त्रीपुंसयोरभेदे चुम्बनादिक्रियामात्रभेद एवेत्युच्यते तथाप्यपूर्वेषु ब्राह्मणेषु भुक्तवत्सु पञ्चकृत्वो ब्राह्मणा भुक्तवन्त इति व्यवहारो दृश्यते ।

कविना सदनुप्रासे निबद्धेऽक्षरडम्बरे ।
गकारा बहवो दृष्टा इति व्यवहरन्ति हि ।।
यदपि प्रत्यभिज्ञानं तद्द्वारकमुदाहृतम् ।
तस्यापि सिद्धे प्रामाण्ये जात्यालम्बनता भवेत् ।।

एतेन 'सर्वत्र यौगपद्यादि'ति । सर्वत्र सर्वगवीषु गोशब्दादुच्चारिताद् युगपत् प्रत्ययदर्शनादाकृतिवचनत्वं गवादेः शब्दस्यावगम्यते, व्यक्तिवचनत्वे हि नियतैकव्यक्तिप्रतिपत्तिः स्यात् । तत्र च द्रव्यत्व-सत्ताद्याकृतीनां बह्वीनामपि सम्भवान्नियताकृतिवचनत्वमन्वयव्यतिरेकाभ्यामसकृत्प्रयोगान्निश्चीयते. असकृत्प्रयोगश्च नित्यत्वं विना न घटत इति 'सर्वत्र यौगपद्यात्' इति सूत्रार्थः ।

एतदपि गत्वादिजात्युपलक्षितानां भिन्नानामपि प्रयोगे सिद्ध्यत्यनित्यत्वपक्षेऽपीत्यनेनाभिप्रायेणोक्तम् **पञ्चकृत्वो ब्राह्मणा भुक्तवन्त** इति । अत्र भुजिक्रियावद्भोक्तृणामप्यन्यत्वम् ।

यदपि 'सङ्ख्याभावात्' इति सूत्रम् शब्दे सङ्ख्याया अभावान्नित्यत्वमित्यस्यार्थः । सङ्ख्याया अभावाच्च यथा नित्यत्वं तथाह भाष्यकारः "अष्टकृत्वो गोशब्द उच्चरित इति हि वदन्ति नाष्टौ गोशब्दा इति । किमतो यद्येवम् ? अनेन वचनेनावगम्यते प्रत्यभिजानन्तीति" इदमेव चेदृशं भाष्यं चेतसि निधायाह **यदपि प्रत्यभिज्ञानं तद्द्वारकमुदाहृतमिति** । तद्द्वारकं 'कृत्वसु'प्रयोगद्वारकमित्यर्थः ।

नृत्ताभिनयचेष्टादिप्रत्यभिज्ञानतो वयम् ।
विशेषं प्रत्यभिज्ञाने न पश्यामो मनागपि ॥

शब्दस्य प्रत्यभिज्ञानवेलायामेव दृश्यते ।
शब्दरूपस्य विध्वंस इति तन्नित्यता कुतः ॥

प्रत्यभिज्ञयापि न शब्दनित्यत्वसिद्धिः

यद्यपि च क्षणभङ्गभङ्गे प्रत्यभिज्ञाप्रामाण्यमस्माभिरपि समर्थयिष्यते तथापि स्तम्भादिप्रत्यभिज्ञायाः शब्दप्रत्यभिज्ञाया एष एव विशेषो यदत्र ध्वस्तः शब्द इति तदैव प्रत्ययो जायते अत एव तिरोहितेऽपि भावादियमप्रमाणं प्रत्यभिज्ञेत्याहुः ।

यद्यपि ध्रियतेऽस्माकं शब्दो द्वित्रानपि क्षणान् ।
प्रत्यभिज्ञा तु कालेन तावता नावकल्पते ॥

तथा हि शब्द उत्पद्यते तावत् ततः स्वविषयं ज्ञानं जनयति, अजनकस्य प्रतिभासायोगात् । ततस्तेन ज्ञानेन शब्दो गृह्यते, ततः संस्कारबोधः, ततः पूर्वज्ञातशब्दस्मरणम्, ततस्तत्सचिवं श्रोत्रं मनो वा शब्दप्रत्यभिज्ञानं जनयिष्यति तथा शब्दो ग्रहीष्यत इति यत् कुतोऽस्य दीर्घमायुः । प्रत्यभिज्ञाप्रामाण्यादेव तावदायुस्तस्य कल्प्यते इति चेत्, सत्यं कल्प्यते यदि विनाशप्रत्ययस्तदैव न स्यात् । अपि च गोशब्दोऽयमश्वशब्दोऽयमिति तदभिधानविशेषोल्लेखात् ।

नानानुस्मरणं तस्य तदैवावश्यमापतेत् ।
विज्ञानयौगपद्याच्च कालो दीर्घतरो भवेत् ॥

यदप्युदितमुद्दाममेघश्यामासु रात्रिषु ।
साम्यं सौदामिनीधामजन्यया प्रत्यभिज्ञया ॥

तद्रसत् कालदैर्घ्येण तदवस्थितिसम्भवात् ।
विद्युद्दृष्टे च वृक्षादौ नाशसंवित्त्यसम्भवात् ॥

प्रत्यभिज्ञा नाम स्मर्यमाणानुभूयमानसामानाधिकरण्यग्राहिणी संस्कारसचिवेन्द्रियजन्या प्रतीतिरिति केचित् ।

अन्ये मन्यन्ते स्मर्यमाणपूर्वज्ञानविशेषितार्थग्राहित्वात् प्रत्यभिज्ञायास्तद्विशेषणस्य चार्थस्य बाह्येन्द्रियग्राह्यत्वानुपपत्तेः स्तम्भादावपि मानसी प्रत्यभिज्ञेति ।

निर्बन्धस्त्विह नास्माकं सा यथास्तु तथास्तु वा ।
शब्दे विनाशज्ञानात्तु न सा नित्यत्वसाधिका ॥
बाध्यबाधकभावे तु नियमो ननु किंकृतः ।
शब्दस्य प्रत्यभिज्ञानविनाशप्रतिभासयोः ॥
उच्यते प्रत्यभिज्ञानमन्यथाप्युपपद्यते ।
गत्वादिजातिविषयं यद्वा सादृश्यहेतुकम् ॥
न त्वभिव्यञ्जकध्वंसान्नाशधीरपि सेत्स्यति ।
तदसावपि बाध्यास्तु यद्वा भवतु संशयः ॥
मैवं विनाशिताबुद्धिर्भेदबुद्ध्युपबृंहिता ।
सा चेयञ्चान्यथासिद्ध इति वक्तुमसाम्प्रतम् ॥
प्रत्यभिज्ञा च सापेक्षा निरपेक्षा त्वभावधीः ।
तेनैवमादौ विषये प्रत्यभिज्ञैव बाध्यते ॥

शब्दाभावस्य ग्रहणात् प्रत्यभिज्ञायाश्च पूर्वानुसन्धानादिसव्यपेक्षत्वात् । अपि च प्रत्यभिज्ञा व्यभिचरति कर्मादिषु गृह्यते । तेनास्यां शब्देऽप्यभावप्रत्ययोपहतवपुषि कः समाश्वासः । न चेदं प्रत्यक्षेऽप्यनैकान्तिकत्वोद्भावनम्, अपि तु विनाशप्रत्ययप्रतिहतप्रभावा प्रत्यभिज्ञा नित्यत्वं कर्मादिष्विव शब्देऽपि न साधयितुं प्रभवतीति दृष्टान्तस्य कोऽवसरः ? सत्यम्, ग्राहिकास्तु भवादृशाः स्वयमनवबुध्यमाना एवं बुद्ध्यन्ते ।

यत्तु प्रवृद्धरभसतया बुद्धिकर्मादावपि नित्यत्वसमर्थनं तदत्यन्तमलौकिकमित्युक्तम् ।

नियमो ननु किंकृत इति । विनाशधीरेव बाधिका न प्रत्यभिज्ञा इत्येवंरूपः ।

मैवं विनाशिताबुद्धिरिति । प्रत्युच्चारणं हि शब्दा भिन्ना उपलभ्यन्ते, सति चैक्ये भेदबुद्धिर्नानुगुणेति भेदबुद्धिर्विनाशावगमस्योपोद्बलिका । **सा चेयमि**ति यथा प्रत्यभिज्ञा सादृश्यादिनाप्युपपद्यत इत्यन्यथासिद्धा नैवं विनाशधीरित्यर्थः ।

किं नाम शब्दनित्यत्वसमर्थनतृषातुरः ।
जङ्गमं स्थावरञ्चैव सकलं पातुमिच्छसि ॥

तस्मादलमतिरभसवृत्ताभिराभिर्बुद्धिकर्मादिनित्यत्वसमर्थनकथाभिः ।

शब्दानामभिव्यक्तिपक्षनिरसनम्

यत्पुनरभिव्यक्तिपक्षे शब्दस्य ग्रहणे नियमाभावमाशङ्क्य श्रोत्रसंस्कारेण विषयसंस्कारेण उभयसंस्कारेण वा नियतं ग्रहणमुपवर्णितं तद्वञ्चनामात्रम्, समानदेशानां समानेन्द्रियग्राह्याणां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वादर्शनात्, ये पुनरत्र गन्धा उदाहृतास्ते समानेन्द्रियग्राह्या भवन्ति न समानदेशाः ।

एकभूम्याश्रितत्वेन तुल्यदेशत्वकल्पने ।
भवेत् समानदेशत्वं हिमवद्विन्ध्ययोरपि ॥

एकत्वेऽपि भुवो भान्ति पदार्थाः पार्थिवाः पृथक् ।
व्यज्यन्ते तदधिष्ठाना गन्धास्तैस्तैर्निबन्धनैः ॥

भवन्त्वनाश्रिताः शब्दा यदि वाकाशसंश्रिताः ।
सर्वथा भिन्नदेशत्वमेषां वक्तुं न शक्यते ॥

ननु यथैकत्वेऽपि नभसः तद्भागकल्पनया प्रतिपुरुषं श्रोत्रेन्द्रियभेद एवं तद्भागकल्पनयैव शब्दानामपि असमानदेशत्वान्नियतव्यञ्जकव्यङ्ग्यता भविष्यति । नैवमुपपद्यते यत्रैव वक्तृमुखाकाशदेशे श्रोतृश्रोत्राकाशदेशे वा गोशब्द उपलब्धः तत्रैवाश्वशब्द इदानीमुपलभ्यते न पुनरतिमुक्तकुसुमे य उपलब्धो गन्धः स बन्धूके मधूके वा कदाचिदुपलभ्यत इति ।

तस्मात् समानदेशत्वान्न व्यक्तौ नियमो भवेत् ।
उत्पत्तौ तु व्यवस्थायां तद्भेद उपपद्यते ॥

नादैः संस्क्रियतां शब्दः श्रोत्रं वा द्वयमेव वा ।
सर्वथा नियमो नास्ति व्यञ्जकेष्विति निश्चयः ॥

ये पुनरत्र गन्धा उदाहृता इति । यथा दग्धभुवो जलसम्पर्काद् गन्धाभिव्यक्तिस्तैलस्य चातपयोगादिति ।

व्यवस्था व्यञ्जकानां चेदुच्यतेऽदृष्टकारिता ।
उत्पत्तौ दृश्यमानायां दृष्टमप्यविरोधकम् ॥

न च स्तिमितमारुतापनयनव्यतिरिक्तः कश्चन श्रोत्रसंस्कारो विद्यते । तत्र चातिप्रसङ्ग उक्त एव अतिरिक्तसंस्कारकल्पनायान्त्वदृष्टकल्पना, स्थिरे च शब्दसंस्कारग्रहणमिति पुनरनभिव्यक्तस्यापि गोशब्दस्य श्रवणं स्यात्, तद्ग्रहणहेतोः संस्कारस्य स्थिरत्वात्, तत्क्षणिकत्वे तु शब्दक्षणिकतैव साध्वी प्रतीयमानत्वात् ।

यत्तु भर्तृमित्रस्तमेव संस्कारं श्रोत्रेन्द्रियमभ्युपैति तदिदमपूर्वं किमपि पाण्डित्यम् । इन्द्रियस्य हि संस्कार्यस्य कल्पनमनुपपन्नम् । अनश्वरत्वे तु शश्वदेव शब्दकोलाहलप्रसङ्ग इति यत्किञ्चिदेतत्, भट्टेनैव सोपहासमेष दूषितः इति किमत्र विमर्देन ।

यदपि भट्ट आह

यदि त्ववश्यं वक्तव्यस्तार्किकोक्तिविपर्ययः ।
ततो वेदानुसारेण कार्या दिक्श्रोत्रतामतिः ॥ इति

तदप्यसाम्प्रतम्

दिशां कार्यान्तराक्षेपादागमान्यपरत्वतः ।
आहोपुरुषिकामात्रं दिग्द्रव्यश्रोत्रकल्पनम् ॥

भट्टेन सोपहासमेष दूषित इति । यथाह भट्टः
अनुमेव च संस्कारं शब्दग्रहणकारणम् ॥
केचित्तु पण्डितम्मन्याः श्रोत्रमित्येव मन्वते ।
संज्ञासञ्चारणादेष बहुमानः स्वचेतसि ॥
मुधैषां बहुमानोऽयं वस्त्वनुत्पाद्य किञ्चन ।
संस्कारव्यतिरिक्ते च सर्वलोकस्य वस्तुनि ॥
श्रोत्रशब्दः प्रसिद्धोऽयं स्वाच्छान्द्येनापनीयते ।

ततो वेदानुसारेणेति । 'दिशः श्रोत्रम्' इति वेदानुसारेण ।

दिशः कार्यान्तराक्षेपादिति । कार्यान्तरेण पूर्वापरादिप्रत्ययेन दिगाक्षिप्यते सत्तया व्यवस्थाप्यते । आकाशस्य तु शब्दव्यतिरेकेणान्यत् कार्यान्तरं नास्तीति ।

इन्द्रियाणां भौतिकत्वस्य साधयिष्यमाणत्वाद् दिशश्चामूर्तत्वान्नेन्द्रियप्रकृतित्वम्, व्यापकत्वाविशेषे वा कालात्मनोरपि तथाभावप्रसङ्गः। तयोरन्यत्र व्यापारकत्वान्नेन्द्रियप्रकृतित्वमिति चेद्, दिग्द्रव्येऽपि तुल्यमेतत्, आगमस्य चान्यपरत्वम् यथा हि सूर्यं चक्षुर्गमयताद् दिशः श्रोत्रमिति पठ्यते एवमन्तरिक्षमसूनिति च पठ्यत एव, न चासवोऽन्तरिक्षप्रकृतिकाः पवनात्मकत्वात्। तस्मात् कृतं दिशा। आकाशदेश एव कर्णशष्कुल्यवच्छिन्नः शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धः श्रोत्रमित्युक्तम्।

ननु धर्माधर्मकृतश्रोत्रनियमवदभिव्यक्तिनियमोऽपि शब्दस्य तत्कृत एव भविष्यति, किमिति तदनियमो नित्यत्वपक्षे चोद्यते इति, नैतद्युक्तम्। चक्षुरादीन्द्रियाणां वैकल्यमदृष्टनिबन्धनमन्धकारप्रभृतिषु दृश्यते, न पुनः पदार्थस्थितिरदृष्टवशाद् विपरिवर्त्तते। व्यञ्जकधर्मातिक्रमे हि हिममपि शैत्यं स्वधर्ममतिक्रामेत्। व्यञ्जकेषु नियमो न दृष्ट इत्युक्तम्, दृष्टे च वर्णभेदे नियतोपलब्धिहेतौ सम्भवति सति किमयमदृष्टमस्तके भार आरोप्यते ? कथञ्चाभिव्यक्तिपक्षे तीव्रमन्दविभागः, तीव्रतादयो हि वर्णधर्मा वा स्युः, ध्वनिधर्मा वा। वर्णधर्मत्वे तीव्रगकारादन्यत्वं मन्दस्येत्यस्मन्मतानुप्रवेशः।

ध्वनिधर्मत्वपक्षे तु श्रोत्रेण ग्रहणं कथम्।
न हि वायुगतो वेगः श्रवणेनोपलभ्यते ॥

यत्तु व्यक्तिधर्माः कृशत्वस्थूलत्वादयो जातावुपलभ्यन्ते इति दर्शितं तत् काममुपपद्येतापि जातेर्व्यक्तेस्तद्धर्माणाञ्च समानेन्द्रियग्राह्यत्वात्।

इह तु स्पर्शनग्राह्यः पवनोऽतीन्द्रियोऽथ वा।
तद्धर्माः श्रावणे शब्दे गृह्यन्त इति विस्मयः ॥

आगमस्य चाऽन्यपरत्वम्। अनेन हि 'सूर्यं ते चक्षुर्गमयताद् दिशः श्रोत्रम्' इत्यादिना पशुसंज्ञपनकाले शमिता प्रोत्साह्यते 'ते तव पशोः सम्बन्धि चक्षुरयं शमिता सूर्यं गमयतात्' इति; न च भवता शमित्रा अस्य पशोरपकारः क्रियते प्रत्युतोपकार एव, एतच्छरीरावयवानां देवमूर्तिप्राप्तिहेतुत्वाद् भवतः। पशुनिहन्ता अध्वर्युकर्मकरः शमितेत्युच्यते।

यत्तु बुद्धिरेव तीव्रमन्दवतीति तदतीव सुभाषितम्, असति विषयभेदे बुद्धिभेदानुपपत्तेः ।

किञ्च नित्यपरोक्षा ते बुद्धिरेवञ्च नादवत् ।
तदग्रहान्न तीव्रादितद्धर्मग्रहसम्भवः ॥
अहो तीव्रादयस्तीव्रे प्रपाते पतिता अमी ।
यो गृह्यते न तद्धर्मा यद्धर्माः स न गृह्यते ॥
यश्चाभिभववृत्तान्तस्त्वन्मते मरुतामसौ ।
अनिले चाभिभूतेऽपि शब्दो न श्रूयते कथम् ॥
दीपेऽभिभूते रविणा न हि रूपं न गृह्यते ।
नियतव्यञ्जकत्वन्तु प्रतिक्षिप्तमदर्शनात् ॥
यत्तु शङ्खादिशब्दानां श्रोत्रग्राह्यत्वसिद्धये ।
शब्दत्वं तत्र तद्ग्राह्यमित्यवादि तदप्यसत् ॥
सत्यं वदत दृष्टं वा श्रुतं वा क्वचिदीदृशम् ।
आश्रयस्य परोक्षत्वे तत्सामान्योपलम्भनम् ॥
शब्दो न तेऽस्त्यवर्णात्मा न शब्दो वर्णसम्भवः ।
न नादवृत्ति शब्दत्वमिति तद्ग्रहणं कथम् ॥

अभिव्यङ्ग्यापेक्षया कार्यपक्ष एव शब्दस्य लघुतरः

यत् पुनरिदं सन्धारितं व्यङ्ग्यकार्यपक्षयोः क्व शब्दग्रहणे गुर्वी कल्पना भवति क्व वा लघ्वीति, तदपि मौलप्रमाणविचारसापेक्षत्वादप्रयोजकम् ।

यदि मौलप्रमाणेन साधिता नित्यशब्दता ।
त्वदुक्ता कल्पना साध्वी मदुक्ता तु विपर्यये ॥

कोष्ठ्येन च बहिः प्रसरता समीरणेन सर्वतः स्मिमितमारुतापसरणं क्रियते इत्येतदेव तावदलौकिकं कल्पितम्, 'अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यग्गमनम्; अणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि'' इति मरुतां तिर्यग्गमनस्वभावत्वादूर्ध्वमधश्च शब्दश्रवणं न भवेत् ।

यावन्न वेगिनान्येन प्रेरितो मातरिश्वना ।
तावन्नैसर्गिको वायुर्न तिर्यग्गतिमुज्झति ॥

अधोमुखप्रयुक्तोऽपि शब्द ऊर्ध्वं प्रतीयते ।
उत्तानवदनोक्तोऽपि नाधो न श्रूयते च सः ॥
कदम्बगोलकाकारशब्दारम्भो हि सम्भवेत् ।
न पुनर्दृश्यते लोके तादृशी मरुतां गतिः ॥
आकण्ठानद्धनीरन्ध्रचर्मावृतमुखोदितः ।
शब्दो यः श्रूयते तत्र न कोष्ठ्यानिलसर्पणम् ॥

कुड्यादिप्रतिबन्धेन वायोरप्रसरणं भवद्भिरपि कथितमेव, निर्विवरचर्मपुटोपरुद्धोऽप्यसौ न प्रसरेत् ।

अपि च सर्वतोनिरुद्धनवद्वारस्यापि जठरे गुरगुराशब्दो मन्दाग्नेः श्रूयते, अत्र कुतो व्यञ्जकानां कोष्ठ्यपवनानां निस्सृतिः ? रोमकूपनिःसृतानामपि सूक्ष्मतया स्तिमितबाह्यवाय्वपसरणसामर्थ्याभावः । किञ्च मनागपि बहिर्वायौ वाति न शब्दश्रवणं स्यादिति । दुर्बलोऽपि बाह्यः पवनः प्रबलादपि कोष्ठ्यवायोर्बलीयान् भवतीति कथं तेनापसार्येत ? अन्ये एव सूक्ष्मा वायवः शब्दावरणकारिणो, न पुनरेते परिदृश्यमानाः श्यामाः (?) श्यामाकलतालास्योपदेशिनो मातरिश्वान इति चेन्न, विशेषे प्रमाणाभावात् । यश्च सूक्ष्मा अपि वायवः तिरोदधति तं सुतरां बलीयांसोऽपि विवृणुयुरिति यत्किञ्चिदेतत् । तस्मात् सजातीयशब्दसन्तानारम्भपक्ष एव युक्त्यनुगुणः। तथा हि सजातीयगुणारम्भिणो गुणास्तावद् दृश्यन्त एव रूपादयः। अमूर्त्तापि च बुद्धिर्बुध्यन्तरमारभमाणा दृश्यते, प्रदेशान्तरेऽपि सैव कार्यमारभते, पथि गच्छतो देवदत्तादेरेकस्माद् आत्मप्रदेशात् प्रदेशान्तरे बुद्ध्युत्पाददर्शनात् । कार्यारम्भविरतिरपि भवति, अदृष्टाधीनसंसर्गाणां सहकारिणामनवस्थानात् ।

तीव्रेणापि शनैरेवमतीव्रारम्भसम्भवः ।
सीदत्सचिवसामर्थ्यसापेक्षक्षीणवृत्तिना ॥

प्रदेशान्तरे च सैव कार्यमारभत इति । गच्छतो धूमादिदर्शनादविनाभावसम्बन्धग्रहणद्वारेण यत्र धूमदर्शनं जातं ततो देशान्निःसृतस्य देशान्तरे वह्न्यादिबुद्धिदर्शनादिति ।

सीदत्सचिवेति । सचिवाः सहकारिणः, सीददर्शनवद् यत् सामर्थ्यं तत् सापेक्षतया मन्दा वृत्तिः स्वसामर्थ्यमिति यस्य ।

वीचीसन्तानदृष्टान्तः किञ्चित् साम्यादुदाहृतः ।
न तु वेगादिसामर्थ्यं शब्दानामस्त्यपामिव ॥

यत्तु कुड्यादिव्यवधाने किमिति विरमति शब्दसन्तानारम्भ इति, नैष दोषः, निरावरणस्य हि व्योम्नः शब्दारम्भे समवायिकारणत्वं तथादर्शनात् कल्प्यते नाकाशमात्रस्येति ।

शब्दे गुणत्वसिद्धिः

किमेतर्हि शब्दस्य गुणत्वे प्रमाणम्, परिशेषानुमानमिति ब्रूमः । प्रसक्तयोर्द्रव्य-कर्मणोः प्रतिषेधे सामान्यादावप्रसङ्गाच्च गुण एवावशिष्यते शब्दः । कथं पुनर्न द्रव्यं शब्दः एकद्रव्यत्वात् ? अद्रव्यं वा भवति द्रव्यम्, आकाशपरमाण्वादि, अनेकद्रव्यं वा द्व्यणुकादि कार्यद्रव्यम् । एकद्रव्यं तु शब्द एकाकाशाश्रितत्वात्, तस्मान्न द्रव्यम् । नापि कर्म शब्दः शब्दान्तरजनकत्वात् । कर्मणो हि समानजात्या-रम्भकत्वं नास्ति । सत्ताशब्दत्वादिसामान्यसम्बन्धाच्च सामान्यादित्रयप्रसङ्गोऽस्य नास्तीति पारिशेष्याद् गुण एव शब्दः ।

यदपि गुणत्वमसिद्धं शब्दस्येति, तत्र केचिद् आश्रितत्वाद् गुणत्वमाचक्षते । तदयुक्तम्

आश्रितत्वं गुणत्वे हि न प्रयोजकमिष्यते ।
षण्णामपि पदार्थानामाश्रितत्वस्य सम्भवात् ॥
दिक्कालपरमाण्वादिनित्यद्रव्यातिरेकिणः ।
आश्रिताःषडपीष्यन्ते पदार्थाः कणभोजिना ॥

अद्रव्यं वा भवति द्रव्यमिति । न विद्यते जनकं द्रव्यं यस्य । अनेकद्रव्यं जनकं यस्येति च विग्रहोनेकद्रव्यमित्यत्र । 2

आश्रिताः षडपीष्यन्ते पदार्थाः कणभोजिनेति । तदुक्तम्—"षण्णामाश्रितत्व-मन्यत्र नित्यद्रव्येभ्यः" इति ।

---

*. टीकाकाराभृतग्रन्थप्रतीकक्रममनुसृत्यैवास्माभिरत्र ग्रन्थक्रमो निर्दिष्ट इति मन्तव्यम् ।

न च व्योमाश्रितत्वमपि शब्दस्य प्रत्यक्षम्, अप्रत्यक्षे नभसि तदाश्रितत्वस्याप्यप्रत्यक्षत्वात् ।

कथमाधारपारोक्ष्ये शब्दप्रत्यक्षतेति चेत् ।
यथैवात्मपरोक्षत्वे बुद्ध्यादेरुपलम्भनम् ॥

एतदेवासिद्धमिति चेद् अलं वादान्तरगमनेन, उपरिष्टान्निर्णेष्यमाणत्वात् ।

ननु गुणत्वसिद्धौ सत्यामाकाशाश्रितत्वं शब्दस्य भविष्यति, गुणस्य द्रव्यानाश्रितस्यादर्शनात्, पृथिव्यादीनाञ्च शब्दाश्रयत्वानुपपत्तेः । ततश्च गुणत्वे सत्येकद्रव्यत्वम्, एकद्रव्यत्वे सति गुणत्वमितीतरेतराश्रयत्वम् । तथा च समानजातीयारम्भकत्वमपि गुणत्वसिद्धिमूलमेव, गुणत्वे सति शब्दस्याकाशाश्रितत्वात् तदात्मकेन श्रोत्रेण ग्रहणम्, तच्च देशान्तरगतसंयोगविभागप्रभवस्य शब्दस्य सन्तानमन्तरेण श्रोत्रदेशप्राप्त्यभावान्न सिद्ध्यतीति गुणत्वसिद्धिमूला सन्तानकल्पना । सन्तानकल्पनायाञ्च समानजात्यारम्भकत्वात् कर्मव्यवच्छेदे सति गुणत्वसिद्धिरितीतरेतराश्रयत्वमेव ।

उच्यते । नोभयत्राप्येष दोषः । श्रोत्रग्राह्यत्वादेव शब्दस्याकाशाश्रितत्वं कल्प्यते, समानजातीयारम्भकत्वञ्च गुणत्वात् । आकाशैकदेशो हि श्रोत्रमिति प्रसाधितमेतत् । प्राप्यकारित्वञ्चेन्द्रियाणां वक्ष्यते । न चाकाशानाश्रितत्वे शब्दस्य श्रोत्रेण प्राप्तिर्भवति, न चाप्राप्तस्य ग्रहणमिति तदाश्रितत्वं कल्प्यते । एवं समानजातीयारम्भकत्वमपि तत एव श्रावणत्वात् दूरवर्तिनः शब्दस्य श्रवणे सति कल्प्यते न तु गुणत्वादिति नेतरेतराश्रयत्वम् । कार्यत्वादाकाशाश्रितत्वं कल्प्यते इत्येके ।

ननु कार्यत्वादप्याकाशाश्रितत्वकल्पनायां तदवस्थमेवेतरेतराश्रयत्वम् । कार्यत्वादाकाशाश्रितत्वम्, आकाशाश्रितत्वे सति नियतग्रहणमूलं पूर्वरीत्या कार्यत्वमिति । नैतदेवम् । भेदविनाशप्रतिभासाभ्यामेव कार्यत्वसिद्धेः । किमर्थस्तर्हि

नियतग्रहणमूलमिति । नियतदेशं यदेतच्छब्दस्य ग्रहणमस्य कार्यत्वमेव मूलं हेतुः, नित्यत्वपक्षे हि मद्रेष्वभिव्यक्तो गोशब्दः कश्मीरेषु श्रूयेतेत्यादिना नियतदेशतया ग्रहणाभावः प्रतिपादितः ।

नियतग्रहणसमर्थनाय अयमियान्प्रयासः क्रियते ? नियतग्रहणमपि कार्यपक्षानुगुणमिति दर्शयितुम् । न पुनरेषैव कार्यत्वे युक्तिरित्यलं सूक्ष्मेक्षिकया ।

अपर आह परिस्पन्दविलक्षणस्य प्रत्यक्षत्वादकर्मत्वं शब्दस्य साध्यते, न समानजातीयारम्भकत्वादितीतरेतराश्रयस्पर्शोऽपि नास्तीति । तस्मात् सर्वथा परिशेषानुमानाच्छब्दस्य गुणत्वसिद्धिः ।

कथं तर्ह्यस्य महत्त्वादियोगो निर्गुणा गुणा इति काणादाः, अस्ति हि प्रतीतिर्महान् शब्द इति ? समानजातीयगुणाभिप्रायं तत् कणादवचनमिति न दोषः, तस्मादाकाशगुणः शब्दः । अपि च

यथात्मगुणता ह्रीच्छाद्वेषादेरुपपत्स्यते ।
शब्दो नयेन तेनैव भविष्यति नभोगुणः ॥

ये तु समानजातीयशब्दारम्भकत्वनिषेधहेतवः शब्दत्वादित्यादयः परैरुपन्यस्तास्तेषामप्रयोजकत्वान्न साधनत्वम् ।

इत्थं सन्तानवृत्त्या च शब्दग्रहणसम्भवे ।
कल्पनाल्पतरास्माकं न शब्दव्यक्तिवादिनाम् ॥
शाक्यकापिलनिर्ग्रन्थग्रथितप्रक्रियां प्रति ।
यत्तु दूषणमाख्यातमस्माकं प्रियमेव तत् ॥

तस्मात् कार्यपक्षे नियतग्रहणोपपत्तेः, अभिव्यक्तिपक्षे च तदभावात् कार्य एव शब्द इति स्थितम् ।

शब्दानित्यतायां सूत्रकारसम्मतिः

तदिदमुक्तं सूत्रकृता 'आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्चानित्यः शब्द' इति। आदिमत्त्वादिति । संयोगविभागादीनां शब्दे कारकत्वं न व्यञ्जकत्वमिति दर्शितम्, अतश्च न प्रयत्नान्तरीयकत्वमनैकान्तिकम् ऐन्द्रिय-

---

न समानजातीयारम्भकत्वादिति । समानजातीयारम्भकत्वेनाकर्मत्वसाधने हीतरेतराश्रयत्वं स्यादिति भावः ।

आदिमत्त्वादिति । आदिः अनुत्पन्नस्योत्पादः । न प्रयत्नानन्तरीयकत्वम् अनै-

कत्वादिति । कार्यपक्ष एव शब्दस्य नियतं ग्रहणमित्युक्तम्, प्रतिपुरुषं प्रत्युच्चारणञ्च शब्दभेदस्यैन्द्रियकत्वादिति वा हेत्वर्थः। तेन प्रत्यभिज्ञादुराशा श्रोत्रियाणामपाकृता भवति । कृतकवदुपचारादिति । तीव्रमन्दविभागाभिभवादिव्यवहारदर्शनात् सुखदुःखादिवदनित्यः शब्द इति दर्शितम् । तथा "प्रागुच्चारणादनुपलब्धेः, आवरणानुपलब्धेश्च" इत्यनेन सूत्रेण शब्दाभावकृतमेव तदग्रहणमिति । न हि स्तिमिता वायवः शब्दमावरीतुमर्हन्ति, मूर्त्तं हि मूर्त्तेन व्यवधीयते नामूर्तमाकाशादिवत् । न च प्रकृत्यैवाकाशादिवदतीन्द्रियः शब्दः, तस्मात् क्षणिकप्रतीतेस्तत्कालमेव शब्दस्यावस्थानमित्यस्थानहेतोरपि नान्यथासिद्धत्वम् । वार्त्तिककृता शब्दानित्यत्वे साधनमभिहितम्, अनित्यः शब्दो जातिमत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाद् घटवदिति ।

यस्त्वत्र जातीनामपि जातिमत्त्वादनैकान्तिकमुद्भावितम् 'एकार्थसमवायेन जातिर्जातिमती यतः' इति तदत्यन्तमनुपपन्नम्, निस्सामान्यानि सामान्यादीनीति सुप्रसिद्धत्वात्, न हि घटे घटत्वपार्थिवत्वे स्त इति घटत्वसामान्येऽपि पार्थिवत्वसामान्यमस्तीति शक्यते वक्तुम् । अतो निरवद्य एवायं हेतुः । तेन यदुच्यते

जातिमत्त्वैन्द्रियत्वादिवस्तुसन्मात्रबन्धनम् ।
शब्दानित्यत्वसिद्ध्यर्थं, को वदेद् यो न तार्किकः ।। इति

तदविदिततार्किकपरिस्पन्दस्य व्याहृतम् । इह त्वप्रयोजका हेतवो भवन्ति ।

ह्यस्तनोच्चारितस्तस्माद् गोशब्दोऽद्यापि वर्त्तते ।
गोशब्दज्ञानगम्यत्वाद् यथोक्तोऽद्यैष गौरिति ।।

कान्तिकमिति । अभिव्यङ्ग्येऽपि भावादिति । यदुक्तम् **आवरणानुपलब्धेश्चेति** सूत्रावयवम् **'न हि स्तिमिता वायवः'** इत्यनेन व्याख्यातुमाह । **वार्तिककृतापीति** उद्योतकरेण ।

एकार्थसमवायेन इत्यस्योत्तरमर्धम् 'आधारत्वमथोच्येत नामूर्ताधीयते ह्यसौ' इति । एकस्मिन् गवादावर्थे समवेता या सत्ता गोत्वेन सह, तया जातिमत्ता गोत्वेन सह, तया जातिमत्ता गोत्वादीनाम् ।

वस्तुसन्मात्रबन्धनमिति । जातिमत्त्वादिना वस्तुनः सन्मात्रं साधयितुं शक्यते, न पुनरनित्यत्वादिर्विशेष इत्यर्थः ।

विज्ञानग्राह्यता नाम वस्तुस्वाभाव्यबन्धना ।
नित्यत्वे कृतकत्वे वा न खल्वेषा प्रयोजिका ॥

अप्रयोजकता चैवम्प्रायाणां चैवमुच्यते ।
स्वयश्चैते प्रयुज्यन्ते हेतुत्वेनेति किन्त्विदम् ॥

एवं नित्यत्वे दुर्बलो युक्तिमार्गः
तस्मान् मन्तव्यः कार्य एवेति शब्दः ।

वाचोयुक्तित्वे वैदिको योऽनुवादः
न्याये प्रयुक्ते किंफलस्तत्प्रयोगः ॥

अनित्यस्यापि शब्दस्य न क्षणिकत्वम्

क्षणभङ्गिभावस्याभावादपि शब्दस्य क्षणिकतां न वक्तुमलम् । स्थूलविनाशभावादिति यदुक्तं तदपि नूत्तम् ।

सूक्ष्मविनाशापेक्षी नाशः स्थूलस्थिरस्य कुम्भादेः ।
प्रकृतितरलस्य नाशः शब्दस्य स एव हि स्थूलः ॥

सत्त्वाद् यदि क्षणिकतां कथयेत् पुरो वा
शब्दस्तदैष कथमक्षणिकोऽभिधेयः ।
गत्यन्तराद् यदि तदेव हि तर्हि चिन्त्यं
किं प्रौढवादिबहुमानपरिग्रहेण ॥

न्याये प्रत्युक्ते किंफलस्तत्प्रयोग 'न्यायोक्ते लिङ्गदर्शनम्' इति भवद्भिरेव व्यवस्थापितत्वात् । न च शब्दनित्यत्वसिद्धौ न्यायोऽस्ति अतो निष्फलो 'वाचाविरूपनित्यया, इत्यादिलिङ्गदर्शनोपन्यासः ।

सत्त्वाद् यदीति । न हि बौद्धानां स्थूलविनाशदर्शनमेव क्षणिकत्वे हेतुरपि तु सत्त्वाद्यपीत्याह । **गत्यन्तरा**दनित्यत्वेऽर्थप्रत्यायकत्वानुपपत्तिलक्षणात् । शक्त्यन्तरादिति वा पाठे शक्त्यन्तरादर्थप्रत्यायनसामर्थ्यलक्षणात् । **किं प्रौढवादिबहुमानपरिग्रहेण** ।

अलमतिविततोक्त्या त्यज्यतां नित्यवादः
कृतक इति नयज्ञैर्गृह्यतामेष शब्दः ।
सति च कृतकभावे तस्य कर्ता पुराणः
कविरविरलशक्तिर्युक्त एवेन्दुमौलिः ॥

इति श्रीजयन्तभट्टविरचितायां न्यायमञ्जर्यां तृतीयमाह्निकम् ।

मत्पक्षो युक्तो यावद् भवत्पक्षः सर्वथैव नोपपद्यत इति वादेन यः प्रौढवाद्यहमिति बहुमानस्तदाश्रयणेन ।

कविः क्रान्तदर्शनः ॥

भट्टश्रीशङ्करात्मजचक्रधरकृते न्यायमञ्जरीग्रन्थिभङ्गे तृतीयमाह्निकम् ।

चतुर्थमाह्निकम्

शब्दानामनित्यत्वात् वेदाः कर्तृपूर्वकाः

एवं कृतकत्वे वर्णानां साधिते सति वर्णात्मनः पदात् प्रभृति सर्वत्र पुरुषस्य स्वातन्त्र्यं सिद्धं भवति ।

पदनित्यत्वपक्षेऽपि वाक्ये तद् रचनात्मके ।
कर्तृत्वसम्भवात् पुंसो वेदः कथमकृत्रिमः ॥

तथा च वैदिक्यो रचनाः कर्तृपूर्विकाः रचनात्वाल्लौकिकरचनावत् । एष च पञ्चलक्षणो हेतुः प्रयोजकश्चेति गमक एव न हेत्वाभासः । न तावदयमसिद्धो हेतुः 'शन्नो देवीरभीष्टये' इत्यादिषु वेदवाक्यसन्दर्भेषु पदरचनायाः स्वरक्रमादिविशेषवत्याः प्रत्यक्षत्वेन पक्षे हेतोः वर्तमानत्वात् । नापि विरुद्धः कर्तृत्ववति सपक्षे कुमारसम्भवादौ रचनात्वस्य विद्यमानत्वात् । नाप्यनैकान्तिकः कर्तृरहितेषु गगनादिषु गगनकुसुमादिषु वा रचनाया अदृष्टत्वात् । नापि कालात्ययापदिष्टः प्रत्यक्षेणागमेन वा वेदे वक्त्रभावनिश्चयानुत्पादात् । नापि सत्प्रतिपक्षः प्रकरणचिन्ताहेतोः स्थाणुपुरुषविशेषानुपलब्धेरिव हेतुत्वेनानभिधानात् । नापि परमाण्वनित्यतायामिव मूर्त्तत्वम् प्रयोजकमिदं साधनम्, रचनाविशेषाणां कर्त्तृव्यापारसाध्यत्वावधारणात् । यथा धूमस्य ज्वलनाधीन आत्मलाभो ज्ञप्तिस्तु धूमादग्नेस्तथेह कर्त्रधीना रचनानामभिनिर्वृत्तिः, प्रतीतिस्तु ताभ्यः कर्त्तुरिति । तस्मात् प्रयोजक एवायं हेतुः ।

वेदानामपौरुषेयत्वे मीमांसकानां पक्षः

ननु सत्प्रतिपक्षत्वे विवदन्ते च, तथा च मीमांसकैः प्रतिहेतुरिह गीयते ।

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा ॥ इति ।

जटाजूटभरस्यन्दद्गङ्गाम्बुघनदुर्दिने ।
उल्लसच्चन्द्रकं वन्दे नीलकण्ठस्य ताण्डवम् ॥

॥ ॐ नमः शिवाय ॥ **प्रकरणचिन्ताहेतोरिति** । यत एव प्रकरणे पक्षे चिन्ता

नैतद्युक्तम्, एवम्प्रायाणां प्रयोगाणामप्रयोजकत्वात् । न हि तच्छब्दवाच्यत्वकृतमनादित्वमुपपद्यते । अनैकान्तिकश्चायं हेतुर्भारतेऽप्येवमभिधातुं शक्यत्वात्, भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकं भारताध्ययनवाच्यत्वाद्, इदानीन्तनभारताध्ययनवदिति,

ननु भारते कर्तृस्मृतिरविगीता विद्यते । यद्येवं वेदेऽपि प्रजापतिः कर्त्ता स्मर्यत एव । अथ वैदिकमन्त्रार्थवादमूलेयं प्रजापतिस्मृतिः, प्रजापतिना चत्वारो वेदा असृज्यन्त चत्वारो वर्णाश्चत्वार आश्रमा इति तत्र पाठादिति ।

उच्यते । हन्त तर्हि भारतेऽपि तत्र वचनमूलैव पाराशर्यस्मृतिरिति शक्यते वक्तुम् ।

यथा प्रजापतिर्वेदे तत्र तत्र प्रशस्यते ।
भारतेऽपि तथा व्यासस्तत्र तत्र प्रशस्यते ॥
अथ प्रणेता वेदस्य न दृष्टः केनचित् क्वचित् ।
द्वैपायनोऽपि किं दृष्टो भवत् पितृपितामहैः ॥
सर्वेषामविगीता चेत् स्मृतिः सत्यवतीसुते ।
प्रजापतिरपि स्रष्टा लोके सर्वत्र गीयते ॥

आः किमिति सदसद्विवेकविकलशाकटिकादिप्रवादविप्रलब्ध एवं भ्राम्यसि? किल स्वल्पमपि कर्म पित्रा मात्रा वोपदिश्यमानं तद्वचनप्रत्ययादनुष्ठीयते ? तदयमियाननेकक्लेशवित्तव्ययादिनिर्वर्त्यो वैदिकः कर्मकलाप एवमेव तदुपदेशिनमाप्तमस्मृत्वैव क्रियत इति महान् प्रमादः । एवञ्चोच्चावचकविरचितजरत् पुस्तकलिखितकाव्यवद् अस्मर्यमाणकर्तृकेण वेदेन व्यवहारानुपपत्तेरवश्यस्मरणीयस्तत्र कर्त्ता स्यात् । न च कदाचन वेदेषु व्यवहारविच्छेदः सम्भाव्यते, येन तत्कृतं जरत् कूपारामादिष्विव तेषु कर्त्रस्मरणं स्यात् । तस्मादवश्यं स्मर्येत कर्त्ता, न च संस्मर्यते स्मर्त्तुं शक्यते वा । स्मृत्तिर्हि भवन्ती तदनुभवमूला भवति न च मूलेऽपि

संशयः । अविगीता अविप्रतिपत्त्या स्थिता ।

ननु सृष्टिकाले कर्तृदर्शनं स्मृतेर्मूलं भविष्यतीत्याह 'न च मूल' इति प्रथमत इत्यर्थः ।

कर्त्रनुभवः कस्यचिज्जातः सर्गादेरभावात्, भावे वा कर्त्तुरशरीरत्वेन दर्शनयोग्यत्वाभावात् ।

सशरीरत्वपक्षे वा पुरुषः कोऽपि तादृशः ।
तदानीं दृश्यमानोऽपि वेदं कुर्वन्न दृश्यते ॥

अधीयमाने दृष्टेऽस्मिंस्तदा संशेरते जनाः ।
किमेष रचयेद् वेदमुत वान्यकृतं पठेत् ॥

यत्कृतं वा पठेदेष तस्मिन्नपि हि संशयः ।
भङ्ग्या चेदमनादित्वमुन्मीलदिव दृश्यते ॥

असत्यादिप्रमाणे च कर्त्तृतानुभवं प्रति ।
स्मृतिः प्रबन्धसिद्धापि स्पृशत्यन्धपरम्पराम् ॥

योगिभिर्ग्रहणं कर्तुरित्येतदपि दुर्वचम् ।
कर्त्तृता हृदि दुर्बोधा कथं गृह्येत तैरपि ॥

योगिभिः सा गृहीतेति वयमेतन्न मन्महे ।
अमन्वानाश्च गच्छेम विस्रब्धास्तत्पथं कथम् ॥

वेदात् कर्त्रवबोधे तु स्पष्टमन्योन्यसंश्रयम् ।
ततो वेदप्रमाणत्वं वेदात् कर्तुश्च निश्चयः ॥

तस्मात्पौर्वापर्यपर्यालोचनारहितयथाश्रुतमन्त्रार्थवादमूला भ्रान्तिरेषा न पुनः परमार्थतः कश्चित् कश्चिद्वेदस्य कर्त्तारं स्मरति । तस्मादकृतका वेदाः, अवश्यस्मरणीयस्यापि कर्त्तुरस्मरणात् । न च व्यधिकरणो हेतुरस्मर्यमाणकर्तृकत्वादित्येवं साधनप्रयोगात् ।

तस्मात् पौर्वापर्यपर्यालोचनेति । विधायकवाक्यानङ्गत्वेन केवलानां मन्त्रार्थवादानां विश्वतश्चक्षुरित्यादीनां अदर्शनाद् 'रौद्रं चरुं निर्वपेत्' इत्यादिविधिवाक्यैकवाक्यतया व्यवस्थितानपि तान् पृथग् गृहीत्वा भ्राम्यन्ति । यथा 'घृतघटीमानय, यावद् आपणाद् घृतं गृह्येत' इत्येतद्वाक्यैकवाक्यतया 'घृतघटीमानय' इति स्थितं रिक्तघृतघटीसंप्रत्यायकं पृथक् क्रियमाणं पूर्णघृतघटीभ्रमं जनयति ।

वेदपौरुषेयत्वसिद्धौ युक्तिः

अत्रोच्यते, अपि तद्गुर्वध्ययनपूर्वकत्वं साधनमुपेक्षितं याज्ञिकैः, अयमभिनवो हेतुरस्मर्यमाणकर्तृकत्वादिति प्रयुक्तः। तस्मादस्तु नाम। नैनान् हेत्वन्तरोपन्यासिनो निगृह्णीमः। अक्षुद्रकथेयं प्रस्तुता। अयमपि तु अस्मर्यमाणकर्तृकत्वादिति हेतुः किं स्वतन्त्र एवाकर्तृकत्वसिद्धये प्रयोज्यते उतास्मदुपन्यस्तरचनात्वप्रतिघातायेति ? तत्र न तावदनुमानमनुमानान्तरपरिपन्थि कथयितुमुचितम्, प्रत्यक्षागमवदनुमानस्याप्यनुमानबाधकत्वानुपपत्तेः। नहि तुल्यबलयोरनुमानयोर्बाध्यबाधकभावस्तुल्यबलत्वादेव। अतुल्यबलत्वे तु यत्कृतमन्यतरस्य दौर्बल्यं तत एव तदप्रामाण्यसिद्धेः किमनुमानबाधया? तद्विडम्बनार्थं तदभिधानमिति चेत्, तदप्ययुक्तम्। एकत्र धर्मिणि युगपदितरेतरविरोधिधर्मद्वयप्रयोजकहेतुद्वयोपनिपातायोगात्। न हि द्व्यात्मकानि वस्तूनि भवितुमर्हन्ति इत्यवश्यमन्यतरस्तत्राप्रयोजकहेतुः, अप्रयोजकत्वादेव तस्यागमकत्वे किं विडम्बनार्थेन हेत्वन्तरेण प्रयुक्तेन। विरुद्धाव्यभिचार्यपि नाम न कश्चिद्धेत्वाभास इति वक्ष्यामः, प्रकरणसमोऽपि न यः कश्चित् सत्प्रतिपक्षो हेतुरिष्यतेऽपि तु संशयबीजभूतोऽन्यतरविशेषानुपलम्भे भ्रान्त्या हेतुत्वेन प्रयुज्यमानस्तथोच्यते इति दर्शयिष्यामः। तस्मात् परोदीरितं हेतुं निराचिकीर्षता वादिना तद्गतपक्षवृत्तितादिधर्मपरीक्षणे मनः खेदनीयम्। न हि प्रतिहेतुत्वान्वेषिणा वृथाटाट्या कर्त्तव्या।

ननु कतरदनयोः साधनयोरप्रयोजकं रचनात्वादस्मर्यमाणकर्तृकत्वादिति च। उच्यते। रचनात्वमेव प्रयोजकं न हि पुरुषमन्तरेण क्वचिदक्षरविन्यासो दृष्टः।

भो भगवन्तः सभ्याः क्वेदं दृष्टं क्व वा श्रुतं लोके।
यद् वाक्येषु पदानां रचना नैसर्गिकी भवति॥
यदि स्वाभाविकी वेदे पदानां रचना भवेत्।
पटे हि हन्त तन्तूनां कथं नैसर्गिकी न सा॥

'शन्नो देवीरभिष्टये', 'नारायणं नमस्कृत्य', 'अस्त्युत्तरस्यां दिशि देवतात्मा', इति तुल्ये रचनात्वे क्वचित् कर्तृपूर्वकत्वमपरत्र तद्विपर्यय इति महान् व्यामोहः। एवं धूमोऽपि कश्चिदग्निमान् कश्चिदनग्निक इत्यपि स्यात्। किमिदानीं कुमारसम्भवतुल्योऽसौ वेदः सम्पन्नः? अहो सर्वास्तिकधुर्येण वेदप्रामाण्यं साधितं नैयायिकेन।

अलमुपहासेन, रचनामात्रमेव तुल्यं वेदस्य कुमारसम्भवेन नान्यत्। न चेयतोपहसितुं युक्तम्। किमस्य शब्दत्वं सामान्यं शङ्खशब्दसाधारणं नास्ति, सत्तासामान्यं वा सर्वसाधारणमिति।

ननु याः कालिदासादिरचनाः कर्तृपूर्विकाः।
ताभ्यो विलक्षणैवेयं रचना भाति वैदिकी॥
इहाध्ययनवेलायां रूपादेव प्रतीयते।
अकृत्रिमत्वं वेदस्य भेदैस्तैस्तैरनन्यगैः॥
नामाख्यातोपसर्गादिप्रयोगगतयो नवाः।
स्तुतिनिन्दापुराकल्पपरकृत्यादिनीतयः॥
शाखान्तरोक्तसापेक्षविक्षिप्तार्थोपवर्णनम्।
इत्यादयो न दृश्यन्ते लौकिके सन्निबन्धने॥
तेनाध्येतृगणाः सर्वे रूपाद् वेदमकृत्रिमम्।
मन्यन्ते एव लोके तु पीतं मीमांसकैर्यशः॥

नामाख्यातेति। नाम्नामभिनवत्वं सूचयति कृतणत्वस्याग्निशब्दस्य क्वचित् प्रयोगः। आख्यातस्याभिनवत्वं 'होता यजतु' इत्यत्रार्थे 'होता यक्षत्' इति प्रयोगे। उपसर्गस्य 'सं ते वायुर्वातेन गच्छताम्' इत्यादौ व्यवहितस्य प्रयोगः। **स्तुतिः** प्रशंसा यथा—'सर्वजिता वै देवाः समयजन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयति' इत्यादि। अनिष्टफलवादो **निन्दा**। 'स एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजते स गर्ते पतत्ययमेवैतज्जीर्यते वा प्रमीयते वा' इत्यादि। अन्यकर्तृकस्य व्याहतस्य विधेर्वादः **परकृतिः**। "हुत्वा वपामेवाग्रेऽभिघारयन्ति अथ पृषदाज्यं तदु ह कठचरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिघारयन्ति प्राणा वै पृषदाज्यमिति वदन्तः" इत्यादि। ऐतिह्यसमाचरितो विधिः **पुराकल्पः**। 'तस्माद्वा एतेन पुरा ब्राह्मणा बहिष्पवमानं सामस्तोममस्तौषन् योने यज्ञं प्रतनवामहे" इत्यादि न्यायभाष्योक्तानि स्तुत्याद्युदाहरणानि। विशिष्टनामधेयकर्तृसम्बन्धनिर्वर्त्यकर्मप्रतिपादकसामान्यकर्तृमात्रनिर्वर्त्यकर्मप्रतिपादकयोरर्थद्वारेण वाक्ययोस्तु मीमांसकाः परकृतिपुराकल्पतामाहुः। आदिग्रहणमनुवादादिपरिग्रहार्थम्। **शाखान्तरोक्तसापेक्षेति**। शाखान्तरोक्ति-

वेदा न पठिता यैस्तु त्वादृशैः कुण्ठबुद्धिभिः ।
कार्यत्वं ब्रुवते तेऽस्य रचनासाम्यमोहिताः ॥

उच्यते । मीमांसका यशः पिबन्तु पयो वा पिबन्तु बुद्धिजाड्यापनयनाय ब्राह्मीघृतं वा पिबन्तु वेदस्तु पुरुषप्रणीत एव नात्र भ्रान्तिः ।

यथा घटादिसंस्थानाद् भिन्नमप्यचलादिषु ।
संस्थानं कर्तृमत् सिद्धं वेदेऽपि रचना तथा ॥

यच्चात्र किञ्चिद् वक्तव्यं तत्पूर्वमेव सविस्तरमुक्तम् । अपि च यद् विलक्षणेयं रचना तद्विलक्षण एव कर्तानुमीयतां न पुनस्तदपलापो युक्त इत्यप्युक्तम् । याश्चैता निर्विवादसिद्धकर्तृकाः कालिदासादिरचनाः चमत्कारिण्य स्तासामन्योन्यविसदृशं रूपमुपलभ्यत एव ।

अमृतेनेव संसिक्ताश्चन्दनेनेव चर्चिताः ।
चन्द्रांशुभिरिवोद्घृष्टाः कालिदासस्य सूक्तयः ॥

प्रकटरसानुगुणविकटाक्षररचनाचमत्कारितसकलकविकुला बाणस्य वाचः, प्रतिकाव्यञ्च तानि तानि वैचित्र्याणि दृश्यन्ते एव । नामाख्यातादिवैचित्र्यमात्रेण कर्त्रभावो वेदे रूपादेव प्रतीयते इति नूतनेयं वाचोयुक्तिः । अपि च यदि रूपे समाश्वसिति भवतो मनः तदादिमद् अर्थाभिधानमपि वेदस्य रूपं कथं न परीक्षसे ? 'बबरः प्रावाहणिरकामयत' 'कुसुरविन्दः औद्दालकिः अकामयत, 'पुरूरवो मा मृथा'

सापेक्षत्वेन विक्षिप्तो योऽर्थः । तथाहि सामवेदे 'एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमः' इति ज्योतिष्टोमस्य प्राथम्यविधायकं वाक्यम् । न च तत्र ज्योतिष्टोमो विहितोऽस्ति, अतः शाखान्तरविहितसापेक्षता ।

बबरः प्रावाहणिरकामयतेति पशुमान् स्यामिति । स एतामिष्टिमपश्यत् स तां निरवपत् स पशून् प्रत्यपद्यतेत्यादि वाक्यशेषो "बबरः प्रावाहणिरकामयत" इत्यस्य। शाखान्तरप्रसिद्ध इत्याहुः। प्रवाहणस्य राज्ञोऽपत्यं प्रावाहणिः। उद्दालकस्यर्षेरपत्यमौद्दालकिः । **पुरूरवो मा मृथा** इति ।

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता । इति

इति । प्रतिसर्गं पुनस्तेषां भावादनादित्वमिति चेत्, प्रतिसर्गं तर्हि वेदान्यत्वमपि भविष्यति । यथोक्तम् "प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते" इति

रूपादकृत्रिमत्वञ्च कल्पनाकल्पितैव सा ।
आदिमद् वस्तुबुद्धिस्तु वाचकैरक्षरैः स्फुटैः ॥

तेषामन्यथा व्याख्यानन्तु व्याख्यानमेव । पठन्त एव त्वध्येतारस्तत आदिमतोऽर्थान् बहूनवगच्छन्तीति नानादिर्वेदः । तस्मान्न रचनात्वमप्रयोजकम् ।

कर्त्रस्मरणमेव त्वप्रयोजकमसिद्धत्वात् । सिद्धमपि वा वेदे कर्त्रस्मरणमन्यथासिद्धम्, वेदकरणकालस्यातिदवीयस्त्वात् । तत्प्रणेतुश्च पुंसः सकलपुरुषविलक्षणत्वान्नियतशरीरपरिग्रहाभावाद् इदन्तयास्य पाणिनिपिङ्गलादिवत् स्मरणं नास्ति, न तु स नास्त्येव, अनुमानागमाभ्यां तदवगमात् । कथं पक्षधर्मतया ग्रहीतुं शक्यते कर्त्रस्मरणम्, तद्ध्येतत्पुरुषसम्बन्धि व्यभिचरति सर्वपुरुषसम्बन्धि तु दुरवगमम्, सर्वे पुमांसः कर्त्तारं वेदस्य न स्मरन्तीति कथं जानाति भवान् ? न हि तव सकललोकहृदयानि प्रत्यक्षाणि, सर्वज्ञत्वप्रसङ्गात् । न च यत् त्वं न जानासि तदन्योऽपि न जानातीति युक्तम्, अतिप्रसङ्गात् । तस्मादस्मर्यमाणकर्तृकत्वं दुर्बोधमेव । अपि च

उर्वशीवियोगे कृतमरणाध्यवसायं विहितप्रपातपातस्थं निश्चितहिंस्रप्राणिशरीरप्रदानं राजानं पुरूरवसं मुनिर्निषेधति हे पुरूरवः मा मृथाः प्राणान् मा त्याक्षीः, मा च प्रपप्त प्रपातपातं मा च कृथाः, मा च पतितं सन्तं त्वां वृका हिंस्राः प्राणिनः अशिवा भीषणाः क्षन् वधिषुः, यतः स्त्रीकृते भवतैतत् सर्वं क्रियते न च तासां स्त्रीणां सम्बन्धीनि सख्यानि प्रीतयः सन्ति । न स्थिरस्नेहा योषित इत्यर्थः । सालावृकाणां मर्कटानां हृदयं चित्तमिव चला ह्येता इति । प्रपप्त इति सिबू-अङि 'पतः पुम्" इति पुमागमे च रूपम्, उ इत्यनर्थको निपातः; क्षन्निति हन्तेर्घस्लादेशे लुङिच्छान्दसं रूपम् । एवं चादिमतः पूर्वमनुष्ठितस्यार्थस्याभिधानाद् वेदस्याप्यादिमत्त्वम्, असत्यर्थे तदभिधानासम्भवात्, एवंविधार्थपश्चाद्भावित्वं वेदस्येति ।

तेषामन्यथा व्याख्यानं त्विति । तथा च प्रावाहणिरित्यस्य व्याख्यान्तरं कृतम् । प्रवहतीति प्रावाहणिर्वायुरुच्यते स च नित्य एवेति । तदुक्तम् "परं तु श्रुतिसामान्यमात्रम्" इति ।

कर्तुरस्मरणे सति सुतरां वेदार्थानुष्ठानं प्रेक्षावतां शिथिलीभवेत्, न ह्यकर्तृक एवोपदेशः सम्भवति, सम्भवन्नपि वा प्रामाण्यनिश्चयनिमित्ताभावात् कथं विस्रम्भभूमिरसौ भवेत् ? बाधकाभावमात्राच्च न प्रामाण्यनिश्चयो वचसामित्युक्तं प्राक् । तस्माद् आप्तप्रत्ययादेव निर्विचिकित्सं वेदार्थानुष्ठानं सप्रतिष्ठानां सम्भवति नान्यथेति । तस्मान्न कर्त्रस्मरणस्य रचनात्वप्रतिपक्षतयोपन्यास उपपन्नः ।

नापि स्वतन्त्रमेवेदं कर्त्रभावसाधनं भवितुमर्हति, अनुपलब्धिरियमनेन प्रकारेण किलोच्यते सानुपपन्ना, मानेन कर्तुरुपलम्भात्, अनुमानेनापि यदुपलब्धं तदुपलब्धमेव भवति । ननु कर्त्रभावस्मरणबाधितत्वादनुमानमिदमयुक्तम् । इतरेतराश्रयप्रसङ्गात् । अनुपलब्धौ सिद्धायामनुमाननिरासः, अनुमाननिरासे च सत्यनुपलब्धिसिद्धिः । अनुमानप्रामाण्येऽपि समानो दोष इति चेद्, न, तस्य प्रतिबन्धमहिम्ना प्रामाण्यसिद्धेः । न हि तस्यानुपलब्धिसिद्धिनिरासापेक्षं प्रामाण्यम् ।

तत्रैतत् स्याद् । न वयं कर्त्रभावे प्रामाण्यं ब्रूमः । सकललोकपदार्थव्यवहारिणो हि मीमांसकाः । परन्तु वेदस्य पौरुषेयतां ब्रुवाणं प्रमाणं पृच्छामः । तच्चास्य नास्तीति बलादनुपलब्ध्या तदभावनिश्चयो व्यवतिष्ठते इति । स्यादेतदेवं यद्यनुमानं न स्यात्, उक्तञ्च रचनात्वादित्यनुमानम् ।

यत् पुनरवादि वेदेषु पुरुषस्य कर्तृत्वमशक्यं ग्रहीतुमिति, तदप्यसाधु । परोक्षस्य कुविन्दादेरपि अभिनवावरकपटादौ कार्ये कथं कर्तृतावगम्यते ।

पटादिरचनां दृष्ट्वा तस्य चेत् सानुमीयते ।
वेदेऽपि रचनां दृष्ट्वा कर्तृत्वं तस्य गम्यताम् ॥

शरीरपरिग्रहमन्तरेण प्राणिनामुपदेशस्य कर्तुमशक्यत्वात् कदाचिदीश्वरः शरीरमपि गृह्णीयादिति कल्प्यते। नियतशरीरपरिग्रहाभावाच्च व्यासादिवदसौ न स्मर्यते । ततश्च

अद्य सद्यः कविः काव्ये यथा कर्त्तेति मीयते ।
तथा तत्कालजैः पुम्भिः सोऽपि कर्त्तेति मास्यते ॥

अनुपलब्धिरियमनेनेति । न चेत् स्मर्यते नास्ति तस्योपलब्धिः, अतोऽनुपलब्धेरभावस्तस्य ॥

यथा परकृताशङ्का तस्मिन् काव्ये व्यपेति ते ।
वेदेऽप्यन्यकृताशङ्का तथा तेषां व्यपैष्यति ॥
परोक्षमनुमानेन यच्च बुद्ध्यामहे वयम् ।
प्रत्यक्षं योगिनां तच्चेत्युक्तं प्रत्यक्षलक्षणे ॥
प्रत्यक्षमनुमानञ्च तदेवं कर्तृतामितौ ।
मूलप्रमाणमस्तीति स्मृतौ निन्दापरम्परा ॥
मन्त्रार्थवादमूलत्वं तत एव न तत्स्मृतेः ।
यथोदितानुमानादिप्रमाणान्तरसम्भवात् ॥

यदपीतरेतराश्रयमभाषि पुरुषोक्ते वेदे प्रामाण्यं वेदप्रामाण्यात् पुरुषसिद्धिरिति, तदपि न सम्यक्, पूर्वं परिहृतत्वात् । अनुमानात् प्रसिद्धे कर्त्तरि वेदवाक्यैस्तत्प्रतीतेरुपोद्बलनमिष्यते, न त्वागमैकशरण एव कर्त्रवगमः । उक्तञ्च पूर्वमपि पृथिव्यादिना कार्येण कर्तुरनुमानम् ।

वेदकर्तुरेव पृथिव्यादिरचयितृत्वम्

किं येनैव कर्त्रा पृथिव्यादि कार्यं निर्मितं तेनैव वैदिक्यो रचना निर्मिता इति चेद् ? ओमित्युच्यते । किमत्र प्रमाणमिति चेत् ?

उच्यते तर्हि सर्वज्ञः स्रष्टुं प्रभवतीदृशम् ।
विचित्रं प्राणिभृत्कर्मफलभोगाश्रयं जगत् ॥

तत्कर्मफलसम्बन्धविदा तदुपदेशिना ।
तेनैव वेदा रचिता इति नान्यस्य कल्पना ॥

एकेनैव च सिद्धेऽर्थे द्वितीयं कल्पयेम किम् ।
अनेककल्पनाबीजं न हि किञ्चन विद्यते ॥

मन्त्रार्थवादमूलत्वमिति । 'विश्वतश्चक्षुरित्या'देर्मन्त्रार्थवादादन्यथागृहीतादीश्वरसत्तां गृहीत्वा स्मरन्तीति ।

उपोद्बलनमिष्यत इति । उद्गतं बलमुद्बलमधिकमुद्बलमुपोद्बलं तस्य करणम् उपोद्बलनं तेन ।

जगत्स्रष्टुरेकत्वमेव

जगत्सर्गे तावदेक एवेश्वर इष्यते न द्वौ बहवो वा, भिन्नाशयकल्पने एकत्र वैयर्थ्याद्, इतरत्र व्यवहारवैशसप्रसङ्गेन तत एकस्येश्वरत्वविधानात्। तथा हि

अनेकेश्वरवादो हि नातीव हृदयङ्गमः।
ते चेत् सदृशसङ्कल्पाः कोऽर्थो बहुभिरीश्वरैः॥
सङ्कल्पयति यदेकः शुभमशुभं वापि सत्यसङ्कल्पः।
तत् सिद्धयति तद्विभवादित्यपरस्तत्र किं कुर्यात्॥
भिन्नाभिप्रायतायान्तु कार्यविप्रतिषेधतः।
नूनमेकः स्वसङ्कल्पविहत्यानीश्वरो भवेत्॥
एकस्य किल सङ्कल्पो राजायं क्रियतामिति।
हन्यतामिति चान्यस्य तौ समाविशतः कथम्॥
राज्यसङ्कल्पसाफल्ये विहता वधकामना।
तस्याः सफलतायां वा राज्यसङ्कल्पविप्लवः॥
तेन चित्रजगत्कार्यसंवाहानुगुणाशयः।
एक एवेश्वरः स्रष्टा जगतामिति साधितम्॥

वेदकर्तुरपि नानात्वे प्रमाणाभावः

एवं जगत्सर्गवत् स एव वेदानामप्येकः प्रणेता भवितुमर्हति, नानात्वकल्पनायां प्रमाणाभावात् कल्पनागौरवप्रसङ्गाच्च। तेन यदुच्यते

नन्वेकः सर्वशाखानां कर्त्तेत्यवगतं कुतः।
बहवो बहुभिर्ग्रन्था: कथं न रचिता इमे॥

इति तत्परिहृतं भवति। अतश्चैककर्त्तृका वेदा यतः परस्परव्यतिषक्तार्थोपदेशिनो दृश्यन्ते। एकमेव हि कर्म वेदचतुष्टयोपदिष्टैः पृथग्भूतैरप्येकार्थसमवायि-

---

चित्रजगत्कार्येति। चित्रं जगल्लक्षणं यत् कार्यं तद् यैर्गुणैः समाहर्तुं शक्यते सर्वज्ञतादिभिस्तेषामाशयः स्थानम्।

भिरङ्गैरन्वितं प्रयुज्यते । तत्र हि हौत्रमृग्वेदेन यजुर्वेदेनाध्वर्यवम्, औद्गात्रं सामवेदेन ब्रह्मत्वमथर्ववेदेन क्रियते । पैप्पलादादिशाखाभेदोपदिष्टश्च तत्तदङ्गजातं तत्र तत्रापेक्ष्यते । तत्र सर्वशाखाप्रत्ययमेकं कर्मेत्याहुः । एतच्चादूरएवाग्रे निर्णेष्यते ।

एकाभिप्रायबद्धत्वं तेन सर्वत्र गम्यते ।
भवेद् भिन्नाशयानां हि कथमेकार्थमीलनम् ॥

काव्यसमस्यापूरणे का वार्त्तेति चेत् ?

तत्रापि प्रथमस्यैव कवेस्तद्वस्तुदर्शनात् ।
तदभिप्रायवेदी तु सोऽन्यस्तमनुवर्त्तते ॥
अन्यथानन्वितं काव्यं स्याद् विश्ववसुकाव्यवत् ।
अन्वितत्वे तु सा नूनमाद्यस्यैव कवेर्मतिः ॥
इहाप्येकाशयाभिज्ञद्वितीयेश्वरकल्पने ।
एकाभिप्रायतैव स्यात् किं स्यात्तत्कल्पने फलम् ॥

तस्मादेक एव कर्त्ता सर्वशाखानाम्, काठकादिव्यपदेशस्तु प्रकृष्टाध्ययननिबन्धनो भविष्यतीति भवद्भिरप्युक्तम् । अपि च यथा तरोर्विक्षिप्ताः

हौत्रं होतृकर्म याज्यानुवाक्यापाठादि । **आध्वर्यवम**ध्वर्युकर्म पुरोडाशादिकरणं होमश्च । **औद्गात्र**मुद्गातृकर्म स्तोत्रादिपाठः । **सर्वशाखाप्रत्ययमि**ति । सर्वशाखाधीनः प्रत्ययः प्रतीतिर्यस्य । न ह्येकस्यां शाखायां निरपेक्षं कर्म प्रतीयते ।

काव्यसमस्यापूरण इति । यत्रैकः पादः कविना रच्यते द्वौ वा शिष्टमन्यैः पूर्यते सा काव्यसमस्या । यथा 'समुद्राद् वह्निरुत्थितः' इति 'सीतासमागमासह्यादाकर्णाकृष्टधन्वनः । राघवस्य शराङ्गारैः' इति पादत्रयेण पूरयन्ति ।

विश्ववसुकाव्यम् "जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मत्तकानि' इत्यादिकम् । प्रसिद्धपदार्थापेक्षयानन्वितार्थमिति वर्णयन्ति, मीमांसकभाष्यकृतास्यैवानन्वितार्थोदाहरणत्वेन प्रदर्शनात् ।

प्रकृष्टाध्ययननिबन्धनो भविष्यतीति । कठेनासाधारण्येनैवैषा शाखा प्रोक्ता शिष्येभ्यो निगदिता । **भवद्भिरप्युक्तम्** । 'वेदांश्चैके सन्निकर्षम् पुरुषाख्या' इति पूर्वपक्षयित्वा 'आख्या प्रवचनात्' इति सिद्धान्तयद्भिः ।

शाखा भवन्ति न च कृत्स्नं पुष्पफलपत्रमेकस्यां शाखायां सन्निहितं भवति किन्तु कस्याञ्चित् कस्याञ्चित्, एवं वेदस्यापि शाखाः पृथगङ्गकर्मोपदेशिन्यो विक्षिप्ताश्च ।

तासाञ्च वृक्षशाखानामेकस्माज्जन्म बीजतः ।
तथैव सर्वशाखानामेकस्मात् पुरुषोत्तमात् ॥

कर्त्ता य एव जगतामखिलात्मवृत्ति-
कर्मप्रपञ्चपरिपाकविचित्रताज्ञः ।
विश्वात्मना तदुपदेशपराः प्रणीता-
स्तेनैव वेदरचना इति युक्तमेतत् ॥

आप्तं तमेव भगवन्तमनादिमीश-
माश्रित्य विश्वसिति वेदवचःसु लोकः ।
तेषामकर्तृकतया न हि कश्चिदेवं
विस्रम्भमेति मतिमानिति वर्णितं प्राक् ॥

एवञ्च पदवाक्यरचनादौ तावद् वेदेषु पुरुषापेक्षित्वमुपपादितम् ।

शब्दार्थयोः सम्बन्धस्वरूपविचारः

यदपि सम्बन्धकरणे पुरुषानपेक्षत्वमुच्यते चित्रभानोरिव दहनशक्तिः शब्दस्य नैसर्गिकी वाचकशक्तिः । व्युत्पत्तिस्तु वृद्धेभ्य एव व्यवहरमाणेभ्य उपलभ्यते इति किमत्र पुरुषः करिष्यतीति ? तदप्यघटमानम्, पुरुषपरिघटितसमयसम्बन्धव्यतिरेकेण शब्दादर्थप्रत्ययानुत्पत्तेः ।

ननु नैव शब्दस्यार्थेन सम्बन्धः कश्चिदस्ति, कस्येदं पुरुषसापेक्षत्वं तन्निरपेक्षत्वं वा चिन्त्यते ? न हि शब्दार्थयोः कुण्डबदरयोरिव संयोगस्वभावः तन्तुपटयोरिव समवायात्मा वा सम्बन्धः प्रत्यक्षमुपलभ्यते, तन्मूलत्वाच्च सम्बन्धान्तराण्यपि न सन्ति । तदुक्तं मुखे शब्दमुपलभामहे भूमावर्थमिति । नाप्यनुमीयते शब्दस्यार्थेन सम्बन्धः क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणानुपलम्भात् । न च शब्ददेशे अर्थः सम्भवति न चार्थदेशे शब्दः स्थानकरणप्रयत्नानां तद्धेतूनां घटाद्यर्थदेशेऽनुपलम्भात् । व्यापकत्वन्तु शब्दस्य प्रतिषिद्धमेव ।

उच्यते । न संश्लेषलक्षणः शब्दार्थसम्बन्धोऽस्माभिरभ्युपगम्यते । तत् किं कार्यकारणनिमित्तनैमित्तिकाश्रयाश्रयिभावादयः शब्दस्यार्थेन सम्बन्धाः । एतेऽपि नतराम् । न तर्हि तस्य कश्चिदर्थेन सम्बन्धः ? न नास्ति शब्दस्यार्थेन सम्बन्धः, प्रत्ययनियमहेतुत्वाद् धूमादिवत् । तत् किं शब्दार्थयोरविनाभावः सम्बन्धः ? सोऽपि नास्ति एवं हि शब्दोऽनुमानमेव स्यात् । कस्तर्हि समय इति ब्रूमः । कोऽयं समयो नाम, अभिधानाभिधेयनियमनियोगः समय उच्यते । यद्येवं किमनाशङ्कनीयसंश्लेषपरिचोदनेन तद्दूषणेन च ? उच्यते । शब्दार्थाभेदवादिनां हि वैयाकरणानामेष संश्लेषः, उपपत्तिमान् समयोऽप्ययमनुपपन्न एव, स हि पुरुषकृत सङ्केतो न च पुरुषेच्छया वस्तुनियमोऽवकल्पते तदिच्छाया अव्याहतप्रसरत्वात् । अर्थोऽपि किमिति वाचको न भवति, न चैवमस्ति न हि दहनमनिच्छन्नपि पुरुषो धूमान्न तं प्रत्येति जलं वा तत इच्छन्नपि प्रतिपद्यते, तत्र यथा धूमाग्न्योर्नैसर्गिक एवाविनाभावो नाम सम्बन्धः ज्ञप्तये तु भूयोदर्शनादि निमित्तमाश्रीयते एवं शब्दार्थयोःसांसिद्धिक एव शक्त्यात्मा सम्बन्धः, तद्व्युत्पत्तये तु वृद्धव्यवहारप्रसिद्धिसमाश्रयणम् । स्वाभाविके सम्बन्धे सति दीपादिवत् किं तद्व्युत्पत्त्यपेक्षणेनेति चेद्, न, शब्दस्य ज्ञापकत्वात्, ज्ञापकस्य धूमादेरेतद्रूपं यत् सम्बन्धग्रहणापेक्षं स्वज्ञाप्यज्ञापकत्वम्, उद्द्योतादयस्तु

तत्किं कार्यकारणेति । कार्यकारणलक्षणः सम्बन्धो बीजाङ्कुरयोरिव, निमित्तनैमित्तिकलक्षणः कुविन्दपटयोरिव, आश्रयाश्रयिभावलक्षणस्तु कुण्डबदरयोरिव । आदिग्रहणात् कार्योत्पादेऽप्यनिवृत्तः कारणविशेषयोनिस्तत्कृतः सम्बन्धः पितापुत्रयोरिव । **प्रत्ययनियमहेतुत्वादि**ति । विशिष्टार्थविषयप्रत्ययस्तेनासम्बन्धान्नोपपद्यत इति भावः ।

नियोगेति । व्यवस्थया नियोगो नियोजनम् ।

शब्दार्थाभेदवादिनां हीति । शब्द उच्चरिते शब्दाकारतया प्रथमं बुद्धिर्विवर्तते, सा तथा विवृत्ता सती ततोऽर्थाकारतया विपरिणमते, तस्याश्च तथाभूतायां बुद्धौ शब्दस्वरूपमेवार्थाकारतया निर्वृत्तमवगम्यत इत्यादि युक्त्युपन्यासपूर्वकं शब्दार्थयोरभेदमाहुः शाब्दाः । **संश्लेष** इति । संश्लेषरूपसम्बन्ध इति, प्रागुक्तनीत्या शब्दसंसृष्टस्यैवार्थस्यावगमात् । **सांसिद्धिक एवे**ति । स्वाभाविक एव शक्तिद्वयनियमलक्षणसम्बन्ध इत्यर्थः । **उद्योतादयः** प्रदीपादयः ।

प्रत्यक्षसामग्रयन्तर्गतत्वान्न व्युत्पत्त्यपेक्षा भवन्ति, शक्तिस्तु नैसर्गिकी यथा रूपप्रकाशिनी दीपादेस्तथा शब्दस्यार्थप्रतिपादने, तस्मान् न समयमात्रादर्थप्रतिपत्तिः ।

अपि चाभिधानाभिधेयनियमनियोगरूपः समयो ज्ञानमेव न ततोऽर्थान्तरम् । ज्ञानञ्चात्मनि वर्त्तते न च शब्दार्थयोरिति न तयोः सम्बन्धः स्यात् । किञ्च समयः क्रियमाणः प्रत्युच्चारणं वा क्रियते प्रतिपुरुषम्, सर्गादौ वा सकृदीश्वरेणेति । प्रत्युच्चारणं प्राक्तन एव क्रियते नूतनो वा । नवस्य तावत् क्रियमाणस्य कथमर्थप्रत्यायनसामर्थ्यमवगम्यते । तदवगतौ वा किं तत्करणेन । पूर्वकृतस्य तदा कृतत्वादेव पुनः करणमनुपपन्नम् । एकस्य वस्तुनो ज्ञप्तिरसकृदावर्त्तते नोत्पत्तिः । प्रतिपुरुषमपि सम्बन्धो भिन्नोऽभिन्नो वा क्रियते । भेदपक्षे कथमेकार्थसञ्ज्ञानं गोशब्दस्य सास्नादिमानर्थः केसरादिमानश्वशब्दस्येति । अभेदेऽपि तथैव कृतस्य करणायोगाज् ज्ञानमेव सम्बन्धस्य न करणम् । सर्गादावपि सकृत् सम्बन्धकरणमयुक्तं तथाविधकालासम्भवादेव । न हि शब्दार्थव्यवहाररहितः कश्चित् काल उपपद्यते । तस्मान्नित्यस्यैव सम्बन्धस्य लोकतो व्युत्पत्तिः न पुनः करणम् । व्युत्पत्तिपक्षञ्च न करणपक्षाभिहिता दोषाः स्पृशन्ति प्रत्यक्षसिद्धत्वात् । प्रत्यक्षं हीदमुपलभ्यते वृद्धानां हि स्वार्थे व्यवहरमाणानामुपश्रृण्वन्तो बालास्ततस्ततः शब्दात्तं तमर्थं प्रतियन्ति । तेऽपि वृद्धा यदा बाला आसंस्तदान्येभ्यो वृद्धेभ्यस्तथैव प्रतिपन्नवन्तस्तेऽप्यन्येभ्य इति नास्त्यादिः संसारस्येति ।

अपि च समयमात्रशरणः शक्तिशून्यः शब्दः कथमक्षिनिकोचहस्तसंज्ञादिभ्यो भिद्येत ? स हि तदानीं कशाङ्कुशप्रतोदाभिघातस्थानीय एव भवेत्, तथा च शब्दादर्थं प्रतिपद्यामहे इति लौकिको व्यपदेशो बाध्येत समयादर्थं प्रतिपद्यामहे इति स्यात् । समयपक्षे च यदृच्छाशब्दतुल्यत्वं सर्वशब्दानां प्राप्नोति, तेन गवाश्वादीनां शब्दानां नियतविषयत्वं न स्यात् ।

यत् पुनरुच्यते जातिविशेषे चानियमात् समयरूपः सम्बन्ध इति, जातिशब्देनात्र देशो विवक्षितः । किल क्वचिद्देशविशेषे कश्चिच्छब्दो देशान्तरप्राप्तप्रसिद्धमर्थमुत्सृज्य ततोऽर्थान्तरे वर्तते । यथा चौरशब्दस्तस्करवचन ओदने दाक्षिणात्यैः प्रयुज्यते, एतच्च समयपक्षे युज्यते, नित्ये तु सम्बन्धे कथं तदर्थव्यभिचार इति, तदप्ययुक्तम् । सर्वशब्दानां सर्वार्थप्रत्यायनशक्तियुक्तत्वात् क्वचिद्देशे केनचिदर्थेन व्यव-

हारः । अत एव चानवगतसम्बन्धे श्रुते सति सन्देहो भवति कमर्थं प्रत्याययितुमनेनायं शब्दः प्रयुक्तः स्यादिति । असत्यां हि शक्तौ अकृतसमये निरवलम्बना प्रत्यायकत्वाशङ्केति । अथ चार्यदेशप्रसिद्ध एव शब्दानामर्थः, इतरस्तु म्लेच्छजनसम्मतो नादरणीय एव । तस्मात् समयपक्षस्यातिदौर्बल्यादकृत्रिम एव शब्दार्थयोः सम्बन्ध इति न तत्र पुरुषस्य प्रभविष्णुता ।

अत्रोच्यते । न नित्यः सम्बन्ध उपपद्यते, शब्दवदर्थवच्च तृतीयस्य तस्य प्रत्यक्षादिना प्रमाणेनाप्रतीयमानत्वात् ।

ननु शक्तिरूपः सम्बन्ध इत्युक्तः शक्तिश्च तदाश्रितेति कथं धर्म्यन्तरवत् पृथक्तया प्रतीयते? नैतत् साम्प्रतम् । स्वरूपसहकारिव्यतिरिक्तायाः शक्तेः सूक्ष्मायाः प्रागेव विस्तरतः प्रतिक्षिप्तत्वात् । न च शक्तिः प्रत्यक्षगम्या द्रव्यस्वरूपवदनुपलम्भात्, नानुमेया कार्याणामन्यथापि घटमानत्वात् । कल्पयित्वा च शक्तिमपरिहार्यः समयः, समयमन्तरेणार्थप्रतिपत्तेरसिद्धेः । सिद्धे च समये तत एवार्थसिद्धेः किं नित्यसम्बन्धाश्रयणेन ?

यत्तूक्तं समयस्य पुरुषेच्छाधीनत्वात् तस्याश्चाव्याहतप्रसरत्वाद् वाच्यवाचकव्यत्ययः स्यादिति तदयुक्तम् । शक्त्यभावे शब्दस्यैव वाचकत्वे योग्यत्वात् । का पुनः शक्त्यभावे योग्यतास्येति चेद्, योऽयं गत्वादिजातियोगः क्रमविशेषोपकृता गत्वौत्वादिसामान्यसम्बन्धो हि यस्य भवति स वाचकत्वे योग्य इति । इतरस्तु वाच्यत्वे । यथा द्रव्यत्वाद्यविशेषेऽपि वीरणत्वादिसामान्यवताञ्च पटनिष्पत्तौ, न च तत्र शक्तिरस्तीत्युक्तम् । न च कारणे कार्यं सदिति सांख्यैरिव भवद्भिरिष्यते । तस्यामसत्यामपि शक्तौ सामान्यविशेषसम्बन्धस्य नियामकत्वान्न वाच्यवाचकयोर्व्यत्यय इति न शक्तिरूपः शब्दार्थयोः सम्बन्धः । न च तयोरविनाभावे धूमाग्न्योरिव सम्बन्धः, तत्र हि सम्बन्धः प्रतीयमान एवं प्रतीयते धूमोऽग्निं विना न भवतीति । इह पुनरयमस्मात् प्रतीयते इति एतावदेव व्युत्पत्तिपर्यवसानम् । अत एवावगतिपूर्विकैवावगतिरिहेत्यनुमानाच्छब्दस्य भेद उक्तः । प्रकाशकत्वमपि शब्दस्य समयप्रसादो-

---

एवं प्रतीयते 'धूमोऽग्निं विना न भवति' इति न पुनः 'धूमादग्निः प्रतीयते' इत्येवम् । यदि प्रत्यायकत्वं शब्दस्य स्वाभाविकं तत् प्रथमश्रुत एव कस्मान्न प्रत्याय-

पनतमेव न स्वाभाविकम् । सांसिद्धिके हि तथात्वे श्रमित्वादिप्रयुक्तादन्यतो वा यतः कुतश्चिदभिनवादपि दीपादिव शब्दादर्थप्रतीतिः स्यात् ।

यत्तु नैसर्गिकेऽपि प्रकाशकत्वे शब्दस्य धूमादेरिव ज्ञापकत्वात् सम्बन्धग्रहणसापेक्षत्वमुक्तम्, स एष विषम उपन्यासः । न हि धूमादेः प्रत्यायकत्वं स्वाभाविकम्, अनलाविनाभावित्वन्तु तस्य निजं बलम्, तत्र चागृहीते तस्मिन् प्रतीतिरेव न जायते इति युक्तं तद्ग्रहणं प्रतीत्यर्थम् । इह तु प्रतीतिशक्तिरेव स्वाभाविकी भवताभ्युपगम्यते । सा चेत् स्वाभाविकी किं व्युत्पत्त्यपेक्षणेनेति । यच्चोच्यते प्रत्यायक इति प्रत्ययं दृष्ट्वा अवगच्छामो न प्रथमश्रवण इति यावत्कृत्वः श्रुतेनेयं संज्ञा अयं संज्ञीत्यवगम्यते तावत्कृत्वः श्रुतादर्थावगम इति सोऽयं समयोपयोग एव कथितो भवति । संज्ञासंज्ञिसम्बन्धो हि समय एवोच्यते, तदुपयोगमन्तरेण प्रत्यायकत्वानवगमान्न स्वाभाविकी शक्तिः ।

यत्त्वभ्यधायि समयस्य ज्ञानात्मकत्वादात्मनि वृत्तिः न शब्दार्थयोरित्येतदप्यचतुरश्रम् । तदाश्रयत्वाभावेऽपि ज्ञानस्य तद्विषयत्वोपपत्तेः ।

यदप्यभाणि समयमात्रशरणे सृणिप्रतोदनोदननिर्विशेषे शब्दे शब्दादर्थं प्रतिपद्यामहे इति व्यपदेशो न स्यादिति, तदपि न किञ्चित् । नैसर्गिकशक्तिपक्षेऽपि शक्तेरर्थं प्रतिपद्यामहे न धूमादिति स्यात् । तदङ्गत्वादविनाभावादेर्न तथा व्यपदेश इति चेत् । तदितरत्रापि समानम् ।

धूमे हि व्याप्तिपूर्वत्वं शब्दे समयपूर्वता ।
नानयोस्तदपेक्षायां करणत्वं विहन्यते ॥

अपि च । लौकिको व्यपदेशः समयपक्षसाक्षितामिव भजते । देवदत्तेनोक्तम् अमुतः शब्दादमुमर्थं प्रतिपद्यस्वेति एवं हि व्यपदिशति लोकः । तस्मात् समय एव । अतश्चैवं देशान्तरे सङ्केतवशेन तत एव शब्दादर्थान्तरप्रतिपत्तिः ।

नन्वत्रोक्तं सर्वशब्दाः सर्वार्थप्रत्यायनयुक्ता इति केनचिदर्थेन क्वचिद्व्यवहार इति, तदेतदयुक्तम् । शक्तीनां भेदाभेदविकल्पानुपपत्तेः । न शब्दस्वरूपाद् भिन्नाः शक्तयः तथानवभासात् । अव्यतिरेके चैकस्माच्छब्दादनन्यत्वात् परस्परम-

---

येदित्याशङ्कानिवारणायेदं शाबरं भाष्य "प्रत्यायक इति प्रत्ययं दृष्ट्वा" इति ।

सृणिरङ्कुशः ।

व्यतिरेकस्तासां स्यात् । न च भिन्नकार्यानुमेया भिन्नाः शक्तयः, कार्यभेदस्यान्यथाप्युपपत्तेः । सर्वशक्तियोगे च सर्वार्थप्रत्ययप्रसङ्गः । समयोपयोगो नियामक इति चेत्, स एवास्तु किं शक्तिभिः ?

यदप्यगादि शब्दश्रवणे सति सर्वार्थविषयसन्देहदर्शनात् सर्वत्र तस्य शक्तिः कल्प्यते इति, तदप्यसारम् । न हि शक्तिकृतः सन्देहः, किन्तु गत्वादिवर्णसामान्यनिबन्धनः । तथा च गत्वादिजातिमतां वर्णानामर्थे वाचकत्वमवगतम्, अमी तज्जातियोगिनो वर्णाः कस्यार्थस्य वाचकाः स्युरिति भवति सन्देहः ।

यत्पुनरवादि स एव शब्दस्यार्थो यत्रैनमार्याः प्रयुञ्जते न म्लेच्छजनप्रसिद्ध इति, तदेतत् कथमिव शपथमन्तरेण प्रतिपद्येमहि । न हि म्लेच्छदेशेऽपि तदर्थप्रत्ययो न जायते बाध्यते वा सन्दिग्धो वेति कथं न शब्दार्थः ? आर्यप्रसिद्धिर्बाधिकेति चेद्, आर्यप्रसिद्धेरपि म्लेच्छप्रसिद्धिः कथं न बाधिका ? अक्षादिवच्च विकल्पमानार्थोपपत्तेः व्यवस्थितविषय एव विकल्पो भविष्यति । पिकनेमतामरसादिशब्दानाञ्च

कार्यभेदस्यान्यथाप्युपपत्तेः समयभेदेनाप्युपपत्तेः ।

न च वाच्यं कथमेकस्य शब्दस्य नानार्थतेति, यतो दृष्टमेतदक्षादिषु शब्देषु; तदाह **अक्षादिवदिति** । यथा बिभीतकादित्रयवाचिनो अक्षशब्दस्य युगपत् त्रयवाचित्वासम्भवात् विकल्पेन त्रयवाचित्वेऽपि प्रकरणादिवशात् क्वचिदेव व्यवस्थिते नियते विषये वृत्तिः । एवं देशान्तरे अन्यस्मिन्नन्यस्मिन् स्वार्थे प्रयुक्तानां शब्दानां विकल्पेनानेकार्थवाचित्वेऽपि देशवशान्नियतपदार्थे वृत्तिर्भविष्यति । ततश्च 'यव'शब्दमार्या दीर्घशूकेषु प्रयुञ्जते, म्लेच्छास्तु प्रियङ्गुषु, तत् म्लेच्छप्रसिद्धिं बाधित्वा दीर्घशूकेष्वयं यवशब्दः प्रयोक्तव्यो न प्रियङ्गुष्विति न वाच्यम्, उभयवाचकत्वेऽपि देशवशाद् व्यवस्थायाः सिद्धेः । **पिकनेमतामरसादिशब्दानामिति** । पिकनेमाधिकरणे हि "चोदितं तु प्रतीयेताविरोधात् प्रमाणेन" इत्यत्रैतच्चिन्तितम् । भवतु यवादिशब्दानामार्यप्रसिद्ध एवार्थः, ये तु पिकनेमतामरसादयः आर्यैर्न क्वचित् प्रयुज्यन्ते तेषां किं म्लेच्छप्रसिद्ध एवार्थ उत व्याकरणादिव्युत्पत्तिसमाश्रयणेनार्थान्तरं कल्पनीयमिति । तत्राशिष्टाचारत्वान्म्लेच्छव्यवहारस्य वरं व्याकरणादिनैवार्थकल्पनेति पूर्वपक्षयित्वोक्तम् "अशिष्टैरपि यच्चोदितं शिष्टानवगतं तदपि प्रतीयेत प्रत्येतव्यं प्रमाणेनाविरुद्धं सत् न चात्रम्लेच्छप्रसिद्ध्याश्रयणे कश्चित् प्रमाणविरोधः" इत्यर्थः "चोदितं तु प्रतीयेत" इति सूत्रस्य ।

भवद्भिः म्लेच्छप्रयोगादर्थनिश्चय आश्रित एव । अवेष्टयधिकरणे च राज्यशब्दमान्ध्रप्रसिद्धेऽर्थे वर्णितवन्तो भवन्त इत्यलमवान्तरचिन्तनेन । तस्मात् समय एव सम्बन्ध इति युक्तम् । तदुक्तं जातिविशेषे चानियमादिति ।

अथ यदुक्तं समयः प्रत्युच्चारणं प्रतिपुरुषञ्च तत्करणम्, अनभ्युपगतमेव दूषितम् । सर्गादौ सकृदेव समयकरणमिति नः पक्षः । अत एव न सर्वशब्दानां यदृच्छातुल्यत्वम् । केषाञ्चिदेव शब्दानामस्मदादिभिरद्यत्वे सङ्केतकरणात् त एव यदृच्छाशब्दा उच्यन्ते । सर्गादिश्च समर्थित एव, ईश्वरसिद्धावप्यविकल्पमनुमानमुपन्यस्तम् । एष एव चावयोर्विशेषो यदेष शब्दार्थसम्बन्धव्यवहारस्तवानादिर्मम तु जगत्सर्गात् प्रभृति प्रवृत्त इति । अद्यत्वे तु शब्दार्थसम्बन्धव्युत्पत्तौ तुल्य एवावयोः

पिकः कोकिलः । नेमोऽर्धम् । तामरसं पद्मम् । **अवेष्टयधिकरणे चेति** । अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते" इत्यत्रावेष्टयधिकरणे । अत्र हीयं चिन्ता कृता । 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यत्र नानापशुसोमेष्टिसमुदायात्मकराजसूयाख्ययागमध्येऽवेष्टिर्नामेष्टिराम्नाता, "आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा ऐन्द्रमेकादशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा" इति पञ्चेष्टिसमुदायात्मिका, तामेतामवेष्टिमधिकृत्याह–एतयान्नाद्यकामं याजयेदिति । पुनश्च तामेवाधिकृत्य श्रूयते "यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिघारयेत्, यदि वैश्यो वैश्वदेवम्, यदि राजन्य ऐन्द्रम्" इति । तत्र संदेहः किं राज्यस्य कर्ता राजेति व्युत्पत्तिसमाश्रयणेन जनपदपुरपरिपालनरूपराज्यकर्तृत्वेन ब्राह्मणवैश्ययोरपि राजशब्दयोगसम्भवाद् राजसूयेऽधिकाराद् बार्हस्पत्यादिमध्यनिधानादिलक्षणस्य गुणस्य विधौ ब्राह्मणत्वादिजातिनिमित्तत्वेनोपादानम्, आहोस्विद् आन्ध्रेषु क्षत्रियजातौ राजशब्दप्रयोगात् तदाश्रयेण ब्राह्मणवैश्ययोरप्राप्तत्वात् 'एतयान्नाद्यकामं याजयेदि'ति विशिष्टफलकामयोस्तयोरपूर्वोपदेश इति । तत्र पूर्वपक्षः आर्यप्रसिद्ध्यनुग्रहात् राज्यकर्तरि राजशब्दप्रयोगसामर्थ्यनिमित्तार्थत्वेन ब्राह्मणाद्युपादानं समर्थितम्, सिद्धान्ते तु आन्ध्रप्रयोगाश्रयणेनाप्यार्यप्रसिद्धेर्बाधात् तत्समाश्रयणेन क्षत्रियजातावेव राजशब्दप्रयोग इति निश्चित्यापूर्वविधिरेवेति स्थापितम् । सूत्रार्थस्तु अवेष्टौ ब्राह्मणादिप्रतिपादनं क्रतुप्रधानमप्राप्तमेव तयोर्यज्ञकर्म विधातुम्, कुतः ? यज्ञसंयोगात्, राज्ञो हि क्षत्रियस्य राजसूययज्ञेन संयोगः सम्बन्धो न तयोः, अतोऽप्राप्तविधिरेवायं ब्राह्मणवैश्ययोरित्यर्थः ।

पन्थाः, तत्रापि त्वयं विशेषो यत्तव शक्तिपर्यन्ता व्युत्पत्तिर्मम तु तद् वजमिति । तथा चेयमियती व्युत्पत्तिर्लोके दृश्यते, यदयमस्य वाच्योऽयमस्य वाचक इति । न पुनः शक्तिपर्यन्ता व्युत्पत्तिरस्ति । तथा हि यत्र शृङ्गग्राहिकया शब्दमर्थञ्च निर्दिश्य सम्बन्धः क्रियते तत्रेयन्तमेवैनं क्रियमाणं पश्यामः, अयमस्य वाच्योऽयमस्य वाचक इति । यत्रापि च वृद्धेभ्यो व्यवहरमाणेभ्यो व्युत्पद्यते तत्रापीयदेवासौ जानाति अयमर्थः अमुतः शब्दादनेन प्रतिपन्न इति । न त्वन्यास्य काचिच्छक्तिरस्तीति । इयत्यैव च व्युत्पत्त्या शब्दादर्थप्रत्ययोपपत्तेरस्याश्च अपरिहार्यत्वादधिककल्पना-बीजाभावाच्च न नित्यः शब्दार्थसम्बन्धः । अत एव च 'सम्बन्धस्त्रिप्रमाणकः' इति यत्त्वयोच्यते तदस्माभिर्न मृष्यते । 'शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति' इति सत्यं "श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया" इत्येतदपि सत्यम् । "अन्यथानुपपत्त्या च वेत्तिशक्तिं द्वयाश्रिताम्" इत्येतत्तु न सत्यम्, अन्यथाप्युपपत्तेरित्युक्तत्वात् । तस्माद् द्विप्रमाणकः सम्बन्धनिश्चयो न त्रिप्रमाणकः । तदेवं शब्दस्य नैसर्गिक-शक्त्यात्मकसम्बन्धाभावाद् ईश्वरविरचितसमयनिबन्धनः शब्दार्थव्यवहारो नानादिः ।

नन्वीश्वरोऽपि सम्बन्धं कुर्वन् अवश्यं केनचिच्छब्देन करोति तस्य केन कृतः सम्बन्धः ? शब्दान्तरेण चेत् तस्यापि केन कृतस्तस्यापि केनेति न कश्चिदवधिः तस्मादवश्यमनेन सम्बन्धं कुर्वता वृद्धव्यवहारसिद्धाः केचिदकृतसम्बन्धा एव शब्दा अभ्युपगन्तव्या अस्ति चेद्, व्यवहारसिद्धिः । किमीश्वरेण किं वा तत्कृतेन समये-नेत्यनाद्यपक्ष एव श्रेयान् । उच्यते

अस्त्रमायुष्मता ज्ञातं विषयस्तु न लक्षितः ।
अस्मदादिषु दोषोऽयमीश्वरे तु न युज्यते ॥
नानाकर्मफलस्थानमिच्छयैवेदृशं जगत् ।
स्रष्टुं प्रभवतस्तस्य कौशलं को विकल्पयेत् ॥

तव शक्तिपर्यन्ता व्युत्पत्तिरिति । व्युत्पत्तिः शक्तिद्वयनियमलक्षणसम्बन्धावगम इति । यथोक्तम्—"अन्यथानुपपत्त्या च वेत्ति शक्तिं द्वयाश्रिताम्" अन्यथाप्युपपत्ते-रित्युक्तत्वादिति । 'अयमस्य वाचकः अयञ्च वाच्यः' इत्येतावन्मात्रव्युत्पत्तावप्युपपत्तेः ।

इच्छामात्रेण पृथिव्यादेरियतः कार्यस्य करणमस्मदादीनां यन्मनोरथपदवीमपि नाधिरोहति तदपि यतः सम्पद्यते तस्य कियानयं प्रयासः ? तदत्रेश्वरसद्भावे परं विप्रतिपत्तयः ? तस्मिंस्तु सिद्धे क एवं विकल्पानामवसरः ? उक्तश्च तत्सिद्धौ निरपवादमनुमानम् । वयन्तु न कर्त्तार एव सम्बन्धस्य यत एवमनुयुज्येमहि

अङ्गुल्यग्रेण निर्दिश्य कञ्चिदर्थं पुरः स्थितम् ।
व्युत्पादयन्तो दृश्यन्ते वालानस्मद्विधा अपि ॥

तस्माद् ईश्वरविरचितसम्बन्धाधिगमोपायभूतवृद्धव्यवहारलब्धतद्व्युत्पत्तिसापेक्षः शब्दोऽर्थमवगमयतीति सिद्धम् । न च नित्यसम्बन्धाभावेऽपि शब्दस्यार्थास्पर्शित्वं समयबलेनार्थप्रत्ययस्याबाधितस्य सिद्धेरित्युक्तत्वाद् इत्यलं विस्तरेण ।

तस्मात् पदे च वाक्ये च सम्बन्धे च स्वतन्त्रता ।
पुरुषस्योपपन्नेति वेदानां तत्प्रणीतता ॥

आप्तोक्तत्वाद् वेदाः प्रमाणम् न स्वतः

तस्मादाप्तोक्तत्वादेव वेदाः प्रमाणं न नित्यत्वात् । नन्वाप्तोक्तत्वस्य हेतोः पक्षधर्मत्वं कथमवगम्यते ? न प्रत्यक्षेण क्षोणीधरधर्मत्वमिव धूमस्य वेदानामाप्तप्रणीतत्वमवगम्यते, श्रवणयुगलकरणलब्धजन्मनि प्रत्यये वेदाख्यस्य शब्दराशेरेव प्रतिभासात् । न चोदात्तादिवद्वर्णधर्मत्वेन आप्तोक्तत्वं गृह्यते । नाप्यनुमानमस्मिन्नर्थे सम्भवति, लिङ्गाभावात् । प्रामाण्ये हि वेदस्याप्तोक्तत्वं लिङ्गम्, आप्तोक्तत्वानुमितौ तु न लिङ्गान्तरमुपलभामहे इति कुतस्त्यः पक्षधर्मत्वनिश्चयः ? उच्यते । अलं सरस्वतीक्षोदेन उक्त एव पक्षधर्मत्वनिश्चयोपायः, तथाहि—

शब्दस्य साधितं तावदनित्यत्वं सविस्तरम् ।
रचनाः कर्तृमत्यश्च रचनात्वादिति स्थितम् ॥

कर्त्ता सर्वस्य सर्वज्ञः पुरुषोऽस्तीति साधितम् ।
कार्येणानुगुणं कल्प्यं निमित्तमिति च स्थितम् ॥

प्रत्यक्षादिविसंवादो वेदे परिहरिष्यते ।
व्याघातपौनरुक्त्यादिदोषश्च वचनान्तरे ॥

विध्यर्थवादमन्त्राणामुपयोगश्च वक्ष्यते ।
न मात्रामात्रमप्यस्ति वेदे किञ्चिदपार्थकम् ॥
शब्दब्रह्मविवर्त्तादिकल्पनाश्च पुरोदिताः ।
सर्वाः परिहरिष्यन्ते कार्यत्वस्य विरोधिकाः ॥

इत्थञ्च स्थिते किमन्यदवशिष्टं वेदेष्वाप्तोक्ततानिश्चयस्य ? सोऽयं सकलशास्त्रार्थस्थितौ सत्यां पक्षधर्मत्वनिश्चयो हेतोराप्तोक्तत्वस्य गीयते ।

आप्तोक्तत्वनिश्चये मानाभावनिरसनम्

यत्तु प्रत्यक्षमनुमानं वा तन्निश्चयानिमित्तमिति विकल्पितं तत्र प्रत्यक्षमास्ताम् । अनुमानानि तु यानि रचनात्वादीन्युक्तानि यानि च परदर्शनद्वेषि वक्ष्यन्ते तानि सर्वाण्याप्तोक्ततायाः पक्षधर्मतासिद्धौपयिकानीत्यलं विस्तरेण ।

व्याप्तिः पुनरस्य हेतोरायुर्वेदादिवाक्येषु निश्चीयते । पिप्पलीपटोलमूलादेरप्यौषधस्येत्थमुपयोगादिदमभिमतमासाद्यते, अस्य च क्षीरतक्रादिविरोध्यशनस्य परिहारादिदमनिष्टमुपशाम्यतीत्यादिष्वायुर्वेदशास्त्रेषु प्रत्यक्षेण तस्यार्थस्य तथा निश्चयादर्थाविसंवादित्वं नाम प्रामाण्यं प्रतिपन्नम् । तच्चेदमाप्तवादप्रयुक्तम्, यतो यत्राप्तवादत्वं तत्र प्रामाण्यमिति व्याप्तिर्गृह्यते । तथा मन्त्राणां प्रयोगे वृश्चिकभुजगदष्टस्य भक्षितविषस्य वा निर्विषत्वम्, अपस्मारपिशाचरूपिकागृहीतस्य तदुन्मोचनम्, अतिरभसोज्जिहानेषु दुष्टमेघेषु सस्यरक्षणमित्येवमुपलब्धम् । अतस्तेषां विषभूताशनिशमनकुशलानामाप्ता उपदेष्टार इति तत्रापि तथैव व्याप्तिनिश्चयः ।

आयुर्वेदादीनां नाप्तोक्तत्वात् प्रामाण्यम् इति शङ्कानिरसनम्

नन्वायुर्वेदादौ प्रामाण्यं प्रत्यक्षादिसंवादात् प्रतिपन्नम्, नाप्तप्रामाण्यात् । अतः कथमाप्तोक्तत्वस्य तत्र व्याप्तिग्रहणम् ? नैतदेवम् । प्रत्यक्षादिसंवादात् तन्निश्चीयतां

शब्दब्रह्म इति । शब्दब्रह्मणोऽनादिनिधनस्यायमाद्यो विवर्तो वेदाः न पुनः केनचित् कृता इति वैयाकरणा यदाहुः "त्रयीरूपेण तज्ज्योतिः प्रथमं परिवर्तते" इत्यादि तदिदमपवर्गाह्निके निराकरिष्यते ।

अतिरभसोज्जिहानेष्विति । अतिरभसेन साटोपमुपगच्छत्सु ।

नाम प्रामाण्यम्, उत्थितन्तु तदाप्तोक्तत्वात् । प्रत्यक्षादावप्यर्थक्रियाज्ञानसंवादात् प्रामाण्यस्य ज्ञप्तिरुत्पत्तिस्तु गुणवत्कारककृतेत्युक्तम् । नद्यादिवाक्यानि च विप्रलम्भकपुरुषभाषितानि विसंवदन्ति लोके दृश्यन्ते, तेनाप्तप्रणीतत्वमेव तेषां प्रामाण्यकारणम्, कारणशुद्धिमन्तरेण सम्यक्प्रत्ययानुत्पादात् । निश्चयोपायस्तु प्रत्यक्षं भवतु न तु तत्कृतमेव प्रामाण्यम् । अतो युक्तमाप्तोक्ततया आयुर्वेदादौ व्याप्तिग्रहणम् ।

नन्वेवमपि न युक्तम्, आप्तोक्तत्वस्य तत्र परिच्छेत्तुमशक्यत्वात् । अन्वयव्यतिरेकमूलमेवायुर्वेदवाक्यानां प्रामाण्यं नाप्तकृतम् । अन्वयव्यतिरेकौ च यावत्येव दृश्येते तावत्येवार्थे प्रामाण्यम्, यथा हरीतक्यादिवाक्यार्थे । यत्र तु तयोरदर्शनं तत्र अप्रामाण्यम् । यथा सोमराज्युपयोगे समाः सहस्रं जीव्यते । आप्ते तु कल्प्यमानेऽर्धजरतीयं स्यात्, अर्धे तस्याप्तत्वमर्धे च कथमनाप्तत्वमिति । तदिदमनुपपन्नम्, अन्वयव्यतिरेकयोर्ग्रहीतुमशक्यत्वात् । तौ हि स्वात्मनि वा ग्रहीतुं शक्येते व्यक्त्यन्तरे वा । व्यक्त्यन्तरेऽपि सर्वत्र क्वचिदेव वा व्यक्तिविशेषे । सर्वथा संकटोऽयं पन्थाः । व्याधीनां तन्निदानानां तदुपचयानां तदुपशमोपायानामौषधानां तत्संयोगवियोगविशेषाणां तत्परिमाणानां तद्रसवीर्यविपाकानां देशकालपुरुषदशाभेदेन शक्तिभेदस्यैकेन जन्मना ग्रहीतुमशक्यत्वात्, जन्मान्तरानुभूतानाञ्च भावानामस्मरणात् ।

जनोऽनन्तस्तावन्निरवधिरिह व्याधिनिवहो
न संख्यातुं शक्या बहुगुणरसद्रव्यगतयः ।
विचित्राः संयोगाः परिणतिरपूर्वेति च कुतः
चिकित्सायाः पारं तरति युगलक्षैरपि नरः ॥
यदेव द्रव्यमेकस्य धातोर्भवति शान्तये ।
योगान्तरात् तदेवास्य पुनः कोपाय कल्पते ॥

अर्धजरतीयं स्यादिति । यथा जरत्या अर्धं जघनमेव कामयतेऽर्धं न वदनादि । अथवान्नादिसंस्कारचातुर्येण तां कामयते भद्रिकां प्रतिपद्यते न तूपभोगेत्यर्धजरतीयम् । **तत्परिमाणानामिति** । अस्य द्रव्यस्येयान् भागोऽस्येयानिति । यथा 'कर्षः कर्षोऽर्धपलं पलत्रयं स्यात्, तथार्धकर्षश्च । मरिचस्य पिप्पलीनां दाडिमगुडयावकशूकानाम्' इत्यादौ परिमाणविशेषः संयोगविशेषश्च ।

या द्रव्यशक्तिरेकत्र पुंसि नासौ नरान्तरे ।
हरीतक्यपि नोद्भूतवातकुष्ठे विरेच्यते ॥
शरद्युद्रिक्तपित्तस्य ज्वराय दधि कल्पते ।
तदेव भुक्तं वर्षासु ज्वरं हन्ति दशान्तरे ॥
न चोपलक्षणं किञ्चिदस्ति तच्छक्तिवेदने ।
येनैकत्र गृहीतासौ सर्वत्रावगता भवेत् ॥

यो वा ज्ञातुं प्रभवति पुरुषस्तत्सामर्थ्यं निरवधिविषयम् ।
स्यात् सर्वज्ञः स इति न विमतिस्तस्मिन् कार्या स्ववचनकथितैः ॥

आयुर्वेदस्य सर्वज्ञप्रणीतत्वसाधनम्

अथोच्यते, अनादिरेवैषा चिकित्सकस्मृतिर्व्याकरणादिस्मृतिवत्, संक्षेपविस्तरविवक्षयैव चरकादयः कर्त्तारो न तु ते सर्वदर्शिनः। न च स्मृतावन्धपरम्परादोषः, समूलत्वात् । यथा व्याकरणस्मृतेः शिष्टप्रयोगो मूलमेवमिहान्वयव्यतिरेकौ। शिष्टविरोधे सति यथा मूलविरोधिनी पाणिन्यादिस्मृतिरप्रमाणं तथा चाहु 'रिह न भवत्यनभिधानादि'ति, एवं वैद्यस्मृतिरप्यन्वयव्यतिरेकविरुद्धा न प्रमाणमिति । तदेतदयुक्तम्। अन्वयव्यतिरेकयोर्यथोक्तनयेन परिच्छेदासम्भवेन तन्मूलत्वानुपपत्तेः। यदि ह्यन्वयव्यतिरेकाभ्यामशेषद्रव्यशक्तीर्निश्चित्य चरकादिभिर्विरचितं शास्त्रमिति ईदृशमन्वयव्यतिरेकित्वमुच्यते, तदपाकृतम् । अद्यत्वे यावन्तावन्वयव्यतिरेकौ वयमुपलब्धुं शक्नुमस्तावद्भ्यां ताभ्यामेकदेशसंवादात् प्रामाण्यकल्पनात् तत्र प्रवर्त्तनं न तु तौ तावन्तौ शास्त्रस्य मूलं भवितुमर्हतः, सर्वैरस्मदादिभिस्तादृशशास्त्रप्रणयनप्रसङ्गात् । अनादित्वमपि शास्त्राणां वेदवदनुपपन्नम्, चरकादिकर्तृस्मृतेः, कालिदासादिस्मृतिवदविगीतत्वात्, न च चिकित्सास्मरणप्रबन्ध एवमनादिः, तथात्वेऽन्धपरम्पराकारणानवधारणात् । न च तदुक्तं तन्मूलं भवितुमर्हति व्युदस्तत्वात्, तस्मात् सर्वज्ञप्रणीत एवायुर्वेदः ।

न च स्मृतावन्धपरम्परादोषः कस्यचित् साक्षाद् द्रष्टुरभावादिति । यथा कुम्भं करोतीति कुम्भकार इत्यत्र "कर्मण्यण्" तथा हिमवन्तं शृणोतीत्यत्र कस्मान्न भवतीति चोदिते सयाह—**इह न भवत्यनभिधानादिति** ।

ननु अविदुषामुपदेशो नावकल्पते इति विद्वांसश्चरकादयः कल्प्यन्ताम्, ते तु प्रत्यक्षेणैव सर्वं विदितवन्त इत्यत्र किं मानम् ? उच्यते । अन्वयव्यतिरेकयोर्निरासान्नानुमानस्यैष विषयः, वेदमूलत्वमपि मन्वादिस्मृतिवदयुक्तं कल्पयितुम्, कर्त्तृसामान्यासम्भवादिति वर्णयिष्यामः । पुरुषान्तरोपदेशपूर्वकत्वे चरकेणैव किमपराद्धम् ? उपमानमनाशङ्कनीयमेवास्मिन्नर्थे । अर्थापत्तिस्तु न प्रमाणान्तरम्, अप्रामाण्यन्तु नास्ति बहुकृत्वः संवाददर्शनात्, अतः परिशेषात् प्रत्यक्षीकृतदेशकालपुरुषदशाभेदानुसारिसमस्तव्यस्तपदार्थसार्थशक्तिनिश्चयाश्चरकादय इति युक्तं कल्पयितुम्। यद्येवं कथं तर्हि सोमराज्यादिवाक्येषु व्यभिचारः ? व्यभिचारे चार्धजरतीयमित्युक्तम्, नैष दोषः, कर्मकर्त्तृसाधनवैगुण्यादेषु व्यभिचारो भविष्यति, वैदिकेषु च कर्मसु मीमांसकस्य समानो दोषः ।

कारीर्यादौ का ते वार्त्ता यस्यां न स्यादिष्टौ वृष्टिः ।
वैगुण्यञ्चेत् कर्त्रादीनामत्राप्येवं शक्यं वक्तुम् ॥

यदि विधुरमभुक्तं कर्म शास्त्रीयमन्यत्
फलविघटनहेतुः कल्प्यते सापि तुल्यः ।
क्वचिदथ फलसम्पद् दृश्यते तत्प्रयोगे
तदिह दृढशरीराः सन्ति दीर्घायुषश्च ॥

आयुर्वेदश्च तस्मादाप्तकृतो नान्यमूल इति सिद्धम् ।
एवं फलवेदादौ प्रकाशमाप्तप्रणीतत्वम् ॥

तस्माद् आप्तोक्तत्वस्य सिद्धमायुर्वेदादौ व्याप्तिग्रहणम् । व्याप्तिप्रदर्शनायैव सूत्रकृता "स द्विविधो दृष्टादृष्टार्थत्वात्" इत्युक्तम् । दृष्टार्थशब्दे गृहीताविनाभावमाप्तोक्तत्वम्, अदृष्टार्थेऽपि प्रामाण्यं साधयतीति । अत एवोक्तम्, "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्" इति ।

ते तु प्रत्यक्षेणैव सर्वं विदितवन्तो न पुनरनुमानागमाभ्यामपीति । **अविदुषामुपदेशो नावकल्पत** इत्यनया युक्त्या विद्वांसः कल्पन्तां नामेति ।

एवं फलवेदादाविति । फलवेदः शस्यपालशास्त्रम् ।

नन्वत्रापि न वैद्यकं विरचयन् दृष्टो मुनिः सर्ववित्
तद्व्याप्तिग्रहणं जने यदि मृषायुर्वेदसङ्कीर्त्तनम् ।
सत्यं किन्तु दृढा तथापि चरकाद्याप्तस्मृतिर्वैद्यके
नासौ चार्यनिबन्धनेति कथिता तस्येह दृष्टान्तता ॥
इत्यायुर्वेदवाक्यप्रभृतिषु भवति व्याप्तिराप्तोक्ततायाः
पूर्वोक्तेन क्रमेण स्फुटमकथि तथा पक्षधर्मत्वमस्याः ।
न प्रत्यक्षागमाभ्यामपहृतविषया नानुमानान्तरेण
व्याधूता वेति सैषा भजति गमकतां पञ्चरूपोपपत्तेः ॥
अनपेक्षतया न वेदवाचां घटते निष्प्रतिमः प्रमाणभावः ।
क्व गिरामयथार्थतानिवृत्तिः पुरुषप्रत्ययमन्तरेण दृष्टा ॥
तत्प्रत्ययाद् बहुतरद्रविणव्ययादि-
साध्येषु कर्मसु तपःसु च वैदिकेषु ।
युक्तं प्रवर्त्तनमबाधनकेन नैव
तत्सिद्धिरित्यलमसम्मत एष मार्गः ॥

तस्मादाप्तोक्तत्वादेव वेदाः प्रमाणमिति सिद्धम् ।

वेदप्रामाण्यसाधने प्रकारान्तरम्

अन्ये त्वन्यथा वेदप्रामाण्यं वर्णयन्ति । तस्य हि प्रामाण्येऽभ्युपगतपरलोकोऽनभ्युपगतपरलोको वा परो विप्रतिपद्यते । तत्रानभ्युपगतपरलोकं प्रति तावदात्मनित्यतादिन्यायपूर्वकं परलोकसमर्थनमेव विधेयम् । परलोकवादिनान्तु मते यदेतत् सुखिदुःख्यादिभेदेन जगतो वैचित्र्यं दृश्यते तदवश्यं कर्मवैचित्र्यनिबन्धनमेव । कर्माणि चाननुष्ठितानि नात्मानं लभन्ते । अलब्धात्मनाञ्च नभःकुसुमनिभानां कुतो विचित्रसुखदुःखादिफलसाधनत्वम् ? तस्मादनुष्ठानमेषामेषितव्यम् । अनुष्ठानञ्च

तद्व्याप्तिग्रहणं जने यदीति । लोके सत्यार्थमाप्तप्रणीतं वचो दृष्टम्, वचनमपि च सत्यार्थम्, तस्मादाप्तप्रणीतमिति । **मृषायुर्वेदसङ्कीर्तनम्** । येन तस्याप्तप्रणीतत्वं सिद्धयति तेनैव वेदस्य सेत्स्यतीति । **अकथि** कथितम् **अनपेक्षतया न वेदवाचामिति** । नित्यत्वेन पुरुषगुणापेक्षाया अभावादित्यर्थः ।

नाविदितस्वरूपाणां कर्मणामुपपन्नम् । अजानन् पुरुषस्तपस्वी किमनुतिष्ठेत् ? तदवश्यं ज्ञात्वानुष्ठेयानि कर्माणि । तदिदानीं तेषां परिज्ञाने कोऽभ्युपायः ? न प्रत्यक्षमस्मदादीनां स्वर्गाद्यदृष्टपुरुषार्थसाधनानि कर्माणि दर्शयितुं प्रभवति ।

नाप्यनुमानम्, अन्वयव्यतिरेकाभ्यां तृप्तिभोजनयोरिव स्वर्गयागयोः साध्यसाधनसम्बन्धानवधारणात् । जगद्वैचित्र्यान्यथानुपपत्त्या तु विचित्रं कारणमात्रमनुमीयते न च तावतानुष्ठानसिद्धिः । उक्तञ्च

अधर्मे धर्मरूपे वाप्यविभक्ते फलं प्रति ।
किमप्यस्तीति विज्ञानं नराणां क्वोपयुज्यते ॥ इति ।

उपमानन्त्वत्र शङ्क्यमानमपि न शोभते। नापि परस्परमुपदिशन्तो लौकिकाः कर्माणि परलोकफलानि जानीयुरिति वक्तुं युक्तम्, अज्ञात्वा उपपादयतामाप्तत्वायोगात् । ज्ञानन्तु लौकिकानां दुर्घटं प्रमाणाभावाद् इत्युक्तत्वात् । एवमेव हि पुरुषोपदेशपरम्पराकल्पनायामन्धपरम्परान्यायः स्यात् । तस्माद् अवश्यमभ्युपगतपरलोकैः परलोकफलानि कर्माणि कुर्वद्भिः शास्त्रात् कर्मावबोधोऽभ्युपगन्तव्यः । शास्त्रञ्च वेदा एवेति सिद्धं तत्प्रामाण्यम् ।

लोकप्रसिद्धेर्न धर्माधर्मज्ञापकत्वम्

ननु लोकप्रसिद्धित एव धर्माधर्मसाधनानि कर्माणि ज्ञास्यन्ते, किं शास्त्रेण ? उपकारापकारौ हि धर्माधर्मयोर्लक्षणमिति प्रसिद्धमेवैतत् । तथाह व्यासः

इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥ इति ।

नैतद्युक्तम् । लोकप्रसिद्धेर्निर्मूलायाः प्रमाणत्वानुपपत्तेः । लोकप्रसिद्धिर्नाम लौकिकानामविच्छिन्ना स्मृतिः । स्मृतिश्च प्रभवन्ती प्रमाणान्तरमूला भवति न स्वतन्त्रेत्यवश्यमस्या मूलमन्वेषणीयम् । तच्च प्रत्यक्षादि नोपपद्यते इति नूनं शास्त्रमूलैव लोकप्रसिद्धिः, विरुद्धानेकप्रकारत्वाच्च लोकप्रसिद्धेर्न तस्यां स्वतन्त्रायां

अधर्मे धर्मरूपे वेति । विचित्रं धर्माधर्माख्यं कारणमात्रमर्थापत्त्यावगम्यते, न पुनर्विभागेनार्थापत्तितोऽवगतिरस्ति, अमुष्मात् कर्मणोऽनुष्ठिताद् इदमिष्टं फलमवाप्यतेऽमुष्मात्त्विदमनिष्टमिति । **क्वोपयुज्यते**ऽनुष्ठानानौपयिकत्वात् ।

पदद्वये वस्तुद्वये । **विरुद्धानेकप्रकारत्वादिति** । विरुद्धो वृकचटकन्यायेन हिंसा

समाश्वसिति लोकः। न चोपकारकमात्रलक्षणावेव धर्माधर्मौ वक्तुं युज्येते, जपशीधुपानादौ तदभावात् गुरुदारगमनादौ च विपर्ययात्, इत्यवश्यं शास्त्रशरणावेव तावेषितव्यौ।

अपि चेदमिष्टिसत्रादिकमेव फलम्। अयमस्मिन्नधिकृत इति। इयमितिकर्त्तव्यता, एष देश, इमे ऋत्विज इत्यादि किं लोकप्रसिद्धेरधिगन्तुं शक्यते ? तस्मादवश्यं शास्त्राधीन एव विशिष्टकर्मावबोध एषितव्यः। शास्त्रञ्च वेद एवेत्युक्तम्। अतस्तस्य निर्विवादसिद्धमेव प्रामाण्यमिति।

एतावता कर्मप्रभृतीनामनादित्वे वेदस्यानादित्वान्नित्यत्वमपीति शङ्कानिरसनम्

एवन्तु वर्ण्यमाने संसारानादित्वं तावदुक्तं स्यात्। वेदस्यानादित्वं कर्मज्ञानानादित्वात्। यतश्च मीमांसकवर्त्मनैव प्रमाणता सिद्धयति नाप्तवादात्, तस्माद् यथोदाहृत एव मार्गः प्रमाणतायामनुवर्त्तनीयः। अथवा

वयमपि न विशिष्टोऽनादिसंसारपक्षं
युगपदखिलसर्गध्वंसवादे तु भेदः।
अकथि च रचनानां कार्यता तेन सर्गात्
प्रभृति भगवतेदं वेदशास्त्रं प्रणीतम्॥

अनादिरेवेश्वरकर्तृकोऽपि सदैव सर्गप्रलयप्रबन्धः।
सर्गान्तरेष्वेव च कर्मबोधो वेदान्तरेभ्योऽपि जनस्य सिध्येत्॥

धर्म इत्येवमादिरूपोऽनेकप्रकारो यस्याः। **गुरुदारगमनादौ च विपर्ययात्**। निषिद्धत्वेनाधर्मरूपेऽप्युपकारापेक्षया धर्मत्वप्राप्तेः।

इष्टिसत्रादीति। इष्टयो दर्शपूर्णमासाद्याः सत्राणि द्वादशाहादीनि।

युगपदखिलसर्गेति। अस्माकमप्यनादिरेव संसारः। कदाचित् तु युगपत् सर्वं प्रलीय पुनरुद्भवति। भवतान्तु क्रमेण सृष्टिप्रलयाविति विशेषः। **अकथि च रचनानां कार्यता**

अन्यत्वे किं प्रमाणं ननु तव सुमते किं तदैक्यप्रमाणं
ध्वस्तं तावत् समस्तं भुवनमिति तदा वेदनाशोऽप्यवश्यम् ।
एकस्त्वीशोऽवशिष्टः स च रचयति वा प्राक्तनं संस्मरेद् वा
वेदे स्वातन्त्र्यमस्मान्नियतमुभयथाप्यस्ति चन्द्रार्धमौलेः ॥

एकस्य तस्य मनसि प्रतिभासमानो
वेदस्तदा हि कृतकान्न विशिष्यतेऽसौ ।
प्रत्यक्षसर्वविषयस्य तु नेश्वरस्य
युक्ता स्मृतिः करणमेव ततोऽनवद्यम् ॥

तेनाप्तनिर्मिततयैव निरत्ययार्थ-
सम्प्रत्ययोपजननाय जनस्य वेदे ।
शास्त्रं सुविस्तरमपास्तकुतर्कमूल-
मोहप्रपञ्चमकरोन्मुनिरक्षपादः ॥

त्रय्याः प्रामाण्येऽपि नाथर्ववेदस्येति शङ्का

अत्र कश्चिदाह, युक्तमितरेतरव्यतिषक्तार्थोपदेशित्वेनैककर्तृकत्वानुमानद्वारकं त्रिवेद्याः प्रामाण्यम्, अथर्ववेदस्य तु त्रय्याम्नातधर्मोपयोगानुपलब्धेस्त्रयीबाह्यत्वेन (न?) तत् समानयोगक्षेमत्वम्। अनपेक्षत्वलक्षणप्रामाण्यपक्षेऽपि विक्षिप्त-

---

कथितेत्यर्थः। **नेश्वरस्य युक्ता स्मृतिरिति**। स्मृतिर्हि परोक्षे भवति, तस्य च सकलदर्शित्वात् तदानीमनुभव एव वैदिकानां शब्दानां वक्तव्यः। अनुभवाश्रयणे च वर्तमानकालविशिष्टस्यानुभवोऽङ्गीकार्यः तत्कालविशिष्टस्य वा ? तत्कालविशिष्टस्यानुभवे वर्तमाने सर्गे प्राणिनां वेदाग्रहणं स्यात्, वर्तमानकालविशिष्टस्य त्वनुभवे प्राक्तनादन्यत्वात् प्राङ्नीत्या शब्दानित्यत्वादवश्यमपूर्वकरणमेवायाति । संस्काराच्च ज्ञाने विनष्टे कालान्तरे संस्कारप्रबोधात् स्मृतिर्भवति, नित्यज्ञानत्वाच्च भगवतः कथं स्मृतिसम्भव इति ।

अनपेक्षत्वलक्षणप्रामाण्यपक्षेऽपीति। मीमांसकपक्ष इत्यर्थः। होत्रध्वर्य्वादिव्यापाराणां व्यतिषङ्गः परस्परसम्बन्धः।

शाखान्तरोपदिष्टविशिष्टज्योतिष्टोमाद्यनेककर्मानुप्रविष्टहौत्राध्वर्यवादिव्यापारव्यतिषङ्गदर्शनात् तदर्था त्रय्येव यथा प्रमाणभावभागिनी भवितुमर्हति न तथा पृथग्व्यवहारा आथर्वणश्रुतिः। तथा च लोके चतस्र इमा विद्याः प्राणिनामनुग्रहाय प्रवृत्ता आन्वीक्षकी त्रयी वार्त्ता दण्डनीतिरिति प्रसिद्धिः।

श्रुतिस्मृती अपि तदनुगुणार्थे एव दृश्येते, श्रुतिस्तावद् "ऋग्भिः प्रातर्दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्येऽह्नः सामवेदेनास्तमेति वेदैरशून्यस्त्रिभिरेति सूर्यः" इति, तथा "प्रजापतिरकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेमांस्त्रींल्लोकानसृजत पृथिवीमन्तरिक्षं दिवमिति तांल्लोकानभ्यतपत्तेभ्यस्त्रीणि ज्योतींष्यजायन्त अग्निरेव पृथिव्या अजायत वायुरन्तरिक्षाद्दिव आदित्य इति तानि ज्योतींष्यभ्यतपत् तेभ्यस्त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेद" इति, तथा 'सैषा विद्या त्रयी तपती'ति स्मृतिरपि मानवी प्रतिवेदं द्वादशवार्षिकब्रह्मचर्योपदेशिनी दृश्यते 'षाट्त्रिंशदब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतमि'ति। श्राद्धप्रकरणेऽपि

यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम्।
शाखान्तगमथाध्वर्युं छन्दोगं वा समाप्तिगमिति॥

त्रिवेदपारगानेव श्राद्धभुजो ब्राह्मणान् दर्शयति नाथर्ववेदाध्यायिनः। प्रत्युत निषेधः क्वचिदुपदिश्यते 'तस्मादाथर्वणं न प्रवृञ्ज्यादि'ति।

प्रजापतिरकामयतेति। बहुः स्यामेको वर्तमानोऽनेकः स्यामित्यर्थः। कथञ्च तथात्वमित्याह **प्रजायेये**ति भूतात्मनोत्पद्येयेत्यर्थः। **स तपोऽतप्यत** इति। तप इव तप इति 'तपः' शब्देन सङ्कल्पोऽभिहितः। सत्यसङ्कल्पत्वात् परमेश्वरस्य, तपसा यत्साध्यते तस्य सङ्कल्पमात्रेणैव सिद्धेः। उक्तञ्च "यस्य ज्ञानमयं तपः" इति। तपोऽतप्यत सङ्कल्पमकरोदित्यर्थः। **तांल्लोकानभ्यतपत्** सारोद्धरणायालोचयत्। **षाट्त्रिंशदब्दिकमि**त्यस्योत्तरमर्धम् "तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा" इति। ब्रह्मचारिणा चर्यं चरणीयं ब्रह्म। क्व? गुरौ गुरुगृहे। किमर्थम्? त्रैवेदिकं त्रिवेदग्रहणार्थम्। किंकालावच्छिन्नम्? तदाह "षाट्त्रिंशदब्दिकम्" षट्त्रिंशतोऽब्दानां समाहारः षट्त्रिंशदब्दं तत्र भवं षाट्त्रिंशदब्दिकम्। "ग्रहणान्तिकमेव वा"इति यावता कालेन वेदत्रयं ग्रहीतुं शक्नोति तावन्तं कालमित्यर्थः। **'आथर्वणेन न प्रवृञ्ज्यात्'** इति आथर्वणेन कर्मणा त्रय्युक्तं कर्म न प्रवृञ्ज्यान्न मिश्रयेदिति ब्राह्मण उपदेशः।

पूर्वोक्तशङ्कायाः समाधानम्

एवमाक्षेपे सति केचिदाचक्षते

यदि यज्ञोपयोगित्वं नेहास्त्याथर्वणश्रुतेः ।
अर्थान्तरे प्रमाणत्वं केनास्याः प्रतिहन्यते ॥
शान्तिपुष्टयभिचारार्था एकब्रह्मर्त्विगाश्रिताः ।
क्रियास्तया प्रमीयन्ते त्रय्येवात्मीयगोचराः ॥ इति ।

एवं तत्तु सर्वं न साध्वभिधीयते । तथा हि 'तत्प्रमाणं बादरायणस्यानपेक्षत्वादि'ति य एष वेदप्रामाण्याधिगतौ जैमिनिना निरदेशि पन्थाः, यो वाक्षपादेन कणादेन प्रकटितः 'तद् वचनादाम्नायस्य प्रामाण्यमि'ति 'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादि'ति स चतुर्ष्वपि वेदेषु तुल्यः। तत्र विशेषतुषोऽपि न कश्चिदस्ति प्रयत्नेनान्विष्यमाणः प्राप्यते । न हि मीमांसकपक्षे एवं वक्तुं शक्यते त्रय्येवानादिमती नाथर्वणश्रुतिः, तस्यां कर्तृस्मरणसम्भवादिति । नापि नैयायिकादिपक्षे एवं शक्यम् आप्तप्रणीतास्त्रयोवेदाश्चतुर्थस्तु नाप्तप्रणीत इति । तेन प्रामाण्याधिगमोपायाविशेषात् समानयोगक्षेमतया चत्वारोऽपि वेदाः प्रमाणम् द।

यदि यज्ञोपयोगित्वमिति । "क्रीतराजकभोज्यान्न" इत्येतद् वाक्यमथर्ववेदेऽस्ति । "अग्नीषोमीये संस्थिते दीक्षितस्य गृहे नाश्नीयात्" इत्येतच्च त्रय्यां श्रूयते । अथर्ववेदस्य यज्ञोपयोगशून्यत्वेन प्रामाण्यमेव नास्त्यतः कथमस्य त्रयीगतेन "अग्नीषोमीये संस्थि दीक्षितस्य गृहे नाश्नीयात्" इत्यनेन सह विरोध इत्याशङ्क्य तन्त्रटीकायामुक्तम्

क्रीतराजकभोज्यान्नवाक्यं चाथर्ववैदिकम् ।
न च तस्याप्रमाणत्वे किञ्चिदप्यस्ति कारणम् ॥

यज्ञानुपयोगः कारणमिति चेन्नेत्याह यदि यज्ञोपयोगित्वमिति । **आत्मीयगोचरा** इति । आत्मीयः स्वसम्बन्धी पदार्थो गोचरो विषयो यासाम् । यः पदार्थो यस्मिन् वेद उत्पन्नः स पदार्थस्तस्य वेदस्यात्मीयः, अतस्तेन वेदेन तत्पदार्थविषयाः क्रियाः । यथासौ पदार्थः क्रियतेऽनुष्ठीयते तथा प्रमीयते प्रतिपाद्यते नान्यपदार्थगोचराः । यथा यजुर्वेद उत्पन्नयोर्दर्शपूर्णमासयोः क्रिया यजुर्वेदेन प्रतिपाद्यते न सामवेदोत्पन्नस्य श्येनादेरिति । **एकब्रह्मर्त्विगाश्रिता** इति । ऋत्विगन्तरनिरपेक्षेण ब्रह्मणैव निर्वर्त्यन्ते याः ।

व्यवहारादितोऽप्यथर्ववेदस्य प्रामाण्यम्

व्यवहारोऽपि सर्वेषां सारेतरविचारचतुरचेतसां चतुर्भिरपि वेदैश्चतुर्णां वर्णानामाश्रमाणाञ्चतसृषु दिक्षु चतुरब्धिमेखलायामवनौ प्रसिद्ध इति कोऽयमत्रान्यथात्वभ्रमः ? श्रुतिस्मृतिमूलश्चार्यावर्त्तनिवासिनां भवति व्यवहारः । ते च श्रुतिस्मृती चतुरोऽपि वेदान् समानकक्षानभिवदतः । ऋग्यजुःसामवेदेष्वपि अथर्ववेदाशंसीनि भूयांसि वचांसि भवन्ति । तद् यथा शतपथे अथ तृतीयेऽहनीत्युपक्रमस्याश्वमेधे पारिप्लवोपाख्याने 'सोऽयमाथर्वणो वेद' इति श्रूयते, छान्दोग्योपनिषदि च "ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ" इति पठ्यते ।

नन्वितिहासपुराणानि पञ्चम इति तत्र पठ्यत एव किञ्चातः ? किमियताथर्वणश्चतुर्थो न भवति वेदः ? चतुर्थशब्दोपादानादितिहासादितुल्योऽसौ न वेदसमानकक्ष इति चेत्, केयं कल्पना ? चतुर्थशब्दोपादानादप्राधान्ये 'त्रयो वेदा असृज्यन्त, इत्यादौ त्रित्वसंख्योपादानात् तेऽपि न प्रधानतामधिगच्छेयुः ? इतिहासादिभिर्वा सह परिगणनमप्राधान्यकारणं यदुच्यते तदपि सर्ववेदसाधारणमिति यत्किञ्चिदेतत् । तथा शताध्ययनेऽपि 'ऋचो वै ब्रह्मणः प्राणाः, इत्यभ्युपक्रम्य 'आथर्वणो वै ब्रह्मणः समान' इति पठ्यते, तथा 'येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत' इति, तथा तैत्तिरीये 'तस्माद् वा एतस्मात् प्राणमयादन्योऽन्तर आत्मा मनोमयः' इति प्रस्तुत्य 'तस्य यजुरेव शिरः ऋग् दक्षिणः पक्षः सामोत्तरः पक्षः आदेश आत्माथर्वाङ्गिरसः पुच्छं प्रतिष्ठा' इति पठ्यते, तथान्यत्र 'ऋचां

अश्वमेधे पारिप्लवोपाख्यान इति । तत्र राजानमभिषिञ्चतीति राज्ञोऽभिषेकसमयेऽभिषेचनीयेष्टिक्रमे आख्यानानि सन्तीति । हरिश्चन्द्रोपाख्यानं शौनकोपाख्यानं विशिष्टर्षिराजचरितसम्बन्धा ग्रन्थविशेषाः पाठ्यत्वेन चोदिताः, तत्र च पारिप्लवोपाख्यानस्याथर्ववेदतया स्तुतिः कृता ।

तथा येऽस्य प्रत्यञ्चो रश्मय इति । तत्र 'आदित्यो वै देवमध्वि'ति प्रकृते येऽस्य देवमध्वात्मन आदित्यस्य । **मधुनाड्यो** नु मधुधारिण्यः ऋच एव पुष्पं मधुजनकम् । अथर्वाङ्गिरस इत्यथर्ववेदमन्त्राणामाख्या । **अथर्वाङ्गिरस एव मधुकृत** इत्यत्रेतिहासपुराणं पुष्पमिति ग्रन्थशेषः । **मनोमय** इति । आशुगतित्वाद् । पुरुषविधतां रूपयित्वा तदवयवविभागमाह **यजुरेव शिर** इत्यादि । **आदेशः** "आदित्यो वै ब्रह्म" इत्यादिको

प्राची महती दिगुच्यते दक्षिणामाहुर्यजुषाम् साम्नामुत्तराम् अथर्वणामङ्गिरसां प्रतीची महती दिगुच्यते, इति, शतपथे ब्रह्मयज्ञविधिप्रक्रमे "मध्वमे पय आहुतयो वा एता देवानां यदृचः' इत्युपक्रम्य 'मेद आहुतयो वा एता देवानां यदथर्वाङ्गिरसः स्म य एवं विद्वानथर्वाङ्गिरसोऽहरहः स्वाध्यायमधीते मेद आहुतिभिरेव देवान् स तर्पयति त एनं तृप्तास्तर्पयन्ति' इति मन्त्रा अपि तदर्थप्रकाशनपरा अनुश्रूयन्ते। "त्वामग्ने पुष्करादध्यथर्वा निरमन्थत" इत्यादयो न चैषामथर्वा नाम कश्चिदृषिरित्येवम्प्रकारं व्याख्यानं युक्तम्, अन्यत्राप्यसमाश्वासप्रसङ्गात्। इत्येवञ्जातीयकास्तावदुदाहृताः श्रुतिवाचः। स्मृतिवाक्यानि खल्वपि, मनुस्तावत् "श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यभिचारयन्" इति श्रुतिशब्देन त्रयीवद् व्यवहरति। याज्ञवल्क्यः चतुर्दशविद्यास्थानानि गणयन्

पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ इति

चतुर एव वेदानावेदयते, नान्यथा हि चतुर्दशसंख्या पूर्यते, स्मृत्यन्तरे च स्पष्टमेवोक्तम्

रहस्यविधिरूपो अंशविशेषः। **प्रतिष्ठेति**। पुच्छे हि सति लब्धप्रतिष्ठो भवति। **ब्रह्मयज्ञविधिप्रक्रम** इति। ब्रह्मयज्ञो यत्र वेदाध्ययनमेव विशिष्टयेतिकर्तव्यतया क्रियते। तत् क्रियमाणं यज्ञशब्दवाच्यम्। **त्वामग्नेपुष्करादिति**। "त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः" इत्यग्निनिर्मथने मन्त्रः। अत्राथर्वशब्देनाथर्वविद् ब्रह्माभिहितः। हे अग्ने त्वां पुष्करादरणिषु शिरारूपादाकाशाद् अथर्वा अथर्वविद् ब्रह्मा निरमन्थत निर्मथितवानुदपादयत्। अरणिस्पर्शनरूपव्यापारवत्त्वेन तत्कर्मणि तस्य मुख्यत्वात्। कथञ्च निरमन्थत ? अधि आधिपत्येन युक्तः, ऋत्विगन्तराणामनुज्ञादानेन तस्य प्रशास्तृत्वात्। तदनन्तरन्तु विश्वस्य मूर्ध्नो मूर्धानः प्रधानभूता वाघत ऋत्विजोऽग्निं निर्मथितवन्तः, होत्रादयः वाघत ऋत्विजः, 'ऋत्विजो भरताः कुरवो वाघतः' इति ऋत्विङ्नामसु पाठात्। अत्र ब्रह्मण ऋत्विक्त्वेऽपि मुख्यत्वेन पृथङ्निर्देशो 'ब्राह्मणा आगता वशिष्ठाश्च' इतिवत्। **श्रुतीरथर्वाङ्गिरसीरित्यस्यान्त्यमर्धम्** 'वाक्छस्त्रं ब्राह्मणस्य तेन हन्यादरीन् द्विजः' इति। वागत्राभिचाररूपा विवक्षिता। अथर्वमन्त्रैराभिचारिकैः शत्रूनभिचरेदित्यर्थः। कुर्यात् प्रयुञ्जीत।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥ इति ।

अन्यत्राप्युक्तम् 'पुराणं धर्मशास्त्रं मीमांसा न्यायश्चत्वारो वेदाः षडङ्गानीति चतुर्दश विद्यास्थानानी'ति । शातातपोऽप्याह

ऋक्सामयजुरङ्गानामथर्वाङ्गिरसामपि ।
अणोरप्यस्य विज्ञानाद् योऽनूचानः स नो महान् ॥ इति ।

तथान्यत्र 'चत्वारश्चतुर्णां वेदानां पारगा धर्मज्ञाः परिषदि'त्युक्तम् । शङ्खलिखितौ च 'ऋग् यजुः सामाथर्वविदः षडङ्गविद् धर्मविद् वाक्यविद् नैयायिको नैष्ठिको ब्रह्मचारी पञ्चाग्निरिति 'दशावरा परिषदि'त्यूचतुः । प्राचेतसे 'चत्वारो वेदविदो धर्मशास्त्रविदिति पञ्चावरा परिषदि'त्युक्तम् । तथा च पङ्क्तिपावनप्रस्तावे चतुर्वेदः षडङ्गवित् ज्येष्ठसामगोऽथर्वाङ्गिरसोऽप्येते पङ्क्तिपावना गण्यन्ते । तदयमेवमादिवेदचतुष्टयप्रतिष्ठाप्रगुण एव प्राचुर्येण धर्मशास्त्रकाराणां व्यवहारः । अन्येऽपि शास्त्रकारास्तथैव व्यवहरन्तो दृश्यन्ते । यथा च महाभाष्यकारो भगवान् पतञ्जलिरथर्ववेदमेव प्रथममुदाहृतवान् 'शन्नो देवीरभिष्टये, इति, मीमांसाभाष्यकारेणापि वेदाधिकरणे 'काठकं कालापकं मौद्गलं पैप्पलादकम्' इति यजुर्वेदादिकवद्अथर्व-

---

अणोरप्यस्य विज्ञानादिति न केवलम्, अपि तु
न हायनै र्न पलितै र्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ इति ।

'वर्षादिकृतज्यैष्ठ्यव्यतिरेकेण साङ्गवेदाध्ययनबललब्धानूचानव्यपदेशो नोऽस्माकं महान् ज्यायान्' इत्येवम् ऋषयो धर्ममर्यादां कृतवन्तः । यावदस्य पूर्वोक्तस्य ऋगादेः सम्बन्धिनोऽणोरपि स्वल्पस्यापि अर्थद्वारेण विज्ञानादपि यो लब्धानूचानव्यपदेशः सोऽपि नो महानिति ऋषयो धर्मं चक्रिर इत्यर्थः ।

नैष्ठिको ब्रह्मचारी यो ब्रह्मचर्येणैव शरीरं निष्ठाम् अन्तं नयति । **पञ्चाग्निः** सभ्यावसथ्याभ्यां सह त्रेतया । **वेदाधिकरण** इति । यत्र 'वेदांश्चैके सन्निकर्षं पुरुषाख्या' इति कठादिकृतत्वेन काठकादिसमाख्यावशात् कृतकत्वेन वेदानां पूर्वपक्षः कृतः, वेदांश्चैके सन्निकर्षं सन्निकृष्टकालभवं वाक्यजातं मन्यन्ते । यतः पुरुषैः काठकादिभिस्तस्य

वेदेऽपि पैप्पलादकमुदाजह्रे । सर्वशाखाधिकरणेऽपि वेदान्तरशाखान्तरवन्मौद्गलपैप्पलादकाख्ये अथर्वशाखे अप्युदाहृत्य विचारः कृतः । तथा च प्रथमयज्ञो नाम चतुर्षु वेदेषु न कश्चिदस्तीत्यधिकरणान्तरे एव लिखितम् । एवं श्रुतिस्मृतिशिष्टाचारव्यवहारविदामत्र विप्रतिपत्तिसम्भावनैव नास्ति ।

आह, न ब्रूमोऽथर्ववेदो न प्रमाणमिति, किन्तु त्रयीबाह्य इति । उच्यते । त्रयीयमथर्ववेदबाह्यैव न केवलम्, एवं त्रय्यामपि परस्परबाह्यत्वमस्त्येव । ऋक्सामबाह्यानि यजूंषि, यजुःसामबाह्या ऋचः, ऋग्यजुर्बाह्यानि सामानीति कियानयं दोषः ? सर्वभावानामितरेतरसाङ्कर्यरहितत्वात् । ये हि शब्दात्मानो ग्रन्थसंदर्भस्वभावा ये च तदभिधेया अर्थस्वभावास्ते सर्वेऽन्योन्यसंमिश्रितात्मान एव । न च परेणात्मानममिश्रयन्तोऽपि ते स्वरूपमपि हारयन्तीति ।

अथोच्यते नेदृशं त्रयीबाह्यत्वमथर्ववेदे विवक्षितम्, अपि तु यदेष न त्रयीप्रत्ययं कर्मोपदिशति न तत्सम्बद्धं किञ्चिदिति तदस्य त्रयीबाह्यत्वमिति । एतदपि

आख्येति, ततः सिद्धान्तितम् 'आख्या प्रवचनात्' इति । प्रवचननिमित्ताप्याख्या भवति न केवलं कर्तृनिमित्ता । यतः कठेन प्रकर्षेणाध्ययनमस्य कृतमतः काठकमित्यभिधीयते, "तेन प्रोक्तम्" इति प्रोक्तेऽपि तद्धितस्मरणात् । **सर्वशाखाधिकरणेऽपीति** । सर्वशाखाधिकरणं यत्र प्रतिशाखं श्रूयमाणानि अग्निहोत्रादिकर्माणि किमन्यान्यानि आहोस्विद् एकमेव तत्कर्मेति चिन्त्यते । तत्र काठकं कालापकमित्याद्यभिधानाद् भेदः, क्वचिदग्नीषोमीय एकादशकपालः श्रूयते क्वचिद् द्वादशकपाल इत्यादिरूपभेदादिभ्यश्च भिन्नत्वमिति पूर्वपक्षमाशङ्क्य सर्वशाखास्वेकतया प्रत्यभिज्ञायमानत्वात् सर्वशाखापेक्षोत्पत्तिकं सर्वशाखाप्रत्ययमेकं कर्मेति व्यवस्थापितम् । **अधिकरणान्तर** इति । "सङ्ख्यायुक्तं क्रतोः प्रकरणात्" इत्यत्र । अत्र हि "एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमः" इति वचनसमाश्रयणेन ज्योतिष्टोमस्य प्रथमयज्ञत्वं पूर्वपक्षे व्यवस्थाप्य सिद्धान्ते प्रथमप्रयोगाभिप्रायेण प्रथमयज्ञशब्दो निरूपितः 'प्रथमं प्रयुज्यमानो यज्ञः प्रथमयज्ञः' इति । अत्र प्रसङ्गे चेदमुक्तम् "न चैतदस्ति यज्ञस्यैष वाद इति । चतुर्ष्वपि वेदेषु न प्रथमयज्ञ इत्येवंसंज्ञकः कश्चिद् यज्ञोऽस्ति" इति ।

न त्रयीप्रत्ययमिति त्रयीप्रत्ययं त्रयीप्रतिपाद्यम् । **तत्सम्बद्धम्** त्रयीप्रत्यय-

न साधूपदिष्टम्। इष्टिपश्वेकाहाहीनसत्रादिकर्मणां तत्रोपदेशदर्शनात्। सर्वशाखाप्रत्ययमेकं कर्मेति न्यायात् त्रय्युपदिष्टेऽपि कर्मणि अथर्ववेदात्। सम्बद्धसर्वशाखाप्रत्ययमेव नाथर्वशाखाप्रत्ययम्, यतः सोमयागादिकर्मणामृग्वेदेन हौत्रं यजुर्वेदेनाध्वर्यवं सामवेदेनौद्गात्रं क्रियते नाथर्ववेदेन किञ्चिदिति। तदयुक्तम्, अथर्ववेदेन ब्रह्मत्वस्य करणात्। तथा च गोपथब्राह्मणम् 'प्रजापतिः सोमेन यक्ष्यमाणो वेदानुवाच कं वो होतारं वृणीयमि'ति प्रक्रम्य 'तस्मादृग्विदमेव होतारं वृणीष्व स हि हौत्रं वेद यजुर्विदमेवाध्वर्युं वृणीष्व स हि आध्वर्यवं वेद सामविदमेवोद्गातारं वृणीष्व स हि औद्गात्रं वेद अथर्वाङ्गिरोविदमेव ब्रह्माणं वृणीष्व स हि ब्रह्मत्वं वेदे'ति। एवमभिधाय पुनराह 'अथ चेन्नैवंविधं होतारमध्वर्युमुद्गातारं ब्रह्माणं वा वृणुते पुरस्तादेव वैषां यज्ञो रिच्यते इति तस्मादृग्विदमेव होतारं कुर्याद् यजुर्विदमेवाध्वर्युं सामविदमेवोद्गातारम् अथर्वाङ्गिरसोविदमेव ब्रह्माणमि'ति। तथा 'यज्ञे यदूनं च विरिष्टं च यातयामं च करोति तदथर्वणां तेजसाप्याययतीति। अथ नर्ते भृग्वङ्गिरोविद्भ्यः सोमः पातव्य' इति।

नन्वेताः श्रुतीरथर्वाण एवाधीयते नान्ये त्रयीविदः। ते त्वेवं पठन्ति 'यदृचा हौत्रं क्रियते यजुषाध्वर्यवं साम्ना औद्गात्रम्। अथ केन ब्रह्मत्वं क्रियते इति त्रय्या

सम्बद्धम्। **इष्टिपश्विति**। इष्टयः दर्शपूर्णमासाद्याः। पशवोऽनूबन्ध्याद्याः। **एकाहा** ज्योतिष्टोमादयः। **अहीना** अहर्गणद्विरात्रादयः। **सत्राणि** द्वादशाहादीनि। **त्रय्युपदिष्टेऽपि कर्मणि अथर्ववेदादिति**। तस्माद् ब्रह्मा पुरस्ताद् होमसंस्थितहोमैर्यज्ञं परिगृह्णीयादित्यनारभ्य वाक्यमिष्टिपशुसोमादिष्वाथर्वणं पुरस्ताद्धोमं संस्थितहोमं च ब्रह्मणा क्रियमाणं दर्शयति, अथर्ववेद एव तयोर्होमयोराम्नानादिति। **वेदानुवाच कं वो होतारमि**त्यत्र कं किंज्ञमिति व्याख्येयम्, उत्तरे ऋग्विदमित्यादिश्रवणात्। वः युष्माकं मध्यात् किंज्ञं वृणोमीत्यर्थः। **पुरस्तादेवैषां यज्ञो रिच्यते** प्रथमत एव रिक्तो भवति। **यज्ञे यदूनमिति**। ऊनमङ्गैरसम्पूर्णम्। **विरिष्टं** विशेषेण रिष्टं, हिंसितमसम्यक्कृतमन्त्रादिप्रयोगम्। **यातयामं** निर्वीर्यम्। **अथर्वणां** मन्त्राणाम्। **नर्ते भृग्वङ्गिरोविद्भ्य** इति। यावद् भृग्वङ्गिरोविद ऋत्विजो ब्रह्माख्या न भवन्ति तावदन्यवेदविदि सत्यपि ब्रह्मणि सोमपानाधिकारो नास्तीत्यर्थः।

विद्ययेति ब्रूयादिति । तथा च यदृचैव हौत्रमकुर्वत यजुषाध्वर्यवं साम्नौद्गात्रं यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमिति' ।

उच्यते । वयमप्येवमादीनि वाक्यानि न नाधीमहि किन्त्वेषामयमेवार्थोऽथर्वाङ्गिरोविदेव ब्रह्मेति । कथम् ? यतो न त्रयी नाम किमपि वस्त्वन्तरम्, अपि तु त्रयाणां वेदानां समाहार इति । समाहारश्च समाह्रियमाणनिष्ठो भवति । समाह्रियमाणाश्च ऋग्वेदादयस्त्रयो हौत्रादिपरत्वे चरितार्था न पुनस्तत्र भेदमर्हन्ति । एकैकशः चरितार्थानां समुदायोऽपि चरितार्थ एव । समुदायबुद्धौ हि विभज्यमानायां समुदायिन एव प्रस्फुरन्ति नावयविवदर्थान्तरम्, ते चान्यत्र व्यापृताः । किं नु खलु ऋग्वेदादीनां ब्रह्मत्वं कुर्वतामतिभारो भवति ? न ब्रूमोऽतिभार इति । किन्तु त्र्यात्मकत्वेन ब्रह्मत्वकर्त्तव्यतोपदिश्यते । त्र्यात्मकश्चान्यतमोऽपि तेषां न भवति वेदः । अथर्ववेदस्तु त्र्यात्मक एव । तत्र हि ऋचो यजूंषि सामानि इति त्रीण्यपि सन्ति । तेन ब्रह्मत्वं क्रियमाणं त्रय्या कृतं भवति ।

ननु यस्त्रीन् वेदानधीते तेन चेद् ब्रह्मत्वं क्रियेत तत् किं तया न कृतं भवति ? बाढमित्युच्यते । सोऽपि 'एकस्मै वा कामायान्ये यज्ञक्रतवः समाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः सर्वेभ्यो दर्शपूर्णमासावि'ति श्रुतावपि योगसिद्ध्यधिकरणन्यायेनान्यतममेव बुद्धावादाय विदध्यान्न समुदायं बुद्धावारोपयितुं शक्नुयादित्येकेनैतत् कृतं भवति न त्रय्येति ।

नन्वन्येऽपि त्र्यात्मका वेदाः, यद्येवं सुतरामथर्ववेदो न पृथक् करणीयः, सर्वेषां रूपाविशेषात् । तेषां पृथक्प्रतिष्ठैः स्वैः स्वैर्ऋगादिभिरेव व्यपदेश इति

योगसिद्ध्यधिकरणन्यायेनेति । योगसिद्ध्यधिकरणे हि '"एकस्मै वा कामायान्या इष्टय आह्रियन्ते, सर्वेभ्यो दर्शपूर्णमासौ, एकस्मै वान्ये क्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः" इति श्रुतिवाक्यमुदाहृत्य चिन्तितम् 'किं सकृत्प्रयोगे सर्वे कामा उत पर्यायेण इति' । तत्र सकृत्प्रयोगेणेति पूर्वं पक्षितम्, सर्वनिमित्तत्वेन श्रवणात्; कः खलु विशेषोऽयं भवत्ययं न भवतीति । तथा चाह "तत्र सर्वे अविशेषात्" इति । ततः सिद्धान्तितं "योगासिद्धिर्वार्थस्योत्पत्तियोगित्वात्" इति । अस्यार्थः, न वा सर्वे कामा युगपत्, पर्यायेण योगसिद्धिः कामसम्बद्धसिद्धिः । यदा यदा यः कामस्तदा तदा तस्य सिद्धिरित्यर्थः । अर्थस्य कामस्य युगपदुत्पत्तेरसम्भवाद्विरोधाच्च । न हि आयुष्कामना

न ते समुदायशब्दव्यपदेश्याः । यत्तु वाक्यान्तरे 'त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमि'ति तत्रेयं चतुर्थी षष्ठ्याः स्थाने प्रयुक्ता । शुक्रमिति सारमाचक्षते । तेन त्रयीविद्यायाः सारेण ब्रह्मत्वं क्रियते इत्युक्तं भवति । न च त्रय्येव त्रय्याः शुक्रं भवति न चात्यन्तं ततोऽर्थान्तरमेव । तेनेदमथर्ववेदात्मकमेव त्रय्याः शुक्रम् । शुक्रमिति च गुह्यमाहुः, अथर्वशब्दोऽपि रहस्यवचनो 'यज्ञाथर्वाणं वै काम्या इष्टय' इति । तेन त्रयीशुक्ररूपेणाथर्ववेदेन ब्रह्मत्वमितीत्थमथर्ववेदस्य न त्रयीबाह्यत्वम् । इत्थं सर्वशाखाप्रत्ययमेकं कर्मेति न सर्वशब्दः सङ्कोचितो भवति । अत एव ब्रह्मवेदोऽथर्ववेद इति पूर्वोत्तरब्राह्मणे पठ्यते ऋग्वेदो यजुर्वेदः सामवेदः ब्रह्मवेद इति । तथा च काठकशताध्ययने 'ब्राह्मणे ब्रह्मौदने श्रूयते ब्रह्मवादिनो वदन्ति पुरा वा औद्दालकिरारुणिरुवाच ब्रह्मणे त्वा प्राणाय जुष्टं निर्वपामि ब्रह्मणे त्वा व्यानाय जुष्टं निर्वपामि'इत्युपक्रम्य 'आथर्वणो वै ब्रह्मणः समानोऽथर्वणमेवैतज्जुष्टं निर्वपति ततश्चतुः शरावो भवति चत्वारो हीमे वेदास्तानेव भागिनः करोति मूलं वै ब्रह्मणो

मरणकामनाद्याः सर्वा युगपद् उत्पत्तुमर्हन्ति, तथाविधानां विरुद्धानामिच्छानां युगपदुत्पादादर्शनात् ।

यज्ञाथर्वाणं वै काम्या इष्टयः 'चित्रया यजेत पशुकामः' इत्याद्याः । यज्ञा अथर्वयज्ञा रहस्ययज्ञा इत्यर्थः । **न सर्वशब्दः सङ्कोचितो भवति ।** अशेषवेदवृत्तेरेकपरिहारेण वृत्तिः सङ्कोचः । **पूर्वोत्तरब्राह्मणे** यत्र 'ऋग्वेदः किं वेद' इति पूर्वमभिधाय 'हौत्रं वेद' इत्युत्तरम् । **ब्रह्मौदने श्रूयत** इति । ब्रह्मौदनाख्ये चरौ, स हि ऋत्विगुद्देशेन क्रियते न देवतान्तरोद्देशेन, 'यद् ऋत्विजः प्राश्नन्ति तद् ब्रह्मौदनस्य ब्रह्मौदनत्वम्' इति वचनाद् ऋत्विक्संस्कारार्थत्वं तस्य, न यागद्रव्यत्वम्; अतश्चतुःशरावनिर्वापेष्टौ हुत्वा ऋत्विज उद्देश्याः । **ब्रह्मणे त्वा प्राणाय जुष्टं निर्वपामि, ब्रह्मणे त्वा व्यानाय जुष्टं निर्वपामि,** ब्रह्मणे त्वापानाय जुष्टं निर्वपामि ब्रह्मणे त्वा समानाय जुष्टं निर्वपामीत्यभिधायाह 'श्रुता या देवतास्तासामेवैतज्जुष्टं निर्वपति, ऋचो वै ब्रह्मणः प्राणाः, ऋचामेवैतज्जुष्टं निर्वपति; यजूंषि वै ब्रह्मणो व्यानो, यजुषामेवैतज्जुष्टं निर्वपति; सामानि वै ब्रह्मणोऽपानः, साम्नामेवैतज्जुष्टं निर्वपति; अथर्वाणो वै ब्रह्मणः समानः, अथर्वणामेवैतज्जुष्टं निर्वपति, इति । **ततश्चतुःशरावो भवती**त्याह । यतश्च मूलं ब्रह्मणो वेदाः, वेदानां मूलम् ऋत्विजोऽतो यद् ऋत्विग्भ्यो दत्तं तद्वेदेभ्यो दत्तं भवतीत्यत आह—'चतुःशरावो भवति' इति । **चत्वारो हीमे वेदास्तानेव भागिनः करोती**ति ।

वेदाः वेदानामेतन्मूलं यदृत्विजः प्राश्नन्ति तद् ब्रह्मौदनस्य ब्रह्मौदनत्वमि'ति । तथा सामवेदे पृष्ठ्यस्य चतुर्थेऽहन्यार्भवे पवमाने आथर्वणे साम्नौद्गात्रं यत्तद्विधाने श्रूयते चतुर्णिधनं भवति चतूरात्रस्य धृत्यै चतुष्पदानुष्टुभा अनुष्टुभमेवैतदहर्यच्चतुर्थं भेषजं वाथर्वाणं तद्धि भैषज्यमेव तत् करोत्याथवर्णानि यागभेषजानीत्येतदालम्बनेयं स्तुतिरत एव प्रागुक्तम् 'यज्ञे यदूनञ्च विरिष्टञ्च यातयामञ्च करोति तदथर्वणा तेजसाप्याययती'ति । तस्मादाथर्वण एव ब्रह्मेति । एतच्च शास्त्रान्तरे विस्तरेणाभियुक्तैर्युक्तिभिरुपपादितमिति नेहात्यन्ताय प्रतायते ।

स्तुतिरियम्, तस्य प्रतिवेदमेकैकशरावापेक्षया यश्चतुःशराव उक्तः । चत्वारः शरावा व्रीहीणामत्र निरूप्यन्ते व्रीहिपूर्णाच्छकटादुद्ध्रियन्ते, जुष्टं सेवितम्, तदुद्देशेन निरुप्यते । **पृष्ठ्यस्य चतुर्थेऽहनीति** । द्वादशाहेन प्रजाकामं याजयेदिति । द्वादशाहमध्ये पृष्ठ्यः षडह आम्नातः, पृष्ठ्यः पृष्ठ्याख्यस्तोत्रविशेषोपलक्षितः । तथा च द्वादशाहेऽहः क्लृप्तिः, प्रायणीयोऽतिरात्रः, पृष्ट्यः षडहः, त्रयश्छन्दोगा अविवाक्यमहरुदयनीयोऽतिरात्र इति । **आर्भवे पवमान** इति । तृतीयसवनभाविनि पवमानाख्ये स्तोत्रविशेषे । **चतुर्णिधनं'** चत्वारि निधनानि गानभक्तिविशेषा यत्र । **चतूरात्रस्य** षडहसम्बन्धिनोऽनुष्ठितस्य । **धृत्यै** प्रतिष्ठायै । **चतुष्पदानुष्टुभा** चतुष्पादानुष्टुप्छन्दोऽत्र प्रयुज्यते । यदत्र कर्मण्याथर्वणं भवति तद् **भैषज्यमेव** । यज्ञे तन्निर्वहणमेव करोति यतो **भेषजं** वा । **आथर्वणानीति** । यागभैषजान्येतानि यदाथर्वणानि कर्माणीत्यर्थः । ननु "नर्ते भृग्वङ्गिरोविद्भ्यः सोमः पातव्यः" इत्यस्याथर्ववेदविदं ब्रह्माणं विना न सोमः पातव्य इत्यर्थो व्याख्यातो, भृग्वङ्गिरोरूपाणां मन्त्राणामथर्ववेद एव पाठादिति । तच्चायुक्तम्, ऋग्वेदे यजुर्वेदे च भृग्वङ्गिरा नाम कश्चिद् ऋषिस्तेन दृष्टानां मन्त्राणां दर्शनादिति । "नैतदेवम्, 'ऋग् यजुः सामान्युपक्रान्ततेजांस्यासंस्तत्र महर्षयः परिवेदयांचक्रुः" इत्यारभ्य 'नर्ते भृग्वङ्गिरोविद्भ्यः सोमः पातव्यः' इत्यनेनाभिधानात्; गोबलीवर्दन्यायेन भृग्वङ्गिरोमन्त्रा अथर्वमन्त्रेष्वेव वर्तन्ते" इत्याक्षेपप्रतिसमाधाने वक्तव्ये सतीत्थं किमिति नोक्तम् । तथा "यदेतत् त्रय्यै विद्यायै शुक्रम्" इत्यस्य यथाश्रुतचतुर्थ्यन्तस्य व्याख्यानान्तरमपि कुर्वन्ति । शुक्रं सारभूतोऽयमथर्ववेदो ब्रह्मवेदस्तेन ब्रह्मत्वं कुर्यात् । किमर्थम् ? 'त्रय्यै त्रयीगतभ्रेषनिबर्हणार्थम्" इत्याद्यन्यदपि बहुवक्तव्यमत्रास्ति, तत्कथं ग्रन्थकृता नोक्तमित्याशङ्क्याह **एतच्च शास्त्रान्तरे विस्तरेणेति** ।

यत्तु 'नाथर्वणेन प्रवृञ्ज्यादि'ति तत् कल्पसूत्रवाक्यत्वाद् वेदविरुद्धमित्यनादृतम्। अथापि श्रौतमिदं वाक्यम् ? तदापि प्रकरणाधीतं चेत्तत्र क्वचित् कर्मणि निवेक्ष्यते। अनारभ्यवादपक्षेऽपि पूर्वोक्तवाक्यविसदृशार्थत्वादथर्ववेदस्य च त्रयीबाह्यत्वेन सम्पर्कपरिहारार्हत्वान्नियतविषयमेव व्याख्यास्यते।

यदप्युच्यते 'उच्चैरृचा क्रियते उच्चैस्साम्नोपांशु यजुषे'तिवदथर्वधर्मोऽपि न कश्चिदाम्नात इति, तदप्यसारम्। मन्त्रधर्मो ह्ययमुपदिश्यते न वेदधर्मः। मन्त्रब्राह्मणसमुदायस्वभावा हि चत्वार इमे वेदग्रन्थाः। मन्त्रास्तु ते गद्यपद्यभेदाद् द्विधैव। गद्यबन्धो यजुरुच्यते पद्यबन्ध ऋगिति गीतिनिबन्धनन्तु भेदान्तरं सामेति। अत एव जैमिनिना मन्त्रविभागं प्रस्तुत्य तेषामृग् यत्रार्थवशेन पादव्यवस्था, गीतिषु सामाख्या, शेषे यजुः शब्दः, इत्थमेव तेषां त्रैविध्यमुपपादितम्। तेषामेव चायमुच्चैरादिधर्मो न वेदशब्दवाच्यानां मन्त्रब्राह्मणसमुदायात्मनां ग्रन्थानाम्। अथर्ववेदेऽपीयं त्रिविधैव मन्त्रजातिरिति तत्रापीदं धर्मजातमुपदिष्टं भवति। मन्त्रविभागकृत एवायं त्रयीव्यपदेश इति। तच्च 'सैषा त्रयी विद्या तपती'त्याद्यपि न विरोत्स्यते। एवं ऋग्यजुःसामसमुदायात्मकमन्त्रोपबन्धात् त्रय्यन्तर्गतश्च अथर्ववेदः पृथग्व्यवस्थितग्रन्थसन्दर्भस्वभावत्वाच्च भिन्न इति स्थितम्।

वेदविरुद्धमित्यनादृतम्। कल्पसूत्राणां वेदविरोधे दुर्बलत्वान्मीमांसकैश्चाविरोधेऽपि तेषां प्रामाण्यानभ्युपगमात्। **अनारभ्यवादपक्ष** इति। 'अनारभ्याधीतानां प्रकृतिगामित्वम्' इति यद्यपि प्रकृतौ निविशते तथापि प्राङ्नयेनाथर्वविदो ब्रह्मत्वप्रतिपादनादथर्वविहितेन कर्मणा सम्पर्को दुष्परिहर इति नियतकर्मैकदेशविषयतया तद् व्याख्येयमिति तात्पर्यम्।

तेषामृगिति। अर्थवशेन तथा 'अग्निमीले पुरोहितम्' इति। अत्र क्रियाकारकलक्षणार्थपरिसमाप्तेः पादव्यवस्था। ननु तर्हि "अग्निः पूर्वेभिर्ऋषिभिः' इत्यत्र क्रियापदाश्रवणात् पादव्यवस्था न प्राप्नोति। उक्तमत्र भाष्यकृतैवार्थग्रहणम् अत्रानुवादो वृत्तवशेनापि भवतीति। **गीतिषु सामाख्येति**। यस्याम् ऋचि सामोत्पन्नं सा शुद्धा पठ्यमाना न सामशब्दव्यपदेशं लभते। तच्च साम ऋगन्तरेऽपि गीतं तच्छब्देन व्यपदिश्यते। तथाहि रथन्तरमनेन श्लोकेन गीतमिति व्यवहारस्तदेवमन्वयव्यतिरेकाभ्यां गीतेरेव सामत्वं न ऋग्विशेषस्य। **शेषे यजुरिति** या न गीतिर्न च ऋक् तत्र 'यजुः' शब्दः।

अन्ये पुनः ऋक्प्रचुरत्वात्, प्रविरलयजुर्वाक्यत्वाद्, गीयमानसाममन्त्रतावशाच्च ऋग्वेदमेवाथर्ववेदमाचक्षते । अयमपि पक्षोऽस्तु न कश्चिद्विरोधः ।

यत् पुनरभिधीयते वेदशब्दस्त्रयाणामेव वाचको न चतुर्थस्येति । सोऽयमत्युत्कटो द्वेषः, वृद्धव्यवहारो ह्यत्र प्रमाणम् । वेदोऽयं ब्राह्मणोऽयमिति तत्र तत्र वेदशब्दे उच्चारिते चत्वारोऽपि प्रतीयन्ते । वेदो मयाधीत इति वदन्तं पृच्छन्ति व्यवहर्त्तारः कतमस्त्वयाधीतो वेद इति, स आह अथर्ववेद इति । न तमेवमाक्षिपन्ति नासौ वेदो यस्त्वया पठित इति । सोपपदोऽथर्ववेदे वेदशब्द इति चेद्, वेदान्तरेष्वपि तुल्यमेतत् ऋग्वेदो यजुर्वेदः सामवेद इति । निरुपपदोऽपि तेषु वेदशब्दः प्रयुज्यते इति चेत् तदितरत्रापि समानमित्युक्तम्, चतुर्वेदाध्यायी भारद्वाज इति । सर्वथा तु सोपपद एवायुर्वेदादिषु वेदशब्द इति न तत्तुल्यकक्षताधिक्षेप-क्षेत्रतामथर्ववेदो नेतव्यः । ब्रह्मयज्ञविधिश्च श्रौतश्चतुर्णामप्यविशिष्ट इत्युक्तम् । स्मार्त्तोऽपि तथाविध एवास्ति, यथाह याज्ञवल्क्यः

मेदसा तर्पयेद् देवानथर्वाङ्गिरसः पठन् ।
पितृंश्च मधुसर्पिर्भ्यामन्वहं शक्तितो द्विजः ॥ इति

साम्प्रदायिकमध्यापनादियजनादि सर्वमभिन्नमेवेत्यलं प्रसङ्गेन ।

तेन प्रमाणतायां वेदस्वाध्यायशब्दवाच्यत्वे पुरुषार्थसाधनविधावपि चत्वारः समा वेदाः ।

वेदानामुत्तराधरतायां पृष्टेऽथर्ववेदस्यैव प्राथम्यम्

यदि पुनरौत्तराधर्येण विना न परितुष्यते तदथर्ववेद एव प्रथमः, ततः परमस्य मन्त्रस्य ब्रह्मणः प्रणवस्याभिव्यक्तेः । तथा च श्रुतिः, 'ब्रह्म ह वा इदमग्र

मेदसा तर्पयेदिति । योऽथर्वाङ्गिरसः पठति तेन देवा मेदसा पितरश्च मधुसर्पिर्भ्यां तर्पिता भवन्तीत्यर्थः ।

सम्प्रदायो गुरुमुखाद् विशिष्टेन रूपेण ग्रहणम्, तत्प्रयोजनं यस्याविघ्नार्थस्य 'अस्यां तिथावध्येयम्' 'अस्यां न' इत्येवंरूपस्य धर्मजातस्य, तत् **साम्प्रदायिकम्** ।

ब्रह्म ह वा इति । एतद्ब्राह्मणवाक्यमध्ये "सोऽपः स्पृष्ट्वा तासु स्वां छायामप-

आसीदि'त्युपक्रम्य 'आथर्वणं वेदमभ्यश्राम्यदभ्यतपत् समतपत् तस्मात् तथा श्रान्तात् सन्तप्तादोमिति मन एवोर्ध्वमक्षरमुदक्रामदि'त्यादि। तथा महाव्याहृतीनां शाखान्तरप्रसिद्धानामप्रसिद्धानाञ्च बृहदित्यादीनां तत एवोत्थानम्। अथर्ववेदकृतोपनयनसंस्कारस्य वेदान्तराध्ययनमविरुद्धम्। अन्यवेदोपनीयमानस्य तु नाथर्वणोपनयनसंस्कारमप्रापितस्याथर्ववेदाध्ययनेऽधिकारः। तदुक्तम्, 'भृग्वङ्गिरोविदा संस्कृतोऽन्यान् वेदानधीयीत नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयीते'ति। त्रय्येकशरणैरपि चैतदवश्या-

---

श्यत्, तां चेक्षमाणस्य स्वं रेतोऽस्कन्दत् तदप्सु प्रत्यतिष्ठत्" इति प्रक्रम्य 'ताभ्यः श्रान्ताभ्यः तप्ताभ्यः संतप्ताभ्यो यद् रेत आसीत् तदभृज्यत, तस्माद् भृगुः समभवत्, तत् भृगोर्भृगुत्वम्" इत्युक्त्वा "तदथर्वाभवत्" इति भृगोरेवाथर्वतामभिधायाह तमाथर्वणम्' इति। **अभ्यश्राम्यदभ्यतपत् समतपदिति**। गायत्र्यादिच्छन्दसां पुनः पुनः प्रयोगात् तदभिमानिनीनां देवतानां पीडातः श्रमः, गायत्र्याद्यभिमानिनीनां च देवतानां श्रमादथर्ववेदाभिमानिनीनामपि देवतानां श्रमः, गायत्र्यादिदेवतासम्बन्धात् तासाम्; अतोऽनेन द्वारेणाथर्वाणमभ्यश्राम्यदखेदयत्। अन्तर्भूतण्यर्थाः प्रयोगा अमी; अभ्यतपत् विशिष्टफलनिष्पत्तये समालोचयत् प्रावर्त्तयद्वा। श्रमजननादेव च समतपत् समतापयद् उत्पन्नसन्तापमकरोत्। **तस्मात् तथाश्रान्तादत** एव तप्तात् संतप्तात्। यथा सम्बन्धिपीडया पीडिताः सन्तप्ता मनस ऊर्ध्वमुत्क्रान्तिं कुर्वते तथा तस्मादक्षरमूर्ध्वमुत्क्रान्तमित्यर्थः। यथा च लोके तस्करैः पीड्यमाने बालकादौ तत्सम्बन्धिनोऽतिस्नेहात् प्राणोत्क्रान्तिं कुर्वन्ति तस्करेभ्यश्च सारभूतं सर्वस्वं प्रयच्छन्ति तथाथर्ववेदाद् अप्रियाद् भीत्या तथाविधावस्थाप्राप्तात् सारभूताक्षरनिःसृतिरिति तात्पर्यम्। **तथा महाव्याहृतीनामिति**। तथाहि "प्रजापतिर्वा इदमग्र आसीत्' इत्युपक्रम्याह "स इमांस्त्रीन् वेदानभितताप। तेभ्यस्तप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरिति ऋग्वेदाद् भुव इति यजुर्वेदात् स्वर् इति सामवेदात् तद् ऋग्वेदेनैव हौत्रमकुर्वत यजुर्वेदेनाध्वर्यवं सामवेदेनौद्गात्रं यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वम्" इति पृथग् ब्रह्मवेदप्रतिपादकेन शुक्रशब्देन व्याहृतीनां निर्देशादथर्ववेदादुत्थानमिति दर्शयति। तथा च "मन एवाक्षरमूर्ध्वमुदगात्" इत्यस्यावसान आह "स य इच्छेत् सर्वैरेवाथर्वभिश्चाथर्वणैश्च कुर्वीतेत्येतयैव तं महाव्याहृत्या कुर्वीत' इत्यादि। अनेन प्रागुक्तोत्पत्तिकानामाथर्वणत्वं दर्शितम्। **बृहदीत्यादिनां** बृहज्जनः

श्रयणीयम्' अथर्ववेदविहित स्वकर्मभ्रेषे प्रायश्चित्तमाचरद्भिरित्यथर्ववेद एव ज्यायान् ।

यत्तु मानवं वाक्यमुदाहृतं 'षट्त्रिंशदाब्दिकं' तत् त्रिवेदाध्ययनविषयम् । वैकल्पिकं 'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रममि'ति । एकस्मिन् वेदे द्वादशवर्षाणि व्रतम्, द्वयोश्चतुर्विंशतिः, त्रयाणां षट्त्रिंशदिति । यस्तु चतुरो वेदानधीते तस्याष्टचत्वारिंशद्वर्षं वेदब्रह्मचर्यमुपासीतेति स्मृत्यन्तरमस्ति, न च तदार्यैर्नादृतम् । तत्र त्रिवेदाध्यायिनामेव प्रतिवेदं षोडशवर्षाणि व्रतं चरेदिति व्याख्यानमसङ्गतम्, उपक्रमविरोधाद् अनुपयोगाच्च । तेन वेदान्तराध्ययनकृत एवायं विकल्पविधिर्न द्वादशषोडशवर्षापेक्ष इति । अनादरोऽप्यस्यां स्मृतौ 'कृष्णकेशो अग्नीनादधीते'ति श्रुतिविरोधकृतो नाथर्ववेदाध्ययननिषेधगर्भ इति । त्रैवेदिकव्रतब्रह्मचर्यस्मृतिरपि चेयम् अथर्ववेदाध्ययनपर्युदासमेव विषयीकरोति न च वेदान्तराध्ययननिषेधमिति अत्रापि न विशेषहेतुरस्ति । त्रिषु वेदेष्विदं व्रतं न पुनरेष्वेव त्रिष्विति नियामकं वचनमस्ति ।

यदपि श्राद्धप्रकरणे 'यत्नेन भोजयेदि'ति त्रिवेदपारगपरिकीर्तनं तद् वेदपारगमिति शाखान्तगमिति समाप्तिगमिति विशेषणपदपर्यालोचनया ऋग्वेदाद्येक-

---

तपः महः सत्यमित्यासाम् । **स्वकर्मभ्रेषे** प्रायश्चित्तमिति । तथाहि 'यदि ऋक्त आर्त्तिमार्च्छेद् भूरित्येव जुहुयात्; यदि यजुष्टः भुव इत्येव; यदि सामतः स्वर् इत्येवेत्यथर्वविहितं प्रायश्चित्तम् ।

न च तदार्यैर्नादृतमित्यनेन मीमांसकैर्यदस्याप्रामाण्यमापादितं तदाशङ्कते । **उपक्रमविरोधात्** । सामान्येन वेदब्रह्मचर्यमिति सर्ववेदविषयत्वेनोपक्रमात् । **तेन वेदान्तराध्ययनकृत** इति । योऽयं 'षट्त्रिंशदाब्दिकम्' इत्यस्य 'अष्टाचत्वारिंशतं वर्षाणि' इत्यनेन विकल्पः स वेदत्रयकृते द्वादशकत्रये सति चतुर्थे द्वादशकेऽथर्ववेदापेक्षया निर्दिष्टे तावत्सङ्ख्यासद्भावादिति स्थितः, न पुनः प्रतिवेद द्वादश षोडश वा वर्षाणीत्येवम् । **अनादरोऽप्यस्यामिति** । अष्टचत्वारिंशतं वर्षाणि ब्रह्मचर्ये कृते दारसङ्ग्रहापत्योत्पादनादावन्यो बहुकालो यात्यतः कथं कृष्णकेशतेति विरोधः । **अथर्ववेदाध्ययनपर्युदासमेवेति** । अथर्ववेदाध्ययनपर्युदासमथर्ववेदादन्येषु वेदेष्वेवं व्रतं चरणीयम्, न पुनरथर्ववेदः सर्वथैव नाध्येतव्य इति तात्पर्यम् ।

वेदाध्यायिनामनधिकारमेव श्राद्धे सूचयति। अथर्वणस्तु अथर्वशिरोऽध्ययनमात्रलब्धपङ्क्तिपावनभावस्यैकदेशपाठिनोऽपि तत्राधिकार उपपद्यते। दर्शितश्चाथर्वशिरोऽध्ययनमात्रादपि पङ्क्तिपावनत्वम्, पङ्क्तिपावनश्च श्राद्धभोजनेऽनधिकृत इति विप्रतिषिद्धम्।

यत्तु ज्येष्ठसामगः, त्रिमधुः, त्रिसुपर्णिक इति वेदान्तरैकदेशाध्यायिनामपि श्राद्धभोजनाभ्यनुज्ञानं तदनुकल्पमिव भाति, प्रथमकल्पेन समग्रवेदाध्ययनोपदेशादिति, तस्मान्नाथर्वनिषेधार्थमेतद्वाक्यमिति। तदेवमवस्थिते यद् वार्तिककारेण भयादिव द्वेषादिव मोहादिव सानुकम्पमिव वेदमुच्यते 'यदि यज्ञोपयोगित्वमि'त्यादि तदहृदयङ्गमम्, अथर्ववेदे पूर्वोत्तरब्राह्मणे विस्पष्टमिष्टिपश्वेकाहाहीनसत्राणामुपदेशात्, वेदान्तरेषु तच्चोदनाभावात्। किमथर्ववेदे तदुपदेशेनेति चेत्, सुभाषितमिदम्। एवमपि हि वक्तुं शक्यम्, अथर्ववेदे तच्चोदनाया दर्शनात् किं तदुपदेशेनेति ? न च जाने कस्यैष पर्यनुयोगः किं नित्यस्य वेदस्य किं वा तत्प्रणेतुरीश्वरस्येति द्वावपि हि तावपर्यनुयोज्यावित्युक्तम्। अर्थान्तरशान्तिपुष्टयभिचारादि वेदान्तरेष्वपि न न दृश्यते, श्येनो हि सामवेद उत्पन्न अद्भुतशान्त्यादयश्च यजुर्वेद इति तदपि समानम्। एकब्रह्मर्त्विगाश्रिता इत्येतदपि न सत्यम्, यत

दर्शितश्चाथर्वशिरोऽध्ययनेति। यदुक्तम्

> त्रिनाचिकेतो विरजाश्छन्दोगो ज्येष्ठसामगः।
> अथर्वशिरसोऽध्येता चत्वारः पङ्क्तिपावनाः॥ इति॥

यत्तु ज्येष्ठसामग इति तदुक्तम्

> अग्रयाः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मवित्तमः।
> वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः॥ इति॥

ज्येष्ठसाम-त्रिमधु-त्रिसुपर्णानि व्रतानि तदनुष्ठायिनस्तच्छब्दैरुक्ताः। **तदनुकल्पमिति**।

> एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः।
> अनुकल्पस्त्वयं यज्ञे सदा सद्भिरनुष्ठितः॥

एवं तत्र पठ्यते 'द्वे यज्ञवृत्ती भवतो वैहारिकी च पाकयज्ञवृत्तिश्चेति'। तत्र वैहारिकी नामानेकर्त्विगाश्रितानामेकक्रियाणामुपदेशः श्रुतौ, एकब्रह्मर्त्विगाश्रितास्तु शान्त्यादिक्रियाः स्मृतौ इत्यभूमिज्ञोक्तिरेषा। त्रय्येवात्मीयगोचरा इति एतदपि परममाध्यस्थ्यम्। न ह्यात्मीयः परकीयो वा कश्चिदस्ति वेदार्थः, सर्वशाखाप्रत्ययत्वादेकस्य कर्मणः।

वेदचतुष्टयेषु मध्ये कस्याप्येकस्य ततः पृथक् करणं न शिष्टसम्मतम्

तस्मात् समानयोगक्षेमत्वात् सर्ववेदानामेकस्य ततः पृथक् करणं वेदनिन्दाप्रायश्चित्तनिर्भयधियामेव चेतसि परिस्फुरति न साधूनामित्युपरम्यते।

इति तुल्यप्रभावर्द्धिवर्धमानोचितस्तवाः।
विविधाभिमतस्फीतफलसम्पादनोद्यताः॥
चत्वारोऽपि पराक्षेपपरिहारस्थिरस्थितिम्।
भजन्ति वेदाः प्रामाण्यलक्ष्मीं हरिभुजा इव॥
चतुःस्कन्धोपेतः प्रथितपृथगर्थैरवयवैः
कृतान्योन्यश्लेषैरुपचितवपुर्वेदविटपः।
प्रतिस्कन्धं शाखाफलकुसुमसन्दर्भसुभगाः
प्रकाशन्ते तस्य द्विजमुखनिपीतोत्तमरसाः॥

इत्यभिधाय ज्येष्ठसामगादयोऽनुकल्परूपतया दर्शिताः। **वैहारिकीति**। विहार आहवनीयादिरग्निस्त्रेता तत्र भवा वैहारिकी दर्शपूर्णमासादिका। **पाकयज्ञ** अष्टकादयो गृह्याग्निनिर्वर्त्याः। **वृत्ती** प्रकारौ। **इत्यभूमिज्ञोक्तिरेषा**। उभयासामपि तत्रैवोपदेशदर्शनादिति।

तुल्यप्रभावर्द्धीति। तुल्यप्रभावर्द्धि माहात्म्यसम्पत्त्या प्रत्यहं वर्धमानः अधिकीभवन् उचितो योग्यः स्तवो येषां भुजानां वेदानाञ्च। भुजपक्षे भगवद्भुजानां कर्मणि सव्येतराणां विशेषाभावात् तुल्यप्रभावर्द्धित्वम्। भुजपक्षे विबुधा देवा वेदपक्षे विद्वांसस्तेषामुपायप्रदर्शनद्वारेण फलसम्पादकत्वम्। **चतुःस्कन्धोपेत** इति। वेदपक्षेऽवयवैर्विध्यर्थवादमन्त्रनामधेयादिवाच्यैः पृथगर्थैः प्रवर्तनास्तुतिप्रयोगप्रदर्शनादिप्रतिपादकैरत एव वृपरस्परसम्बद्धैः। क्षपक्षेऽवयवैर्मूलत्वक्पत्रादिभिः, तेऽपि पृथगर्थाः पृथक्प्रयोजनाः।

तन्त्रागमादीनामपि प्रामाण्ये एषैव रीतिः

आह

किमेतदित्थं प्रामाण्यं वेदानामेव साध्यते ।
तन्त्रागमान्तराणां वा सर्वेषामियमेव दिक् ॥

किञ्चातः

आद्ये पक्षे परेष्वेवं ब्रुवाणेषु किमुत्तरम् ।
उत्तरत्र तु मिथ्याः स्युः सर्वेऽन्योन्यविरोधिनः ॥

कानि पुनरागमान्तराणि चेतसि निधायैवं वत्सः पृच्छति ? पुराणेतिहासधर्मशास्त्राणि वा, शैवपाशुपतपञ्चरात्रबौद्धार्हतप्रभृतीनि वा। तत्र शैवादीनि तावन्निरूपयिष्याम । मन्वादिप्रणीतानि धर्मशास्त्राणि वेदवत्तदर्थानुप्रविष्टविशिष्टकर्मोपदेशीनि प्रमाणमेव। कस्तेषु विचारः ? तेषान्तु प्रमाणत्वं वेदमूलत्वेनैव केचिदाचक्षते। तथा हि न तावन्मन्वादिदेशना भ्रान्तिमूलाः सम्भाव्यन्ते, बाधकाभावात्, अद्ययावदपरिम्लानादरैर्वेदविद्भिस्तदर्थानुष्ठानात् । नाप्यनुभवमूलाः प्रत्यक्षस्य त्रिकालानवच्छिन्नकार्यरूपधर्मपरिच्छेददशासामर्थ्यासम्भवात्। न च पुरुषान्तरोपदेशमूलाः पुरुषान्तरस्यापि तदवगमे प्रमाणाभावात् । भावे वा मनुना किमपराद्धम् ? असति हि मूलप्रमाणे पुरुषवचनपरम्परायामेव कल्प्यमानायामन्धपरम्परास्मरणतुल्यत्वं दुर्निवारम् । न च विप्रलम्भका अत्रभवन्तो मन्वादय एवमुपदिशे-

---

तथाहि कस्यचिद् वृक्षस्य मूलादयो भिन्नकार्यकर्तृत्वेनोपलभ्यन्ते ते च परस्परसम्बद्धा एव भवन्ति । शाखापक्षे कुसुमफले, वाक्यवाक्यार्थौ वेदपक्षे । वेदपक्षे द्विजैर्ब्राह्मणैः पीत आस्वादित उत्तमो रस उपनिषदर्थो यासाम्, वृक्षपक्षे द्विजैः पक्षिभिः ।

परेष्वेवं ब्रुवाणेषु । यथा भवद्भिर्वेदानां प्रामाण्यं साध्यत ईश्वरप्रणीतत्वेन तन्त्रागमान्तराणामपि तथैव प्रतिपादयत्सु ।

तदर्थानुप्रविष्टेति । वेदार्थेऽनुष्ठेयेऽनुप्रविष्टानि 'आचान्तेन कर्तव्यम्' 'शुचिना कर्तव्यम्' इत्यादीनि यानि शौचाचमनादीनि कर्माणि । **अन्धपरम्परास्मरणतुल्यत्वमिति** यथान्धः रूपविशेषोपलम्भं प्रति पृष्टोऽन्धान्तरोक्तं स्मृत्वा कथयति 'तेन ममैवमाख्यातम्' इति ।

युरिति युक्ता कल्पना, बाधकाभावात् साधुजनपरिग्रहाच्चेत्युक्तम् । तस्मात् पारिशेष्याद् वेदाख्यकारणमूला एव भवितुमर्हन्ति मन्वादिदेशनाः । तद्ध्यनुगुणं समर्थञ्च कारणमिति । तदाह भट्टः

भ्रान्तेरनुभवाद् वापि पुंवाक्याद् विप्रलम्भकात् ।
दृष्टानुगुण्यसामर्थ्याच्चोदनैव लघीयसीति ॥

तत्र केचित् परिदृश्यमानमन्त्रार्थवादवलोन्नीतविधिमूलत्वं मन्यन्ते । अन्ये विप्रकीर्णशाखामूलत्वम् ।

अपरे पुनरुत्सन्नशाखामूलत्वमिति । अनेन च विशेषविवरणेन न नः प्रयोजनम् । सर्वथा यथोपपत्ति वेद एव तत्र मूलं प्रकल्प्यतां न मूलान्तरम्, अप्रमाणकत्वात्, वेदमूलत्वपक्षेऽपि चेयमखिलजगद्विदिता स्मृतिसमाख्यानुगृहीता भविष्यति। प्रत्यक्षमूलत्वे हि वेदवदत्रापि कः स्मृतिशब्दार्थः ? किञ्च वेदमूलत्वे सति स्मृतेः श्रुतिविरोधे सति तदतुल्यकक्षत्वाद् बाध्यत्वं सुवचं भवति । क्लृप्तमेकत्रमूलमितरत्र कल्प्यम् । यावदेव भवान् स्मृतेः श्रुतिं कल्पयितुं व्यवस्यति तावदेतद्-

---

भ्रान्तेरनुभवाद्वेति । एभ्यः सकाशान्मूलत्वेनाश्रीयमाणा चोदनैव लघीयसी कल्पनारहिता । **दृष्टानुगुण्यसामर्थ्यादित्यत्र** दृष्टानुगुण्यसाध्यत्वादिति पाठान्तरमन्ये वदन्ति, व्याचक्षते च दृष्टानुगुणं साध्यं यस्याः सा दृष्टानुगुण्यसाध्या तद्भावस्तत्त्वम् । यदेतद् दृष्टं वेदविदनुष्ठानं तदानुगुण्यं चोदनामूलत्वे सति साध्यं भवति सिद्ध्यतीत्यर्थः ।

परिदृश्यमानमन्त्रार्थेति । 'यां जना अभिनन्दन्ति" इति मन्त्रार्थवादात् "अष्टकाः कर्तव्याः" इति स्मृतेः; "धन्वन्निव प्रपा असि त्वमग्ने" इत्यतः "प्रपाः प्रवर्तयितव्याः" इत्यस्याः स्मृतेरुत्थानम् । **विप्रकीर्णशाखामूलत्वमिति** । विप्रकीर्णा याः काश्चित् क्वचिदेव देशे पठ्यन्ते न सर्वाः सर्वत्र अतस्तदर्थस्यैकत्र ढौकयितुमशक्यत्वात् स्मृत्युपनिबन्धस्तदर्थसंकलननिमित्तकः ।

उत्सन्नशाखेति । याः शाखा अन्यैः कैश्चिन्न पठ्यन्ते ता एव तु स्मृतिकाराः पठन्ति, तैरन्याख्यात्रभावेनोत्सादमाशङ्कमानैस्तदर्थं ग्रन्थोपनिबन्धः कृतः ।

विरोधिनी प्रत्यक्षश्रुता श्रुतिरवतरति हृदयपथमिति कथं तदा मूलकल्पनायै स्मृतिः प्रभवेत् ? तदाह

सोऽयमाभाणको लोके यदश्वेन हृतं पुरा ।
तत्पश्चाद् गर्दभः प्राप्तुं केनोपायेन शक्नुयादिति ॥

अपर आह, विकल्प एवात्र युक्तः । किल द्विविधो वेदः श्रूयमाणोऽनुमीयमानश्च । श्रूयमाणश्च श्रुतिरित्युच्यते, अनुमीयमानश्च स्मृतिरिति । द्वावपि चैतावनादी इति किं केन बाध्यते ? व्यक्ताव्यक्तो हि वेद एवासौ । अत एव न मन्त्रार्थवादादिमूलकत्वकल्पनं युक्तम्, स्मर्यमाणस्य वेदस्यानादित्वात् ।

नन्वेवं वेदमूलत्वेन प्रामाण्ये वर्ण्यमाने बाह्यस्मृतीनामपि प्रामाण्यं वदन्तः प्रावादुकाः कथं प्रतिवक्तव्याः ? उच्यते । प्रत्युक्ता एव ते तपस्विनः । उक्तं हि भगवता जैमिनिना 'अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यादिति' । कर्तृसामान्यादिति कोऽर्थः ? एकाधिकारावगमादिति । य एव वेदार्थानुष्ठानेऽधिकृताः कर्त्तारस्त एव स्मृत्यर्थानुष्ठाने, आचमनादिस्मार्तपदार्थसंवलितवेदिस्तरणादिवैदिकपदार्थप्रयोगदर्शनात् । न त्वेवमधिकारावगमो बाह्यस्मृतिषु विद्यते । तस्मान्मन्वादिस्मृतय एव प्रमाणं न बाह्यस्मृतयः ।

ननु मन्वादिस्मृतयोऽपि वेदमूलत्वात् प्रमाणं नान्यत इति । अत्रोच्यते, तदेतद् वेदमूलतया प्रामाण्यम्, योगिप्रत्यक्षं धर्मग्राहकममृष्यमाणाः किलाचक्षते भवन्तः, एतच्च न युक्तम् । यथाहि भगवानीश्वरः सर्वस्य कर्त्ता सर्वस्येशिता सर्वदर्शी सर्वानुकम्पी च वेदानां प्रणेता समर्थितस्तथा योगिप्रत्यक्षमपि धर्मग्रहणे निपुणमस्मदादिप्रत्यक्षविलक्षणं प्रत्यक्षलक्षणे समर्थितमेव । तस्मात् तन्मूला एव मन्वादिदेशना भवन्तु ।

यत्तु त्रिकालानवच्छिन्नः कथं प्रत्यक्षगम्यो धर्मः स्यादिति चोदनैव तत्र प्रमाणमुच्यते, प्रतिविहितं तत् । ईश्वरप्रत्यक्षं यथाग्निहोत्रादेर्धर्मत्वस्य ग्राहकमेवमष्टकादियागे तस्य ग्राहकं मन्वादिप्रत्यक्षं भविष्यतीति किमत्र त्रिकालानवच्छेदेन

आचमनादिस्मार्तपदार्थेति । 'आचान्तेन कर्तव्यम्' 'शुचिना कर्तव्यम्' इति स्मार्त्तपदार्थमिश्राणां वेदिस्तरणादीनां दर्शनात् ।

तदवच्छेदेन वा कृत्यम् ? यद्येवम्, अष्टकादिकर्मणां धर्मत्वाग्राहित्वादसर्वज्ञ ईश्वरः स्यात् ? ज्ञात्वा वानुपदिशन्नकारुणिको भवेत् ? नैष दोषः, सर्वं जानात्येव भगवान् किञ्चित् स्वयमुपदिशति किञ्चित् परानुपदेशयति । ते हि तस्यानुग्राह्या भगवतः । तेषाञ्च तदनुग्रहकृतैव तथाविधज्ञानप्राप्तिः । मन्वादीनां प्रत्यक्षो धर्म इति वेदेऽपि पठ्यते । साक्षात्कृतधर्माण ऋषयो बभूवुस्ते परेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुरिति वेदेऽपि पठ्यते ।

नन्वेवं प्रत्यक्षमूलत्वाविशेषाच्छ्रुतिस्मृत्योर्विरोधे विकल्पः प्राप्नोति बृहद्रथन्तरविध्योरिव, न बाध्यबाधकभावः। न ह्रीश्वरप्रत्यक्षस्य योगिप्रत्यक्षस्य च प्रामाण्ये कश्चिद्विशेषः । नैसर्गिकाहार्यत्वकृतस्तु भविष्यति? किं तेन? उच्यते । भवतु विकल्पः, को दोषः ? वेदमूलत्ववादिभिरपि कश्चिद्विकल्पो व्याख्यात एव । विषय-

---

उपदेशेन मन्त्रान् संप्रादुः । उपदेशेन शिष्योपाध्यायिकया अपरेभ्यः अवरकालीनेभ्यः शक्तिहीनेभ्यः मन्त्रान् ग्रन्थतोऽर्थतश्च संप्रादुः संप्रत्तवन्तः । अर्थतश्च मन्त्राणां ज्ञानाद् धर्मोऽपि ज्ञातो भवति, कर्मणां विशिष्टफलप्रदत्वस्य मन्त्रैः प्रकाशनादिति ।

बृहद्रथन्तरविध्योरिव 'बृहत्पृष्ठं भवति' रथन्तरं पृष्ठं भवति' इत्यनयोः । **वेदमूलत्ववादिभिरपि कश्चिद्विकल्पो व्याख्यात एवे**ति । अयं तेषामाशयः किल भवद्भिः प्रत्यक्षया श्रुत्यानुमानिकी श्रुतिर्बाध्यत इत्यभिधीयते । तत्र ब्रूमः सा श्रुतिर्मन्वादीनां प्रत्यक्षा अप्रत्यक्षा वा ? न तावदप्रत्यक्षा, मन्वादीनामाप्तत्वहानेः एवञ्चातिविरोधेऽप्यप्रामाण्यप्रसक्तिः । अथ प्रत्यक्षा, तदानीमिदानीन्तनप्रत्यक्षत्वं क्वोपयुज्यते तेषां; प्रत्यक्षत्वेन तस्याः प्रामाण्यसिद्धेः प्रामाण्यञ्चेद् बृहद्रथन्तरश्रुत्योरिव विरोधे विकल्पः केन वार्यत इत्यादि । **विषयविभागेन वा विकल्पो व्याख्यास्यत** इति यथा

प्राजापत्यान्तु कृत्वेष्टिं सर्ववेदसदक्षिणाम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ॥

इति सप्तमाद्ये प्राभाकरटीकातात्पर्यम् ।

[[१]ननु यथाकार्यमुपदेश इति अयमापतत् सत्रमित्यनेन सह विरोधे विषयविभागो दर्शितः । यः परिपक्वकषायः विगता···· रूपाच्चोदकात् प्राप्तिः सा हि

---

१. एतच्चिह्नान्तर्गतं सर्वमस्पष्टार्थकम् ।

विभागेन वा विकल्पो व्याख्यास्यते। न च श्रुतिस्मृतिविरोधोदाहरणं किञ्चिदस्तीति स्वाध्यायाभियुक्ताः। तस्मादाप्तप्रत्यक्षमूलत्वेन वेदानामिव धर्मशास्त्राणां हि पञ्चमं वेदत्वमाहुः। उक्तञ्च

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रतरिष्यति॥ इति।

अथ वा किमस्माकं दुरभिनिवेशेन। वेदमूलत्वात् स्मृतीनां स्मृतिवत् पुराणानामपि भवतु प्रामाण्यम्। सर्वथा तावद् वेदाश्चत्वारः पुराणं स्मृतिरिति षडिमानि विद्यास्थानानि साक्षात्पुरुषार्थसाधनोपदेशीनि। व्याकरणादीनि षडङ्गानि अङ्गत्वेनैव तदुपयोगीनि न साक्षाद् धर्मोपदेशीनि। कल्पसूत्रेष्वपि विक्षिप्तकर्मक्रमनियमसंग्रहमात्रं नापूर्वोपदेशः। मीमांसा वेदवाक्यार्थविचारात्मिका। वेदप्रामाण्यनिश्चय हेतुश्च न्यायविस्तर इत्यामुख एवोक्तम्। तदिमानि चतुर्दशविद्यास्थानानि प्रमाणम्, कानिचित् साक्षादुपदेशीनि कानिचित् तदुपयोगीनि इति सिद्धम्।

शैवाद्यागमानामप्यनयैव रीत्या प्रामाण्यम्

यानि पुनरागमान्तराणि परिदृश्यन्ते तान्यपि द्विविधानि। कानिचित् सर्वात्मना वेदविरोधेनैव प्रवर्त्तन्ते बौद्धादिवत्, कानिचित् तदविरोधनैव कल्पित-

---

चोदयत्याक्षिपति पदार्थानुपकारसिद्धयधितार्थि त्वः तं प्रति जागमयं वाद इति। **न च श्रुतिस्मृतिविरोधोदाहरणमिति**। 'प्राजापत्यं शतकृष्णलं चरुं निर्वपेदायुष्कामः' इत्यादौ कार्यस्य कृष्णलताप्रतिपादकानि तानि परस्परविरुद्धश्रुत्युदाहरणान्येवेति भट्ट आचष्टे। तथा……लक्षणस्य तत्रोपकारस्य दर्शनान्नियतपरिमाणा हि हेमकनुस्मृतिरिति भाष्यकृतोदाहृतम्, अनयोश्च विरोधे हि सर्वा वेष्टितार…… मेत्यादिबाधाप्रकरणारम्भवैफल्यं स्वरसत एवाप्राप्तत्वात्; साङ्ख्यायने ब्राह्मण एतत् पठ्यत इति हि स आह एवमन्योदाहरणेष्वपि। अत एव……नुचोदको येन येनानार्थी तं तमेवाक्षेप्स्यति। किमिदमुच्यते सोत्प्रासमाह। सदाचारस्याप्यनिबद्धस्य विवाहे कङ्कणबन्धनादेः। विक्षिप्त……यागानामुपदेशेनैव धर्मविधानमिति न 'प्रकृतिवद् विकृतिः कर्तव्या इति।

कानिचित् तदविरोधेनेति। न हि शैवादौ वैदिकानुष्ठाननिन्दाद्वारेण स्वकीय-

व्रतान्तरोपदेशीनि शैवादिवत् । तत्र शैवाद्यागमानां तावत् प्रामाण्यं ब्रूमहे, तदुपजनितायाः प्रतीतेः संदेहबाधकारणकालुष्यकलापस्यानुपलम्भात्, ईश्वरकर्तृकत्वस्य तत्रापि स्मृत्यनुमानाभ्यां सिद्धत्वात्, मूलान्तरस्य लोभमोहादेः कल्पयितुमशक्यत्वात् । न हि तत्रेदंप्रथमता स्मर्यते वेदवदेकदेशसंवादाश्च भूम्ना दृश्यन्त इति कुतो

चरीयानुष्ठानप्रशंसा ।......प्रथमं कार्येण धर्माः सम्बन्ध्यन्ते । यथाकार्यमुपदेश इति पक्षश्रवणेऽत्र वैदिक्यास्तस्याश्च व्रतचर्याया युगपदनुष्ठानासम्भवाद् गृह ईश्वरवद्विकल्पो भवि...... । सम्बद्धास्ते तस्यैव न कार्यान्तरस्य । दर्शपूर्णमासकार्याद् ऐन्द्राग्नसपर्यादीष्ट्यनुष्ठानाद् वृष्टिदर्शनात् संवाद एवमिहापि विशिष्टमन्त्रजपादितो विषाद्यपा ..तेषां विहितत्वाद् । ऐन्द्राग्नादिष्टोपदेशतः प्राप्त्यभावात् प्राप्तिसिद्धयः । मीमांसकदृष्ट्यास्मद्दृष्ट्या वा स्मृतीनां प्रामाण्ये यो न्यायः सोऽत्रापि मा वाभूत् तथापि प्रथमतस्तेनैव प्रथमं सम्बध्यन्त इति पूर्वपक्षयित्वा निष्फलत्वाद्यजेः सफलादीनां प्रामाण्यं कथं निर्वहति । उच्यते, स्मृतीनामेव तावन्मीमांसकस्य प्रामाण्यं......इतिकर्तव्यतां चाक्षिपति । प्रथमतस्तदाक्षिप्तानां द्वारमात्रप्रदर्शनपरश्रुतेः । यथैवाष्टकादिवाक्येभ्यो बाधारहिता कार्यावगतिरुत्पद्यते स्वतः प्रामाण्यञ्च स्थितम् अतो वेद मूलत्वकल्पना, तथेहापि भविष्यति] ।

अथाष्टकादिस्मृतीनां वेदमूलत्वमुपलभ्यते नैवाम् इति अष्टकादिस्मृतीनामपि कुतो वेदमूलत्वसमुपलम्भः ? प्रत्यक्षादिमानान्तराणामस्मिन् विषयेऽनाशङ्कनादनुमानमर्थापत्तिर्वा । 'तस्मिन् विषये प्रमाणमनुमानमस्तु' इति चेन्न, लिङ्गाभावात् । 'अष्टकादिकार्यप्रतिपत्तिस्मृतिर्लिङ्गमिति चेत्; मनुर्ह्यष्टकाः कर्तव्या इति स्मरति, न चाप्रतिपन्नस्याष्टकादेः कार्यतया स्मरणं संभवति. कार्यप्रतिपत्तिश्च पुंसोऽतीन्द्रियार्थे दृष्टत्वाभावाद् वेदं विना न सम्भवतीति वेदमूलत्वकल्पनम्' इति । तन्न; सर्ववेष्टनादिना व्यभिचारात् । तथाहि 'उदुम्बरीं सर्वां वेष्टयेत्' इति स्मरति; न च तत्स्मरणस्य वेदमूलत्वं भवद्भिरङ्गीकृतम् । अथ तत्र "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इति श्रुतिबाधितत्वान्मूलान्तरकल्पनाया अभावान्मिथ्यात्वम्, न चैवमष्टकादावपीति वाच्यम्, श्रुतिबाधाया अनुपलम्भात् । तेषु तत्सामान्येन च मिथ्यात्वाशङ्कायां स्वप्नज्ञानसाधर्म्येण जाग्रज्ज्ञानस्यापि मिथ्यात्वाशङ्का स्यात् । अथ तत्र "दोषज्ञाने त्वनुत्पन्ने नाशङ्का निष्प्रमाणिका" इत्याशङ्कानिरासः, तर्ह्येवं मन्वादिस्मृतावपि भविष्यति । न, नियमासिद्धेः । यदि हि वह्न्यभावे क्वचिदपि धूमो दृश्येत तदा किं शक्येत वक्तुं यत्रैव धूमो दृष्टस्तत्रैव वह्निं विना भवत्वन्यत्र

मूलान्तरकल्पनावकाशः ? न च वेदप्रतिपक्षतया तेषामवस्थानम्, वेदप्रसिद्धचातुर्वर्ण्यादिव्यवहारापरित्यागात् ।

मन्वादिचोदनान्यायः स यद्यपि न विद्यते ।
शैवागमे तथाप्यस्य ननु युक्ता प्रमाणता ॥

पुनर्दहनादेव धूम इति; एवं यत्र स्मरणं वेदमूलत्वं विनोपलब्धं सर्ववेष्टनादौ तत्र वेदमूलत्वं व्यभिचरतु नाम, अन्यत्र तु वेदमूलत्वाव्यभिचारि स्मरणमिति । यतो नियमस्याविनाभावस्य निश्चयोऽनुमानस्य मूलम् । तस्य चासिद्धिर्विपर्ययसम्भावनायामपि, किं पुनर्विपर्ययदर्शनेऽपि । विपर्ययश्च दर्शितः । यत् पुनः "दोषज्ञाने त्वनुत्पन्ने" इति तत् प्रत्यक्षाभिप्रायेण, यतो न प्रत्यक्षं लिङ्गवन्नियमनिश्चयापेक्षं स्वविषयं परिच्छिनत्ति । किं तर्हि ? बोधस्वभावत्वादेव । अतस्तत्र सत्यामप्याशङ्कायां न नियमासिद्धिः । निश्चितनियमस्य गृहीताविनाभावस्य तु लिङ्गस्य लिङ्गत्वात् कथं विपर्ययदर्शनेऽपि लिङ्गत्वम् ? अथार्थापत्तितो मन्वादिस्मृतीनां वेदमूलत्वनिश्चयः स्मृतिदार्ढ्यमन्यथानुपपद्यमानं वेदमूलत्वं कल्पयति इति, तन्न । सर्ववेष्टनादावन्यथाप्युपपत्तेर्दृष्टत्वाद् **भट्टपक्षे, प्राभाकरैरे**वंविधार्थापत्त्यनभ्युपगमाच्च । 'ननु कल्पयित्वा मन्वादीनां प्रतारकत्वमन्यथाप्युपपत्तेरिति वक्तुं न शक्यते, तादृशाञ्च महात्मनां दोषवत्त्वकल्पनायां बहुदुष्टकल्पना प्राप्नोति' । न । संसारिणां रागादिबहुलत्वेन दृष्टत्वात् पुरुषविशेषानभ्युपगमाच्च न काचित् कल्पना । तदुक्तम् 'सर्वदा चापि पुरुषाः प्रायेणानृतवादिनः' इति । अथैवं वेदमूलत्वानभ्युपगमेऽष्टकादिवाक्येभ्योऽवगतेर्मिथ्यात्वं प्राप्नोति, कारणाभावात् । तन्न । कारणाभावनिश्चये भवतः प्रमाणाभावात्, अनिश्चिते च कारणाभावेऽष्टकादिवाक्येभ्यः प्रतिपत्तेरुद्भवन्त्या अप्रतिपत्तित्वासिद्धिः । यदि प्रतिपत्तेरप्रतिपत्तित्वं नेष्यते भवता तदस्याः प्रतिपत्तेर्भवतः किं जनकं प्रमाणमिति चेद्, वाक्यमेव । मम हि प्रत्यक्षपक्षपातिनो नियमनिश्चयानपेक्षाद् वाक्यादवगतिरुत्पद्यते । न च परेण मूलकारणाभावो निश्चेतुं शक्यते, सम्भवाद् वेदसंयोगस्य त्रैवर्णिकानाम् । त्रैवर्णिका हि मन्वादयः, तेषाञ्च त्रैवर्णिकत्वादेव वेदसंयोगः सम्भाव्यते । सम्भवमात्रेण चाभावनिश्चयो निरसितुं शक्यते । उक्तञ्च 'सम्भवमात्रनिरसनीयश्चाभावो नाशङ्कितसिद्धिमपेक्षते ।' एवं परोक्ते कारणाभावनिश्चये निरस्ते निष्प्रतिपक्षावगतिः प्रमाणम् । न च कारणसद्भावनिश्चया-

सर्वोपनिषदामर्था निःश्रेयसपदस्पृशः ।
विविच्यमाना दृश्यन्ते ते हि तत्र पदे पदे ।।
ये च वेदविदामग्र्याः कृष्णद्वैपायनादयः ।
प्रमाणमनुमन्यन्ते तेऽपि शैवादिदर्शनम् ।।

भावात् कारणाभावोऽपि सम्भवतीति सम्भवमात्रेणानुभवविरुद्धकारणाभावः शक्यते वक्तुं, यथोक्तम् 'दोषज्ञाने त्वनुत्पन्ने' इति । अन्येनाप्युक्तम् 'बाधके सति स न्यायः, नानुभूतं त्यक्तव्यम्' । लिङ्गे पुनर्नियमनिश्चयापेक्षावगतिरिति नायं नयः समस्ति । अत एव प्राङ्नयेन वेदमूलत्वनिश्चयाभावाद् **भाष्यकृता** "सम्भवाद् वेदसंयोगस्य" इत्ययुक्तम्, अन्यथा निश्चयो वक्तव्यः, न सम्भवमात्रम् । अत एव न वाच्यं 'वेदसंयोग एव वेदमूलत्वे प्रमाणं भविष्यति' इति, अनिश्चये प्रमाणत्वासिद्धेः । अत्र शास्त्रे स्मृत्यधिकरणे **प्रभाकरटीका** सर्वत्रोपयुज्यते ग्रन्थगौरवभयात् तु न प्रदर्शिता । तदेवं यथा स्मृत्यादिवाक्येभ्योऽवगतेरुत्पद्यमानाया मूलकारणाभावेन परैर्मिथ्यारूपता शङ्किता सा त्रैवर्णिकानां वेदसम्बन्धस्य सम्भवमात्रेण कारणाभावनिश्चयनिराकरणेन निरस्ता । भवन्ति हि मन्वादयस्त्रैवर्णिकत्वाद् वेदेऽधिकृताः, अस्ति तेषां वेदेन सम्बन्धः तत् कदाचिद् वेद एव मूलकारणं सम्भवतीति, एवं चेत् कथमेकान्तेन कारणाभावनिश्चय इति, तथा शैवादिशास्त्रेभ्योऽप्यवगतेरुत्पद्यमानाया अयमेव न्यायः, तत्कर्तॄणामपि वेदसंयोगः केनापह्नूयते। अतस्तत्रापि मूलकारणाभावनिश्चयः सम्भवमात्रेण निरसनीय एव । तथा च **पञ्चरात्रादौ** भगवत्सङ्कर्षणादयस्त्रैवर्णिका अविच्छेदेन कर्तारः स्मर्यन्त एव । न च विद्वज्जनानादरस्तेषाम् विद्वद्भिः परिव्राजकवरैरपि तदादरणात् तुर्ये च ज्ञानकाण्डे भगवद् **बादरायणसूत्रवृत्तिकृता भगवत्पुष्कराक्षेण** परिव्राजकमुख्येन पञ्चरात्रादेर्वेदमूलत्वमङ्गीकृतम् । तत्सूत्रकृतोऽपि 'विज्ञानादिभावे वा तदप्रतिषेधः' इति वदतस्तत्प्रामाण्यमभिप्रेतमिति लक्ष्यते । अस्य सूत्रस्यार्थमाहुः "ज्ञानानुत्पत्तिकृतं संदेहनिबन्धनं विपर्ययहेतुकं वा अप्रमाणं भवति । तदेतत् त्रिविधमपि पञ्चरात्रादिषु नास्ति । 'विज्ञानादिभावे' विज्ञानं तावत् तेभ्य उत्पद्यत इति विज्ञानानुत्पत्तिलक्षणाप्रामाण्यनिरासः । आदिग्रहणाद्धि संशयविपर्यययोः पर्युदासः । वाशब्दः पक्षान्तरनिवृत्त्यर्थः । अतस्तदप्रतिषेधः प्रामाण्याप्रतिषेध इत्यर्थ इत्यलं बहूक्त्या ।"

येऽपि वेदविदामग्र्या इति । तथा हि भारते

पञ्चरात्रेऽपि तेनैव प्रामाण्यमुपवर्णितम् ।
अप्रामाण्यनिमित्तं हि नास्ति तत्रापि किञ्चन ॥

तत्र च भगवान् विष्णुः प्रणेता कथ्यते । स चेश्वर एव ।

एकस्य कस्यचिदशेषजगत्प्रसूति-
हेतोरनादिपुरुषस्य महाविभूतेः ।
सृष्टिस्थितिप्रलयकार्यविभागयोगाद्
ब्रह्मेति विष्णुरिति रुद्र इति प्रतीतिः ॥

वेदे च पदे पदे 'एक एव रुद्रोऽवतस्थे न द्वितीयः' इति, 'इदं विष्णुर्विचक्रमे' इति रुद्रो विष्णुश्च पठ्यते । तद्योगाच्च तदाराधनोपाया वेदेऽपि चोदिता एव । शैवपञ्चरात्रयोस्तु तद्योगा एवान्यथोपदिश्यन्ते । न चैष वेदविरोधो वैकल्पिकत्वादुपायानाम् । अत आप्तप्रणीतत्वाद् वेदाविरुद्धत्वाच्च न तयोरप्रामाण्यम् ।

सौगतानामप्यागमानां न प्रामाण्यम्

ये तु सौगतसंसारमोचकागमाः पापकाचारोपदेशिनः कस्तेषु प्रामाण्यमार्योऽनुमोदते ?

पञ्चरात्रञ्च साङ्ख्यञ्च वेदाः पाशुपतं तथा ।
ज्ञानान्येतानि राजेन्द्र विद्धि नाना मतानि च ॥ इति ॥

ज्ञायतेऽनेनेति व्युत्पत्त्या विद्यापर्यायेण ज्ञानशब्देन वेदसमकक्षतया निर्दिशन् **पञ्चरात्रा**दींस्तेषां वेदवत् प्रामाण्यमभ्यनुजानाति । तथा **द्रोणपर्वणि** पितृवधामर्षितमश्वत्थामानं स्वयमेव सान्त्वयितुं "भवता लिङ्गमूर्तिः शिवो नार्चितो यथा केशवार्जुनाभ्यां प्राग्भवेऽर्चितः, अतो न पराजेतुं शक्यो भवता । विरम्यतामतोऽसद्ग्रहात्" इति भङ्ग्या **शैवशास्त्र**प्रसिद्धलिङ्गार्चनस्तुतिं वदता तच्छास्त्रप्रामाण्यमनुमन्यते । दानधर्मेषु च तच्छास्त्रप्रसिद्धां दीक्षामुपमन्युना कृष्णाय प्रतिपादितां दर्शयंस्तदेव शैवशास्त्राणां प्रामाण्यं स्फुटीचकार मो(अत्रटीका ग्रन्थस्त्रुटितः)त्यथर्वशिरसि मूलमन्त्रभूतोऽप्युपलभ्यत एव । **बौद्धा**दीनान्तु त्रैवर्णिकानादराद् वेदमूलत्वानभ्युपगमाच्च नायं नयः समस्तीति । तदेवं **मीमांसक**दृष्ट्या **नैयायिक**मताश्रयणेन **व्यासादि**वेदविद्दृष्ट्या च स्मृतिवच्छैवादिशास्त्रप्रामाण्यमिति सिद्धम् ।

बुद्धशास्त्रे हि विस्पष्टा दृश्यते वेदबाह्यता ।
जातिधर्मोचिताचारपरिहारावधारणात् ।
संसारमोचकाः पापाः प्राणिहिंसापरायणाः ।
मोहप्रवृत्ता एवेति न प्रमाणं तदागमः ॥
निषिद्धसेवनप्रायं यत्र कर्मोपदिश्यते ।
प्रामाण्यकथने तस्य कस्य जिह्वा प्रवर्त्तते ॥
ततो यद्यपि सिद्धिः स्यात् कदाचित् कस्यचित् क्वचित् ।
ब्रह्महत्यार्जितग्राम्यभोगवन्नरकाय सा ॥
निषिद्धाचरणोपात्तं दुष्कृतं केन शाम्यति ।
अतः कालान्तरेणापि नरके पतनं पुनः ॥

यत्त्वत्र चोदितं परेषु पूर्वोक्तक्रमेण बुद्धाद्याप्तकल्पनां कुर्वत्सु किं प्रतिविधेयमिति ? तत्रोच्यते । महाजनप्रसिद्ध्यनुग्रहे हि सति सुवचमाप्तोक्तत्वं भवति नान्यथा । महाजनश्च वेदानां वेदार्थानुगामिनाञ्च पुराणधर्मशास्त्राणां वेदाविरोधिनाञ्च केषाञ्चिदागमानां प्रामाण्यमनुमन्यते न वेदविरुद्धानां बौद्धाद्यागमानाम्, इति कुतस्तेषामाप्तप्रणीतत्वम् ? मूलान्तरं हि तत्र सुवचम्, अज्ञानलोभादीत्येवमभिधाय वेदस्पर्धिनो बौद्धादयो निषेद्धव्याः । आह

कोऽयं महाजनो नाम किमाकारः किमास्पदः ।
किंसंख्यः किंसमाचार इति व्याख्यातुमर्हसि ।

अपि च बौद्धादयो बुद्धादीनाप्तान् स्वागमप्रामाण्यसिद्धये वदन्ति । ते महाजनमपि निजं तत् सिद्धये वृन्दादिकम् वदेयुरेव । कस्तत्र प्रतीकारः ? उच्यते । चातुर्वर्ण्यं चातुराश्रम्यञ्च यदेतदार्यदेशप्रसिद्धं स महाजन उच्यते । आकारस्तु

संसारमोचका इति । ये घूकचटकन्यायेन प्राणिवधं धर्ममिच्छन्ति । **निषिद्धसेवनप्रायमिति** । यदुक्तम्

विन्नधारा मृतञ्चैव मेदो रुधिरमेव च ।
पवित्रं भैरवे तन्त्रे साधकानां न संशयः ॥ इति ॥

ततो यद्यपि सिद्धिः स्यादाकाशगमनादिका ।

तस्य कीदृशम्, पाणिपादं कीदृशम्, शिरोग्रीवं वा, कियती तस्य संख्येति पुरुषलक्षणानि गणयितुं न जानीमः। चातुर्वर्ण्यचातुराश्रम्यरूपश्चैष महाजनो वेदप्रथमप्रवृत्त आगमान्तरवादिभिरप्रत्याख्येय एव। तथा चैते बौद्धादयोऽपि दुरात्मानो वेदप्रामाण्यनियमिता एव चण्डालादिस्पर्शं परिहरन्ति। निरस्ते हि जातिवादावलेपे वा क्व चाण्डालादिस्पर्शे दोषः ? येऽप्यन्ये केचिदशुचिभक्षणागम्यागमनादिनिर्विकल्पदीक्षाप्रकारमकार्यमनुतिष्ठन्ति तेऽपि चातुर्वर्ण्यादिमहाजनभीतास्तं तं रहसि कुर्वन्ति न प्रकाशम्। निर्विशङ्के हि तच्छास्त्रप्रत्यये किमिति चौर्यवत् तदर्थानुष्ठानम् ? अत एव न निजो महाजन उत्थापयितुं शक्यते वृन्दकादिः, किन्त्वयमेव चातुवर्ण्यादिमहाजनः। स चैष महाजनो वेदविरुद्धमागमं परिहरत्येव नानुमोदते।

संसारमोचकं स्पृष्ट्वा शिष्टाः स्नान्ति सवाससः।
बौद्धैरपि सहैतेषां व्यवहारो न कश्चन ॥
वेदधर्मानुवर्त्ती च प्रायेण सकलो जनः।
वेदबाह्यस्तु यः कश्चिदागमो वञ्चनैव सा ॥

ईदृशश्चायमनन्यसामान्यविभवो महाभागो वेदनामा ग्रन्थराशिर्यदन्ये बाह्यागमवादिन एनमेव स्पर्धन्ते। ते हि स्वागमप्रामाण्यमभिवदन्तो वेदरीत्या-

---

निरस्ते हि जातिवादावलेप इति। ब्राह्मणोऽस्मीति यो जातिवादस्तत्कृतोऽवलेपो दर्पो जातिवादावलेपः। यदाह

वेदप्रामाण्यं जातिवादावलेप-
स्तीर्थे स्नानेच्छा कस्यचित् कर्तृवादः।
संतापारम्भः पापहानाय चेति
ध्वस्तप्रज्ञानां पञ्चलिङ्गानि जाड्ये ॥इति॥

येऽप्यन्ये केचिदिति। नाथवाद्यादयः। यथाहुः

माता च भगिनी चैव तथान्या या स्वगोत्रजा।
गम्याऽपरा त्वगम्येति नाथ एवं किलाब्रवीत् ॥ इत्यादि ॥

भिदधति । वेदे यथा तथा प्रवेष्टुमीहन्ते । वैदिकान् अर्थान् अन्तरान्तरा स्वागमेषु निबध्नन्ति । वेदस्पर्शपूतमिवात्मानं मन्यन्ते । तेषामप्यन्तर्हृदये ज्वलतीव प्रामाण्यम् । अत एवंविधाया महाजनप्रसिद्धेरागमान्तरेष्वदर्शनान्न तेषामाप्तप्रणीतत्वम् । आह

महाजनप्रसिद्ध्यैव वेदप्रामाण्यनिश्चयात् ।
किमर्थः कण्ठशोषोऽयमियानार्येण संश्रितः ॥

वेदप्रामाण्यसिद्धचर्थं हि इदं शास्त्रमारब्धमिति गीयते । वेदप्रामाण्यस्य च महाजनसिद्धचैव सिद्धत्वात् किं शास्त्रेण ? अलं क्षुद्रचोद्यैरीदृशैः ।

महाजनप्रसिद्धं हि केचिद् विप्लावयन्त्यपि ।
अतस्तदुपघाताय शास्त्रमस्त्रं प्रयुज्यते ॥

तस्मात् पूर्वोक्तानामेव प्रामाण्यमागमानां न वेदबाह्यानामिति स्थितम् ।

केषाञ्चिन्मते सामान्यत आगमानां प्रामाण्यम्

अन्ये सर्वागमानान्तु प्रामाण्यं प्रतिपेदिरे ।
सर्वत्र बाधसन्देहरहितप्रत्ययोदयात् ॥
सर्वत्र वेदवत् कर्तुराप्तस्य परिकल्पना ।
दृष्टार्थेष्वेकदेशेषु प्रायः संवाददर्शनात् ॥

यत् पुनरत्रोक्तं सर्व एवागमाः परस्परविरुद्धार्थोपदेशित्वादप्रमाणं स्युरिति, तत्रोच्यते, आप्तप्रणीतत्वेन तुल्यकक्ष्यत्वादन्यतमदौर्बल्यनिमित्तानुपलम्भाच्च न कश्चिदागमः कञ्चिद् बाधते । विरोधमात्रन्त्वकिञ्चित्करम्, प्रमाणत्वाभिमतेषु वेदवाक्येष्वपि परस्परविरोधदर्शनात् । पुरुषशीर्षस्पर्शनसुराग्रहगवालम्भादिचोदनासु वचनान्तरविरुद्धमर्थजातमुपदिष्टमेव । किञ्चागमानां विरोधोऽपि नातीव विद्यते, प्रमाणानां पुरुषार्थे सर्वेषामविवादात् ।

वैदिकान् अर्थान् अन्तरान्तरेति । वैदिकान् भूतदयादीन् ।

केचिद् विप्लावयन्त्यपि । यथा प्रतिपादितं 'कोऽयं महाजनो नाम' इत्यादि ।

पुरुषशीर्षेति । 'पुरुषशीर्षमुपदधाति', 'सुराग्रहं गृह्णाति', गामालभत' इत्यादिषु । **वचनान्तरविरुद्धम्** । "नारं स्पृष्ट्वास्थि सस्नेहम्" इत्यादिविरुद्धम् ।

नानाविधैरागममार्गभेदैरादिश्यमाना बहवोऽभ्युपायाः ।
एकत्र ते श्रेयसि संपतन्ति सिन्धौ प्रवाहा इव जाह्नवीयाः ॥

तथा ह्यपवर्ग उपेयः सर्वशास्त्रेषु निर्दिश्यते ज्ञानविषये तु विवदन्ते । तत्रापि प्रायश आत्मविषयतायां बहूनामविप्रतिपत्तिः । प्रकृतिपुरुषविवेकज्ञानपक्षे तु प्रकृतेर्विविक्ततया पुरुष एव ज्ञेयः । नैरात्म्यवादिनस्तु आत्मशैथिल्यजननायापदिशन्ति । स्वच्छन्तु ज्ञानतत्त्वं यत्तैरिष्यते तत् स्वातन्त्र्यादनाश्रितत्वादात्मकल्पमेव, कूटस्थनित्यत्वे प्रवाहनित्यत्वे च विशेषः । एवं प्रधानयोस्तावदुपायोपेययोरविवादः । क्रिया तु विचित्रा । प्रत्यागमं भवतु नाम भस्मजटापरिग्रहो वा, दण्डकमण्डलुग्रहणं वा, रक्तपटधारणं वा, दिगम्बरता वावलम्ब्यतां कोऽत्र विरोधः ? वेदेऽपि किमल्पीयांसः पृथगितिकर्त्तव्यताकलापखचिताः स्वर्गोपायाश्चोदिताः ? तस्मात् परस्परविरोधेऽपि न प्रामाण्यविरोधः । अतश्च यदुच्यते

कपिलो यदि सर्वज्ञः सुगतो नेति का प्रमा ।
अथोभावपि सर्वज्ञौ मतभेदस्तयोः कथम् ॥

इति तदपास्तं भवति, प्रधाने सति भेदाभावात्, क्वचिद् वा तद्भावेऽपि प्रामाण्याविरोधात् । न च हृदयक्रोशनहेतुकर्मोपदेशादागमान्तराणामप्रामाण्यम्, तस्याप्रमाणतायामप्रयोजकत्वात् ।

विचिकित्सा हि नृशिरःकपालाद्यशनेषु या ।
साप्यन्यदर्शनाभ्यासभावनोपनिबन्धना ॥

एकत्र ते श्रेयसीति । निःश्रेयसे, सर्वेषां तदर्थत्वात् ।

कूटस्थनित्यत्वेति । आत्मा कूटस्थोऽविचलद्रूपः सन् नित्यः, ज्ञानसन्तानस्तु अविच्छेदेन प्रवहत् प्रवाह इति ।

क्वचिद्वा तद्भावेऽपीति । यथा नित्यानन्दस्यात्मनोऽवस्थानं मोक्ष इति केचित्, अन्ये चितिमात्रस्य परिशुद्धस्य चित्तसन्तानस्य, इतरे विशेषगुणवियुक्तस्यात्मन इत्युपेये भेदः । **न च हृदयक्रोशनेति** । हृदयक्रोशनं विचिकित्सा ।

अन्यदर्शनाभ्यासेति । पुनः पुनर्यदभ्यस्तं 'नारं स्पृष्ट्वास्थि सस्नेहम्' इत्यादिदर्शनं तत्संस्कारवासितान्तःकरणानाम् ।

तथा च शान्तचित्तानां सर्वभूतदयावताम् ।
वैदिकीष्वपि हिंसासु विचिकित्सा प्रवर्त्तते ॥

अभिचारादिहिंसायां वैदिक्यामपि भवतु कामं हृदयोत्कम्पः, करणांशोपनिपातिनी हि हिंसेति लिप्सातस्तस्यां प्रवृत्तिः ।

यत्त्वग्नीषोमीयादिपशुहिंसा इतिकर्त्तव्यतांशस्था, यस्यां क्रत्वर्थो हि शास्त्रादवगम्यते इति वैदी प्रवृत्तिस्तस्यामपि कारुणिको लोकः सविचिकित्सो भवति वदति च "यत्र प्राणिवधो धर्मस्त्वधर्मस्तत्र कीदृशः" इति । न चैतावता वेदस्याप्रामाण्यम्, एवमागमान्तरेष्वपि भविष्यति ।

यत्तु आगमान्तरेभ्यः कौलादिभ्यः खेचरताद्यर्थसिद्धावपि निषिद्धाचरणकृतः (प्रत्यवायः) कालान्तरेऽवश्यं भावीत्युक्तम्, तदपि न युक्तम्, तस्यार्थस्य तदागमनिषिद्धत्वाभावात्. आगमान्तरनिषिद्धत्वेऽपि वैकल्पिकत्वकल्पनोपपत्तेः, पुरुषार्थप्राप्त्युपायत्वाच्च तस्य तस्मिन् सिद्धे कुतः प्रत्यवायः ? भवतु वा कालान्तरे ततः प्रत्यवायस्तथाप्यधिकारिभेदेन तत्फले कर्मणि चोद्यमाने श्येनादाविव नागमप्रामाण्यमत्र हीयते । 'श्येनेनाभिचरन् यजेते' त्यत्राभिचरन्निति शत्रा लङ्घितनिषेधमधिकारिणमाचष्टे । तस्य च श्येनयागश्चोदितः । स च तत्प्रयोगात् कृतवधः प्रत्यवैत्येव । न च वेदस्याप्रामाण्यम् । उक्तञ्च 'उभयमिह चोदनया लक्ष्यते अर्थोऽनर्थश्चेति ।

भवतु कामं हृदयोत्कम्पः, तस्यां हिंसायां विधेरव्यापारात् । कथमव्यापारश्चेत् तदाह **करणांशोपनिपातिनी होति** । 'श्येनेनाभिचरन् यजेत' इत्यत्र हि श्येनयागाभिचारयोरुपायोपेयतापरिज्ञानमात्रेऽधिकारे विधेर्व्यापारः, प्रवृत्तौ तु तत्र विधिरुदास्ते लिप्सातस्तत्र प्रवृत्तिसिद्धेः । तदुक्तम् 'यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणा' इति । क्रत्वर्थः पुनः क्रतूपकारको योऽग्नीषोमीयपश्वालम्भादिस्तस्य फलं प्रति करणत्वस्य साक्षादनवगमात् तत्र लिप्सातः प्रवृत्तेरभावः, प्रवृत्तौ चासत्यां सेतिकर्तव्यताकस्य क्रतोरनिर्वाहात् । तत्र शास्त्रविधिरेव प्रवर्तकः । तदुक्तं भाष्यकृता "क्रत्वर्थो हि शास्त्रादवगम्यते" इति । अतोऽसावभिचारोऽवैधः शास्त्राविहित इति । **तथाप्यधिकारिभेदेनेति** । यस्तज्जन्यफलकामस्तदपेक्षया । **शत्रा लङ्घितनिषेधमिति** । अभिचरन्निति हि शतृप्रत्ययो लक्षणे । लक्षणञ्च पूर्वसिद्धं भवति । 'शयाना भुञ्जते यवनाः' इति

अधिकारभेदाच्च विचित्रकर्मचोदना नानुपन्ना । मरणकामस्य सर्वस्वारश्चोदितः, आयुष्कामस्य कृष्णलचरुः । तस्मादेतदपि नाप्रामाण्यनिमित्तम् ।

यद्यपि बौद्धागमे जातिवादनिराकरणं तदपि सर्वानुग्रहप्रवणकरुणातिशयप्रशंसापरम् । न च यथाश्रुतमवगन्तव्यम् । तथा च तत्रैतत् पठ्यते न जातिकायदुष्टान् प्रव्राजयेदिति । तस्मात् सर्वेषामागमानामाप्तैः कपिलसुगतार्हत्प्रभृतिभिः प्रणीतानां प्रामाण्यमिति युक्तम् ।

केषाञ्चिन्मते सर्वेषामेवागमानामीश्वरप्रणीतत्वम्

अन्ये मन्यन्ते सर्वागमानामीश्वर एव भगवान् प्रणेतेति । स हि सकलप्राणिनां कर्मविपाकमनेकप्रकारमवलोकयन् करुणयाताननुग्रहीतुमपवर्गप्राप्तिमार्गं बहुविधमुत्पश्यन्नाशयानुसारेण केषाञ्चित् क्वचित् कर्मणि योग्यतामवगम्य तं तमुपायमुपदिशति । स्वविभूतिमहिम्ना च नानाशरीरपरिग्रहात् स एव संज्ञाभेदानुपगच्छति अर्हन्निति कपिल इति सुगत इति । स एवोच्यते भगवान् । नानासर्वज्ञकल्पनायां यत्नगौरवप्रसङ्गात् ।

ननु बुद्धः शुद्धोदनस्यापत्यं स कथमीश्वरो भवेत् ? परिहृतमेतद् भगवता कृष्णद्वैपायनेन

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।। इति ।

शरीरमेव शुद्धोदनस्यापत्यं नात्मा । अतः प्रतियुगं विष्णुरेव भगवान् धर्मरूपेणावतरतीत्यागमविदः प्रतिपन्नाः ।

ननु वेदसमानकर्तृकेष्वागमान्तरेषु कथं तादृशो महाजनसंप्रत्ययो नास्ति ? एवं नास्ति । तेन वर्त्मना भगवता कतिपये प्राणिनोऽनुगृहीताः, येषां तादृश आशयो लक्षितः । वैदिकेन तु वर्त्मना निःसंख्यकाः प्राणिनोऽनुगृहीता इति तत्र महानादर आग-

---

शयनस्य पूर्वसिद्धस्य लक्षणत्वात् । **मरणकामस्य सर्वस्वार** इति । 'सर्वस्वारेण मरणकामो यजेत' । **आयुष्कामस्येति** । 'शतकृष्णलं चरुं न प्राजापत्यमायुष्कामो निर्वपेत्' इति । 'मन्वादिचोदनान्यायः स यद्यपि न विद्यते' इति शैवादिप्रामाण्यसमर्थनावसरे

मान्तरेषु कृश इति । एककर्तृके परस्परविरोधः कथमिति चेद् ? वेदैरेवात्र वर्णित समाधिः । तेष्वपि भूम्नः परस्परविरोधस्य दर्शनादित्युक्तम् । तस्मादीश्वरप्रणीतत्वादेव सर्वागमानां प्रामाण्यम् ।

वेदमूलकत्वेनैवागमानां प्रामाण्यमिति केचित्

अपरे पुनर्वेदमूलत्वेन सर्वागमप्रामाण्यमभ्युपागमन् । यो हि मन्वादिदेशनानां वेदमूलतायां न्याय उक्तः

भ्रान्तेरनुभवाद्वापि पुंवाक्याद् विप्रलम्भकात् ।
दृष्टानुगुणसामर्थ्याच्चोदनैव लघीयसी ॥ इति ।

स सर्वागमेषु समानः । न च मन्वादिस्मृतीनां मूलभूता श्रुतिरुपलभ्यते । अनुमानेन तु तत्कल्पनमागमान्तरेष्वपि तुल्यम् ।

ननु चोक्तम्, 'अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यादि'ति तच्चेह नास्तीति कथं श्रुत्यनुमानम् ? नैष दोषः

एकाधिकारावगमो न प्रामाण्ये प्रयोजकः ।
मिश्रानुष्ठानसिद्धौ तु कामं भवतु कारणम् ॥

न च पृथगनुष्ठीयमानमपि कर्म न प्रमाणमूलं भवति वर्णाश्रमभेदानुष्ठेयकर्मवत् ।

कर्तृसामान्यशून्यत्वादथ मूलान्तरोदयः ।
तदसद् बाधकाभावाद् भ्रान्त्यादिप्रतिषेधनात् ॥
प्रत्यक्षमूलतायान्तु गुर्वी भवति कल्पना ।
वेदस्त्वनन्तशाखत्वान्मूलं तत्र स्वसङ्गतम् ॥
नन्वत्र वेदमूलत्वे द्वेषो वेदविदां कथम् ।
गत्वा त एव पृच्छ्यन्तां येषां द्वेषादि विद्यते ॥
गोवधे वा कथं तेषां द्वेषः सुस्पष्टवैदिके ।
प्रत्युक्तश्च विरुद्धत्वं शाखानन्त्याच्च दुर्गमम् ॥

---

5 यत् किञ्चित् सृष्टं तदिदानीं सर्वागमप्रामाण्यप्रतिपादनावसर उद्घाटयति—**अपरे**

किमियद् वेदसर्वस्वं यावदस्मन्मुखे स्थितम् ।
शाखान्तराद् वा संवादो न लभ्येतेति का प्रमा ॥

तथा च सांख्यशास्त्रप्रसिद्धत्रिगुणात्मकप्रकृतिसूचनपरम् 'अजामेकां लोहितशुक्लकृष्णामि'ति वैदिकं लिङ्गमुपलभ्यते । निर्ग्रन्थकथितवचसः चित्तत्वज्ञानशंसी चायमनुवादो दृश्यते 'मुनयो वातरसना' इति । एवं रक्तपटपरिग्रहभस्मकपालधारणादिमूलमप्यभियुक्ता लभन्त एव ।

मन्वादिस्मृतिवत् कर्तृसाम्यस्यासम्भवेऽप्यतः ।
प्रमाणं वेदमूलत्वाद् वाच्या सर्वागमा स्मृतिः ॥

ततश्च

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्त्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥

इत्यत्र यथा मनुग्रहणं गौतमयमापस्तम्बसंवर्तकाठकादिस्मृत्यन्तरोपलक्षणम् एवमर्हत्कपिलसुगताद्युपलक्षणपरमपि व्याख्येयम् ।

ननु च लोकायताद्यागमोऽप्येवं प्रामाण्यं प्राप्नोति 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्यसंज्ञास्ती'ति वेदमूलदर्शनात् । ततश्च लोकायतदर्शने प्रमाणभूते सति स्वस्ति सर्वागमेभ्यः । उच्यते

पुनर्वेदमूलत्वेनेति । **अजामेकामिति** । "अजामेकां लोहितकृष्णशुक्लां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको भजमानोऽनुशेते जहाति चैनां भुक्तभोगामजोऽन्यः ।" इति । अत्र लोहितशुक्लकृष्णग्रहणेन रजःसत्त्वतमोरूपतां तस्या आह । अनुशेते पुनः पुनस्तया सम्बन्धं भजते । **मुनयो वातरशना** इति । वात एव रशना वासो ग्रन्थनं येषां ते वातरशना अतो वाससोऽभावादेव वातस्तेषां रशना अत एव निर्ग्रन्था भण्यन्ते । रसना इति तु पाठे रस्यत आस्वाद्यत इति रसनं वात एव रसनं येषां वायुभक्षा इत्यर्थः । **एवं रक्तपटपरिग्रहेति** । तथाहि रक्तपटदर्शनसंस्थोपनिषद्वाक्यमुदाहरति— "पौल्कसोऽपौल्कसश्चाण्डालोऽचाण्डालो ब्राह्मणोऽब्राह्मणः श्रमणोऽश्रमणः" इत्यादि तद्दर्शयति । प्रसिद्धामलमार्गप्रवृत्तं श्रमणमाचक्षते, 'श्रामण्यममलो मार्गः' इति हि ते आहुः इतिः प्रभृति टीकाग्रन्थो मध्ये खण्डितः ।

न हि लोकायते किञ्चित् कर्तव्यमुपदिश्यते ।
वैतण्डिककथैवासौ न पुनः कश्चिदागमः ॥

ननु च 'यावज्जीवं सुखं जीवेदि'ति तत्रोपदिश्यते ? न। स्वभावसिद्धत्वेनात्रोपदेशवैफल्यात् । 'धर्मो न कार्यः' 'तदुपदेशेषु न प्रत्येतव्यमि'त्येवं वा यदुपदिश्यते तत् प्रतिविहितमेव, पूर्वपक्षवचनमूलत्वाल्लोकायतदर्शनस्य । तथा च तत्रोत्तरब्राह्मणं भवति 'न वा अरे अहं मोहं ब्रवीमि अविनाशी वा अरेऽयमात्मा मात्रासंसर्गस्त्वस्य भवती'ति । तदेवं पूर्वपक्षवचनमूलत्वाल्लोकायतशास्त्रमपि न स्वतन्त्रम्, उत्तरवाक्यप्रतिहतत्वात्तु तदनादरणीयम् । शास्त्रान्तराणान्तु पूर्वपक्षवाक्यमूलकत्वकल्पनमयुक्तम्, समनन्तरमेव तत्प्रतिपक्षवचनानुपलब्धेरित्यतो वेदमूलत्वात् सर्वागमः प्रमाणम् ।

आगमप्रामाण्ये ग्रन्थकारमतम्

सर्वागमप्रमाणत्वे नन्वेवमुपपादिते ।
अहमप्यद्य यं कश्चिदागमं रचयामि चेत् ॥
तस्यापि हि प्रमाणत्वं दिनैः कतिपयैर्भवेत् ।
तस्मिन्नपि न पूर्वोक्तन्यायो भवति दुर्वचः ॥

जरत्पुस्तकलिखितं यदपि तदपि किञ्चिदिदानीं केनापि धूर्तेन प्रख्याप्यते ।

महाजनसमूहे ये प्रसिद्धिं प्रापुरागमाः ।
कृतश्च बहुभिर्येषां शिष्टैरिह परिग्रहः ॥
अद्य प्रवर्तमानाश्च नापूर्वा इव भान्ति ये ।
येषां न मूलं लोभादि येभ्यो नोद्विजते जनः ॥
तेषामेव प्रमाणत्वमागमानामिहेष्यते ।
न मृष्यते तु यत्किञ्चित्प्रमाणं कुट्टिनीमतम् ॥

तथा हि

अमितैकपटनिवीतानियतस्त्रीपुंसविहितबहुचेष्टम् ।
नीलाम्बरव्रतमिदं किल कल्पितमासीद् विटैः कैश्चित् ॥
तदपूर्वमिति विदित्वा निवारयामास धर्मतत्त्वज्ञः ।
राजा शङ्करवर्मा न पुनर्जैनादिमतमेवम् ॥

इत्याप्तोक्तत्वहेतोः परिमुषितपरोदीरिताशेषदोषा-
देषां वेदागमानां सुदृढमुपगते मानभावे प्ररोहम् ।
तन्मूलत्वात् तथात्वं पुरुषवचनतो वास्तु शास्त्रान्तराणां
तद्द्वारेणापि वक्तुं न खलु कलुषता शक्यते वेदवाचाम् ॥

वेदप्रामाण्ये शङ्का

ननु नाद्यापि वेदस्य प्रामाण्यं सुस्थवत् स्थितम् ।
स्वदेहसंभवैरेव दोषैरनृततादिभिः ॥

'चित्रया यजेत पशुकामः' पुत्रकामः 'पुत्रेष्ट्या यजेते'ति श्रूयते । न चेष्ट्यनन्तरं पुत्रपश्वादिफलमुपलभ्यते । तस्मादसत्याः चित्रादिचोदनाः ।

ननु च यः पशुकामः स इष्टिं कुर्यादितीयानेव वाक्यार्थः । तत्र यागात् पशवो भवन्तीति एतदेव तावदुपपाद्यम् । ते च भवन्तोऽप्यनन्तरमेव भवन्तीत्येतद् दुरुपपादनम् । अतः कथं न सत्यार्थत्वं चित्रादिचोदनानाम् ? उच्यते, यावज्जीवं यजेत यावज्जीवं जुहुयादिति जीवनवदसाध्यमानपशुकामनैव नाधिकारिविशेषणं भवितुमर्हति, पशूनां ततः कर्मजः सिद्धिमनवबुध्यमानस्य तत्राधिकार एव न सम्प्रवर्त्तते एव इति निर्णेष्यते एतत् । आनन्तर्यमपि कर्मस्वभावपर्यालोचनेनैव गम्यते, समनन्तरफलत्वेन कर्मणां दृष्टत्वात् । आह च 'कर्मकाले च फलेन भवितव्यम्, यत्कालं हि मर्दनं तत्कालं मर्दनसुखमि'ति । अधिकार्यपि पश्वाद्यभावपरितप्यमानमानस एव कर्मण्यधिक्रियते यदि सद्य एव ततः फलमासादयेत् । कालान्तरे च कर्मणः प्रध्वंसात् कुतः फलम् ? आह च 'यदा तावदियं विद्यमानासीत्तदा फलं न दत्तवती यदा फलमुत्पद्यते तदासौ नास्ति, असती कथं फलं दास्यती'ति । अपि च कालान्तरे फलस्यान्यत् प्रत्यक्षं कारणमुपलभ्यते सेवादि । तस्मिंश्च कारणे दृष्टे सति को नाम सूक्ष्मदृष्टिरदृष्टं चित्रादिकारणं कल्पयेत् ? तस्मादसत्याश्चित्रादिचोदनाः, प्रत्यक्षादिप्रमाणपरिच्छेदयोग्यार्थोपदेशत्वे सत्यपि तत्संवादशून्यत्वात्, एवंविधविप्रलम्भकवाक्यवत् ।

चित्रादिवचसामेवमपचारस्य दर्शनात् ।
अनाश्वासोऽग्निहोत्रादिचोदनास्वपि जायते ॥

अग्निहोत्रचोदना मिथ्या, वेदैकदेशत्वात्, चित्रादिचोदनादिवत्, तदत्र तावदसंवादादप्रामाण्यम् । एवं 'पुत्रकामः पुत्रेष्ट्या यजेते'त्येवमादावपि असंवादो द्रष्टव्यः ।

विसंवादोऽपि क्वचिद् दृश्यते । प्रमीते यजमाने पात्रचयाख्यं कर्मोपदिश्यैवमादिदेश वेदः 'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याती'ति तत्रैष इति तावदात्मनो निर्देशः क्लिष्ट एव, परोक्षत्वात्, स्फ्यकपालादियज्ञायुधसम्बन्धाभावाच्च । कायस्त्वेष निर्दिश्यते स न स्वर्गं लोकं यातीति । तद्विपरीतभस्मीभावोपलम्भादिति विसंवादः । एवञ्चासंवादविसंवादाभ्यामप्रमाणं वेदः ।

व्याघाताच्च । उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्यमिति होमकालत्रयमपि विधाय निन्दार्थवादैस्तदेव निषेधति श्यामो वा अस्याहुतिमभ्यवहरति य उदिते जुहोति, शबलो वा अस्याहुतिमभ्यवहरति योऽनुदिते जुहोति, श्यामशबलावस्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति । न चार्थवादमात्रमेतदिति वक्तव्यम्, यतः—

विधानं कल्पते स्तुत्या निन्दया च निषेधनम् ।
विधिस्तुत्योः समा वृत्तिस्तथा निन्दानिषेधयोः ॥

न हि निन्दा निन्द्यं निन्दितुमुपादीयते किन्तु निन्दितादितरत् प्रशंसितुमित्ययमपि प्रकारोऽत्र न सम्भवति, कालत्रयस्याप्यत्र निषेधात्, कस्यान्यस्य तन्निन्दया प्रशंसा विधीयते ? तस्मात् परस्परविरुद्धार्थोपदेशलक्षणाद् व्याघातादप्रमाणं वेदः ।

पौनरुक्त्याच्च । 'त्रिः प्रथमामन्वाह त्रिरुत्तमामि'त्यभ्यासचोदनायां प्रथमो-

---

······च निषेधेन निवर्त्यते तथा निन्दयापीति समा वृत्तिः । इतरप्रशंसार्थमपि निन्दा भवति यथा 'प्राप्य गाण्डीवधन्वानं विद्धि कौरव तान् स्त्रियः' इति न केवलं प्रतिषेधायेति यो मन्येत तमपि प्रत्याह **न हि निन्दा निन्द्यं निन्दितुमि**त्यादि ।

त्रिः प्रथमामिति । सामिधेन्यः समिधामग्नौ प्रक्षेपणमन्त्राः, तस्य प्रक्षेपणाख्यस्य कर्मणो हि प्रकाशकोऽसौ मन्त्रः, तच्च सकृदुच्चारितेनापि तेन शक्यते कर्तुं प्रकाशनमिति त्रिरुच्चारणं पुनरुक्तम् । एकादश च ते मन्त्राः पठ्यन्ते, 'पञ्चदश सामिधेनीरनुब्रूयात्' इति च श्रूयते, अतः प्रथमोत्तमयोस्त्रिरुच्चारणं पञ्चदशसङ्ख्यासम्पत्त्यर्थं क्रियते ।

त्तमयोः सामिधेन्योस्त्रिर्वचनात् पौनरुक्त्यम् । सकृदनुवचनेन तत्प्रयोजनसम्पत्तेरनर्थकं त्रिर्वचनम् । तस्मादित्थमनृतव्याघातपुनरुक्तदोषकलुषितत्वादप्रमाणं वेदः । तदाह सूत्रकारः "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः" पुत्रकामेष्टिहवनाभ्यासेष्विति ।

वेदप्रामाण्ये शङ्कानिरसनम्

अत्र समाधिमाह "न । कर्मकर्तृसाधनवैगुण्यादिति" । अयमाशयः अप्रामाण्यसाधनमनृतत्वं परैरुक्तम्, अनृतत्वे च साधनं फलादर्शनम्, एतच्चानैकान्तिकम्, अन्यथापि फलादर्शनोपपत्तेः । किं वेदस्यासत्यार्थत्वादत्र फलादर्शनम् उत कर्त्रादिवैगुण्यादिति ? न विशेषहेतुरस्ति । ननु न कदाचिदपि कर्मसमनन्तरमेव फलमुपलब्धमिति तदनृतत्वमेव तददर्शनकारणं न कारणवैगुण्यमिति, तदयुक्तम् । अविगुणायां कारीर्यां प्रयुक्तायां सद्य एव वृष्टेर्दर्शनात् । न च तत् काकतालीयम्, आगमेनान्वयव्यतिरेकाभ्याञ्च तत्कारणत्वदर्शनात् । पुत्रादिस्त्वैहिकमपि फलं वस्तुस्वभावपर्यालोचनयैव न सद्यो भवितुमर्हति । न हि नभसस्तदानीमेव वृष्टिरिव निपतति पुत्रः, स्त्रीपुंसयोगकारणान्तरसव्यपेक्षत्वात्तदुत्पत्तेः । पश्वादिप्राप्तिस्तु कस्यचिदुत्तरकालेऽपि दृश्यते प्रतिग्रहादिना । तथा ह्यस्मत्पितामह एव ग्रामकामः सांग्रहणीं कृतवान् । स इष्टिसमाप्तिसमनन्तरमेव गौरमूलकं ग्राममवाप । नन्वेवं तर्हि प्रतिग्रहाद्येव दृष्टं कारणमस्तु पश्वादेः पुत्रस्य च स्त्रीपुंसयोगः, किमिष्टेः कारणत्वकल्पनयेति ? मैवं वोचः । सत्स्वपि च दृष्टेषु कारणेषु तददर्शनाद् इष्टिप्रयोगानन्तरं चैतद्दर्शनादिष्टिकृतं स्त्रीपुंसयोगादिकारणत्वमिति निश्चीयते । किञ्च

कर्मकर्तृसाधनवैगुण्यादिति । इष्ट्या पितरौ संप्रयुज्यमानौ पुत्रं जनयत इति । इष्टिः करणं साधनम्, कर्तृलक्षणं पितरः, तत्सम्प्रयोगः कर्म, त्रयाणामपि गुणसंयोगात् पुत्रजन्म, वैगुण्याद् विपर्ययः । इष्ट्याश्रयं तावत् कर्मवैगुण्यं समीहाभ्रेषः; कर्तृवैगुण्यम् अविद्वान् प्रयोक्ता कपूयाचरणं वा; साधनवैगुण्यं हविर्न संस्कृतमुपहृतमिति, मन्त्रा न्यूनाधिकाः स्वरवर्णहीना इति, दक्षिणा दुरागता हीना निन्दिता वेति । उपजनाश्रयं कर्मवैगुण्यं मि [थ्यासम्प्रयोगः], कर्तृवैगुण्यं योनिव्यापदो बीजोपघातश्च; साधनवैगुण्यमिष्ट्यामभिहितम्, कपूयाचरणः कुत्सिताचारः, मिथ्यासम्प्रयोगः पुरुषायितत्वादिना सम्प्रयोगः ।

सेवाध्ययनकृष्यादिसाम्येऽपि फलभेदतः ।
वक्तुं न युक्ता तत्प्राप्तिर्दृष्टकारणमात्रजा ।
भूतस्वभाववादश्च पुरस्तात् प्रतिषिध्यते ।
तस्मान्नूनमुपेतव्यमत्रान्यदपि कारणम् ॥

तदुक्तम्, तच्चैव हि कारणं शब्दश्चेति । यत्र पुनरविगुणेऽपि कर्मणि प्रयुज्यमाने कालान्तरेऽपि पुत्रपश्वादिफलं न दृश्यते तत्र तीव्रं किमपि प्राक्तनं कर्म प्रतिबन्धकं कल्पनीयम् । यथोक्तम् "फलति यदि न सर्वं तत् कदाचित्तदेव ध्रुवमपरमभुक्तं कर्म शास्त्रीयमास्ते" इति । कर्मादिवैगुण्यग्रहणमुपलक्षणार्थमृषिणा प्रयुक्तम् । न तु वेदस्याप्रामाण्यकल्पना साध्वी साद्गुण्ये कर्मणः प्राचुर्येण फलदर्शनात् ।

अपि च चित्रातः पशवो भवन्तीत्येतावानेव शास्त्रार्थः । आनन्तर्ये तु न किञ्चित् प्रमाणमस्ति । तदयं प्रत्यक्षादिसंवाद आनन्तर्यविषयः, चित्रादिचोदना त्वनिर्दिष्टकालविशेषविषयेति विषयभेदान्न सा तेन बाध्यते । तदाह भट्टः

आनन्तर्याद्यसंवादो नाविशेषप्रवर्तिनीम् ।
चोदनां बाधितुं शक्तः स्फुटाद् विषयभेदतः ॥ इति

भूतस्वभाववादश्चेति । शरीरारम्भकाणि यानि भूतानि तेषामीदृक् कश्चित् स्वभावविशेषो यत् कानिचिदेव पश्वादिभिः सम्बध्यन्ते कानिचिन्नेति ।

तच्चैव हि कारणम् इति । **शाबरं भाष्यम्** 'यच्च कालान्तरे फलस्यान्यत् प्रत्यक्षं कारणमस्तीति । नैष दोषः" इति । अतः परं स्थितम् । यद्यपि प्रत्यक्षतः सेवादीनां कारणत्वमवगम्यते तथापि शब्दात् 'चित्रया यजेत पशुकामः' इत्यादेश्चित्रादीनामपि कारणत्वावगमः; यथा प्रत्यक्षं प्रमाणं तथा शब्दोऽपीत्यर्थः । **कर्मादिवैगुण्यग्रहणमिति** । यथा कर्मादिवैगुण्यात् फलं न भवति एवं तीव्रप्राग्भाविकर्मान्तरप्रतिबन्धादपीति । ननु कथमेवंप्रायाः कल्पनाः स्थाप्यन्ते, किमाभिरित्याशङ्क्याह—**न तु वेदस्याप्रामाण्यकल्पनेति । साद्गुण्ये कर्मण** इति । अरणिनिर्मथनसाद्गुण्येन कृताद्यग्न्युत्पत्तिदर्शनादन्यथा चादर्शनादिति ।

नाविशेषप्रवर्तिनीमिति । 'चित्रया पशुकामो यजेत' चित्रातः पशवो भवन्तीत्येतावत्येवाविशेषेण चोदनैषा स्थिता, न पुनरनन्तरं भवन्तीति विशेषेऽपीत्यर्थः ।

यत्तु कर्मस्वभावपर्यालोचनया चित्रादेरनन्तरफलत्वमुक्तम्, यत्कालं हि मर्दनं तत्कालं मर्दनसुखमिति । तदेतदत्यन्तमनभिज्ञस्याभिधानम् । विधिफलानां क्रियाफलतुल्यत्वानुपपत्तेः । इह किञ्चिद् विधिफलं भवति किञ्चित् क्रियाफलम् । कृष्यादौ तु भूमिपाटवादि क्रियाफलं सस्यसम्पत्तिस्तु विधिफलम् । कः पुनः कृष्यादौ विधिरस्ति ? वार्त्ताविद्यायां वृद्धोपदेशे वा कश्चिद्विधिः ? अन्वयव्यतिरेकौ वा तत्र विधिस्थानीयौ भविष्यतः । लोकेऽपि वेतनकामः पचतीत्यादौ पाकक्रियाफलमोदनः, विधिफलन्तु वेतनम् । तत्र क्रियाफलानामेवैषनियमो यत् क्रियानन्तरभावित्वम् । विधिफलानान्तु वेतनादीनां नास्ति कालनियमः । इष्टावपि हुविर्विकारादि क्रियाफलं सद्यो भवति, मृद्नतस्तु पुंसः सेवाफलमनियतफलम् ।

ग्रामकामो महीपालं सेवेतेत्येवमादिषु ।
लौकिकेषु विधिष्वस्ति न कालनियमः फले ॥

आयुर्वेदोपदिष्टानामप्यौषधविधीनां न क्रियावत् सद्य एव फलदर्शनम् । अपि तु कालापेक्षमेवेति न फलानन्तर्य्ये किञ्चित् प्रमाणम् ।

यत्तु पशुविरहकृत-कदशनादिदोदूयमानाधिकारिस्वरूपपर्यालोचनया सद्यः फलत्वमुच्यते तदपि न साम्प्रतम्, पुरुषेच्छामात्रमेतन्न प्रमाणवृत्तम् ।

अपि चैहिकत्वं फलस्य तावता सेत्स्यति न पुनः क्रियाफलवत् सद्यस्त्वम् । सन्ति चैहिकफलान्यपि कालान्तरसव्यपेक्षाणि कर्माणि, यथा 'ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे' इति । न तत्र पञ्चमवर्षे उपनीतमात्र एव माणवको ब्रह्मवर्चससम्पन्नो भवति कालान्तरे तु भवतीति । एवं वीर्यकामादिष्वपि द्रष्टव्यम् । तस्माद् विधिफलानामानन्तर्यनियमाभावान्न तद्विसंवादो दोषाय । कालान्तरेऽपि यत्र फलादर्शनं तत्र क्रियावैगुण्यकर्मान्तरप्रतिबन्धादि कारणमित्युक्तम् ।

वार्ताविद्यायां । कृषिः पाशुपाल्यं वाणिज्या च वार्त्ता । **मृद्नतो** मर्दनकर्तुः ।

एवं वीर्यकामादिष्विति । उत्तरश्लोकार्धापेक्षया । तदुक्तं 'राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे' इति ।

वेदप्रामाण्यसमर्थने मतानन्तरम्

अन्ये कर्त्रादिवैगुण्यकल्पनाननुमोदिनः ।
इहाफलस्य चित्रादेः फलमामुत्रिकं जगुः ।

सर्वाङ्गोपसंहारेण काम्यकर्मप्रयोगात् कोऽवसरः कर्मवैगुण्यकल्पनायाम् ? जन्मान्तरे तु तत्फलमिति कल्पना ।

तथा च त्रिविधं कर्म किञ्चिदैहिकफलमेव किञ्चिदनियतफलमेव किञ्चिदामुष्मिकफलमेव इति कल्पना ।

तत्र कारीर्यादि तावदैहिकफलमेव । तद्धि सकलजनपदसंतापकारिणि महत्यवग्रहे प्रस्तूयते । वृष्टिलक्षणश्च तत्फलं स्वभावत एव सकललोकसाधारणम् । आसन्नतयैव तदभिलषणीयमिति सद्य एव भवितुमर्हति । वचनानि च तत्र तादृश्येव दृश्यन्ते 'यदि वर्षेत्तावत्येवेष्टिं समापयेद् यदि न वर्षेच्छ्वोभूते जुहुयादि'ति । आमुष्मिकफलन्तु कर्म ज्योतिष्टोमादि फलस्वभावमहिम्नैव पारलौकिकफलं भवति ।

स्वर्गो निरुपमा प्रीतिर्देशो वा तद्विशेषणः ।
भोक्तुं नोभयथाप्येष देहेनानेन शक्यते ॥

चित्रादि त्वनियतफलं कर्म । तत्फलस्य पश्वादेरिह वा परत्र वा लोके सम्भवात्, अवश्यं चैतदेवं विज्ञेयम् । तथा ह्यकृतचित्रायागानामपि इह जन्मनि पशवो दृश्यन्ते ते परिदृश्यमानसेवाप्रतिग्रहादिकारणका एवेति कथ्यमाने कर्मनिमित्तत्वहाने बृहस्पतिमतानुप्रवेशप्रसङ्गः । कर्मनिमित्तकत्वे तु तेषां पशूनामुपपादकं किं कर्मेति निरूपणीयम् । न हि ब्रह्मवर्चसफलात् कर्मणः पशवो

कर्त्रादिवैगुण्येति । कर्त्रादिवैगुण्यं फलादर्शने कारणमननुमोदमानाः ।

सर्वाङ्गोपसंहारेणेति । यदा सर्वाङ्गान्युपसंहर्त्तुं शक्नुयात् तदा काम्यं कुर्यादिति व्यवस्थापनात् ।

अवग्रहे वर्षप्रतिबन्धे । श्वोभूते जुहुयाद् । द्वितीये दिने होमशेषं समापयेद् ।

ननूपनयनादेर्ब्रह्मवर्चसादिफलात् कर्मणः पशवो भविष्यन्तीत्याशङ्क्याह न हि ब्रह्मवर्चसफलादिति ।

निष्पद्यन्ते । चित्रा च पशुफला इह जन्मनि तैर्न कृतैव, पूर्वजन्मकृता तु तस्मिन्नेव जन्मनि फलं दत्तवतीति नियतैहिकफलाभ्युपगमादिति कुतः पशुसम्पत्? ननु गौतमवचनप्रामाण्यात् पूर्वकृतभुक्तशिष्टज्योतिष्टोमादिकर्मनिमित्तकः पशुलाभो भविष्यति ? यथोक्तम् 'वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य फलमनुभूय पतन्तः शेषेण विशिष्टदेशश्रुतवृत्तवित्तादियुक्तं जन्म प्रतिपद्यन्त इति । नैतद् यथाश्रुतं बोद्धुं युक्तम्

न ह्यन्यफलकं कर्म दातुमीष्टे फलान्तरम् ।
साध्यसाधनभावो हि नियतः फलकर्मणाम् ॥

तस्मात् समूहापेक्षाशेषवाचोयुक्तिर्व्याख्येया । बहूनि कर्माणि वर्णा आश्रमाश्च कृतवन्तः, ततः कर्मसमूहाज्ज्योतिष्टोमादिफलं प्रेत्यानुभूयते, ततः शेषेण चित्रादिना कर्मणा विशिष्टं जन्म प्रतिपद्यन्ते इत्यर्थः । तस्मात् पूर्वजन्मकृतचित्रादिनिबन्धन इह जन्मनि पशुलाभो नाकर्मनिमित्तको नान्यकर्मनिमित्तक इत्येवमनियतफलत्वाच्चित्रादेरिह जन्मनि फलादर्शनेऽपि नानृतत्वं तच्चोदनानां, जन्मान्तरे हि ता इष्टयः फलं दास्यन्तीति ।

वेदप्रामाण्यशङ्कानिरासे प्रकारान्तरम्

अत्रोच्यते, किं वाचनिकमेतत् कर्मणां त्रैविध्यम्? अथ विधिवृत्तपरीक्षागम्यम्, आहो फलरूपपर्यालोचनया लभ्यम्, उत पुरुषेच्छाधीनमिति । तत्र वचनं तावत्त्रिविधविभागप्रतिपादकं नास्ति 'कारीरीं निर्वपेद् वृष्टिकामः' 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति 'चित्रया पशुकामः' इत्येतावन्मात्रश्रवणम् । न ह्यत्रैहिकत्वं पारलौकिकत्वमनियतत्वं वा फलस्य क्वचित् पठितम् । विधिवृत्तमपीयदेव यत् सप्रत्ययप्रवर्तनं नाम । तत्र इदमेवंकामेन कर्तव्यमित्येतावाँल्लिङर्थः । अपुरुषार्थरूपे तु व्यापारे प्रवर्तकत्वलक्षणस्वव्यापारनिर्वहणमनधिगच्छन् विधिरधिकारिविशेषणस्य काम्यमानस्य स्वर्गादेः, भावार्थस्य च यागादेः साध्यसाधनसम्बन्धमाक्षिपति, न काम्यमानस्य सद्यः कालान्तरे वा निष्पत्तिमाक्षिपतीति । फलस्वरूपपर्यालोचनया तु सत्यं स्वर्गस्य पारलौकिकत्वमवगम्यते न तु पश्वादेर्नियमः । पुरुषेच्छा तु पुरुषेच्छैव, न तया शास्त्रार्थो व्यवस्थापयितुं शक्यः । तस्मान्निष्प्रमाणकं त्रैविध्यम् ।

सप्रत्ययप्रवर्तनमिति । सचेतनो हि कथं निष्फले प्रवर्तेतेति ।

यस्तु चित्रादीनामनियतफलत्वे न्याय उक्तः 'चित्रादीनां फलं तावत् क्षीणं तत्रैव जन्मनि' इत्यादि, स कारीर्यामपि निश्चितैहिकफलायां योजयितुं शक्यः ।

अद्याकृतायां कारीर्यां न हि देवो न वर्षति ।
जन्मान्तरकृता तत्र कारीरी किं न कारणम् ॥

तस्मात् साप्यनियतफला भवतु । अथ सस्यसम्पत्सम्पाद्यसुखसम्भोगसाधनभूतादृष्टनिमित्ता कारीरीष्टिरद्याकृतायामपि कारीर्यामिति मन्यसे ? तर्हि दधिक्षीरादिभक्षणसुखाक्षेपिकर्मनिमित्तकः पशुलाभो भविष्यति । अकृतचित्रायागानां कारीर्यधीन ओदनः, चित्रादीनां दधीति, दध्योदनभोजनसुखसाधनादृष्टकारिता पशुवृष्टिसृष्टिर्भवतु । अथ शृङ्गग्राहिकया पशुफला चित्रेष्टिरुपदिश्यते तेन न सुखसामान्याक्षेपिकर्मनिबन्धनः पशुलाभः ? एवं तर्हि वृष्टावपि शृङ्गग्राहिकया कारीरी पठ्यत एवेति वृष्टिरपि सामान्यादृष्टनिबन्धना मा भूत् ?

'अथ न यदि वर्षेच्छ्वोभूते जहुयादि'त्यादिवचनपर्यालोचनया तस्यामैहिकफलत्वमुच्यते। यद्येवं यत्र तादृशं वचनं नास्ति 'यो वृष्टिकामः स सौभरेण स्तुवीत यदि कामयेत वर्षेत्पर्जन्यः' इति 'नीचैः सदो मिनुयादि'त्यादौ, तत्र पारलौकिकफलत्वं स्यात् ? यदि च 'श्वोभूते जुहुयादि'ति वचनमहिम्नैव फले सद्यस्त्वमात्रमधिकं भवतु, तादृशवचनरहितानां कर्मणां विस्पष्टसिद्धमप्यैहिकफलत्वं निवर्त्तते ।

यत् पुनर्बहुसाधारणत्वेन वृष्टेरैहिकत्वमुच्यते तदपि पश्वादौ समानम् । न ह्यात्मम्भरिरेव यजमानो भवति, तस्यापि स्ववासिनीकुमारातिथिभृत्यादिभोजनपूर्वकस्वभोजननियमोपदेशाद् । बहुतरोपकारकत्वन्तु वृष्टेरित्यलं तुलया ।

यदपि प्रत्यासन्नत्वेन काम्यमानत्वाद् वृष्टेरैहिकत्वं कथ्यते तदपि तादृगेव, पश्वादेरपि तथैव काम्यमानत्वात् । तत्रावग्रहविहितसन्तापतया प्रत्यासन्नत्वेन वृष्टि-

---

क्षीणं तत्रैव जन्मनि । 'न च स्वर्गफलस्येह कश्चिदंशोऽनुवर्तते' इति शेषः ।

यो वृष्टिकाम इति । यो वृष्टिकामः स सौभरेण स्तोत्रविशेषेण स्तुवीतेत्येतावदेवोक्तम् । तत्र 'यदि न वर्षेत्' इत्यादि नोक्तम् । **यदि कामयेतेति** । सदो यत्र होत्रादयः ऋत्विजो याज्यानुवाक्यास्तोत्रादिपाठव्यापारमुपविष्टाः सम्पादयन्ति, तन्नीचैर्मिनुयात् अनुच्चाः स्थूणास्तत्र निदध्यादित्यर्थः ।

रभिलष्यते इहापि दौर्गत्योद्वेगादासन्नतयैव पशवः काम्यन्ते । 'तस्माद् वारिदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः' इत्यादिवचनोपदिष्टसामान्यसुखसाधनादृष्टनिबन्धनैवेयम् । इहाकृतकर्मणां वृष्टिपश्वादिसम्पदिति न बृहस्पतिमतवदकर्मनिमित्तं फलम् । नापि कर्मफलसाध्यसाधनभावनियमव्यवहारोल्लङ्घनमिति ।

यच्च कारीर्याः क्वचित् फलसंवादे समाधानमुक्तम्

'फलति यदि न सर्वं तत् कदाचित् तदेव ।
ध्रुवमपरमभुक्तं कर्म शास्त्रीयमास्ते' ।। इति ।

तेन साप्यनियतफलैव स्याद् । न हि तत् कर्मान्तरमासंसारं प्रतिबन्धकं भवति फलोपभोगाद्धि तस्यावश्यं क्षयेण भवितव्यम् । प्रतिबन्धके च क्षीणे कारीर्या स्वफलं तदा दातव्यमेव । साप्यदत्तफला न क्षीयते एव इत्येवं जन्मान्तरे तत्फलसम्भवात् तस्य अनियतफलत्वम् । अनेन च प्रकारेण चित्रादेरप्यनियतफलत्वमस्माभिरिष्यते एव यत्र सम्यक् प्रयुक्तायामपीष्टौ कर्मान्तरप्रतिबन्धादेव पशूनामनुपलम्भः कथ्यते । सर्वथा रयःफलत्वमात्रवर्जं समानयोगक्षेमा कारीर्या चित्रेष्टिः । एतेन ब्रह्मवर्चसवीर्यान्नाद्यग्रामादिकामेष्टयोऽपि व्याख्याताः । तस्माद् यथाश्रुतमेव बोद्धव्यम् ।

यदप्यभ्यधायि समग्राङ्गोपसंहारेण काम्यकर्मप्रयोगात् कुतः कर्मणो वैगुण्यावसरः ? इति तदप्यसारम् । सर्वाङ्गोपसंहारेण प्रवृत्तावपि प्रमादादसंवेद्यमानवैगुण्यसम्भवात् । स च विचित्रः प्रदर्शितो भाष्यकारेण । तस्मात् पूर्वोक्त एव प्रतिसमाधानमार्गः श्रेयान् ।

कर्मणामदृष्टद्वारैव फलजनकत्वम्

यत् पुनः पूर्वपाक्षिकेण कथितं कालान्तरे कर्माभावात् कुतः फलमिति, तदपि न सम्यक्

यथाश्रुतमेव स्वर्गादिफलापेक्षयैव शेषत्वमिति ।

प्रदर्शितो भाष्यकारेणेति । 'कर्मकर्तृसाधनवैगुण्यात्' इति सूत्रव्याख्याने प्रदर्शितः, तथैव प्राक् प्रतिपादितोऽस्माभिः ।

यद्यप्याफलनिष्पत्तेः कर्मणो नास्त्यवस्थितिः ।
तथाप्यस्त्येव संस्कारः पुरुषस्य तदाहितः ॥
कर्मजन्यो हि संस्कारः पुंसां बुद्ध्यादिवद् गुणः ।
तस्य चाफलसंयोगादवस्थितिरुपेयते ॥
यथेन्द्रियादिसंयोगादात्मनो बुद्धिसम्भवः ।
तथा यागादिकर्मभ्यस्तस्य संस्कारसंभवः ॥
बुद्धिस्तु भङ्गुरा तस्य संस्कारस्तु फलावधिः ।
साध्यसाधनभावो हि नान्यथा फलकर्मणोः ॥
स्मृतिबीजन्तु संस्कारस्तस्यान्यैरपि मृष्यते ।
तथैव फलसंयोगबीजं सोऽस्य भविष्यति ॥
स यागदानहोमादिजन्यो धर्मगिरोच्यते ।
ब्रह्महत्यादिजन्यस्तु सोऽधर्म इति कथ्यते ॥

धर्मपदार्थस्वरूपविषये मतान्तरखण्डनम्

कापिलास्तु अन्तःकरणस्य बुद्धेर्वृत्तिविशेषमाहुः । आर्हताः पुण्यपुद्गलान् धर्मत्वेन व्यपदिशन्ति । शाक्यभिक्षवश्चित्तवासनां धर्ममाचक्षते । वृद्धमीमांसका यागादिकर्मनिर्वर्त्यमपूर्वं नाम धर्ममभिवदन्ति । यागादिकर्मैव शाबरा ब्रुवते । वाक्यार्थ एव नियोगात्मा अपूर्वशब्दवाच्यो धर्मशब्देन स एवोच्यते इति प्राभाकराः कथयन्ति ।

तत्र पुण्यपुद्गलवृत्तिपक्षयोः कपिलार्हद्ग्रन्थकथितयोस्तन्मतनिरासादेव निरासः । आत्मनश्च समर्थयिष्यमाणत्वात् तस्यैव वासना न चेतस इति सौगतपक्षोऽप्ययुक्तः । स्वर्गयागान्तरालवर्तिनश्च स्थिरस्य निराधारस्यापूर्वस्य निष्प्रमाणकत्वाज्जरज्जैमिनीयप्रवादोऽप्यपेशलः । अपि च फलस्य वा काचिदुत्पद्यमानदशा

कापिलास्त्विति । यागब्रह्महत्यादिक्रियाभिर्निष्पन्नसंस्कारो योऽभिव्यज्यमानः प्रकाशरूपबुद्धिवृत्तिस्वरूपो विशिष्टफलहेतुर्धर्माधर्माविति **साङ्ख्याः** । **पुण्यपुद्गलेति** । पुण्यपुद्गलाः पुण्यपरमाणवः । **निराधारस्यापूर्वस्येति** । ते हि क्रियानिर्वर्त्यं क्रियाभिव्यङ्ग्यम् आश्रितमेवापूर्वमाहुः ।

यागस्य वा शक्तिरग्निशब्देनोच्यते। न चानियोगो वाक्यार्थ एवापूर्वशब्दवाच्यः, तस्योपरिष्टादपाकरिष्यमाणत्वात्। नापि यो यागमनुतिष्ठति तं धार्मिक इत्याचक्षते इति यागादिसामानाधिकरण्येन प्रयोगात् स एव धर्मशब्दवाच्य इति युक्तं वक्तुम्, तस्य क्षणिकत्वेन कालान्तरे फलदातृत्वानुपपत्तेः सामानाधिकरण्यप्रयोगोऽपि चैकान्ततो नास्त्येव।

यागदानादिना धर्मो भवतीत्यपि लौकिकाः।
प्रयोगाः सन्ति ते चामी संस्क्रियापक्षसाक्षिणः॥

एवं 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्नि'ति वैदिकोऽपि प्रयोगस्तद्विषय एव व्याख्येयः, तस्य स्थायित्वेन कालान्तरे फलदानयोग्यतोपपत्तेः।

संस्कारो नृगुणः स्थायी तस्माद्धर्म इति स्थितम्।
तस्माच्च फलनिष्पत्तेर्न चित्रादौ मृषार्थता॥

यदपि यज्ञायुधिवाक्ये प्रत्यक्षविरुद्धत्वमुपपाद्यते स्म भस्मीभावोपलम्भात् कायस्येति तदप्यसमीचीनम्। एष इति शरीराभेदोपचारेणात्मन एव निर्देशात् तस्य च स्वर्गगमनं भवत्येव। गमनञ्च तदुपभोग एव तस्योच्यते यथा शरीरादियोगवियोगौ जन्ममरण इति। न तु व्यापिनः परिस्पन्दात्मकक्रियायोग उपपद्यते। ज्ञानचिकीर्षाप्रयत्नसमवायश्च तस्य कर्तृत्वमिति वर्णयिष्यते। यज्ञायुधसम्बन्धोऽपि स्वस्वामिभावादिः, तस्यैव व्यापकत्वाविशेषेऽपि व्यवस्थयोपपद्यते इति न कश्चिदत्र विरोधः। तस्मात् सर्वत्र निरवकाशमनृतत्वादिदूषणम्।

योऽपि हवनकालविधौ व्याघातदोषो दर्शितः सोऽपि न दोष एव।

तत्रानुष्ठानभेदेन कालत्रितयचोदनात्।
यो यस्य चोदितः कालो लङ्घनीयो न तेन सः॥

ततश्चान्यतमं कालमभ्युपेत्यैनमुज्झतः।
निन्देति न विरोधोऽत्र कश्चिद्विधिनिषेधयोः॥

ननु व्यापकत्वादात्मनां यज्ञायुधीति कथमेकस्यैव व्यपदेश इत्याह **यज्ञायुधसम्बन्धोऽपीति**। व्यवस्थया यस्य तानि यज्ञायुधानि तस्यैव उपकारकाणि नान्येषाम्।

अभ्यासे पौनरुक्त्यञ्च कार्यार्थत्वाददूषणम् ।
संपाद्यं पाञ्चदश्यं हि सामिधेनीषु चोदितम् ॥

'इममहं पञ्चदशारेण वज्रेणापबाधे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म' इति श्रूयते। एकादशसामिधेन्य ऋचः पठ्यन्ते। तत्राभ्यासमन्तरेण पाञ्चदश्यं नावकल्पते इत्येवमवश्यकर्त्तव्योऽभ्यासः। स चायमनियमेन प्राप्तो वचनेन नियम्यते प्रथमोत्तमे ऋचौ त्रिरुच्चारणीये इति । तस्मात् तत्प्रयोजनार्थत्वान्न पुनरुक्ततादोषः ।

अभ्यासे फलरहिते हि पौनरुक्त्यं
दोषः स्यादिह तु न तस्य निष्फलत्वम् ।
व्याघातानृतपुनरुक्ततादि तस्माद्
वेदस्य श्लथयति न प्रमाणभावम् ॥
इयञ्च वाक्यार्थविचारणापि
प्रामाण्यसिद्ध्यौपयिकीति मत्वा ।
चक्रे स्वशास्त्रे मुनिनेह वेद-
प्रामाण्यनिर्वाहणदीक्षितेन ॥
ननु नाद्यापि वेदस्य भवद्भिर्निपुणैरपि ।
स्वदेहसम्भवा दोषा निखिलाः परिपिञ्जिताः ।

अर्थवादानामनिश्चितार्थकत्वाद् वेदाप्रामाण्यम्

तथा हि 'सोऽरोदीद् यदरोदीत् तद्रुद्रस्य रुद्रत्वम्। प्रजापतिरात्मनो वपामुदखिदत् तामग्नौ प्रागृह्णात् ततोऽजस्तूपर उदगात्। देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्' इत्येवमादीनामर्थवादानां किं यथाश्रुतवस्तुपरत्वम्, उत तेभ्यः कार्यरूपार्थोपदेशपरिकल्पनम्, उत लिङादियुक्तवाक्यान्तरप्रतिपाद्यमानकार्यरूपार्थौपयिकत्वमिति चिन्त्यम्। सर्वथा च प्रमादः। स्वरूपपरत्वे तावत् प्रमाणान्तरविरुद्धार्थो-

---

पञ्चदशेति पञ्चदशसङ्ख्यासम्पत्त्या वज्रभूतया ।

सोऽरोदीदिति । स (अत्रत्यष्टीकाग्रन्थः खण्डितः) **उदखिदत्** उदहरत् । **प्रागृह्णात्** प्राक्षिपत् । **तूपरः** शृङ्गरहितः पशुः । **देवयजनेति** देवा इज्यन्ते यस्मिंस्तद् यज्ञस्थानमस्मिन्नस्माभिर्यष्टव्यमित्यध्यवसाय निश्चित्य । **तथात्वनिश्चयाभावादिति** । रोदनादि हि प्रमाणान्तर-

पदेशाद् अप्रामाण्यमेवावतरति, रोदनवपोत्खेदनदिङ्मोहादेरर्थस्य तथात्वनिश्चयाभावात् ।

किञ्च 'स्तेनं मनोऽनृतवादिनी वागि'त्येवंजातीयकानामर्थवादवाक्यानां क्लिष्टमेव प्रमाणान्तरविरुद्धार्थप्रत्यायकत्वम् । न हि निसर्गत एव सर्वप्राणिनामनृतवादिनी वाग् भवति स्तेनं वा मनः ।

अपि च 'धूम एवाग्नेर्दिवा ददृशे नार्चिरर्चिरेवाग्नेर्नक्तं ददृशे न धूमः' इति प्रत्यक्षविरुद्धमिदमभिधीयते, नक्तन्दिनं द्वयोरपि इन्द्रियार्थसन्निकर्षे सति ग्रहणात् ।

किञ्च 'एतन्न विद्मो यदि ब्राह्मणाः स्मोऽब्राह्मणा वे'ति ब्राह्मणजातेरुपदेशसहायप्रत्यक्षगम्यत्वात् तद्विरुद्ध एषोऽर्थवादः । शास्त्रविरोधोऽप्यस्ति "को ह वै तद्वेद यदमुष्मिँल्लोकेऽस्ति वा न वे'ति । शास्त्रे स्वर्गादिफलानां ज्योतिष्टोमादिकर्मणामुपदेशात् केयमनवक्लृप्तिः ?

अपि च गर्गत्रिरात्रब्राह्मणमधिकृत्य श्रूयते 'शोभतेऽस्य मुखं य एवं वेदे'ति न हि कस्यचिदेवंविदतो मुखं शोभते इति प्रत्यक्षविरोधः ।

अन्यकर्मानर्थक्यशंसी च कश्चिदर्थवादो भवति 'पूर्णाहुत्या सर्वान् कामानवाप्नोति', 'पशुबन्धयाजी सर्वाँल्लोकानभिजयति' 'तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते यश्चैवं वेदेति' । यदि पूर्णाहुत्यैव सर्वकामावाप्तिः, पशुबन्धयागेनैव सर्वलोकजयः, अश्वमेधवेदनेनैव तत्फलावाप्तिस्तत् किमर्थमन्यकर्मो-

---

ग्रहणयोग्यं वस्तु, सिद्धत्वात्; सिद्धं हि वस्तु लोके प्रमाणान्तरग्राह्यमेव 'राजा याति' वत् शब्देन प्रतिपाद्यमानं दृष्टम्, अतो वेदेऽपि तथैव भवितुमर्हति । न च प्रमाणान्तरेण रुद्रादिरोदनग्रहणसम्भवः । रोदनस्य ग्रहणाभावादेव प्रमाणान्तरविरुद्धत्वम् । वपोत्खेदनादीनां तु विपर्ययग्रहणात् ।

को ह वै तद्वेदेति । को वै तद्वेद, नैव कश्चिज्जानाति परलोके फलमस्ति न वेति ।

गर्गत्रिरात्रब्राह्मणमिति । गर्गत्रिरात्राख्यस्याहीनस्य क्रतोः प्रतिपादकं ब्राह्मणं गर्गत्रिरात्रब्राह्मणम् ।

आधानान्ते होमविशेषः **पूर्णाहुतिः** । **यश्चैवं वेद** यश्चाश्वमेधमन्त्रब्राह्मणार्थं जानाति ।

पदेशः ? उपदिष्टान्यपि तानि बहुक्लेशसाध्यानि कर्माणि व्यर्थानि भवेयुरनेनैव लघुनोपायेन तत्फलप्राप्तेर्दर्शनात् ।

अपि च 'न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीति' वेदे चयननिषेध एवात्र भङ्ग्या भवेद् । दिवि चान्तरिक्षे च तावच्चयनप्रयोग एव नास्ति किं तन्निषेधेन ? पृथिवीचयननिषेधार्थञ्च यद्वाक्यं तच्चयनप्रतिषेधार्थमेव भवेत् अपृथिव्यधिकरणस्य चयनस्यानुपपत्तेः ।

अपि च 'यजमानः प्रस्तरः' 'आदित्यो यूपः' इत्येवंजातीयकानां प्रत्यक्षविरुद्धार्थाभिधायिनामर्थवादानां का परिनिष्ठेति ? तस्मान्न स्वरूपपरत्वं तेषामुपपद्यते।

नापि तेभ्य एव कार्यरूपार्थपरिकल्पनमुपपन्नम्, अशक्यत्वात् । 'सोऽरोदीद्-यदरोदीत् तद्रुद्रस्य रुद्रत्वमि'त्यत्र कार्यं कल्प्यमानमेवं कल्प्येत रुद्रः किल रुरोद अतोऽन्येनापि रोदितव्यमिति । तच्चाशक्यम् । प्रियविप्रयोगजनितसंतापवशेन हि वाष्पमोचनं रोदनमुच्यते । न तच्चोदनोपदेशात् कर्त्तुं शक्यते । 'प्रजापतिरात्मनो वपामुच्चिखेद तस्मादन्योऽप्येवमुत्खिदेदात्मनो वपामिति दुरनुष्ठानोऽयमर्थः । को हि नामात्मनो वपामुत्खिदेत् । कस्य वा वपाहोमे सति समनन्तरमेव अजः पशुस्तूपर उद्गच्छेद् इति । देवा दिशो नाज्ञासिषुरतोऽन्योऽपि न जानीयादिति अशक्योपदेशः। न हि दिङ्मोहो नामोपदेशात् कर्तुं शक्यः । न च सर्वस्मादर्थवादाद् विधिः कल्पयितुं शक्य इति मध्यमोऽपि न सत्पक्षः ।

नापि तृतीयः पक्षः सम्भवति । वाक्यान्तरविहितकार्यरूपार्थौपयिकत्वं हि तदुपयोगिद्रव्यदेवतादिविधानद्वारकं भवति यथा 'अग्निहोत्रं जुहोती' त्यत्र 'दध्ना जुहोति' 'पयसा जुहोती' ति द्रव्यविनियोगविधेः।'यदग्नये च प्रजापतये च सायं जुहोति' इति देवताविधेर्वा । न चायमर्थवादेषु प्रकारः सम्भवति । न चैभिः 'व्रीहीनवहन्ति'

न पृथिव्यामग्निरिति । अग्न्याधारभूतानामिष्टकानां विशिष्टेन सन्निवेशेन स्थापनमग्निचयनम् । तासामाधारभूतो दर्भः प्रस्तरणम् ।

अग्निहोत्रं जुहोति । केन द्रव्येणेत्यपेक्षायामाह पयसाग्निहोत्रमिति । का च तत्र देवतेत्यप्याह यदग्नये चेति । व्रीहीन् अवहन्तीति । दृष्टेतिकर्तव्यतातण्डुलनिष्पत्त्यर्थमपेक्षणात् । प्रोक्षणं तद्दृष्टोपकारार्थमनपेक्षणाददृष्टेतिकर्तव्यता ।

'व्रीहीन् प्रोक्षती' तिवद् दृष्टा अदृष्टा वा काचिदितिकर्त्तव्यतोपदिश्यते । तस्मान्न तेषां तदौपयिकत्वम् ।

ननु प्रेक्षावतां प्ररोचनातिशयकरणेन प्रवृत्त्युत्साहमावहन्तोऽर्थवादास्तदुपयोगिनो भविष्यन्ति ? नैतदपि सम्यक् । प्रवृत्त्युत्साहो हि केषाञ्चिन्मते निरपेक्षशब्दप्रत्ययादेव सिद्ध्यति । अस्मन्मते तु तत्प्रणेतृपुरुषप्रत्ययादिति किं प्ररोचनया ? एवं काम इदं कुर्यादित्युक्ते यस्तत्र न प्रवर्त्तते स प्ररोचनयापि न प्रवर्तत एवेति यत्किञ्चिदेतत् । तदेवं प्रकारत्रयेणाप्यर्थवादपदानामनन्वयात् एकदेशाक्षेपेण सर्वाक्षेप एव क्रियत इति अप्रमाणं वेदः ।

ननु यावत्येव प्रमाणान्तरविरुद्धत्वमुपलभ्यते तावत्येवाप्रामाण्यमस्तु सर्वत्र तु कुतस्त्या तदाशङ्केति ? मैवम् । तत्सामान्यादन्यत्राप्यनाश्वासः । मीमांसकपक्षे हि अर्थवादरहितकेवलवेदग्रन्थानुपलम्भात् तदनुषङ्गेण सर्वत्र सापेक्षत्वमवतरति। नैयायिकमते तु वेदप्रणेतुरीश्वरस्य क्वचिद् वितथवादित्वे दृश्यमाने कथमन्यत्र सत्यवादितायां दृढः प्रत्ययो भवेदित्यप्रामाण्यं सर्वत्रेति ।

वेदप्रामाण्येऽर्थवादानां बाधकत्वनिरसनम्

अत्राभिधीयते । विध्येकवाक्यतयैव भूम्ना तावदर्थवादपदानि पठ्यन्ते । 'वायव्यं श्वेतमालभेत भूतिकामम:' 'वायुर्वै क्षेपिष्ठा देवता' इत्यतो यद्यपि क्रिया नावगम्यते नापि तत्सम्बद्धः कश्चिदर्थस्तथापि विध्युद्देशेनैकवाक्यत्वं प्रतीयते । भूतिकाम इत्येवमन्तो विध्युद्देश:, तेनैकवाक्यभूतो वायु र्वैक्षेपिष्ठेत्येवमादिः । कथमेकवाक्यभावः ? पदानां साकाङ्क्षत्वात् ।

ननु भूतिकाम इत्येवमन्तेन वाक्येन विधेयं विहितम्, उत्पादितं प्रतिपत्तुरनाकाङ्क्षत्वम्, कृतश्च शब्दकर्त्तव्यमिति किमनेन क्षेपिष्ठेत्यादिना प्रयोजनम् ? तदर्थस्यैव स्तुतिरिति ब्रूमः ।

केषाञ्चिन्मते मीमांसकानाम् ।

वायव्यमिति वायुमेव स्वेन भागधेयेनोपधावति वायवे देयो यः पशुः स वायोः स्वं भागधेयम्, तेन वायुमुपधावति उपसर्पति स्वाभिमुखं करोति । क्रियया सम्बन्धः द्रव्यदेवतादिः । **एवमन्तो विध्युद्देशः** । विधिरनुबन्धद्वयानुबद्ध उद्दिश्यते येन ।

ननु स्तुत्या किं प्रयोजनम्, स्तुतोऽस्तुतश्च तावानेव सोऽर्थः ? मैवम् । स्तुतिपदे हि वाक्ये स्तुतिपदसहितं विधायकं विधायकं भवति । किमिदानीं केवलं लिङादियुक्तं वाक्यं न विधायकमुच्यते यदि स्तुतिपदानि न श्रूयन्ते ? तद् बाढं भवति विधायकम् । एतेषु च सत्सु तत्सहितं तद्विधायकं भवति न केवलम्, तथा प्रतीतेः । स्तुतिपदसम्बन्धे सति भिन्नवाक्यता मा भूदिति विधिपदेन च स्तुतिपदेन च सम्भूयार्थो विधीयते, तथावगमात् । अन्यथा हि प्रतीयमानः पदार्थान्वयस्त्यज्येत, वाक्यभेदो वा कल्प्येत । तस्मान्न स्तुतिपदानामानर्थक्यम् ।

ननु केवलस्यापि विधिवाक्यस्य सामर्थ्यात् किमर्थं स्तुतिपदानि प्रयुज्यन्त इति ? उच्यते । अपर्यनुयोज्यो जैमिनीयानां मते शब्दः । अस्माकञ्च भगवानीश्वरः । उक्ते सति प्रतिपत्तारो वयम् वेदस्य न कर्त्तारः । प्रतिपत्तौ च क्रमो दर्शितः । एवञ्च यद्यपि द्रव्यदेवतेतिकर्त्तव्यताविधानद्वारकमङ्गविधिवदर्थवादवाक्यानां कार्योपयिकत्वं नास्ति तथापि प्रतीत्यङ्गत्वं न निवार्यते । अत एव प्रमाणोपयोगित्वमाचक्षते न प्रमेयोपयोगित्वम् । केवलविधिपदश्रवणे हि न तदाद्रियन्ते यज्वानः । तत्र विधिविभक्तेः शक्तिरवसीदति । तां निमज्जन्तीमिवार्थवादजनितकर्मप्राशस्त्यप्रत्यय उत्तभ्नाति । 'सर्वजिता यजेते' त्यतो न तथाविधः श्रद्धातिशयो भवति यथाविधः 'सर्वजिता वै देवाः सर्वमयजन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेन सर्वं जयति' इत्यर्थवादपदेभ्यः । लोकेऽपि इयं गौः क्रेतव्येत्यतो न तथा क्रेतारः प्रवर्त्तन्ते यथा एषा बहुस्निग्धक्षीरा सुशीला सापत्या अनवप्रजा चेत्येवमादिभ्यः स्तुतिपदेभ्यः ।

अङ्गविधिवत् । अङ्गविधयः प्रयाजादिविधयः । **प्रतीत्यङ्गत्वमिति** । केवलाद् विध्युद्देशात् स्तुतिरहितस्य विषयस्य प्रतीतिः सार्थवादकात्तु सस्तुतिकस्येति सस्तुतिकविषयप्रतीतावङ्गमर्थवादाः । दारा इत्यादौ बहुत्ववद्वा प्रतीत्यङ्गबहुत्वयुक्तं द्रव्यं प्रतीयते केवलम्, कार्ययोगः पुनरेकस्यैव; एवं सस्तुतिको विषयः प्रतीयत एव, अनुष्ठीयते तु शुद्ध एवेति । **अत एव प्रमाणोपयोगित्वमिति** । शब्दतः प्रतिपन्नापि स्तुतिः प्रमाणस्य लिङादेः प्रत्ययस्य कर्तव्यतावबोधं प्रति साहाय्यकरणात् प्रमाणोपयोगिनी । अत एव **प्राभाकरा** वेदोऽर्थवादा न तु वैदिकाः इत्याहुः; वेदोऽवबोधका न वैदिकाः प्रमेया इत्यर्थः । **न प्रमेयोपयोगित्वम्** । प्रमेयं तादृगेव स्तुतं चास्तुतं चेति ।

स्वानुभवसाक्षिकोऽयमर्थः । अत एव केचिदश्रुतार्थवादकेऽपि विधिवाक्ये तत्कल्पनमिच्छन्ति, यथा क्वचिदर्थवादाद् विधिकल्पनमिति । यथोक्तम् 'विधिस्तुत्योः सदा वृत्तिः समानविषयेष्यते' । अनधिगम्यमानविधिवाक्यसंबन्धाच्च अर्थवादाद् विधिरुन्नीयते न गम्यमानविधिसंबन्धात् ।

अत एव च 'सोऽरोदीदि' त्येवमादिभ्यो न रोदितव्यमित्यादिविधिकल्पनमिष्यते । मुधैव पूर्वपक्षिणा तदाशङ्कितम् । विध्यन्तरेणैकवाक्यत्वं हि प्रत्यक्षमिहोपदिश्यते । बर्हिषि रजतं न देयमित्यस्य विधेः शेषोऽयं सोऽरोदीदित्यादिः । 'रुद्रो रुरोद' तस्य यदश्रु अशीर्यत तद्रजतमभवत्, 'यो हि बर्हिषि रजतं ददाति पुरा अस्य संवत्सराद् गृहे रोदनं भवती' ति तस्माद् बर्हिषि रजतं न देयमिति । 'प्राजापत्यमजं तूपरमालभेते' त्येतस्य विधेःशेषः 'प्रजापतिरात्मनो वपामुदखिददि'ति वपाहोममाहात्म्यप्रदर्शनार्थमुच्यते 'अग्नौ वै प्रगृहीतमात्रायां वपायामजस्तूपर उदगादि'ति । 'आदित्यः प्रायणीयश्चरुरि'त्यस्य विधेः शेषोऽयं देवा वै 'देवयजनमध्यवसाय दिशो न प्राजानन्नित्थं व्यामोहानामादित्यश्चरुर्नाशयिता यथा दिङ्मोहस्ये'ति । एवं तत्र तत्र विधिशेषत्वमर्थवादानां वेदितव्यम् ।

कथं पुनरिदमसत्यमेवोच्यते रुद्ररुदिताद्रजतमजायत, प्रजापतिवपाहोमसमिद्धादग्नेरजस्तूपर उदगादिति ? उच्यते । नेदमसत्यम् । यदस्य वाक्यस्य प्रतिपाद्यं तत्र सत्यार्थमेवेदम् । न चास्य यथाश्रुतोऽर्थः प्रतिपाद्यः किन्तु विधेयो निषेध्यो वा

स्वानुभवसाक्षिक इति । स्तुतिवाक्यमेव विधिवाक्यम्, स्तुतित एव विध्यर्थावगमात् न तत्रान्यस्य विधिवाक्यस्य कल्पनमुपयुज्यत इत्यनुभवसाक्षिकमेतत् । यद् विधिवाक्यात् प्रतीयते तत् स्तुतिपदेभ्योऽपि प्रतीयत इत्यत्रानुभवः साक्षी । तथापि केचित् **कल्पनमिच्छन्ति** । यथा 'यो ब्राह्मणायावगूरेत् तं शतेन यातयात्' इत्यर्थवादाद् ब्राह्मणावगूरणं न कर्तव्यमिति निषेधविधिवाक्यकल्पनम् ।

आदित्यः प्रायणीयश्चरुरिति । प्रयन्ति प्रारभन्तेऽनेन यज्ञमिति प्रायणीयोऽदितिदेवताकश्चरुः । दर्शपूर्णमासकर्मसम्बद्धस्य हौमिकस्य वह्नेः कर्मसमूहस्योपस्थानात् किं कथं कर्तव्यमिति कर्मक्रमाद्यनवधारणरूपो यो भ्रमः सोऽनेन चरुणा निवर्त्यते, अवकाशदानात् । अत्र प्रवृत्त्या हि अवकाशं लभन्ते 'इदं कृत्वा इदं क्रियते' इति । **यथा दिङ्मोहेति** दिङ्मोह इव दिङ्मोहः, यथा दिङ्मोहे सति न क्वचित् प्रवर्तितुं शक्यत एवं कर्मक्रमाद्यनवधारणेऽपीति । अपि दिङ्मोहस्य किं पुनः दिङ्मोहस्येत्यर्थः ।

कश्चिदर्थः । इहान्वाख्याने द्वयमापतति यच्च वृत्तान्तज्ञानं यच्च कस्मिंश्चिदर्थे प्ररोचनाद्वेषौ । तत्र वृत्तान्तज्ञानं न प्रवर्त्तकं न निवर्त्तकमिति प्रयोजनाभावादनर्थकमनादरणीयम् । प्ररोचनाद्वेषौ तु प्रवृत्त्यङ्गत्वात् तदर्थौ गृहीत्वा प्ररोचनायाः प्रवर्त्तेत द्वेषान्निवर्त्तेतेति तत्र तत्प्रतिपाद्यसत्यार्थ एवार्थवादः ।

यत्तु अरुदति रुद्रे कथं तद्रोदनवचनम्, अनश्रुप्रभवेऽपि रजते कथं तदुद्भवताभिधानमिति गुणवादमात्रम् । गौण एष वादः । श्वेतवर्णसारूप्यादिना रोदनप्रभवं रजतं निन्दितुमुच्यते । एवं पशुयागे वपाहोमप्रशंसायै 'प्रजापतिरात्मनो वपामुदखिददि'ति वृत्तान्ताख्यानं योजनीयम् । आदित्यचरुप्रशंसायै देवा 'देवयजनमध्यवसाय दिशो न प्राजानन्नि'ति ।

अथ वा नैयायिकानामनेकप्रकारपुरुषातिशयवादिनां यथाश्रुतेऽप्यर्थे नात्यन्तमसम्भवः । रुद्रस्य रुदिताद्रजतजन्म, प्रजापतेर्वपोत्खेदः, तद्धोमात्तूपरपशूद्गमः, देवानां देवयजनाध्यवसाने दिङ्मोह इत्येवंजातीयकमपि सत्यमस्तु को दोषः ? तत्, सर्वथा अर्थवादानां प्रामाण्यम् ।

एवं 'स्तेनं मनोऽनृतवादिनी वागि'ति गौण एष वादः । प्रच्छन्नतया स्तेनं मन उच्यते बाहुल्याभिप्रायेण चानृतवादिनी वागिति ।

'धूम एवाग्नेर्दिवा ददृशे नार्चिरर्चिरेवाग्नेर्नक्तं ददृशे न धूमः' इति दूरभूयस्त्वाभिप्रायेण कस्मैचित् प्रयोजनाय सायंप्रातर्होमदेवतास्तुतये कथ्यते ।

'न चैतद् विद्मो यदि ब्राह्मणाः स्मोऽब्राह्मणा वे'ति प्रवरानुमन्त्रणप्रशंसायै

वृत्तान्तज्ञानं पुरैवमासीदिति ।

यत्त्वरुदति रुद्र इति । अरुदति प्रमाणान्तरादनुपलभ्यमानरोदन इत्यर्थः । **अनश्रुप्रभवेऽपीति** । प्रमाणान्तराद् रजताकाराद् रजतप्रभवदर्शनात् ।

एवं स्तेनं मन इति । सोममाने श्रूयते 'हिरण्यं हस्ते भवत्यथ गृह्णाति' इति हिरण्यं हस्ते गृहीत्वा अथ सोमं मातुं गृह्णातीत्यर्थः । ननु अहिरण्यहस्त एव कस्मान्न गृह्णाति तदाह 'स्तेनं मनोऽनृतवादिनी वागि'ति । हिरण्यहस्तेन यत् कृतं तत् सत्यं न मनसा वाचा वेति हिरण्यस्तुत्यर्थं तयोर्निन्दा (अतःपरं टीकाग्रन्थो नष्टः) ।

······**ऽब्राह्मणा वेति** संशयरूपमज्ञानम्, अब्राह्मणोऽप्यनेन ब्राह्मणो भवतीति

संशय इव दर्शितः । अब्राह्मणोऽपि यजमानः प्रवरानुमन्त्रणेन ब्राह्मणः स्यादिति । 'को ह् वै तद्वेद यदमुष्मिंल्लोकेऽस्ति वा न वे'ति दृष्टफलं किमपि कर्मस्तोनुच्यते ।

'शोभतेऽस्य मुखं य एवं वेदे'ति विद्याप्रशंसैषा । शोभते इति शिष्यैरुद्वीक्ष्यमाणस्य मुखमिति । सर्वान् कामानबाप्नोति इति सर्वत्वं प्रकृतापेक्षम् । स्तुत्यर्थश्चाश्वमेधाध्ययनेऽपि तत्फलवचनम् ।

'हिरण्यं निधाय चेतव्यमि'ति स्तुत्यर्थतया दिव्यन्तरिक्षे पृथिव्याञ्च चयनं प्रतिषिध्यते । अनुपहितहिरण्यायां पृथिव्यामग्निर्न चेतव्यो न पुनर्न चेतव्य एव तस्यामिति ।

'आदित्यो यूप' इत्थमञ्जने सति तेजस्वितया यूपस्यादित्यरूपता स्तुतये कथ्यते । तत्कार्यकारित्वाच्च यजमानः प्रस्तर उच्यते । न हि मुख्ययैव वृत्त्या लोके शब्दाः प्रवर्त्तन्ते, गौण्यापि वृत्त्या व्यवहारदर्शनात्ः । एवं वेदेऽपि तेषां तथा प्रयोगो भविष्यति । इत्थञ्च मन्त्रेष्वप्यैन्द्र्या गार्हपत्योपस्थानमविरुद्धम् । एवं स्तुतिनिन्दा-

---

स्तुतिः । **को ह् वै तद्वेदेति** यदुच्यते तद् दृष्टफलं कर्म स्तोतुमुच्यते । 'दीक्षितशालायामुपभद्रादिप्रचारकाले 'दिक्ष्वतीकाशान् कुर्यात्' इति श्रूयते । अतीकाशा धूमनिर्गमनविवरप्रदेशाः । किमति कुर्यादित्याकाङ्क्षायां वाक्यशेषः 'को ह् वै तद्वेद' । 'को हि तदन्यत् स्वर्गादि फलं जानाति यदमुष्मिल्लोके भवति वा न वा' इति । एतत्त्वतीकाशकरणं दृष्टफलमेव, दृष्टेन धूमनिर्गमनलक्षणेन फलेन फलतत्त्वादस्येति स्तुतिः ।

विद्याप्रशंसा गर्गत्रिरात्रब्राह्मणज्ञानस्तुतिः । **सर्वत्वं प्रकृतापेक्षमिति** । पूर्णाहुत्या सर्वान् कामानवाप्नोति । सर्वकामफलस्य दर्शपूर्णमासादिकर्मसमूहस्य निमित्त आहवनीये प्राप्यमाणे पूर्णाहुत्या सर्वान् कामान् अवाप्नोतीति स्तुतिः । एवं तर्हि अन्तर्धानादिफलानामपि कर्मणामाहवनीयो निमित्तं प्राप्त इत्याह प्रकृतापेक्षमिति । प्रकृतानि यान्यग्निहोत्रादिकर्माणि तेषां निमित्तं पूर्णाहुत्या आहवनीयः प्राप्यते, तस्मिन् प्राप्ते प्रस्तुतानि कर्माण्यनुष्ठीयन्ते अग्निहोत्रादिकानि, ततस्तत्तत्फलमिति । दृष्टश्च प्रकृतापेक्षः सर्वशब्दः 'सर्वमनेन भुक्तम्' इतिवत् । **अश्वमेधाध्ययनेऽपीति** । आस्तां तावदश्वमेधानुष्ठानं योऽपि वेद सोऽपि मृत्युं तरतीत्यश्वमेधानुष्ठानस्यैव स्तुतिः ।

अञ्जने सति घृतादिना । **तत्कार्यकारित्वाद्** यज्ञनिर्वर्तकत्वाद् यजमानकार्यकारित्वं प्रस्तरस्य । **ऐन्द्र्या गार्हपत्योपस्थानमविरुद्धमिति** इन्द्रप्रतिपादकानां

स्वरूपास्तावदर्थवादा विध्येकवाक्यत्वेन प्रमाणम् । परकृतिपुराकल्पस्वरूपा अपि तथैव योज्याः ।

क्वचित् पुनरर्थवादेनैव कश्चिदंशः पूर्यत इति, न तु प्रतीत्यङ्गत्वमेव तस्य कार्याङ्गत्वमपि भवति । यथा 'प्रतितिष्ठन्ति ह्वा य एता रात्रीरुपयन्ति' इत्यश्रूयमाणाधिकारस्य रात्रिसत्रविधेरधिकारांशोऽर्थवादादेव लभ्यते । यथोक्तं 'फलमात्रेयो निर्देशादि'ति, तत्र हि प्रतिष्ठाकामाः सत्रमासीरन् इत्यर्थवादवशाद् गम्यते वाक्यार्थः ।

क्वचिद् विधिवाक्यस्यार्थसंदेहेऽर्थवादात्मकाद् वाक्यशेषात् तन्निश्चयो भवति। यथा 'अक्ताः शर्करा उपदधाती'त्यञ्जनद्रव्ये घृततैलवसादिभेदेन तदिह्यमाने 'तेजो वै घृतमि'ति अर्थवादाद् घृतेनाक्ताः शर्करा उपधेया इति गम्यते ।

इत्यर्थवादा विधिनैक्यभावात्
तद्वत् प्रमाणत्वममी भजन्ते ।
अस्ति प्रतीत्यन्वयिता हि तेषां
क्वचिच्च कार्यान्वयिता तु दृष्टा ॥
यद्वा स्वरूपपरतामपि संस्पृशन्ति
प्रामाण्यवर्म त इमे न परित्यजन्ति ।
नैयायिका हि पुरुषातिशयं वदन्तो
वृत्तान्तवर्णनमपीह यथार्थमाहुः ॥

पदानां 'कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इत्यस्यामैन्द्र्यामृचि ऐश्वर्यादियोगाद् गौण्या वृत्त्या गार्हपत्येऽपि प्रवृत्तिरविरुद्धा । **परकृतिपुराकल्पस्वरूपाः** पूर्वं दर्शिताः, यथा चात्र दाल्भ्य आह ' माषानेव मह्यं पचते'ति परकृतिरूपोऽर्थवादः, तस्मादारण्यानेवाश्नीयादित्येतद् विधिशेषः । 'उल्मुकैर्ह स्म पुरा समाजग्मुरि'ति च पुराकल्परूपोऽर्थवादः । तस्माद् गृहपतेरेव निर्मन्थ्याग्निषु स पचन् पचेदित्येतच्छेषः । विशिष्टनामधेयतया ज्ञातकर्तृक कर्मसम्बद्धोऽर्थवादः परकृतिः, अविज्ञातकर्तृकर्मसम्बद्धस्तु पुराकल्प इति ।

प्रतितिष्ठन्ति ह वेति । 'त्रयस्त्रिंशद्रात्रमुपेयुरि'त्येतावन्मात्रं श्रूयते, किंकाम इति तु न श्रूयते । **फलमात्रेयो निर्देशादिति** । 'प्रतितिष्ठन्ति ह वा' इत्यादि किं फलार्थ-

आदित्ययूपवचनादिषु तु स्वरूप-
याथार्थ्यमित्थमुपपादयितुं न शक्यम् ।
गौणीन्तु वृत्तिमवलम्ब्य कृता तदर्थ-
व्याख्येति तेष्वपि न विप्लवनावकाशः ।।

मन्त्राणामपि न वेदप्रामाण्योपघातकत्वम्

अथेदानीं मन्त्रा विचार्यन्ते । किमर्थप्रकाशनद्वारेण विध्यर्थोपयोगिता तेषाम् उत उच्चारणमात्रेणेति? ननूभयथापि प्रामाण्याविशेषात् किं तद्विचारेण? न ह्रीदं शास्त्रं वेदस्यार्थविचाराय मीमांसावत् प्रवृत्तम्,अपि तु प्रामाण्यनिर्णयायैवेति। सत्यम्। प्रामाण्यनिर्णयायेदं शास्त्रं प्रवृत्तम्, अविवक्षितार्थत्वे तु मन्त्राणामप्रतिपादकत्वलक्षणमप्रामाण्यमेव भवेत् तत्सामान्याद् वेदब्राह्मणवाक्यानामपि तथाभावप्रसङ्ग इति वेदस्य कर्मावबोधार्थत्वं हीयते। न च संशयविपर्ययजननमेवाप्रामाण्यम्, अज्ञानजनकत्वमप्यप्रामाण्यमेव। तदुच्यते। उच्चारणमात्रोपकारिणो मन्त्राः। कुतः? तथा विनियोगोपदेशात्। 'उरु प्रथा उरु प्रथस्वे'ति पुरोडाशं प्रथयति । यद्यर्थप्रकाशनोपकारिणो मन्त्राः, सामर्थ्यादेव प्रथनोपयोगी मन्त्रोऽयमिति किमर्थं प्रथने विनियुज्यते वचनेन?

वादमात्रमुत फलविधिरिति संशये फलार्थवादमात्रमित्यत्र पूर्वपक्षे सूत्रम् "क्रतौ फलार्थवादमङ्गवत् कार्ष्णाजिनिः' इति क्रतावस्मिन् रात्रिसत्रे फलमर्थवादतया कार्ष्णाजिनिराचार्यो मेने, यथा 'यस्य खादिरः स्रुवो भवति च्छन्दसामेव स रसेनावद्यती'त्यत्राङ्गविधावर्थवादमात्रं फलनिर्देशः। ततः सिद्धान्तसूत्रं 'फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्' इति । आत्रेय आचार्यः । फलविधिमेव मन्यते सः । फलं ह्यवश्यं कल्प्यम्, तच्च निर्दिष्टमेव, अश्रुतौ ह्यनुमानं कल्पना भवतीति । अत्र चार्थवादविचारे पूर्वपक्षावस्थायां 'सोऽरोदीदि'त्याद्या उदाहृताः, सिद्धान्ते तु 'वायुर्वै क्षेपिष्ठे'त्यादयः; तत्र कोऽभिप्रायः । उच्यते । तेषु स्वार्थासत्यत्वाशङ्का विद्यते, अमीषु तु स्वार्थासत्यत्वाशङ्काया अभावः! एषाञ्चैकवाक्यत्वं विधिना साधयितुं पारितं तदनेनैव न्यायेन तेषामपि सेत्स्यतीति ।

किं अर्थप्रकाशनद्वारेणेति । प्रयोगकाले योऽयं मन्त्राणां पाठः स किं प्रयोज्यान् पदार्थान् प्रकाशयितुं तेषां स्मरणाय उत अदृष्टार्थमुच्चारणमात्रमिति । **उरुप्रथा उरु प्रथस्व** । त्वं पुरोडाश उरुप्रथाः उरु कृत्वा प्रथस्व इति । उरुप्रथाः प्रथःशब्दः सान्तः । अत उरु विस्तीर्णं कृत्वा प्रथस्व विस्तारं भजेति । **प्रथयति** पिण्डरूपं सन्तमपूपरूपं

यथा साक्षः पुरुषः परेण चेन्नीयते नूनमक्षिभ्यां न पश्यतीति गम्यते। 'अग्नीदग्नीन् विहरे'ति च । करोत्येवासौ ऋत्विगग्निविहरणं किं वचनेन ? उच्चारणमात्रोपकारिणि मन्त्रे तदुच्चारणादेवादृष्टं किञ्चिदुपकारजातं कल्प्यते । वाक्यक्रमनियमाच्च अविवक्षितार्थान् मन्त्रानवगच्छामः । नियतपदक्रमा हि मन्त्राः पठ्यन्ते । यद्यर्थप्रतिपादनेनोपकुर्युर्नियतक्रमाश्रयणमनर्थकं स्यात्, क्रमान्तरेणापि तदर्थावगमसम्पत्तेः ।

इतश्चाविवक्षितार्था मन्त्राः । अविद्यमानार्थप्रकाशिनो हि केचिद् दृश्यन्ते । यथा 'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेश' इति । न हि चतुः शृङ्गं त्रिपादं द्विशिरस्कं किञ्चिद् यज्ञसाधकमस्ति यदनेन प्रकाश्येत, अतश्चैवम् । अचेतनप्रैष प्रदर्शनाद् 'ओषधे त्रायस्वैनमि'ति, न ह्योषधिर्बुध्यते त्राणाय नियुक्तास्मीति। 'शृणोतु ग्रावाण' इति चोदाहरणम् । न ह्यचेतना ग्रावाणः श्रोतुं नियुज्यन्ते । अपि च 'अदितिर्द्यौरन्तरिक्षमि'ति विप्रतिषिद्धमभिवदन्ति मन्त्राः। कथं सैव द्यौस्तदेवान्तरिक्षं भवितुमर्हति ? केषाञ्चिच्च मन्त्राणामर्थो ज्ञातुमेव न शक्यते ते कथमर्थप्रकाशनेनोपकुर्युः ? 'अम्यक् सा त इन्द्रऋष्टिरि'ति, 'शृण्येव जर्फरी तुर्फरीतु' इति, 'इन्द्रः सोमस्य करके'ति च । तस्मादविवक्षितार्था मन्त्राः ।

अपि चोच्चारणमुभयथापि कर्त्तव्यम्, मन्त्राणामदृष्टाय वा अर्थप्रत्यायनाय वा । यतोऽर्थमपि नानुच्चारिताः शब्दाः प्रत्याययितुमुत्सहन्ते । तस्मादवश्यकर्त्तव्येऽस्मिन्नुच्चारणे तत एव यज्ञोपकारे सिद्धे किम् अर्थप्रतिपादनद्वारपरिग्रहेण प्रयोजन मिति ।

तत्रोच्यते । किं मन्त्रेभ्योऽर्थप्रतीतिरेव नास्ति, किं वा भवन्त्यपि निर्निमित्तासौ, उत सन्निमित्तापि ग्रहैकत्वप्रतीतिवदविवक्षितेति । न तावत्प्रतीतिरेव नास्ति,शब्दार्थसम्बन्धव्युत्पत्तिसंस्कृतमतीनां 'बर्हिर्देवसदनं दामी'त्येवमादिमन्त्रश्रवणे सति तदर्थप्रतीतेः स्वसंवेद्यत्वात् । नाप्यसौ निर्निमित्ता, लोकवत् पदानामेवात्रनिमित्तत्वात् । व्युत्पत्तिरपि न नास्ति, य एव लौकिकाः शब्दास्त एव वैदिकास्त एव तेषा-

---

सम्पादयति । अग्नीदग्नीन् विहरेति मन्त्रेणाग्नीधोऽग्निविहरणं कर्तव्यं प्रकाश्यम्, तच्चाग्निविहरणमसावनेन वचनेनाप्रकाशितमपि कर्म पाठक्रमवशादेव जानन् करोति । अस्मिन् ह्यवधीतस्याग्निविहरणं पठ्यते ।

मर्था इति लोकव्यवहारतस्तद्व्युत्पत्तिसम्भवात् । नापि सम्भवन्त्यपि मन्त्रेभ्योऽर्थप्रतीतिः ग्रहैकत्वप्रतीतिवदविवक्षिता भवितुमर्हति, अविवक्षानिबन्धनस्य कस्यचिदप्यभावात्, ग्रहादिवचनान्तरनिर्ज्ञातसंख्यत्वात् सोमावसेकनिर्हरणस्य च सम्मार्गकार्यस्य सर्वग्रहसाधारणत्वाद्, ग्रहम् इति विभक्तेश्च कर्मकारकसमर्पणमात्रेणापि सार्थक्योपपत्तेः, युक्तमेकत्वमविवक्षितमिति कथयितुम् । इह तु 'बर्हिर्देवसदनं दामी'त्येवमादिवाक्यक्रियमाणं क्रतूपयोगिद्रव्यादिप्रकाशनम् तस्य विध्यपेक्षितत्वान्मन्त्रेण स्मृतं कर्म करोति । तथाक्रियमाणमभ्युदयकारि भवति इति न यज्ञाङ्गप्रकाशनमविवक्षितम् । अतो नोच्चारणमात्रोपकारिणो मन्त्राः । जपमन्त्राणान्तु 'पावमानीं जपेदि'ति विधिनैव तावन्मात्राक्षेपणान्नार्थेन प्रकाशितेन प्रयोजनमिति । किं तत्र क्रियते ? यत्र तु जपेदिति विधिर्न श्रूयते न तत्र तदर्थः प्रतीयमानोऽपेक्ष्यमाणश्चोपेक्षितुं युक्तः ।

ननु यदि जपेदिति विधेर्वैष्णव्यादिषु नार्थो विवक्ष्यते तर्हि 'स्वाध्यायोऽध्येतव्यः' इत्यक्षरग्रहणमात्रविधानात् सर्वस्य वेदस्याविवक्षितार्थत्वं स्यात् । एतच्च

ग्रहैकत्वप्रतीतिवदिति । 'ग्रहं सम्मार्ष्टि' इत्यत्र ग्रहं निर्दिश्य सम्मार्गो विधीयते । निर्देशस्तु वचनान्तरनिर्ज्ञातस्य भवति, वचनान्तरेण च नवसंख्योऽसौ विहित इत्येकत्वाविवक्षा । **सोमावसेकः** सोमावलेपः । **अपेक्ष्यमाणश्चेति** । यथा 'बर्हिर्देवसदनमि'त्यस्य द्रव्यप्रकाशनं योऽर्थः स विधिना अपेक्ष्यते ।

सर्वस्य वेदस्याविवक्षितार्थत्वं स्यादिति । 'ननु कथमविवक्षितार्थत्वम्, स्वाध्यायाध्ययनविधेः स्वाध्यायोऽध्येतव्यः' इत्यस्यार्थज्ञानपरत्वादित्याह 'अक्षरग्रहणमात्रविधानात्' इति । 'स्वाध्यायोऽध्येतव्यः' पाठेनामुखीकर्तव्य इति हि तस्यार्थः । दृष्टो हि तस्यार्थः कर्मावबोधनमिति । अक्षरग्रहणमात्रस्य निष्फलत्वादवश्यं विधिना प्रवर्तकशक्त्यविघाताय फलान्तरं कल्प्यम् । यावच्च कल्प्यते तावद् दृष्टमेवार्थावबोधनं लभ्यत्र्यादि प्रथमाह्निकारम्भ एव प्रपञ्चितमिति । ननु 'यद् ऋचोऽधीते घृतकुल्या भवन्ति, यद् यजूंष्यधीते मधुकुल्या भवन्ति' इति ऋगाद्यध्ययनात् फलान्तरश्रवणात् कथमर्थावबोध एव फलमिति । अतिप्रसिद्धोऽयमर्थः, प्रथमसूत्र एव मीमांसायामस्य विचारणादत एवाह **एतच्च शास्त्रान्तर** इति । 'अन्यार्थत्वे स्वाध्यायस्यावगते तेषामर्थवादतयैव समन्वयः' इत्याद्युत्तरमत्र ।

शास्त्रान्तरे विस्तरतो निर्णीतम् इह तु वितन्यमानमस्माकमवान्तरविचारवाचालतामाविष्करोतीति न प्रतन्यते ।

यत्तु तदर्थविनियोगोपदेशादित्यविवक्षितार्थत्वमुक्तं तत्र 'उरु प्रथा उरु प्रथस्वे'ति लिङ्गादेव मन्त्रस्य प्रथनविनियोगसिद्धेः कामं तद्विधायकं वचनमनर्थकं भवतु प्राप्तानुवादकत्वाद्, न तु प्रतीयमानो मन्त्रादर्थस्त्यक्तुं युक्तः। तत् किं वचनमनर्थकमेव ? नानर्थकम्, प्रतिपन्नार्थविषयन्तु तत् । अर्थवादार्थं वा तद्वचनम् । यज्ञपतिमेव तत्प्रथयतीति तद् यज्ञपतिं यजमानमेव प्रजया पशुभिः प्रथयतीति । क्वचित्तु गुणार्थविधानं यथा 'तां चतुर्भिरादत्ते' इति, एवम् 'अग्नीदग्नीन्विहरे'दित्यादावपि द्रष्टव्यम् ।

यत्तु नियतपदक्रमत्वादुच्चारणमात्रोपयोगिनो मन्त्रा इति तदप्यसाधु । मीमांसकानामनादित्वाद् वेदस्य तत्क्रमलङ्घनानुपपत्तेः । यथोक्तम् 'अन्यथा करणे चास्य बहुभ्यः स्यान्निवारणम्' इति । अस्माकमपि यादृगीश्वरप्रणीतो वेदस्तदन्यथाकरणे किमध्येतॄणां स्वातन्त्र्यमस्ति ? तस्मान्नार्थविवक्षायै मन्त्रक्रमः प्रभवति ब्राह्मणवाक्यक्रमवत् ।

यदपि ' चत्वारि शृङ्गे'त्यविद्यमानार्थवचनमाशङ्कितम्, तदप्यनभिज्ञतया ।

तद्विधायकम् उरुप्रथा इति पुरोडाशं प्रथयतीति । **प्रतिपन्नार्थविषयन्तु तदि**त्यनेन निरालम्बनत्वकृतमनर्थकत्वं परिहरति, **अर्थवादार्थम्** वेत्यनेन त्वनुवादमात्रत्वम् । **क्वचित्तु गुणार्थविधानमि**ति । सन्त्यादानसमर्था मन्त्रा 'देवस्य त्वा' इत्यादयः, तान् पठित्वाह 'तां चतुर्भिरादत्ते' इति । तामित्यभ्रिं; वेद्यर्थं मृत् खन्यते यया सा अभ्रिः । तत्र तदादानप्रकाशनसामर्थ्यादेव मन्त्रेण तदादाने लब्धे पुनस्तां चतुर्भिरादत्त इति वचनं निष्फलमाशङ्क्य समुच्चितैश्चतुर्भिरादानं कार्यं नैकैकेनेति समुच्चयलक्षणगुणस्य विशेषस्य विधानार्थम् । यद्यपि समुच्चयो न वाच्यस्तथाप्यसमुच्चितैरेकैकश आदानं क्रियमाणं कथं चतुर्भिरादानं कृतं स्यादिति फलतः समुच्चयलाभः। **एवमग्नीदग्नीन् विहरेति** । अत्र यद्यपि तस्य ज्ञानं स्थितं मयैतत्कर्तव्यमिति तथापि प्रयोगकालेऽवश्यं स्मर्तव्यं तत्, उपायान्तरेण स्मरणप्रतिषेधार्थं मन्त्रेण स्मृतं कर्तव्यमिति मन्त्रस्योपयोगः ।

अन्यथा करणे चास्येति । बहुभ्योऽध्येतृभ्यो निवारणम्, एवं मा पठीरिति ।

यज्ञस्य वैष गुणवादेन । संस्तवः । चत्वारि शृङ्गा इति वेदा उक्ताः, त्रयोऽस्य पादा इति सवनानि, द्वे शीर्षे इति दम्पती यजमानौ, सप्त हस्तास इति च्छन्दांसि, त्रिधा बद्ध इति मन्त्रब्राह्मणकल्पैर्निबद्धो वृषभ इति, कामान् वर्षति, 'रोरवीती'ति स्तोत्रशस्त्रप्रयोगबाहुल्याच्छब्दायमानः 'महोदेवो मर्त्यानाविवेशे'ति मनुष्यकर्तृकत्वेनैवमेष यज्ञः स्तुतो भवति । तद् यथा चक्रवाकमिथुनस्तनी हंसदन्तावली शैवालकेशी काशवसनीति नदी स्तूयते ।

'ओषधे त्रायस्वैनमि'ति चेतनवन्नियोगस्तस्याः स्तुत्यर्थः । 'शृणोत ग्रावाण' इति प्रातरनुवाकस्तुतिः । इत्थं नामैष प्रातरनुवाकः 'प्रशस्यो यदचेतना ग्रावाणोऽपि शृणुयुः अदितिर्द्यौरदितिरन्तरिक्षमि'ति गुणवादादप्रतिषेधः । तद् यथा लोके त्वमेव मे माता त्वमेव मे पिता त्वमेव भगिनी त्वमेव मे भ्रातेति ।

यत्तु केषाञ्चिन्मन्त्राणामर्थो न ज्ञायते इति, पुरुषापराधः । अर्थावगमोपायेषु बहुषु सत्स्वपि तदन्वेषणालसः पुरुषो नार्थमवगच्छति न पुनर्मन्त्रोऽत्रापराध्यति,

---

सवनानि प्रातःसवन, माध्यंदिनसवन, तृतीयसवनानि । **छन्दांसि** गायत्र्यादीनि । **कल्पो** यज्ञसूत्रम् । **कामान्** स्वर्गादीन् । स एवंभूतो **महो देवो** महान् देवो यज्ञो **मर्त्यान्** मनुष्यान् **आविवेश,** तेषामेव यज्ञेऽधिकारात् । चत्वारि शृङ्गास्त्रिधा बद्ध इत्यनयोरथर्ववेदभक्त्या स्वव्याख्यानं कृतवान् ग्रन्थकारः, भाष्यकारस्तु चत्वारो होत्राः शृङ्गाणीवास्येति, त्रिधा बद्धस्त्रिभिर्वेदैर्बद्ध इति च व्याचचक्षे । होत्रा इति ऋत्विग्विशेषाणां ब्रह्मन्-आच्छसि-पोतृ-नेष्टृलक्षणानां चतुर्णामभिधानम्, तेषां यज्ञमुखप्रदेशवर्तित्वाच्छृङ्गतुल्यत्वम् ।

ओषधे त्रायस्वेति । पशुसंज्ञापनकाले पशुपरित्राणार्थमध्वर्युर्दर्भमाह 'ओषधे त्रायस्वे'ति । तस्या अचेतनायाश्चेतनवत्त्वसमारोपः स्तुतिः । **प्रातरनुवाकस्तुतिरिति** प्रातरनुवाकाख्यः शस्त्रविशेषः ऋग्वेदप्रसिद्धः । **यदचेतना ग्रावाणोऽपि शृणुयुरि**त्यस्य किं पुनर्विद्वांसो ब्राह्मणा इति शेषः ।

यत्तु केषाञ्चिन्मन्त्राणामर्थो न ज्ञायत इति । तत्र 'अम्यक् सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति अग्निश्चिद्धि ष्मातसे शुशुकानापो न द्वीपं दधति प्रयांसि' इति तावन्मन्त्रस्यायमर्थः' अगस्त्योऽमरत्वं प्रार्थयमान इन्द्रमाह हे इन्द्र सा ते भवत्सम्बन्धिनी ऋष्टिरायुधविशेषः अस्मे अस्माकं स्थितैव, किंविशिष्टा ? अम्यक्

ब्राह्मणवाक्यवदुपायतस्तदर्थावगमदर्शनात् । उपायश्च प्रथमस्तावद् वृद्धव्यवहार एव । तुल्यत्वाल्लोके वेदे शब्दार्थानाम् । य एव लौकिकाः शब्दास्त एव वैदिकास्त एव चैषामर्था इति ।

यद्यपि च 'अग्निर्वृत्राणि जङ्घनदि'ति वेदे कृतणत्वमग्निशब्दं पठन्ति 'उत्ताना वै देवगवा वहन्ति वनस्पते हिरण्यपर्ण प्रदिवस्ते अर्थमि'ति लौकिकवैदिकयोः शब्दयोरर्थयोश्च नानात्वमिवाशङ्क्यते, तथापि तथात्वं प्रत्यभिज्ञानेनावधार्य ईषद्विकृतास्त एव वेदे इति लौकिक्येव व्युत्पत्तिः । लोकप्रसिद्धिविप्रतिषेधे तु शास्त्रवित्प्रसिद्धिः प्रमाणीक्रियते यथा 'यवमयश्चरु' 'वाराही उपानहौ' 'वैतसे कटे प्राजापत्या सञ्चिनोती'तियववराहवेतसशब्दादीर्घशूकसूकरवञ्जुलकेषुशिष्टप्रसिद्ध्या नियम्यन्ते,

---

अमिशब्दः सहार्थे अमि सह अञ्चतीत्यम्यक् या तव सहचारिणीत्यर्थः । अग्निः चित् हि स्म अग्निरिव हि अतसे शुष्कतृणे, शुशुकान् दीप्तवान् शुष्कतृणप्रज्वलिताग्नितुल्या या लक्ष्यत इत्यर्थः । येऽप्येते मरुतः सनेमि पुराणमभ्वं तोयं जुनन्ति वृष्टिरूपेण प्रक्षरन्ति । अत एव प्रयांस्यन्नाद्यानि दधति धारयन्ति तव सखाः तेऽप्यस्माकमेव कथं (अत्र टीकाग्रन्थो नष्टः) तावच्छब्दौ प्राङ्नीत्या प्रहरणहिंसापरौ सति च प्रहर्तव्ये तत्परत्वमनयोर्नान्यथा अश्विनोश्च देवभिषजोर्जरणमरणे एव प्रहर्तव्यहिंसितव्ये च नान्यत् । अत उक्तम् जरणमरणनिमित्ताविति । यत एव च जरामरणयोः प्रहर्तारौ हिंसितारौ चाश्विनावत एव ताभ्यामजरत्वममरत्वञ्च प्रार्थितवानगस्त्य इति । 'एकया प्रतिधापिबत् साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका' इति मन्त्रेणेन्द्रः स्तूयते । एकया प्रतिधा एकेन प्रयत्नेन साकं युगपत् त्रिंशतं सरांसि पात्राणि सोमस्य पूर्णानीन्द्रोऽपिबत् । काणुका कामयमानः सन् ।

अग्निर्वृत्राणीति । अग्निर्वृत्राणि पापानि जङ्घनदत्यर्थं हतवानित्यर्थः । **हिरण्यपर्णे**ति । न हि लोके वनस्पतीनां हिरण्मयपर्णत्वमित्यर्थान्यत्वम् । **वाराही उपानहौ** वराहचर्मनिर्मिते । **वैतसे कट** इत्यश्वमेधे श्रूयत एतत् । वेतसनिर्मिते कटे प्रजापतिदेवताकानश्वादिनानापश्ववयवान् सञ्चिनोति सहचरयति । **शिष्टप्रसिद्ध्या** शास्त्रवित्प्रसिद्ध्या । तथाहि 'यवमयेषु करम्भपात्रेषु विहितेषु वाक्यशेषं यत्रान्या ओषधयो म्लायन्ते तत्रैते मोदमाना इवोत्तिष्ठन्तीति'; न चैवंरूपता प्रियङ्गुषु सम्भवति, सर्वौषधिसाधारणे शरत्समये तदुद्भवात्; यवानान्तु ग्रीष्मे समुद्भवः, अतस्तेष्वेव प्रत्ययस्तस्माद् ।

न प्रियङ्गुकृष्णशकुनिजम्बूष्विति। यत्र तु शिष्टप्रसिद्धिर्नास्ति तत्र म्लेच्छेभ्योऽपि तदर्थव्युत्पत्तिराश्रीयते, यथा पिकनेमतामरसशब्देषु। म्लेच्छप्रसिद्धेरप्यभावे निगम-निरुक्तव्याकरणवशेन धातुतोऽर्थः परिकल्पनीयः। तेनाश्विनसूक्तप्रक्रमाज्जरणमरण-निमित्तौ जर्फरीतुर्फरीतू इति द्विवचनान्तसरूपावेतौ शब्दावश्विनोर्वाचकाविति गम्यते, एवमन्यत्राप्युत्प्रेक्षणीयम्। तदनेनापि निमित्तेन न मन्त्राणामविवक्षितार्थत्वं वक्तव्यम्।

अमी तस्मादर्थप्रकटनमुखेनैव दधति
क्रियार्थत्वं मन्त्रा न तु पठनमात्रेण जपवत्।
न तद्द्वारेणापि श्लथयितुमतः शक्यत इदं
प्रमाणत्वं वेदे सकलपुरुषार्थामृतनिधौ॥

नामधेयपदसार्थक्यम्

इदमिदानीं परीक्ष्यते, 'उद्भिदा यजेत' 'चित्रया यजेत पशुकामः' 'अग्निहोत्रं जुहुयात् स्वर्गकामः' 'श्येनेनाभिचरन् यजेत' 'वाजपेयेन स्वाराज्यकामो यजेते'ति श्रूयते। तत्र किमुद्भिदेति चित्रयेति अग्निहोत्रमिति श्येनेनेति वाजपेयेनेति गुणविधय एते,तत्तत् कर्मनामधेयानि वेति? किमनेन परीक्षितेन प्रयोजनम्? उभयत्रापि प्रामाण्यं नोपपद्यते इति तदर्थमेवेदं परीक्ष्यते। यदि तावद् 'व्रीहिभिर्यजेत' 'दध्ना जुहोती'तिवद् गुणः कश्चिदुद्भिदादिपदैर्विधीयते अनेन द्रव्यविशेषेण यागः कर्त्तव्य इति तदा भावार्थस्य यज्यादेरन्यतोऽवगतिर्मृग्या, अनवगते भावार्थे गुणविधा-

---

'वराहं गावोऽनुधावन्ति' इत्यतस्तु वाक्यशेषात् सूकरे वराहशब्दो न कृष्णशकुनौ काके; न हि तं गावोऽनुधावन्तीति। 'अप्सुजो वेतसः' इत्यमुष्माच्च वाक्यशेषाद् वञ्जुले वेतसशब्दो न जम्ब्वाम्। **निगमेति** निगमा निघण्टवः, अस्येयन्ति नामानीत्येवंप्रायाः। मन्त्रार्थप्रदर्शनपराणि वेदवाक्यान्येव यानि यथा 'युञ्जानः प्रथमं मनः' इत्यस्य मन्त्रस्य 'प्रजापतिर्वै युञ्जानः' इत्यादिको व्याख्यारूपो निगम उच्यते। व्युत्पत्त्यार्थप्रतिपादनं येन क्रियते तन्निरुक्तम्।

तत्र किमिति उद्भिद्यते मृत् खन्यते येन तदुद्भित् कुद्दालादि, तेन 'उद्भिदा यजेत' इति गुणविधिः, यवैर्यजेतेतिवत्।

नस्यानुपपन्नत्वात्। 'आग्नेयोऽष्टाकपालो भवति' 'अग्निहोत्रं जुहोती'ति विध्यन्तरेण भावार्थे चोदिते तत्र 'व्रीहिभिर्यजेत' 'दध्ना जुहोती'ति।

ननु 'वाजपेयेन स्वाराज्यकामो यजेते'त्यनेनैव वाक्येन यागाख्यो भावार्थः चोदयिष्यते गुणश्च तस्मिन् वाजपेयाख्यो विधास्यते इति को दोषः? कथं न दोषः? अर्थद्वयविधानेन वाक्यभेदप्रसङ्गात्। यागेन स्वाराज्यं कुर्यादित्येकोऽर्थः, वाजपेयेन गुणेन यागं कुर्यादिति द्वितीयोऽर्थः, न च सकृदुच्चरितं वाक्यमर्थद्वयविधानाय प्रभवति।

ननु यजेतेति रूपसाम्यादुभयत्रापि संबध्यते यजेत स्वाराज्यकामो वाजपेयेन चेति तुल्यमस्योभयत्रापि रूपम्? न। रूपसाम्यस्यासिद्धत्वात्। स्वाराज्यं प्रति यजिरप्राप्तत्वाद् विधीयते गुणञ्च प्रति प्राप्तत्वादनूद्यते। अनवगते हि कर्मणि गुणविधानमघटमानमित्यवश्यं गुणविधिपक्षे गुणं प्रति यजिः प्राप्तत्वादुद्देश्यो भवति प्रधानञ्च। स एव स्वाराज्यं प्रति विधेयत्वादुपादेयो गुणश्चेति विरुद्धरूपापत्तेर्न यजिरुभाभ्यां युगपत् सम्बन्धुमर्हति। यः स्वाराज्यं साधयितुमिच्छेत् स यजेतेत्यन्यद्रूपम्, यद् यजेत तद् वाजपेयेनेत्यन्यपद्रूम्। तस्माद् भावार्थप्राप्तौ प्रमाणान्तरापेक्षणाद् गुणविधिपक्षे तदप्रमाणं वचनम्। अथैष दोषो मा भूदिति नामधेयपक्ष आश्रीयते?

गुणश्च तस्मिन् वाजपेयाख्य इति। वाजमन्नं वाजञ्च तत् पेयञ्चेति यवागूरुच्यते, स गुणः, तेन यागः कर्तव्य इति।

रूपसाम्यादिति। तदेव यागाद्यात्मकं रूपमुभयत्रापि सम्बध्यमानस्य, अतस्तन्त्रेणोभयत्र सम्बध्यत इति। **प्रधानञ्चेति**। अन्येनोपक्रियमाणत्वात् प्रधानम्। **तस्माद् भावार्थप्राप्ताविति**। वैदिकानि तावद् विधायकानि सर्वाण्येव गुणविधाने पर्यवसितानि सर्वाणि हि सोपपदानि, उद्भिदा यजेतेतिवत्। तच्छुद्धस्य यागस्य विधायकमवश्यमन्यत् प्रमाणान्तरं मृग्यम्, अतश्च प्रमाणान्तरसव्यपेक्षत्वादप्रमाणमिति प्रभाकरमतम्। तथा च स आह 'तस्मात् कर्मविधानासम्भवादप्रामाण्यम्। कथम्? लौकिककर्माश्रयणात्। अवश्यं हि गुणविधिपरे वाक्ये लौकिकं कर्माश्रयणीयम्। वैदिके न खलु बाधा दोषः किन्तु असम्भवः। कथमसम्भवः? सर्वत्रोपपदश्रुतेः। एवमपि किमित्यप्रामाण्यम्? धात्वर्थेऽन्यतः प्रवृत्तिर्मृग्या। अन्यतश्चेत् सापेक्षत्वप्रसङ्गः, सापेक्षत्वाच्चाप्रामाण्यं प्रसक्तम्" इत्यादि।

तदेषामुद्भिदादिपदानां विस्पष्टमेवानर्थक्यम्। यावदेवोक्तं भवति यजेतेति तावदेव वाजपेयेनेति । एवमानर्थक्यादन्यत्राप्यसमाश्वासः ।

नामधेयपदसार्थक्यम्

अत्रोच्यते, गुणविधिपक्षे यथा भवानाह तथैव, नामधेयपक्ष एव तु श्रेयानित्यभ्युपगम्यते। तथा हि भावार्थस्य फलं प्रति करणत्वात् तत्सामानाधिकरण्येन तृतीया प्रयुज्यते तत्र वाजपेयेनेति । साध्यश्च भवन् भावार्थः करणभावमनुभवतीति साध्यत्वापेक्षया तत्सामानाधिकरण्येन क्वचिद् द्वितीयापि प्रयुज्यते अग्निहोत्रं जुहोतीति।

ननु गुणवन्नामापि विधातव्यमेव अनभिहितस्यानवगमात्। ततश्च गुणविधिपक्षस्पृशो वाक्यभेदादिदोषास्तदवस्था एव ? नैतदेवम्। न ह्यस्य कर्मण इदं नाम वेदितव्यमिति संज्ञासंज्ञिसम्बन्धं वेदो विदधाति। योगेन केनचित् प्रवर्त्तमानं नामधेयमवगम्यत एव, उद्भेदनमनेन पशूनां क्रियत इत्युद्भिदम्, दधि मधु घृतं धाना उदकं तत्संसृष्टं प्राजापत्यमिति नानाविधविचित्रद्रव्यसाध्यत्वाच्चित्रा, अग्नये होत्रमस्मिन्नित्यग्निहोत्रम्, यथैव श्येनो निपत्यादत्ते एवमनेन द्विषन्तं भ्रातृव्यमादत्ते इत्यर्थवादात् श्येन एव श्येनो यागः, वाजमन्नं पीयतेऽस्मिन्निति वाजपेयो यागः, तस्मात् कर्मनामान्येतानि ।

यत्तु नामधेयपक्षे नैरर्थक्यमाशङ्कितं तदपि न चारु, नामापि गुणफलोपबन्धेनार्थवदिति अभियुक्तैः परिहृतत्वात्। एवंनामेदं कर्मेत्यवगम्यते तत्र गुणो द्रव्यदेवतादिः, फलञ्च तस्य स्वर्गः पश्चादवगम्यत इति। तस्मान्नामधेयपदानामविरुद्धोऽन्वयः। क्वचित् पुनरप्राप्ते भावार्थे सगुणमेव तत्कर्म चोद्यते, यथा 'आग्नेयोऽ-

---

गुणविधिपक्षस्पृश इति। फलं प्रति विधेयत्वाद् धात्वर्थस्य, नामविधिं प्रति चोद्देश्यत्वात्। **संज्ञासंज्ञिसम्बन्धमिति**। कार्यपरत्वाद् वेदस्येति भावः। **योगेन केनचिदित्यादिना** नामधेयस्यानूद्यमानत्वं दर्शयति। योगेन पशूनामुद्भेदनेन फलभूतानां प्रकाशनेन यत् सिद्धमुद्भित्त्वं तदनेनानूद्यते न विधीयत इत्यर्थः। येनानेन यागविशेषेण पशुकामो यजते भवत्येवासावुद्भित् पशूनामुद्भेदनादित्यर्थः।

गुणफलोपबन्धेनार्थवदिति। तत्सम्बन्धित्वेन गुणफलयोर्विधानादित्यर्थः।

ष्टाकपालोऽमावास्यायां पौर्णमास्याञ्च च्युतो भवति' इति। यथा वा 'एतस्यैव

आग्नेयोऽष्टाकपाल इति। अच्युत इत्युभाभ्यामपि दर्शपूर्णमासाभ्यां न च्यवत इति। **अत्र** हि अष्टकपालेषु यः संस्कृतः सोऽष्टाकपाल आग्नेयो भवति, तस्य पुरोडाशस्याग्नेयता विधीयते; न ह्यविधीयमान आग्नेयो भवति। स पुनरष्टाकपाल एवमाग्नेयो भवति यदग्नये संकल्प्य दीयते, संकल्पमन्तरेणाग्नेयत्वाभावात्। संकल्पितस्य यागेन विना अर्थवत्ता नास्तीत्येवमनेन प्रकारेण तद्धितान्तनिर्देशान्यथानुपपत्त्या यागो विहितः। स चैवं द्रव्यदेवतासम्बन्धात्मको यागो विधीयमानो न शक्यः सम्बन्धिनावग्निपुरोडाशावन्तरेण विधातुमिति सगुणस्य कर्मणो यागस्य विधानम्। तथा च जैमिनिः "तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः" इति। **यथा वा एतस्यैवेति।** "समेषु कर्मयुक्तं स्यात्" इत्यत्रैतच्चिन्तितम्। त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेतेति। ततः पुनरुक्तम् एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति। तत्र प्रथमं त्रिवृत्स्तोमकोऽग्निष्टुन्नामको यागः स चाग्निष्टोमोऽग्निष्टोम संस्थस्तस्य वायव्या या ऋचः तास्वेकविंशमेकविंशत्या स्तोत्रीयाभिर्ऋग्भिर्निर्वर्त्योऽग्निष्टोमाख्यः स्तोत्रविशेषः। पश्चादेतस्यैवेत्याह। अत्र विशेषः रेवत्याख्यासु ऋक्षु वारवन्तीयाख्यस्याग्निष्टोमसाम्नो विधानम्। तत्र संदेहः। किं पूर्वप्रकृतस्याग्निस्तुतोऽग्निष्टोमस्य यो गुणो वारवन्तीयाख्यस्तस्मिन् पशवः फलम् अथवा एतेन यजेतेति कर्मान्तरविधानमिति। तत्र पशुकामो यदि यजेतानेन यदेवं कृत्वेति सम्बन्धादेतस्यैवेत्यनेन तस्यैव परामर्शात् तस्यैव गुणविधिरिति पूर्वपक्षिते "समेषु कर्मयुक्तं स्यात्" इति सिद्धान्तः। समेष्वेवंजातीयेषु रेवत्यादिवाक्येषु कर्मयुक्तं फलमपूर्वात् कर्मणः फलं न पूर्वस्यैव गुणविधिरित्यर्थः। कथम्? गुणविधिपक्षे वाक्यभेदात् तस्य तावत् प्रकृतस्य रेवत्यो न सन्ति ता विधेयास्तासु चाग्निष्टोमसाम नास्ति पूर्वसिद्धं तदपि विधेयम्। सिद्धान्ते तु रेवत्याधारवारवन्तीयस्तोत्रनिर्वृत्तिपूर्वकत्वविशिष्टो यागो विधीयते। तदा च विशेषणानामविधाने कथं तद्विशिष्टस्य यागस्य विधिरिति बलात् सगुणस्य कर्मणो विधानमायाति। यदा चैवं न्यायस्तदा एतस्येत्येवं धर्मकस्येति व्याख्येयम्। अत्र च 'यागप्रवृत्तौ सत्यां साम्नः करणमुपपद्यते न तु पूर्वम्' इत्याक्षिप्य प्राभाकरैः 'प्रतीतिपौर्वापर्ये क्त्वाश्रुतिर्न प्रयोगपौर्वापर्ये' इत्यादि समर्थित-

रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेते'ति। अलं शास्त्रान्तरोक्तगहनकथाविस्तरेण इति नास्ति नामधेयद्वारेणापि प्रामाण्याक्षेपः। सर्वप्रकारमेव सिद्धं वेदप्रमाणत्वमिति।

वेदप्रामाण्यसिद्ध्यर्थमित्थमेताः कथाः कृताः।
न तु मीमांसकख्याति प्राप्तोऽस्मीत्यभिमानतः॥

कार्य एवार्थे वेदाः प्रमाणमिति शङ्का

नन्वेवं विध्यर्थवादमन्त्रनामधेयानां कार्योपयिकत्वदर्शनात् कार्य एवार्थे वेदाः प्रमाणमित्युक्तं स्यात्। ततः किं सिद्धेऽर्थे तस्य प्रामाण्यं हीयते ? ततोऽपि किं भूयान् भूतार्थाभिधायिग्रन्थराशिरुपेक्षितो भवेत् ? सकलस्य च वेदस्य प्रामाण्यं प्रतिष्ठापयितुमेतत् प्रवृत्तं शास्त्रम्।

अत्र केचिदाहुः, सर्वस्यैव वेदस्य कार्येऽर्थे प्रामाण्यम्। तथा हि गृहीतसम्बन्धः शब्दोऽर्थमवगमयति, सम्बन्धग्रहणञ्चास्य वृद्धव्यवहारात्। वृद्धानाञ्च व्यवहारः पानीयमानय गां बधान ग्रामं गच्छेति कार्यप्रतिपादकैरेव शब्दैः प्रवर्त्तते इति तत्रैव व्युत्पद्यन्ते बालाः। प्रयोजनोद्देशेन हि वृद्धा वाक्यानि प्रयुञ्जते। न च सिद्धार्थाभिधायिना प्रवृत्तिनिवृत्ती अनुपदिशता शब्देन किञ्चित् प्रयोजनमभिनिर्वर्त्तत इति तस्य न प्रयोगयोग्यत्वम्। अप्रयुज्यमानस्य च न सम्बन्धग्रहणम्। अगृहीतसम्बन्धस्य च न प्रतिपादकत्वम्। अप्रतिपादकस्य च न प्रामाण्यम्। अपि च आख्यातपदोच्चारणमन्तरेण निराकाङ्क्षप्रत्ययानुत्पादादवश्यमाख्यातयुक्तं वाक्यं प्रयोक्तव्यम्। आख्यातपदेन साध्यरूपोऽर्थ उच्यते नामधेयपदेन च सिद्धः। भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति वाक्यस्य साध्यार्थनिष्ठतेति न भूतार्थविषयं तस्य प्रामाण्यम्। अतश्च कार्येऽर्थे शब्दस्य प्रामाण्यम्, यतश्च कार्यरूपोऽर्थः शब्दस्यैव विषय इति। न च शब्दः प्रमाणतां सिद्धेऽर्थे लभते। सिद्धोऽर्थः प्रसिद्धत्वादेव प्रमाणान्तरपरिच्छेदयोग्य इति तत्प्रतिपादने तत्प्रमाणान्तरसव्यपेक्षः

मित्यास्तां तावदेतत्। अत एवानेनाप्युक्तम् अलं शास्त्रान्तरेत्यादि।

समुच्चारणे सहोच्चारणे।

शब्दो भवति । ततश्च तद्ग्राहिणः प्रमाणान्तरस्यैव तत्र प्रामाण्यं स्यान्न शब्दस्य । शब्दश्च तदुपस्थापनमात्रनिष्ठ एव स्यात् । तस्माच्छब्दप्रामाण्यमिच्छता कार्य एवार्थे तत्प्रामाण्यमङ्गीकर्त्तव्यमिति ।

अकार्येऽपि अर्थे वेदाः प्रमाणम् ।

अत्रोच्यते । यद् ब्रूषे कार्य एवार्थे वाक्यस्य व्युत्पत्तिरिति तदयुक्तम् । एवं हि सिद्धरूपोऽयं तस्यार्थ इति कथं त्वयोच्यते ? न ह्यलब्धव्युत्पत्तेः शब्दादर्थप्रत्ययो युज्यते । अर्थप्रतीतिश्च ततो दृश्यते व्युत्पत्तिश्च तत्र नास्तीति चित्रम् । न च कार्यपरैरेव शब्दैर्लोके व्यवहारो वर्त्तमानापदेशकेभ्योऽपि व्यवहारप्रवृत्तेस्तत्रापि व्युत्पत्तिर्भवत्येव । अपि चाङ्गुल्यादिना पुरोऽवस्थितमर्थं निर्दिश्य यदा कश्चित् कथयत्यस्येदं नामेति तदा कार्योपदेशमन्तरेणापि भवत्येव व्युत्पत्तिः 'अस्माच्छब्दादयमर्थः प्रतिपत्तव्यः इति । कार्योपदेश एवासौ इति चेत् ? तादृशानामक्षराणामश्रवणात् । अस्येदं नामेति हि श्रूयते नास्मादयं प्रतिपत्तव्य इति । अस्येदं नामेत्येषामेवाक्षराणामेषोऽर्थ इति चेद् ? न । अपदार्थस्य वाक्यार्थत्वायोगात् । न चैवं कल्पयितुमपि शक्यते, अस्येदं नामेत्येतावतैव च तत्प्रतिपत्तिसिद्धेः प्रतिपत्तिकर्त्तव्यताविधानस्य निष्प्रयोजनत्वात् । कार्यपरादपि शब्दाद् व्युत्पत्तिर्भवन्ती न वाक्यार्थमात्रपर्यवसायिनी भवति किन्त्वेकैकपदादावापोद्वापद्वारकपदार्थपर्यन्ता सा भवति । पदार्थव्युत्पत्तिसंस्कृतमतेश्च अभिनवकविविरचितवर्त्तमानापदेशश्लोकश्रवणेऽपि वाक्यार्थप्रतीतिर्दृश्यत एवेति नाव्युत्पत्तिकृतमप्रामाण्यम् । न चासौ भूतार्थप्रतिपादकशब्दजनिता प्रतीतिर्बाध्यते सन्दिग्धा वा । तेन प्रत्यक्षादिप्रमाणान्तरकरणकप्रतीतिवत् प्रमाणफलमेव सा भवितुमर्हति ।

यत्पुनरभ्यधायि कार्येऽर्थे प्रमाणान्तरनिरपेक्षतया प्रमाणं भवति शब्दः, न सिद्धेऽर्थे,प्रमाणान्तरसापेक्षत्वादिति, तदसत् । प्रवर्त्तयितुमेव न शक्नोति इत्यवो-

---

प्रतिपत्तिकर्तव्यताविधानस्य निष्फलत्वादिति । यथा भुजौ प्रवृत्तस्तृप्तिं प्रति न नियुज्यते स्वत एव भावादेवं शब्दश्रवणादेव प्रतिपत्तेः सिद्धत्वात् 'प्रतिपत्तिं कुरु' इति प्रतिपत्तिकर्तव्यताविधानं निष्फलम् ।

चाम, वक्ष्यामश्च वाक्यार्थचिन्तायामपि। प्रमाणान्तरसापेक्षत्वं तस्य प्रत्युत प्रामाण्यमावहति। किञ्चेदं सापेक्षत्वमिति वक्तव्यम्। किं सिद्धार्थाभिधायिनः शब्दस्योत्पत्तावेव प्रमाणान्तरापेक्षत्वम्, उत तद्विषयस्य प्रमाणान्तरपरिच्छेदयोग्यत्वमित्युभयथातिप्रसङ्गः। उत्पत्तौ प्रमाणान्तरसव्यपेक्षतया यच्चाप्रामाण्यं वर्ण्यते? हन्त हतमनुमानम्, तस्योत्पत्तौ प्रत्यक्षादिसापेक्षत्वात्। वर्णितश्च तत्पूर्वकं त्रिविधमनुमानमिति। तद्विषयस्य प्रमाणान्तरग्रहणयोग्यतायान्तु तदप्रामाण्ये प्रत्यक्षादीनां सर्वेषामप्रामाण्यं प्राप्नोति, प्रमाणसंप्लवस्य प्राक् प्रतिपादितत्वात्। किञ्च लौकिकेषु वाक्येषु 'अधीष्व' 'गां बधान' 'ग्रामं गच्छे'त्येवमादिष्वन्वयव्यतिरेकाभ्यां हिताहितप्राप्तिपरिहारसाधनसामर्थ्यावगमेन प्रवृत्तिसिद्धेः विनियोगनिष्ठ एव विधिर्भवति। अप्रवृत्तप्रवर्त्तनात्मकनिरपेक्षनिजव्यापारवैधुर्यात् कार्यपरत्वानुपपत्तेः अनुवादमात्रं विधिवचनमि'ति कार्यार्थप्रामाण्यवादिनां सर्वमेव लौकिकं वाक्यमप्रमाणं स्यात्।

ये तु भूतार्थवादिषु प्रवृत्तिनिवृत्तिकारिषु विधिनिषेधौ कल्पयन्ति ते नितरामृजवः। श्रूयमाणोऽपि विधिरनुवादीभवति यत्र तत्राश्रुतः कल्पयितव्य इति किमन्यदेतत् परमार्जवम्। प्रवृत्तौ तु तत्र विधिरप्रयोजक एव, अन्वयव्यतिरेकाभ्यां पुरुषार्थसाधनसामर्थ्यावगमात् पुरुषप्रत्ययाद् वा लोकेषु प्रवृत्तिसिद्धेः, तत्रैतत् स्यात्। लौकिकवाक्यानां विवक्षापरत्वान्न कार्यार्थत्वम्।

किञ्च लौकिकेष्विति। अत्र किञ्च लौकिकेष्विति आरभ्य अनुवादमात्रं विधिवचनमिति एवंवदतां कार्यप्रामाण्यवादिनामिति समन्वयः। **हिताहितेति**। हिताहितप्राप्तिपरिहारयोर्यत्साधनं सिद्धिस्तत्र सामर्थ्यमवगत्य ग्रामगमनादेस्तत्र ग्रामगमनादौ प्रवृत्तेः। **विनियोगनिष्ठ एव**। 'ग्रामं गच्छ ग्रामगमनाद्धितं भवति' इति हितप्राप्तिग्रामगमनयोर्यः साध्यसाधनसम्बन्धलक्षणो विनियोगस्तन्निष्ठ इति। **अनुवादमात्रमिति**। प्रवर्तनाभिधानद्वारेण हि प्रवृत्तौ तात्पर्यं लिङादेः, सा चान्यतः सुखसाधनत्वावगमनादेर्वा प्राप्ता तामसावनुवदति नापूर्वां विदधाति।

ये तु भूतार्थवादिष्विति। 'निधिमानयं प्रदेशः' 'प्रतिरोधकवानयमध्वा' इत्यादिषु 'गृहाण' 'मा गमः' इत्यादि कल्पयन्ति। **तत्राश्रुतः कल्पयितव्य** इति कल्पयित्वाप्यनुवादीकर्तव्यः, तद् वरमकल्पनैवेत्यभिप्रायः। न च कल्पनामपि विना काचित् क्षतिरित्याह **प्रवृत्तौ त्विति**।

अपि च पौरुषेयाद् वचनादेवमयं पुरुषो वेदेति भवति प्रत्ययो नैवमर्थप्रतीतिः। वैदिकानि पुनरपौरुषेयतया कार्यपराण्येव वाक्यानीति, एतदपि न पेशलम्। अपौरुषेयस्य वचसः प्रतिक्षिप्तत्वात्, वेदेऽपि कर्तुरीश्वरस्य साधितत्वात्। न च पुरुषवचनमपि विवक्षापरमिति दर्शितम्। तथा हि न विवक्षा वाक्यार्थो देवदत्त गामभ्याज कृष्णां दण्डेनेति पदग्रामे विवक्षावाचिनः पदस्याश्रवणात्, अपदार्थस्य वाक्यार्थत्वानुपपत्तेः। न च विषभक्षणवाक्यस्येव परगृहे भोजननिवृत्तौ पौरुषेयवचसो विवक्षायां तात्पर्यशक्तिरपि प्रभवति। न हि सर्वात्मनाभिधात्रीं शक्तिमवधीर्यैव तात्पर्यशक्तिः प्रसरतीति न विवक्षापरत्वम्। कथं तर्हि पुरुषवचनादुच्चारिताद् विवक्षावगम इति चेद्, अनुमानादिति ब्रूमः। कार्यत्वात् पदरचनायाः पुरुषेच्छापूर्वकत्वमनुमीयते। अर्थावगमपुरःसरञ्च पुरुषवचनाद् विवक्षानुमानमेवमयं वेद एवमयं विवक्षतीति। अर्थोपरागरहितस्य विवक्षामात्रस्य जीवतां निसर्गत एव सिद्धेः। अयमर्थो विवक्षित इत्यर्थोपरज्यमाना तु विवक्षा न शक्या अर्थेऽनवगतेऽवगन्तुम्। अर्थश्चेत् प्रथममवगतो वाक्यान्न तर्हि तद्विवक्षापरम्, अर्थपरमेव भवितुमर्हति। लोकवाक्यानां विवक्षापरत्वे बाह्येऽर्थे सम्बन्धग्रहणासम्भवाद् वेदादपि वाक्यार्थावगमो न स्यादित्यलं प्रसङ्गेन। तस्मान्न कार्यपरत्वेनैव शब्दस्य प्रामाण्यम्।

यत्पुनरभाणि, नाख्यातशून्यं वाक्यं प्रयोगार्हम्, तेन विना नैराकाङ्क्ष्यानुपपत्तेः। आख्यातस्य च भव्यरूपोऽर्थो, न नाम्ना इव भूतः, भूतभव्यसमुच्चारणे च भूतं भव्यायोपदिश्यते इति सर्वत्र कार्यपरत्वम्, तदपि न साम्प्रतम्। पुत्रस्ते जातः कन्या ते गर्भिणीति सुखदुःखकारिणामनुपदिष्टप्रवृत्तिकानामनाख्यातानामपि वाक्यानां लोके प्राचुर्येण प्रयुज्यमानत्वात्।

अथ सुखी भव दुःखी भवेति तत्र कार्यपरत्वं व्याख्यायते, तदपि न युक्तम्। ईदृशानामक्षराणामश्रवणात्, कल्पनायाश्च निष्फलत्वात्। न हि भवेत्युपदेशादसौ सुखी भवति सुखीभवितुं वा क्वचित् प्रवर्तते, उपाये पूर्वमेव प्रवृत्तत्वात्, उपेये च

एवमयं पुरुषो वेदेति। एवमस्य ज्ञानमस्तीत्यर्थः। **न हि सर्वात्मनाभिधात्रीमिति।** पदानां हि पदार्थेऽभिधात्रीः शक्तिः, पदार्थसंसर्गात्मके वाक्यार्थे तात्पर्यशक्तिः, पदार्थाभावे च कथं तत्संसर्गात्मकवाक्यार्थलाभः।

उपाये पूर्वमेवेति। पुत्रजननाद् यदुत्पद्यते सुखं तस्य पुत्रजननात्मको व्यापार

प्रवृत्त्यनुपपत्तेः। किन्तु पुत्रजन्मश्रवणत एवासौ सुखीभवति। तथा कस्यचिद्दुत्तरीयावगुण्ठिततनोर्निद्रायमाणस्य क्वचित् केनचित् केलिना रज्जुवेष्ठितवपुषः पश्चात् प्रबोधसमये सहसा सरीसृपवलितमात्मानं मन्यमानस्य भयादनुन्मीलितचक्षुषः केनचित् प्रयुज्यमानं रज्ज्वा वेष्टितोऽसीति वचः श्रवणपथमवतरति तत् सिद्धार्थबोधकमपि प्रमाणम्। न च तत्र मा भैषीरिति प्रयोगकल्पनाप्रयोजनम्। रज्जुवेष्टनप्रत्ययादेव भयनिवृत्तेः सिद्धत्वात्। तथा च विषमविषधराधिष्ठितोऽयमध्वा निधियुक्तोऽयं भूभाग इति भूतार्थख्यापकं वचो दृश्यते न च तदप्रमाणम्। न च तत्र मा गास्त्वमनेनाध्वना, निधिं गृहाणेति विधिनिषेधपरत्वं युक्तम्, एषां पदानामश्रवणात्।

ननु वक्तुः प्रेक्षापूर्वकारितया निष्प्रयोजनवचनानुच्चारादवश्यं मा गा गृहाणेति कार्याक्षराणि हृदये परिस्फुरन्ति कथञ्चिदालस्यादिना नोच्चारितानीति, नैतद्युक्तम्। प्रेक्षापूर्वकारित्वादेव वक्तुः यथावस्थितवस्तुस्वरूपमात्रख्यापकवचनोच्चारणमेव युक्तम्, अर्थात् प्रवृत्तिनिवृत्त्योः सिद्धत्वात्, पराभिप्रायस्य चानवस्थितत्वेन नियतोपदेशानुपपत्तेः, सर्पबन्धजीविनो हि सपन्नगः पन्था उपादेयतयावभाति, वीतरागस्य च ब्रह्मविदो वित्तैषणाव्युत्थितस्य गोविन्दस्वामिन इव निधिरपि हेयतया परिस्फुरतीति कस्मै किमुपदिश्यताम्। वस्तुस्वरूपे तु कथिते यथाहृदयवर्त्तिरागद्वेषानुवर्तनेन कश्चित् तत्र प्रवर्ततां कश्चित् ततो निवर्त्ततामिति भूतार्थकथनमेव लोके प्रेक्षावान् करोति, न विधिनिषेधौ प्रयोक्तुमर्हतीति।

येऽपि ब्रुवते सर्वत्र प्रतिपत्तिकर्त्तव्यताविधानमेवादौ वेदितव्यम्, अविधिकस्य वाक्यस्य प्रयोगानर्हत्वादिति, तेऽपि न साधु बुध्यन्ते। विदितशब्दार्थसम्बन्धस्य पुंसः शब्दश्रवणे सति प्रतिपत्तेः स्वतः सिद्धत्वेनानुपदेश्यत्वात्। असिद्धायां वा

उपायः।

वित्तैषणाव्युत्थितस्य धनाभिलाषनिरपेक्षेण वर्तमानस्य। गोविन्दस्वामिन इव इति। भगवान् गोविन्दस्वामी हि धनाहरणाय पुरा किं किं न व्यधत्त तथापि कृतयत्नातिशयो न कामपि यदा धनमात्रामाससाद तदा कालेन महद्वैराग्यमस्य प्रादुरभूत्, तथाविरक्तश्च कदाचिन्निधिमुपलभ्य तदुपरि मूत्रपुरीषोत्सर्गमकरोदिति श्रूयते।

प्रतिपत्तौ प्रतिपत्तिकर्त्तव्यतापि कुतः प्रतीयेत ?

ननु कार्यार्थप्रतिपादकं पदमन्तरेण पदान्तराणि संसर्गमेव न भजन्ते, कार्याकाङ्क्षानिबन्धनत्वात् सम्बन्धस्य, तेन सर्वत्र कार्यपरत्वमुच्यते ? नैष नियमः कार्याकाङ्क्षागर्भ एव सर्वत्र सम्बन्ध इति, वर्त्तमानापदेशकानामपि प्रेक्षापूर्वकारिवाक्यानामितरेतरसंसृष्टार्थप्रतीतिजनकत्वदर्शनात् । न हि दशदाडिमादिवाक्यसदृंशि वर्त्तमानापदेशीनि वचांसि भवन्ति । कार्यनिबन्धने हि सम्बन्धे तद्रहितानामनन्वय एव स्यात् । दर्शितश्चान्वयः पूर्वोदाहृतवाक्यानाम् । अपि च लिङन्तपदयुक्तेऽपि वाक्ये पदार्थान्तरानां परस्परमन्वयो दृश्यत एव । स कथं समर्थयिष्यते ? कार्याकाङ्क्षानिबन्धने हि, कार्ये सर्वेषामन्वयो न परस्परमिति ।

अथ ब्रूयात् सर्वथा कार्यसम्बन्धे प्रथममवगते सति पश्चादरुणैकहायनीन्यायेन वाक्यीयः परस्परान्वयोऽपि सेत्स्यतीति ? हन्त ! तर्हि परस्परान्वये कार्याकाङ्क्षा कारणम् । तर्ह्यरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीति द्रव्यगुणयोर्विभक्त्या सोमक्रयं प्रति युक्तत्वात् प्रथमं क्रयसम्बन्ध एव तयोर्गम्यते । यश्च पाश्चात्यः परस्परान्वयस्तत्र कार्यपारतन्त्र्यापादिका विभक्तिरकारणम्, असत्यामपि तस्यां शुक्लः पट इति सामानाधिकरण्यप्रयोगेणान्वयसिद्धेः । तस्मात् कार्यैक्यनिबन्धनोऽन्वय इति नियमो य उच्यते स कल्पनामात्रप्रभवो न प्रामाणव्यवस्थागम्य इति ।

यत्तु भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इत्ययमपि न सार्वत्रिको नियमो विपर्ययस्यापि व्रीहीन् प्रोक्षतीत्यादौ दर्शनाद् । अलं वा दर्शपूर्णमासप्रकरणनिवेशानुज्झितकार्यमुखप्रेक्षणदैन्येन व्रीहिप्रोक्षणोदाहरणेन ।

प्रतिपत्तिकर्तव्यतापि कुत इति । प्रतिपत्तिं कुर्वित्युपदिश्यते, सा चेच्छब्दाद्भवति तदा कर्तुं शक्या ।

पदार्थान्तराणाम् । शुक्लैर्व्रीहिभिर्यजेतेत्यादिषु द्रव्यगुणादीनां वाक्यीयः परस्परसम्बन्धः साकाङ्क्षाणां सन्निधानकृतः ।

विभक्त्या तृतीयया । **कार्यपारतन्त्र्यापादिका विभक्तिरिति** तृतीयया हि द्रव्यगुणयोः क्रयकार्यं प्रति पारतन्त्र्यं प्रतिपादितम्, अतस्तत्रैवोपक्षीणासौ । **व्रीहीन् प्रोक्षतीति** । प्रोक्षणस्य भव्यस्यापि व्रीह्यर्थत्वात् । ननु दर्शपूर्णमासप्रकरणादपरित्यक्तपारार्थ्यानामेव व्रीहीणामसौ संस्कार इत्याशङ्क्याह **अलं वेति** ।

आत्मा ज्ञातव्य इति तु सिद्धपर एव साध्योपदेशः। नह्यत्र कर्म किञ्चित् साध्यं प्रधानमुपदिश्यतेऽधिकाराश्रवणात्। न च विश्वजिदादिवदधिकारकल्पना काचिदुपदिश्यते। न च कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्येति वक्ष्यामः। अर्थवादस्त्वर्थवाद एव नाधिकारिकल्पनायै प्रभवति। तस्मादपहतपाप्मादिगुणयुक्तात्मस्वरूपनिष्ठत्वमेव तत्रावतिष्ठते, तस्मिन्नवगते पुरुषान्तरप्रार्थनादैन्यानुपपत्तेः। स एव ह्युत्तमः पुरुषार्थः, स च सिद्ध एव न साध्यः, यत्नस्तु कृतबुद्धीनामविद्योपरमायैवेति व्याचक्षते।

ज्ञातव्य इति प्रतिपत्तिकर्त्तव्यतापरोऽयं विधिरिति चेन्न। प्रतिपत्तेः प्रमिति-

---

कर्म किञ्चित्साध्यं प्रधानमिति। दर्शपूर्णमासप्रधानकर्मोपदेशात् तादर्थ्यं व्रीह्यादीनां नैवमत्र ज्ञानमेव प्रधानं कर्म भविष्यति। तत्र साध्यगुणत्वेनैवात्मनो द्रव्यस्य सम्बन्ध इति चेन्न। साधिकारं हि प्रधानं कर्म भवति, न चात्राधिकारः श्रूयते। न चाधिकारकल्पना भवति; सा ह्यनुष्ठानाय क्रियते, अनुष्ठानञ्च वक्ष्यमाणनीत्यापि सम्भवतीत्यभिप्रायः। ननु कर्मप्रवृत्तिसिद्ध्यर्थं नित्यत्वेनात्मनो ज्ञानोपदेशात् पारार्थ्यमेव, तन्नेत्याह **न च कर्मप्रवृत्तीति** 'अथात्मा ज्ञातव्यो निदिध्यासितव्यः' इत्याद्युपक्रम्य 'एवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न स पुनरावर्तते' इत्यादेरर्थवादादपुनरावृत्तिकामोऽधिकारी लभ्यते। तन्नेत्याह **अर्थवादस्त्विति। आत्मस्वरूपनिष्ठत्वमेवेति।** आत्मा ज्ञातव्यः, अपहतपाप्मत्वादिगुणवत आत्मनः साक्षात्कारो यथा भवति तथा कुर्यात्, न पुनस्तज्ज्ञानेनान्यदिति। **तस्मादपहतपाप्मादीति।** "एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" इत्यादिग्रहणेन श्रुतिपरिग्रहः। यदि न तेनान्यत् साधयेत् तर्हि तत्स्वरूपमात्रप्रतिपत्तौ निष्फलायां किमर्थं प्रवर्तेतेत्याह—**तस्मिन्नवगत** इति। **स एव ह्युत्तमः पुरुषार्थः**, तथाविधावस्थाया एव कैवल्यशब्दवाच्यत्वात्। यदि तादृगसौ तर्हि स्थित एव तेन रूपेणेति किमर्थं तदुपासनादियत्नविशेष इत्याह **यत्नस्त्विति।**

प्रतिपत्तिकर्तव्यतापरोऽयमिति। अयमर्थः। 'आत्मा ज्ञातव्यः' इति नायं विधिरपहतपाप्मत्वादिविशिष्टात्मस्वरूपप्रतिपादनपरः, किन्त्वेवंविधात्मप्रतिपत्तिरत्र कर्तव्यतयोपदिश्यते, अतः प्रतिपत्तिविषयो यो नियोगस्तत्रैवास्य तात्पर्यम्, उभयपरत्वे

त्वात् प्रमितेश्च प्रमेयनिष्ठत्वाज्ज्ञातव्य इति कर्मणि चायं कृत्यप्रत्ययनिर्देशात् कर्मणश्चेप्सिततमत्वात् तत्परत्वमेवागम्यते। विधिस्त्वत्र प्रसरन् क्व प्रसरेत्? फलं तावद्विधेर्न विषय एव। यथाऽऽह भट्टः 'फलांशे भावनायाश्च प्रत्ययो न विधायकः' इति। उपायस्तु ज्ञानमेव, ज्ञानञ्च ज्ञेयनिष्ठमित्युक्तम्।

यस्तु यमनियमादिप्रतिपत्तीतिकर्त्तव्यताप्रकारोपदेशः सोऽपि तथाविधात्मरूपाधिगतये सत्यासत्यस्वभावनामरूपप्रपञ्चविलापनद्वारा तत्रोपयुज्यत इति सिद्धतन्त्रमेव साध्यम्।

तिष्ठतु वा यमनियमप्राणायामप्रत्याहारधारणाध्यात्मज्ञानयोगोतिकर्त्तव्य-

---

वाक्यभेदप्रसङ्गादिति। **प्रमितेश्च प्रमेयनिष्ठत्वादिति**। प्रमेयसाक्षात्कारं विना प्रतिपत्तिकर्तव्यताया एवासम्पत्तेरित्यर्थः। **कर्मणि चायं कृत्यप्रत्ययेति**। भावनाकर्मणि यागेन स्वर्गं भावयेद्यथा तथा श्रुतेनात्मानं साक्षात्कुर्यादिति न पुनर्विधिकर्मणि विधेये सोमेन यष्टव्यमितिवत्। विष्णुरुपांशु यष्टव्यः प्रजापतिरुपांशु यष्टव्य इति वा यथा कृत्यप्रत्ययः उपांशुयाजस्तुत्यर्थत्वेन तथेहात्र साक्षात् तस्यैव ज्ञानेन प्रेप्सितत्वात्। **फलं तावद्विधेर्न विषय एव**। स्वत एव तत्र प्रवृत्तत्वात्, तथा चाह भाष्यकारः "वेदैवासौ मयैतत्कर्तव्यमुपायन्तु न वेद" इति। फलांशे भावनायाश्चेत्यस्य शेषः "वक्ष्यते जैमिनिश्चाह तस्य लिप्सार्थलक्षणा' इति।····(अत्र टीकाग्रन्थस्य स्पष्टाक्षरत्वम् ज्ञेयम्) फलांश एव न विधायकः करणेतिकर्तव्यतांशयोस्तु विधायक एवेति।

सत्यासत्यस्वभावेति। तथाहि यथा घटशरावोदञ्चनप्रभृतीनि नानारूपाणि अभिधानाभिधेयानि प्रपञ्चतो भेदव्यवहाररूपतया स्थितानि मृदपेक्षया असत्यानि, तेषामुपसंहारे केवलं मृद्रूपताप्रतिभासात्। सापि द्रव्यरूपतया असत्येव, मृद्रूपतोपसंहारे केवलद्रव्यरूपताप्रतिभासात्ः एवं सत्तापेक्षया द्रव्यरूपताप्यसत्येव। इत्येवञ्च सामान्यरूपः सन्मात्रं ब्रह्म इत्यस्तमितज्ञातृज्ञेय···(अत्रत्यष्टीका ग्रन्थोनोपलब्धः)।

इत्यत्र पुरुषसंस्कारकत्वेनोपयोगात्। तथा च श्रुतिः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, ब्रह्मचर्येण तपसा श्रद्धया यज्ञेन दानेनानाशकेन वा" इति। यज्ञेनेति यज्ञस्य विविदिषायामात्मज्ञानेऽङ्गत्वं प्रदर्शयति। तथा 'येन केन च यजेतापि दर्विहोमेनापहतपाप्मैव भवति' इति च। तथा च व्यासः।

तावद्विधिः । अन्येऽपि ज्योतिष्टोमादिविधयस्तन्निष्ठा एवेति वेदान्तिनः । साध्यस्य सर्वस्य क्षयित्वेनानुपादेयत्वात्, सिद्धस्य ब्रह्मण एवानाद्यविद्यातीतस्यानपायिनः पुरुषार्थत्वात्, स्तोकस्तोकप्रपञ्चविलापनद्वारेणोत्तमाधिकारयोग्यत्वापादनाद्, ब्रह्मप्राप्त्यौपयिका एव सर्वविधयः । तथा च मनुः

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥

तदेवं सिद्ध एवार्थे वेदस्याहुः प्रमाणताम् ।
सर्वस्तावद्विषयो बहु वक्तव्यः प्रमाणता तु गिराम् ।×

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ।
आरुरुक्षोर्मुनेर्योगं कर्म कारणमिष्यते ॥ इति ॥

स्तोकस्तोकप्रपञ्चेत्यादिना तन्निष्ठत्वमेव तत्र प्रदर्शयितुमाह । तत्र प्रपञ्चप्रविलयं केचिदेवमाहुः । तथा च ज्योतिष्टोमेन यजेतेत्यतस्तावच्छरीरव्यतिरिक्तो नित्य आत्मास्तीति प्रतीयते तेन शरीरेण स्वर्गस्याप्तुमशक्यत्वात् । अतो देह एवात्मेति यः प्रपञ्चस्तस्य प्रविलयः । तथा कलञ्जप्रतिषेधविधिरपि रागतो या प्रवृत्तिस्तस्याः प्रविलयः । अन्यास्वपि कामचोदनासु फलार्थं या प्रवृत्तिस्तस्याः प्रविलयनमुत्तमफलार्थत्वेन, यानि प्रवृत्त्यन्तराणि तेषामपि प्रविलय इति प्रासङ्गिकफलप्रदर्शनद्वारेण च प्रदर्शित एव प्रपञ्चप्रविलय इति । **उत्तमाधिकारयोग्यत्वापादनादिति** । यथा यथा हि प्राङ्नीत्या कर्मानुष्ठानद्वारेण परिपक्वकषायता भवति तथा तथा आत्मसाक्षात्कारयोग्यतास्य जायत इति ।

स्वाध्यायेन व्रतैरिति । स्वाध्यायेनोपनयनाङ्गभूतेन प्रणवव्याहृतिगायत्र्यादिपाठेन । व्रतैर्वेदग्रहणार्थैरुपनयनोत्तरकालं सावित्रादिभिः । **त्रैविद्येन** त्रिवेदाध्ययनेन । **इज्यया** गुरुशुश्रूषया । **सुतै**र्धर्मप्रजोत्पत्त्या । **महायज्ञैः** पञ्चभिः स्मार्तैर्भूतयज्ञादिभिः । **यज्ञैश्च** ज्योतिष्टोमादिभिः श्रौतैः । **ब्राह्मीयं क्रियते** ब्रह्मप्राप्तियोग्या क्रियते । ब्रह्मप्राप्तिपर्यवसायिनः स्वाध्यायादयः । ब्रह्म चात्मा सिद्धस्वभाव एवेति । ननु ब्रह्मणः सिद्धस्वभावस्य प्रमाणान्तरग्रहणयोग्यत्वात् तत्परत्वे वेदान्तानामनुवादकत्वं प्राप्तम् । तत्स्वरूपस्य च स्वाध्यायाध्ययनादेवावगतेर्नैष्फल्यमित्याद्याशङ्क्याह **आस्तां चायं**

× श्लोकरूपेण मुद्रितापीयं पंक्तिश्छन्दोहीनत्वादस्माभिः गद्यत्वेनात्रमुद्रितेति मन्तव्यम् ।

किंतन्त्रता भवति तस्य तयोरितीयं
चर्चा चिराय न महत्युपयुज्यते नः ।
सन्तोषवृत्तिमवलम्ब्य वयं हि वेद-
प्रामाण्यमात्रकथनाय गृहीतयत्नाः ॥
प्रामाण्यसाधनविधावुपयोगि यच्च
वक्तव्यमत्र तदवादि यथोपयोगम् ।
वक्तव्यमिष्टमपि किञ्चिदिहाभिदध्म-
स्तच्छ्रूयतां यदि न धीः परिखिद्यते वः ॥

इति श्रीजयन्तभट्टकृतौ न्यायमञ्जर्यां चतुर्थमाह्निकम् ।

विषय इति । **किंतन्त्रता तस्येति** । तयोः सिद्धसाध्ययोर्मध्यात् तस्य शब्दस्य किंतन्त्रता किंपरत्वमिति । ननु अधुनैव साधितं सिद्धपरत्वमिति, तत्र प्रागुक्ताभिप्रायेणैवाह **महतीयं चर्चा न चिराय** न कदाचिदस्माकमुपयुज्यते इत्यर्थ इति ।

भट्टश्रीशङ्करात्मजश्रीचक्रधरकृते
न्यायमञ्जरीग्रन्थिभङ्गे चतुर्थमाह्निकम् ॥

परिशिष्टम् १

(विशिष्टनामसूची ।)

अंशनिष्कर्षपक्षे १५०।१७
अक्षपादः ८।२०, १०।१४, ११।५ ९९।१६, १४१।१
अक्षपादमुनिना १६४।८
अख्यातिपक्षे २५५।१२
अग्निचयनम् ४०२।२३
अग्निनिर्मथनम् ३५८।१८
अग्निविहरणम् ४१०।२
अग्नीधः ४१०।२५
अतिमुक्तकुसुमे ३१६।१८
अतीकाशाः (धूमनिर्गमनविवरम्) ४०७।१४-१५
अत्राह २९५।१२
अत्राहुः १८७।१०, १८९।४
अथर्ववेदे ३५६।१६, ३६९।९
अथर्वा ३५८।६
अथर्वाङ्गिरस- ३५७।२५
अध्यासपक्षः १४७।२४
अध्वव्यङ्ग्यकालवादी २०३।२५
अनवप्रजा (गौः) ४०४।१८
अनारम्भवादपक्षः ३६५।३
अनुपलब्धयः ८८।१६-८९।७
अनुपलब्धिविदः ८९।१६
अनुमेयबाह्यार्थवादी २६।१२
अनुमेयमारुतपक्षे ३०२।१४
अनुवाक्या ३३७।१५
अनुबन्ध्या (यागः) ३६१।१६
अनेकप्रकारपुरुषातिशयवादिनाम् ४०६।१०
अनेकेश्वरवादः ३३६।५
अन्तर्व्याप्तिः १६५।१९, १६६।१८-१९, १६६।२०
अन्यत्राप्युक्तम् ६।६
अन्ये (न्या० मं० टीकाकारभेदः) ४।२४
(वैभाषिकाः) २४।१५
(अन्यथापठन्तः) ३८।२६
(रुचिकारादयः?) ५१।१४
(आचार्याः) २००।१६, ६६।२, ९९।३, १३२।२१, १८१।१६, १८७।२, २१७।१०, २७७।१४, २८१।१, ३१५।१, ३६६।१, ३७२।६, ३८२।१३, ३८३।२३, ३८५।८, ३९४।२
अन्ये तु १३६।४
(वेदान्तवादिनः) १४८।१६
अन्येनाप्युक्तम् २७०।१३-१४, ३७८।६
अन्यैः २७६।२०
अपरः १२०।१२, २१८।३, २७३।५

अपर आह १३४।९, ३११।१०, ३२३।३
अपरे २३।४, ३५।४, १८१।९, १८२।४ २८१।५, ३७२।८, ३८६।५
(शाक्याः) ३६।१३
(प्राभाकराः) १९४।१९
अपरैः १५२।१६
अपूपः ४०९।२७
अभिव्यक्तिपक्षे २६७।१-२, ३०२।११, ३०३।१२, ३१६।५, ३१८।१३, ३२३।१७
अभिधात्रींशक्तिम् ४२२।७
अभिनवालरकपटः ३३४।१७
अभिषेचनीयेष्टिः ३५७।२०
अभ्रिः (वेद्यर्थं मृत्खननोपकरणम्) ४१२।१९
अरणिनिर्मथनम् ३९२।२४
अरणिषु ३५८।१९
अरुणैकहायनीन्यायेन ४२४।१०
अर्चटः (हेतु वि० टीकाकारः) १५२।२५
अर्थदृष्टता- २७।९, ३१।८१
अर्हत्कपिलसुगत- ३८७।१३
अर्हन् ३८५।११
अर्हन्मत- ३०४।११
अवगूरणम् (ताडनार्थं दण्डोद्यमः, अवज्ञामात्रं वा) ४०५।२१
अवग्रहे ३९४।८९
अशुचिभक्षणागम्यागमनादिनिर्विकल्पदीक्षा ३८१।५-६
अश्वत्थामा ३७९।१८
अस्मत्पक्षे १११।११
अस्मन्मतानुप्रवेशः ११२।७, ३१८।१५
अस्मन्मते १०५।१६, ४०३।५
अस्माकम् ४०४।६, ४१२।१२
अस्माभिः (जयन्तेन) २०।२, ९३।१४, ३०३।७ ३०८।८
अहर्गण- (यागः) ३६१।१७
आकारार्पणपक्ष- ९३।१३
आगमः २८३।१०
आगमविदः २०५।१९
आगमान्तरवादिभिः २०१।३
आचार्यः (अक्षपादः) ११।७
(दिङ्नागः) ९४।२१, २२
आचार्याः (रुचिकारप्रभृतयः) १०५।११, १२१।१०, १२५।६, १३०।१२
आचार्यमतम् २००।२६
आचार्यमतानि १३५।५
आचार्यः १३५।२४
आचार्यैः (रुचिकारादिभिः) १३२।७
आटविकः २०५।२२
आत्रेयः (आचार्यः) ४०९।१६
आध्वर्यवम् ३३७।१

आनन्दवर्धनाचार्यः ७६।१३
आन्वीक्षिकी ६।२१
आयुर्वेदः ३९३।१२
आरण्यकः २०५।२३
आर्यदेशः ३००।२१
आर्याः २६६।२
आर्यावर्त- ३५७।४
आर्यैः ३६८।६
आर्हताः ३९८।१४
आर्हतास्त्वाहुः ३०१।७
आवापोद्वाप- २२४।६ २८१।३२, ४२०।१६
आह ३४।२४, ४६।१२, ६५।१८ ६५।२३, ६२।१३
(बौद्धः) २०१।६, १६९।२
(सौगतः) ११०।२३, १४२।२, १४२।११
(न्या. सू. कारः) २.६।४
(वैशेषिकः) २२०।५
(भर्तृहरिः) ७८।१९, ७९।६ ९७।२५
आहुः (दिङ्नागः) ४७।१४
(मीमांसकाः) ८३।२०
२२८।१८, २३६। ८, २६७।२१, २८३।२३, ३१०।३, ३००।१६, ३८२।४, ४५।१४।
(पुष्कराक्षपादाः) ३७८।२२, ७१।१७, १६१।२४, २०७।२२, २१७।९, ३१४।६, ३३१।२६, ३३२।२३, ३३९।२४।
इतरः ३८३।२३
इतिहासपुराणम् ३५७।१५-२६
इतिहासपुराणानि ३५७।९
इत्याहुः ५८।१६
इत्युक्तम् ८४।९
इन्द्रियपरीक्षा ११४।२०-२१
ईश्वरः ४०४।९
ईश्वरकृष्णः (सांख्यकारिकाकारः) १६३।१५
उक्तम् ७५।१४, २०४।२५, २८३।२४, २९३।१५, २६६।१२, ३२३।३०, ३०६।११
उक्तं तैः १८१।२३
उक्तं हि ३८।१६, ३७१।१०
उक्तञ्च १४६।१५, २२२।२, २३३।२५, २३.।५, ३१२।१४, ३७५।३, ३७७।२५, ३८४।१६, ३८४।१६, २६६।२१।
उत्सन्नशाखा ३७२।८
उद्दालकः (ऋषिः) ३३२।२३
उद्द्योतकरविवृतिकृतः १०५।२५
उद्द्योतकरेण ३२५।२२
उद्भटः (चार्वाकधूर्त्तः) (लोकायतसू. विवृतिकारः) १००।१९-२०
उद्भिद् (कुद्दालादिः) ४१५।२५
उन्दुरवैरिणः १५७।२
उपभद्र- ४०७।१४
उपमन्युना ३७९।२२

उपलम्भप्रत्यक्षतापूर्वकार्थप्रत्यक्षवादिनः (दिङ्नागस्य) ४७।१८-१९
उपवर्षः (मी. सू.-वृत्तिकारः) १५४।२४
उपांशुयाजस्तुतिः ४२६।१३
उम्बेकादिदृष्ट्या ६६।१५
उर्वशीवियोगे ३३३।१५
ऋग्यजुःसाम- ३५७।५
एकात्मवादः ३०१।५
एके (वैशेषिकाः) ३०६।१०
एके ६५।१० ३१२।१८, ३१२।२०
एकेन्द्रियवादः १२६।१८
एतेन २३२।१
औद्गात्रम् ३३७।१
औद्दालकिरारुणिः ३६३।९-१०
औषधविधिः ३९३।११
कठ- ३५९।२६
कठेन ३३७।२४
कणभोजिना ३२१।१९
कणव्रतः १७३।१४
कणव्रतमते ११४।६
कणादवचनम् ३२३।७
कणादसूत्रे १७३।१८
कण्टकवृकमकरविषधर- ३३।११
कपिकच्छुः ३८।२५
कपित्थजातीयः १०५।६
कपित्थादि- १०७।१०, ११०।२, ५, ७, १९, २४, १९१।१४
कपित्थादिजातीय- १०५।३, ७, १६, २१
कपित्थादौ १०५।२३, १०६।६
कपित्थालोचन- १०५।८-९
कपिल- ३८५।१२
कपिलमुनिप्रक्रियाप्रपञ्चः ४०।१५
कपिलसुगतार्हतप्रभृतिभिः ३८५।५
कपिलार्हतग्रन्थ ३९८।१९
कपूयाचरणम् ३९१।२३
करणपक्ष- ३४०।१३
करणसंस्कारपक्ष- २१७।९
करभ- २११।२०
करेणु- २११।२०
कर्मनैरपेक्ष्यपक्ष- २८६।८
कलञ्जप्रतिषेधविधि- ४२७।१४
कल्पसूत्रवाक्य- ३६५।१
कवि- ३२६।४
कशाङ्कुशप्रतोदाभिघात- ३४०।१९
कश्चित् ५६।२७, १३४।२०
कश्चिद् गुलकस्त्रिकोणः ३०७।२४
काकतालीयम् ३७।४, १६०-१४, ३९१।११
काकोदर- ३८।२६
काकोदुम्बर- ३८।१२, २५
काठक- ३३७।१३, ३५९।२६
काठकशताध्ययनब्राह्मण- ३६३।९
काणादाः ३१३।६
कानने २०६।८
कान्यकुब्ज- ३००।१४

कापिलाः ३००।१२, ३९८।१४,
कारीर्यां ३६१।११
कारीर्यादि- ३९४।८
कार्यत्वपक्ष- ३०१।१०
कार्यपक्ष- ३२३।१, ३२३।१७, ३२४।१
काष्र्णाजिनिः (आचार्यः) ४०९।१६
कालिदासः ३३१।४
कालिदासादि- ३४९।१६
कालिदासादिरचनाः ३३२।९
काव्यसमस्या ३३७।१६
काव्यसमस्यापूरण- ३३७।६
किरीटिना १०८।२५
कुट्टिनीमतम् (ग्रन्थः) ३८८।२२
कुण्डवदरयोः ३३९।१७
कुमारसम्भवम् (काव्यम्) ३२७।१०-११
कुरङ्गादौ २००।६
कुरवः ३५८।१८
कुविन्दपटयोः ३३६।१७
कुविन्दादेः ३३४।१७
कूटकार्षापण- २३४।१३, २४१।२७
कृतकपक्ष- २६७।१, ७
कृत्यारावणनाटकम् २५२।२४
कृष्णद्वैपायनादयः ३७८।३
कृष्णद्वैपायनेन ३०५।१५
कृष्णलचरुः ३८५।२
कृष्णशकुनिः (काकः) ४१५।१
कृष्णादौ ३९३।४
कृष्णाय ३७६।२२
केचन (न्या० सू० व्याख्यातृभेदः) १४।१८, १३६।६, १७५।८
केचित् ५२।१८, १४६।१, १८१।१, १६६।११, २१७।६, ३१४।२५, ३२१।१४, ३७२।६, ३८१।५, ३८३।२२, ४०५।१, ४०५।१६
(न्या० सू० व्याख्यातृभेदः) १३।२
(प्रवरादयः) ५१।१२
(प्राभाकराः) २५५।८ २५६।२४, २७६।२५, ३५६।२, ४१९।११
केचिदाहुः १८६।२
केनचित् १००।१४
केशोण्डुक २६२।७, २६२।३
केषाञ्चित् २२७।२५
केषाञ्चित् सांख्यानाम् ३००।२३
केषाञ्चिन्मते १८६।२२, ४०३।४
कैश्चित् ३६।२६, १३५।२५, १६३।११ २३२।४, २४८।१३, २६१।२४, २९५।१
कोकिलः ३४४।१०
कौलादिभ्यः ३८४।९
क्रियानिमित्तसंसर्गवादिनः ३०।४
क्रियानुमानवादः १९७।११-१२
क्षणभङ्गम् ५१।१
क्षणभङ्गनिराकृतौ १७३।३

क्षणभङ्गभङ्गे २६।३, ३७।६, ६६।७ १४५।१६
क्षणिकवादिनः ३०६।२०-२१
क्षणिकवादिमते १५२।१०
क्षत्रियजातावेव राजशब्दः ३४४।२५
क्षत्रियजातौ ३४४।२१
क्षपणकानाम् ९।११
क्षीरतक्रादिविरोध्यशन ३४७।१२
ख्यातित्रयवादिभिः २५४।८
खेचरताद्यर्थसिद्धिः ३८४।९
गर्गः ८४।११, १३
गर्ग (गोत्रः) ८०।१६, १७
गर्गत्रिरात्रब्राह्मण- ४०१।१३, २५ ४०७।१८
गर्गादेः ८५।३
गर्गाभावः ८४।११
गवल- १०६।१०
गीतज्ञानाम् ३११।२
गुणवाद- ४० ।६
गुणविधिपक्षः ४१७।४
गुरवः १०६।२५
गुरुदारगमन- ३५३।२
गृध्रराजः (सम्पातिः) १५७।२६ १५७।३
गोपथब्राह्मण- ३६१।५
गोवलीवर्दन्याय ३६४।२३
गोविन्दस्वामी ४२३।१४, २३-२५
गौतमवचन- ३६५।२-३
गौतमयमापस्तम्बसंवर्तकाठक- ३८७।१२
गौरमूलक (जयन्तस्याभिजनग्रामः) ८०।१५-१६-१७, २५ ८४।१४, ८५, ३ ३००।१४
ग्रन्थकारः (जयन्तः) १३०।१०, ४१३।१६
घूकचटकन्याय ३८०।२२
चक्रधरः (श्रीशङ्करात्मजः, ग्रन्थिभङ्गटीकाकारः) ३।१४
चतुःशरावनिर्वापेष्टिः ३६३।२०
चतुरस्रत्रिकोणवर्त्तुलत्वादि- ३०७।१२-१३
चतुर्निधन (गानभक्ति वि०) ३६४।३
चतुर्वेदाध्यायीभारद्वाजः ३६६।६
चरकादयः ३४६।११
चार्वाकः २७२।१०, ११
चार्वाकधूर्त्तः (भट्टोद्भटः) १००।८
चार्वाकवत् ३०२।७
चार्वाकाः (वराकाः) ९।१६, ४३।७, १०३।२२, २६६।५
चित्रप्रत्यये १६२।१४
छत्रादिः (शाकभेदः) ३०।१२
छान्दोग्योपनिषद् ३५७।७
जपशीधुपान- ३५३।१
जम्बु- ४१५।१
जरज्जैमिनीय- ३६८।२२
जरत्पुस्तक- ३८८।१६
जरन्नैयायिक- १३४।१
जातिवाद- ३०१।४

जातिवादनिराकरणम् ३८५।३
जात्यादिविषयनिषेधन-मनोरथैः(शाक्यैः) ५१।३
जैन- १०३।२२
जैनाः २६६।४
जैमिनिः १०।१५, ३५।१, ३५।१४ ३६५।६, ४१८।८
जैमिनिना ३५६।८, ३७३।११
जैमिनीयं सूत्रम् १६३।१०
जैमिनीयाः २१०।६
जैमिनीयानां मते ४०४।६
जैमिनीयैः १५३।३, २३१।१०
ज्ञानकाण्डे ३७०।१६
ज्ञानशृङ्खला १०८।४-५
ज्येष्ठसामगः ३६६।५
ज्येष्ठसामत्रिमधुत्रिसुपर्णानि ३६९।२२
ज्योतिःशास्त्रं २०३।१०
ज्योतिर्गणकाः २०१।१६
ज्योतिर्गणकादेः १३८।१८
त आहुः १७४।२५
तट्टीका (बृहती ?) १९५।१७
तत्रभवतां (वैशेषिकाणाम्) २९९।६
तथागताः १३५।१२
तथा चाह १५३।२३, १६७।१७
तथा चाहुः २५।१७,१४३।१७, १७७।१
तथाचोक्तम् १७५।२०, २३३।२७, ३००।१८
तथाह १२४।६
तदाह १५०।२७, २१४।९, ३७३।२
(भट्टः) ३७२।३
तदाहुः ४६।४
तदिदमुक्तम् २४०।१
तदुक्तम् १०।२२, ३५।४, ३५।९,३६।१६, ३७।३, ४४।१०, ४४।१४,४४।२३, ५५।२६,८०।१२, १११।१, ११६।१२, १४१।१५, १४२।१८, १५५।६ १६०।२४, १८८।११,१६९।२१, २२७।२३, ३२९।८, २३०।२४, २३१।३, २३६।२५, २३७।१५, २३८।३, २३९।११, २३६।११, २६०।२२, २६७।२५, २६८।२५, २७३।१८,२७४।६, २८१।२६, २८६।३, २९४।८,३२१।२२, ३३३।२५,३३८।२३, ३४४।३, ३६७।५, ३६९।१९,३७७।१७, ३८४।२०,३९२।५
तन्तुतुरीवेमशलाकाकुविन्दादि- २०१।४
तन्त्रटीका ३५६।१८

तन्त्रशुद्धिः (मीमांसा-
प्रकरणग्रन्थः) २९८।२५
तात्पर्यशक्तिः ४२२।७,८
तान्त्रिक- १८३।४
तामरस- ३४३।१२,४१५।२,
३४४।१०
तार्किककल्पना ३०२।१०
तार्किकाः (प्राभाकराः) २५४।१४
तार्किकैः १६९।३
तितउ- २६२।५
तीर्थान्तराभिहितरूपम् ४०।१८
तुरङ्ग- २११।२०
तुहिन- १०१।११
तूपरः (शृङ्गरहितः
पशुः) ४००।२५
तृतीयसवनम् ४१३।१३
ते (भिक्षवो बौद्धाः) ४३।१६
तैः (न्या० सू० व्या-
ख्यातृ भेदैः) १२।२५
तैत्तिरीये (ब्रह्मोप-
निषदि) ३५७।१६
त्रयी ९।२६
त्रिमधुः ३६९।५
त्रियन्त्यादीनां (?) २३४।२६
त्रिसुपर्णकः ३६६।५
त्वन्मते २९५।३
दक्षिणा ३६१।२४
दण्डकमण्डलुग्रहण- ३८३।८
दण्डनीतिः ६।२५
दर्शपूर्णमास- ३५६।२५
दशरथ- ७।२०
दशरथनन्दनसुन्दरी १५७।३-४
दाक्षिणात्यैः ३४०।२५
दानधर्म (पर्व) ३७६।२१
दाल्भ्यः ४०८।२१
दिगम्बरता ३८३।९
दिङ्मोहः ४०२।१६
दिव्यकरण- ६१।२७
दुष्टमेघेषु सस्यरक्षणम् ३४७।१७
दुष्टसौगतः १२८।५
द्रोणपर्व ३७९।१८
द्वयसंस्कारपक्ष- २६८।२३
द्वादशाहः (यागः) ३६२।१७
धर्मकीर्त्तिः ६१।२७, १५२।१५,
२५, २४०।१८
धर्मोत्तरः ९१।२६,१५९।२४
धुनी (नदी) १६०।२०
धूर्तेन ३००।१६
ध्वनिः (काव्यप्रभेदः) ७६।३
ध्वनिकारः ७६।१३
नन्दिकुण्डम्
(तीर्थ वि०) १२२।१२
नहुष- ७।२१
नागरक- २०५।२०
नाथवादाद्यागमा- २२७।२४
नाथवादी ३८१।२३
नामधेयपक्ष- ४१७।४
नारिकेलद्वीप- १८०।२२,२१३।१५
१७४।२०
नास्तिकैः १०२।३
निगम- ४१५।२
निगमाः (निघण्टवः) ४१५।२१

नित्यत्वपक्षे ३१८।६, ३२२।२५
नियोगभावनावादी २२७।२१
निराकारज्ञानवादिनाम् २४।२६
निरुक्त ४१५।३
निरुक्तम् (व्युत्पत्त्यार्थ-
प्रतिपादकम्) ४१५।२३-२४
निर्ग्रन्थ ३०७।४, ३८७।२१
निर्वहणसन्धि ५७।१२
नीतिरहस्यवेदिभिः २७२।२
नीतिविदः ४५।१६
नीलाम्बरव्रत ३८८।२५
नेम ३४३।१२, ४१५।२,
३४४।१०
नैयायिकः ६२।२४
नैयायिकमते ४०३।१२
नैयायिका १२९।१९, २१३।१, २,
२४५।२०
नैयायिकादिपक्षे ३५६।१२-१३
नैयायिकानाम् १३३।१७, २१२।१५,
४०६।१०
नैरात्म्यवादिनः १८३।५
नैसर्गिकशक्तिपक्षे ३४२।१५
न्यायपल्लव (जयन्तभट्टकृतग्रन्थः,
स्याद्वादरत्ना०, पृ० ६२-६४)
न्यायभाष्य ३३१।२३
न्यायवादी १६।१८
न्यायविस्तरः ८।१६,२१;९।१०,१९,
१०।२
पंक्तिपावनप्रस्ताव ३५९।१०
पञ्चरात्रादौ ३७८।१७
पञ्चरात्रे ३७९।१
पञ्चाग्निः (सभ्यावसथाभ्यां
सह त्रेतया) ३५९।२४-२५
पण्डितम्मन्यः
(ध्वनिकारः) ७६।३
पतञ्जलिः (योगसूत्र-
कारः) २८३।१३
पतञ्जलिः (महाभाष्य-
कारः) ३५९।१३
पत्प्रसारिका १६६।८-९
पदनित्यत्वपक्षे ३२७।५
पद्मम् ३४४।१०
परः (सविकल्पस्य
शाब्दत्ववादी) १२२।२४
परकविरचित १९७।२०
परकृतिः ४०८।२४
परदर्शनद्वेषि ३४७।९
परलोकवादी २७५।१९,३५१।१८-१६
परिणामवादिनः ३०६।२०
परामर्शापलापवादि-
नाम् (प्रवरादीनाम्) १०६।१६
परिपवनम् २६२।२५
परैः ४३।५, १५२।२,
१५६।१
पर्युदासवृत्त्या ३९।१५
पवनजनितसंस्कारपक्षः २९८।४
पवमान ३६४।२
पशुयाग ४०६।७
पशुसंज्ञपन ४१३।२०
पाकयज्ञः (अष्टकादयः) ३७०।१८
पाणिनिः १०।१५, ३३३।९
पाणिनिस्मृतेः २८८।२२
पात्रचयः २२८।२०, ३९०।३

पादप्रसारिका　१६९।११, १८०।१
पाराशर्यस्मृतिः　३२८।८
पाराशर्यः　३३८।१४
पारिप्लवोपाख्यान　३५७।६,२१,२२
पिकः　३४३।१२, ३४४।१०, ४१५।२
पिकनेमतामरसादय　३४३।२३
पिकनेमाधिकरण (मी० सू०)　३४३।२१
पिङ्गलः (छन्दःसूत्रकारः)　१०।१६, ३३३।९
पिप्पलीपटोलमूल　३४७।११
पीठबन्धः　२३१।१०
पुटपाक　१५९।१८
पुण्यपुद्गल　३९८।१४,१९
पुराकल्पः　४०८।२४,२५
पुराणेतिहासधर्मशास्त्राणि　३७१।९,१०
पुरुरवसम् (राजानम)　३३३।१६
पुरुषशीर्षस्पर्शनसुराग्रहगवालम्भ　३८२।२०
पुरुषायितत्व　३९१।२६
पुरोडाश　४०९।१३
पुष्कराक्षेण　३७०।२०
पूर्वपक्षिणा　४०५।६
पूर्वपाक्षिक　३९७।२१
पूर्वाचार्यैः　३४५।२१
पूर्वोत्तरब्राह्मण (अथर्ववेदीय)　३६३।८, १७,।३६६।९
पृष्ठय (स्तोत्रवि०)　३६४।२
पैठीनसि　३१२।१५
पैप्पलादक　३६०।१
पैप्पलादादि　३३७।२
पैप्पलादि०　३१२।१५
पौराडासिकब्राह्मण　२१४।१८
प्रकृतिपुरुषविवेकज्ञानपक्षे　३८३।४
प्रत्यक्षपवनवादिनाम्　३०२।१३
प्रपञ्चविलापन　४२६।६, ४२७।३
प्रभाकरः　५२।१७, ३११।२२
प्रभाकरटीका　३७४।२३, ३७८।१०
प्रभाकरपक्ष　६४।२०
प्रभाकरमत　४१६।२२
प्रभाकरेण　२१२।२३
प्रभाकरोपाध्यायः　७२।१४
प्रमाणसंप्लव　४२१।७
प्रवरपक्षः　१३९।१२, १६,१९
प्रवरप्रभृतयः (न्यायभाष्यविवरणकर्तारः)　१०६।१७
प्रवरमतेन　५१।२७
प्रवराः (भाष्यविवरणकाराः)　१२९।२
प्रवरानुमन्त्रण　४०६।१८
प्रवाहणस्य (राज्ञः)　३३२।२३
प्रशास्तृ　३५८।१७
प्रसज्यप्रतिषेध　३९।१६
प्रस्तरणम्　४०२।२३
प्राचेतस (स्मृतिः)　३५९।९
प्रातःसवनम्　४१३।१३
प्रातरनुवाकः (शस्त्रविशेषः)　४१३।२१
प्राभाकरम्　२३०।२७
प्राभाकराः　७।१५;५७।१६; ६४।४, ६८।९, ६९।८, १६४।२२, ३६८।१७ ४०४।२६

प्राभाकराणाम् ९६।२०
प्राभाकरान् ९६।१४, २४९।२४
प्राभाकरैः ३७७।१३, ४१८।२६
प्रामाणिकैः २५८।१४
प्रायनीयः (अदिति-
देवताकश्चरुः) ४०५।२२,२३
प्रावरं मतम् २००।२६
प्रावादुकाः ३७३।१०
प्राह १५४।९
प्रियङ्ग १०४।८, ४१४।२६
४१५।१
फलविशेषणपक्ष १०४।१४, ११३।८
फलवेद ३५०।१८
बन्धूक (कुसुमवि०) ३१६।१८
बहिर्व्याप्तिः १६६।२०
बार्हस्पत्यम् ४३।११
बार्हस्पत्यानाम् २७५।२०
बाह्यस्मृति ३७३।१४
बाह्यागमवादिनः ३८१।१६
बाह्यार्थनिह्नववादिनः २८।१३
बीजोपघात ३९१।२५
बुद्धः ३०५।१४
बुद्धादीन् ३८०।१९
बृद्धनैयायिकाः २०५।६
बृहस्पतिमत ३९७।३
बोधप्रामाण्यवादिनः २७।८
बौद्ध (आगमः) ३७५।१६
बौद्ध १०३।२०
बौद्धः १२८।१६
बौद्धगृहे १११।१०,११
बौद्धदर्शन २५।२५
बौद्धपक्षात् प्राभाकर-
पक्षस्य विशेषः ६६।१८
बौद्धपक्षे ६६।१९
बौद्धमते २६।२१
बौद्धवत् ३१२।१०
बौद्धस्य ६७।२५
बौद्धाः ९।१३, ४३।८,
२५३।२५, ३०६।२०
बौद्धागमे ३८५।३
बौद्धादयः ३०१।३
बौद्धादीनाम् ३७६।२३
बौद्धाद्यागमानाम् ३००।१४
बौद्धानाम् ३२५।२१
बौद्धाभिप्रायः ६२।२४
बौद्धोक्तम् १६७।२२
ब्रह्मणा ३५६।२६
ब्रह्मत्वम् ३३७।२
ब्रह्मयज्ञविधिप्रक्रम ३८५।२
ब्रह्महत्या ३९८।१२
ब्रह्मौदनः (चरुवि०) ३६३।९
ब्राह्मणवैश्ययोः ३४४।२८
ब्रूयुः (मीमांसकाः) १५४।१९
भक्षितविष ३४७।१६
भट्टः (कुमारिलः) ८।१०, ११।२४,
४७।६, १३३।१६,
१८६।१०, २२५।१६,
३१७।११, १७,
३९२।१३, ४२६।३
भट्ट आचष्टे ३७५।२०
भट्टदृष्ट्या ३०८।१३
भट्टपक्ष ३२।६, ३७७।१३

भट्टश्लोकः १५११११

भट्टानाम् २८।१५

भट्टेन ३१७।६

भद्रिका ३४८।२४

भरताः ३५८।१८

भर्तृमित्रः (तन्त्रशुद्धिकारः) २६८।४,२५; ३११।७

भर्तृहरिः १२४।७

भवतः (मीमांसकस्य) १५८।१

भवतां दर्शनम् २५७।४

भवतां हि पक्षे (बौद्धपक्षे) १७३।१

भवता (दिङ्नागेन) १४४।२३

,, (सौगतेन) ६३।२२

,, ३४२।६

भवताम् (नैयायिकानाम्) २६८।१

भवद्भिरुक्तम् ३६।६

भवद्भिः (नैयायिकैः) ६१।१०

,, (मीमांसकैः) ६२।१८, २१३।१, ३२५।१८, ३४४।१

,, (धर्मकीर्त्यादिभिः) ९३।२

,, १७३।१३, ३३७।१४, ३४१।१९

भवन्तः २१३।९

,, (मीमांसकाः) २१३।१६,३४४।२

,, (कुमारिलः) ३७३।१७

,, (वैशेषिकाः) २९९।४

भवन्मते (मीमांसकमते) २८।२०

,, १९७।७, २४१।८, २५५।१५, २९४।२१, २९६।७

भवान् (कुमारिलः) ८४।२२,

,, (नैयायिकः) १४१।८,

,, (मीमांसकः) १५८।६,८, १६१।१७

भस्मजटापरिग्रह ३८३।८

भाट्टम् २७।२७

भाट्टः ५२।१८

भाट्टाः ५२।२१

भाट्टैः १९६।२१

भारते (महाभारते) १५७।२० ३२८।२, ५,११; ३७८।२७

भाष्य० (शाबर०) ६४।७, ६५।२१,

,, (मी० भा०) ३१३।२६

भाष्यकारः (वात्स्यायनः) १८।११,२४, १६।१०, ५२।४, १०९।५, १३८।१५, २०६।२४, ३१३।२४,

,, (शबरस्वामी) २८।२, ३१।१३,१४; ४१३।१६; ४२६।१४

भाष्यकारीयम् १६२।१४

भाष्यकारेण ५३।१५, १९१।१७ ३९७।१८

भाष्यकृत् २०।२२,

,, (वात्स्यायनः) १०६।१

भाष्यकृतः ११०।२०

,, (वात्स्यायनस्य) १३०।२०

भाष्यकृता (शबरेण) ७४।२२, २३७।१५

भाष्यकृता १०६।१७,
,, (वात्स्यायनेन) २१९।८, २४६।१; २६५।२३, २७५।२१, २७८।८, ३८४।२३,
भाष्यविवरणकृतः (प्रवरप्रभृतयः) १०६।१७
भाष्यस्य (शाबरभा०) ६८।२७
भाष्याक्षराणि २०६।१
भिक्षवः ४३।१५, १६९।३, २४२।१३
भिक्षुः (धर्मकीर्तिः) १४१।५
भिक्षुणा (दिङ्नागेन) १४४।२१, १५१।१५
भीष्मवधः १०८।२४
भूतस्वभाववाद ३९२।३
भूमिकारचनम् (पीठबन्धः) २३१।२७
भूमिपाटव ३६३।४
भेदपक्षे ३४०।९
भेदवाक्यार्थवादिमतम् ५६।२३
भ्रमरः १८९।२६
मठच्छात्राणाम् २८५।२३
मठपर्षदः २८५।५
मधूक ३१६।१९
मनीषिणः १७९।४
मनुः (संहिताकारः) ५।२१, ३५८।८
मनुवत् १२२।१७
मन्त्रार्थवाद ३७२।६
मन्त्रिणा(मन्त्रप्रयोक्त्रा) ६१।२४
मर्कटानाम् ३३३।१९
महाभाष्यकारः ३५९।१३
महामुनिः (अक्षपादः) ४१।६
महाव्याहृतिः ३६७।२
महिषशृङ्गम् १८६।२६
महेश्वरः २८१।१२
माघेन (कविना) १३०।६
माध्यन्दिनसवनम् ४१३।१३
मानववाक्यम् २६८।१
मार्जारः १५७।१९, २६
मीमांसकः २७२।१०, १३
मीमांसकपक्ष ३५६।११, ४०३।१०
मीमांसकपाशः २४९।८
मीमांसकप्रभृतयः ४३।९
मीमांसकभाष्यकृता १६५।२१,
मीमांसकमतानुवाद २४०।२२
मीमांसकवर्त्मना ३५३।११
मीमांसकस्य ३०६।१८
मीमांसकाः १०।७, ३३१।२५
मीमांसकानाम् ८३।१९, १८१।२२, २९८।२, ४०३।२३, ४१२।११
मीमांसकैः १९८।७, ३२७।१६, ३६८।१९
मीमांसा (वेदवाक्यार्थविचारात्मिका) ८।८, ९; १०।२१
मीमांसाभाष्यकार ३५६।१४
मुनिः (अक्षपादः) १०।२५, १८।१६, ६६।१६, २१०।३
मुनिना (अक्षपादेन) १९।१
मेचकज्ञानम् ८४।२१
मेचकता ८४।२५
मेचकप्रत्ययः १६२।१४
मेचकबुद्धौ ८४।२०, २१
मेचकबुद्ध्या ८४।१
मेर्वादीनाम् ९०।२३

मोक्षशास्त्रे(न्यायशास्त्रे) २०९।१९
म्लेच्छजन ३४३।८
म्लेच्छजनसम्मत ३४१।३
म्लेच्छदेशे ३४३।९
म्लेच्छप्रयोगान् ३४४।१
म्लेच्छप्रसिद्ध ३४३।२३
म्लेच्छप्रसिद्धिः ३४३।११,१९
म्लेच्छव्यवहारस्य ३४३।२५
म्लेच्छाः ३४३।१९
म्लेच्छेभ्यः ४०५।१
यः पुनः २६२।११
यच्च १८४।१,२३२।३, २४१।१,३४२।७
यजुर्वेद ३५६।२४
यज्ञायुध ३६९।१६
यज्वानः ४०४।२३
यत्तावत् २७२।४
यत्तु २२।७, २२।१९
यत्तु (मीमांसकमतम्) २९।१८
यत्तु ६५।१२,८३।६, ९५।५, १११।८, १३६।१६, १४७।२, १६३।१६, १६८।९, १८१।७,
„ (भाट्टमतम्) २२५।६, २२९।१८, २४७।१९, २४८।६ २५०।१४, २५९।३, २६६।१८, ३१५।२१, ३१७।७ ३१८।१८, ३१९।१ ३१९।११, ३२१।३ ३२४।११, ३४२।२, ३४२।१२, ३४७।८,३६९।५ ।
यत्तूक्तम् २७५।१८, ३४१।१४
यत्पुनरभिहितम् १६७।१६
यत् पुनः १८३।६, २२५।८, २४६।४, २४८।१३, २६०।२५, २६२।१४, २७६।२५, २८३।१७, २९७।२२, ३१६।५, ३१६।१८; ३३४।१६, ३४०।२३, ३४३।८, ३६६।३, ३८२।१७,
यथाह वृद्धः(कुमारिलः) १२४।१, १३३।१९, २२५।१९, २८५।१, ३०९।१४,३१७।१७
यथा हि ३१८।४
यथाहुः १५८।२३
यथोक्तम् ७।११,९।३,२५।७,२५, ३७।९, ५७।१, १५।१८, १५३।१२, १६१।१४, १८१।१७, १८६।३, १२२।९, २२३।२२, २२४।७, २४६।२०, २२९।२४, २३३।२, ३९२।७, ३९५।४ ४०५।२, ४०८।५ ४१२।११,
यदपि १८३।१०, १२, १४ १८९।२३ १९०।१३, २४४।१६, २६७।८, २७५।६, २७८।२३, ३१३।५, ३१७।११, ३२१।१४, ३३५।६, ३३८।१६, ३४२।१४, ३४३।४,
यदप्युक्तम् २७६।५

यदप्युच्यते ३००।४, ३६५।५
यदाह १९।२२, ५८।२२, ८७।११ १११।२२, १४२।७, २२५।१०, २३४।२३, २३८।७, २८१।१८
यदाह भट्टः १९०।२३
यदाहुः (भर्तृहरिणा) ५९।१५, १४६।२०
यदुक्तम् २५।२५, ६४।१०, १५७।९, १६६।८ १८६।१९ १९८।१९, २४४।१८, २५६।२१, २८५।१७, ३१३।२, ३२४।२०, ३२५।११, ३४४।४, ३६६।१६, ३८०।२३
यदुच्यते ९७।९, २०३।१, ३२४।१८, ३३६।१६
यदृच्छाशब्द ३४०।२१, ३४४।७
यद्वा १८६।६
यमनियमप्राणायामप्रत्याहारधारणाध्यात्मज्ञान ४२६।८
यमनियमादि ४२६।५
यश्च ३२०।१५
यस्तु ८३।९
„ (प्रमाणसमुच्चयकारः) ११३।१
„ २६१।२४, २८४।५
याज्ञवल्क्य ३५८।१०, ३६६।१२
याज्ञिकैः ३३०।२
याज्या ३३७।१५
युगपदखिलसर्गध्वंसवाद ३५३।१४
युधिष्ठिर २२३।२४
युष्मान् (मीमांसकान्) २१३।३
ये (दिङ्नागादयः) २४।२, २६।५
ये तु २५२।१७, ३२३।११
येऽपि २१९।२२
यैः (न्यायसूत्रव्याख्यातृभेदैः) १२।२१
यैस्तु मीमांसकैः) १६।९
योगसिद्ध्यधिकरण (मी०सू०४।३।१०।२०६) ३६२।१५
योगाचारदर्शन २६।२४
योगिनः १५७।६
योगिविज्ञाने १५९।१
योग्यतामात्रवादे ८४।३
योग्यायोग्यत्वकृतग्रहणाग्रहणनियमवादे ८०।२
योनिव्यापत् ३९१।२५
रक्तपटधारण ३८३।९
रक्तपटपरिग्रहभस्मकपालधारण ३८७।५
रक्तपटाः ८५।२३
रसवीर्यविपाक ३४८।१५
रहस्ययज्ञ ३६३।१६
रहस्यविधि ३५८।१५
राजवार्त्तिककारः १६३।२६
राज्यशब्द ३४४।१
राजशब्दयोग ३४४।१९
राजशब्द(राज्यकर्तरि) ३४४।२३,२४
राजा (राजवार्त्तिककारः, कान्यकुब्जादिनगराधिपः कश्चिद् रणरङ्गमल्लाख्यो भोजः । युक्तिदीपिकाख्यराजवार्त्तिकस्य कर्ता) १६३।१७
रात्रिसत्र ४०८।५
रामभरतादि ७।२०,२१

रामादीनाम् ६०।२४
रामायणे १५७।४,१९
रामायणोक्त्या १५७।१९
रुचिकारः (अध्ययननामा) १०५।२५
रुरुः (प्राणी) २०७।९
रोलम्बः १८६।१८
लिङ्गार्चन ३७९।२१
लोकप्रसिद्धि ३५२।२०
लोकायतदर्शन ३८७।१६
लोकायतशास्त्र ३८८।७
लोकायताद्यागम ३८७।१४
लोकायते ३८८।१
वदन्ति (मीमांसकाः) १६१।११
वनेचरपुरुषः २०६।८,९
वयन्तु (भाट्टाः) २७।९
वयमपि १६८।१
वाक्यविद्भिः (मीमांसकैः) ५७।१
वाक्यविन्मत ७५।५
वाग्भतः ३५८।२३
वाजपेयम् (यवागुः) ४१६।१६
वाजम् (अन्नम्) ४१६।१६
वाणस्य (कवेः) ३३२।१४
वादरायणसूत्रवृत्तिकृत् ३७०।१९,२०
वादरायणस्य ३५।१५
वार्ता (शास्त्र) ९।२५
वार्ताविद्या ३९३।५
वार्त्तिकम् श्लो०वा०) ६५।२१
वार्त्तिककारः (कुमारिलः) ३६९।७, २३७।१६
वार्त्तिककृता (कुमारिलेन) २८।३, २७३।२
,, (उद्द्योतकरेण) ३२४।८
वार्त्तिकव्याख्यानम् ६६।१५
वार्तिकभद्रिका ४६।२, ५१।६
विज्ञानवाद ९४।४
विज्ञानवादिनिराकरणे ४७।१०
विज्ञानाद्वैत २६।७
विटैः ३८८।२५
विदुषाम् १४०।६
विद्योद्देशे (कौ० अ०, १।२, १०,१२ १८।२३
,, (नीतिशास्त्रप्रकरणे) १८।२६
विधिवृत्तपरीक्षा ७।७, ३९५।१६
विपरीतख्यातिवाद ३२।२५ २४९।९,१०
विपरीतख्यातिवादिभिः २५८।५
विप्रकीर्णशाखा ३९२।७
विभीषणादेः (रावणभ्रातुः) ८२।१६
विश्वरूपटीका (न्या० भा० टी०) १३०।१६
विश्ववसुकाव्य ३३७।९
विषभूताशनिशमनकुशल ३४७।१७,१८
विष्णुः ३७९।३
वीरणत्व ३४१।१८
वृकाः (हिंस्राः प्राणिनः) ३३३।१७
वृत्तिकारः (उपवर्षः) १५४।९ २४
वृद्धनैयायिकाः १२१।२
वृद्धमीमांसकाः ३९८।१५
वृन्दकादिः ३०१।८
वृश्चिकभुजगदष्ट ३४७।१५
वृषदंश १५७।१७
वेतनम् ३९३।७
वेतनकामः ३९३।६
वेदमूलकत्ववादी ३७४।१०
वेदाधिकरण (शाबरभाष्ये) ३५९।१५
वेदान्तिनः ४२७।१
वेदिस्तरण ३७३।१३,१४
वैभाषिकमते २६।२१

वैभाषिकानाम् २४।२६
वैभाषिकैः २६।२३
वैयाकरणवत् ३०६।५
वैयाकरणाः १५।२, २२७।१९, ३४७।२३
वैयाकरणानाम् ३०६।१६, ३३९।७
वैशेषिकाः ९।१८,३०६।१९
वैहारिकी दर्शपूर्णमासादिका ३७०।१८
व्याकरण ४१५।३
व्याख्यातारः (प्रवरप्रभृतयः) १०६।४, १२२।२
व्याख्यातृमत १०५।२४
व्याख्यान्तरम् ३३३।२४
व्यासः २८१।१५,३२८।११, ३५२।१७
व्यासादिवत् ३३४।२१
व्युत्पत्तिपक्ष ३४०।१३
शङ्करः (टीकाकर्तुः पिता) ३।१३
शङ्करवर्मा (राजा) ३८८।२७
शक्तिवादः ६४।८
शङ्खलिखितौ ३५६।७,८
शतपथ ३५७।६
शताध्ययन ३५७।१४
शब्दपरीक्षायाम् ५३।१४, ६३।२
शब्दब्रह्म ३०६।५
शब्दविदः ३०९।१५
शब्दविदाम् ३११।२
शब्दव्यक्तिवादिनाम् ३२३।१४
शब्दाधिकरणभाष्यम् २७२।१९
शब्दाध्यासरक्षावतरणम् १३०।१८,१९
शब्दार्थाभेदवादिनाम् ३३६।७
शमिता (अध्वर्युकर्मकरः पशुनिहन्ता) ३१८।२३-२५
शशाङ्कधरभट्टः (चक्रधरगुरुः, विश्वरूपटीकाव्याख्याता) ३।१५, १३०।१९
शस्यपालशास्त्रम् ३५०।२५
शाक्यः २७२।१०
शाक्यकापिलनिर्ग्रन्थ० ३२३।१५
शाक्यदृष्ट्या १६१।१५
शाक्यपथः ४३।१२
शाक्यप्रायाः ३०२।५
शाक्यभिक्षवः ३९८।१५
शाक्याः २८।१३, ११६।८
शाक्यानाम् ६।१५
शाक्योऽपि २७३।६
शाङ्ख्यायनब्राह्मण ३०५।२२
शातातप ३५२।४
शाबरम् १९७।२३
शाबरं भाष्यम् ३४२।२६, ३६२।१८
शाबराः (भाट्टाः २७।८
" २७।२७, ३९०।२६
शाब्दपक्षे १२७।१४
शाब्दाः ३३६।२४
शास्त्रे (न्यायशास्त्रे) १०८।१०
शिक्षाविदः ३०४।१०
शिखण्डी १०८।२५
शिष्योपाध्यायिका ३७४।११
शुद्धोदन ३८५।१४
शून्यवाद २६०।१४, १९

शृङ्गग्राहिकया ३९६।९,१०
शैवपञ्चरात्रयोः ३७६।१०
शैवपाशुपतपञ्चरात्रबौद्धार्हत् २७१।१०
शैवागम ३७७।४
शैवादिदर्शनम् ३७८।४
शैवादिशास्त्रेभ्यः ३७८।१५
शैवाद्यागम ३७६।१
शौद्धोदनिशिष्य १७४।११
शौनःशेपाद्युपाख्यानम् ७३।२२
शौनकोपाख्यान ३५७।२०
श्येनादि (यागः) ३५६।२५
श्रमण ३८७।२५
श्राद्धप्रकरण (मनु०) २।१४५, ३६८।१४
श्राद्धभोजन ३६६।६
श्राद्धे ३६०।१
श्रोत्रिय १५६।२०
श्रोत्रियकल्पना ३०२।११
श्रोत्रियाः मीमांसकाः) २८।९
श्रोत्रियैः २२३।२२
षट्तर्की ९।१९
संप्लवापलापिनाम्
(बौद्धानाम्) ५०।१७
संसारमोचक ३८०।३, ३८१।११
संस्क्रियापक्ष ३९९।७
सः (अक्षपादः) १२२।१९
,, (मीमांसकः) १५६।२४
सङ्कर्षणादयः ३७०।१८
सजातीयशब्दसन्ताना-
रम्भपक्ष ३२०।१६
सत्ताद्वैतवादी १५०।५
सत्यवतीसुत ३२८।१४
सदः (यत्रोपविष्टा
ऋत्विजो याज्यानु-
वाक्या स्तोत्रादिपाठं
कुर्वन्ति) ३९६।२४,२५
समयपक्ष ३४०।२१ २६; ३४१।४
समवायप्रत्यक्षत्ववादिनाम् ८३।२
समानतन्त्रे (वैशेषिके) २०४।२०
समीहाभ्रेषः ३११।२२
सम्पातिः (गृध्रराजः) १५७।३, १७
सर्वशाखाधिकरण
(मी०सू०२।४।८) ३६०।१
सर्वसर्वज्ञता ३२।८
सर्वस्वारः ३८५।१
सर्वे ११२।१
सशरीरत्वपक्षे ३२०।३
सहानवस्थानसंस्कारो-
च्छेदादिपक्षाः २६२।१९
साकारज्ञानवाद ४०।१३ २७
साकारज्ञानवादिनः २६।९
साकारज्ञानवादी २५।२६
साकारपक्षे २७।४,५
साकारविज्ञानं २६।७
सांख्यः ४०।२, १०३।२२,
३०७।२
सांख्यवत् ३१२।७
सांख्यव्याख्याता ४८।१८
सांख्याः ४३।८, २९९।४,
३०६।२०
सांख्यानाम् १६७।२४
सांख्याभिप्रायेण ३०८।१३
सांख्यार्हतानाम् ९।११
सांख्यैः ४०।२३

सांख्यैरिव ३४११९

सामग्रीविशेषणपक्षः १०४।५

सामवेद ३५६।२५

सामिधेनी ४२०।२

सामिधेन्यः (समित्प्रक्षेपमन्त्राः) ३६०।२२, ३९११

सालावृकाणाम् ३३३।१९

सिक्थ ३०७।८,९,११

सिक्थगुलकाः ३०७।१८

सिद्धदर्शनम् १६११२

सिद्धान्ते ३४४।२४

सुगत ३८५।१२

सुगन्धिबन्धूक १२३।८

सुशिक्षितचार्वाकाः (उद्भटादयः) ५२।१९,२६

सुशिक्षिततराः (चार्वाकाः) १८४।६

सुशिक्षिताः (प्राभाकराः) २४६।८

सूक्तवाकनिगदः ७३।१२

सूक्ष्मदृष्टिभिः १६९।११,१२

सूत्रम् (न्या० सू०) ११३।८ १८५।२, २०३।२३, २०९।२३, २१८।८

,, (मी० सू०) ३१३।२३

सूत्रकारः (अक्षपादः) ४१।१, १९, १२१।२२, १२२।१३, १७, १२४।१२ १३४।११, २०५।२, ३९११३

सूत्रकारस्य कौशलम् १८७।१८

सूत्रकाराशयम् १२२।१३

सूत्रकारेण अक्षपादेन) २७२।१७

सूत्रकृत् (अक्षपादः) १३५।४, १८७।२५, २०९।१५

सूत्रकृता (अक्षपादेन) १२१।२०, १३२।१७, ३२३।२०

सूत्रपदसङ्गतिः (न्या० सू० १।१।४) १०४।१७

सूत्रस्य (मी०सू० १।३, ५।१०) ३४३।२७

सूत्रार्थः(न्या०सू० १।१।४) १०४।१६,२८८।१, ३१३।१९, ३४४।२६

सूत्रावयवम् ३२४।२०,२१

सूत्रे(न्या०सू०१।१।७) १००।५, १३८।६, १४०।८

,, (जैमिनीये) १५४।५, २९३।२३

सूत्रेण ३२४।५

सृणिप्रतोदनोदन ३४२।१४

सोमावसेकः (सोमावलेपः) ४११।३,१६

सौगत ५२।१३

सौगतपक्ष ३९८।२०

सौगतवत् ३२।११

सौगतसंसारमोचकागमः ३७९।१३

सौगताः ३६।८, २६९।४

सौगतानाम् ९३।१०

सौगतेन ४८।२१

सौगतैः १८८।१९

सौगतोद्गीत १७४।३

स्तवरकः (पट्टसूत्र-निर्मितचित्ररूपः पटः)	२८१।९, २८१।२३
स्फ्यकपालादि	३६०।५
स्मृतिप्रमोषवाद	३२।१४
स्मृतिशास्त्रम्	७।५
स्मृत्यन्तरे (शातातपे)	३५८।१३
स्वप्रकाशमते	३२।२२
स्वप्रकाशसुखवादिनाम्	११७।१३
स्वभावहेतु	६४।२
स्वरग्रामभाषाविभागः (सङ्गीतविषयकः)	३११।२
स्वरूपविशेषणपक्ष	१०३।१३, १०४।५
स्वरूपसामग्र विशेषण-पक्षौ	१०४।१३
स्वस्वामिभाव	३९९।१७
स्वाध्यायाभियुक्ताः	३७५।२
हरिश्चन्द्रोपाख्यान	३७५।२०
हवनकालविधि	३९९।१६
हौत्रम्	३३७।२

परिशिष्टम् २

उद्धृतवचनानां सन्दर्भस्थाननिर्देशः

अक्ताः शर्करा उपदधाति	४०८।६
अक्षस्याक्षस्य प्रति विषयं (न्या० सू० भा० १।१।३)	१०६।१८
अग्निः पूर्वेभिर्ऋषिभिः (ऋ०वे० १।१)	३६५।२२
अग्निमीले पुरोहितम् (ऋ०वे० १।१)	३६५।२१
अग्निराप्तोपदेशात् प्रतीयते (न्या० सू० १।१।३)	५२।४,५
अग्निरिद हविरजुषतावीवृधत (तै०ब्रा० ३।५।१०।३)	७३।१०, १२
अग्निर्वृत्राणि जङ्घनद् (ऋ० वे० ६।१६।३४)	४१४।४
अग्निषोमीये संस्थिते	३५६।१६
अग्निहोत्रं जुहुयात् स्वर्गकामः	७।५
अग्निहोत्रं जुहोति	४०२।१९
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं (बृहस्पतिमतम्)	२२८।२५, २६
अग्नीदग्नीन् विहरेत्	४१५।८
अग्नेरूर्ध्वज्वलनम् (वै०सू० ५।२।१४)	३१९।२३
अग्नौ वै प्रगृहीतमात्रायां वपायामजस्तूपर उदगात्	४०५।११
अग्र्याः सर्वेषु वेदेषु (या० व० स्मृ० १।२१९)	३६६।२०, २१
अङ्गानि वेदाश्चत्वारो	९।७
अजामेकां लोहितशुक्लकृष्णाम् (श्वेता० उप० ४।५)	३८७।३, ४ १७
अज्ञो जन्तुरनीशोऽयम् (म० भा० वन० ३०।२८)	४।१८, २८६।४, ५
अत्यन्तप्रायैकदेशसाधर्म्याद् (न्या० सू० २।१।४४)	२०९।२३
अत्यादयः क्रान्त द्यर्थे द्वितीयया (वा० १।४।७९)	१४०।२२, २३
अत्र केचिन्नीतिज्ञम्मन्या अनवधृत० (बृहती १।१।२)	१६५।१९, २०
अथ तृतीयेऽहनि अश्वमेधे (शतपथ० १३।३।७)	३५७।६, ७
अथ त्वधिकता काचित् (श्लो० वा० उ८० ९	२१३।२
अथ न यदि वर्षेच्छ्वो भूते जुहुयात्	३९६।१२
अथ शब्दानुशासनम् (महाभाष्यम् १।१)	१५।३, ४

अथातस्तत्त्वं व्याख्यास्यामः (लोकायतसू० १) १००|८, २०
अथात्मा ज्ञातव्यो निदिध्यासितव्यः (छा० उप० ८|१५|१) ४२५|१४
अदितिर्द्यौरन्तरिक्षम् ४१०|१२
अधर्मे धर्मरूपे (श्लो० वा० प्रत्यक्ष० १०५) ३५२|७
अधिगतमर्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यात् ४५|१४, १५
अनलार्थ्यनलं पश्यन्नपि न तिष्ठेन्न (हेतु० बिन्दु०, पृ० ६७) ४४|१४
अनादिनिधनं ब्रह्म (वाक्यप० १|१) १४९|२१
अनित्यः शब्दो जातिमत्त्वे सति (न्या० वा० २|२|१४) ३२४|६
अनुमेयाकाराध्यवसायश्च (प्र० वा० २|८१ तुल्यः) ३६|२५
अन्तरिक्षमसून् ३१८|४
अन्यथाकरणे चास्य (श्लो० वा०, तृ० सू० १४५ श्लो०) ४१२|११
अन्यथानुपपत्त्या च (श्लो० वा०, सम्ब० १४१) १३४|२१; ३४५|१०,२५
अन्यथैवाग्निसंबन्धाद् दाहं दग्धोऽभिमन्यते (प्र० वा०) ४६|१३, १४
अन्यदेव हि सत्यत्व (श्लो० वा० वाक्या० २३१) २२५|११, १२
अन्यदेवेन्द्रियग्राह्यमन्यः शब्दस्य गोचरः (प्र० वा० ···) ४६|१०, ११
अन्यरूपतया तु तद्ग्रहणम् ४५|१५ १६
अपञ्चम्या० (अष्टा० सू० २|४|८३)
अपरीक्षामिप्रेणापि ·· श्लो० वा० शब्द० ७) १४०|२०
अपर्यनुयोज्या हि वस्तुशक्तिः १२५|२२
अपाणिपादो जवनो ग्रहीता (श्वे० उ० ३|१९) २८०|४, ५
अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात् (मी०सू० १|३|२) ३८६|११
अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति (प्र० विनि०, पृ० ९६) ४७|१४,१५,२५
अप्रामाण्यमवस्तुत्वात् श्लो० वा० चोदना ३६) २३२|३,४
अभावेऽपि प्रमाणाभावो नास्तीत्यस्यासन्निकृष्टार्थस्य (शाब० भा० १|१|५) ६८|२६-२७
अमुमेव च संस्कारं (श्लो० वा० शब्दनित्य० १३०) ३१७|१८
अम्यक् सा त इन्द्र ऋष्टिरस्मे (ऋक्सं० १|१६९|३) १४३|२४,२६; ४१०|१४
अयथार्थ; प्रमाणोद्देशः (न्या० सू० भा० २|२|१) १६|११,२६; २०|२२
अयमेवेति यो ह्येषः (श्लो० वा० अभाव० १५) ८५|१-२
अरुणयैकहायन्या सोमं क्रीणाति (तै० सं० ६|१|६|७) ५७|१७, १८
अर्थकल्पना (शा० भा० १|१|५) ६४|८

अर्थप्रतीतिजनकं प्रमाणम्	३६।२४
अर्थप्रतीतिरेव प्रमाणकार्या (न्या० वि० टी० पृ० ४४)	३९।१०, ११
अर्थान्तरानपेक्षित्वात् (प्र० वा० ३।६)	१८८।२५, २६
अर्थोपयोगेऽपि पुनः (प्र० वि०, पृ० ४२)	१४२।३,४
अल्पीयसा प्रयत्नेन (श्लो० वा० स्फो० १०)	२६६।१३, १४
अवस्था देशकालानाम् (वाक्यप० १।३२)	१७७।१८,१९; १८३।१२
अविसंवादकत्वञ्च प्रापकत्वम्	३५।५
अवीवृधेतां महो ज्यायोऽक्राताम् (तै० ब्रा० ३।५।१०।३)	७३।१७
अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते (मी० सू० २।३।२।३)	३४४।१०
अशिष्टैरपि यच्चोदितम् (शा० भा० १।३।५।१०)	३४३।२५ २७
अष्टकाः कर्तव्याः	३७२।२०
अष्टकायै सुराधसे स्वाहा (अथ० वे०)	५९।२३
अष्टकाशिखाकर्मप्रपाप्रवर्तनादि	७।६
अष्टकृत्वो गोशब्द उच्चरित इति (शा० भा० १।१।६।२०)	३१३।२४,२६
असम्भवे प्रतिनिधिः	२१५।२१,२२
अस्त्युत्तरस्यां दिशि देवतात्मा (कुमारसं० १।१)	३३०।२४
अस्मदादौ प्रसिद्धत्वात् (श्लो० वा० प्रत्यक्ष० २१)	१५५।२६
अस्येदं कार्यं कारणं संयोगि (वै० सू० १।१८)	१७३।१४ २५।२६
आख्या प्रवचनात् (मी० सू० १।१।८।३०)	३६०।१३
आग्नेयमष्टाकपालं निर्वपति (तै० सं० १।८।१९)	३४४।१३,१५
आग्नेयोऽष्टाकपालः	२१४।२
आग्नेयोऽष्टाकपालो भवति (तै० सं० २।६।३।३)	६०।२२; ६८।१९
आग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्च च्युतो भवति (तै० सं० २।६।३)	४१७।२०; ४१८।१
आचान्तेन कर्तव्यम्	३७१।२४; ३७३।२५
आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् (वै० सू० ३।१।१३)	१६३।११, १२ २१
आथर्वणं न प्रवृञ्ज्यात्	३५५।१७
आदित्यः प्रायनीयश्चरुः	४०५।११, १२
आदित्यो यूपः	४०२।७; ४०७।६
आदित्यो वै देवमधु (छा० उ०)	३५७।२३
आदित्यो वै ब्रह्म (छा० उ० ३।१६।१)	३५९।२१
आदिमत्त्वादैन्द्रियकत्वात् (न्या० सू० २।२।१४)	३२३।२०

आधारत्वमथोच्येत (श्लो० वा० शब्दनित्यता ३४०) ३२४।२३
आनन्तर्याग्रसंवादो नाविशेषप्रवर्तिनीम् (श्लो० वा० चित्राक्षे० ४) ३९२।१४,१५
आन्वीक्षिकीत्रयीवार्ता: (कामन्दक, अर्थशास्त्र) ९।२१,२२
आप्तः खलु साक्षात्कृतधर्मा, यथादृष्टस्य चिख्यापयिषया प्रयुक्त उपदेष्टा चेति (न्या० भा०) २१६।८-९
आप्तवादाविसंवादसामान्यादनुमानताम् (प्र० वा० ३।२१६) २२१।११
आप्तोपदेशः शब्दः (न्या० सू० १।१।७) १२१।२१
आर्षं धर्मोपदेशञ्च (मनु० १२।१०६) १६।२३,२४
इको यणचि (अष्टा० सू० ६।१।७७) २८८।२२
इचुयशास्तालव्या (अष्टा०) २८८।२०,२१
इतिहासपुराणाभ्यां वेदं (महाभा० आ० प० १।२६५) ७।१२, ३७५।४,५
इदं पुण्यमिदं पापं ३५२।१०,१९
इदं विष्णुर्विचक्रमे ३७९।८
इदमहं पञ्चदशारेण वज्रेणापबाधे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः ४००।३
इन्द्रः सोमस्य काणुका (ऋ० सं० ८।७७।४) ४१०।१४,१५
इन्द्रियार्थसन्निकर्षोत्पन्नम् (न्या० सू० १।१।४) ४१।४,५
इह न भवत्यनभिधानात् ३४२।१३,१४
उत्तमः पुरुषस्त्वन्यः (गीता) २८१।१८,१९
उत्ताना वै देवगवा वहन्ति वनस्पते हिरण्यपर्णप्रदिवस्ते अर्थम् ४१४।४,५
उत्प्रेक्षामात्रनिष्ठितशक्तयः (न्या० बि० टी०, पृ० ८६) ४६।२३
उदाहरणसाधर्म्यात् (न्या० सू० १।१।३४) १७२।१७,१८; १८५।१०
उदिते जुहोत्यनुदिते जुहोति २२७।२६
उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्यम् ३९०।८
उदुम्बरीं सर्वां वेष्टयेत् ३७६।२१
उद्भिदा यजेत (ता० ब्रा० १६।७२।३) ४१५।२५,२६
उपान्मन्त्रकरणे (अष्टा० सू० १।३।२५) ७२।१८
उभयमिह चोदनया लक्ष्यते अर्थानर्थाश्चेति (शाब० भा० १, सू० २) ३८४।१६
उभयान्तपरिच्छिन्ना वस्तुसत्ता (न्या० वा० २।२।१२) १७१।६,७
उरु प्रथा उरु प्रथस्व (वाज० सं० १।२) ४०९।१३, २५, ४१२।३

उल्मुकैर्ह स्म पुरा समाजग्मुः	४०८।२२
ऋक्सामयजुरङ्गानां (शातातप०)	३५९।५,६
ऋग्भिः प्रातर्दिवि देव ईयते (तै० ब्रा० अन्तिमप्रपा० अ० १८)	३५५।५,६
ऋग्यजुःसामाथर्वविदः (शङ्खलिखितस्मृतिः)	३५९।८,९
ऋग्वेदो यजुर्वेदः (छा० उ० ७।६)	३५७।८
ऋचां प्राची महती (तै० ब्रा० अन्तिमप्रपा० अ० १०)	३५७।१८, ३५८।१,२
ऋचो वै ब्रह्मणः प्राणाः (शताध्ययने)	३५७।१४,१५
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्	१६१।११
एक एव रुद्रोऽवतस्थे न द्वितीयः	३७९।८
एकया प्रतिधापिबत् साकं सरांसि (ऋक् सं० ८।७७।४)	४१४।१७,१८
एकस्मै वा कामायान्ये यज्ञक्रतवः (शा० भा० उद्धृतम्)	३६२।१४,१५, २०
एकस्यार्थस्वभावस्य (प्र० वा० ३।४२)	१४३।१,२
एकार्थसमवायेन जातिर्जातिमती (श्लो० वा० शब्दनि० ३४०)	३२४।११,१२
एकेन तु प्रमाणेन	१५८।१२
एतदन्तास्तु गतयो (मनुसं० १।५०)	५।२२
एतन्न विद्मो यदि ब्राह्मणाः स्मोऽब्राह्मणा वा	४०१।६
एतयान्नाद्यकामं याजयेत्	३४४।१६, २२
एतयैव दिशा वाच्या (श्लो० वा० शब्दनि० ४११)	३०६।२२,२३
एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम (ता० ब्रा० १७।७।१)	६८।२२,२३; ४१८।१;
एवं त्रचतुरज्ञान (श्लो० वा० सू० २।६०)	४१६।१
एवंभूतोऽयं रौद्रश्चरुः	२८०।२३
एवं रूपं यत् तत् प्रत्यक्षं बोद्धव्यम् (शाब० भा० १।२।३)	१५३।१५
एवं सत्यनुवादत्वं (श्लो० वा० प्रत्यक्ष० ३६)	१५३।१५,१६
एष अपहतपाप्मा विजरो विमृत्युः (छा० उ० ८।१।५)	४२५।१६ २०
एष प्रत्यक्षधर्मश्च वर्तमानार्थतयैव	१६१।१५
एष वाव प्रथमो यज्ञानां (ता० ब्रा० १६।१।२)	३३२।१८; ३६०।२१
एष वै प्रथमः कल्पः (मनु० ३।१४७)	३६९।२४ २५
ऐन्द्राग्नं चरुं निर्वपेत् प्रजाकामः	६०।२३ २४

ऐन्द्रया गार्हपत्यमुपतिष्ठते (मै० सं० ३।२।४) ७२।१७
ओषधे त्रायस्वैनम् ४१०।१०
औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः (मी० सू० १।१।५) ३५।१४,१५
औदुम्बरीं स्पृष्ट्वोद्गायेत् ३७६।२२
कदाचन स्तरीरसि नेन्द्रसश्चसि दाशुषे (ऋ० वे० ८।५१) ४०८।१६
कपिलो यदि सर्वज्ञः सुगतो नेति का प्रमा ३८३।१२,१३
कर्णशष्कुल्यां पवनजनितः संस्कारः श्रोत्रम् (भर्तृमित्रवचनम्) २१८।२५,२६
कर्तृसामान्यसिद्धौ वा विशेषावगतिः कुतः २७६।२५
कर्मकर्तृसाधनवैगुण्यात् (न्या० सू० २।१।५६ भाष्ये) ३१७।२४
कर्मण्यण् (अष्टा० सू० ३।२।१) ३४०।२५
कर्मभिः सर्वबीजानां (श्लो० वा० सम्बन्धाक्षे० ७५) २८५।१
कर्षः कर्षोऽर्धपलं ३४८।२५,२६
कस्यचित्तु यदीष्येत (श्लो० वा० सू० २।४७) २३४।२४
कस्यचिद्धेतुमात्रस्य (श्लो० वा० सम्बन्धाक्षे० ७५) २८५।२०,२१
काकेभ्यो रक्ष्यतां सर्पिः (वाक्यप० २।३१२) ७८।१६,१७
काठकं कालापकं मौद्गलं पैप्पलादकम् (शाब० भा० १।१।२७) ३५६।१५
कामशोकभयोन्माद (प्र० विनि० पृ० ७४) १५८।२४,२५
कारीरीं निर्वपेद् वृष्टिकामः ३९५।१८
काल्पनिकेऽपि सन्ताने ३७।८
कुलालवच्च नैतस्य २८३।२५,२६
कुसुरविन्द औद्दालकिरकामयत, पुरुरवो मा मृथा (ऋ० वे० १०।९५।१५) ३३२।१७
कृत्तद्धितसमासेषु सम्बन्धाभिधानम् (कात्या० वा०) १२४।३
कृषिः पाशुपाल्यं वाणिज्या च वार्ता (कौ० अ०) ३८३।२२
कृष्णकेशोऽग्निनादधीत ३६८।९
कृष्णलमवहन्ति ७१।१४
कृष्णविषाणां चात्वाले प्रास्यति ७०।१७
केचित्तु पण्डितम्मन्या (श्लो० वा० शब्दनि० १३१) ३१७।१६,२०
को ह वै तद् वेद यदस्मिँल्लोकेऽस्ति न वेति ४०१।१०-११, ४०७।२
क्रतौ फलार्थवादमङ्गवत् कार्ष्णाजिनिः (मी०सू० ४।३।१७) ४०९।१५,१६

क्रत्वर्थो हि शास्त्रादवगम्यते (शाब० भा० ४।१।२) ३८४।२३,२४

क्रियावतामभेदे हि (श्लो० वा० शब्दाधि० ३६२) २९४।९,१०

क्रीतराजकभोज्यान्नवाक्यं (तन्त्रवा० १।३।२) ३५६।१९,२०, ३५६।१५

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष (यो० सू० १।२४) २६७।२५, २६
२८३।१३,१४

क्षीणदोषोऽनृतं वाक्यं न ब्रूयात्, हेत्वसम्भवात् (माठ० भा०, सा० का०) २१९।२५

क्षीरे दधि भवेदेवं (श्लो० वा० अभाव० ४) ८७।१२,१३

गामालभते ३१२।२५

गिरां मिथ्यात्वहेतूनां (प्र० वा० ३।२२४) २४०।२०,२१

गिरां सत्यत्वहेतूनां (प्र० वा० ३।२२५) २४०।२३,२४

गृहद्वारि स्थितो यस्तु (श्लो० वा० अर्था० ३४) ६५।१९,२०

गृहीत्वा वस्तुसद्भावं (श्लो० वा० अभाव २७) ८०।१३,१४

गोदोहनेन पशुकामस्य प्रणयेत् (आप० श्रौ० १।१६।३) ५७।२२, ७१।१३,
२३८।१

गौणो हि प्रयोगो न लक्षणायाम् (बृहती १।४) ७२।१३

ग्रहं सम्मार्ष्टि ४११।१४

घ्राणरसनत्वक्चक्षुःश्रोत्राणीन्द्रियाणि भूतेभ्यः (न्या०सू० १।१।१२) २१७।९,१०

चतुर्णिधनं भवति""यागभेषजानि (ता० ब्रा० १२।९।१८-२०) ३६४।३,५

चत्वारश्चतुर्णां वेदानां पारगा" परिषद् ३५३।७

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेश ॥ ४१०।७,८

चत्वारो वेदविदो (प्राचे० स्मृ०) ३५९।९,१०

चमसेनापः प्रणयन्ति २३७।२१

चयस्त्विषामित्यवधारितं पुरा (माघका० १।३) १३०।७,८

चोदनालक्षणोऽर्थो धर्मः (मी० सू० १।१।२) १५३।४,१३

चित्रया पशुकामः ३९५।१९

चित्रया यजेत पशुकामः (तै० सं० २।४।६।१) ३६३।१५, ३८९।८,
३९२।१६

चित्रादीनां फलं तावत् क्षीणं (श्लो० वा० चि० परिहार ११) ३९६।१-२

चिरस्थायीति (बृह० टी०)	३४।६
चोदितं तु प्रतीयेताविरोधात् प्रमाणेन (मी० सू० १।३।५।१०)	३४३।२१-२२,२७
चौरशब्दस्तस्करवचन ओदने दाक्षिणात्यैः प्रयुज्यते	३४०।२५,२६
छन्दसि परेऽपि (अष्टा० सू० १।४।८१)	२८०।१६
जन्मतुल्यं हि बुद्धीनां (श्लो० वा० वाक्या० २४६)	२२६।३-४
जरद्गवः कम्बलपादुकाभ्यां	३३७।२१
जातिमत्त्वेन्द्रियत्वादि (श्लो० वा० अनु० २१)	३२४।१५-१६
जातिविशेषे चानियमात् (न्या० सू० २।१।५६)	३४०।२३, ३४४।३
ज्ञानानुत्पत्तिकृतं सन्देहनिबन्धनम्.... इत्यलं बहूक्त्या (पुष्कराक्षवृत्तितः)	३७८।२२,२६
ज्योतिष्टोमेन स्वर्गकामो यजेत	३९५।१८,१९
ठक् ह्रस्वश्च (अष्टाध्यायी, वार्त्तिकम् ५।४।३४)	१५।२६
तच्चैव हि कारणं शब्दश्च (शाब० भा० १।१।५)	३९२।५
ततश्चेदाप्तवादेन (श्लो० वा० वाक्य०)	२२६।१,२
ततोऽन्ये कारणं हेतुः (अभिधर्मको० २।५०)	२५।१८
तत्प्रमाणं बादरायणस्यानपेक्षत्वात् (मी० सू० १।१।५)	२४०।१, ३५६।७
तत्र प्रत्ययैकतानता (यो० सू० ३।२)	६।२७
तत्र योऽन्वेति यं शब्दं (श्लो० वा० वाक्या० १६०)	२२४।७
तत्र सर्वेऽविशेषात् (मी० सू० ४।३।१०।२७)	३६२।२४
तत्राप्तवादनिर्मुक्त (श्लो० वा० सू० २।६८)	
तत्रापि व्याप्यतैव स्याद् (श्लो० वा० अनु० ९)	२७३।१५,१६
तत्रापूर्वार्थविज्ञानं (प्र० वा० भा० पृ० २१)	१६०।२५,२६
तथा चोदनयाप्यर्थं	२६६।२४,२५
'तथेदममलं ब्रह्म' बृहदार० भा० वा० ३।५।४४)	१४९।२५,२६
तथैव नित्यचैतन्याः (श्लो० वा० शब्दनि० ४०७)	३०८।२१,२२
तथ्यमपि भवति ...... (शाबर भा० १।२।२)	२३१।३
तदतद्रूपिणो भावाः (प्र० वा० ३।२५१)	११६।१३,१४
तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः (न्या० सू० १।२।५६)	३९१।३
तदभावः क्वचित् (श्लोक वा० सू० २।६२)	... ...
तदर्धिकं पादिकं वा (मनु० ३।१)	३५५।२३
तदाप्यविद्यमानत्वं (श्लो० वा० अर्था० ३५)	६५।२४,२५

तदुपदेशेषु न प्रत्येतव्यम् (बार्हस्पत्यमतम्) ३८८।४
तदेवार्थमात्रनिर्भासं (योग सू० ३।३) ६।२६
तद्गुणास्तु विधीयेरन् ······ (मी० सू० १।४।६।९) ४१८।९
तद्वचनादाम्नायस्य प्रामाण्यम् (वै० सू० १।१।३) ३५६।६
तमेनं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ··दानेनानाशकेन वा ।
(प्रश्नोपनि० १।२, बृहदा० ४।४।२२) ४२६।२३,२४
तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते
यश्चैवं वेद । ४०१।१६,१७
तरुण्येकाहमेवास्मि सार्धं दुकूच्छ्र्तिहीनया । श्वश्रा चिरगतो भर्ता
पान्थ मा मे गृहं विश । (ध्वन्यालोकः) ७७।१३,१४
तस्मात् कर्मविधानासंभवाद् ···सापेक्षत्वाच्चाप्रामाण्यं प्रसक्तम् ४१६।२३,२७
तस्मादग्रवदेवात्र (श्लो० वा० सम्बन्धाक्षे, ११३) २८५।१८,१९
'तस्माद् धर्मविशिष्टस्य' (श्लो० वा० अनुमान ४७) १८६।११,१२
'तस्माद् वा एतस्मात्' (तैत्ति, ब्रह्मोपनि० २।३) ३५७।१६,१८
तस्माद्वा एतेन पुरा ब्राह्मणा ··· (न्या० भा० २।१।६४) ३३१।२२,२३
'तस्माद् वैधर्म्यदृष्टान्ते' (प्र० वा० ३।२५) १६७।१८,१६
'तस्मिन् सीद' (तै० ब्रा० ३।७।५) ७३।८
तस्य भावस्त्वतलौ (अष्टाध्यायी ५।१।११९) १७१।२२
तां चतुर्भिरादत्ते ४१३।८
तृतीयासप्तम्योर्बहुलम् (पाणिनि० २।४।८४) १४०।२१
तेजो वै घृतम् ४०८।६,१०
तेन तुल्यं क्रियाचेद् वतिः (अष्टाध्यायी ५।१।११५) १९३।२६
तेन प्रोक्तम् (अष्टाध्यायी ४।३।१०१) ३६०।१५
तेन यत्राप्युभौ धर्मौ (श्लो० वा० अनु० ६) २७३।३,४
तेनोपनीतसम्बन्ध (श्लो० वा० शब्द० ४०८) ३०८।२३,२४
तेषामृग् यत्रार्थवशेन (मी० सू० २।१।३५,३७)
(शाबरभा० २।१।३७) ३६५।६
त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्ववत्त्वादीनि (वै० सू०) ११६।२१,२२
त्रयीरूपेण तज्ज्योतिः प्रथमं परिवर्तते (वाक्यप० १।१) ३४७।२३
त्रयो वेदा असृज्यन्त ३५७।११,१२

त्रिः प्रथमामन्वाह त्रिरुत्तमाम् २२०।२७, ३९०।१८
त्रिकेण विरुध्यते (जै० न्यायमाला १।४।६) ४२।२७
त्रिनाचिकेतो विरजा (पराशरस्मृतिटीकायां माधवाचार्योद्धृतं यमवचनम्) ३६९।१७,१८
त्रिविधा चादृश्यता भवति (न्या० बि० २।२७) ६०।२२
त्रैकाल्यासिद्धेर्हेतोरहेतुसमः (न्यायसू० ५।१।१८) १३।२७
त्रैलक्षण्यपरित्यागो (श्लो० वा० शब्द० १८) २२५।२४,२५
त्वामग्ने पुष्करादध्यथर्वानिरमन्थत (तै० सं० ३।५।११) ३५८।६,१७
दण्डी मैत्रावरुणः प्रैषानन्वाह १३१।७
दधानं तच्च तामात्मन्यर्थाधिगमनात्मना (प्र० वा० २।३०८) २६।१७
'दध्ना जुहोति' ४०२।१६
दन्तुरो रोमशः ... तं चैत्रमवधारयेः २०७।१२,१३
दब्धिर्नामास्य दब्धोऽहं भ्रातृव्यं दभेयम् (तै० सं० १।६।२।४) ५८।१७,१८
दर्शनसमनन्तरोत्पत्त्यवाप्तदर्शनच्छायानुरज्यमानवपुषो विकल्पाः । (तु० हेतुबिन्दुटीका, पृ० ३३) ४६।८
दर्शनस्य परार्थत्वात् (मी० सू० १।१।६।१८) ३०४।२१, ३०५।६
दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः ६०।२३,६८।२०
दिक्ष्वतीकाशान् कुर्यात् ४०७।१४
दुष्टकारणबोधे तु (श्लो० वा० सू० २।५८) २३८।४,५
दृश्यविकल्पावर्थावेकीकृत्य प्रवर्तते (प्र० वा० स्वोपज्ञवृ० पृ० २५) ३६।८
दृष्टः श्रुतो वा (शाबरभा० १।१।५) ६८।६
दृष्टानुगुणसाध्यत्वादिति (तन्त्रवा० १।३।२ पाठान्तरम्) ३७२।१५
देवा वै देवयजनमध्यवसाय दिशो न प्रजानन् इत्थं व्यामोहाना-मादित्यश्चप्रर्नाशंयिता यथा दिङ्मोहस्य ४०५।१२,१३
देशान्तरगतं कार्यम् (श्लो० वा० शब्दनित्य० ६२) ३००।१८,१९
दैविकानां युगानान्तु (मनु० १।७२) २७१।२५,२६
दोषज्ञाने त्वनुत्पन्ने १८१।२३-२४, ३७६।२५
द्वा सुपर्णा सयुजा (मुण्डको० ३।१) २८१।२१ २२
द्वाविमौ पुरुषौ लोके (गीता १५।१६) २८१।१६,१७
द्विगुप्राप्तापन्नालंगतिसमासेषु (वार्त्तिकम् २।४।२६) १४०।२४

द्वे यज्ञवृत्ती भवतो वैहारिकी च पाकयज्ञवृत्तिश्चेति ३७०।१
धन्वन्निव प्रपा असि त्वमग्ने ३७२।२०
धर्मे प्रमीयमाणे तु ८।११
धर्मो न कार्यः (बार्हस्पत्यमतम्) ३८८।४
धूमावगमवेलायां .. (श्लो० वा० अर्था० २०) ५५।२६
धूम एवाग्नेर्दिवा ददृशे नार्चिः, अर्चिरेवाग्नेर्नक्तं ददृशे न धूमः २२८।२१, ४०१।६, ४०६।१६
न कर्मकर्तृसाधनवैगुण्यात् (न्या० सू० १।२।५७) ३११।६
न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् (न्या०सू० २।२।१) १९।२६
न च स्वर्गफलस्येह कश्चिदंशोऽनुवर्तते (श्लो० वा० चित्रा० परि० १५) ३६६।२२
न चाप्ययुतसिद्धानां (श्लो० वा० प्रत्यक्ष० १४६) ८३।२१
न चैतदस्ति यज्ञस्यैव वाद .. ... यज्ञोऽस्ति (शाबरभा० ३।३।१२।३३) ३६०।२४
न चैतद् विद्मो यदि ब्राह्मणाः स्मो ... .. (गोपथब्रा० पूर्व० ५।२१) ४०६।१८
न जातिकायदुष्टान् प्रव्राजयेत् (विनयपिटक) ३८५।४,५
न तस्य किञ्चिद् भवति न भवत्येव केवलम् (प्र० वा०) ९५।२०
ननु चैत्राधिष्ठितदेशव्यतिरिक्तसमीपदेशे... .....अवगमाभावादर्थापत्तिपूर्वकत्वम् (उम्बेकटीकायां श्लो० ३५) ६६।९-१३
न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवि ४०२।३
न मे पार्थास्ति कर्तव्यं (गीता ३।२२) ५।१३
नर्ते भृग्वङ्गिरो विद्भ्यः सोमः पातव्यः (गोपथब्रा० १।१) ३६४।१८,१९
न वा अरे अहं मोहं ब्रवीमि अविनाशी वा अरेऽयमात्मा मात्रा संसर्गस्तस्य भवति । ३८८।६,७
न सोऽस्ति प्रत्ययो लोके (वाक्यपदीयम् १।१२३) १२४।८,९,१४-१५
न हायनैर्न पलितैः ३५६।१७,१८
न हि श्रावणता नाम (श्लो० वा० अनु० ६०) ४७।७,८

न ह्यज्ञातेऽर्थे कश्चिद् बुद्धिमुपलभते (शाबरभा० १।१।५) २८।२, २३३।२५

नान्यतो वेदविद्भ्यश्च … (श्लो० वा० ४३) १०।२२

नान्यथा ह्यर्थसद्भावो (श्लो० वा० शून्य० १७८) २८।४ ५

नारं स्पृष्ट्वास्थि सस्नेहम् ३८२।२६

नारायणं नमस्कृत्य (महाभार०) ३३०।२४

नासिद्धे भावधर्मोऽस्ति (प्र० वा० ३।१९०) ५८।२३ २४; १८८।१२

नित्यस्तु स्याद् दर्शनस्य परर्थत्वात् (मी० सू० १।१।६।१८) २९३।१५ ३१३।२, ३;

निर्विषयत्वे ज्ञानस्य (मध्यमकशा० १ तुलनीयम्) २६।२४

निर्व्यापारत्वात् सर्वधर्माणाम् (प्र० समुच्चयवृत्तिः १,
प्रा० वा० भा० पृ० ३६६) २६।२१

निवेशनः सङ्गमनो वसूनाम् (मै० सं० २।७।१२) ७२।१५

नीचैः सदो मिनुयात् ३६६।१४

न्यायमार्गतुलारूढं (हेतु० बि० टी० पृ० १) १५२।२३

न्यायोक्ते लिङ्गदर्शनम् (मी० सू० ३।८।२१।४१) ३२५।१८

पञ्चदशां सामिधेनीरनुब्रूयात् ३९०।२४,२५

पञ्चरात्रञ्च सांख्यञ्च वेदाः (महाभा० शान्ति० ३३७।५६) ३७६।१५, १६

पनः पुम् (अष्टाध्यायी ७।४।१९) ३३३।२०

पयसा जुहोति ४०२।२०

परं तु श्रुतिसामान्यमात्रम् (मी० सू० १।१।८।३१) ३३३।२८

पशुबन्धयाजी सर्वाल्लोकानभिजयति ४०१।१६

पाचकत्वौपगवत्वराजपुरुषत्वादौ…… १२४।२०

पान्थ मा मे गृहं विश (ध्वन्यालोकः) ७६।६

पावमानीं जपेत् ४११।८,६

पिण्डसारूप्यमेव सामान्यम् १९८।१९

पुत्रकामः पुत्रेष्ट्या यजेत ३९०।२

पुत्रेष्ट्या यजेत ३८९।८

पुराणं धर्मशास्त्रं… ३५९।३

पुराणं तर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः । (याज्ञवल्क्यस्मृ०) ९।४, ३५८।१२

पुरुरवो मा मृथा···· (ऋग्वेदः १०।९५।१५) ३३२।२५,२६
पुरुषशीर्षमुपदधाति ३८२।२५
पूर्णाहुत्या सर्वान् कामानवाप्नोति ४०१।१५,१६
पूर्वसंस्कारयुक्तान्त्य (श्लो० वा० शब्द० १६) २२५।२०
पृथिव्यापस्तेजोवायुः (लोकायतसू० २) १००।२०
पौर्णमास्यां पौर्णमास्यया यजेत अमावस्यायाममावस्यया यजेत २०३।७
पौल्कसोऽपौल्कसश्चाण्डालोऽचाण्डालो ब्राह्मणोऽब्राह्मणः श्रमणोऽश्रमणः (बृहदा० पनि० ४।३।२२) ३८७।२४
प्रकृतिवद् विकृतिः कर्तव्या ७५।२५,३७५।२५
प्रजापतिः सोमेन यक्ष्यमाणो···· (गोपथब्रा० पूर्व० प्र० पृ० १, पृ० ११-१५) ३६१।५,१३
प्रजापतिरकामयत···· (शतपथ० का० ११, प्रपा० ४, ब्राह्म० ११) ३५५।७-११
प्रजापतिर्वा इदमग्र आसीत्···(शतपथ० ११।४।३।८) ३६७।२०-२३
प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति ४०८।४
प्रतिनिधिरपि चैवं··············(श्लो० वा० उप० २३) २१५।१
प्रति मन्वन्तरं चैषा श्रुति···· ३३३।२
प्रतिराभिमुख्ये वर्तते ··· (युक्तिदीपिका, कारिका ५) १६३।१७
प्रतिविषयाध्यवसायो दृष्टम् (सांख्यकारिका) १६३।१५
प्रत्यक्षत्वमदो हेतु० (श्लोक० वा० प्रत्यक्ष० २१) १५५।६
प्रत्यक्षपूर्वकं संज्ञाकर्म २०६।१९, २०७।१
प्रत्यक्षादेरनुत्पत्तिः (श्लो० वा० अभाव० १०) ७९।१४
प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि० (न्या० सू० १।१।३) ४।११
प्रत्यक्षेणाध्यवसितो यः (बोधिचर्यावतारः ८।१०१ तुलनीयम्) ३६।२४
प्रत्यायक इति प्रत्ययं दृष्ट्वा (शाबरभाष्यम् १।१।५) ३४२।२६
प्रदीपः सर्वविद्यानां (न्या० भा० १।१।१) १८।२२
प्रपाः प्रवर्तयितव्याः ३२७।२०
प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् (न्या० सू० भा० १।१।१) २४८।३

५

प्रमाणमविसंवादकम् ३५।४
प्रमाणस्यागौणत्वात् ··· (ग्रन्थिभङ्गग्रन्थसम्पादकमतानुसारं सम्भाव्यते यत् लोकायतसूत्रमिदम्) १७७।, १८३।६
प्रमाणान्तरदर्शनम् (बृहती १।१।२) २३०।२४
प्रमाता प्रमाणं प्रमेयं प्रमितिरिति चतसृषु विधासु तत्त्वं पारिसमाप्यते (न्या० सू० भा० १।१।१) २९।१
प्रयत्नेनान्विच्छन्तो न चेद् दोषमवगच्छेम···· (शाबरभा० १।१५) २४६।२०
प्रयाजशेषेण हवींष्यभिघारयति (मी० सू० ४।१।१४) ७०।२,१३
प्रसक्तप्रतिषेधेऽन्यात्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः १६३।४
प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् (न्या० सू० १।१।६) ४१।१८, २०९।४
प्रागुच्चारणादनुपलब्धेः (न्या० सू० २।२।१८) ३२४।४
प्राग्भागो यः सुराष्ट्राणां मालवानां स दक्षिणः।
प्राग्भागः पुनरेतेषां तेषामुत्तरतः स्थितः॥
(श्लो० वा० शब्दनित्यता १६३-१६४) २०४।१६
प्राजापत्यं शतकृष्णलं चरुं निर्वपेदायुष्कामः ३७५।१८
प्राजापत्यमजं तूपरमालभेत ४०५।९
प्राजापत्यां तु कृत्वेष्टिम् (बृहती ७।१) ३७४।२१
प्रापकं प्रमाणम् ३९।२५
प्रापणशक्तिः प्रामाण्यम् (धर्मोत्तरप्र० पृ० १६, रत्नकीर्तिनिबन्धः, पृ० ९०, प्र० वा० भा० पृ० २२) ३५।९
प्राप्य गाण्डीवधन्वानं विद्धि कौरव तान् स्त्रियः ३९०।२०
फलमात्रेयो निर्देशात् (मी० सू० ४।३।१८) ४०८।५
फलति यदि न सर्वं तत् कदाचित् तदेव ध्रुवमपरमभुक्तं कर्म शास्त्रीयमास्ते ३६२।७, ३९७।६
फलांशे भावनायाश्च प्रत्ययो न विधायकः (श्लो० वा० २ सू० २ श्लो० २२२) ४२६।३-४
बबरः प्रावाहणिरकामयत (तै० सं० ७।१।१०) ३३२।१७
बर्हिर्देवसदनं दामि (मै० सं० १।१।२) ५७।१५, ४१०।२२

बाधके सति स न्यायो नानुभूतं त्यक्तव्यम्	३७८।६
बुद्धिकर्मणी अपि हि प्रत्यभिज्ञायेते तेऽपि नित्ये प्राप्नुतः	३१।१४
बुद्धिरुपलब्धि•••(न्या० सू० १।१।१५)	२१८।२३
बुद्धीनामपि चैतन्यं (श्लो० वा० शब्द० ४०४)	३०८।१५
बुद्ध्यारूढत्ववर्णनात् (प्र० वा० स्वोपज्ञवृत्तौ पृ० २ उद्धृतम्)	५०।७
बृहत्पृष्ठं भवति रथन्तरपृष्ठं भवति	३७४।१४
ब्रह्मणे त्वा प्राणाय जुष्टं निर्वपामि (काठकशताध्ययने)	३६३।२१-२८
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे । (मनु० २।३७)	३९३।१७
ब्रह्मवादिनो वदन्ति पुरा वा (काठकशताध्ययने)	३६३।६—३६४।१
ब्रह्म ह वा इदमग्र आसीत् (गोपथब्राह्मण पूर्व० प्र० १, पृ० २,४)	३६६।२०-३६७।२
भम धम्मिअ वीसत्थो (गाथासप्त० २।७५)	७६।६, २२
भिन्नानुमानादुपमेयमुक्ता••••••(श्लो० वा० उप० ५२)	२१४।१०
भूयोऽवयवसामान्य••••••(श्लो० वा० उप०)	२१२।१६
भ्रम धार्मिक विश्रब्धः	७६।२४
भ्रान्तेरनुभवाद् वापि (तन्त्रवा० १।३।२)	३८६।७
भृग्वङ्गिरोविदा संस्कृतोऽन्यान्••••••	३६७।५
मणिप्रदीपप्रभयोः (प्र० वा० २।५७)	३६।२०
माता च भगिनी चैव तथान्या या स्वगोत्रजा । गम्याऽपरा त्वगम्येति नाथ एवं किलाब्रवीत् ॥	३८१।२४
माषानेव मह्यं पचत	४०८।२१
मुनयो वातरशना (ऋग्वेदः १०।१३६।२)	३८७।५
मध्यमे पय आहुतयो ••••••(शतपथ० ११।३।८)	३५८।२-५
मन एवाक्षरमूर्ध्वमुदगात् •••(गोपथब्रा० १।१)	३६७।२४-२६
मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् (न्या० सू० २।१।६८)	३५०।२१, ३५६।६
मन्वादिचोदनान्यायः स यद्यपि न विद्यते	३८५।२५
ममत्वदृष्टिमात्रेण	१८१।१७
मुखे शब्दमुपलभामहे भूमावर्थम्	३३८।२३
मुखे हि शब्दमुपलभामहे	२२३।२२

मुधैषां बहुमानोऽयम् (श्लो० वा० शब्दनित्यता १३२)	३१७।२१
मृद्दण्डचक्रसूत्रादि ······तूत्पन्नमपेक्षते	२३३।१८
मेदसा तर्पयेद् देवान् (याज्ञवल्क्यस्मृ० १।४४)	३६६।१३
मैत्रावरुणः प्रैष्यति चानु चाह	१३१।२१
यः कश्चित् कस्यचिद्धर्मो (मनु० १।७)	३८७।१०
यः प्रागजनको बुद्धे (प्र० विनि० ४२)	१४१।१६
यच्च कालान्तरे फलस्यान्यत् प्रत्यक्षं कारणमस्ति (शाबरभाष्यम् १।१।५)	३९२।१८
यजमानः प्रस्तरः	४०२।७, ४०७।१०
यज्जातीयैः प्रमाणैस्तु	१६२।४
यज्ञाथर्वाणं वै काम्या इष्टयः (तैत्ति० सं० २।४।६।१)	३६३।५
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्	३९९।८
यज्ञे यदूनञ्च ··तेजसाप्याययति (गोपथ०)	३६४।५
'यत्कालं हि मर्दनं तत्कालं हि मर्दनसुखम्'	३०९।१६ ३६३।१
यत्नेन भोजयेत् (मनु० ३।१४५)	३५५।१४, ३६८।१४
यत्र च दुष्टं करणं (शाबरभा० १।१।५)	२३७।१५
यत्र तेनैव धूमेन···· सामान्यतोदृष्टम् (तुल० श्लो० वा० अनु० १४०-१४३)	१६६।२१-२२
यत्र प्राणिवधो धर्मस्त्वधर्मस्तत्र कीदृशः।	३८४।७
यत्रान्या ओषधयो म्लायन्ते तत्रैते मोदमानास्तिष्ठन्ति (शाबरभा० १।३।४।९)	४१४।२५
यत्रापि स्यात् परिच्छेदः (श्लो० वा०)	३३।१४
यत्राप्यतिशयो दृष्टः (श्लो० वा० चोदना० ११४)	१५७।१०
यत्राप्यनुमितार्ल्लिङ्गाद् (श्लो० वा० अनुमान० १७१)	१८६।४
यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ (ध्वन्या० १।१३)	७६।१६
यया गौरेवं गवय इत्युपमाने प्रयुक्ते (न्या० भा० १।१।६)	२०६।२५
यथाध्यवसायमतत्त्वाद् ······(प्र० वा० स्वोपज्ञवृ० पृ० ३२)	३७।३
यथाध्यवसितप्रापकञ्च प्रमाणम्	३६।२
यथाफलस्य हेतूना (प्र० वा० २।३०९)	१११।२३
यथार्थ एव प्रमाणोद्देशः (न्या० सू० भा०)	१९।११
यथा वा दर्पणः स्वच्छो (श्लो० वा० शब्दनि० ४०६)	३०८।१९

यथा विशुद्धमाकाशं (बृहदार० भा० वा० ३।५।४३) १४९।२३

यथा हि स्वप्नदृष्टोऽर्थः २६६।२२

यदग्नये च प्रजापतये च सायं जुहोति ४०२।२०

यदन्तर्ज्ञेयरूपं हि बहिर्वदवभासते (आलम्बनपरीक्षा ६) २५४।१

यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलम् (न्या०सू०भा० १।१।३) ११३।७

यदा ज्ञानं वृत्तिस्तदा हानोपादानोपेक्षा बुद्धयः प्रमितिरिति
(न्या० सू० भा० १।१।३) १०६।२,१९

यदाभासं प्रमेयं तत् (प्र० समु० १।१०) ११३।३

यदि श्रृक्त आर्तिमार्च्छेद् ... (अथर्ववेदः) ३६८।१६

यदि त्ववश्यं वक्तव्य ... (श्लोक० वा० शब्दाधि० १५०) ३१७।१२

यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये ... (मै० सं० ४।४।९) ३४४।१७

यदि वर्षेत् तावत्येवेष्टिं समापयेद् ३९४।११

यदुत्पत्तौ यत्सन्ताननिवृत्तिः (प्र० वा० भा० ७८) २५।१९

यद्दचा हौत्रं क्रियते ... ३६१।१४-३६२।२

यद् ऋचोऽधीते घृतकुल्या भवन्ति ४११।२३-२४

यदेतत् त्रय्यै विद्यायै शुक्रम् (शतपथ० ११।४।१४) ३६४।२५

यद् वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः २६७।८

यवमयश्चरुः ४१४।८

यस्मिन् प्रीतिः पुरुषस्य ... (मी० सू० ४।१।२) ३८४।२०

यस्य खादिरः स्रुवो भवति ४०९।१७

यस्य गुणस्य हि भावाद् (तु० न्या० वा० २।२।१२) १७१।२०-२१, २६

यस्य ज्ञानमयं तपः ३५५।२१

यस्य यत्र यदोद्भूतिः (श्लो० वा० अभाव० १३) १५०।१८, १५१।१७

यस्य वस्त्वन्तरा भावो (श्लो० वा० अर्था० ४०) ६७।१,२४

यस्योभयं हविरार्तिमार्च्छेत् (तै० ब्रा० ३।७।१।७) ६९।१८

यां जना अभिनन्दन्ति रात्रिं धेनुमिवायतीम् (अथर्ववेदः ३।१०) ५६।२१,३७२।१९

यादृगिति (प्र० वा० १।१३) २७५।५

यावज्जीवं सुखं जीवेत् (बार्हस्पत्यमतम्) ३८८।३

यावद्धीन्द्रियसम्बद्धं तत् प्रत्यक्षमिति स्थितम् (श्लो० वा० उप० ९)

येन केन च यजेतापि दर्विहोमेनापहतपाप्मैव भवति ४२६।२५
येऽपि चातिशया दृष्टा १५७।१३
येषामनवगतोत्पत्तीनाम्....(शाबरभा० १।१।६।२१) २७२।१३, २०-२५
येऽस्य प्रत्यञ्चो रश्मयस्ता (छान्दोग्योपनि० ३।३) ३५७।१५
यैरुक्ता तत्र वैधर्म्य...(श्लो० वा० शब्द० १७) २२५।२२
योगसिद्धिर्वार्थस्योत्पत्तियोगित्वात् (मी० सू० ४।३। १०।२७) ३६२।२५
यो ब्राह्मणायावगूरेत् तं शतेन यातयात् (तै० सं० २।६।१०।२) ४०५।२०
यो यस्य देशकालाभ्यां (श्लो० वा० अनु० ५) २७३।२२
यो वृष्टिकामः स सौभरेण स्तुवीत, यदि कामयेत वर्षेत् पर्जन्यः (ताण्डयब्रा० ८।८।१८) ३९६।१३,२३
यो हि बर्हिषि रजतं ददाति पुरा अस्य संवत्सराद् गृहे रोदनं भवति ४०५।८
रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते ३४।२५, ३६।१०, १६११३
राजा राजसूयेन स्वाराज्यकामो यजेत ३४४।११
राजा स्वाराज्यकामो वाजपेयेन यजेत ४२।११
राज्ञामादेष्टृत्वमेव हर्तृत्वम् ३८।१६
राज्ञो बलार्थिनः षष्ठे (मनु० २।३७) ३९३।२४
रोधोपघातसादृश्येभ्यो.... (न्या० सू० २।१।३७) १९१।२२
रौद्रं चरुं निर्वपेत् ३२९।२२
लिङ्गलिङ्गिधियोरेवं (प्र० वा० २।८२) ३६।२२
लोहितोष्णीषा ऋत्विजः प्रचरन्ति १३१।८
वक्ष्यते जैमिनिश्चाह तस्य लिप्सार्थलक्षणा (श्लो० वा० चोदना० सू० २२३) ४२६।१६
वर्णाश्रमाश्च स्वकर्मनिष्ठाः....(ब्रह्मसू० शाङ्करभा० ३।१।८) ३९५।४
वर्तमानाभावः पततः पतितव्यपतितकालोपपत्तेः (न्या० सू० २।१।३९) २०३।२२
वर्हिषि रजतं न देयम् ४०५।७
वसन्ते ब्राह्मणोऽग्नीनादधीत २०३।८
वस्तुत्वात्तु गुणैः (श्लो० वा० चोदना० ३९) २३२।२७
'वस्तुभेदप्रसिद्धस्य' (प्र० वा० १।१४) २७४।९
वाक्छूस्त्रं ब्राह्मणस्य...... मनु० ११।३३। ३५८।२६

'वाचारम्भणं नामधेयं विकारो मृत्तिकेत्येव सत्यम्'
(छान्दोग्योप० ६।१।४) १४८।२०
वाचा निरूपनित्यया (शाबरभा० १।१।७।२३) ३०४।२२ ३२५।१९
वायव्यं श्वेतमालभेत भूतिकामः (तै० स० २।१।१) ४०३।१६
वायुर्वै क्षेपिष्ठा देवता ४०३।१६
वाराही उपानहौ ४१४।८
वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ३९७।१
विकल्पयोनयः शब्दा ··· (बौद्धानां कारिकेयम्) २२९।९
विज्ञानघन एवैतेभ्यो भूतेभ्यः ३८७।१४
विज्ञानादिभावे वा तदप्रतिषेधः (वेदान्तसू० २।२।४४,
विधिस्तुत्योः सदावृत्तिः समानविषयेष्यते । ४०५।१
विनियोक्त्री श्रुतिर्यत्र (तु० शाबरभा० ३।३।७।१४) ५६।१८
विनियोक्त्री श्रुतिस्तावत् (तन्त्रवा० ३।३।१४) ५७।२
विभाषा चेट्श्व्योः (अष्टाध्या० ३।१।४९) २२१।२२
'विशेषणं विशेष्यश्च' (प्र० वा० २।१४५) १४२।८
विशेषेऽनुगमाभावाद् (कर्णगोमि० पृ० २६) १७७।१२, १८३।१०
विश्वजिता यजेत (ताण्ड्यब्रा० १९।४।५) ५९।२६
विश्वतश्चक्षुरुत विश्वतोमुखः (तै० आ० १०) २८०।१
विस्पष्टमिष्टमेतच्च (श्लो० वा० अनु० ८) २७३।१९
विस्रधारामृतञ्चैव मेदोरुधिरमेव च ।
पवित्रं भैरवे तन्त्रे साधकानां न संशयः ॥ ३८०।२४
वृत्तिस्तु सन्निकर्षो ज्ञानं वा (न्या० सू० भा० १।१।३) १०६।१८
वेदप्रामाण्यं जातिवादावलेपस्तीर्थे ··· (धर्मकीर्तिः) ३८१।१६-२२
वेदस्याध्ययनं सर्वम् ३२७।२०
वेदैवासौ मयैतत्कर्तव्यमुपायं तु न वेद ४२६।१५
वेदांश्चैके सन्निकर्षं पुरुषाख्या (मी० सू० १।१।८।२७) ३३७।२५; ३५९।२५
वेदानधीत्य वेदौ वा (मनु०) ३६८।४
वैतसे कटे प्राजापत्या सञ्चिनोति ४१४।८
व्यतिषक्ततोऽवगतेर्व्यतिषङ्गस्य (बृहती० १।१।७) २२७।२३
व्यवहिताश्च (अष्टाध्यायी १।४।८२) २८०।१६
व्रीहीन् अवहन्ति ५६।२७, ४०२।२१

व्रीहीन् प्रोक्षति	४०३।१
शतकृष्णलं चरुं प्राजापत्यमायुस्कामो निर्वपेत्	३८५।२४
शन्नो देवीरभीष्टये (अथर्ववेदः)	३२७।९, ३३०।२४, ३५९।१४
शब्दवृद्धाभिधेयास्तु (श्लो० वा० सम्बन्धाक्षेपः १४०)	१३३।२६, ३४५।६
शब्दे दोषोद्भवः (श्लो० वा० सू० २।६२)	२३९।११
शयाना भुञ्जते यवनाः (महाभाष्यम्)	३८४।२६
शरद्युद्रिक्तपित्तस्य ज्वराय दधि कल्पते	३४९।३
शस्त्रौषधादिसम्बन्धात् (प्र० वा० १।२४)	२६८।२६
शुचिना कर्तव्यम्	३७१।२४, ३७३।२५
शुन्धध्वं दैव्याय कर्मणे (तै० सं० १।१।३।१)	७३।२७
शृणोतु ग्रावाणः	४१०।११
शृण्येव जर्फरी तुर्फरी तु	४१०।१४
शोभतेऽस्य मुखं य एवं वेद	४०१।१३, ४०७।३
श्यामो वा अस्याहुतिमभ्यवहरति ···	३९०।६-११
श्येनेनाभिचरन् यजेत	३८४।१४
श्रामण्यममलो मार्गः	३८७।२५
श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यभिचारयन् । (मनु० ११।३३)	३५८।९
श्रोतुश्च प्रतिपन्नत्वं (श्लो० वा० सम्बन्धाक्षेप० १४०)	३४५।१०
श्रोत्रशब्दः प्रसिद्धोऽयं (श्लो० वा० शब्दनित्यता १३७)	२१७।२३
श्वयतेरः (अष्टाध्यायी ७।४।१८)	२२१।२२
षट्त्रिंशदाब्दिकं ···· (मनु० ३।१)	३६८।३
षण्णामाश्रितत्वमन्यत्र नित्यद्रव्येभ्यः । (प्रशस्तपा० साधर्म्यप्रक०)	३२१।२२
षाट्त्रिंशदाब्दिकं चर्यं (मनु० २।१४५)	३५५।१२
संख्याभावात् (मी० सू० १।१।६।२०)	३१३।५
संख्यायुक्तं क्रतोः प्रकरणात् (मी० सू० ३।३।१२।३२)	३६०।२१
संज्ञित्वं केवलं परम् (श्लो० वा० प्रत्यक्ष० १७५)	१२४।१
सं ते वायुर्वातेन गच्छतां सं यजत्रैरङ्गानि समाशिषा यज्ञपतिः (मैत्रा० सं० १।२।१५)	२६४।२१, ३३१।१६
संयोगान्तं कर्मेति न्यायात्	१९७।११

संशयात्मा विनश्यति (गीता ४।४०)
संस्कारव्यतिरिक्ते च (श्लो० वा० शब्दनि० १३६) ३१७।२२
स एतामिष्टिमपश्यत्……(तै० सं० ७।१।१०) ३३२।२१
स एव चोभयात्मायं (श्लो० वा० अनु० २४) १९०।२४
स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति (शाबरभा० १।१।५) २२८।१८, ३९०।४
स एष वाव प्रथमो यज्ञानां (न्या० भा० २।१।६४) ३३१।१८
सक्तून् जुहोति ७१।११
सङ्केतस्मरणोपायं (प्र० वा० २।१७४) १४२।१२
सत्यकामः सत्यसङ्कल्पः २८३।१०
सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां (मी० सू०) १५३।२, १५५।२
सम्यगर्थे हि संशब्दो (श्लो० वा० प्रत्यक्ष० ३८) १५३।१६
सदसती तत्त्वम् (न्या० भा० १।१।१) ९३।१७, २०
सदृशक्षणसन्ततेरदृष्टान्तरालायाः ……(तु० प्र० वा० भा० २०३) (प्र० वा० स्वोपज्ञ० २४) ३७।२४
सदृशप्रत्ययहेतुत्वमेव सादृश्यम् । (बृहती १।१।५) २२२।६
स द्विविधो दृष्टादृष्टार्थत्वात् (न्या० सू० १।१।८) ३५०।२०
सन्तानाध्यवसायजननमेव प्रापकत्वम् । (धर्मोत्तरप्र० पृ० २७) ३५।१२
सतस्यैव हि लभ्येत (श्लो० वा० प्रत्यक्ष० ३७) १५३।२४
सभागहेतुः सदृशाः (अभिधर्मको० २।५२) २५।१६
समानविषयत्वे च जायते सदृशी मतिः ४६।५
समिधो यजति (शतपथ० २।६।१।१) ५८।१६, ६८।१९
समीहा प्रवृत्तिरित्युच्यते सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः (न्या० भा० १।१।१) २४६।१
समुद्राद् वह्निरुत्थितः ३३७।१९
समेषु कर्मयुक्तं स्यात् (मी० सू० २।२।१२।२७) ४१८।१०
सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादिना १६१।१४
सम्बन्धस्त्रिप्रमाणकः (श्लो० वा० सम्बन्धाक्षेप: १४१-१४२) १३३।१९ ३४५।८

सम्भवमात्रनिरसनीयश्चाभावो नाशङ्कितसिद्धिमपेक्षते ३७७।२५

सम्भवाद् वेदयोगस्य ३७८।८

सम्यगर्थो हि संशब्दो....(श्लो० वा० प्रत्यक्ष० ३८) १५४।१

सर्वं कर्माखिलं पार्थ....(गीता ६।३) ४२७।९

सर्व एवायमनुमानानुमेयव्यवहारो
(प्र० वा० स्वोपज्ञवृत्तौ कस्यचिदुक्तिः, पृ० २) ५०।२४-२५

सर्वजिता यजेत ४०४।१५

सर्वजिता वै देवाः समयजन् सर्वस्याप्त्यै....(न्या० भा० २।१।६४)
उद्धृतमिदम्) ३३१।१७

सर्वजिता वै देवाः सर्वमयजन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्व-
मेवैतेन सर्वं जयति ४०४।१६

सर्वत्र यौगपद्यात् (मी० सू० १।१।६।१९) ३१३।३

सर्वत्र विशेष्यप्रवणैव मतिः १३१।१२

सर्वदा चापि पुरुषाः प्रायेणानृतवादिनः
(श्लो० वा० चोदना० १४४) ३७७।१७

सर्वस्यैव हि शास्त्रस्य......(श्लो० वा० श्लो० १२) ११।२५

सर्वस्वारेण मरणकामो यजेत ३८५।२३

सर्वोऽनिर्धारितः पूर्वः १७५।२१

सव्यापारप्रतीतत्वात् (प्र० समु० १।९) ११३।१

सव्यापारमिवाभाति (प्र० वा० २।३०८) २५।८, २६

सांव्यवहारिकस्यैतत्प्रमाणस्य लक्षणम् (प्र० वा० मनोवृ० १।७) ३७।९

साकाङ्क्षावयवं भेदे (वाक्यपदीयम् २।४) ५९।१६

सादृश्यमिति सादृश्यम् (बृहती १।१।५) २१२।२३

सा देशस्याग्नियुक्तस्य....(श्लो० वा० अनु० ४७) १२२।१०

साध्यसाधर्म्यात् तद्धर्मभावी...(न्या० सू० १।१।३६) १७२।१८

सापेक्षत्वं घटस्यापि....तत्सिद्धेश्चक्षुरादिवत् । २३३।२१-२४

सापेक्षमसमर्थं भवति १४।११

सामान्यवच्च सादृश्यम्...(श्लो० वा० उप० ३५) २१२।५

सिद्ध यादृगधिष्ठातृ (प्र० वा० १।१३) २७४।७
सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते ···(अष्टा० वार्त्तिकम् १।१।१) २८१।२६
सीतासमागमासह्याद् ······ ३३७।१६
सुराग्रहं गृह्णाति ३८२।२५
सूर्यं चक्षुर्गमयताद् दिशः श्रोत्रम् ३१८।४
सूर्यं ते चक्षुर्गमयताद् ··· ३१८।२२
सैषा विद्या त्रयी तपति (नारायणोपनि० अ० १४) ३५५।११
सोऽपः स्पृष्ट्वा तासु स्वां छायामपश्यत् । (गोपथब्रा० पूर्व० प्र० १) ३६६।२५–३६७
सोमराज्युपयोगे समाः सहस्रं जीव्यते ३४८।१०
सोऽयमाभागको लोके (तन्त्रवा० १।३।३) ३७३।३
सोऽरोदीद् यदरोदीत् तद्रुद्रस्य रुद्रत्वम् । (तै० सं० १।५।१)
प्रजापतिरात्मनो वपामुदखिदत् । तामग्नौ प्रागृह्णात् ।
ततोऽजस्तूपर उदगात् ।
देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् । ४००।१८-२०, ४०२।९
सोऽर्थो विज्ञानरूपत्वात् तत्प्रत्ययतयापि वा (आलम्बनपरीक्षा ६) २५४।२१
सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः (तै० सं० २।३।२।३) ६०।१९, २१४।३
स्तुतिनिन्दाप्रधानेषु (वाक्यप० २।२४७) ७८।२०
स्तेनं मनोऽनृतवादिनी वाक् ४०१।३, ४०६।१४
स्मृत्यनुमानागमसंशय···· (न्या० सू० भा० १।१।१५) १३८।१५
स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं (तै० ब्रा० ३।७।५) ७२।२०, ७३।७
स्वतः सर्वप्रमाणानां (श्लो० वा० सू० २।७६) २३६।२६
स्वरूपन्तु तदेवेति (श्लो० वा० शब्दनि० ४१२) ३०९।२४
स्वरूपमात्रं दृष्ट्वापि (श्लो० वा० अभाव० २८) ८४।७
स्वरूपेण यथा वह्निः (श्लो० वा० शब्दनि० ४०५) ३०८।१७
स्वर्गकामो यजेत ७०।२५
स्वाध्यायेन व्रतैर्होमै ····(मनु० २।२८) ४२७।५
स्वाध्यायोऽध्येतव्यः (तै० आ० २।१५।१) ४११।१२, २०
हरीतक्यापि नोद्भूतवातकुष्ठे विरेच्यते ३४९।२

हर्त्तव्यं प्रति राज्ञामाज्ञादानमेव हर्तृत्वम् ३५।८

हस्तस्पर्शादिनान्धेन (वाक्यपदीये) १७९।५

हिरण्यं निधाय चेतव्यम् ४०३।६

हिरण्यं हस्ते भवत्यथ गृह्णन्ति ४०६।२२

हुत्वा वपामेवाग्रेऽभिघारयन्ति (न्या० भा० २।१।६४ त उद्धृतः) ३३१।२०

हेतुना यः समग्रेण (प्र० वा० ३।६) १८८।२०।२१, १९०।१३

ह्यस्तनोच्चारितस्तस्माद् (श्लो० वा० शब्दनि० ४१६) ३२४।१८

परिशिष्टम् ३

सरसोक्तिसङ्ग्रहरूपम्

अकृतास्त्राः २४६।१०
अक्षुद्रकथेयं प्रस्तुता ३३०।४
अज्ञः कोऽपि नाम मीमांसकः २६३।२४
अत एव तत्पृष्ठभाविपरामर्शवादिनो वरं सत्यवाचः २५८।१२
अतिकेलिना १२०।९
अतिप्रसङ्गचोदना धुनोति ८४।१
अतिव्यामूढभाषितम् ३०२।६
अत्यन्तमत्रभवतामनार्यजनोचितं चेष्टितम् ६६।२
अत्यन्तानभिज्ञस्य चोद्यम् १७१।१९
अत्रभवतैवात्मनः प्रतिकूलमभिहितम् २१२।३-४
अथवा नेदृशी चर्चा कविभिः सह शोभते ।
विद्वांसोऽपि विमुह्यन्ति वाक्यार्थगहनेऽध्वनि ॥ ७८।३
अनभिज्ञो भवान् २४९।१६
अनभिज्ञोऽसि बालक ५८।६
अनर्थजा हि निर्दग्धपित्रादौ भवति स्मृतिः २६०।१५
अनयैव धिया साधो चरस्व शरदां शतम् २७८।१६
अनेकधर्मविसरविशेषितवपुषि (धर्मिणि) ५१।९
अपवर्गपुरद्वारप्रवेशमलभमानाः २८४।१४
अप्रतीतिज्ञो देवानाम्प्रियः २५५।१३
अबलाबालगोपालहालिकप्रमुखा अपि १७९।१३
अभक्षितमपि विषं कथं न हन्यात् ६१।२६
अभिनवपदार्थसर्गप्रजापतेः २६४।३
अभिमानोद्धुरां कन्धरामुद्वहन्ति ९।१३
अभूमिज्ञोक्तिरेषा ३७०।३
अभूमिरियम् असर्वज्ञानाम् ५५।२०
अमुनात्मनो जडमतित्वमुक्तं भवेत् १०२।८
अमृतेनेव संसिक्ताश्चन्दनेनेव चर्चिताः ।
चन्द्रांशुभिरिवोद्घृष्टा कालिदासस्य सूक्तयः ॥ ३३२।११

अयि मूढ २५१।४
अविदिततार्किकपरिस्पन्दस्य व्याहृतम् ३२४।१७
अविदितसौगतकृतान्तानाम् ४९।५
अविरलजलधरधाराप्रबन्धबद्धान्धकारनिवहे........ २१।१५
अयमेव हि ते कालः पूर्वमासीदनागतः ।
अवश्यम्भाविनं नाशं विदुः सम्प्रत्युपस्थितम् ॥ २०४।२६
अर्थसूचनाचातुर्यमहार्घेषु सूत्रेषु ४२।१४
अलं क्षुद्रचोद्यैरीदृशैः ३८२।८
अलं सरस्वतीक्षोदेन ३४६।१९
असंवेद्यमानज्ञानकन्थाकल्पनेन १०६।७-८
अस्थाने कण्ठशोष आयुष्मतानुभूतः २६२।२०
अस्थाने क्लिष्टा भवन्तः ३०५।७
अस्मत् पितामह एव ग्रामकामः साङ्ग्रहणीं कृतवान् । स इष्टिसमाप्तिसमनन्तरमेव गौरमूलकं ग्राममवाप । ३९१।१५
अस्मिन् अवसरे ज्ञानवादगर्भचोद्योद्विभावयिषया ११५।९
अलमलीकोक्तिविकल्पकलापनिर्मथनोदितदुरामोदास्वादनेन २४८।२
अलमुपहासेन ३३१।१
अलीकविदग्धविरचितविकलवक्रवचनविमर्दनं ९५।२४
अस्त्रमायुष्मता ज्ञातं विषयस्तु न लक्षितः ३४५।२०
अहो तव सरलमतित्वम् २६७।२१
अहो नैयायिको भवान् १२६।७
अहो रसमारूढो भट्टः ३०६।२
अहो लोकवत् स श्रद्दधानो महानुभावः १२२।१०
अहो बत इमे केभ्यो बिभ्यतः श्रोत्रियाः परं किमपि वैक्लब्यमुपागताः । २८।९-१०
अहो सर्वास्तिकधुर्येण वेदप्रामाण्यं साधितं नैयायिकेन ३३०।२७
आः किमिति सदसद्विवेकविकलशाकटिकादिप्रवादविप्रलब्ध एवं भ्राम्यसि ३२८।१६
आः कुण्डशेखर ! कथमसकृदभिहितमपि न बुध्यसे २५६।१
आः कुमते ! २५०।२४
आकण्ठानद्धनीरन्ध्रचर्मावृतमुखोदितः ३२०।५
आकारस्तु तस्य (महाजनस्य) कीदृशम्.... पुरुषलक्षणानि गणयितुं न जानीमः ३८०।२१-३८१।२

आडम्बरमात्रम् ६३।८
आदित्यं पश्यतु देवानाम्प्रियः २८४।७
आयुष्मता (मीमांसकेन) ६२।२३
आयुष्मन् २४७।६
आयुष्मान् २२८।९
आलजालम् १८३।१५
आवर्तवर्तनाशालि …… १९१।२-५
आहोपुरुषिकामात्रम् ३१७।१६
इयं तावदतिघर्घरी कल्पना २९९।१०
इयति विरम्य स्थातव्यम् २५८।११
इह तु वितन्यमानमस्माकमवान्तरविचारवाचालतामाविष्क-रोतीति न प्रतन्यते । ४१२।१
उत्कोपनैयायिककटाक्षपातभीतामिह गहने हरिणीमिव ६६।१
उच्चावचकविरचितजरत्पुस्तकलिखितकाव्यवत् ३२८।१९
एकस्य (अथर्ववेदस्य) ततः (वेदचतुष्टयात्) पृथक्करणं वेदनिन्दाप्रायश्चित्तनिर्भयधियामेव चेतसि परिस्फुरति, न साधूनाम् ३७०।७
एकस्यापि तावदीश्वरस्य साधने पर्याकुलतां गताः, किं पुनरनन्तानाम् २६३।१३
एकादशानुपलब्धिवधूशुद्धान्तमध्ये ९६।५
एतत् कथमिव शपथमन्तरेण प्रतिपद्येमहि ३४३।६
एतत् परमार्जवम् ४२१।१४
एतदपि परममाध्यस्थ्यम् ३७०।४
एवंप्रायसंवित्तिसमुत्प्रेक्षणपण्डितः १०१।७
एष एव मार्गोऽनुगन्तव्यः ४४।९
क एनं द्विष्यात् ८६।३
कण्टकाभावमालक्ष्य पदं पथि निधीयते ९३।४
कण्ठशोषाय केवलम् ९४।६
कदाशालम्बनमेतत् ३७।१५
कस्य चैष पर्यनुयोगः ३३।७
का कथा भवतां मते ४६।२४
क एवमाह ? सहस्राक्षः ? २६७।१५

कटुविपाकस्य	१२०।८
कन्थाग्रन्थनेन	१५।८
कश्च नाम निकटमुपायमुपेक्ष्य दूरं गच्छेत् ?	२४७।१०
कश्चायमियान् सन्त्रासः	२८।१२
कश्चित् प्राज्ञमानी	२४८।६
कानि पुनरागमानि चेतसि निधायैवं वत्सः पृच्छति	३७१।९
कामन्तु पर्वतानेष विदधातु भिनत्तु वा (ईश्वरविषये)	२८७।१३
कालुष्यमपनीयते	५१।५
काशकुसुमराशय इव शरदि मरुद्भिरतिदूरात् समुत्सार्यन्ते दुष्टतार्किकैः	२४९।९
काशवसनी	४१३।६
किं नः प्रकुप्यसि ?	२४२।१७
किं नश्छन्नम्	१६।२१, ८३।११
किं प्रौढवादिबहुमानपरिग्रहेण	३२५।१७
किं विफलैः प्रलापैः	१७४।१६
किमक्षिणी निमील्य नास्से ? कस्माद् दृष्टं विषयं पश्यसि ?	३३।६
किमपराद्धमनेन	२८।१५
किमनेन शिखण्डिना	१०८।१८
किमयमदृष्टमस्तके भार आरोप्यते ?	३१८।१३
किमर्थं कण्ठशोषोऽयमियानार्येण संश्रितः	२८२।६
किमर्थमयमीदृशः क्लेश आश्रीयते ?	११०।२३
किमिति चौर्यवत् तदर्थानुष्ठानम्	३८१।७
किमियद् वेदसर्वस्वं यावदस्मन्मुखे स्थितम् ?	३८७।१
किमीश्वरतयेश्वरो ?	२७०।१५
किमेवं सति स्वतःप्रामाण्यं सिद्ध्यति तव, मम वा परतः प्रामाण्यमपहीयते ?	२४७।७
कियानेष सङ्कटः पन्थाः	१३१।२
किलातिविकसित ····· स्वरानुकूलकारणनिश्चयात्	२३६।१३-१६
कुतर्ककण्टकनिकरनिरुद्धसत्त्वरमार्गाभासपरिभ्रान्ताः	१० ८
कुदर्शनाभ्यासः	१३७।२
कुतर्कलवलिप्तमुखनास्तिक	२८६।१२
कुमारसम्भवतुल्योऽसौ वेदः सम्पन्नः ?	३३०।२६

कुशकाशालम्बनप्रायम् २६०।३
कृतं कान्तस्य तन्वङ्ग्या त्रिरापाङ्गविलोकनम् ।
चतुरालिङ्गनं गाढमष्टकृत्वं च चुम्बनम् ॥ ३१३।६
कृतक्षौरस्य नक्षत्रपरीक्षा २३५।२०
कृतश्च महान् कलिः २००।२४
कृतश्च शूलविध्वंसो न चानङ्गश्च सङ्गतः ।
आत्मा च लाघवं नीतस्तच्च कार्यं न साधितम् ॥ २६०।२३
कृतोद्वाहस्तत्र लग्नं परीक्षते २३६।१२
कृत्यासोतावत् २६१।१४
क्व प्रच्छादयामः २५६।२०
क्षणभङ्गव्रतविलोपः ९३।११
क्षितिधरकन्दराधिकरणं धूमम् ६७।९
क्षितिधराधिकरणपरोक्षाशुशुक्षणिवदनीक्षणविषयता ८२।६
गत्वा गत्वापि तान् देशान् नास्य जानामि नास्तिताम् ।
कौशाम्ब्यास्त्वयि निष्क्रान्ते तत्प्रवेशादिशङ्कया ॥ ५५।१८
गम्भीरगर्जितारम्भ ·· १८९।१८-१९
गायता नृत्यता वापि जपता जुह्वतापि वा ।
तच्चेत् कार्यं कृतम् ·········· ॥ २६३।८
गोवधे वा कथं तेषां द्वेषः सुस्पष्टवैदिके ३८६।२३
ग्रन्थज्ञो देवानाम्प्रियः १८६।१
चक्रकक्रकचपातः २३४।७
चक्रवाकमिथुनस्तनी ४१३।५
चञ्च्वग्रचुम्बित ·· स्तुषारकणकर्कशाः । २०३-२०४
चन्दनघनसारहारमहिला २३।१२
चलदचलविपुलवपुषां ······ १८८।१५
चार्वाकास्तु वराकाः कस्यैवंविधासु गोष्ठीषु स्मृतिपथ-
मुपयान्ति । २६६।५
चेतःप्रमाथिभिरलं कुविकल्पजालैः २४१।६
चौर्यमपीदं न कथञ्चन स्वार्थं पुष्णाति २५७

छात्रमनोरथविरचिताः (विकल्पाः)	१४२।१४
जीविकोपायबुद्ध्या	२२८।६
ज्ञानाद्वैतदलनप्रसङ्गेन	११३।५
डिम्भकलहेन	१२०।१२
डिम्भहेवाकसदृशम्	१७४।६
तच्छ्रु तां यदि न धीः परिखिद्यते वः	४२८।८
तदतीव सुभाषितम्	३१९।१
तदिदमपूर्वं किमपि नाटकम् इयमस्मि कृत्यासीता संवृत्तेति	२५२।८
तदिदमपूर्वं किमपि पाण्डित्यम्	३१७।७
तदुपघाताय शास्त्रमस्त्रं प्रयुज्यते	३८२।१०
तदेतदतिसुभाषितम्	३०१।८
तदेतद् वञ्चनामात्रम्	४६।१४
तद् वञ्चनामात्रम्	३१६।६
तद् विडम्बनार्थं तदभिधानम्	३३०।९
तद्व्याख्यानमात्रमेव	२५६।९
तन्तुपटलपरिघटितपटाद्यवयवि	२२।१३
तपति ललाटन्तपे तपने···तरङ्गाकारधारिषु यद्वारिधि-ज्ञानम्	१३५।८
तपस्विनां नैयायिकानाम्	१३३।१३
तस्करैः पीड्यमाने बालकादौ······	३६७।१७
तस्याः पाणिरयं न कोमलदल	२४६।२५
तीव्रे प्रपाते पतिता अमी	३१९।५
तेजोऽन्यदेव नक्षत्रशशाङ्कशकलादिषु	४६।७
ते नितरामृजवः	४२१।१२
तेषां कुतः कौशलम्	२४९।१०
त्यजैनं···दुर्ग्रहम्	१२७।९
त्यज्यतामेष प्रमाणद्वित्वदोहदः।	४८।११

त्वदेकशरणां बालामिमामुत्सृज्य गच्छतः ।	
कथं ते तर्कयिष्यन्ति मुखमन्या अपि स्त्रियः ॥	६६।३
दर्शयत्यतिमूढताम्	३०३।१५
दुःशिक्षितकुतर्कांशलेशवाचालिताननाः	१८।१३
दुराचारं निर्भर्त्सयिष्यामहे	११३।५
दुराशयाः	१२८।९
दुराशा परिमुच्यताम्	१७८।२४
दुराशामात्रम्	१४६।९, १४८।९
दुराशा श्रोत्रियाणामपाकृता	३२४।२
दुर्मतेश्चोद्यम्	१८६।४
दुर्विदग्धवाचोयुक्तिरियम्	२५२।१५
दुष्टतार्किकोपरचितकपटदूषणाडम्बरसन्त्रास्यमानसरलमति	१८।१
दुष्टहेतुनिकुरुम्बशम्बरम्	१६३।९
द्रुघणभग्नकुम्भ	२६२।२२
द्वैपायनोऽपि किं दृष्टोऽभवत् पितृपितामहैः ?	३२८।१३
धिक् प्रमादित्वम्	२६०।२१
नग्नक्षपणकाचार्यप्रज्ञाचातुर्यचर्चया	३०२।४
न च जाने कस्यैष पर्यनुयोगः	३६६।१२
न च त्वदिच्छया वस्तुस्थितिर्विपरिवर्तते	२७८।४
न च यत् त्वं न जानासि तदन्योऽपि न जानातीति युक्तम्	३३३।१३
न चासौ चिरमपि चिन्तयित्वा विशेषयितुं शक्यः	२४३।९
न चास्योपस्थानं पशोरिव रज्ज्वा संयम्य ढौकनम्	२६११।१०
न चेयतोपहसितुं युक्तम्	३३१।१
न तु वयमत्रोपहासपात्रम्	२६१।१५
न तु शपथशरणा एव निरुद्यमास्महे	१४६।९
न पुनः पदार्थस्थितिरदृष्टवशाद् विपरिवर्तते	३१८।१०-११
न वा मीमांसका एते स्वभार्यामपि वेश्मतः ।	
निःसारयितुमिच्छन्ति स्वतःप्रामाण्यतृष्णया ॥	२६५।६

न····वृथाटाट्या कर्तव्या ३३०।१७

न स्यान्मन्वन्तरशतैरपि ४९।२

न हि आत्मम्भरिरेव यजमानो भवति ३९६।१८

न हि गिरिशिखरमारुह्य यद् गृह्यते तदप्रत्यक्षम् १४६।१५

न हि तव सकललोकहृदयानि प्रत्यक्षाणि ३३३।१२

न हि दुष्टानि शालिबीजानि यवाङ्कुरकरणकौशल-
मवलम्बेरन् २५१।२

न हि नभसस्तदानीमेव वृष्टिरिव निपतति पुत्रः ३९१।१३

न हि स्वहस्ते शतकृत्वोऽपि दृश्यमाने केचन विशेषाः
परिस्फुरन्ति ३३।१९

नित्यो नाम पदार्थः प्रणयकेलिष्वपि न विषह्यते २७३।६

निपुणदर्शी देवानाम्प्रियः ९३।१८

निरनुसन्धानस्याभिधानम् ३११।१९

निर्दग्धपित्रादि ३४।१९

निशीथे रोलम्बश्यामलाम्बुदडम्बरे २९५।८

नूतनेयं वाचोयुक्तिः ३३२।१५

नेदं दैविकं वचनं यदनतिक्रमणीयम् १९९।२२

पक्ष्मलाक्षो लक्ष्मभिरमयेद् विद्याधरपदकामः २६६।२०

पद्मामोदविदूरदीपकविभा १०२।१

परपुरन्ध्रिपरिरम्भसम्भवं सुखम् ११९।१५

परप्रत्यायने पुंसां शरणं शपथोक्तयः १४६।७

पर्वते प्रबलसमीरणोल्लसितमहीरुहस्कन्धेन्धनप्रभवो······
खमण्डलमाक्रामत् २७४।१२

पलायनप्रकारः ३७।११

पश्यतां तार्किकानाम् ३०४।६

पांसुप्रक्षेपप्रयोगः २७९।१७

पिपीलिकाण्डसञ्चर···पर्णकुटीरकरणोद्यताः १७४।१

पीतं प्राभाकरैर्यशः २५४।१८

पीतं मीमांसकैर्यशः ३३१।१३

प्रकटरसानुगुणविकटाक्षररचनाचमत्कारितसकलकवि-
कुला बाणस्य वाचः ३३२।१३

प्रचलदर्कांशुजलज्ञाने ३०।१९

प्रज्ञाप्रमादः १२१।९

प्रतपति हुतवह… … अनुभवपथमवतरतः १६२।१६

प्रतीति पृच्छ किं मया ? १२६।१०

प्रत्यक्शास्त्रेण हन्तव्यः, स कथं हन्यते त्वया ? १२८।५

प्रत्युक्ता एव ते तपस्विनः ३७३।१०

प्रमाणं पृष्टोऽसि तद् ब्रूहि ११५।१

प्रमादेनामुना तेषां वयमप्यद्य लज्जिताः ९६।१०

प्रसक्तानुप्रसक्त्यागतशास्त्रान्तरगर्भकथाविस्तरप्रस्तावनया ७५।३

प्रसिद्धिश्च परित्यक्ता न चाभावः पराकृतः ।
उपेक्षितश्च भाष्यार्थ इत्यहो नयनैपुणम् ॥ ६८।१५

प्राभाकरैस्तु यशः पीतम् २६२।१०

प्रावृषेण्यजलधरधारासारनिलुंठित एव पर्वतैकदेशे पर्वतस्य
खण्डः पतितः २७२,२७३

फल्गुप्राये २२५।६

फल्गुप्रायमिव १९२।१९

बृहस्पतिमतानुप्रवेशः ३९४।१९

बौद्धाः खलु वयं लोके सर्वत्र ख्यातकीर्तयः ।

भदन्त कलहे १९२।१७

भयादिव द्वेषादिव मोहादिव सानुकम्पमिव वेदमुच्यते ३६९।८

भवतु कामं हृदयोत्कम्पः ३८४।३

भवद्भिरुत्सृष्टः पन्थाः (मीमांसकैः) २१५।५

भवादृशाः स्वयमनवबुध्यमाना एवं बुध्यन्ते । ३१५।१९

भवान् अनेन वर्त्मना अवतरन्तं शब्दाध्यासं न पश्यतीति
कोऽयं व्यामोहः ? १२८।१०,११

भवेत् समादेशत्वं हिमवद्विन्ध्ययोरपि ? ३१६।१०

भारः कथमयं वोढुं……पार्यते ४६।२२

भिक्षोः २७४।१७

भीरो ! किं जातं स्वप्ने ? २५५।१८

भो भगवन्तः सभ्याः क्वेदं दृष्टं क्व वा श्रुतं लोके ? ३३०।२०

भो महात्मन् ! २४३।२

भोः श्रोत्रिय ! २५९।२०

भोः साधो ! ४५।३

भो साधो ! चक्षुरेवैनं ग्रहीष्यतीति कथं न ब्रूषे ? १२६।६

मतिर्मोहविलसितम् ४८।२२

मद्रेष्वभिव्यक्तो गोशब्दः कश्मीरेषु श्रूयते २९६।१०, ३२२।२५

मधु पश्यसि दुर्बुद्धे प्रपातं नैव पश्यसि ? १२८।११

मतुना किमपराद्धम् ? ३७१।१५

महात्मनां प्रमादोऽपि मर्षणीयो हि मादृशैः। ९८।१८

महानसे कुम्भदासी फूत्कारमारुत……कृशप्रायप्रकृति-
रुपलब्धः २७४।११

महान् व्यामोहः ३३०।२५

महाभाग ! १६८।१०

मिथ्यैव विस्फूर्जितम् १०२।४

मीमांसका यशः पिबन्तु पयो वा पिबन्तु बुद्धिजाड्यापन-
यनाय ब्राह्मीघृतं वा पिबन्तु ३३२।३

मुण्डितशिरोनक्षत्रान्वेषण २४५।११

मूढतरः ११३।१

मृत्योर्दुःखादपक्रान्तः पुनः केनैषहन्यते। २९४।५

यथा पादपं छेत्तुमनसा परशुरुद्यम्यते तथा पादुकाद्यपि
उद्यम्येत ६१।३

यदप्युदितमुद्दाम…… ३१४।२०

यदेभ्यः सत्यमाभाति सभ्यैस्तदवलम्ब्यताम् १३५।६

यद् भवति चैव गत्या राजपथेनैव तद् भवतु २६५।११
यद्युभयोर्दोषो न तेदैकश्चोद्यो भवति १४५।१८
यद् वक्तव्यं तत्रैव श्रोष्यसि २५९।१०
या तत्र वार्ता सैव इहापि भविष्यति ६६।७
यादृशो यक्षो बलिरप्यस्य तादृशः ८५।२१
यावत् कुटिलितं चेतो न तेषां विटतार्किकैः १८८।१३
रचनामात्रमेव तुल्यं वेदस्य कुमारसम्भवेन ३३१।१

ये तु प्रत्यक्षतो विश्वं पश्यन्ति हि भवादृशाः ।
किं दिव्यचक्षुषामेषामनुमानप्रयोजनम् ॥ १७८।५

रचनासाम्यमोहिताः ३३०।२
रथ्यापुरुषादिवचसि २१८।६
राज्यमिव मन्त्रिपरवशमैश्वर्यं क्वोपयुज्यते ? २७०।१२
रे मीमांसक ! १०३।२२
रे मूढ ! ९३।२०
रोमहर्षदन्तवीणादि ८६।६
लोकाः स्युर्लिखिता इव निश्चलाः १७९।१६
लोकायतदर्शने प्रमाणभूते सति स्वस्ति सर्वागमेभ्यः ३८७।१६
लोके द्वेष्या हि बहुभाषिणः २०४।२१
वयं····कृशमतयः २४३।२
वयन्तु कर्णा[illegible]शे शब्दमुपलभामहे २२३।२२

वाचोयुक्तित्वे वैदिको योऽनुवादः ।
न्याये प्रयुक्ते किंफलस्तत्प्रयोगः ॥ ३२५।७

वालिशचोद्यम् २०१।२६
विकल्पमात्रशब्दार्थपरिकल्पनपण्डिताः ॥ ८८।७
विदूरदेशे व्यवस्थितस्थूलज्वालावलीजटिलज्वलनगत-
भास्वररूपोपलम्भानुवर्तितदगतोष्णस्पर्शज्ञानवत् ८०।८
विनिहितसलिलावसिक्त ···सेयमाभ्यासिकी प्रवृत्तिः २३५।२१

विपर्ययात् समुत्तीर्ण इति साधु सहामहे ।
प्रमाणात्तु बहिर्भूतं विकल्पं न सहामहे ॥ १४७।२२
विरहोद्दीपितोद्दाम… १३६।१८
विवाहे कङ्कणबन्धन ३७५।२४
विश्रम्य स्थातव्यम् ८३।१७
विषमे पथि वर्तते २२८।५
विस्फारिते चक्षुषि निरीक्षामहे ८०।४
वृथाटाट्यामात्रम् १५४।११
वेदप्रामाण्यसिद्ध्यर्थमित्थमेताः कथाः कृताः ।
न तु मीमांसकख्यातिं प्राप्तोऽस्मीत्यभिमानतः ॥ ४१९।४
वेदमूलत्वे द्वेषो वेदविदां कथं गत्वा त एव पृच्छ्यन्ताम् ३०६।२१
वेदा न पठिता यैस्तु त्वादृशैः कुण्ठबुद्धिभिः ३३२।१
(न हि) बेधसापि विपक्षः पक्षीकर्तुं शक्यः २७६।८
वैतण्डिककथैवासौ ३८८।२
व्याध्यभावपरिच्छेदाद् भैषज्यविनिवर्तनम् ९३।६
शपथशरणा एव श्रोत्रियाः २६६।१९
…… ……शब्दनित्यत्वसमर्थनतृषातुरः ।
जङ्गमं स्थावरञ्चैव सकलं पातुमिच्छसि ॥ ३१६।१
शरीरमेव शुद्धोदनस्यापत्यं नात्मा ३८५।१८
शाक्यैरिव भवद्भिः २९४।२२
शिक्षिताः स्मः १५६।२७
शिशुचोद्यमेतत् २४५।८
शैवालकेशी ४१३।५
शौचाचमनमज्जनामरपितृतर्पणपटक्षालनश्रमतापनोदन-
विनोदनाद्यनेकप्रकारनीरपर्यालोचनप्रबन्धः २४६।१३
शौद्धोदनेर्गृहे ९८।१३
श्यामलां धियम् २०८।६
श्यामाकलतालस्योपदेशिनो मातरिश्वानः ३२०।१४

श्रुतमिदं यद् अत्रभवद्भिर्धर्मकीर्तिगृहादाहृतम्	२५७।१९
श्रुतार्थापत्तिरपि वराकी	६७।८
षण्ढादिव पुत्रजननम्	२७७।२०
षण्ढानुनयदोहदः	१६५।२१
षण्डानुनयमार्गणम्	१६६।१६
सकललोकपदार्थव्यवहारिणो हि मीमांसकाः	३३४।१२
सङ्कटः पन्थाः	१३०।१
सङ्कटः पन्था इति तदविदितनैयायिकदर्शनस्यैव चोद्यम्	१३३।१४
सङ्कल्प्यमानकुशङ्काचमन	२३९।४
सत्यं वदत दृष्टं वा श्रुतं वा क्वचिदीदृशम्	३१९।१३
सत्यं साहसमेतत् ते मम वा	१५८।१२
सन्तमसे सलिलधाराविसरसिक्त	८५।७
सर्वं कैतवम्	५०।२
सर्वापलापलम्पटाः	२७३।९
सर्वाश्च सौगतमनःसुचिरप्ररूढाः । भग्नाः प्रमाणविषयद्वयसिद्धिवाञ्छाः ॥	५२।१३
सविकल्पप्रत्यक्षमयाः प्राणाः	१३३।१७
साधु स्मृतम्	२९५।१३
सान्द्रतमतमःपङ्क······	१५७।२
सामर्थ्यमस्खलितं दधाति	२६३।२१
सामर्थ्यविवेकशून्यमतिभिः (नास्तिकैः)	१०२।४
सुभाषितमिदम्	३६९।१०
सुवते शालयो दुष्टा न यद्यपि यवाङ्कुरम्	२५८।१९
सेतुभङ्गहिमविलयनादिना	१९१।१
सेयमिदानीमेव साध्वी दूषिता	९६।६
सैवेयं तपस्विनी विपरीतख्यातिरायाता	२६५।३
सोऽपि किमनुयोज्यताम्	३३।८
सोऽयं श्रोत्रियः स्वशास्त्रवर्तनीमिहापि न तां परित्यजति	२६४।७

सोऽयमत्युत्कटो द्वेषः	३६६।३
स्त्रीगृहे कामुकोक्तयः	२०९।४
स्थूलदृष्टिभिः (बौद्धैः)	१६९।१
स्पष्ट एव जलाञ्जलिः	३४।२
स्वभार्यापरिरम्भेऽपि भवेन्मातरि संशयः	२३८।१३
स्वयमनवद्यमावेद्यताम्	१८३।४
स्वयमेवात्मानं वाच्यमानं न चेतयते	२४८।७
स्ववासिनीकुमारातिथिभृत्यादिभोजनपूर्वकस्वभोजननियमः	३६६।१०
स्वविकल्पजालजटिलाः (चार्वाकाः)	१०३।२१
हंसदन्तावली	४१३।५
हन्त ! तात्त्विकसम्बन्धसाधनव्यसनेन किम् ?	५०।८
हन्त ! हतमनुमानम्	४२१।४
हिममपि शैत्यं स्वधर्ममतिक्रामेत्	३१८।११

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	मुद्रितः पाठः	शुद्धः पाठः
२२	५	०त्रमवर्थगोगा०	०तमवर्थायोगा
२२	८	तत्त्व-	तत्स्व-
३१	२२	दृष्टत्वाद्	दृष्टतावा
३५	५	०मविसंबादकत्वञ्च	०मविसंवादकमविसंवादकत्वञ्च
४०	३	०नुपातिना	०नुपातिनो
४१	२२	मूत्रा०	सूत्रा०
४९	१३	प्रमाणसंप्लवसमर्थनम्	इति न पाठ्यम्
५०	१७	निहनुत्य	निह्नुत्य
५०	२३	कतवं	कैतवं
५३	८	तद्धीन	तदधीन
५५	२	अतश्चैवं	इतश्चैवं
५६	२५	सं र्गो	संसर्गो
५८	८	प्राप्तिनिर्वृति	प्राप्तनिर्वृति
५८	११	अभिधाय	अविधाय
५८	१६	०प्रकरशे	०प्रकरणे
५६	३	तद्विधः	तद्विधिः
६६	१०	'चैकदेश०	'न चैकदेश०
६६	२७	व्यप्तिगृहीताया	व्याप्तिगृहीतायाः
७०	१७	कृष्णविषाणाणां	कृष्णविषाणां
७४	२३	प्रथ	प्रथमं
७५	११	०वेत्यतिदेशककल्प०	०वेत्यतिदेशकल्प
७५	१७	यथा ार्वमुप०	यथाकार्यमुप०
८०	२६	०पलम्तभा	०पलम्भात्
८३	१६	निह्लुयते	निह्नुयते
८४	७	दृष्टञ्च	दृष्ट्वापि
८७	२४	०ह्निद्यतेऽभावो	ह्निद्यते भावो
८८	१४	यदि भावो	यद्यभावो

पृष्ठे	पंक्तौ	मुद्रितः पाठः	शुद्धः पाठः
६१	६	०मात्मांशावलम्बनं	०मात्मालम्बनम्
६२	८	निह्नुवीत	निह्नुवीत
१०२	५	ईयत्त्व०	इयत्त्व०
१०५	१६	तथा अयं	तया अयं
१०५	१८	जनितो धूम०	जनितधूम०
१०६	१४	लिङ्गप्रतीति०	लिङ्गिप्रतीति०
१०७	६	निगमे	नियमे
१०८	९	किञ्चित्	कश्चित्
१११	२१	व्यापृतवमर्थो	व्यापृतत्वमर्थो
११५	११	०मर्थस्स्य करणेऽपी०	०मर्थस्यापी०
११५	११	०त्युपन्न०	०त्युत्पन्न०
११६	६	सुखादिना०	सुखादीना०
११६	२४	बीजैर द्रूपै०	बीजैरतद्रूपै०
११९	१०	धमौ	धर्मौ
१२०	१८	श्रोतुश्च	श्रोतुश्च
१२१	५	रसाज्ञान०	रसज्ञान०
१२५	१२	व्यापारसंवेद०	व्यापारासंवेद०
१२५	२६	०परिच्छेदे	०परिच्छेद्ये
१२८	१०	अवतरन्	अवतरन्तं
१२८	११	परं	(न पाठ्यम्)
१३६	८	इहावलम्बनी	इहालम्बनी
१४२	१२	०सङ्कल्पना	०सङ्कलना०
१४४	२२	अप्रामाण्यत्व०	अप्रामाण्य०
१४४	२४	०प्रामाण्यकरण०	प्रामाण्यकारण०
१५३	२०	उभयस्य	उत यस्य
१५५	६	शेषहेतु०	शेषं हेतु०
१५५	२५	शेषहेतु०	शेषं हेतु०
१५८	२४	०शोकाभयो०	०शोकभयो०
१६५	२०	०ज्झितात्	०ज्झितात्
१६६	८	यत्	पत्
१७०	१२	न दृश्गते	न दृश्येत

पृष्ठे	पंक्तौ	मुद्रितः पाठः	शुद्धः पाठः
१७१	१	स्यान्ननानित्य	स्यान्नानित्य
१७१	२	एष्या	एषा
१७७	१७	शक्या वस्तु	शक्या वक्तु०
१८१	२५	ज्ञापककत्वा०	ज्ञापकत्वा०
१८८	१२	व्यभिचार्यभया०	व्यभिचार्युभया०
१८९	१	उत्पाद्यते०	उत्पद्यते०
१९२	२	तदभावात्	तदभावे
१९३	१०	इद्रियाणा०	इन्द्रियाणा०
१९५	१४	परस्यालम्ब०	पटस्यालम्ब०
१९८	११	कालासत्त्वादः	कालासत्त्ववादः
१९८	१६	चामुनव	चामुनैव
२०६	२५	गौरवं	गौरेवं
२०७	२२	नटविक	नाटविक
२१२	१७	स इदानीं०	सा इदानीं०
२१८	१८	व्यवहरात्	व्यवहारात्
२१९	२३	०निबन्धस्य	निबन्धनस्य
२२१	६	०नवसायाश्च	नवसायश्च
२२२	१०	धूमवत्त्वात्	धूमत्ववत्त्वात्
२२२	२६	०तया	०यता
२३७	२२	०थात्त्वाज्ञाना०	०थात्वज्ञाना०
२५१	१०	०भासमनायां	मासमानायां
२५४	१५	०प्रतिबन्धां	०प्रतिबन्धं
२५४	२१	ह्लीत्यस्यो०	ह्रीत्यस्यो०
२५९	२३	वृत्त्येकत्वं	वृत्त्यैकत्वं
२६०	१	ऐकचन्द्र	एकचन्द्र
२६०	१	वृत्त्येकत्वं	वृत्त्यैकत्व०
२६०	८	०तनिर्वह०	०तिर्निर्वह०
२६२	२१	०मपह्नित्यते	०मपह्नूयते
२६४	६	संयजत्रग्ङ्गा०	संयजत्रैरङ्गा
२६७	१२	हयेतदेव	ह्येतदेव
२६८	२२	कर्तृद्दृश्यत्व०	कर्तुर्दृश्यत्व

पृष्ठे	पंक्तौ	मुद्रितः पाठः	शुद्धः पाठः
२७३	३	धमौ	धर्मौ
२९०	३	शब्दनित्यतायां	शब्दानित्यतायां
२९३	७	ह्रस्वदीर्घयो०	ह्रस्वप्लुतयो०
२९७	२४	यस्य वि	यस्य द्वि (इति भवेत्)
३०९	२	रससमारूढो	रसमारूढो
३११	३	०माक्षते	०माचक्षते
३१५	४	०ज्ञानात्त	ज्ञानात्तु
३१७	२३	स्वाच्छान्द्ये०	स्माच्छन्द्ये०
३२०	१४	श्यामाः (?)	श्यानाः (इति भवेत्)
३२०	२६	सीददर्शन	सीदद्दर्शन०
३२३	२२	प्रयत्नान्तरीय०	प्रयत्नानन्तरीय०
३२८	६	स्मिृतिः	स्मृतिः
३३६	२४	०जगत्कायति	०जगत्कार्येति
३३७	१	नाध्यर्यवम्	०नाध्वर्यवम्
३४३	२७	प्रतीवेत	प्रतीयेत
३४४	९	एवावयाः	एवावयोः
३४५	१	वजमिति ।	वर्जमिति ।
३४७	१०	सिद्धौपयिका।नी०	सिद्ध्यौपयिकानी०
३५३	१८	सर्गान्तरेष्वेव	सर्गान्तरेष्विव
३५६	१४	प्रमाणम् द ।	प्रमाणम् ।
३५६	१६	नाश्नीयात्	अश्नीयात्
३५५	१८	तीक्षितस्य	दीक्षितस्य
३५६	१८	नाश्नीयात्	अश्नीयात्
३६६	१८	पृष्टेऽथर्व०	पृष्ठायामथर्व०
३६७	२६	बृहदीत्यादि०	बृहदित्यादि०
३६९	२०	अग्रयाः	अग्रचाः
३७०	२५	वृपरस्पर०	परस्पर
,,	,,	। क्षपक्षे	वृक्षपक्षे
३७५	१८	आयुध्कामः	आयुष्कामः
३७५	२०	तत्रोपकारस्य दर्शना०	तत्रोपाकारस्यादर्शना०

पृष्ठे	पंक्तौ	मुद्रितः पाठः	शुद्धः पाठः
३७५	२१	हेमकनु०	हेमकण०
३७६	२७	भवत्वन्त्रय	भवत्वन्यत्र
३७७	५	पुनर्दहनादेव	पुनर्वह्नावेव
३७७	१९	कारणभावे	कारणाभावे
३८५	२४	चरुं न प्राजा०	चरुं प्राजा०
३८७	२६	इतिः	। इतः
३९४	५	जन्मातरे	जन्मान्तरे
३९५	४	वर्णाश्रमाश्च	वर्णा आश्रमाश्च
३९६	१२	जहुयादि०	जुहुयादि०
४०३	१६	भूतिकाममः	भूतिकामः
४०७	२	कर्मस्नोनुमु०	कर्मस्तोतुमु०
४०७	१४	०मुपभद्रादि	उपभृदादि
४०७	१५	किमति	किमिति
४०८	६	तदिह्यमाने	संदिह्यमाने
४०८	१६	०वर्म	०वर्त्म
४१०	११	शृणोतु	शृणोत
४१०	१३	सोमस्य करकेति	सोमस्य कागुकेति
४११	१५	नवसंख्यौऽसौ	दशसंख्योऽसौ
४११	२१	अ रग्रहण०	अक्षरग्रहण०
४१३	१८	ब्रह्मन्-आच्छसि	ब्रह्मन् ब्राह्मणाच्छंसि
४१४	८	प्राजापत्या	प्राजापत्यान्
४१५	७	०दथैप्रकटन०	०दर्थप्रकटन०
४१५	२१	अस्ये न्ति	अस्येयन्ति
४१६	१४	०नेत्यन्यपद्रूम्	०नेत्यन्यद्रूपम्
४१८	१	०स्याश्च च्युतो	०स्याश्चाच्युतो
४१८	७	विधायमानो	विधीयमानो
४२१	१७	त्र किञ्च	अत्र किञ्च
४२२	१७	नाम्ना इव	नाम्न इव

पृष्ठे	पङ्क्तौ	मुद्रितः पाठः	शुद्धः पाठः
४२२	२५	अभिधात्रीः	अभिधात्री
४२३	२	०वेष्ठित०	०वेष्टित०
४२४	८	पदार्थान्तरानां	पदार्थान्तराणां
४२४	१०	बूयात्	ब्रूयात्
४२४	२७	०पाराध्र्याना०	०पारार्थ्याना०
४२६	१६	ग्रन्थस्य स्पष्टा०	ग्रन्थस्यास्पष्टा०
४२७	२६	०द्याङ्क्याह	०द्याशङ्क्याह